Barcode : 4990010095922
Title - Shabdartha Chintamani vol. 2
Author - N. A.
Language - sanskrit
Pages - 606
Publication Year - 0
Barcode EAN.UCC-13
4 990010 095922

[illegible]
प्राकृतसारग्रंथानामिदं वाणिविश्रामकं।

LIBRARY

श्लोकः

कोशं शब्दार्थ चिन्तामणि मथ रहितं पूर्णभावेन पूर्णं
कृत्वा श्रीसज्जनेश स्त्रिदिवपथ गत स्तत्प्रचाराय लोके ॥
तत्सूनु स्तातभक्तो नरपति फतह : सिंह भूपैकवीर :
विद्वत्कंठैकशोभा भरण विधिरुचिः प्रेपयत्येक कोशम्. ॥ १ ॥

श्रीम त्फ़तह सिंहस्य नृपतेः परमा ज्ञया ॥
कविराजः श्यामलाख्यः कोशं प्रेपयति ध्रुवम्. ॥ २ ॥

By order of H. H. Maha Rana Fatch Singh
Presented to the Library, As. Society, Bengal
Calcutta

Oodeypore
July 1/86

(S.) K. R. Shyamul Da

Vol. II

NOTICE.

THE SHABDARTH CHINTAMANI.

A NEW SANSKRIT LEXICON.

This new and valuable work, in the compilation of which Brahmâvadhúta Shri Sukhânand Natha of Delhi, spent more than thirty years of his life, contains (as its name implies) the meanings of all words in general and colloquial use.

The following is a resumè of the plan on which this most useful work has been arranged:

1st. The word-forms have been tested by the process suggested in the Grammatical Sutras of Panini.

2nd. The meanings of the words are derived from their roots, by which means not only correctness, but clearness of conception are secured. The Primary meaning is given first, and others are described according to their logical order.

The utmost care has been taken to express the meanings of the words in the best and simplest language — a feature in the construction of this work, which cannot fail to recommend it above all others for practical use.

3rd. Another point is well worthy of notice in the work, viz; that words which have special reference to Aryan Literature whether the Smritis, Purâns or Vedas, are clearly and briefly explained.

4th. Special attention has been paid to the full definition of Scientific and Technical terms, whether these occur in the Vedas, Vedangas, Shastras, Chemistry, Mechanics or Music.

5th. The descriptions of weapons of warfare, metals, precious stones; and the directions for preparing the different kinds of soil for planting garden — and forest-trees are fully given.

6th. The officinal and non-officinal properties of drugs and the immediate causes of those diseases for which they may be given, have been fully described according to the best Medical Treatises on the subject.

7th. The author has specially adapted his work for Educational purposes in explaining the various Figures of Rhetoric employed in Poetry; also those feelings Poetry is calculated to excite, and by describing the different Metres.

8th. In the arrangement of the words the Alphabetical order is strictly preserved.

From these points it will be clearly seen that this excellent work will be an unerring guide to those who seek information on Political as well as Practical matters.

Fully convinced of the usefulness of such a Lexicon, Adi Gaur, Pt. Ghâsi-Râm (late Gumasta of Govt. Commrt Agra) resolved to undertake the publication of the first 2Vols. as far as the letter [न] but on account of the want of pecuniary assistance, he could not finish the remaining portion of the Dictionary.

About 16 years ago, the first two volumes were published, and are now in the libraries of many of the Chiefs, Nobles and Pandits of India, who deeply regret that the remaining 2vols. are not in their possession.

However, no one seemed willing to undertake this arduous and important task until H. H. the late Mahá Râná Sajjan Singh. G. C. S. I. of Meywâr, who during his life-time was the Patron of Art and Literature, on hearing through Kavi Râja Shyâmal Dâs of this unfinished Dictionary, issued orders that the remaining 2vols [3rd &. 4th.] should be printed in the Râj Press with all possible rapidity. So minute were H. H. the late Mahâ Rânâ's directions that he expressed the desire that the same kind of paper be used and type of equal clearness and legibility employed as in the first two volumes.

In fulfilment of His Highness' wishes, the work has been completed.

It is therefore requested that those who are desirous of obtaining the Lexicon send their names and full address to the undersigned.

Oodeypore, June 1883

Pundit, Bansi Dhar [illegible]ai, Manager, [illegible]

S|O
491·23
S113 R
v. 2

चः

चः । अ । अन्वाचये ॥ यत्रैकस्य प्राधान्येनाऽपरस्य गौणत्वेनाख्यानं सोऽन्वाचयः । यथा । भोवटो भिक्षामट गाञ्चानयेति । अत्र भिक्षाटनं प्रधानं तत्कुर्वाणो यदि गां पश्यसि तदा तामप्यानय नोचेत् भिक्षामेवाटेति ॥ समुच्चये । परस्परनिरपेक्षस्यानेकस्य कस्मिंश्चिदन्वये ॥ यथा । ईश्वरं गुरुञ्च भजस्वेति । उभयत्र न समासोऽसामर्थ्यात् ॥ इतरेतरयोगे । अन्योन्यार्थे । मिलितानामन्वये ॥ समाहारे । समूहे ॥ पक्षान्तरे ॥ पादपूरणे ॥ अवधारणे ॥ हेतौ ॥ तुल्ययोगितायाम् ॥ विनियोगे ॥ चनति चिनोति वा । चन शब्दे चिञ् चयने वा । अन्येभ्योपीति डः ॥ द्वौ चकारावविलम्बस्तु चकोऽभवतः ॥ चण्० यद्यर्थे स्यात् । समुच्चयादौ त्वनन्वयः ॥

चः । पुं । चण्डेशे ॥ कच्छपे ॥ चन्द्रे ॥ चौरे ॥ चवर्णे ॥ त्रि । दुर्जने ॥ निर्बीजे ॥

चकासत् । त्रि । प्रकाशमाने ॥ चकास्ति । चकास्दीप्तौ । लटः शत्रादेशः ॥

चकितम् । न । भयसंभ्रमे ॥ त्रि । शङ्किते ॥ भीते ॥ तस्यलक्षणम् । प्रियाग्रे चकितं भीते रस्थानेपि भयं महदिति ॥

चकिता । स्त्री । अष्टिसंज्ञकषोडशाक्षरायांवृत्तौ ॥ भात् समतनगै रष्टच्छेदेस्यादिह चकिता ॥ दुर्जयदनुजश्रेणी दुश्चेष्टाशतचकिता यद्भुजपरिघत्राता यातासाध्वसविगमम् । दीव्यन्निदिविपन्माला शश्वन्नन्दनविपिने गच्छत शरणं कृष्णं भोभीता भवरिपुतः ॥

चकोरः । पुं । स्वनाम्नाप्रसिद्धे पक्षिविशेषे । कौमुदीजीविनि । चन्द्रिकापायिनि ॥ चटकं शीतलं रुच्यं वृष्यं कापिञ्जलाभिषम् । तद्वच्चकोरजं मांसं हृद्यञ्च बलपुष्टिदम् ॥ चकति । चकतृप्तौ । कठिचकिभ्यामोरन् ॥

चकोरकः । पुं । चकोरे ॥ स्वा० कन् ॥

चक्रः । पुं । कोके । चक्रवाके । चकवा इतिप्रसिद्धे पक्षिणि ॥ न । व्रजे । गणे ॥ सैन्ये ॥ रथाङ्गे । चक्का पैया इतिचभाषा ॥ राष्ट्रे ॥ दम्भान्तरे ॥ कुम्भकारोपकरणे । चाक इतिभा

षा ॥ अस्त्रविशेषे । प्रहरणे ॥ पुटभेदे । जलावर्त्ते ॥ ग्रामजाले ॥ तगरपुष्पे ॥ महाभारतप्रसिद्धे व्यूहविशेषे ॥ तैलयन्त्रे ॥ मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्येषु शरीरस्थेषु षट्सु ॥ सर्वतोभद्रादौ । देवार्चाधारयन्त्रे ॥ मन्त्रदीक्षोपयोगिष्वकडमादिषु ॥ श्रीचक्रे ॥ कौलिकानां हितार्थाय श्रीसदाशिवोक्तेषु महाचक्रादिपञ्चसु ॥ यथा । श्रीश्वर उवाच । चक्रं पञ्चविधं प्रोक्तं श्रीतन्त्रे रुद्रयामले । विधिनापूजिते चक्रे सौख्यमोक्षफलं लभेत् ॥ महाचक्रं चक्रराजं दिव्यचक्रं तथापरम् । वीरचक्रं चतुर्थं च पशुचक्रञ्च पञ्चममिति ॥ पञ्च चक्रे सकामानामधिकारः । यथा । राजचक्रं राज्यदं स्यात् महाचक्रन्तु मोक्षदम् । देवत्वदं देवचक्रं वीरचक्रन्तु सिद्धिदम् ॥ पशुचक्रन्तु दारिद्र्यदुःखशोकामयप्रदम् । कापथ्योदक्षिणाहीने सर्वचक्रन्तु निष्फलमिति ॥ सकामाश्चैव निष्कामा द्विविधा भुवि मानवाः । क्षुद्राशयाः कामिनो ये तेषामत्राधिकारिता ॥ * ॥ ब्रह्म[illegible]नायतु मोक्षं शैरवी चक्रमुत्तमम् ॥ ब्रह्मज्ञानयतानान्तु तत्त्वचक्रेऽधिकारिता ॥ यथोक्तं श्रीमहानिर्वाणे । नात्राधिकारः सर्वेषां ब्रह्मज्ञान साधकान् विना । परब्रह्मोपासका ये ब्रह्मज्ञा ब्रह्मतत्पराः । शुद्धान्तःकरणाः शान्ताः सर्वप्राणिहिते रताः ॥ निर्विकारा निर्विकल्पा दयाशीला दृढव्रताः । सत्यसङ्कल्पका ब्राह्मा स्त एवात्राधिकारिणः ॥ ब्रह्मभावेन तत्त्वज्ञे ये पश्यन्ति चराचरम् । तेषां तत्त्वविदां पुंसां तत्त्वचक्रेऽधिकारिता ॥ सर्वब्रह्ममयं भावश्चक्रेऽस्मिंस्तत्त्वसंज्ञके । येषामुत्पद्यते देवि त एव तत्त्वचक्रिण इति ॥ छन्दोविशेषे । यथा । कुण्डलकलितमगणमिह त्रितयं गन्धकुसुमरसविरचय वलयम् । चक्रमुरगपतिवरपरिगणितं षोडशकलमतिसुललितभणितम् ॥ सुन्दरि नभसि जलदचयरुचिरे देहि नयनयुगमतिघनचिकुरे । मानमिह हि जहि जलधरसमये किन्तव भवति हृदयमिद मदयेदिति ॥ क्रियतेऽनेन । घञर्थे कः । के कृञादीनामिति द्वित्वम् ॥ अर्द्धर्चादिः ॥

चक्रकः । त्रि । तर्कविशेषे ॥ अन्योन्याश्रयमेवावर्त्तितं चक्रकं भवति । स्वापेक्षापेक्षापेक्षित्वनिबन्धनेऽनिष्टप्रसङ्गे । चतुष्कचादावपि स्वस्य

स्वापेक्षापेक्ष्यपेक्षित्वसत्त्वान्नाधिक्य-
म्॥ अस्यात्माश्रयवत् त्रैविध्यम्॥
अपिचास्यलक्षणं यथा। स्वापेक्ष
णीयापेक्षितसापेक्षितत्वनिबन्धनप्र
सङ्गत्वमिति। अपेक्षाच प्रभावुत्प
त्तौ स्थितौच ग्राह्या। तत्राद्या यथा
। एतद्घटज्ञानं यद्येतद्घटज्ञानज
न्यज्ञानजन्यज्ञानजन्यंस्यात् तदा ए
तद्घटज्ञानजन्यज्ञानजन्यज्ञानभि
न्नं स्यात्। द्वितीया यथा। घटोयं
यद्येतद्घटजन्यजन्यजन्यः स्यात् त
दा एतद्घट जन्यजन्यभिन्नः स्यात्
। तृतीया यथा। घटोयं यद्येतद्घ
टवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्ये
तेति। इतितर्कशास्त्रम्॥

चक्रकारकम्। न। व्याघ्रनखाख्येगन्ध
वस्तुनि। करजे॥ चक्रस्यकारकम्॥

चक्रकुल्या। स्त्री। पृश्निपर्ण्याम्॥

चक्रगजः। पुं। चक्रमर्द्दे॥

चक्रगण्डुः। पुं। वर्त्तुलाकारोपधाने।
मसुरे। गालसिर्हाना गोलसिर्हा
ना इति। पुं। [illegible]

चक्रगदाधरः। पुं। परमात्मनि वासुदे
वे॥ मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वा
त्मिकां गदाम्। धारयन् लोकर
क्षार्थं गुप्तश्चक्रगदाधरः॥ चक्रगदे
धरति। धृञ्०। पचाद्यच्॥ चक्रग
दयोर्धरोवा॥

चक्रगुच्छः। पुं। अशोकपादपे॥

चक्रजीवकः। पुं। कुलाले। कुम्भकारे
॥ चक्रं जीवनमस्य॥

चक्रदंष्ट्रः। पुं। शूकरे॥

चक्रदन्ती। स्त्री। दन्तीवृक्षे॥

चक्रदन्तीबीजम्। न। जयपाले॥

चक्रधरः। पुं। अजे। विष्णौ॥ अहौ
। सर्पे॥ त्रि। चक्रिणि॥ ग्रामजालि
नि॥ धरति। धृञ्०। अच्। चक्र
स्यधरः॥ चक्रंधारयतिवा। अच् बा
हुलकाण्णिलुक्॥

चक्रधारणम्। न। अक्षे। रथावयवे
काष्ठविशेषे॥

चक्रधारा। स्त्री। प्रधौ॥ चक्रस्यधारा॥

चक्रनखः। पुं। व्याघ्रनखाभिधेगन्ध
द्रव्ये॥

चक्रनदी। स्त्री। गण्डक्याम्॥

चक्रनामा। पुं। माक्षिकधातौ॥

चक्रनायकः। पुं। व्याघ्रनखे॥

चक्रपञ्चाटः। पुं। दद्रुघ्ने॥

चक्रपरिव्याधः। पुं। आरग्वधवृक्षे॥

चक्रपर्णी। स्त्री। पृश्निपर्ण्याम्॥

चक्रपाणिः। पुं। विष्णौ। नारायणे॥ च
क्रं पाणौ यस्य सः। प्रहरणार्थेभ्यःपरे
निष्ठासप्तम्याविति सप्तम्याःपरत्वम्॥

चक्रपादः। पुं। रथे॥ गजे। हस्तिनि॥

चक्रपुष्करिणी । स्त्री । मणिकर्णिकायाम् ॥

चक्रफलम् । न । अस्त्रविशेषे । अट्टने ॥

चक्रबन्धः । पुं । चित्रकाव्यविशेषे ॥

चक्रबन्धुः । पुं ।
चक्रबान्धवः । पुं । } रवौ ॥

चक्रभृत् । पुं । विष्णौ ॥

चक्रभेदिनी । स्त्री । रात्रौ ॥

चक्रभ्रमः । पुं ।
चक्रभ्रमिः । स्त्री । } कुन्दाख्ये शिल्पियन्त्रे । चक्राकारे शस्त्रोत्तेजनयन्त्रे । शाणे ॥

चक्रमण्डली । पुं । अजगरसर्पे ॥

चक्रमर्दः । पुं । चकवंड इति कर्वौंदी इतिच भाषाप्रसिद्धे क्षुपविशेषे । एडगजे ॥ चक्रमर्दो लघुः स्वादू रूक्षः पित्तानिलापहः । हृद्यो हिमः कफश्वासकुष्ठदद्रुकृमीन् हरेत् ॥ हन्त्युष्णं तत् फलं कुष्ठकण्डुदद्रुविषानिलान् । गुल्मकासकृमिश्वासनाशनं कटुकं स्मृतम् ॥ चक्रं दद्रुं मर्दनाति । मर्दचोदे । कर्मण्यण् ॥

चक्रमर्दकः । पुं । चक्रमर्दे ॥ स्वा॰ कन् ॥

चक्रयानम् । न । असाङ्ग्रामिके रथे । पुष्परथे ॥

चक्रयानकम् । न । चक्रयाने ॥

चक्ररदः । पुं । शूकरे ॥

चक्रसंबद्धः । पुं । विष्णौ ॥ रथे ॥

चक्रलक्षणा । स्त्री । गुडूच्याम् ॥

चक्रलताम्रः । पुं । बहुरसालवृक्षे ॥

चक्रला । स्त्री । उच्चटायाम् । मुस्ताविशेषे ॥ चक्रं लाति । ला॰ । आत इति कः ॥

चक्रवर्त्ती । पुं । समुद्रपरिवृतायाः सर्वभूमेरीश्वरे । सार्वभौमे ॥ चक्रे भूमण्डले राजमण्डले वर्त्तितुं चक्रं सैन्यं वर्त्तयितुं सर्वभूमौ चालयितुं वाशीलमस्य । सुपीतिणिनिः ॥ अवश्यं वा चक्रं वर्त्तयति । आवश्यके णिनिः ॥ वास्तूके ॥ डगणे मध्यगुरौ । ४ । संज्ञायाम् ॥ त्रि । चक्रवर्त्तिनि ॥

चक्रवर्त्तिनी । स्त्री । जन्याम् । अलक्तकायाम् ॥ अलक्तके ॥ जटामांस्याम् ॥

चक्रवाकः । पुं । कोकपक्षिणि । चकवा इति भाषा ॥ अस्यमांसं लघु स्निग्धंबलप्रदमुदाहृतम् ॥ चकशब्देन उच्यते । वचपरिभाषणे । घञ् । न्यङ्क्वादिः ॥

चक्रवाकी । स्त्री । चक्रवाकस्य स्त्रियाम् । चकवी इति [illegible] जातेरितिङीष् ॥

चक्रवाटः । पुं । क्रियारोहे ॥ शिखातरौ ॥ पर्यन्ते ॥ मेरोर्मस्तकसमीपे लोकपालाश्रयभूताया सहस्रयोजनविस्तीर्णायां नेमौ ॥

चक्रवाडः । पुं । लोकालोकाख्यपर्वते ॥ चक्राकारेण वाडते । वाडृ आप्लाव्ये । अच् ॥ न । चक्रवाले । मण्डले ॥ चक्रं भूमण्डलं वलते । वल वेष्टने । कर्मण्यण् । डलयोरैकत्वम् ॥

चक्रवातः । पुं । वात्यायाम् । ववूरा इति भाषा ॥

चक्रवालः । पुं । लोकालोकपर्वते ॥ न । मण्डलाकारेण परिणतसमूहे । मण्डले ॥ चक्राकारेण वलते । वल संवरणे । अच् । अन्येषामपीति दीर्घः ॥ यद्वा । भावे घञि वालः । चक्रमिव वालोऽस्य ॥ चक्रं भूमण्डलं वलते । वल वेष्टने । कर्मण्यण् वा ॥ चक्रवालमस्याऽस्तीति वा । अर्श आद्यच् ॥

चक्रवृद्धिः । स्त्री । यत्र वृद्धिरूपं धनं दातुमशक्तोऽधमर्णः सवृद्धिकमिदं दास्यामीति स्वीकरोति तत्रयावृद्धिः सा । सूदका सूद इति भाषा ॥ वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति नारदः ॥

चक्रव्यूहः । पुं । युद्धार्थं मण्डलाकारेण सैन्यरचनायाम् ॥

चक्रशल्या । स्त्री । काकतुण्ड्याम् ॥ श्वेतगुञ्जायाम् ॥

चक्रश्रेणी । स्त्री । अजशृङ्ग्याम् ॥

चक्रसंज्ञम् । न । वङ्गे ॥

चक्रसम्वरः । पुं । बुद्धभेदे । वज्रटीके ॥

चक्रा । स्त्री । नागरमुस्तायाम् ॥ कर्कटशृङ्ग्याम् ॥

चक्राङ्गः । पुं । श्वेतगरुति । हंसे ॥ चक्राण्यङ्गान्यस्य ॥ रथे ॥ चक्रमङ्गमस्य ॥

चक्राङ्गा । स्त्री । सुदर्शनायां लतायाम् ॥

चक्राङ्गी । स्त्री । कटुरोहिण्याम् ॥ छिलमोचिकायाम् ॥ मञ्जिष्ठायाम् ॥ वृषपर्ण्याम् ॥ कर्कटशृङ्ग्याम् ॥ चक्राकारमङ्गमस्याः । गौरादित्वान् ङीष् ॥ हंस्याम् ॥

चक्राटः । पुं । विषवैद्ये ॥ धूर्त्ते ॥ दीनारे ॥

चक्राधिवासी । पुं । नारङ्गवृक्षे । किर्मीरत्वचि ॥

चक्रावर्त्तः । पुं । घूर्णने ॥

चक्राह्वः । पुं । चक्रमर्दे ॥

चक्रिकः । पुं । घटिके । घटिकावादके ॥ चक्रं वाद्यत्वेनास्त्यस्य । ठन् ॥

चक्रिका । स्त्री । दुरद्योगे ॥ घुणावर्त्ते ॥ जानुनि ॥ चक्ती इतिभाषा प्रसिद्धे द्रव्यस्वरूपे ॥

चक्री । पुं । जालिकभिदि ॥ कोके ॥ कुलाले ॥ अहौ ॥ सूचके ॥ वैकुण्ठे । नारायणे ॥ चक्रं मनस्तत्त्वात्मकं सुदर्शनाख्य मस्यास्ति इनिः ॥ चक्रवर्त्तिनि ॥ चक्रमर्दे ॥ तिनिशे ॥

व्याघ्रनखे ॥ काके ॥ खरे ॥ त्रि । चक्रविशिष्टे ॥ चक्रमस्यास्ति । अतइनिठनाविति इनिः ॥ चक्रयुक्तरथादियानारूढे ॥

चक्री । स्त्री । चक्की इतिसर्वजनप्रसिद्धायां चूर्णपेषण्याम् । जाँता इति भाषा ॥

चक्रीवान् । पुं । गर्द्दभे ॥ चक्रवद्भ्रमणं चक्रम् । तदस्यास्ति । मतुप् । आसन्दीवदितिसाधुः ॥ चक्रीवान्नाम राजापि ॥

चक्रुः । पुं । कर्त्तरि ॥ करोति । डुकृञ्० । कुर्भ्रश्चेति चकारात्कुःप्रत्ययोधातोर्द्वित्वञ्च ॥

चक्रेश्वरी । स्त्री । जिनानांविद्यादेवीविशेषे ॥ इतिहेमचन्द्रः ॥

चक्षणम् । न । अवदंशे । मद्यपानरोचकभक्ष्यद्रव्ये । चखना इति भाषा ॥

चक्षाः । पुं । वृहस्पतौ ॥ उपाध्याये ॥

चक्षुःश्रवाः । पुं । सर्पे ॥ चक्षुःश्रवःकर्णो ऽस्य । सान्तः ॥

चक्षुर्वर्द्धनम् । न । मेषशृङ्गीवृक्षे ॥

चक्षुष्यः । पुं । केतके ॥ पुण्डरीकवृक्षे ॥ शोभाञ्जनवृक्षे ॥ रसाञ्जने ॥ न । सौवीराञ्जने ॥ खर्परीतुत्थे ॥ प्रपौण्डरीके । स्थलपद्मे ॥ त्रि । प्रियदर्शने ॥ अक्षिहिते ॥ चक्षुषादर्शनीये ॥ चक्षुषेहितम् । शरीरावयवाद्यत् ॥

चक्षुष्या । स्त्री । कुलत्थिकायाम् ॥ सुभगायाम् ॥ अजशृङ्ग्याम् ॥ अरण्यकुलत्थिकायाम् ॥ चक्षुषेहिता । यत् । टाप् ॥

चक्षुः । न । लोचने । नयने । नेत्रे । रूपग्रहणलिङ्गेन्द्रिये । रूपप्रकाशके ॥ उद्भूतरूपं नयनस्यगोचरो द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम् । गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोरिति कारिकावली ॥ पाणिभ्यांन स्पृशेच्चक्षुः चक्षुषी नैकपाणिनेतिकर्मलोचनम् ॥ चष्टे पश्यत्यनेन चष्टेरूपमनुभवत्यनेन वा । चक्षिङ्० । चक्षेःशिच्चेत्युसिः । शिच्वादनार्द्धधातुकत्वात् ख्याञ् न ॥ मेषशृङ्गीवृक्षे ॥

चङ्कुरः । पुं । स्यन्दने । रथे ॥ वृक्षे ॥ न । धोरणे । यानमात्रे ॥ चङ्कति । चकिः सौत्रः । मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् ॥

चङ्क्रमणम् । न । अतिशयभ्रमणे । इतस्ततो भ्रमणे ॥ पुनः पुनर्भ्रमणे ॥ अनतिदेशपीडाकारकचङ्क्रमणस्य गु-

णाः । आयुर्बलमेधाग्नीन्द्रियशुद्धिकारित्वम् ॥ सदापानद्रहितपादचङ्क्रमणगुणाः । अनारोग्यत्वम् । अनायुष्यत्वम् । इन्द्रियदृष्टिनाशित्वञ्चेति राजवल्लभः ॥

चङ्गः । त्रि । शोभने ॥ दक्षे ॥ इति मेदिनी ॥

चचेण्डा । स्त्री । फललताविशेषे । वृहत् फले ॥

चञ्चः । पुं । पञ्चाङ्गुले ॥ चञ्चति । चञ्चु गतौ । पचाद्यच् ॥

चञ्चत् । त्रि । देदीप्यमाने ॥

चञ्चत्पुटः । पुं । तालप्रभेदे ॥ ताले चञ्चत्पुटेऽयं गुरुद्वन्द्वं लघुप्लुतम् ॥

चञ्चरी । स्त्री । तिन्तिडीवृते ॥ भ्रमर्याम् ॥

चञ्चरीकः । पुं । भ्रमरे । षट्पदे ॥ चञ्चति । चञ्चु० । पर्फरीकादित्वात् साधुः ॥ चरति वा । चर० । पर्फरीकादित्वादीकन् चरेर्नुमच ॥

चञ्चलः । पुं । कामुके ॥ अनिले ॥ त्रि । अस्थिरे । सदाचलनस्वभावे । लोले । तरले ॥ कदाचिच्चञ्चलासती । चञ्चति । चञ्चु० । वाहुलकात् अलच् ॥

चञ्चला । स्त्री । लक्ष्म्याम् ॥ तडिति ॥ पिप्पल्याम् ॥ वर्णवृत्तविशेषे । यथा । तूर्यतालपञ्चिराजमेरुहारनायकेन चामरध्वजेन चापि मण्डिता सुवर्णकेन । वर्णिताऽतिसुन्दरेण पन्नगेन्द्रपिङ्गलेन चञ्चलाचकोरचारुलोचने सुमङ्गलेन ॥ यथा । आलियाहि मञ्जुकुञ्जगुञ्जितालिलालितेन भास्करात्मजाविराजिरम्यतीरकाननेन । शोभिते स्थले स्थितेन सङ्गता यदूत्तमेन माधवेन भाविनी तडिल्लतेव नीरदेनेति ॥ चञ्चनम् । चञ्चु० । घञ् । चञ्चं लाति । ला० कः ॥

चञ्चा । स्त्री । नलनिर्माणे । नलनिर्मिते । चांच इति गौडभाषा ॥ तृणनिर्मितपुरुषे । वजूका इति भाषा ॥ चञ्चति । चञ्चु० । अच् । टाप् ॥ चञ्चेव मनुष्यः । लुम्मनुष्य इति कनो लुप् ॥

चञ्चुः । पुं । नाडीचशाके ॥ व्यडम्बके । रक्तैरण्डे ॥ एरण्डसामान्ये ॥ क्षुद्रचञ्चुवृक्षे ॥ स्त्री । पक्षिणामोष्ठे । त्रोट्याम् । चूंच इति भाषा ॥ चञ्चति । चञ्चु० । वाहुलकादुः ॥ चिञ्चुकायाम् । चेंचूनाडीतिख्याते ॥ चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा । धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका स्मृता ॥ शाकविशे-

षे। विजलायाम्। चीरपत्रिकायाम्॥

चञ्चुका। स्त्री। चञ्चौ। पक्षिणामोष्ठे॥

चञ्चुपत्रः। पुं। सुशाके। विजलायाम्॥

चञ्चुभृत्। पुं। स्त्री। } खगे। पक्षि

चञ्चुमान्। पुं। स्त्री। } णि॥

चञ्चुरः। पुं। चञ्चुशाके॥

चञ्चुसूचिः। पुं। } सुगृहे। पीततु

चञ्चुसूचिकः। पुं। } ण्डे। बया इतिभा

षा॥ चञ्चौसूचिरस्य। स्वार्थे कः॥

चञ्चूः। स्त्री। चञ्च्वाम्। चोञ्चाम्॥ ऊङुतः॥

चञ्चकः। पुं। चेंच इतिप्रसिद्धे शाके॥

चटकः। पुं। कलविङ्के। गृहनीडे। चिडा इतिभाषा॥ चटतिभिनत्ति गृहीतधान्यादिकं मुखेन। चटभेदने। पचाद्यच्। तस्मात् स्वार्थेकः॥

चटकका। स्त्री। चटकायाम्। चटकिकायाम्॥ उदीचामातःस्थानइति पक्षे इदादेशाभावः॥

चटका। स्त्री। चटकस्यस्त्रियाम्॥ चटकस्य चटकाया वा स्त्यपत्ये। चिडिया इतिभाषा॥ चटकस्य चटकाया वा स्त्यपत्यम्। चटकायाऐरक् स्त्रियामपत्येलुग्वक्तव्यः। तत्र टाबन्तात् तद्धितेलुप्ते लुकतद्धितलुकी तिटापोलुकि पुनरजादिलक्षणष्टाप् सच जातिलक्षणस्यङीषोबाधइति भावः॥ नचाव्रप्रत्ययस्थादितीकारः शङ्क्यः चटकायाऐरगितिविज्ञाद्दर्शादिषुनिपातनाद्वातद्प्रवृत्तेः। श्रिप कादित्वान्नेत्त्वमितितुयुक्तम्। पुंयोगलक्षणो जातिलक्षणोवा ङीष् अजादिपाठाद्बाध्यते॥ श्यामाखपक्षिणि॥

चटकाशिरः। न। पिप्पलीमूले॥ चटकायाःशिरइव॥

चटकिका। स्त्री। चटककायाम्॥ उदीचामातःस्थानेयकपूर्वायाः इतिपक्षेइदादेशः॥

चटु। अ। प्रियेवाक्ये॥

चटुः। पुं। चाटौ। प्रियेवाक्ये॥ व्रतिनामासने॥ पिचण्डे। उदरे॥ चटति। चट०। मृगय्वादित्वात् कुः॥

चटुलः। त्रि। चञ्चले॥ शोभने॥ चटति। बाहुलकादुलच्॥ मत्वर्थे सिध्मादित्वाल्लच्वा॥

चटुला। स्त्री। विद्युति॥ अजा० टाप्॥

चटुलोलः। त्रि। चाटुलोले। सुचञ्चले॥ इति हारावली॥

चट्टलम्। न। सिद्धपीठविशेषे॥ यथा। चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः। व्यक्तरूपा भगवती भवानी तत्रदेवता। विशेषतः कलियुगे वसामिचन्द्रशेखरे। इति॥

चणक: । पुं । मल्लविशेषे । हरिमन्थे ॥ चणक: शीतलो रूक्ष: पित्तरक्त कफापह: । लघु: कषायो विष्टम्भी वातलो ज्वरनाशन: ॥ सचाङ्गारेणसम्भृष्ट स्तैलभृष्टश्च तद्गुण: । आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तित: ॥ शुष्कभृष्टोऽतिरूक्ष: स्याद्वात कुष्ठप्रकोपन: । स्विन्न: पित्तकफं हन्यात् सूप: क्षोभकरोऽहित: ॥ आर्द्रातिकोमलो रुच्य: पित्तरक्तहरो-हिम: ॥ * ॥ हरिताद्रचणकरन्धनन्तु । सुहरितहरिमन्थ: क्षोदभिन्नो नखाग्रै: प्रथम मुदकसिक्तो वेसवारेणसिद्ध: । लवणमरिचसङ्गात् तैल-हिङ्गुप्रसिक्त: शिखरयति विशेषात्तु जाठरं मन्दवह्निम् ॥ छोलाभिधानकफलं परिगृह्य शुद्धं तप्ते घृते सुखलितकथितौषधाभ्याम् । संसाधितं सुरभितं शुचिरामठेन जिह्वातले विशतिनित्यमतिप्रकामम् ॥ चणयते । चणदाने । कुन् ॥ मुनिविशेषे ॥

चणकरोटिका । स्त्री । चणकमुद्रायाम् ॥ चाणक्यरोटिका रूक्षा श्लेष्मपित्तास्रनुद्गुरु: । विष्टम्भिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥

चणकशाकम् । न । स्वनाम्ना प्रसिद्धे शाके ॥ रुच्यं चणकशाकं स्याद् दुर्जरं कफवातकृत् । अम्लं विष्टम्भजनकं पित्तनुद्दन्तशोथहृत् ॥ सुकृतं चाणकं शाक मम्लतक्रेण साधितम् । सहिङ्गुलवणेनसे भर्जितंरामठान्वितम् ॥ क्षाराम्लभावसहजा श्चणकप्रवाला: सम्मर्दितामरिचसैन्धवशृङ्गबेरै: । सम्पूर्णिता: कटुकतैलयुतै: सुपक्वैर्भृष्टै:सुहिङ्गुचणकै: परिदत्तवासा: ॥

चणकात्मज: । पुं । वात्स्यायनमुनौ ॥

चणकाम्लम् । न । चणकक्षारे ॥ चणकाम्लक मत्युष्णं दीपनं दन्तहर्षणम् । लवणानुरसं रुच्यं शूलाजीर्णविबन्धनुत् ॥

चणकाम्लवा: । न । चेनस्यफलत्वकशाकपत्रशिशिरवारिणि ॥

चणद्रुम: । पुं । क्षुद्रगोक्षुरे ॥

चणपत्री । पुं । रुदन्तीवृक्षे ॥

चणिका । स्त्री । तृणविशेषे । गोदुग्धायाम् ॥

चण्ड: । पुं । तिन्तिडीवृक्षे ॥ यमकिङ्करे ॥ दैत्यविशेषे ॥ न । तीक्ष्णे ॥ त्रि । अतिकोपने ॥ तीव्रे ॥ तीक्ष्णवति ॥ चण्डते । चडिकोपे । पचाद्यच् ॥ चमति । चमुअदने । चणति वा । चणदाने । बाहुलकात् ड: ॥

चण्डता । स्त्री । उग्रतायाम् ॥ भावे तल् ॥

चण्डनायिका । स्त्री । दुर्गायाम् ॥ अष्टनायिकान्तर्गतनायिकाविशेषे ॥

चण्डमुण्डी । स्त्री । स्थानविशेषे ॥ यथा । चण्डमुण्डी महास्थाने दण्डिनी परमेश्वरीति ॥

चण्डरुद्रिका । स्त्री । विद्याविशेषे ॥

चण्डवती । स्त्री । चण्डीविशेषे ॥

चण्डवृष्टिप्रतापः । पुं । दण्डकविशेषे । यथा । यदिह नयुगलं ततः सप्तरेफाः सदा चण्डवृष्टिप्रतापो भवेद्दण्डकः । यथा । प्रलयघनघटासमारम्भमेघावली चण्डवृष्टिप्रतापाकुलं गोकुलम् सपदि समवलोक्य सव्येन हस्तेन गोवर्द्धनं नाम शैलं दधल्लीलया । कमलनयन रक्षरक्षेति गर्ज्जत्प्रसन्मुग्धगोपाङ्गनालिङ्ग-नानन्दितो गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय वइति ॥

चण्डा । स्त्री । धनहरीद्रुमे । चोरनामगन्धद्रव्ये ॥ शङ्खपुष्प्याम् ॥ अष्टनायिकान्तर्गतनायिकाविशेषे ॥ जिनानां शासनदेवताविशेषे ॥ लिङ्गिनीलतायाम् ॥ कपिकच्छ्वाम् ॥ आखुपर्ण्याम् ॥ श्वेतदूर्वायाम् ॥ पद्मावतीनद्याम् ॥ टाप् ॥

चण्डांशुः । पुं । सूर्ये ॥ चण्डा अंशवो यस्य सः ॥

चण्डातः । पुं । करवीरे ॥ चण्डमतति । अत० । कर्म्मण्यण् ॥

चण्डातकः । पुं । न । अर्द्धोरुके । वरस्त्रीणामर्द्धोरुपर्य्यन्तवस्त्रे ॥ चण्डां कोपनां वरस्त्रियमतति । अत० । क्वुन् ॥

चण्डालः । पुं । शूद्राद्ब्राह्मण्यामुत्पन्ने । प्लवे । मातङ्गे । दिवाकीर्त्तौ । श्वपचे । अन्त्याधमे ॥ चण्डते । चडि० । पतिचण्डिभ्यामालञ् ॥

चण्डालकन्दः । पुं । कन्दविशेषे ॥

चण्डालवल्लकी । स्त्री । चण्डालवीणायाम् । कण्डोलवीणायाम् । किङ्गरीतिभाषा ॥ चण्डालस्य वल्लकी ॥

चण्डालिका । स्त्री । किन्नराख्याम् ॥ उमायाम् ॥ ओषधीभेदे ॥

चण्डिः । स्त्री । चण्ड्याम् ॥ चण्डति । चडि० । सर्वधातुभ्य इन् ॥

चण्डिका । स्त्री । भवान्याम् । चण्ड्याम् ॥ अस्याः स्थानममरेशे ॥ चण्डे कर्त्तरि ण्वुल् । इत्वम् ॥

चण्डिकेश्वरः । पुं । शिवे ॥

चण्डिमा । पुं । चण्डत्वे ॥ चण्डस्य भावः । पृथ्व० इमनिच् ॥

चण्डिलः । पुं । रुद्रे ॥ वास्तूकशाके ॥ ना

षिते ॥

चण्डिला । स्त्री । नदीविशेषे ॥

चण्डी । स्त्री । कात्यायन्याम् । दुर्गायाम् ॥ हिंस्रायांनार्याम् ॥ कोपनायां योषिति ॥ मार्कण्डेयपुराणोक्ते श्रीदेवीमाहात्म्ये ॥ अतिजगतीसंज्ञकत्रयोदशाक्षरवृत्तिविशेषे । यथा । नयुगलसयुगलगैरिति चण्डी ॥ जयति दितिजरिपुताण्डवलीलाकुपितकचकचकरकालियमौलौ । चरणकमलयुगचापलचण्डी पदमवचितजितभोगमणिश्रीः ॥ चण्डति । चडिकोपे । पचाद्यच् । बह्वादिभ्यश्चेति ङीष् ॥

चण्डीकान्तः । पुं । सदाशिवे ॥ चण्ड्याः कान्तः ॥

चण्डीकुसुमः । पुं । रक्तकरवीरवृक्षे ॥

चण्डीशः । पुं । शिवे ॥

चण्डुः । पुं । उन्दुरौ ॥

चतुःपत्री । स्त्री । क्षुद्रपाषाणभेदिनि ॥

चतुःपर्णी । स्त्री । क्षुद्राम्लिकायाम् ॥

चतुःपला । स्त्री । नागबलायाम् ॥

चतुःपुण्ड्रः । पुं । भिण्डावृक्षे ॥

चतुःशालम् । न । सञ्जवने । अन्योन्याभिमुखगेहचतुष्टयगृहे ॥ चतस्रः शालाः समाहृताः । आबन्तो वेति क्लीवत्वम् ॥ पक्षे चतुःशाली ॥

चतुःषष्टिः । स्त्री । कलाभेदे । कलामन्युपविद्यायाम् ॥ सङ्ख्याभेदे । चौसठ इतिभाषा ॥ बह्वृचि । ऋग्वेदे ॥ चतुरधिकाषष्टिः ॥

चतुःसमम् । न । मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपे ॥ औषधविशेषे ॥ यथा । लवङ्गं सैन्धवं पथ्या यमानीचचतुःसमम् । आमशूलविबन्धघ्नं पाचनं भेदिशोधनम् ॥ अन्यच्च । जातीफलं त्रिदशपुष्पसमन्वितञ्च जीरञ्च टङ्कणयुतं चरकेण चोक्तम् । चूर्णानि माक्षिकसितासहितानि लीढ्वा आमातिसारमखिलं गुरु हन्ति शूलमिति ॥

चत्वारः । त्रि । सङ्ख्याविशेषे । चार इति भाषा ॥ सङ्ख्येये ॥ यथा । चत्वारो वेदाः । चतस्रः स्त्रियः । चत्वारि फलानि ॥ चतति चत्यते वा । चतेर्याचने । चतेरुरन् ॥

चतुरः । पुं । चक्रगण्डौ ॥ न । हस्तिशालायाम् ॥ त्रि । नेत्रगोचरे ॥ चाटुकारे ॥ कार्यकुशले । दक्षे । पटौ । निपुणे ॥ चतति चत्यते वा । चते० । मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् ॥

चतुरंसा । स्त्री । वर्णवृत्तप्रभेदे ॥ यथा । विजयरकसौ विष रसनसौ भ

वति यदासा किञ्चतुरंसा ॥ यथा । जयजयविष्णो त्रिभुवनजिष्णो । अपनय दुःखं प्रवितर सौख्यमिति ॥ यथा वा । नवरतिशालो यदिव नमालो । विविधविलासे सखि किमुदासे इति ॥

चतुरक्रमः । पुं । सप्तधारूपकान्तर्गतरूपकभेदे ॥ द्रुतद्वन्द्वं प्लुतद्वन्द्वं तथा प्राक्तो गुरुर्भवेत् । द्वाविंशत्यक्षरैर्युक्तः शृङ्गारे चतुरक्रम इति दामोदरोक्तः ॥

चतुरङ्गम् । न । हस्त्यश्वरथपदातिरूपे सैन्ये ॥ यथा । चतुरङ्गस्य पिवलं सुमहत् प्रसह्य हीति रामायणम् ॥ * ॥ चौरङ्गखेल इति सतरञ्जखेल इति च प्रसिद्धे क्रीडाविशेषे ॥ यथा । युधिष्ठिर उवाच । अष्टकोष्ठगा स्थया क्रीडा तां मे ब्रूहि तपोधन । प्रकर्षेणैव येनाथ चतूराजीयतो भवेत् ॥ व्यास उवाच । अष्टौ कोष्ठान् समालिख्य प्रदक्षिणक्रमेण तु । अरुणं पूर्वतः कृत्वा दक्षिणे हरितं बलम् ॥ पार्श्वपश्चिमतः पीतमुत्तरेश्यामलं बलम् । राज्ञो वामे गजं कुर्यात् तस्मादश्वं ततस्तरिम् ॥ कुर्यात् कोणेय पुरतो युद्धे पत्तिचतुष्टयम् । कोणे नौका द्वितीयेऽश्वस्तृतीये तु गजो भवेत् ॥ तुरीये तु भवेद्राजा वटिकाः पुरतः स्थिताः । * । पञ्चकेन वटी राजा चतुष्कोणेव कुञ्जरः ॥ त्रिकोणतु चलत्यश्वः पार्श्वे नौका द्वयेन तु । * । कोष्ठमेकं विलङ्घ्याथ सर्वतो याति भूपतिः ॥ अग्रएव वटी याति बलं हन्त्यग्रकोणगम् । यथेष्टं कुञ्जरो याति चतुर्दिक्षु महीपते ॥ तिर्य्यक्तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् । कोणकोष्ठद्वयं लङ्घ्य व्रजेन्नौका युधिष्ठिर ॥ * ॥ सिंहासनं चतूराजी न्वपाकृष्टन्तु षट्पदम् । काककाष्ठं वृहन्नौका नौकाकृष्टप्रकारकम् ॥ * ॥ घाताघाते वटी नौका बलं हन्ति युधिष्ठिर । राजा गजो हयश्चापि न्यस्य कृत्वा घातं निहन्ति च ॥ अत्यन्तं स्वबलं रक्षेत् स्वराजा बलमुत्तमम् । अल्पस्य रक्षणार्थं हन्तव्यं बलमुत्तमम् ॥ नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्याधिक्यमश्वस्य ॥ मतङ्गजस्य गर्व्वश्च राजा क्रीडति निर्भरम् । तस्मात् सर्वबलं दत्त्वा रक्षेत् कौन्तेय कुञ्जरम् ॥ सिंहासनं चतूराजी यदवस्थानतो भवेत् । सर्वसैन्यैर्गजैर्वापि रक्षितव्यो महीपतिः ॥ * ॥ अन्यद्राजपदं राजा यदाक्रान्तो युधिष्ठिर । तदा सिंहासनं तस्य भण्यते नृपसत्तम ॥ राजा च नृपतिं हत्वा

कुर्य्यात् सिंहासनं यदा। द्विगुणं वाह
येत् पणमन्यथैकगुणं भवेत् ॥ द्वि
गुणपणं दातव्यस्तेन प्रापयेत् ॥ मि
त्रसिंहासनं पार्थ यदारोहति भूपतिः
। तदासिंहासनं नाम सर्व्वं नयति त
त्पणम् ॥ यदासिंहासनं कर्त्तुं राजा-
षष्ठपदाश्रितः। तदाघातेपि हन्तव्यो
वलेनापि सुरक्षितः ॥ * ॥ विना मा
नेन्नृपेणैव स्वकीयेन नृपेण वा। प्रा
प्नोति च तदा तस्य चतुराजी यदाभवे
त् ॥ नृपेणैव नृपं हत्वा चतुराजीय
दाभवेत्। द्विगुणं वाहयेत् पणमन्य
थैकगुणं भवेत् ॥ स्वपदस्थं यदा रा
जा राजानं हन्ति पार्थिव। चतुरङ्गे
तदाभूपवाहयेच्च चतुर्गुणम्॥ यदा
सिंहासने काले चतुराजी समुत्थि
ता। चतुराजीभवत्येव न तु सिंहास
नं नृप॥ अथेदं वीक्षम्। उभयथाजये
ऽपि परसिंहासनाधिकारात् वरराज
वधेऽप्यर्थाधिक्यनिष्कण्टकत्वदर्शना-
त् क्रीडायामचितता कल्प्यते ॥
* ॥ राजद्वयं यदा हस्ते आत्मनोरा
भिसंस्थिते। परेणसंहृतश्चैको वस्ते
नाप्यपचार्य्यते ॥ राजद्वयं यदा हस्ते
न स्यादन्यकरेपरः। तदा राजाहि
राजानं घातेपि तं हनिष्यति ॥ नृ
पाकृष्टे यदा राजा गमिष्यति युधिष्ठि

र। घाताघातेपि हन्तव्यो राजा तत्र
नरक्षकः ॥ * ॥ कोणं राजपदं त्य-
क्त्वा घटिकान्तं यदा व्रजेत्। घटीन
येत् पदं नाम तदा कोष्ठवलं च षट् ॥
यदि तस्य भवेत् पार्थ चतुराजी च षट्
पदम्। तदापि च चतूराजीभवत्येव
न संशयः॥ यदा ते: षट्पदे विद्धे रा
जा वा हस्तिना तथा। षट्पदं न भवे
त् तस्य अवश्यं शृणु पार्थिव॥ सप्तमे
कोष्ठके यां स्याद् घटिकाद्यमकेन वै। तदा
न्योन्यं च हन्तव्यं सुखाय दुर्व्वलं वलम्
॥ त्रिघटीकस्य कौन्तेय पुरुषस्य क-
दाचन। षट्पदं न भवत्येव इति मे
तमभाषितम्॥ * ॥ नौकैका घटि
का यस्य विद्यते खेलने यदि। गाढाव
टीति विख्याता पदं तस्य न दुष्यति ॥
गाढा घाण्यापदं राजपदं कोणपदञ्च
तत्। * । हस्तेरङ्गे वलं नास्ति काक
काष्ठं यदा भवेत् ॥ वदन्ति राक्षसाः
सर्व्वे तस्य न स्तो जयाजयौ। * । प्रा
र्थिते पञ्चमे राशि स्तवन्ध्याञ्च षट्प
दे॥ अशेषं स्यात्तदा राजन् चलित्वा
चाक्षितं पदम्। द्विराष्ट्रस्या गतौ त
स्माद्वन्यात् परवलं जयी॥ पार्थ सिंहा
सने काले काककाष्ठं यदा भवेत्। सिं
हासनं भवत्येव काककाष्ठं न भण्य
तेऽ। * ॥ उपविष्टश्चयत् स्थानं त-

स्योपरि चतुष्टये । नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥ नौकाचतुष्टयं तत्र वृषनौकेति भण्यते । * । नकुलोऽदेकदा राजन् गजस्याभिमुखं गतम् ॥ यदि कुर्वीत धर्मज्ञ पापनाशो भविष्यति । स्थानाभावे यदा पार्थ हस्तिनं हस्तिसम्मुखम् ॥ करिष्यति-तदा राजन्निति गौतमभाषितम् । प्राप्ते गजवधे राजन् कृत्स्नयोगामतो गजः ॥ इति तिथ्यादितत्त्वे चतुरङ्गक्रीडनम् ॥

चतुरङ्गा । स्त्री । घोटिकावृक्षे ॥

चतुरङ्गिणी । स्त्री । सेनायाम् ॥ रथगजहयपदातयः चत्वारि अङ्गानि यस्याम् सा ॥

चतुरङ्गुलः । पुं । आरग्वध इति प्रसिद्धे आरग्वधवृक्षे ॥ चतस्रोऽङ्गुलयः प्रमाणमस्य पर्वणस्तद्योगात् इत्यपि ॥

चतुरब्दा । स्त्री । चतुर्वर्षगवि ॥ चत्वारोऽब्दा वयःप्रमाणमस्याः । आर्षीवष्टक् । अध्यर्द्धेति लुक् ॥

चतुरम्लम् । न । कोलदाडिमवृक्षाम्लाऽम्लवेतसे ॥ अम्लवेतसवृक्षाम्लवृक्षजम्बीरनिम्बुकैः । चतुरम्लमिदं प्रोक्तं ग्रन्थे भावप्रकाशके ॥

चतुरस्रः । त्रि । चतुष्कोणे ॥ चतस्र, तुर्याऽहसमस्थाने । समाश्चतुर्थे निध

ने चतुरस्रसंघे ॥ चतस्रोऽस्रयोऽस्य । सुप्रातसुश्वेत्यचञ्जोनिपातितः ॥

चतुरात्मा । पुं । परमात्मनि परमेश्वरे ॥ सर्गादिषु पृथग्विभूतयश्चतस्रः-आत्मानःसन्त्यस्य । यथा । ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः । विभूतयो हरे रेता जगतःसृष्टिहेतवः ॥ विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः । चतुर्द्धा प्रलयायैता जनार्द्दनविभूतयः ॥ इति विष्णुपुराणम् ॥ यद्वा । रागद्वेषादिरहितत्वात् चतुरं मनः आत्मा अस्य । मनोबुद्ध्यहङ्कारचित्तचतुष्टयात्मत्वाद्वा ॥

चतुराननः । पुं । ब्रह्मणि । अजयोनौ ॥ यथा । तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः । परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानीति । श्रीभागवतम् । चत्वारि आननान्यस्य ॥

चतुरूषणम् । न । कणामूलसहिते त्र्यूषणे ॥ त्र्यूषणं सकणामूलं कथितं चतुरूषणम् । व्योषस्यैव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥

चतुर्गतिः । पुं । नारायणे ॥ चतुर्गा

माश्रमाणां वर्णानाञ्च यथोक्तकारिणां गतिराश्रयः ॥ कच्छपे ॥

चतुर्जातकम् । न । त्वगेलापत्रकनागकेसरेषु ॥ एतच्चरोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् । लघुपित्ताऽग्निकृद्वर्ण्यं कफवात विषापहम् ॥

चतुर्थः । त्रि । तुरीये ॥ चतुर्णां पूरणः । तस्यपूरणेडट् तस्युगागमः ॥

चतुर्थकः । पुं । चतुर्थेह्नि चतुर्थक इति ख्यातख्याते विषमज्वरविशेषे ॥ चतुर्थेह्निभवः । कालप्रयोजनाद्रोग इति कन् । दिनद्वयन्त्वतिक्रम्य यःस्यात्सहि चतुर्थकस्त्युक्तः । चतुर्थकश्चतुर्थेऽह्नीत्यचागमादिमंगृहीत्वाव्याख्येयम् ॥

चतुर्थांशः । त्रि । चतुर्भागैकभागे । तुरीये । पादे ॥

चतुर्थिका । स्त्री । पलपरिमाणे ॥

चतुर्थी । स्त्री । चन्द्रस्यचतुर्थकलाक्रियारूपायांतिथौ ॥ तत्रजातस्यफलं यथा । स्वपुत्रमित्रप्रमदाप्रमोदी दृष्टाभिलाषी कृपया समेतः । विवादशीलो विजयी विवादे भवेच्चतुर्थीप्रभवः कठोर इति ॥ ङेभ्याम्भ्यस् इति चिके ॥ टित्वान्ङीप् ॥

चतुर्दन्तः । पुं । ऐरावते । इन्द्रस्यगजे ॥ चत्वारोदन्ताः यस्य ॥

चतुर्दशः । त्रि । चतुर्दशानांपूरणे ॥ तस्यपूरणेडट् ॥

चतुर्दश । त्रि । सङ्ख्याविशेषे १४ ॥ सङ्ख्येये ॥ चत्वारश्च दशच ॥ चतुरधिकादशवा ॥

चतुर्दशभुवनम् । न । पञ्चीकृतेभ्यो भूतेभ्योजातानि भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानि उपर्युपरिविद्यमानानि सप्त । अतलवितलसुतलरसातलतलातलमहातलपातालनामकानि अधोऽधोविद्यमानानिच सप्त । मिलित्वाचतुर्दशभुवनानि भवन्ति ॥ चतुर्दशानां भुवनानांसमाहारः ॥

चतुर्दशलोकम् । न । चतुर्दशभुवने ॥

चतुर्दशी । स्त्री । चन्द्रस्य चतुर्दशकलाक्रियारूपायांतिथौ ॥ तत्रोत्पन्नस्य फलम् । यथा । विरुद्धशीलः पुरुषः सरोषश्चौरः कठोरः परवञ्चकश्च । परान्नभोक्ता परदारचित्तश्चतुर्दशीचेज्जननस्य कालेइति ॥ टित्वान्ङीप् ॥

चतुर्दोलः । पुं । न । चण्डोलइति च दोल इति ख्याते द्विपदवाह्ये यानविशेषे ॥ यथा । राज्ञोयद् द्विपदं यानं विशेषाख्यमलंविदुः । चतुर्भिर्वाह्यतेयत्तुचतुर्दोलंतदुच्यते इति-

॥ अश्वभोजः । चतुर्भिर्वाहकै र्दण्डैः षड्भिःकुम्भै सुसंस्थितैः । स्तम्भैरष्टाभिरुदितं चतुर्दोलमनुत्तमम् ॥ * ॥ तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् । चतुर्विधानां भूपानां चतुर्द्दोलाः प्रकाशिताः ॥ त्रिहस्तसम्मितायामो द्विहस्तपरिणाहवान् । हस्तद्वयोन्नतः प्रोक्तश्चतुर्दोलोजयाख्यया ॥ १ ॥ चतुर्हस्तायतो यस्तु सार्द्धद्विहस्तदन्यथा । चतुर्दोलःसमाख्यातःकल्याणस्तावदुन्नतः ॥ २ ॥ पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् । तावद्देवोन्नतोवीरश्चतुर्दोलउदाहृतः ॥ ३ ॥ आयामपरिणाहाभ्यांचतुर्हस्तमितोहि यः । चतुर्दोलोह्ययंसिंहस्तद्द्वैर्नोन्नतः शुभः ॥ ४ ॥ * ॥ सर्वोयद्विविधः प्रोक्तः सच्छदिश्चापिनिश्छदिः । आद्यःसमरवर्षासु परःकेलिघनात्यये ॥ * ॥ सर्वेषामेवकाष्ठानां दण्डःस्याद्वज्रसारणः । चन्दनेनैवघटना सर्वेषामुपयुज्यते ॥ लोमजंसर्ववस्त्रेषु कनकं सर्वधातुषु । कुम्भश्च पद्मकोषश्चगिरिश्चेति यथाक्रमम् ॥ चैद्देशानांमहीन्द्राणां चतुर्दोलेषुविन्यसेत् ॥ दर्प्पणंचार्द्धचन्द्रश्च हंसःकेकी शुको गजः । अश्वः सिंहश्चत

स्याग्रेआदिश्याद्दिश्योत्तरान् ॥ मणिनियमस्तुदण्डवत् ॥ * ॥ रक्तः शुक्लश्च पीतश्च कृष्णश्चित्रस्तथारुणः । नीलः कपिल इत्युक्ताः पताकानान्तुसङ्ग्रहः ॥ चतुर्दोलः सपताकः शुभयानमितिस्मृतः ॥ * ॥ मुक्तास्तबकै र्दशभि र्युक्तः स्याद्राजकेशानाम् । चामरदण्डैर्दशभिर्द्दिग्जयिनांचतुर्दोलः ॥ चापपत्रस्य पुच्छश्चेत् सर्वोपरि परिन्यसेत् । याचासिद्धिरयंनाम्ना चतुर्दोलो महीभुजाम् ॥ स्तम्भच्छादरहितो निश्छदिरुक्तश्चतुर्दोलः । मानं पूर्ववत् ॥ * ॥ स पुन र्द्विविधः प्रोक्तः सध्वजश्चाथ निर्ध्वजः । ध्वजान्षडत्र न्यस्यन्ति षड्वर्गविजयैषिणः ॥ तेषां मानन्तु चत्वारः स्वामिहस्तै कसम्मिताः । कोणेषु पश्चाद्दग्रेच हस्तद्वयमितौ ध्वजौ ॥ सुवर्णं रजतं युग्मं त्रिविधानांमहीभुजाम् । मणिचामरकुम्भानांखड्गादीनां विनिश्चयः ॥ चतुर्दोलध्वजोराज्ञां विज्ञेयो नवदण्डवत् । निर्ध्वजेच चतुर्दोले मानमन्यतमंस्मृतम् ॥ आयामपरिणाहाभ्यां चतुर्हस्तमितोहि यः । विजयोनाम विख्यातश्चतुर्दोलो महीभुजाम् ॥ विजयो मङ्गलो भव्यो वितस्ये कैक

हस्तितः । त्रिविधानां महीन्द्राणां यानत्रयमुदाहृतम् ॥ * ॥ अष्टाभिर्हस्तैयस्तु अष्टदोलमुपस्थितम् । सोपानद्वितयश्चाङ्गविस्तीर्य्यं शिल्पिनिर्मितम् ॥ * ॥ भोजस्तु । अष्टाभिर्बाहकैर्दण्डैः षड्भिस्तु दशभिर्घटैः । स्तम्भैस्तु दशभिश्चैव अष्टदोलं महीभुजाम् ॥ तद्भेदा जयकल्याणवीरसिंहा यथा क्रमम् । चतुर्विधानां भूपानामष्टदोलाः प्रकीर्त्तिताः ॥ षड्भिर्हस्तैर्मितायामः परिणाहश्चतुर्भुजः । चतुर्हस्तोन्नतो राज्ञामष्टदोलं जयं विदुः ॥ आयामपरिणाहाभ्यां पञ्चहस्तमितोच्छ्रयः । कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोन्नतिः ॥ सप्तहस्तायतः कार्य्यप्रवरे पञ्चहस्तकः । पञ्चहस्तोन्नतो वीरस्त्वष्टदोलो महीभुजाम् ॥ आयामपरिणाहाभ्यामष्टहस्तमितोच्छ्रयः । सिंहनामाष्टदोलोऽयं विज्ञेयः षड्भुजोन्नतः ॥ * ॥ सर्व्वोऽयं द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः । काष्ठवस्त्रघटादीनां मणीनां चामरस्य च ॥ चतुर्दोलवदुन्नेयो नियमोऽन्योऽपि सूरिभिः । पूर्ववन्निश्छदेर्मानं ध्वजमानमिहोच्यते ॥ दशध्वजास्तेषु चाष्टौ स्वामिहस्तद्वयोन्नताः । पञ्च दशध्वजौ राज्ञस्तु हस्तमितौ मतौ ॥ मणिचामरपत्राणां निर्णयो निष्पताकवत् । निर्ध्वजश्चाष्टदोलोऽयः शिविकेति स गद्यते ॥ मणिकुम्भमुखादीनां नियमोऽमवद् षडवत् । इत्यष्टदोलकथनम् ॥ * ॥ एवं द्वादशषोडशविंशतिदोलादिकाः कार्य्याः ॥ मानं सार्द्धद्विगुणितं सार्द्धत्रिगुणितं युक्तमेतेषाम् । विंशतिदोलात् परतो भोजमते सम्भवेद्यानम् ॥ यानं वह्ननुयोज्यं वहुगुणमेतज्जगाद वै व्यासः ॥ * ॥ भविष्योत्तरेऽपि । “यदुक्तं हैपदं यानं तेन मानेन यो नृपः । स्वयानं कुरुते दिव्यं स चिरं सुखमश्नुते ॥ स्वयोगयुक्तयानस्थो भोगमाप्नोति मानवः । प्रयोगिकयानस्थः क्लेशमाप्नोति पुष्कलम् ॥ यो दम्भादथवाऽज्ञानात्क्रमं प्रकुरुतेऽन्यथा । तस्यैतानि विनश्यन्ति आयुर्विद्यायशोधनम् ॥ प्रधानं यानमाश्रित्य नियमोऽयं समाश्रितः । नाप्रधाने निर्णयोऽस्ति तस्मिन्यन्तु मनोऽनुगता ॥ इति युक्तिकल्पतरुः ॥

चतुर्धा । अ । चतुष्प्रकारे ॥ यथा । चतुर्धा विभजति । संख्याया विधार्थे धा ॥ एकं राशिं चतुर्धा कुरु । अत्राधिकरणविचाले चेति धा ॥

चतुर्भद्रम् । म । सकलेषु धर्मार्थकाम

3982

मोक्षेषु ॥ चत्वारि भद्राणि श्रेष्ठान्यस्य वृन्दे ॥ यद्वा । चत्वारि भद्राणि । दिक्सङ्ख्ये संज्ञायामितिसमासः ॥

चतुर्भुजः । पुं । विष्णौ । माधवे ॥ त्रि । भुजचतुष्टयविशिष्टे ॥ चत्वारो भुजा यस्यसः ॥ यद्वा । भुङ्क्ते भुनक्ति इति भुजः । चतुर्णां धर्मार्थकाममोक्षाणां भुजः ॥

चतुर्म्मुखः । पुं । ब्रह्मणि । परमेष्ठिनि ॥ औषधविषये रसविशेषे ॥ यथा । रसगन्धकलौहाभ्रं समं सूताङ्घ्रि हेमच । सर्वं खल्लतले क्षिप्त्वा कन्यारसविमर्द्दितम् ॥ एरण्डपत्रै राबेष्ट्य धान्यराशौ दिनत्रयम् । संस्थाप्य ततउद्धृत्य सर्वरोगेषु योजयेत् ॥ एतद्रसायनवरं त्रिफलामधुसंयुतम् । तद्यथाग्निवलं खादे द्वलीपलितनाशनम् ॥ क्षयमेकादशविधं कासं पञ्चविधं तथा । कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान् ॥ शूलं श्वासञ्च हिक्काञ्च मन्दाग्निं चाम्लपित्तकम् । शशान सर्वा नाश्चवातं विसर्पं विद्रधिं तथा ॥ अपस्मारग्रहोन्मादान् सर्वाशांसित्वगामयान् । क्रमेणासेवितं हन्ति दृष्टमिन्द्राशनिर्यथा ॥ पौष्टिकं वल्यमायुष्यं पुत्रप्रसवकारणम् । चतुर्मुखेणदेवे

न कृष्णात्रेयाद्युचितम् ॥ इतिप्रयोगामृतम् ॥ चत्वारि मुखानि अस्य ॥

चतुर्म्मूर्त्तिः । पुं । विष्णौ ॥ चतस्रोमूर्त्तयो विराट्सूत्राव्याकृततुरीयात्मानोऽस्य ॥ सिता पीता रक्ता कृष्णा चेतिचतस्रो मूर्त्तयोऽस्य वा ॥

चतुर्य्युगम् । न । चतुर्षु सत्यत्रेताद्वापरकलिसंज्ञकेषु ॥ चतुर्णां युगानां समाहारः । पात्रादित्वात् स्त्रीत्वं न ॥

चतुर्वक्त्रः । पुं । ब्रह्मणि । वेधसि ॥

चतुर्वर्ग्गः । पुं । धर्मार्थकाममोक्षेषु मिलितेषु ॥ चतुर्णां वर्गः समूहः ॥

चतुर्विद्यः । पुं । चातुर्वेद्ये । चतुर्वेदवेत्तरि ॥

चतुर्विधशरीरम् । न । जरायुजाण्डजस्वेदजोद्भिज्जाख्येषु ॥ चतुर्विधशरीराणि धृत्वा मुक्ता सहस्रशः । सुकृता न्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् ॥

चतुर्व्वीजम् । न । मेथिकादिचतुष्टये ॥ मेथिका चन्द्रशूरञ्च कालाजाजी यवानिका । एतच्चतुष्टयंयुक्तं चतुर्वीजमितिस्मृतम् ॥ तच्चूर्णं भक्षितं नित्यं निहन्तिपवनामयान् । अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथामितिभावप्रकाशः ॥

चतुर्व्यूहः । पुं । विष्णौ । नारायणे ॥

सृष्ट्यादिकार्यार्थं चत्वारो व्यूहा विभागा वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धसंज्ञा मूर्त्तयो यस्य सः । यथा । व्यूह्यात्मानं चतुर्द्धा वै वासुदेवादिमूर्त्तिभिः । सृष्ट्यादीन् प्रकरोत्येष विश्रुतात्मा जनार्द्दन इति व्यासवचनम् ॥ तथाच मार्कण्डेयपुराणे मूलकारणं वासुदेवाख्यं व्यूहमुक्त्वोक्तम् । द्वितीया पृथिवीं मूर्द्ध्ना शेषाख्या धारयत्यधः । तामसी सा समाख्याता तिर्य्यक्त्वं समुपाश्रिता ॥ तृतीया कर्म्म कुरुते प्रजापालनतत्परा । सत्त्वोद्रिक्ता तु सा ज्ञेया धर्म्मसंस्थानकारिणी ॥ चतुर्थी जलमध्यस्था शेते पन्नगतल्पगा । रजस्तस्या गुणः सर्गं सा करोति सदैवहीत्यादि ॥ शरीरपुरुषश्छन्दः पुरुषो वेदपुरुषो महापुरुष इति बह्वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा अस्येति वा ॥ न । साङ्ख्ये मोक्षशास्त्रे ॥ तत्र हि हेयं हानं हेयहेतुर्हानोपायश्चेति चत्वारो व्यूहाः प्रतिपाद्या भवन्ति । तत्र त्रिविधं दुःखं हेयम् । तदत्यन्तनिवृत्तिर्हानम् । प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः । विवेकख्यातिस्तु हानोपाय इति ॥ ॥ चिकित्साशास्त्रे ॥ तत्रच रोग आरोग्यं रोगनिदानं भैषज्यमिति चत्वारो व्यूहत्वेनोक्ताः ॥

चतुर्हायणी । स्त्री । चतुर्वर्षीयागवि ॥ चत्वारो हायना यस्याः । दामहायनेति ङीप् । त्रिचतुर्भ्यां हायनस्येति णत्वम् ॥ त्रि । अन्यच ॥

चतुष्कम् । न । चतुस्तम्भमण्डपे । चौखम्बा इति भाषा ॥ अश्वस्य गतिविशेषे ॥

चतुष्की । स्त्री । मशकहर्म्यम् । मसहरी इति भाषा ॥ पुष्करिणी विशेषे ॥

चतुष्टयम् । त्रि । चतुरवयवसमुदाये ॥ यथा चतुष्टयी शब्दानां प्रवृत्तिरिति । शब्दानामर्थे या प्रवृत्तिः सा प्रवृत्तिनिमित्तभेदात् प्रकारचतुष्टयवतीत्यर्थः । प्रकारभेदश्च यथा । जातिशब्दो गुणशब्दः क्रियाशब्दो यदृच्छाशब्दश्चेति ॥ चत्वारोऽवयवा यस्य । सङ्ख्याया अवयवे तयप् । रेफस्य विसर्गे सत्त्वे च कृते ह्रस्वात्तादाविति मूर्द्धन्यः ॥ केन्द्रे ॥

चतुष्पत्री । स्त्री । सुनिषण्णके । चौपत्ती शाक इति भाषा ॥ चाङ्गेरीसदृशः पत्रैश्चतुर्दल इति स्मृतः । शाको जलाऽन्विते देशे चतुष्पत्रीति चोच्यते ॥ क्षुद्रपाषाणभेदिनि ॥

चतुष्पथः । पुं । ब्राह्मणे ॥ न । चतुर्मार्गसङ्गमे । शृङ्गाटके ॥ चतुर्णां पथां

समाहारः । तद्धितार्थेतिसमासः । कक्पूरिति समासान्तः । इदुदुपधस्येति षत्वम् । पथःसंख्येतिक्लीवत्वम् । चत्वारः पन्थानोयत्रवा ॥

चतुष्पदः । पुं । गवादिपशौ ॥ करणविशेषे ॥ तत्रजातस्यफलं यथा । चतुष्पदभवोमर्त्यः सदाचारविवर्जितः । स्वल्पवित्तःक्षीणदेहश्चतुष्पादधनान्वितइति ॥ राशिविशेषे । मेषवृषसिंहेष । धनुषोन्त्यार्द्धं । मकरस्यपूर्वार्द्धं ॥ स्त्रीणांकरणभेदेचेतिहेमः ॥ चत्वारि पदानि पादा अस्य ॥

चतुष्पदी । स्त्री । पद्ये । चौपदीइतिचौपई इतिच भाषा ॥ चत्वारः पादाः अस्याः । सङ्ख्यासुपूर्वस्येतिपादस्यान्तलोपे पादोन्यतरस्यामितिङीपि भत्वात् पादःपदिति पदादेशः ॥

चतुष्पर्णी । स्त्री । क्षुद्राम्लिकायाम् ॥

चतुष्पला । स्त्री । नागबलायाम् ॥

चतुष्पाठी । स्त्री । चौपाड इति भाषा प्रसिद्धे छात्राणामध्ययनस्थले ॥ चतुर्णांवेदानांपाठोयस्याम् ॥

चतुष्पाणिः । पुं । शतधामनि । विष्णौ ॥ चत्वारः पाणयोयस्य ॥ त्रि । चतुर्हस्तान्विते ॥

चतुष्पात्-द् । पुं । गवादिपशौ ॥ चत्वारः पादाअस्य । संख्यासुपूर्वस्येतिपादस्यान्तलोपः ॥

चतुष्पुण्ड्रः । पुं । भिण्डाहृक्षे ॥

चतुस्समम् । न । चतुःसमे ॥

चतुस्त्रिंशत् । स्त्री । चतुरधिकायां त्रिंशति । चौंतीस इति भाषा ॥

चतुस्त्रिंशज्जातकः । पुं । बुद्धविशेषे ॥

चतूराजी । स्त्री । चतुरङ्गक्रीडान्तर्गतक्रीडाविशेषे ॥

चत्वरम् । न । स्थण्डिले । यागार्थसंस्कृतभूमौ ॥ अङ्गने ॥ नानाजनावस्थानदेशे । चौंतरा इति भाषा ॥ पथाङ्कोषे । चतसृणां रथ्यानां सम्बन्धे ॥ गृहाद्बहिरङ्गने ॥ चत्यते । चते॰ । कृगृशृदृभ्यश्चतिभ्यःष्वरच् ॥ चतन्त्यस्मिन्वा ॥

चत्वारिंशत् । स्त्री । चालीसइतिप्रसिद्धे सङ्ख्याविशेषे ॥ सङ्ख्येये ॥ चत्वारोदशतःपरिमाणमस्य । पङ्क्तिविंशतित्रिंशच्चत्वारिंशदितिनिपातनात्प्रकृतेश्चत्वारिन्भावः शत्प्रत्ययः ॥

चत्वालः । पुं । होमकुण्डे ॥ दर्भे ॥ चतति । चते॰ । स्याचतिमञ्जेरितिवालञ् ॥

चन । अ । असकलार्थे ॥ चनति । चनशब्दे । पचाद्यच् ॥ अप्यर्थे ॥

चनः । न । भक्ते ॥ चाय्यते । चायृपूजानिशामनयोः । चायतेरन्नेह्रस्वश्चेत्यसुन् प्रत्ययस्यनुट्च ॥

चन्दः । पुं । विधौ ॥ शशी चन्द्रो हिमद्युतिरिति शब्दार्णवः । चन्दति । चदि आह्लादे । पचाद्यच् ॥

चन्दकः । पुं । चांदा इति गौडेषु प्रसिद्धे मत्स्यविशेषे ॥

चन्दनः । पुं । न । मलयजे । गन्धसारे ॥ चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु । श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ॥ श्रेष्ठस्यास्य लक्षणं यथा । स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् । ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते इति ॥ चन्दनानि च सर्वाणि सदृशानि रसादिभिः । गन्धेन तु विशेषोस्ति पूर्वं श्रेष्ठतमं गुणैः ॥ रक्तचन्दने ॥ यथा । कषायपानयोर्योज्यं चन्दनं रक्तचन्दनमिति ॥ अपिच । कषायलेपयोर्ग्राह्यं चन्दनं रक्तचन्दनमिति ॥ पुं । वानरप्रभेदे ॥ न । औषधीभेदे । भद्रकाल्याम् ॥ चन्दयति । चदि आह्लादने । णयन्तः । ल्युट् । बहुलमन्यत्रापीति युच्वा ॥

चन्दनगोपी । स्त्री । शारिवाविशेषे ॥

चन्दनधेनुः । स्त्री । पतिपुत्रवन्मृतनार्युद्देश्यकोत्सृष्टाया स्चन्दनाङ्कितसवत्सायां गोदाने ॥ यथा । जीवद्भर्तृयामारी पुत्रिणी म्रियते यदि । सवत्सा मङ्किता धेनुमाचार्याय प्रदापयेत् ॥ पतिपुत्रवती नारी म्रियते या शशस्तयोः । दर्पनचोत्सृजेत् पुत्रः पिता यावद्धि जीवतीति ॥

चन्दनपुष्पम् । न । लवङ्गे ॥

चन्दनशारिवा । स्त्री । शारिवाविशेषे ॥

चन्दनसारः । पुं । वज्रक्षारे ॥

चन्दना । स्त्री । शारिवाविशेषे ॥

चन्दनाचलः । पुं । मलयपर्वते ॥

चन्दनादिः । पुं । पित्तोपशमनाय चन्दनादिसमवासनद्रव्येषु ॥ यथा । चन्दनञ्च तथोशीरं कर्पूरो गन्धवाकुची । एलाकर्पूरगोहूलाः समेतेच स्वनादय इति ॥

चन्दनाद्रिः । पुं । मलयपर्वते ॥

चन्दनी । स्त्री । नदीविशेषे ॥

चन्दनीया । स्त्री । गोरोचनायाम् ॥

चन्दिरः । पुं । हस्तिनि ॥ चन्द्रे ॥ चन्दति । चदि० । इषिमदिमुदीत्यादिना किरच् ॥

चन्द्रः । पुं । चाँद इति प्रसिद्धे हिमांशौ । चन्द्रमसि । सुधांशौ ॥ कर्पूरे ॥ काम्पिल्ले ॥ स्वर्णे ॥ वारिणि ॥ काम्ये । सुन्दरे ॥ मेचके । वर्हचन्द्रके ॥ रक्तरजते । शोभामुक्ताफले ॥ चि । आह्लादजनकद्रव्ये ॥ न । स्वर्णे ॥ चुक्रे ॥ वस्तुवृक्षविशेषे ॥ यथा । चि

अपरगणयुग मुपधाय परिकल्पयक-र मथनगणयुगलमिह गन्धयुगमपि वितर । फणिन्द्रपतिभणितमिति-चन्द्रमिदमितिशृणुत सकलकविकुलहृदयमोदकरमवतनुत ॥ यथा । अनुपहतकुसुमरसतुल्यमिदमधरदल ममृतमयवचन मिदमाखिविफलयसिचल । यदपि यदुरमणपदमीशमुनिहृदिलुठति तदपितवरति वलितमेत्यवनतटमटतीति ॥ च-रणाचस्य दशम॥ ऽ ॥प्रभेदे ॥ चन्दयति आह्लादयति सकलं जगत् । चदि° । स्फायितञ्चीतिरक् ॥ पुं । दीपविशेषे ॥ हीरके ॥ मृगशिरो नक्षत्रे ॥

चन्द्रकः । पुं । मेचके । वर्हचन्द्रके । मयूरपिच्छस्यचन्द्राकृतौ ॥ चन्द्र इव प्रतिकृतिः । इवे प्रतिकृताविति कन् ॥ नखे ॥ चाँदामाच् इतिगौडेषु प्रसिद्धे मत्स्ये । न । सितमरिचे । शिग्रुवीजे ॥

चन्द्रकला । स्त्री । चन्द्रस्यषोडशे भागे ॥ डमरुवाद्ये ॥ वाचामत्स्ये ॥

चन्द्रकान्तः । पुं । चन्द्रमणौ । चन्द्रोपले ॥ कैरवे ॥ न । कैरवे ॥ श्रीखण्डचन्दने ॥ चन्द्रः कान्तो यस्य सः ॥

चन्द्रकान्ता । स्त्री । निशायाम् ॥ ज्योत्स्नायाम् ॥ चन्द्रयोषायाम् ॥ चन्द्रः कान्तो यस्याः ॥

चन्द्रकान्ति । न । रजते । रूप्ये ॥

चन्द्रकालानलम् । न । मौहूर्त्तिकानां चक्रविशेषे ॥

चन्द्रकावान् । पुं । } मयूरे ॥ मतुप् ॥
चन्द्रकी । पुं । } इन् ॥

चन्द्रकुण्डः । पुं । कामरूपस्थेसरोविशेषे ॥

चन्द्रकूटः । पुं । कामरूपस्थे पर्वतविशेषे ॥

चन्द्रक्षयः । पुं । अमायाम् ॥

चन्द्रगुप्तः । पुं । श्रीभागवत प्रसिद्धे नृपे ॥

चन्द्रगृहम् । न । कर्कराशौ ॥

चन्द्रगोलस्थाः । पुं । भूम्नि । दिव्यपितृषु । स्वधाभुक्षु ॥ चन्द्रगोलेतिष्ठन्ति । सुपिस्थ इतिकः ॥

चन्द्रगोलिका । स्त्री । ज्योत्स्नायाम् ॥

चन्द्रचञ्चलः । पुं । खलेशमत्स्ये ॥

चन्द्रचञ्चला । स्त्री । चन्द्रकमत्स्ये ॥

चन्द्रचारः । पुं । चन्द्रविषयकज्ञाने ॥ तत्रादौ येरवेरुपरि चन्द्रमसमिच्छन्ति तान् प्रत्याह । नित्यमधस्थस्येन्दोर्भाभि र्भानोः सितंभवत्यर्द्धम् । स्वच्छाययान्यदसितं कुम्भस्येवात पस्थस्य ॥ अस्यप्रत्यक्षवाधां मन्यमानआह । सलिलमये शशिनि रवेर्दी

धितयोमृच्छिंतासमेनैशम् । स
पयन्ति दर्पणोदरविहितादव मन्दि
रस्थान्तः ॥ शशिनः पश्चिमदिग्भागा
त् सितवृद्धिः किमित्युपलभ्यते इ
त्याह । त्यजतोऽर्कतलं शशिनः पश्चा
दवलम्बते यथाशौक्लम् । दिनकर
वशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युद
यः ॥ प्रतिदिनं कथं चन्द्रगोलशुक्लवृ
द्धिर्भवति तदर्थमाह । प्रतिदिवसमे
वमर्कात् स्थानविशेषेण शौक्ल्य परि
वृद्धिः । भवति शशिनोऽपराह्णेप-
श्चाद्भागे घटस्येव ॥ चन्द्रस्य नक्षत्र
गमनेन शुभाशुभत्वमाह । ऐन्द्रस्य
शीतकिरणो मूलाषाढाद्वयस्य चाया
तः । याम्येन बीजजलचरकाननघ्नो
वह्निभयदश्च ॥ दक्षिणपार्श्वेन गतः
शशी विशाखानुराधयोः पापः । म
ध्येन तु प्रशस्तः पितृदेवविशाखयो
श्चापि ॥ चन्द्रस्य नक्षत्रयोगमाह । ष
डनागतानि पौष्णात् द्वादशरौद्राच्च
मध्ययोगीनि । ज्येष्ठाद्यानि नवर्क्षा
ण्युडुपतिनातीत्य युज्यन्ते ॥ चन्द्रम
सः संस्थानानि दश भवन्ति । यथा ।
नौः लाङ्गलं दुष्टलाङ्गलं समो दण्डः
कार्मुकं युगं पार्श्वशय्याऽऽवर्जितं कु
ण्डाख्यमिति । अथैषां संस्थाना
नां लक्षणं फलञ्च क्रमेणाह । उन्

त मीषच्छृङ्गं तन्नौस्थाने विशाल-
ता चोक्ता । नाविकपीडा तस्मिन्
भवति शिवं सर्वलोकस्य ॥ १ ॥ अ
र्द्धोन्नते च लाङ्गलमिति पीडा तदुप-
जीविनां तस्मिन् । प्रीतिश्च निर्नि
मित्तं मनुजपतीनां सुभिक्षञ्च ॥ २
॥ दक्षिणविषाणमर्द्धोन्नतं यदा दुष्ट
लाङ्गलाख्यं तत् । पाण्ड्यनरेश्वरनि-
धनकृदुद्योगकरं बलानाञ्च ॥ ३ ॥ स
मशशिनि सुभिक्षक्षेमवृष्टयः प्रथम
दिवससदृशाः स्युः । ४ । दण्डवदुदि
तेपीडा गवां न्वपश्चोग्रदण्डोत्र ॥ ५
॥ कार्मुकरूपे युद्धानि यत्र तु ज्यातता
जयस्तेषाम् । ६ । स्थानं युगमिति या
म्योत्तरायतं भूमिकम्पाय ॥ १२ ॥
७ ॥ युगमेव याम्यकोट्यां किञ्चित्तुङ्गं
स पार्श्वशायीति । विनिहन्ति सार्थ
वाहान् वृष्टेश्च विनिग्रहं कुर्यात् ॥ ८
॥ अभ्युच्छ्रायादेकं यदि शशिनोऽवा
क्शृङ्गं भवेच्छृङ्गम् । आवर्जितमित्य
सुभिक्षकारि तद्गोधनस्यापि ॥ ९ ॥
अव्युच्छिन्ना रेखा समन्ततो मण्डले च
कुण्डाख्यम् । अस्मिन् माण्डलिका
नां स्थानत्यागो नरपतीनाम् ॥ १५
। १० ॥ सामान्यलक्षणमाह । प्रो
क्तस्थानाभावादुदगुच्चः क्षेमवृद्धि
वृद्धिकरः । दक्षिणतुङ्गश्चन्द्रो दुर्भिक्ष

भयायनिर्दिष्टः ॥ शृङ्गेणैकेनेन्दुं वि-
लीनमथवाप्यवाङ्मुखं शृङ्गम् । सम्पू
र्णञ्चाभिनवं दृष्ट्वैको जीविताद्भ्र
श्येत् ॥ १७ ॥ चन्द्रमसोरूपाणिसफ
लान्याह । संस्थानविधिःकथितो रू
पाण्यस्माद्भवन्ति चन्द्रमसः । स्वल्पो
दुर्भिक्षकरो महान् सुभिक्षावहः
प्रोक्तः ॥ मध्यतनुर्वज्राख्यः क्षुद्भ
यदः सम्भ्रमाय राज्ञाञ्च । चन्द्रो मृदङ्ग
रूपः क्षेमसुभिक्षावहो भवति ॥
स्थेयो विशालमूर्त्तिर्नरपतिलक्ष्मीवि
वृद्धये चन्द्रः । स्थूलः सुभिक्षकारी प्रिय
धान्यकरस्तु तनुमूर्त्तिः ॥ २० ॥ अथ
चन्द्रस्य कुजादिभिस्ताराग्रहैः शृङ्गे-
भिन्ने फलमाह । प्रत्यन्तान् कुनृपां
श्च हन्त्युडुपतिः शृङ्गे कुजेनाहते शस्त्रं
क्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भि
क्षकृत् । श्रेष्ठान् हन्ति नृपान् महेन्द्र
गुरुणा शुक्रेण चाल्पान् नृपान् शुक्ले
याप्यमिदं फलं ग्रहकृतं कृष्णे यथोक्ता
गमम् ॥ शुक्रभिन्नबिम्बस्य चन्द्रमसः
फलमाह । भिन्नः सितेन मगधान्
यवनान् पुलिन्दान् नेपालभृङ्गिमरुक
च्छसुराष्ट्रमद्रान् । पाञ्चालकैकय
कुलूतकपौरुषादान् हन्यादुशीनर
जनानपि सप्तमासान् ॥ जीवभिन्न-
माह । गान्धारसौवीरकसिन्धुकीरा

न् धान्यानि शैलान् द्रविडाधिपांश्च
। द्विजांश्च मासान् दश शीतरश्मिः
सन्तापयेद्वाक्पतिनाविभिन्नः ॥ भौ
मभिन्नस्याह । उग्रुक्तान् सहवाहनैर्न
रपतींस्त्रैगर्त्तकान् मालवान् कौलि
न्दान् गणपुङ्गवानथ शिवीनायोध्य-
कान् पार्थिवान् । हन्यात् कौरव
मत्स्यशुक्त्यधिपतीन् राजन्यमुख्या-
नपि प्रालेयांशुरसृग्ग्रहेतनुगतो षण्
मासमर्थोदया ॥ शनिभिन्नस्याह ।
यौधेयान् सचिवान् सकौरवान् प्रा
गीशा नथ चार्जुनायनान् । हन्या-
दर्कजभिन्नमण्डलः शीतांशुर्दशमा
सपीडया ॥ बुधभिन्नस्याह । मगधा
न्मथुरांश्च पीडयेत् वेन्नायाश्च तटं
शशाङ्कजः । अपरत्र कृतं युगं वदे च-
द्विभिस्त्वाशश्चिनं विनिर्गतः ॥ केतुना
भिन्नस्याह क्षेमारोग्यसुभिक्षविना
शी शीतांशुः शिखिनायदि भिन्नः ।
कुर्यादायुधजीविविनाशं चौराणा-
मधिकेन च पीडाम् ॥ २७ ॥ ग्रहण
काले उल्काहतस्य चन्द्रस्य फलमाह ।
उल्कया यदा शशी ग्रस्त एव हन्यते ।
हन्यते तदा नृपो यस्य जन्मनि स्थितः
॥ चन्द्रमसो वर्णलक्षणमाह । भस्म
निभः परुषोऽरुणमूर्त्तिः शीतकरः-
किरणैः परिहीनः । श्यावतनुः स्फुटि

तःस्फुरणोवातुङ्गमरणामयचैारभया
य ॥ प्रालेयकुन्दकुमुदस्फटिकावदा
ता यत्नाद्द्विजाद्रिसुतया परिमृज्यच
न्द्रः । उच्चैः कृतो मिमि भविष्यति
मे शिवाय योदृश्यते सभवितां जग
तःशिवाय ॥ अथपक्षवृद्धौ हानौचा
साम्येचशुभाशुभमाह । शुक्लेपक्षेस
मवृद्धेप्रवृद्धिं व्रजत्यवश्यं यातिवृद्धिंप्रजा
च । हीनेहानिस्तुल्यतातुल्यतायांकृ
ष्णेसर्वंतत्फलंव्यत्ययेन ॥ यदिकु
मुदमृणालहारगौरस्तिमिरनियमा
त्क्षयमेतिवर्द्धतेवा । अविकृतगति
मण्डलांशुयोगीभवतिन्नृणांविजया
य शीतरश्मिः ॥ ३२ ॥ इतिवाराह्यां
चतुर्थोध्यायः ॥ ४ ॥

चन्द्रदाराः । पुं । भू० । अश्विन्यादिन
क्षत्रेषु ॥ चन्द्रस्यदाराः ॥

चन्द्रनामा । पुं । कर्पूरे ॥ चन्द्रस्यना-
मान्येव नामान्यस्य ॥

चन्द्रपुष्पा । स्त्री । श्वेतकण्टकार्याम् ॥

चन्द्रप्रभः । पुं । वृक्षविशेषे ॥

चन्द्रप्रभा । स्त्री । ज्योत्स्नायाम् ॥ च
न्द्रस्य प्रभा ॥ वाकुच्याम् ॥ औषध
विशेषे ॥ अत्राहसुखबोधः । कृमिरि
पुदहनव्योषत्रिफलामरदारुचव्यभू
निम्बम् । मागधिमूलं मुस्तं सशटि
वचामाक्षिकञ्चैव ॥ लवणक्षारनि-

मायुगकुसुम्भुरुगजकणानिविषाः ॥
॥ कर्षांशकान्येवसमानिकुर्यात् पला
ष्टकञ्चाश्मजतोविदध्यात् । निष्पत्र
शुद्धस्यपुरस्यधीमान् पलद्वयं लौहर
जस्तथैव ॥ सिताचतुष्कं पलमत्र वं
श्यानिकुम्भकुम्भत्रिसुगन्धियुक्तम् । च
न्द्रप्रभेयं गुटिकाप्रयोज्याचाशीं सि
मिर्षाश्चयतेषडेव ॥ भगन्दरं पाण्डुर
जामयांश्चनिर्णष्टवह्नेः कुरुतेचदी-
प्तिम् । हन्त्यामयान् पित्तकफानि
लोत्थान् नाडीगतेमर्मगतेव्रणेच ॥
ग्रन्थ्यर्बुदे विद्रधिराजयक्ष्मणोर्मेहे
भगाख्ये प्रबलेचयोज्या । मूत्रक्षये
चाश्मरिमूत्रकृच्छ्रे शुक्रप्रवाहे प्युद-
रामयेच ॥ भक्तस्यपूर्वं सततंप्रयो
ज्या तक्रानुपानंत्वथमस्तुपानम् । आ
जोरसोनाङ्गलजोरसोवा पयोऽथ-
वा शीतजलानुपानम् ॥ वलेनमाम
स्तुरगोजवेन दृष्टा सुपर्णाश्रवणेवरा
हः ॥ वलीपलितनिर्मुक्तोवृद्धोपि
तरुणायते ॥ न पानभोज्येपरिहार्य
मस्ति न शीतवातातपमैथुनेषु । शा
म्भुं समभ्यर्च्य कृतप्रसादेनाप्तावटी
चन्द्रमसःप्रसादादिति ॥ कर्पूरके ।
कपूर इति भाषा ॥

चन्द्रभस्म । न । कर्पूरे ॥

चन्द्रभागः । पुं । पर्वतविशेषे ॥ विभक्त

श्चन्द्रमायस्मात् तस्मिन् पर्वतसत्त-मे। अतोदेशाश्चन्द्रभागं नाम्नाचक्रुः पुरागिरिमितिकालिकापुराणम् ॥

चन्द्रभागा। स्त्री। कश्मीरदेशप्रसिद्धे नदीविशेषे ॥ चन्द्रभागयोः पर्वतयोरियम्। तत्प्रभवत्वात्। तस्येदमित्यण्। टिड्ढेतिङीपप्राप्तः चन्द्रभागाद्वा नद्यामिति वह्वादिगणात्वृत्तान्नभवति। संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥

चन्द्रभागी। स्त्री। चन्द्रभागायाम् ॥ वह्वादिभ्यश्चेतिङीष् ॥

चन्द्रभूति। न। रूप्ये ॥

चन्द्रमणिः। पुं। चन्द्रकान्तमणौ ॥

चन्द्रमण्डलम्। न। चन्द्रविम्बे ॥ चन्द्रपरिवेशे ॥

चन्द्रमल्ली। स्त्री। अष्टापदाम् ॥

चन्द्रमाः। पुं। विधौ। चन्द्रे ॥ चन्द्रं कर्पूरं साद्दश्येन माति तुलयति। मा उमाने। चन्द्रेमोडिचेत्यसिः ॥ चन्द्रमात्मादर्शमिमीते मिर्मिमीतेइति वा ॥ यद्वा। चन्द्ररजत मस्तत्स्व तद्दिव मीयते। चन्द्रइतिवामीयते इति दासीभारादित्युत्पादने हरदत्तः ॥

चन्द्रमौलिः। पुं। रेरिहाणे। शिवे ॥

चन्द्ररेणुः। पुं। काव्यचौरे ॥

चन्द्रर्क्षम्। न। मृगशिरायाम् ॥

चन्द्रला। स्त्री। कर्णाटदेशप्रसिद्धायामम्बायाम् ॥ तत्स्थाने ॥

चन्द्रलेखा। स्त्री। वाकुच्याम् ॥ शशिकलायाम् ॥ अतिशर्करीसंज्ञकेपञ्चदशाक्षरावृत्तिविशेषे ॥ यथा। मौमोयौचेद्गवेतां सप्ताष्टकैश्चन्द्रलेखा ॥ यथा। विच्छेदे ते मुरारे पाण्डुप्रकाशाकृशाङ्गी म्लानच्छायंदुकूलं नम्रानतेविभ्रतीसा। राधाक्षोदस्यगर्भेक्षीनावशाचन्द्रलेखा किन्त्वा त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगमिति ॥

चन्द्रलोहकम्। न। रूप्ये ॥

चन्द्रवंशः। पुं। चन्द्रसन्ताने ॥

चन्द्रवर्त्म। न। जगतीसंज्ञकेद्वादशाक्षरावृत्तिविशेषे ॥ यथा। चन्द्रवर्त्म निगदन्ति रनभसैः ॥ यथा। चन्द्रवर्त्मपिहितं घनतिमिरैः राजवर्त्मरहितं जनगमनैः। इष्टवर्त्मतदलं कुरु सरसे कुञ्जवर्त्मनि हरिस्तवकुतुकीति ॥

चन्द्रवल्लरी। स्त्री। सोमवल्ल्याम् ॥

चन्द्रवल्ली। स्त्री। प्रसारण्याम् ॥ माधवीलतायाम् ॥

चन्द्रवशा। स्त्री। भारतवर्षस्य नदीविशेषे ॥

चन्द्रवाला । स्त्री । स्थूलैलायाम् । बहुलायाम् ॥ चन्द्रस्य कर्पूरस्य वालेव कर्पूरगन्धित्वात् ॥

चन्द्रविहङ्गमः । पुं । बकपक्षिणि ॥

चन्द्रव्रतम् । न । चान्द्रायणे ॥

चन्द्रशाला । स्त्री । } ज्योत्स्नायाम् ॥ गृहोपरिगृहे । शिरोगृहे ॥
चन्द्रशालिका । स्त्री । }

चन्द्रशुक्लः । पुं । जम्बुद्वीपोपद्वीपविशेषे ॥

चन्द्रशूरम् । न । चंदसुर हालीं इति ख्यातौषधौ । चर्मकन्याम् । पशुमेहनकारिकायाम् । चन्द्रसूरे ॥

चन्द्रशेखरः । पुं । ईश्वरे । शिवे ॥ गिरिविशेषे । यथा । विशेषतः कलियुगे वसामि चन्द्रशेखरे । इति शिववाक्यम् ॥ चन्द्रः शेखरोऽस्य ॥ पौष्यराज्ञः पुत्रे करवीरपुराधिपे ॥ षोडशध्रुवकान्तर्गते नवमध्रुवके ॥ चट्टलस्थभैरवविशेषे ॥

चन्द्रसंज्ञः । पुं । कर्पूरे ॥ चन्द्रस्य संज्ञा यस्य ॥

चन्द्रसम्भवः । पुं । बुधे ॥ चन्द्रात् सम्भवो यस्य ॥

चन्द्रसम्भवा । स्त्री । क्षुद्रैलायाम् ॥ चन्द्रात् सम्भवो यस्याः ॥

चन्द्रसूरम् । न । चन्द्रशूरे । चंदसुर इति भाषा ॥ चन्द्रसूरं हितं हिक्कावातश्लेष्मातिसारिणाम् । असृग्वातगदद्वेषि बलपुष्टिविवर्द्धनम् ॥

चन्द्रहासः । पुं । असिमात्रे ॥ दशग्रीवकरवाले ॥ चन्द्र इव हासः प्रभाऽस्य ॥ चन्द्रं हसतिवा द्युतिमत्त्वात् । हसे हसने । कर्मण्यण् ॥ न । रौप्ये ॥

चन्द्रहासा । स्त्री । गुडूच्याम् ॥ लपिकाप्रभेदे ॥

चन्द्रा । स्त्री । एलायाम् ॥ विताने ॥

चन्द्रातपः । पुं । विताने । उल्लोचे । चंदोया इतिभाषा ॥ ज्योत्स्नायाम् ॥

चन्द्रापीडः । पुं । शिवे ॥ चन्द्रः आपीडः शिरोभूषणमस्य ॥

चन्द्रावली । स्त्री । गोपीविशेषे ॥ यथा । राधाचन्द्रावलीमुख्याः प्रोक्तानित्यप्रियाव्रजे । कृष्णवन्नित्यसौन्दर्यवैदग्ध्यादिगुणाश्रयाः इत्युज्ज्वलनीलमणिः ॥

चन्द्रिका । स्त्री । कौमुद्याम् । ज्योत्स्नायाम् ॥ चन्द्रोऽस्त्यस्याः । ठन् ॥ ॥ चन्द्रं कायतीति तन्न इत्त्वाभावप्रसङ्गात् ॥ चन्द्रमाचष्टे चन्द्रयति । तत्करोतीति णिजन्तात् ण्वुल् वा ॥ स्थूलैलायाम् ॥ चन्द्रकमत्स्ये ॥ कर्णस्फोटायाम् ॥ मल्लिकायाम् ॥ श्वेतकण्टकार्याम् ॥ मेथिकायाम् ॥ सूक्ष्मै-

खायाम् ॥ चन्द्रपुरे ॥ अतिजगती संज्ञके त्रयोदशाक्षरावृत्तिविशेषे ॥ यथा । ननततगुरुभिश्चन्द्रिकाश्वर्त्तुभिः । यथा । शरदमलतरश्चन्द्रिकाश्वासिते दिनकरतनयातीरदेशे हरिः । विहरति रभसाद्वल्लवीभिः समं त्रिदिवयुवतिभिः कोपि देवो यथा ॥ हरिश्चन्द्रपुरवासिन्यामम्बायाम् ॥

चन्द्रिकाम्बुजम् । न । सितोत्पले ॥

चन्द्रिकाद्रावः । पुं । चन्द्रकान्तमणौ ॥

चन्द्रिकापायी । पुं । चकोरपक्षिणि ॥

चन्द्री । स्त्री । वाकुच्याम् ॥

चन्द्रेष्टा । स्त्री । उत्पलिन्याम् ॥

चन्द्रोदयः । पुं । शशिप्रकाशे ॥ उल्लोचे ॥ मकरध्वजाख्येरससिन्दूरे ॥ अथास्य । पलं मृदुस्वर्णदलं रसेन्द्रं पलाष्टकं षोडशगन्धकस्य । शोणैः सुकार्पासभवैः प्रसूनैः सर्वं विमर्द्याथकुमारिकाद्भिः ॥ तत्काचकुम्भे निहितं सुगाढे मृत्कर्पटैस्तद्दिवसत्रयञ्च । पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रजः पल्लवरागरम्यम् ॥ निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव । जातीफलं शोषण मिन्द्रपुष्पं कस्तूरिकाया इह शाणएकः ॥ * ॥ चन्द्रोदयोऽयं कथितस्तु मारो भुक्तो हि वल्लीदलमध्यवर्त्ती । मदोन्मदानां प्रमदाशतानां गर्व्वाधिकत्वं श्लथयत्यकाण्डे ॥ घृतं घनीभूतमतीव दुग्धं मृदूनि मांसानि समण्डकानि । माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥ ॥ वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्तगदखण्डनः प्रचुररोगपञ्चाननः । गृहेषु रसराडयं भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद् दुर्लभः ॥ इति सारकौमुदी सुखबोधश्चेतिराधाकान्तः ॥ चन्द्रस्य चन्द्रइव वा उदयो यस्य ॥

चन्द्रोदया । स्त्री । नेत्ररोगस्यौषधविशेषे ॥ यथा । हरीतकी वचा कुष्ठं पिप्पली मरिचानि च । विभीतकस्य मज्जा च शङ्खनाभि र्मनःशिला ॥ सर्व्वमेतत्समं कृत्वा छागीक्षीरेण पेषयेत् । * । नाशयेत् तिमिरं कण्डुं पटलान्यर्ब्बुदानि च ॥ अधिकानि च मांसानि यश्च रात्रौ न पश्यति । अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् ॥ वर्त्तिश्चन्द्रोदयानाम्ना तथा दृष्टिप्रसादनी ॥ इति चक्रपाणिदत्तः ॥

चन्द्रोपलः । पुं । चन्द्रकान्तमणौ ॥

चपलः । पुं । पारदे ॥ मीने ॥ चोर

के ॥ प्रस्तरविशेषे ॥ चवे ॥ राजमाषे ॥ चपनम् । चपसान्त्वने । चवन्तः शरच्च् । चपंलाति । ला० । कः ॥ न । शीघ्रे ॥ क्रियाविशेषणत्वाद्द्रव्ये वर्त्तमानं क्लीवम् ॥ त्रि । तरले ॥ चले । क्षणिके ॥ विकले ॥ दुर्विनीते ॥ चपति । चप० । इषा० कलः ॥ चोपति । चुपमन्दायांगतौ । चुपेरच्चोपधाया इति कलप्रत्ययः ॥ दोषमनिश्चित्यवधबन्धनादेः कर्त्तरि । चिकुरे ॥

चपला । स्त्री । कमलायाम् । श्रियि ॥ विद्युति ॥ पुंश्चल्याम् ॥ पिप्पल्याम् ॥ विजयायाम् ॥ मदिरायाम् ॥ जिह्वायाम् ॥ आर्याप्रभेदे ॥ यथा । दलयोर्द्वितीयतुर्य्योगणौ जकारौ तु चपलासा । यथा । चपलानघेत् कदाचि वृणार्णवे ढुक्तिभावना कृष्णे । धर्मार्थकाममोक्षा स्तदाकरस्थान सन्देहः ॥ चपलाट्टाप् ॥

चपेटः । पुं । विस्तृताङ्गुलिपाणौ । प्रतले । थाप् चपेटा इतिच भाषा ॥ चपति । चप० । अच् । एटति । इट गतौ । अच् । चपश्चासौ इटश्च ॥

चपेटा । स्त्री । चपेटे । प्रहस्ते ॥ खण्डिकोपाध्यायः शिष्याय चपेटां ददातीतिभाष्यम् ॥ टाप् ॥

चपेटिका । स्त्री । चपेटायाम् ॥ चपेटैव । स्वा० कः । प्रत्ययस्था दितीत्वम् ॥

चपेटी । स्त्री । भाद्रशुक्लषष्ठ्याम् ॥ भाद्रे चपेटीविख्यातेतिस्कन्दपुराणम् ॥

चमत्कारः । पुं । विस्मये । चित्तविस्ताररूपे । डमरौ ॥ लोकातीतार्थावलोकनेन किमेतदितिध्यानधाराजननेन चित्तस्य दीर्घप्रायत्त्वंचित्तविस्तार इत्यर्थः । दृष्टहेतुभ्योऽसम्भविष्णुत्वानेन हेत्वन्तरानुसन्धाने मनोव्यापार एवचित्तविस्तार इत्यपरे ॥ अपामार्गे ॥ चमत् करणम् । कृञ० । घञ् ॥

चमरः । पुं । मृगविशेषे । व्यजन्याम् ॥ यस्यश्वेतवालैर्देवराजादिव्यजनं क्रियते सचमरश्चिषाकृतिर्भवति ॥ दैत्यविशेषे ॥ न । चामरे ॥ चमति चम्यते वा अनेन वा । चमुअदने । अर्त्तिकमिभ्रमिचमीत्यरस्चित् ॥

चमरपुच्छः । पुं । कोकडे ॥ न । चामरे ॥

चमरिकः । पुं । कोविदारवृक्षे । रक्तकाञ्चनारे ॥ चमरमस्यास्ति । ठन् ॥

चमरी । स्त्री । मञ्जर्याम् ॥ मृगीभेदे । दीर्घवलायाम् । गिरिप्रियायाम् ॥

चमसः । पुं । न । दारुमयपात्रवि-

शेषे ॥ सोमपानपात्रे ॥ पुं । पर्पटे ॥ पिष्टविशेषे ॥ लड्डुके ॥ चमन्त्यस्मिन् । चम्यते भक्ष्यते सोमोऽस्मिन्वा । चमु० । अत्यविचमीत्यसच् ॥

चमसी । स्त्री । मुद्गमसूरादिपिष्टे ॥ चूर्णयच्छुष्कमाषाणां चमसी साऽभिधीयते ॥ चम्यते । चमु० । असच् । गौरादित्वात् ङीष् ॥

चमीकरः । पुं । कृतस्वराख्य आकरविशेषे ॥

चमूः । स्त्री । सेनामात्रे ॥ सेनाविशेषे । तत्रेभाः ७२९ । रथाः ७२९ । अश्वाः २१८७ । पदातयः ३६४५ । समस्तसङ्ख्यया ७२९० नवत्यधिकशतद्वयाधिकसप्तसहस्रम्भवन्ति ॥ चमन्ति अश्नन्ति परैश्चम्यतेवा । चमु अदने । कृषिचमितनिधनिसर्जिखर्जिभ्यऊरिति ऊः ॥

चमूचरः । पुं । सैनिके ॥ चरेष्टः ॥

चमूजघनम् । न । सेनापश्चाद्भागे ॥

चमूरुः । पुं । मृगविशेषे ॥ चमति । चमु० । खर्जादित्वादूरः । पृ० अत उत्वम् ॥ यद्वा । चमूरुरूरुयस्य ॥

चम्पः । न । कोविदारवृक्षे ॥

चम्पकः । पुं । चम्पा इति प्रसिद्धे वृक्षे । हेमपुष्पके । दीपपुष्पे ॥ चम्पकः कटुकस्तिक्तः कषायो मधुरो हिमः । विषक्रिमिहरः कृच्छ्रकफवातास्रपित्तजित् ॥ चम्पयति चम्प्यते वा । चपि गत्याम् । क्वुन् ॥ पनसकोषगोलके ॥ न । चाँपाकला इति गौडभाषाप्रसिद्धे कदलीफले ॥ चम्पकं वातपित्तघ्नं गुरुवीर्यकरं तथा । अतिशीतं रसे पाके मधुरं कथितं बुधैरित्यस्य गुणाः ॥ चम्पकस्य पुष्पे ॥ सुहृत्प्राप्तिसिद्धौ ॥ सा यथा । न्यायेन स्वयंपरीक्षितमप्यर्थं तावन्नाश्रद्धते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवाद्यते अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिस्तुर्या चम्पकमुच्यते इति साङ्ख्यविदः ॥

चम्पककलिका । स्त्री । चम्पककोरके । गन्धसोदिन्याम् ॥

चम्पकमाला । स्त्री । चम्पकपुष्पैर्निर्मितायां मालायाम् ॥ चम्पकली इति प्रसिद्धे स्त्रीणां कण्ठाभरणे ॥ वर्णवृत्तेषु पङ्क्तिच्छन्दोविभेदे ॥ यथा । पादविराजन्नूपुरयुग्मा कुण्डलशोभासन्ततसुवर्णा । अङ्गदवती हारदयपूर्णा चम्पकमालाभातिसुवर्णा ॥ यथा । आलिकुलभ्रष्टाहमधन्या त्वत्पदभ्रान्त्यारविकान्या । मन्मनुजारे निर्गतभक्तः सम्प्रतिभावी कोपि-

कलङ्कः इति ॥

चम्पकचतुर्दशी । स्त्री । ज्येष्ठशुक्लचतुर्दश्याम् ॥

चम्पकरम्भा । स्त्री । सुवर्णकदल्याम् ॥

चम्पकारण्यम् । न । तीर्थविशेषे ॥

चम्पकुन्दः । पुं । चांपकुडा इति गौडे सुप्रसिद्धे मत्स्यविशेषे ॥

चम्पकोषः । पुं । पनसे ॥

चम्पा । स्त्री । कर्णराजस्य भार्यायाम् ॥ तस्यैव पुर्याम् । अधुना भागलपुर इति वङ्गप्रसिद्धिरितिराधाकान्तः ॥ तीर्थविशेषे ॥

चम्पाधिपः । पुं । कर्णभूपे ॥

चम्पापुरी । स्त्री । चम्पायां नगर्याम् ॥

चम्पारण्यम् । न । विदेहदेशसमीपस्थे विपिने ॥

चम्पालुः । पुं । पनसे ॥

चम्पावती । स्त्री । कर्णपुर्याम् ॥

चम्पूः । स्त्री । काव्यविशेषे ॥ तल्लक्षणं यथा । गद्यपद्यमयीवाणीचम्पूरित्यभिधीयते । इत्यलङ्कारज्ञाः ॥

चम्पेशः । पुं । कर्णाख्यनृपे ॥

चम्पोपलक्षितः । पुं । अङ्गदेशे ॥ तद्देशस्थे पुम्भूम्नि ॥

चम्पेली । स्त्री । स्वनाम्ना प्रसिद्धे पुष्पविशेषे । सुमनायाम् ॥

चयः । पुं । समूहे ॥ वप्रे । प्राकारमूलबन्धने ॥ यदुपरिप्राकारो निष्पाद्यते प्राकाराधारवेदिकेतियावत् । तथा चार्थशास्त्रम् । खातमुद्धृतमृदावप्रं कारयेत् तस्योपरिप्राकारमिति । पगार इतिगौडभाषा ॥ समाहृतौ ॥ परिखोद्धृतमृत्कूपे ॥ चीयते । चिञ् चयने । कर्मण्येरच् ॥ प्राकारे ॥ पीठे ॥ इतिहेमचन्द्रः ॥

चयनम् । न । चिननम् इतिख्याते रचनाविशेषे । इष्टकादीनामूर्द्ध्वाधोदेशनिवेशने ॥ चिञो ल्युट् ॥

चरः । पुं । चच्चत्पुटभेदे ॥ भौमे ॥ जङ्गमे । चले ॥ चले ॥ चारे । गोपनेन राष्ट्रादेः शुभाशुभादिज्ञानार्थं राज्ञा नियुक्त पुरुषे । परतत्त्वज्ञानार्थं भ्रमणकर्त्तरि । यथाश्चेवर्णे । प्रणिधौ ॥ चरति । चरगतौ । पचाद्यच् ॥ कपर्द्दके ॥ मेषकर्कटतुलामकरलग्नेषु ॥ न । नक्षत्रविशेषे । स्वातादितिहरित्रीणि चन्द्रात्स्य च रं चलम् ॥

चरकः । पुं । चारे ॥ पर्पटे ॥ चक्रकरे । भिक्षौ ॥ मुनिग्रन्थविशेषयोः । वैद्यशास्त्रप्रवर्त्तकेमुनौ ॥ तत्कृतेतन्नामके ग्रन्थे ॥ चरति । चर० । शिल्पिसंज्ञयोरपूर्वस्यापीति वुन् ॥

चरटः । पुं । खञ्जनपक्षिणि ॥

चरणः । पुं । न । बह्वृचादौ । वेदैकदेशे ॥ शाखाध्येतरि ॥ मूले ॥ गोत्रे ॥ पदे । पादे ॥ न । भ्रमणे ॥ भक्षणे ॥ शीले । आचारे ॥ चरन्त्यनेन । चर० । करणेतिल्युट् ॥

चरणगतः । त्रि । प्रणते ॥

चरणग्रन्थिः । पुं । गुल्फे ॥

चरणयोधी । पुं । कुक्कुटे ॥

चरणव्यूहः । पुं । वेदव्यासकृते चतुर्वेदविवरणग्रन्थे ॥

चरणामिषम् । न । चरणमांसे ॥ चरणानामामिषम् । मुण्डस्य विधिना पाच्यं चरणान्तुप्रलेहितम् । चरणं वा तद्वद्वल्यं हृष्यं पित्तकरं गुरु ॥

चरणायुधः । पुं । कुक्कुटे ॥ चरणमायुधमस्य ॥

चरमः । त्रि । अन्ते । अवसाने । प्रान्ते ॥ पश्चिमे ॥ चरति । चर० । चरेश्चेत्यमच् । प्रथमचरमेतिसर्वनामत्वात् पक्षेजसःशी । चरमे चरमाः ॥

चरमक्ष्माभृत् । पुं । अस्ताचले ॥ चरमश्चासौक्ष्माभृच्च ॥

चरमतीर्थकृत् । पुं । वर्द्धमानाख्यार्हद्भेदे ॥

चरमाचलः । पुं । अस्ताचले ॥ चरमश्चासावचलश्च ॥

चरमाद्रिः । पुं । अस्ताचले ॥

चराचरम् । न । विष्टपे । जगति ॥ त्रि । इङ्गे ॥ जङ्गमाजङ्गमे ॥ इष्टे ॥ पुं । कपर्दके ॥ चरति । चर० । चरिचलीतिद्वित्वादि ॥

चरिः । पुं । पशौ ॥ चरति । चर० । खनिकष्यज्यसीत्यादिना इप्रत्ययः ॥

चरितम् । न । अनुष्ठिते ॥ चरित्रे ॥ सञ्चारे ॥ व्रतकर्मणि ॥

चरितार्थः । त्रि । प्राप्तप्रयोजने ॥

चरित्रम् । न । स्वभावे ॥ चेष्टिते ॥ चर्य्यतेऽनेन । चर० । अर्त्तिलूधूसूखनसहचरइत्रः ॥

चरिष्णुः । त्रि । जङ्गमे ॥ चरणशीलः । चरगतौ । अलङ्कृञितीष्णुच् ॥

चरुः । पुं । हव्यान्ने । हव्यपाके ॥ टाकणाइतिख्याते भाण्डे ॥ चर्य्यते भक्ष्यते देवैः । चरन्तिभक्षयन्तिदेवा इममिति वा । चरगतौ भक्षणे च । भृमृशीतृचरीत्युः ॥ अनवस्रावितान्तरूष्मपाक ओदनश्चरुरितियाज्ञिकाः ॥ मीमांसकैरपि त्रिवृच्चर्वधिकरणे ओदनपरत्वमेवचरुशब्दस्याभ्युपगतम् ॥ उभयादिभ्योयदितिसूत्रेकैयटस्तु स्थालीवाची चरुशब्दः तात्स्थ्यादोदने भाक्त इत्याह । बिम्बप्रकाशेतु चरुर्भाण्डेचहव्यान्ने इत्यनेकार्थतोक्ता ॥

चच्चराः । पुं । चित्रापूपे ॥

चर्च्चरी । स्त्री । गीतभेदे ॥ अमरटीकायां मुकुटः ॥ चर्च्चरीगीतभेदे चर्च्चरीशब्दे चर्च्चरी शब्दयोरिति रुद्रः ॥ हर्षक्रीडायामिति सुभूतिः । कापटिकानां सादर वचने तौर्यत्रिके चेत्यन्ये । वसन्तसमयक्रीडायामित्येके ॥ चर्म्मण्याम् । साटोपवाक्ये ॥ वर्णवृत्तविशेषे ॥ यथा । हारयुक्तसुवर्णकङ्कणपाणिशङ्खविराजिता पाटनूपुरसङ्गता सुपयोधरद्वयभूषिता । शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता चर्च्चरी तरुणीव चेतसि चाकसीति सुसङ्गता ॥ यथा । कोकिलाकलकूजितं न शृणोसि सम्प्रति सादरम् मन्यसे तिमिरापहारि सुधाकरं न सुधाकरम् । दूरमुज्झसि भूषणं विकलासि चन्दनमारुते कस्य पुण्यफलेन सुन्दरि मन्दिरं न सुखायते इति ॥ चर्च्च्यते । चर्च्चपरिभाषणभर्त्सनयोः । बाहुलकात् अरन् । गौ° ङीष् ॥

चर्च्चरीकः । पुं । महाकाले ॥ केशविन्यासे ॥ शाके ॥ चर्च्चते चर्च्च अध्ययने । पर्फ° इत्यादि प्रत्ययान्तो निपातितः ॥

चर्च्चा । स्त्री । चिन्तायाम् ॥ विचारणायाम् ॥ स्थासके । चार्च्चिक्ये । चन्दनादिनादेहविलेपने । चर्च्चना इति भाषा ॥ चर्च्चिकायाम् । दुर्गायाम् ॥ चर्च्चयनम् । चर्च्च अध्ययने । चुरादिण्यन्ताद्भावे चिन्तिपूजिकथिकुम्बिचर्च्चश्चेत्यङ् । चर्च्चनं वा ॥

चर्च्चिका । स्त्री । दुर्गायाम् ॥ चर्च्चायाम् ॥ चर्च्चैव । स्वा° कः ॥

चर्च्चितः । त्रि । दिग्धे । लिप्ते । चन्दनादिनाकृतलेपने । चर्च्चा चर्च्चिया इति च भाषा ॥ चर्च्चा सञ्जाताऽस्य । तारकादित्वादितच् ॥

चर्प्पटः । पुं । चपेटे ॥ पर्पटे ॥ स्फारविपुले । चिपिटे । चिपटा इति-भाषा ॥

चर्प्पटा । स्त्री । भाद्रशुक्लषष्ठ्याम् । चपेट्याम् ॥

चर्प्पटी । स्त्री । पिष्टकविशेषे । पोल्याम् ॥

चर्भटः । पुं । इर्वारौ ॥

चर्भटी । स्त्री । चर्च्चर्याम् । हर्षक्रीडावाचि । सा[illegible]शक्ये ॥

चर्म्मकषा । स्त्री [illegible]द्रव्यविशेषे । सप्तलायाम् । भूरिफेनायाम् ॥ मांसरोहिण्याम् ॥ चर्म्मणः कषा ॥

चर्म्मकारः । पुं । चमार इति भाषाप्रसिद्धे कारावरे । पादूकृति । चण्डाल्यां तीवराज्जाते । इतिपराशरपद्धतिः ॥ चर्म्म करोति । कुकृञ्° ।

कर्मच्छम् ॥

चर्म्मकारी । स्त्री । चर्मकषायामोषधौ ॥

चर्म्मकीलम् । न । अर्शः प्रभेदे ॥ व्याने गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचोवहिः । कीलोपमंस्थिरखरं चर्मकीलन्तु तद्विदुः ॥

चर्म्मकृत् । पुं । चर्मकारे ॥

चर्म्मचटका । स्त्री । अजिनपत्रायाम् । जतुकायाम् । चामचिरैया इतिभाषा ॥

चर्म्मचटी । स्त्री । गृहमाचिकायाम् । चर्मचटकायाम् ॥

चर्म्मचित्रकम् । न । श्वेतकुष्ठे ॥

चर्म्मजम् । न । रुधिरे ॥ रोमणि ॥

चर्म्मण्वती । स्त्री । चम्बल इतिभाषा प्रसिद्धे नदीविशेषे ॥ चर्मास्त्यस्याम् । मतुप् । आसन्दीवदिति चर्मणो नलोपाभावोणत्वञ्च निपात्यते ॥

चर्म्मतरङ्गः । पुं । बलौ । जरयाश्लथचर्मणि ॥

चर्म्मदण्डः । पुं । कशायाम् । कोरडा इति भाषा ॥

चर्म्मदूषिका । स्त्री । कोठरोगे ॥

चर्म्मद्रुमः । पुं । भूर्जवृक्षे ॥

चर्म्म । न । चामइतिप्रसिद्धे त्वगिन्द्रिये । असृग्धरायाम् । कृत्तौ । अजिने । रोमभूमौ ॥ ढालफरी इतिचर्मसिद्धे फलके ॥ अस्यलक्षणं यथा । शरीरावरकं शस्त्रं चर्मइत्यभिधीयते । तत् पुनर्द्विविधं काष्ठचर्म सम्भवभेदतः ॥ शरीरावरकत्वञ्च लघुता दृढता तथा । दुर्भेद्यतेतिकथितश्चर्मणां गुणसङ्ग्रहः ॥ स्वल्पता गुरुता चैवमृदुता सुखभेद्यता । विवृद्धवर्णताचेति चर्मणां दोषसङ्ग्रहः ॥ सितोरक्तस्तथापीतः कृष्णइत्यभिशब्दितः । ब्रह्मादिजातिभेदेन चर्मणां वर्णनिर्णयः ॥ चित्रवर्णस्तु सर्वेषां सर्वदैवोपपद्यते इतिभोजः ॥ चरति चर्य्यते वा ऽनेनवा ॥ चर० । मनिन् ॥

चर्म्मनासिका । स्त्री । ताडन्याम् ॥

चर्म्मपत्रा । स्त्री । चर्मचट्याम् ॥

चर्म्मपादुका । स्त्री । उपानहि ॥

चर्म्मपुटः । पुं । } इतिसंज्ञके चर्म
चर्म्मपुटकः । पुं । } पात्रविशेषे ॥

चर्म्मप्रभेदिका । स्त्री । आरायाम् । चर्मवेधास्त्रप्रभेदे ॥ चर्मणः प्रभेदिका ॥

चर्म्मप्रसेविका । स्त्री । भस्त्रायाम् । अग्निसन्दीपनार्थं चर्मनिर्मिते यन्त्रे । भाती इतिभाषा ॥ चर्मणा प्रसीव्यते । षिवुतन्तुसन्ताने । कृ० वुन् ॥ संज्ञायामितिण्वुल् वा ॥

चर्म्ममुण्डा । स्त्री । दुर्गायाम् ॥

चर्म्ममुण्डिका । स्त्री । कात्यायन्याम् । चण्डिकायाम् ॥

चर्म्मयष्टिः । स्त्री । अश्वताडन्याम् । कशायाम् ॥ चर्म्मणो यष्टिः ॥

चर्म्मरङ्गा । स्त्री । आवर्त्तकीलतायाम् । विभाण्ड्याम् ॥

चर्म्मकः । पुं । चर्म्मकारे ॥ इति त्रिकाण्डशेषः ॥

चर्म्मसम्भवा । स्त्री । एलायाम् ॥

चर्म्मसारः । पुं । } रसे ॥ इतिरा
चर्म्माम्भः । न । } जनिर्घण्टः ॥

चर्म्मारः । पुं । चर्म्मकारे ॥ चर्म्मक्रियाम् ऋच्छति । ऋच्छेः कर्म्मण्यण् ॥ छि क्कलमभेदे ॥ चर्म्मारः शुक्लवर्णः स्यात् ॥

चर्म्मी । पुं । फलकपाणौ । ढलैत इति भाषा ॥ भूर्जवृक्षे ॥ भृङ्गरीटे ॥ कदल्याम् ॥ चर्म्मास्यास्ति । व्रीहिनिः ॥

चर्य्या । स्त्री । ईर्य्यापथम् । नियमाच्यागे । ध्यानमौनादिकस्य भिक्षुव्रतस्यानुष्ठाने । ईर्य्यापथस्थितौ ॥ ईर्य्यते गुरोः शास्त्रोपासनया ज्ञायते इति ईर्य्या । ईर्य्यायाः पन्थाः । ऋक्पूरित्यः । ईर्य्यापथे ध्यानाद्युपाये परिव्राजकादीनां स्थितिः तस्यामित्यर्थः ॥ आचरणे ॥ चरणम् । चर० । गदमदचरयमश्चानुपसर्गे इति यत् ॥ यद्वा । परिचर्य्यापरिसर्य्येत्यत्र परीत्यस्या विवक्षणात् चर्य्येति साधुः ॥

चर्व्वणम् । न । दन्तैश्चूर्णने । चबावना इति भाषा ॥ चर्व्व अदने । ल्युट् ॥

चर्व्वा । पुं । तलप्रहारे ॥

चर्व्वितः । त्रि । भक्षिते । कृतचर्व्वणे ॥ चर्व्व्यते स्म । चर्व० । क्तः ॥

चर्व्वितपात्रकम् । न । चर्व्विततांबूलादित्यागपात्रे । कटकोले । पतद्ग्रहे ॥

चर्व्व्यम् । त्रि । चर्व्वणीये ॥

चर्षणिः । पुं । जने ॥ कर्षति । कृष० । कृषेरादेश्च चः इत्यनिः ॥

चर्षणी । स्त्री । पुंश्चल्याम् ॥ कर्षति मनः । कृष विलेखने । कृषेरित्यनिः । कृदिकारादिति ङीष् ॥

चलः । पुं । कम्पे ॥ न । चञ्चले । लोले । तरले ॥ अल्पकालस्थायिनि । शरीरे जगति च ॥ प्रतिक्षणमन्यथाभावात् ॥ नक्षत्रविशेषे । स्वात्यादित्येश्रुते स्त्रीणि चन्द्रश्चापि चरं चलम् ॥ त्रि । कम्पयुक्ते । चञ्चले ॥ चलति चलगतौ । पचाद्यच् ॥

चलचञ्चुः । पुं । } चकोरपक्षि-
चलच्चञ्चुः । पुं । } णि ॥

चलत्पूर्णिमा । स्त्री । चन्द्रकमत्स्ये ॥

चलदङ्गः । पुं । } चेङ्गामाछ इ-
चलदङ्गकः । पुं । } तिगौड भाषा प्रसिद्धे मत्स्ये ॥

चलद्दलः । पुं । अश्वत्थवृक्षे ॥ चलानि दलान्यस्य ॥

चलनः । पुं । पादे ॥ हरिणे ॥ न । भ्रमणे ॥ कम्पे ॥ स्थिरत्वप्रच्युतौ ॥ देशान्तरप्राप्तिहेतुभूते क्रियाविशेषे ॥ चलनशीलम् । चल० । चलनशब्दे त्रियुच् ॥ त्रि । कम्पे । कम्पयुक्ते ॥

चलनकम् । न । चण्डातके ॥

चलना । स्त्री । नारीभेदे । गजबन्धन्याम् ॥ वस्त्रघर्घर्याम् । वस्त्रवेष्टिन्याम् ॥

चलपत्रः । पुं । पिप्पलवृक्षे ॥ चलानि पत्राण्यस्य ॥

चलसङ्क्रमः । पुं । ईश्वरेच्छालोकाद्दूपयात्तसद्राग्र्यादिभागस्य सूर्यते जसम्पर्के ॥

चला । स्त्री । लक्ष्म्याम् ॥ चञ्चलत्वाच्चला त्वं वै सर्वं चैव न संशयः ॥ सिल्हके ॥ टाप् ॥

चलाचलः । त्रि । चञ्चले ॥ चलति । चल० । चरिचलीति द्वित्वादिः ॥ पुं । काके ॥

चलातङ्कः । पुं । वातरोगे ॥

चलाभासः । पुं । मायामयस्य रज्जुसर्पादेर्गमने ॥ चलमिवआभासते इति तथा ॥

चलितः । त्रि । कम्पिते ॥ उल्लसिते । तरङ्गिते ॥ प्रचके ॥ गते ॥ चलति स्म । चलकम्पने । क्तः ॥

चलुः । पुं । गण्डूषे ॥ इति हेमचन्द्रः ॥

चलुकः । पुं । प्रसृतौ ॥ भाण्डभेदे ॥

चवर्गः । पुं । चादिपञ्चवर्णेषु ॥

चवर्गीयः । पुं । चवर्गभवेवर्णे ॥ वर्गान्ताच्चेतिछः ॥

चवलः । पुं । राजमाषे । चौंला इति भाषा ॥

चविः । स्त्री । चविकायाम् ॥

चविकम् । न । चव्ये ॥ चर्व्यते । चर्व० । कुन् । पृषोदरादिः ॥

चविका । स्त्री । चइ इतिगौडभाषाप्रसिद्धे वृक्षे । चव्ये ॥ चविकाट्टाप् ॥

चव्यम् । न । चविकायाम् ॥ कणामूलभवं चव्यं विशेषाद्गजपिप्पलम् ॥ चर्व्यते । चर्व । ण्यत् । पृ० ॥

चव्यकम् । न । चव्ये ॥

चव्यजा । स्त्री । } गजपिप्पल्याम् ॥
चव्यफलम् । न । }

चव्या । स्त्री । वचायाम् ॥ कार्पास्याम् ॥

चषकः । पुं न । सुरापानपात्रे । गल्वर्के । सरके ॥ अथचषकोद्देशः । यत्पानपात्रं भूपानां तज्ज्ञेयं चषकं बुधैः । कानकं राजतं चैव स्फाटिकं काचमेव च ॥ वृत्तं सराष्टदिक्कोणं चतुर्णां पृथिवीभुजाम् । इत्यन्य

सम्मतं तेषां निर्णयःपाठसम्मतः ॥ स्वमुष्टिसम्मितं रत्नै श्चतुर्वर्णैः समन्वितम् । मार्त्तिकं वाऽश्मफालं वा सर्वेषामुपयुज्यते । काष्ठजं धातुजं चैवं आकृत्यादिमहीभुजाम् । यद्‌ न्यत्तीयपानादिपात्रं पृथ्वीभुजां भवेत् ॥ एवं तत्रापिनियमइतिभोजस्य निश्चयः ॥ * ॥ मधुनि । मद्ये ॥ मद्यभेदे ॥ मद्यभाजने ॥ चष्यतेऽनेन । चषभक्षणे । क्वुन् ॥

चषतिः । पुं । भक्षणे ॥ वधे ॥

चषालः । पुं । यूपकटके ॥ यज्ञसमाप्तिसूचकं पशुबन्धनार्थं यज्ञभूमौ यत्काष्ठमारोप्यते सयूपः तस्यशिरसि वलयाकृति र्मकटाकृति र्वायःकाष्ठविकारः सचषालः । यूपमूलेविहितश्चोलयश्च ॥ चषति चष्यते वा । चष० । सानसिवर्णसिपर्णसीतिचषेरालः ॥

चाकचक्यम् । न । } उज्ज्वलतायाम् ॥ नहिलौ
चाकचिक्यम् । न । }

कसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव । तथाहि । काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकाराचाकचक्याकाराच काचिदन्तःकरणवृत्तिरुदेतीतिवेदान्तपरिभाषा ॥

चाकचिक्या । स्त्री । श्वेतगुञ्जायाम् ॥

चाक्रायणः । पुं । उषस्त्यास्यर्षौ ॥ चक्रस्यगोत्रापत्यम् । अ० फञ् ॥

चाक्रिकः । पुं । बहुभिर्मिलित्वास्तुतिकारे । घाण्टिके ॥ चक्रेण समूहेन चरति । चरतीति ठक् ॥ शाकटिके ॥ तैलकारे ॥

चाक्षुषः । पुं । षष्ठमनौ ॥ न । रूपे ॥ चक्षुषागृह्यते । अण् ॥ चक्षुरेववा । स्वार्थिकः प्रज्ञाद्यण् ॥ प्रत्यक्षविशेषे ॥ तत्तु चक्षुरिन्द्रियजन्यज्ञानम् । द्रव्यचाक्षुषंप्रति चक्षुःसंयोगः कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्यसमवेतसमवेतचाक्षुषंप्रति चक्षुःसंयुक्तसमवेतसमवायः । तथाच भा० प० । द्रव्याध्यक्षस्तु संयोगात् संयुक्तसमवायतः । द्रव्येषु समवेतानां तथातत्समवायतः ॥ तत्रापिसमवेतानां शब्दस्य समवायतः । तद्वृत्तीनांसमवेतसमवायेनतुग्रहः इति ॥ त्रि । चक्षुर्ग्राह्ये ॥

चाङ्गम् । न । दन्तपटुत्वे ॥

चाङ्गेरी । स्त्री । अम्ललोणिकायाम् ॥ चाङ्गेरीदीपनीरुच्या लघूष्णाकफवातनुत् । पित्तलाम्लाग्रहण्यर्शः कुष्ठातीसारनाशिनी ॥ चाङ्गम् ईरयति

। ईरप्रेरणे । कर्मण्यण् ॥

चाञ्चल्यम् । न । चञ्चलतायाम् ॥

चाटः । पुं । चौरे ॥ आर्यमर्यादां शास्त्रमर्यादां वा भिन्दाने ॥ प्रतारके ॥ आदौ विश्वासमुत्पाद्य पश्चात् परधनापहर्त्तरि । प्रच्छन्नापहारिणि तस्करे ॥ योद्धरि कलहप्रिये ॥ चटनम् चाटनं वा । चटभेदने । भावे घञ् ॥

चाटकैरः । पुं । चटकापत्ये ॥ चटकायाः चटकस्य वा पुमपत्यम् । चटकाया एरक् । चटकस्येति वाच्यम् ॥

चाटुः । पुं । न । श्लिष्टवाक्ये । प्रियप्राये । चटौ ॥ चकार च बहुचाटून् प्रौढयोषिद्वरस्येति । क्लीबमपि । चाटु चाऽकृतकसंभ्रम मासां कार्मणत्वमगमद्रमणेष्वितिच माघः ॥ चटति । चटभेदने । दृसनिजनीतिञुण् ॥ मिथ्याप्रियवाक्ये ॥

चाटुपटुः । पुं । भण्डे । भाँड इति भाषा ॥

चाटुलोलः । त्रि । चटुललोले । सुचञ्चले ॥

चाटुवटुः । पुं । भण्डे । विदूषके । क्रीडनीयकपात्रे ॥

चाटूक्तिः । स्त्री । सेवायाम् ॥ प्रियवार्त्तायाम् ॥

चाणकीनम् । न । चणकोत्पत्तियोग्य

क्षेत्रे ॥ चणकानाम् भवनं क्षेत्रम् । धान्यानामिति खञ् ॥

चाणक्यः । पुं । मुनिविशेषे । श्रोत्रिये ॥ चणकस्य गोत्रापत्यम् । गर्गादित्वात् यञ् ॥ न । तन्निर्मिते राजनीतिशास्त्रे ॥

चाणक्यमूलकम् । न । मूलकभेदे । वालेये । विष्णुगुप्तके ॥

चाणूरः । पुं । कंसासुरस्य प्रधानमल्ले ॥

चाणूरसूदनः । पुं । श्रीकृष्णे ॥ चाणूरं सूदितवान् । सूदयतेर्नन्द्यादित्वाल्ल्युः ॥

चाण्डालः । पुं । चण्डाले । श्वपचे । अन्त्यजे ॥ चण्डाल एव । कुलालवरुडनिषादचण्डालमित्रामिभ्यश्छन्दस्युपसङ्ख्यानमिति स्वार्थेऽञ् ॥ प्रायशो लोकेपीति केचित् ॥

चाण्डालिकः । पुं । चण्डालापत्ये ॥

चण्डालवल्लकी । स्त्री । कण्डोलवीणायाम् ॥ चाण्डालस्य वीणा ॥

चाण्डालिका । स्त्री । कण्डोलवीणायाम् ॥ चण्डालिकाशब्दार्थे ॥ चण्डालस्येयम् । तस्येदमित्यण् । टिड्ढेति ङीप् । स्वार्थे कन् ॥ चण्डालेन कृता वा । कुलालादिभ्यो वुञ् ॥

चाण्डाली । स्त्री । चण्डालयोषायाम् ॥ लिङ्गिन्याम् ॥

चातकः । पुं । स्तोकके । सारङ्गे । पक्षी

का इतिभाषा ॥ यथा । सर्व्वसहापतितमम्बु न चातकानामिति ॥ चतति । चते० । ण्वुल् ॥

चातकानन्दनः । पुं । वर्षाकाले ॥

चातकः । पुं । शरवीजे ॥ चातको मधुरो रूक्षो रक्तपित्तकफापहः । शीतो लघु रहस्यश्च कषायो वातकोपनः ॥

चातुरः । पुं । चक्रगण्डौ ॥ त्रि । नेत्रगोचरे ॥ चाटुकारे ॥ नियन्तरि ॥ चतुर एव । स्वार्थे ऽण् ॥ न । शकटे ॥ चतुर्भिरुह्यते । शेषेऽण् ॥

चातुरकः । त्रि । चातुरार्थे ॥

चातुराश्रम्यम् । न । ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिषु ॥ चत्वार आश्रमा एव । चतु० स्वार्थे ष्यञ् ॥ चतुर्णामाश्रमाणां धर्म्मे ॥

चातुरी । स्त्री । दाक्ष्ये । चतुरतायाम् ॥ बालोकद्वयसाधनीतनुभृतां सा चातुरी चातुरी ॥ चतुरस्येयम् । तस्येदमित्यण् । ङीप् ॥

चातुर्ज्जातकम् । न । चतुर्जातके ॥ स्वार्थे अण् ॥

चातुर्द्दशिकः । त्रि । भूताध्ययनकर्त्तरि ॥ चतुर्दश्यामधीते । अध्यायिन्यदेशकालादिति ठक् ॥

चातुर्भद्रम् । न । नागरातिविषामुस्तागुडूचीति चतुष्टये ॥

चातुर्मासी । स्त्री । पूर्णिमाविशेषे ॥ चतुर्षु मासेषु भवा । संज्ञायामित्यण् । ङीप् ॥

चातुर्म्मास्यम् । न । यागविशेषे ॥ चातुर्मास्ययागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघासः शाकमेधः शुनासीरीयश्चेति । चतुर्षु मासेषु भवन्ति चातुर्मास्यानि यज्ञानि । चतुर्मासाण्ण्यो यज्ञे इति ण्यः ॥ आषाढशुक्लद्वादश्यादि चतुर्मासकर्त्तव्ये व्रते ॥ यथा । आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा । चातुर्मास्यव्रतारम्भं कुर्यात् कर्कटसङ्क्रमे ॥ अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती । कार्त्तिके शुक्लद्वादश्यां विधिवत् तत् समापयेत् ॥ चतुर्ष्वपि हि तच्चीर्णं चातुर्मास्यं व्रतं नरः । कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेदिति वाराहः ॥

चातुर्म्मास्यद्वितीया । स्त्री । आषाढफाल्गुनोर्ज्जेषु या द्वितीया विधुक्षये । चातुर्मास्यद्वितीयास्ताः प्रवदन्ति महर्षयः ॥

चातुर्व्वर्ण्यम् । न । यज्ञसाधनेषु ब्राह्मणक्षत्रियविट्शूद्रेषु ॥ चत्वारो वर्णा एव । चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यान

मितिष्यञ् ॥ देवेषु चत्वारो वर्णा यथा । आदित्याःक्षत्रियास्तेषां विशश्च मरुतस्तथा । अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥ स्मृतास्त्वाङ्गिरसो देवा ब्राह्मणा इति निश्चय इति ॥

चातुर्वैद्यः । पुं । चतुर्वेदे ॥ चतुरो वेदानधीते चतुर्वेदः । सएव । चतुर्वेदस्योभयपदवृद्धिश्चेति ब्राह्मणादिगणे पाठत् ष्यञ् ॥

चात्वालः । पुं । याज्ञिकानां गर्त्तविशेषे ॥ चत्वाल एव । स्वार्थे अण् ॥

चाणूरः । पुं । कंसमल्ले । चाणूरे ॥

चाणूरसूदनः । पुं । श्रीकृष्णे ॥ चाणूरं सूदितवान् सूदयति वा । सूद च रणे । ल्युः ॥

चान्द्रः । पुं । चन्द्रकान्तमणौ ॥ शुक्लावसानान्ते मासे ॥ कृष्णादिपूर्णिमान्ते च मासे ॥ न । चान्द्रायणे ॥ चन्द्रस्यायम् । अण् ॥

चान्द्रकम् । न । शुण्ठ्याम् ॥ इति राजनिर्घण्टः ॥

चान्द्रभागा । स्त्री । } चन्द्रभागायाम् ॥
चान्द्रभागी । स्त्री । }

चान्द्रमसः । पुं । इन्दुजे ॥ भारतवर्षीयोपद्वीपविशेषे ॥ न । मृगशिरोनक्षत्रे ॥ त्रि । चन्द्रमसस्सम्बन्धिनि ॥ चन्द्रमसोऽपत्यम् इदं वा । अण् ॥

चान्द्रमसायनः । पुं । बुधे । सौम्ये ॥

चान्द्रमासः । पुं । चन्द्रसम्बन्धिमासे ॥ सतु गौणमुख्यभेदेन द्विविधः । तत्राद्यः कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । चान्द्रोऽपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधेत्युक्तः ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आब्दिकश्राद्धादिसपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म नित्यस्नानं गृहपुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्माणि चेति ॥ गौणचान्द्रे कर्माणि । अष्टकादिपार्वणश्राद्धं वारुणीस्नानं जन्मतिथिकृत्यं जन्माष्टम्याद्युपवासो दुर्गोत्सवादितिथिनियतपूजाचेति ॥ चान्द्रश्चासौमासश्च ॥

चान्द्रव्रतम् । न । नृपतेर्व्रतविशेषे ॥ यथा ॥ परिपूर्णं यथाचन्द्रं दृष्ट्वा हृष्यन्ति मानवाः । तथा प्रकृतयो यस्मिन् स चान्द्रव्रतिको नृपइति मनुः ॥

चान्द्राख्यम् । न । आर्द्रके ॥

चान्द्रायणम् । न । व्रतविशेषे । इन्दुव्रते ॥ तच्चतुर्विधं भवति । पिपीलिकामध्याख्ययवमध्याख्ययतिचान्द्रायणशिशुचान्द्रायणभेदात् । तथाहि ।

एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥ त्रिषवणं स्नानं कुर्वाणः पौर्णमास्यां पञ्चदशग्रासानश्नीयात ततः कृष्णप्रतिपत्क्रमेण एकैकं ग्रासं ह्रासयेत्। तथा च चतुर्दश्यामेको ग्रासः सम्पद्यते । ततोऽमायामुपोष्य शुक्लप्रतिपत्प्रभृतिभिरेकैकं वृद्धिं-नयेत् एवं पौर्णमास्यां पञ्चदशग्रासाः सम्पद्यन्ते । एतत्पिपीलिकामध्याख्यं चान्द्रायणम् ॥ १ ॥ एतमेव विधिं कृत्स्न माचरेद्यवमध्यमे । शुक्लपक्षादिनियतश्चरंश्चान्द्रायणव्रतम् ॥ एवमेव पिण्डह्रासवृद्धित्रिषवणस्नानात्मकं विधानं यवमध्याख्ये चान्द्रायणे शुक्लपक्षमादितः कृत्वा संयतेन्द्रियश्चान्द्रायणमनुतिष्ठन् आचरेत् । ततश्च शुक्लप्रतिपदमारभ्य एकैकं पिण्डं वर्द्धयेत् । यथा पौर्णमास्यां पञ्चदशग्रासाः सम्पद्यन्ते । ततः कृष्णप्रतिपदमारभ्य एकैकं पिण्डं ह्रासयेत् । यथा अमावास्यामुपवासो भवति ॥ २ ॥ अष्टावष्टौ समश्नीयात् पिण्डान्मध्यंदिने स्थिते । नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥ ३ ॥ चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतमिति मनुः ॥ ४ ॥

चान्द्रायणिकः । पुं । तपस्विविशेषे ॥ चान्द्रायणं वर्त्तयति । पारायणतुरायणचान्द्रायणं वर्त्तयतीति ठञ् ॥

चान्द्री । स्त्री । श्वेतकण्टकार्य्याम् ॥ ज्योत्स्नायाम् ॥

चापः । पुं । धनुषि । शरासने ॥ धनूराशौ ॥ पञ्चकलस्य ॥ऽ तृतीयप्रभेदे ॥ चापस्य वंशभेदस्य विकारः । अवयवे च प्राण्योषधिवृक्षेभ्य इत्यण् ॥

चापपटः । पुं । पियालवृक्षे ॥

चापलम् । न । अनवस्थितौ ॥ तत्पर्य्याय यथा । मात्सर्य्यद्वेषरागादेश्चापलन्त्वनवस्थितिरिति ॥ अविनीतत्वे । प्रयोजनं विनापि वाक्पाण्यादिव्यापारयितृत्वे । अविमृश्यकारित्वरूपे चपलकर्म्मणि ॥ सञ्चारिभावे ॥ आत्मप्रकाशिनी चेष्टारागाद्येश्चापलंमतमिति लक्षणात् ॥ चपलस्यकर्मभावो वा । यु० अण् ॥

चापल्यम् । न । चपलतायाम् ॥ चाञ्चल्ये । चापले ॥ चपलस्य कर्म्म भावो वा । गुणवचनत्वात् प्राप्तस्य ष्यञो युवादिपाठप्राप्तेनाणा बाधप्रसङ्गेऽपि ब्रा० ष्यञ् ॥

चामरः । पुं । न । चमरीपुच्छनिर्म्मिते बालव्यजने । प्रकीर्णके । चौर

चौरी इतिच भाषा ॥ अस्य यो
जनप्रदर्शनार्थमाह । देवै चम
र्यः किल वालहेतोः सृष्टा हिमच्छैल
धरकन्दरेषु । आपीतवर्णाश्च भवन्ति
तासां कृष्णाश्च लाङ्गूलभवाः सिताश्च
॥ चमरीणां गुणसम्पदमाह । स्नेहो
मृदुत्वं बहुबालता च वैशद्यमल्पा-
स्थिनिबन्धनत्वम् । शौक्ल्यञ्च तासां
गुणसम्पदुक्ता विद्धाऽल्परोमाणि न
शोभनानि ॥ चामरदण्डलक्षणमा
ह । अध्यर्द्धहस्तप्रमितोऽस्य दण्डो ह-
स्तोऽथवारत्निसमोऽप्यनन्यः । काष्ठाच्छु
भात् काञ्चनरूप्यगुप्तात् रत्नैश्च सर्वं-
श्च हितायराज्ञाम् ॥ वर्णक्रमेणदण्ड
स्य० । यष्ट्यातपत्राङ्कुशवेत्रचापवि
तानकुन्तध्वजचामराणाम् । व्यापी
ततन्त्रीमधुकृष्णवर्णा वर्णक्रमेणैवहि
तायदण्डः ॥ दण्डादेः समपर्वणः फ
लमाह । मातृभूधनकुलक्षयावहा
रोगमृत्युजननाश्च पर्वभिः । द्व्यादि
भिर्द्विकविवर्द्धितैः क्रमाद्द्वादशान्तवि
रतैः समैः फलम् ॥ तेषामेव त्र्यादि
षु विषमेषु द्विकविवर्द्धितेषु फलम् ।
यात्राप्रसिद्धिर्द्विषतां विनाशो ला-
भाः प्रभूता वसुधागमश्च । वृद्धिः पशू
नामभिवाञ्छितासिस्त्र्यादिष्वयु
ग्मेषु तदीश्वराणाम् ॥ इति बारा

र्णां ७० अध्यायः ॥ विशेषोयुक्तिकल्प
तरोर्ज्ञेयः ॥ दण्डे ॥ अतिशक्करीसं
ज्ञकपञ्चदशाक्षरायावृत्तेः प्रभेदे । य
था । हारवत्पयोधरं मृगेन्द्ररञ्जसु
न्दरं चामरध्वजद्वयेन मण्डितं हि
चामरम् । छत्रराजमेतदेवनगाराज
भाषितं मण्डितावलीविनोदकारि
चारुभाषितम् ॥ यथा । रासलास्य
गोपकामिनीजनेन खेलता पुष्पपु
ञ्जमञ्जुकुञ्जमध्यगेन दोलता । ताल
नृत्यशालिगोपबालिकाविलासिना
ऽध्वेनमायतां सुखायमन्दहासिने
ति ॥ गुर्वऽचरेऽ ॥

चामरपुष्पः । पुं । न । पूगे ॥ काशे ॥
आम्रे ॥ केतके ॥

चामरा । स्त्री । चामरे ॥ दण्डे ॥ अ
जा० टाप् ॥

चामरी । पुं । घोटके । किल्किनि ॥
इति त्रिकाण्डशेषः ॥

चामीकरम् । न । स्वर्णे । कनके ॥ च
मीकरे आकर विशेषे भवम् । तत्र
भवः इत्यण् ॥ यद्वा । चमनम् चम०
। इण् आदिभ्यः इतीण् । चनाचमे
रिति आङोऽविवक्षितत्वाद्वृद्धिः ।
चामीकरोति । रूमोहेम्नितिटः ॥

चामुण्डा । स्त्री । मातृकाभेदे । चर्म
मुण्डायाम् । भैरव्याम् ॥ दुर्गायाम् ।

। मौर्य्याम् ॥ मोक्षकारणीभूतनि-
र्विकल्पकवृत्तिविशेषे ॥ चमूरेणा वि
यदादिसमूहरूपां ड्राति खण्डयोरैक्या
त्माति आदत्ते स्वात्मसाक्षात्कारेण
नाशयति इतिव्युत्पत्तेः । पृषोदरा-
दित्वात् सर्वं सुस्थमित्याहुः ॥ मया
तवात्रोपहृतौ चण्डमुण्डौ महाप
शू इत्यत्र पशुपदद्विवचनयोः स्वार
स्येन तूलमूलभेदेनाज्ञानद्वयकथने
न यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्व
मुपागता । चामुण्डेति ततो लोके
ख्याता देवी भविष्यसीत्यत्रापि तूल
मूलाविद्ययोरादानमेव गृहीत्वेति
पदेनानूद्य निर्वचनकथनादखण्डब्र
ह्मविद्यैवेयं चामुण्डापदस्यार्थो वर्णि
त इति [illegible]रहस्यम् ॥ यद्वा ।
चमति । चमु अदने । बा० उण् ।
चामुण्डनीयः पदार्थः । स च ब्रह्मा
तिरिक्तः सर्वोऽपि । अत्ता चराचरग्र
हणादित्यधिकरणे तथानिर्णयात् ।
तं डापयति उड्डापयति नविषयी
कुरुते ब्रह्ममात्रविषयिणीति यावत्
॥ अथवा चकार एकाक्षरनिघण्टुरी
त्या चन्द्रवाचकः आह्लादप्रकाशगु
णयोगादिह ब्रह्मपरः आनन्दपरो वा
स च ब्रह्मैव यस्मिन् तदाऽऽमन्तान्मुण्डय
तीति चामुण्डा । मुण्डनं नामाधा

रापेक्षया न्यूनसत्ताकवस्तुनिरासः ।
शिरश्चर्मापेक्षया न्यूनतादात्म्यवता
मेव केशानां वपने प्रयोगात् ॥ अथ-
वा चामां बह्वीनां मुण्डानां वा मुण्ड
मिव शीर्षमिव स्थिता सर्वोत्तमा च
रमवृत्तिरूपा ब्रह्मविद्येति यावदिति
गौडपादटीकानुवादी भास्कररायः ॥
चाम्पिला । स्त्री । नद्याम् । निर्झरि-
ण्याम् ॥
चाम्पेयः । पुं । चम्पके ॥ स्वर्णे ॥ कि
ञ्जल्के ॥ नागकेसरे ॥ चम्पाया अप
त्यम् । स्त्रीभ्यो ढक् ॥
चाम्पेयकम् । न । किञ्जल्के ॥
चायनीयः । त्रि । पूजनीये ॥
चारः । पुं । पियालवृक्षे । चिरौंजी इ
ति प्रसिद्धे ॥ चारः पित्तकफास्रघ्न-
स्तत्फलं मधुरं गुरु । स्निग्धं सरं मरु
त् पित्तदाहज्वरतृषापहम् ॥ पिया
लमज्जा मधुरो वृष्यः पित्तानिला-
पहः । हृद्योऽतिदुर्जरः स्निग्धो वि
ष्टम्भी आमवर्द्धनः ॥ गतौ ॥ बन्धे ॥
अवसर्पे । चरे । प्रणिधौ ॥ चारान्
विचारयेत् तीर्थेष्वात्मनश्च परस्य च
। पाषण्डादीनविज्ञातानन्योन्यमवि
तरेपि च ॥ * ॥ अमौघ्य ममान्यम
हृषाभाविच्चमध्यूहकस्वच्छेतिचार
गुणा इतिमीति वाक्यमूलम् ॥ * ॥

तल्लक्षणं यथा । विवस्वानिव तेजो
भिर्नभस्वानिव वेगतः । राजा चरेण
गत्सर्वं प्राप्नुयाल्लोकसम्मतैः ॥ तर्के
ङ्गितज्ञः स्मृतिमान् स्वीयभावाप्र
काशकः । क्लेशायाससहोदक्षः सर्वच
भयवर्ज्जितः ॥ सुभक्तो राजसु तथा
कार्य्याणां प्रतिपत्तिमान् । नृपो नि
युञ्ज्याच्चारेण परराष्ट्रं विचक्षणः ॥
कालज्ञो मन्त्रकुशलान् सांवत्सरचि
कित्सकान् । तथान्यानपि युञ्जीत
समर्थान् शुद्धचेतसः ॥ अकुड्यांश्चत
था ऽलुब्धान् दृष्टार्थान् तत्त्वभाषिणः
। पाषण्डमस्तापसादीन् परराष्ट्रे नि
योजयेत् ॥ स्वदेशपरदेशज्ञान् सु
शीलान् सुविचक्षणान् । वार्त्तादि-
कान् बहूंश्चैव चाराणां विनियोजये
त् ॥ नैकस्य वचने राजा चारस्य प्रत्य
यं चरेत् । द्वयोः सम्बन्धमाज्ञाय तद्यु
क्तं कार्य्यमाचरेत् ॥ तस्माद्राजा प्रयु
ञ्जीत चारान् बहुमुखान् बहून् । मा
रेतो वामनाः कुब्जास्तद्विधा ये च का
रवः ॥ भिक्षुक्यश्चारणा दास्यो माला
कार्य्यः कलाविदः । अन्तः पुरगतां
वार्त्तां निर्हरेयुरर्चाचिताम् ॥ प्रकाश
श्चाऽप्रकाशश्च चारस्तु द्विविधो मतः ।
अप्रकाशो ऽयमुद्दिष्टः प्रकाशो दूतसंज्ञ
कः ॥ इति युक्तिकल्पतरुः ॥ कारागा

रे ॥ न । कृत्रिमविषे ॥ चरणम् । च
रगतौ । घञ् ॥ चरति वा । पचा
द्यच् । चर एव । प्रज्ञाद्यण् ॥

चारकः । पुं । अश्वादेः पालके ॥ सञ्चा
रके ॥ बन्धे ॥ पियालद्रुमे ॥ चारे
॥ स्वार्थे कः ॥

चारचक्षुः । पुं । राजनि ॥ चाराश्चक्षू
ंषि यस्य । गावः पश्यन्ति गन्धेन वेदैः
पश्यन्ति च द्विजाः । चारैः पश्यन्ति
राजान श्चक्षुर्भ्यामितरे जनाः ॥ स्व
परमण्डलकार्य्याकार्य्यविलोकने चारा
श्चक्षूंषि क्षितिपालानामिति नीतिवा
क्यामृतम् ॥

चारचुञ्चुः । त्रि । गतिविशेषैर्वित्ते ॥
चुञ्चुप् ॥

चारटिका । स्त्री । नलीनामगन्धद्रव्ये ॥

चारटी । स्त्री । पद्मचारिण्यामोषधौ
॥ भूम्यामलक्याम् ॥ चारयति । चरे
र्ण्यन्तात् शकादिभ्यो ऽटन् । ङीप् ॥

चारणः । पुं । कीर्त्तिसञ्चारकनटे । कु
शीलवे ॥ चारयति कीर्त्तिम् । चर०
। णिजन्तः । नं० ल्युः ॥ देवानांस्तुति
पाठके ॥

चारपथः । पुं । राजपथे ॥

चारभटः । पुं । वीरे ॥

चारवायुः । पुं । निदाघजेवायौ ॥

चारिणी । स्त्री । करुणीवृक्षे ॥

चारित्रम् । न । स्वभावे । चरित्रे ॥ कुलक्रमागताचारे ॥ चरित्रमेव । स्वार्थेऽण् ॥ चरन्तितेन । चर० । चरेर्वृत्तं इति णित्रन् वा । स्वरभेदः ॥

चारित्रा । स्त्री । तिन्तिडीवृक्षे

चारी । स्त्री । नृत्याङ्गविशेषे ॥ विवरणम्नुसङ्गीतदामोदरे ॥

चारुः । पुं । वृहस्पतौ ॥ त्रि । शोभने । रम्ये । मनोज्ञे ॥ चरति चित्ते । चर० । दृसनिजनिचरिचटिभ्यो ञुण् ॥ न । कुङ्कुमे ॥

चारुकः । पुं । शरबीजे ॥

चारुकेशरा । स्त्री । तरणीपुष्पे ॥ नागरमुस्तायाम् ॥

चारुगर्भः । पुं । } श्रीकृष्णपुत्र ॥
चारुगुप्तः । पुं । }

चारुदेष्णः । पुं । रुक्मिण्यांश्रीकृष्णतनये ॥

चारुधारा । स्त्री । इन्द्राण्याम् ॥ स्यादिन्द्राणी शतावरी चारुधारेति रभसः ॥

चारुनालकम् । न । रक्तपद्मे ॥

चारुपर्णी । स्त्री । प्रसारण्याम् । गन्धभादालिया इति गौडभाषा ॥

चारुफला । स्त्री । द्राक्षायाम् ॥ चारुणिफलान्यस्याः ॥

चारुमती । स्त्री । रुक्मिण्यां श्रीकृष्ण कन्यायाम् ॥

चारुलोचनः । पुं । हरिणे ॥ त्रि । सुलोचने ॥

चारुवर्द्धना । स्त्री । नार्य्याम् ॥

चारुबाहुः । पुं । } श्रीकृष्णात्मजे ॥
चारुविन्दः । पुं । }

चारुव्रता । स्त्री । मासोपवासिन्याम् ॥

चारुशिला । स्त्री । मणौ ॥

चार्म्मिकः । त्रि । चर्माभिन्ने ॥ उक्थादित्वाट् ठक् ॥

चार्च्चिक्यम् । न । चन्दनादिना देहविलेपने । अर्च्चायाम् । स्थासके ॥ चर्च्चअध्ययने । धात्वर्थनिर्देशे ण्वुल् । चर्च्चिकैव । स्वार्थेष्यञ् ॥

चार्म्मः । पुं । चर्मावृतरथे ॥ चर्मणापरिवृतः । परिवृतोरथइत्यण् ॥

चार्म्मणम् । न । चर्मसमूहे ॥ चर्मणांसमूहः । भिक्षादिभ्योऽण् ॥

चार्वाकः । पुं । वौद्धैकदेशिनि । आकाशभिन्नभूतचतुष्टयवादिनि तार्किकविशेषे । नास्तिके । वार्हस्पत्ये । लौकायतिके ॥ तस्येदंमतम् । शरीरमेवात्मा । प्रज्वलितगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् । स्थूलोहंकृशोऽहमित्यनुभवाच्च ॥ प्रत्यक्षमेकंचार्वाकाः प्रमाणं मन्यन्ते ॥ अपिच । सर्वचालोकायतमेवशा

त्त्वम्। यत्प्रत्यक्षमेवप्रमाणम्। पृ
थिव्यापस्तेजोवायवस्तत्त्वानि चत्वार्ये
व। अर्थकामौच पुरुषार्थौ। भूतान्ये
वचेतयन्ते नास्तिपरलोकः। मृत्यु
रेवापवर्ग इति ॥ दुर्योधनसखे राक्ष
सविशेषे ॥

चार्वी। स्त्री शोभनायाम् ॥ बुद्धौ ॥
ज्योत्स्नायाम् ॥ धनदभार्यायाम् ॥
दीप्तौ ॥

चालः। पुं। छप्पर इति ख्यात इति च ख्या
ते पटले। पिटे। छदिषि ॥ चल
ति। चलगतौ। ज्वलितिकसन्तेभ्यो
णः। वृद्धिः ॥

चालकः। पुं। गम्भीरवेदिनि। अङ्कुश
दुर्धरे हस्तिनि ॥ इतित्रिकाण्डशेषः ॥

चालनम्। न। चालन्याम्। क्षुद्रच्छि
द्रसमोपेतं चालनंतितउःस्मृतमि
ति कात्यः ॥ चाल्यतेऽनेनवा। च-
ल०। ण्यन्तः। ल्युट् ॥ धूनने ॥

चालनी। स्त्री। तितउः। बहुच्छिद्रा
याम्। चलनी इतिभाषा ॥ चा
ल्यतेऽनयावा। चलेर्ण्यन्ताल्ल्युट्।
ङीष् ॥

चाषः। पुं। स्वर्णचूडे। किकीदिवौ।
नीलाङ्गे। पुण्यदर्शने ॥ अशोकस्य
त्रिलोकस्य नन्दनः पुण्यदर्शनः। हे
चतुर्भुजो मणिग्रीवः स्वस्तिक स्वाप
राजितः ॥ अष्टौ चाषस्यनामानि
चाषं दृष्ट्वातुयःपठेत्। अर्थसिद्धिर्भवे
त्तस्य मिष्टमन्नं वराङ्गनेतिपठन्ति।
नीलकण्ठइत्यस्यप्रसिद्धिर्लोके॥ चा
षयति। चषहिंसायाम्। स्वार्थण्य
न्तात् अच्। चषभक्षणे। हेतुमण्
णयन्ताद्वाऽच् ॥

चासः। पुं। इक्षुप्रभेदे ॥ पक्षिविशेषे
। चाषे ॥

चिकः। पुं। गन्धमूषिके ॥

चिकर्त्तिषुः। त्रि। कर्त्तुमिच्छुः ॥
कृतीछेदने। सन्नन्तादुप्रत्ययः ॥

चिकित्सकः। पुं। वैद्ये। चिकित्सा
जीविनि ॥ आयुर्वेदकृताभ्यासः स
र्वेषांप्रियदर्शनः। आर्यशीलगुणोपे
त एषवैद्योविधीयते ॥ चिकित्सत
ति। कितेर्व्याधिप्रतीकारे इतिसन्न
न्तात् ण्वुल् ॥

चिकित्सा। स्त्री। रोगवारणे। रुक्
प्रतिक्रियायाम्। क्रियायाम् ॥ आ-
सुर्यादिभेदात्सा त्रिधा। यथा।
आसुरी मानुषी दैवी चिकित्सा
त्रिविधामता। सूतप्रधानादैवीया
च्छेदभेदात्मिकासुरी ॥ मानुषी
षड्रसाश्रयाजपहोमादिसंस्कृता।
कलौ चाल्पबलेलोके मानुषीतत्पू-
जिता ॥ तथाचचरके यथा। कविः

क्रियाभिर्जायन्ते शरीरे धातवः समाः । सा चिकित्सा विकाराणां कर्म तद्भिषजां मतम् ॥ या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च । सा क्रिया न तु या व्याधिं हरन्त्यन्यमुदीरयेत् ॥ अस्याः फलम् । क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः । कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥ अस्या अङ्गानि यथा । रोगी दूतो भिषग्दीर्घमायुर्द्रव्यञ्च सेवकः । तदौषधं चिकित्सायामित्यङ्गानि बुधा जगुरिति ॥ गुप्तिज्किद्भ्य इति कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च सन् । चिकित्सनम् । अप्रत्ययात् ॥

चिकित्सितः । त्रि । प्रतिकृतामये । कृतप्रतीकारे ॥ न । चिकित्सायाम् ॥ भेषजे ॥ चिकित्सा सञ्जाताऽस्य । तारकादित्वादितच् ॥

चिकित्स्यः । त्रि । रोगान्मोचयितव्ये ॥ चिकित्सितुं योग्ये । रोगे ॥ यथा । जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतयागदः । वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥ रोगमादौ परीक्षेत तदनन्तरमौषधम् । ततः कर्म भिषक्पश्चात् ज्ञानपूर्वं समाचरे-

-दिति ॥

चिकिनः । त्रि । चिपिटे । चिक्के ॥ नासिकायानतम् । इनच्पिटच् चिक चिचेति ने रिनच् प्रकृतेश्चिकादेशः । तद्योगान्नासिका चिकिना । पुरुषश्चिकिनः ॥

चिकिलः । पुं । पङ्के । कांकड़ इति भाषा ॥

चिकीर्षा । स्त्री । कर्त्तुमिच्छायाम् ॥ कृञ्० । अप्रत्ययादित्यः । टाप् ॥

चिकीर्षितम् । न । अभिप्राये ॥ कर्त्तुमीप्सिते ॥

चिकीर्षुः । त्रि । कर्त्तुमिच्छौ । करणेच्छाविशिष्टे ॥ कर्त्तुमिच्छति चिकीर्षति । तच्छीलः । सनाशंसभिक्ष उः ॥

चिकुरः । पुं । कुन्तले । बाले ॥ वृक्षप्रभेदे ॥ पक्षिविशेषे ॥ शैले । पर्वते ॥ गृहबभ्रौ ॥ सरीसृपे ॥ त्रि । तरले । चञ्चले ॥ चपले । दोषमनिश्चित्य वधबन्धनादेः कर्त्तरि ॥ शब्दरत्नावली ॥ यथा । तां वीक्ष्य लीलाचिकुरामनङ्गः स्वचापसौन्दर्यमदं मुमोचेति ॥ चिरञ्च तच्छब्दं कुरति । कुर शब्दे । इगुपधेति कः ॥

चिकुरपक्षः । पुं ।
चिकुरपाशः । पुं । } केशसमूहे ॥
चिकुरहस्तः । पुं ।

चिकूरः । पुं । चिकुरे ॥ इति शब्दभेद-

प्रकाशः ॥

चिक्कः । पुं । छुच्छुन्दर्याम् ॥ त्रि । नतनासिके । चिकिने ॥ नासिकाया नतम् । कप्रत्ययेनेश्चिका देशश्च ॥

चिक्कणः । पुं । पूगवृक्षे ॥ न । पूगफले ॥ त्रि । मसृणे । स्निग्धे । चिकण इति भाषा ॥ चिक्कनम् । चिक्कगतौ । सं॰क्विप् । चिक्कं कणति । कणशब्दे । मू॰कः ॥ यद्वा । चिक्कनम् । घञ् । चिक्कस्य कणम् । कणशब्दे । अच् । शकन्ध्वादिः ॥ यद्वा । चेतति । चितीसंज्ञाने । चितेः कणःकश्च । बाहुलकादगुणः ॥

चिक्कणा । स्त्री । उत्तमायाङ्गवि । नैचिक्याम् ॥ पूगफले ॥

चिक्कणी । स्त्री । पूगफले ॥

चिक्कसः । पुं । यवचूर्णे ॥ इति हेमः ॥

चिक्का । स्त्री । पूगफले ॥ इतिराजनिर्घण्टः ॥

चिक्रंसा । स्त्री । क्रमितुमिच्छायाम् । जिहत्सायाम् ॥ क्रमेः सन्नन्तात् प्रत्ययादित्यकारप्रत्यये टाप् । स्नुक्रमोरनात्मनेपदनिमित्त इतीडागमो न भवति । अनुक्रमेर्वृत्त्यादिव्यतिरिक्तार्थेऽप्यनुपसर्गादिति वैकल्पिकस्यात्मनेपदनिमित्तस्यानुपसर्गत्वस्यैवविकस्य सम्भवात् ॥

चिङ्गटः । पुं । गल्दा चिङ्गडा इति मोचा चिङ्गडी इति च गौड भाषा प्रसिद्धे मत्स्ये । महाशल्के ॥

चिङ्गटी । स्त्री । घुषा चिङ्गडी इति गौड प्रसिद्धे मत्स्ये ॥

चिङ्गडः । पुं । चिङ्गटे मत्स्ये ॥

चिचिण्डः । पुं । चिचिण्डे । सुदीर्घफले ॥

चिचीषा । स्त्री । चेतुमिच्छायाम् ॥ चिनोतेः सन्नन्तात् प्रत्ययादिति स्त्रियामकार प्रत्ययः । विभाषा चेरिति विकल्पात् कुत्वाभावः ॥

चिच्छक्तिः । स्त्री । चैतन्ये ॥ यथोक्तं सङ्क्षेपशारीरके । चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यत इति । अथोक्तं श्रीदेवीभागवते ५ स्कन्धे १९ ऽध्याये । चिच्छक्तिरस्ति परमात्मनि तेन सोपि व्यक्तो जगत्सु विदितोऽभवत्कृत्यकर्त्ता । कोऽन्यस्त्वया विरहितः प्रभवत्यमुष्मिन् कर्त्तुं विहर्त्तुमपि सञ्चलितुं स्वशक्त्येति ॥ २८ ॥ हे मातः सा चिच्छक्तिः परमात्मन्यस्ति तेन हेतुना सोपि परमात्माव्यक्तो नामरूपात्मको भवति तथा जगत्सु विदितः प्रसिद्धः तथा भवत्कृत्यकर्त्ता प्रपञ्चसृष्टिस्थितिसंहृतिकर्त्ता भवति । कः पुरुषोऽस्मात् परमात्म

नोऽन्यस्त्वदिरहितः स्वशक्त्यैवामुष्मिन् प्रपञ्चे कर्त्तुं विहर्त्तुं तथासम्भावितुं प्रभवति नकोपीत्यर्थः । यद्यपि तद्विरहिताऽपि त्वं शक्तिरूपा भवत्येव । एतादृशी त्वं सकलकारणमहमीयेति भावः । तदुक्तं देवीयामूर्त्तिसंहितायाम् । शक्तयाविना शिवेसूक्ष्मे नाम धाम न विद्यते इति ॥

चिञ्चा । स्त्री । अम्लिकावृक्षे ॥ चिमित्यव्यक्तं शब्दं चिनोति ॥ चिञ्० । अन्येभ्योपीतिडः ॥ फले ॥ चिञ्चायाः फलम् । हरीतक्यादित्वात्फलप्रत्ययस्यलुप् ॥

चिञ्चाम्लम् । न । }
चिञ्चासारः । पुं । } अम्लशाके ॥

चिञ्चिका । स्त्री । अम्लिकायाम् । अमली इति इमली इतिचभाषा ॥

चिञ्चिडः । पुं । सुदीर्घफले । चचैंडा इति भाषा ॥ चिञ्चिडो वातपित्तघ्नो वल्यः पथ्यो रुचिप्रदः । शोषणोतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥

चिञ्चुकी । स्त्री । चञ्च्वाम् । दीर्घपत्रायाम् । चेंचू नाडीशाके ॥

चिञ्चोटकः । पुं । अङ्कलोच्ये । चेंचको इतिचेंचुडा इतिचगौडप्रसिद्धे तृणे ॥

चित् । अ । असाकल्ये । असकलार्थे ॥ यथा । किञ्चित् ॥ चेतति । चितीसंज्ञाने । क्विप् ॥

चित् । स्त्री । मतौ । बुद्धौ ॥ अज्ञ(ते) । निर्विशेषस्फुरणमात्रे चेतने । स्वत एव प्रकाशमाने ब्रह्मणि ॥ निर्विकल्पकं सर्वावभासकं ज्ञानं प्रत्यगात्मस्वरूपं चिदितिव्याख्यातारः ॥ चिदिहास्तीतिचिन्मात्रमिदंचिन्मयमेवच । चित्त्वं चिदहमेतेच लोकाश्चिदितिभावयेत्युपदेशः ॥ चिती० । सं० क्विप् ॥

चितः । त्रि । छन्ने ॥ चीयतेस्म । चिञ्० । क्तः ॥

चिता । स्त्री । चित्यायाम् । मृतार्थदारुषु । प्रेतदाहार्थेऽग्न्याधाने ॥ शवदाहार्थं रचनायुक्तकाष्ठेषु ॥ संहतौ ॥ चीयतेस्म । चिञ्चयने । क्तः । टाप् ॥

चिताचूडकम् । न । चितायाम् ॥

चितिः । स्त्री । चितायाम् ॥ समूहे । वृन्दे ॥ निर्विषयकसंविदि ॥ बौधादिप्रसिद्धकासङ्ख्याज्ञानार्थाङ्कविशेषे ॥ अग्निस्थानविशेषे ॥ चीयते । चिञ्० । स्त्रियामधिकरणेवा क्तिन् ॥

चितिका । स्त्री । कटिशृङ्खलायाम् ॥

चित्तम् । न । चेतसि । अनुसन्धानात्मिकायामन्तःकरणवृत्तौ ॥ चित्तस्य बुद्धावन्तर्भावः विषयपरिच्छित्ति

रूपत्वाविशेषात् । बुद्धेश्च पूर्वाविषयः चित्तस्य पूर्वानुभूत इतिविषयभेदात् चित्तस्य क्वचित् पृथङ्निर्देशोप्यस्ति ॥ चैतन्ये ॥ यथा । एवंनना यतेचित्तमिति ॥ विज्ञानस्कन्धे ॥ चितौ० । भावे क्तः । श्वीदितइतीण्निषेधः ॥ चितायाम् ॥ चिताकाष्ठमठी चैत्यंचितांचूडकमिष्यते । चित्तम्बेतित्रिकाण्डशेषात् ॥

चित्तकालः । पुं । चित्तपरिच्छेद्ये ॥ नान्यश्चित्तकालव्यतिरेकेण परिच्छेदकः कालोयस्य तस्मिन् ॥

चित्तजन्मा । पुं । कामदेवे ॥

चित्तदोषः । पुं । शून्यतायाम् ॥

चित्तनदी । स्त्री । उभयतोवाहिन्याम् ॥ इयं ह्युभयतोवहति कल्याणाय वहति पापायच । तत्र या कैवल्यप्राग्भारा.विवेकनिम्ना साकल्याणवहा । यास्त्वविवेकनिम्ना संसारप्राग्भारा सापापवहा ॥

चित्तप्रसन्नता । स्त्री । हर्षे ॥

चित्तबन्धनम् । न । चित्तबन्धकारणे । मूलाज्ञाने ॥ चित्तस्यबन्धनम् ॥

चित्तमज्जनम् । न । रूपक्रियानुसन्धानराहित्ये ॥

चित्तमोदकः । पुं । लड्डुकविशेषे ॥

चित्तलः । पुं । मृगविशेषे ॥ असितनिलोद्भवतैलविपक्वं सलवणतं नवाहिरसाढ्यम् । त्रिकटुकयुक्तनिशार्द्रकमिश्रं बहुगुणचित्तलमांसमनर्घ्यम् ॥ रसे पाकेच मधुरं रक्तपित्तविनाशनम् ॥

चित्तविक्षेपः । पुं । योगप्रतिपक्षेषु व्याधिस्त्यानादिषु ॥ चित्तं विक्षिपन्ति योगादपनयन्तीति चित्तविक्षेपाः योगप्रतिपक्षाः । तेच नव योगस्य चैवोक्ताः । यथा । व्याधिस्त्यान संशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेन्तराया इति ३० । तत्र संशयभ्रान्तिदर्शने तावद्वृत्तिरूपतया वृत्तिनिरोधरूपस्य समाधेः साक्षात्प्रतिपक्षौ । व्याध्यादयस्तु तत्सहचरिततया तत्प्रतिपक्षा भवन्ति ॥

चित्तवित् । पुं । विज्ञानात्मवादिनि बौद्धविशेषे ॥ चित्तमेव बाह्याकारशून्यं विज्ञानं तदेवात्मेतिविज्ञानवादिनो भ्रान्तिरेव । सुषुप्ते व्यभिचारात् वेद्यस्यच घटादेर् अतिरिक्तवेद्यत्वात् ॥

चित्तविप्लवः । पुं । उन्मादे ॥

चित्तविभ्रमः । पुं । उन्मादे ॥ चित्तस्य विभ्रमो ऽनवस्थानम् ॥

चित्तसमुन्नतिः । स्त्री । माने ॥ चित्तस्य सम्यगुन्नतिः ॥

चित्तहारी । त्रि । मनोरमे ॥

चित्ताभोगः । पुं । एकस्मिन्विषये मनसो भूयोभूयः प्रवृत्तौ । एकस्मिन्विषये चित्तस्थैर्य्ये । मनस्कारे ॥ आभोजनम् आभोगः । भुजेर्भावे घञ् । चित्तस्य आभोगस्तदेकप्रवणता आभोगपरत्वमितियावत् ॥

चित्तिः । स्त्री । प्रज्ञायाम् ॥

चित्तैकाग्र्यम् । न । अन्यार्थनिवृत्तौ ॥

चित्तोक्तिः । स्त्री । दैवप्रश्ने ॥

चित्तोत्थम् । न । सप्तमगृहे ॥

चित्तोन्नतिः । स्त्री । गर्वे ॥

चित्प्रतिबिम्बः । पुं । जीवे ॥ चितः प्रतिबिम्बः ॥

चित्यः । पुं । अग्नौ ॥ चीयतेऽसाविच्यर्थे चित्याग्निचित्ये चेति चिनोतेः कर्म्मणि यप्रत्ययस्तुगागमश्च निपात्यते ॥ न । चितायाम् । मृतकचैत्ये ॥ अनौकसि ॥

चित्या । स्त्री । मृतचितौ । चितायाम् ॥ टाप् ॥

चित्रः । पुं । यमविशेषे ॥ यथा । वृकोदराय चित्रायेति ॥ कर्बुरवर्णे ॥ अशोकवृक्षे ॥ चित्रकवृक्षे ॥ एरण्डवृक्षे ॥ न । तिलके ॥ आलेख्ये । मूरत इति भाषा ॥ अद्भुते ॥ कर्बुरे । नानावर्णे ॥ आकाशे ॥ न । अलङ्कारविशेषे ॥ यथा । तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता । सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रंकाव्यम् ॥ कष्टंकाव्यमेतत् ॥ * ॥ अष्टिसंज्ञकषोडशाक्षरायांवृत्तौ ॥ यथा । चित्रसंज्ञमीरितं समानिकापदद्वयन्तु । यथा । विद्रुमारुणाधरोष्ठशोभिवेणुवाद्यहृष्टवल्लवीजनाङ्गसङ्गजातमुग्धकण्ठकाङ्ग । त्वां सदैव वासुदेव पुण्यलभ्यपादसेव वन्यपुष्पचित्रकेश त्वां स्मरामि गोपवेशमिति ॥ चित्तं चायते दुःखविस्मारकत्वात् । चैञ् पालने । आतोऽनुपसर्गे कः ॥ चित्रयति वा चित्र चित्रीकरणे । अदन्तात् पचाद्यच् ॥ चिनोति चीयते वा । अमिचमीति क्तः ॥ त्रि । कर्बुराद्भुतयुक्ते ॥

चित्रकः । पुं । पाठिनि । वह्निसंज्ञके ओषधौ । चीता इति भाषा ॥ चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः । रूक्षोष्णो ग्रहणी कुष्ठशोथार्शः कृमिकासनुत् ॥ वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत् ॥ विचित्रं चैत्रकं शाकं कासमर्द्दविमर्द्दितम् । तप्ततैले सवाह्लीके पाचितं

तकसम्भूतम् ॥ चीता इतिभाषा प्रसिद्धे व्याघ्रविशेषे । शूरे । मृगान्तके ॥ एरण्डवृक्षे ॥ न । तिलके ॥ चित्रयति । चित्र० । कुन्शिल्पिसंज्ञयोः ॥ यद्वा । चित्तंवृद्धिंचायते । चै क्ष० । कात्तात् स्वार्थेकन् ॥ चित्रं करोतिवा । अन्येभ्यो ऽपीतिडः ॥

चित्रकण्ठः । पुं । कपोते ॥ ॥

चित्रकम्बलः । पुं । गलीचा इति दुली चा इतिचभाषा प्रसिद्धे कम्बल विशेषे ॥

चित्रकरः । पुं । शूद्रागर्भे विश्वकर्मणा सजाते चितेरा इतिख्याते वर्णसङ्करजातिविशेषे । चित्रकारे । रङ्गाजीवे ॥ इतिब्रह्मवैवर्त्त पुराणम् ॥ चित्रंकरोति । डुकृञ्० । दिवाविभा-निशेति टः ॥

चित्रकर्मा । पुं । तिनिशद्रुमे ॥ त्रि । विविधाद्भुतकर्मणि ॥

चित्रकायः । पुं । व्याघ्रे । वाघ इतिभाषाप्रसिद्धे ॥ चीता इति भाषाप्रसिद्धे चित्रव्याघ्रे ॥ चित्रः कायोऽस्य ॥

चित्रकारः । पुं । चित्रकरे ॥ स्थपतेरपि गान्धिक्यां चित्रकारोव्यजायतेति प०प० ॥ चित्रं करोति । डुकृञ्० कर्मण्यण् ॥

चित्रकूटः । पुं । स्वनाम्ना प्रसिद्धे पर्वतविशेषे ॥

चित्रकृत् । पुं । तिनिशद्रुमे ॥ चित्रकारे ॥ चित्रंकरोति । क्विप् ॥

चित्रकोलः । पुं । वाह्मनीतिख्यातेजन्तौ । ज्येष्ठ्याम् । अञ्जने । कृकलासे ॥

चित्रगन्धम् । न । हरिताले ॥

चित्रगुप्तः । पुं । चतुर्दशयमान्तर्गतयमे ॥ यथा । इकोदरायचित्रायचित्रगुप्तायवैनमःइति ॥ ब्रह्मपाद्मे यमस्यलेखके ॥ अस्योत्पत्त्यादिरावार निर्णयतन्त्रादवधार्या ॥

चित्रजल्पः । पुं । वाक्यविशेषे ॥ यथा । प्रेष्ठस्यसुहृदालोके गूढरोषाभिजृम्भितः । भूरिभावमयो जल्पोयस्तीव्रोत्कण्ठितान्तिमः ॥ चित्रजल्पोदशाङ्गोयं प्रजल्पंपरिजल्पितम् । विजल्पोज्जल्पसंजल्पाअवजल्पो ऽभिजल्पितम् ॥ आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तित मित्युज्ज्वलनीलमणिः ॥

चित्रतण्डुला । स्त्री । विडङ्गे ॥ चित्रास्तण्डुलाअस्याः ॥

चित्रत्वक् । पुं । भूर्जवृक्षे ॥

चित्रदण्डकः । पुं । ओलवृक्षे ॥

चित्रदर्शनम् । न । स्मारके ॥ स्मारकं चित्रदर्शनम् ॥

चित्रदेवी । स्त्री । महेन्द्रवारुण्याम् ॥

चित्रमेषा । स्त्री । सारिकाविहगे ॥
चित्रपक्षः । पुं । तित्तिरिपक्षिणि ॥ भि त्तिरोपाद्रतिख्याते पाण्डुसंज्ञकेखगे ॥ चित्रपक्षःकफहरो वातघ्नो ग्राहशीघ्रगुत् ॥
चित्रपटः । पुं । छींट इति प्रसिद्धे वस्त्रे ॥
चित्रपत्रिका । स्त्री । द्रोणपुष्प्याम् ॥ कपित्थपर्ण्याम् ॥
चित्रपर्णी । स्त्री । जलपिप्पल्याम् ॥
चित्रपदा । स्त्री । गोधापदीलतायाम् ॥ अनुष्टुप्संज्ञकाष्टाक्षरावृत्तिविशेषे ॥ यथा । चित्रपदा यदि भौगौ । यथा । यामुनसैकतदेशे गोपवधूजनकेलौ । कंसरिपो र्गतिलीला चित्रपदाजगदव्यात् ॥ सवैया लगन्तायामपि हन्तो । यथा । समयदा भगणाः परतो गुरुरन्ततो लघुको मितदेश चित्रपदेति तदा युधि विविक्रमतो धृतवैरिधराधिपकेश । सा कथिता धिकमङ्गलपिङ्गलनामवरेण्वहयाभिनिवेश गौडकुलोज्ज्वलधारयधारय चेतसि हैयग्रवन्नमरेशेति ॥
चित्रपर्णिका । स्त्री । चित्रपर्णीप्रभेदे । त्रिपर्ण्याम् । दीर्घपत्रायाम् ॥
चित्रपर्णी । स्त्री । पृश्निपर्ण्याम् ॥ चिपटपर्णमत्स्यः । पाकवर्णेमिन्डीष ॥ अ स्फोटालतायाम् ॥ जलपिप्पल्याम् ॥ द्रोणपुष्प्याम् ॥ मञ्जिष्ठायाम्॥
चित्रपादा । स्त्री । सारिकापक्षिणि ॥
चित्रपिच्छकः । पुं । मयूरे ॥
चित्रपुङ्खः । पुं । शरे ॥
चित्रपुष्पी । स्त्री । अम्बष्ठायाम् ॥
चित्रपृष्ठः । पुं । कलविङ्के । चटके ॥
चित्रफलः । पुं । चितल इति गौडप्रसिद्धे मत्स्ये ॥
चित्रफला । स्त्री । चिर्भिटायाम् ॥ मृगेर्वारौ ॥ लिङ्गिन्याम् ॥ वार्त्ताक्याम् ॥ कण्टकार्याम् ॥ फलइमाच इतिगौड प्रसिद्धे मत्स्ये । राजग्रीवे । फलंक्याम् ॥ बृहदिन्द्रवारुण्याम्॥
चित्रभानुः । पुं । अग्नौ । वैश्वानरे ॥ सूर्ये ॥ चित्रकवृक्षे ॥ भैरवे ॥ चित्रा भामयोऽस्य । चुम्बादित्वात् पूर्वपदादितिणत्वम् ॥ षोडशेवत्सरे॥ अस्यफलम् । यथाकाममुमाषाष्वन्न न्यत्ववितरत्संप्रिये । महार्घं जायतेसर्वं चित्रभानौ वरानने ॥
चित्रभेषजा । स्त्री । काकोदुम्बरिकायाम् ॥
चित्रमृगः । पुं । पृषताख्यमृगे ॥
चित्रमेखलः । पुं । मयूरे ॥
चित्रयोधी । पुं । अर्जुनवृक्षे ॥
चित्ररथः । पुं । सूर्ये ॥ गन्धर्वविशेषे ॥

विद्याधरे ॥

चित्रलः । पुं । कर्बुरवर्णे । किर्मीरे ॥ त्रि । तद्युक्ते ॥

चित्रलता । स्त्री । मञ्जिष्ठायाम् ॥

चित्रला । स्त्री । गोरक्षीवृक्षे ॥

चित्रलेखा । स्त्री । अप्सरोविशेषे । वाणासुरसुताया ऊषायाःसख्याम् । कुम्भाण्डतनयायाम् ॥ धृतिसंज्ञका ष्टदशा क्षराष्टस्तिविशेषे ॥ यथा । मन्दाक्रान्ता नपरलघुयुता कीर्त्तिता चित्रलेखा ॥ यथा । शङ्केऽमुष्मिन् जगति मृगदृशां साररूपं यदासीदाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि । नैतादृक् चेत् कथमुदधिसुता मन्दिरेणाच्युतस्य प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाद्भुतायामिति ॥

चित्रलोचना । स्त्री । सारिकायाम् ॥

चित्रवदालः । पुं । पाठीनमत्स्ये ॥

चित्रवल्लिक. । पुं । वदालमत्स्ये ॥

चित्रवल्ली । स्त्री । मृगेर्वारौ ॥ महेन्द्रवारुण्याम् ॥

चित्रवीर्य्यः । पुं । रक्तैरण्डे ॥

चित्रशिखण्डिजः । पुं । वृहस्पतौ ॥ चित्रशिखण्डी अङ्गिराः ततोजातः । जनौ । पञ्चम्यामितिडः ॥

चित्रशिखण्डी । पुं । सप्तर्षिषु ॥ यथा । मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥ चित्रशिखण्डश्चूडाविशेषोऽस्त्येषामितिव्युत्पत्त्याप्रत्येकं सप्तापि मरीच्यादयश्चित्रशिखण्डिनः ॥

चित्रशिखण्डिप्रसूतः । पुं । वृहस्पतौ ॥

चित्रसर्पः । पुं । मालुधाने ॥

चित्रसेनः । पुं । ब्रह्मपादजमसीशाख कायस्थस्य चित्रगुप्तादिचितयान्तर्गत मूर्त्तिविशेषे ॥ अयञ्चमर्त्त्यलोकस्य विवेचकः । यथा । चित्रसेने महाधियां वगलेतिगुरोर्मयम् । अम्बा सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः ॥ राज्यंचकार ह्युत्तस्मिन्नाङ्गदप्रयोगयः ॥ इत्याचारनिर्णय तन्त्रम् ॥

चित्रा । स्त्री । आखुपर्ण्याम् ॥ गोडुम्बायाम् ॥ सुभद्रायाम् ॥ दन्तिकायाम् ॥ मायायाम् ॥ सर्पविशेषे ॥ नदीविशेषे ॥ अप्सरोविशेषे ॥ मृगेर्वारौ ॥ गण्डदूर्वायाम् ॥ मुतश्रेण्याम् ॥ मञ्जिष्ठायाम् ॥ वैदिककर्मविशेषे ॥ चतुर्दशे नक्षत्रे ॥ अत्र जातस्यफलम् । यथा । प्रतापसन्तापितशत्रुपक्षो दक्षो नये चापि विचित्रवासाः । प्रसूतिकाले यदि यस्य चित्रा वहिर्विचित्रा खलुतस्य भाले ॥

भतिशर्करीसंज्ञकपञ्चदशाक्षरवृ-
त्तिप्रभेदे ॥ यथा । चित्रानामकू
न्दश्चित्रं चेत् चयोमायकारौ । यथा ।
गोपाली लीलालोला यद्वत् कलि
न्दात्मजान्ते खेलन्मुक्ताहाराग्रयस्त
गुल्लसन् मूर्द्धि चित्रा । कंसारातेर्मूर्त्ति
स्तद्वन्मोहदिक्रीडतीयं कोऽन्यःस्वर्गो
मोक्षो वास्मात्रियते तन्नजानेइति
॥ चित्रं रूपमस्त्यस्याः ॥ चित्रायां
जातायाम् ॥ चित्रारेवतीरोहिणी-
भ्यः स्त्रियां नक्षत्राणो लुक् ॥ नाडी
विशेषे ॥ सुषुम्णामूलदेशे शिवा
नाड्यस्ति । तन्मध्ये तु चित्राख्या-
नाडी सूक्ष्मातुवर्त्तत इतितन्त्रवच
नात् ॥

चित्राक्षी । स्त्री । सारिकायाम् ॥

चित्राक्षुपः । पुं । द्रोणपुष्प्याम् ॥

चित्राङ्गः । पुं । चित्रके ॥ रक्तचित्रके ॥
सर्पे ॥ न । हिङ्गुले ॥ हरिताले ॥

चित्राङ्गदः । पुं । शान्तनुराजपुत्रे । च
न्द्रवंशीयनृपविशेषे । विचित्रवीर्य्य
भ्रातरि ॥ गन्धर्वविशेषे ॥ ब्रह्मपाद
जमसीशाख्यकायस्थस्य चित्रगुप्तादि
चितयान्तर्गतमूर्त्तिविशेषे ॥ अयञ्चा
धोलोकस्यविवेचकः । अस्याधोगम
नकारण मात्रारनिर्णयतन्त्रे द्रष्टव्य
म् ॥ चित्राण्यङ्गदानियस्य ॥

चित्राङ्गदसूः । स्त्री । व्यासदेवस्यजन
न्याम् । सत्यवत्याम् ॥

चित्राङ्गी । स्त्री । मञ्जिष्ठायाम् ॥ कर्ण
जलौकायाम् ॥

चित्राटीरः । पुं । चन्द्रे । विधौ ॥ घ-
ण्टाकर्णवलिच्छागास्रविन्दुभिरङ्कित
भाले ॥ येनभालमङ्कितंतत्र ॥ घ-
ण्टाकर्णोपहारायहतच्छागास्रबिन्दु
षु । इतिमेदिनी ॥

चित्रापूपः । पुं । चिताइपिटा इतिगौ
ड भाषा प्रसिद्धे पिष्टके । चरुव्रणे ॥

चित्रायसम् । न । तीक्ष्णलोहे ॥

चित्रिणी । स्त्री । पद्मिन्यादिचतुर्विध
स्त्रीपुंमध्ये स्त्रीविशेषे ॥ सेयंमीन
गन्धा । अस्यालक्षणम् । भवति रति
रसज्ञा नातिदीर्घा नखर्वा तिलकु
सुमसुनासा स्निग्धदेहोत्पलाक्षी ।
कठिनघनकुचाढ्या सुन्दरी सा सुशी
ला सकल गुणविचित्रा चित्रिणी
चित्रवक्त्रेति ॥

चित्रेशः । पुं । चन्द्रमसि ॥

चित्रोक्तिः । स्त्री । आकाशवाण्याम् ॥
आश्चर्यकथने ॥

चित्रौदनम् । न । विचित्रान्ने ॥

चिदम्बरम् । न । स्थानविशेषस्थाने ॥

चिदाकाशः । पुं । न । शुद्धात्मनि ॥
मायामेघो जगन्नीरं वर्षत्त्वेष य

था तथा । चिदाकाशस्य नोदाभि
नैवास्ताभ इतिस्थितिः ॥ चित्ताका
शं चिदाकाश माकाशञ्च तृतीयक
म् । द्वाभ्यां शून्यतरं विद्धि चिदाका
शं महामुने ॥

चिदात्मकः । त्रि । निर्विशेषस्फुरणमा
त्रस्वरूपे चिदद्वैते ॥ बाध्यते जाग्र
तिस्वप्नः सुप्ते जाग्रच्च बाध्यते । चिद
द्वैतन्तु न क्वापि बाध्यते वास्तवत्व
तः ॥ चितो न बाधकं द्वैतं चित्प्र
सादेन भासनात् । अबाध्यत्वाद्वास्त
वत्वं चिदद्वैतस्य सुदर्शितम् ॥

चिदाभासः । पुं । बुद्धावात्मप्रतिबि
म्बे । जीवे ॥ योऽपि चराचरात्मकेषु
शरीरजातेषु नित्यसन्निहितः । चि
द्दाभासतेसः ॥

चिद्रसपूर्णः । त्रि । स्फुरत्सुखपूरिते ॥

चिद्रूपः । त्रि । ज्ञानमये ॥ हृदयालो ॥

चिन्तनम् । न । कर्त्तव्याकर्त्तव्यचिन्ता
याम् ॥ विचारे ॥ चितिस्मृत्याम् ।
ल्युट् । अन् ॥ स्मरणे ॥

चिन्तयन् । त्रि । ध्यायति ॥

चिन्ता । स्त्री । आध्याने । चिन्तने ।
स्मृत्याम् ॥ आत्मीययोगक्षेमापा
यालोचनात्मिकायां बुद्धौ ॥ दर्शन
सम्भोगयोः प्रकारभावनायाम् ॥ चि
ता चिन्ता द्वयोर्मध्ये चिन्तानामगरी

यसी । चिता दहति निर्जीवं सजीवो
दह्यतेऽनया ॥ चिन्तनम् । चिति०
। चितिपूजीस्यङ् ॥ चिन्त्यतेऽनया
वा ॥ कुतश्चागच्छ घटते विषण्णः प्र
याति च । इति चिन्ता न कर्त्तव्या धन
स्य च धनस्य च ॥

चिन्तामणिः । पुं । वाञ्छितप्रदे मणिवि
शेषे ॥ तस्मिन् यद्यच्चिन्त्यते तत्त
च्चिन्तोपाधिक मेवावभासते न स्वरू
पतस्तथा ॥ स्पर्शमणौ ॥ यथा चि·
न्तामणिं स्पृष्ट्वा लोहं काञ्चनतां भ
जेत् ॥ ब्रह्मणि ॥ आयुरारोग्यमर्थं
श्च भोगांश्चैवानुषङ्गिकान् । ददाति
ध्यायतां नित्यं सर्वकामप्रदो हरिः ॥
मन्त्रविशेषे ॥ याचायोगान्तरे ॥ स
हजस्थानगो भौमो भाग्यस्थश्च बृह-
स्पतिः । चिन्तामणि समाख्योऽयं या
तुः सङ्कल्पपूरकः ॥ बुद्धविशेषे ॥

चिन्तावेश्म । न । मन्त्रणागृहे । दा-
र्षेटे ॥

चिन्तितः । त्रि । कृतचिन्तने । मनसा
विचारिते ॥ यथा । यच्चिन्तितं त
दिहदूरतरं प्रयाति यच्चेतसा नगणि
तं तदिहाभ्युपैति । प्रातर्भवामि व
सुधाधिपचक्रवर्त्ती सोऽहं व्रजामि-
विपिने जटिलस्तपस्वीति ॥

चिन्तिया । स्त्री । चिन्तायाम् ॥

चिन्तोक्तिः । स्त्री । चिन्तावचने ॥

चिन्त्यः । त्रि । निरूपणीये । चिन्तितुं शक्य । विचारणीये ॥

चिन्त्यमानः । त्रि । विचार्यमाणे ॥

चिञ्चः । पुं । चीणाइतिख्याते ऽन्नविशेषे ॥ इतिशब्दचन्द्रिका ॥

चिन्मयः । त्रि । चैतन्यरूपे ॥ चिन्मयस्याद्वितीयस्यनिष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणोरूपकल्पना । रूपस्थानां देवतानां स्त्रीपुंसादिककल्पना ॥

चिपिटः । पुं । चिउरा इति प्रसिद्धखाद्यभेदे । पृथुके । धान्यचमसे ॥ शालयः सतुषा आर्द्रा भृष्टा अस्फुटिताश्च ते । कुट्टिता श्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि ॥ शालयोयावनालाद्याश्चिपिटाः पृष्टवर्द्धनाः इतिच ॥ अस्यभक्षणविधिनिषेधौ यथा । द्विःस्विन्नमन्नं पृथुकं शुद्धं देशविशेषके । नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने ॥ अभक्ष्यं तद्यतीनाञ्च विधवाब्रह्मचारिणामिति ब्रह्मवैवर्तपुराणम् ॥ आर्द्रस्याम्यौषे ॥ चिपिटितविस्तृते ॥ चिपटे ॥ नासिकायानते ॥ इनच्पिटच् चिकचिचेति पिटच् प्रत्ययः प्रकृतेश्चिरादेशः ॥

चिपिटकः । पुं । चिपिटे । पृथुके ॥ चिपिटमिव । संज्ञायाम् इवेतिवाकन् ॥

चिपिटा । स्त्री । गुण्डासिनीतृणे ॥

चिप्पः । पुं । क्षुद्ररोगविशेषे ॥ यथा । नखमांस मधिष्ठाय वातःपित्तञ्च देहिनाम् । कुर्वाते दाहपाकौचतं व्याधिं चिप्प मादिशेदिति ॥

चिमिः । पुं । शुकखगे ॥ पट्टवृक्षे ॥

चिमिकः । पुं । शुकपक्षिणि ॥

चिमिचिमः । पुं । स्पर्शसोढव्यथाविशेषे ॥ कण्डूविशेषे । स्पर्शप्रियतायाम् ॥

चिरम् । न । अव्यादि (।ऽ)चिकले ॥ दीर्घकाले ॥ त्रि । तद्वति ॥

चिरकारी । त्रि । चिरक्रिये ॥

चिरकालः । पुं । दीर्घकाले । दीर्घरात्रे ॥

चिरक्रियः । त्रि । दीर्घसूत्रे । अतिविलम्बेन क्रियासम्पादके ॥ चिराक्रिया यस्य ॥

चिरजीवकः । पुं । जीवकद्रुमे ॥

चिरजीवी । पुं । काके ॥ विष्णौ ॥ जीवकवृक्षे ॥ शाल्मलितरौ ॥ अश्वत्थामादिषु ॥ अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः ॥ त्रि । बहुकालजीविनि ॥

चिरञ्जीवी । पुं । विष्णौ ॥ काके ॥ जी

यथा दृ० ॥ मार्कण्डेय० ॥ त्रि । चिरजीविनि ॥

चिरसूः । पुं । यौवने ॥

चिरण्टी । स्त्री । प्राप्तयौवनायांपितृगेहस्थायाम् । सुवासिन्याम् ॥ चिरेण अटति पितृगेहाद्भर्तृगेहम् । अट गतौ । अच् । पृषोदरादिः । वयसि चरमइतिङीप् ॥ तरुण्याम् । द्वितीयवयःस्थायाम् ॥

चिरतिक्तः । पुं । चिरायता इतिप्रसिद्धे भूनिम्बे । किरातत्तिक्ते ॥

चिरत्नः । त्रि । पुरातने । चिरन्तने ॥ चिरेभवः । चिरपरुत्परारिभ्यस्त्नो वक्तव्यः ॥

चिरन्तनः । त्रि । पुरातने ॥ चिरेभवः । सायंचिरमितिट्युट्युलौ । निपातनान्मान्तत्वम् ॥

चिरपाकी । पुं । कपित्थे ॥

चिरपुष्पः । पुं । वकुलाऽमे ॥

चिरप्रसूता । स्त्री । वष्कयिण्याम् ॥ चिरंप्रसूता । सुप्सुपेतिसमासः ॥

चिरम् । अ । बहुकालार्थे । चिराय ॥

चिरमेही । पुं । गर्दभे ॥

चिरम्लायः । पुं । चिल्ले ॥

चिररात्रम् । न । दीर्घकाले ॥

चिररात्राय । अ । दीर्घकाले ॥ चिरारात्रयः । अनुप्रत्ययान्तयेन्त्वचापीति

योगविभागादत्वं । चिररात्रान् अयते । अय० । कर्मण्यण् ॥

चिरलोकपितरः । पुं भूम्नि । अग्निष्वात्तादिषु ॥ अग्निष्वात्तादयोलोकेपितरश्चिरवासिनः ॥

चिरविल्वः । पुं । करञ्जवृक्षे ॥ चिरं विलति । विलभेदने । बाहुलकाद्वः ॥

चिरसूता । स्त्री । वष्कयिण्याम् ॥

चिरसूतिका । स्त्री । वष्कयिण्याम् ॥

चिरस्य । अ । दीर्घकाले ॥ चिरमस्यति । असु० । ण्यत् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । म० ॥

चिरा । स्त्री । बहुकालसाध्यायाम् ॥

चिराटिका । स्त्री । श्वेतपुनर्नवायाम् ॥ पाताडी इतिगौडभाषाप्रसिद्धघटिकायाम् ॥

चिरात् । अ । दीर्घकाले ॥

चिरात् । पुं । गरुडे ॥

चिरातिक्तः । पुं । चिरतिक्ते ॥

चिराय । अ । दीर्घकाले ॥ चिरमयते । अय० । कर्मण्यण् ॥

चिरायुः । पुं । विबुधे । देवतायाम् ॥ त्रि । चिरजीविनि ॥ चिरमायुर्यस्य ॥ भवति यदि मनुष्यो गुर्वधीनश्चिरायुरित्यागमः ॥

चिराश्रयः । पुं । चव्यादि(ऽ)क्रिकाले ॥

चिरिः । पुं । तोता इतिप्रसिद्धे शुकपक्षिणि ॥

चिरेण । अ । चिरमित्यर्थे ॥

चिर्भटी । स्त्री । कर्कट्याम् ॥

चिर्भिटः । पुं । न । कर्कटीसस्ये । येलसेंध इतिसेंधकचरी इतिच भाषा प्रसिद्धायां सुचिषायाम् ॥ चिर्भिटं मधुरं रूक्षं गुरुपित्तकफापहम् । अनुष्णं ग्राहि विष्टम्भि पक्वं तूष्णञ्च पित्तलम् ॥

चिर्भिटा । स्त्री । चिभड इति भाषा प्रसिद्धे चिर्भिटे ॥

चिलमिलिका । स्त्री । कण्ठीभेदे ॥ खद्योते ॥ विद्युति ॥

चिलमीलिका । स्त्री । चिलमिलिकायाम् ॥

चिलिचिमः । पुं । बाचियामछक इति गौडभाषाप्रसिद्धे मत्स्ये । नलमीने ॥ चिल विलसने । इगुपधात् किदिति इः । वीप्सायां द्वित्वम् । चिलिचिलिं विलासं मिमीते । माङ् माने । आतइतिकः । पृषोदरादिः ॥ चिलिं विलासं चिनोतिवा । चिञ् । बाहुलकान् मक् ॥ चेङ्गो इति गौडप्रसिद्धे मत्स्ये ॥

चिलिचिलिः । पुं । विलासे ॥

चिलिचीमः । पुं । }
चिलिचीमिः । पुं । } बाचियामाछक इति गौडप्रसिद्धे चिलिचिमे ॥

चिलिमिलिका । स्त्री । चिलमिलिकार्थे ॥

चिलिमीनकः । पुं । चिलिचिमेमत्स्ये ॥

चिलिमीलिका । स्त्री । चिलमिलिकार्थे ॥

चिलीचिमः । पुं । }
चिलीचिमिः । पुं । } नलमीने । चिलिचिमे ॥
चिलीमः । पुं । }

चिल्लः । पुं । आतायिनि । शम्भान्तौ [?] । चील इति भाषा ॥ चिल्लति । चिल्ल शैथिल्ये भावकरणेच । अच् ॥ क्लिन्ननेत्रे ॥ अर्श [?] । क्लिन्ननेत्रवति ॥ क्लिन्नेचक्षुषी अस्य । क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषीति चिलादेशो लश्च प्रत्ययः । चक्षुर्गतः क्लेदरोगः चिल्लशब्दवाच्यः । तद्योगाच्चक्षुस्तद्योगात् पुरुषोपीतिव्याख्यातारः ॥

चिल्लकः । पुं । लोध्रे ॥

चिल्लभक्ष्या । स्त्री । चटुविलासिन्याम् ॥

चिल्लाभः । पुं । प्रसह्यचौरे । गांठकाटा लुटेरा पिंडारा जूवाचोर इत्यादि भाषा ॥

चिल्लिः । पुं । भ्रूमध्ये ॥

चिल्ली । स्त्री । क्षुद्रवास्तुकशाके । गौडवास्तुके । बथुआ इति प्रसिद्धे शाके ॥ लोध्रे ॥ झिल्ल्याम् ॥ चिल्लति । चिल्ल शैथिल्ये । अच् । गौ० ङीष् ॥

चिविल्लिका । स्त्री । क्षुद्रक्षुपविशेषे । रक्तदलायाम् ॥

चिबुः । पुं । चिबुके । ओष्ठाधोभागे। ठोडि इति भाषा ॥ चीवति । चीव्यते वा । चीव आदानसंवरणयोः । मृगय्वादित्वात् कुः ॥ चिनोतिशोभां वा । प्राग्वत् ॥

चिबुकम् । न । चिबौ ॥ स्वार्थे कन् ॥ पुं । मुचुकुन्दवृक्षे ॥

चिह्नम् । न । लाञ्छने । लक्षणे ॥ पताकायाम् ॥ चह्यतेऽनेन । चहपरिकल्कने । बा० नक् उपधाया इत्वञ्च ॥ लघ्वादि (।ऽ) त्रिकले ॥

चिह्नकारी । त्रि । घोरदर्शने ॥ विभातिनि ॥

चिह्नधारिणी स्त्री । श्यामालतायाम् ॥

चिह्नितः । त्रि । अङ्किते । चिह्नविशिष्टे ॥

चिल्लः । पुं । } गंधारी इति पर्वत-
चिल्लकः । पुं । } प्रसिद्धे वृक्षे ॥ चिल्लकोवातनिर्हारी श्लेष्मशोधातुवृद्धिकृत् । आग्नेयो विषवत्तस्यफलं मत्स्यनिषूदनम् ॥

चीडा । स्त्री । चीडागन्ध इति गौडप्रसिद्धगन्धद्रव्ये । दारुगन्धायाम् ॥

चीत्कारः । पुं । भयध्वनौ ॥

चीनः । पुं । देशविशेषे ॥ यथा । का

शीरन्तुसमारभ्य कामरूपात्तु पश्चिमे । भोटान्तदेशोदेवेशि मानसेशाद्दक्षिणे ॥ मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्त्तित इतितन्त्रशास्त्रम् ॥ तद्देशजे मनुष्ये । चीनदेशोद्भवे पूर्वं क्षत्रिये पश्चाद्विहितक्रियालोपादिनाशूद्रत्वमापन्ने दस्युपदवाच्ये ॥ आगमोक्ते सम्प्रदायविशेषे ॥ अंशुकविशेषे । मखमल इत्याधुनिकभाषाप्रसिद्धे बहुविधाद्भुतवस्त्रे ॥ चीणा इतिप्रसिद्धे व्रीहि विशेषे ॥ चीनकःकङ्गु भेदोस्ति सचैयः कङ्गुवद्गुणैः ॥ तन्तौ ॥ मृगविशेषे ॥ न । पताकायाम् ॥ सीसके ॥ चिनोति । चिञ्० । बाहुलकान्नक् दीर्घश्च ॥

चीनकः । पुं । चीणा इति प्रसिद्धधान्ये । काककङ्गौ ॥ कङ्गुन्याम् ॥ चीनकर्पूरे ॥

चीनकर्पूरः । पुं । चीनाकपूर इति भाषाप्रसिद्धे कर्पूरविशेषे । कृत्रिमे । मेघसारे । धवले ॥

चीनजम् । न । तीक्ष्णलौहे ॥

चीनपिष्टम् । न । सिन्दूरे ॥ चीनस्यपिष्टम् ॥ सीसके ॥

चीनवङ्गम् । न । सीसके ॥

चीनाकः । पुं । चीनियाकपूर इति प्रसिद्धे कर्पूरविशेषे ॥ चीनाकसंज्ञः

चिन्तोक्तिः । स्त्री । चिन्तावचने ॥

चिन्त्यः । त्रि । निरूपणीये । चिन्तितुशक्य । विचारणीये ॥

चिन्त्यमानः । त्रि । विचार्यमाणे ॥

चिञ्चः । पुं । चीणाइतिख्याते ऽन्नविशेषे ॥ इतिशब्दचन्द्रिका ॥

चिन्मयः । त्रि । चैतन्यरूपे ॥ चिन्मयस्याद्वितीयस्यनिष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणोरूपकल्पना । रूपस्थानां देवतानां स्त्रीपुंसादिककल्पना ॥

चिपिटः । पुं । चिउरा इति प्रसिद्धे-खाद्यभेदे । पृथुके । धान्यचमसे ॥ शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः । कुट्टिता श्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि ॥ शालयो यावनालाद्याश्चिपिटाः पुष्टिवर्द्धनाः इतिच ॥ अस्यभक्षणविधिनिषेधौ यथा । द्विःस्विन्नमन्नं पृथुकं शुद्धं देशविशेषके । नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने ॥ अभक्ष्यं तव्रतीनाञ्च विधवाब्रह्मचारिणामिति ब्रह्मवैवर्त्तपुराणम् ॥ आर्द्रसस्याम्बोषे ॥ त्रि । पिट्टितविस्तृते ॥ पिच्चटे ॥ नासिकायानते ॥ इनच्पिटच्चिकचिचेति पिटच् प्रत्ययः प्रकृतेश्चिरादेशः ॥

चिपिटकः । पुं । चिपिटे । पृथुके ॥ चिपिटमिव । संज्ञायाम् इवेतिवा कन् ॥

चिपिटा । स्त्री । गुण्डासिनीतृणे ॥

चिप्पः । पुं । क्षुद्ररोगविशेषे ॥ यथा । नखमांस मधिष्ठाय वातःपित्तञ्च देहिनाम् । कुर्वाते दाहपाकौ चतं व्याधिं चिप्प मादिशेदिति ॥

चिमिः । पुं । शुकखगे ॥ पट्टवृक्षे ॥

चिमिकः । पुं । शुकपक्षिणि ॥

चिमिचिमः । पुं । स्पर्शसोढ्यताविशेषे ॥ कण्डूविशेषे । स्पर्शप्रियतायाम् ॥

चिरम् । न० चिब्वादि (।ऽ)चिकले ॥ दीर्घकाले ॥ त्रि । तद्वति ॥

चिरकारी । त्रि । चिरक्रिये ॥

चिरकालः । पुं । दीर्घकाले । दीर्घसमये ॥

चिरक्रियः । त्रि । दीर्घसूत्रे । अतिविलम्बेन क्रियासम्पादके ॥ चिराक्रिया यस्य ॥

चिरजीवकः । पुं । जीवकद्रुमे ॥

चिरजीवी । पुं । काके ॥ विष्णौ ॥ जीवकवृक्षे ॥ शाल्मलितरौ ॥ अश्वत्थामादिषु ॥ अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः ॥ त्रि । बहुकालजीविनि ॥

चिरञ्जीवी । पुं । विष्णौ ॥ काके ॥ जी

वत्स इ० ॥ प्राक्समित्र० ॥ त्रि । चिरजीविनि ॥

चिरषड़: । पुं । यौवने ॥

चिरण्टी । स्त्री । प्राप्तयौवनायांपितृगेहस्थायाम् । सुवासिन्याम् ॥ चिरेण अटति पितृगेहाद्भर्त्तृगेहम् । अट गतौ । अच् । पृषोदरादिः । वयसि चरमइतिङीप् ॥ तरुण्याम् । द्वितीयवयःस्थायाम् ॥

चिरतिक्तः । पुं । चिरायता इतिप्रसिद्धे भूनिम्बे । किराततिक्ते ॥

चिरत्नः । त्रि । पुरातने । चिरन्तने ॥ चिरेभवः । चिरपरुत्परारिभ्यस्त्नो वक्तव्यः ॥

चिरन्तनः । त्रि । पुरातने ॥ चिरेभवः । सायञ्चिरमितिट्युट्युलौ । निपातनान्मान्तत्वम् ॥

चिरपाकी । पुं । कपित्थे ॥

चिरपुष्पः । पुं । वकुलाऽगमे ॥

चिरप्रसूता । स्त्री । वष्कयिण्याम् ॥ चिरंप्रसूता । सुप्सुपेतिसमासः ॥

चिरम् । अ । बहुकालार्थे । चिराय ॥

चिरमेही । पुं । गर्दभे ॥

चिरञ्जः । पुं । चिल्ले ॥

चिररात्रम् । न । दीर्घकाले ॥

चिररात्राय । अ । दीर्घकाले ॥ चिरा रात्रयः । अचप्रत्यन्ववेत्यचाजिति योगविभागादच् । चिररात्राय अयते । अय० । कर्मण्यण् ॥

चिरलोकपितरः । पुं भूम्नि । अग्निष्वात्तादिषु ॥ अग्निष्वात्तादयो लोके पितरश्चिरवासिनः ॥

चिरविल्वः । पुं । करञ्जवृक्षे ॥ चिरं विलति । विलभेदने । बाहुलकादुः ॥

चिरसूता । स्त्री । वष्कयिण्याम् ॥

चिरसूतिका । स्त्री । वष्कयिण्याम् ॥

चिरस्य । अ । दीर्घकाले ॥ चिरमस्यति । असु० । ल्यप् । संज्ञापूर्वकत्वादृद्धभावः । अ० ॥

चिरा । स्त्री । बहुकालसाध्यायाम् ॥

चिराटिका । स्त्री । श्वेतपुनर्नवायाम् ॥ पाताडी इतिगौडभाषाप्रसिद्धचटिकायाम् ॥

चिरात् । अ । दीर्घकाले ॥

चिरात् । पुं । गरुडे ॥

चिरातिक्तः । पुं । चिरतिक्ते ॥

चिराय । अ । दीर्घकाले ॥ चिरमयते । अय० । कर्मण्यण् ॥

चिरायुः । पुं । विबुधे । देवतायाम् ॥ त्रि । चिरजीविनि ॥ चिरमायुर्यस्य ॥ भवति यदि मनुष्यो गुर्वधीनश्चिरायुरित्यागमः ॥

चिरावयः । पुं । धम्वादि(।ऽ) निकते ॥

चिरिः । पुं । तोता इतिप्रसिद्धे शुकपक्षिणि ॥

चिरेण । अ । चिरमित्यर्थे ॥

चिर्भटी । स्त्री । कर्कट्याम् ॥

चिर्भिटः । पुं । न । कर्कटी स्त्रे । वेषसेंध इतिसेंधकचरी इतिच भाषा प्रसिद्धायां सुचित्रायाम् ॥ चिर्भिटं मधुरं रूक्षं गुरुपित्तकफापहम् । अनुष्णं ग्राहि विष्टम्भि पक्वंतूष्णञ्चपित्तलम् ॥

चिर्भिटा । स्त्री । चिभड इति भाषा प्रसिद्धे चिर्भिटे ॥

चिलमिलिका । स्त्री । कण्ठीभेदे ॥ खद्योते ॥ विद्युति ॥

चिलमीलिका । स्त्री । चिलमिलिकायाम् ॥

चिलिचिमः । पुं । वाखियागश्चक इति गौडभाषाप्रसिद्धे मत्स्ये । नलमीने ॥ चिल्लवसने । इगुपधात् किदिति इः । वीप्सायांद्वित्वम् । चिलिचिलिं विलासं मिमीते । माङ्माने । आतइतिकः । पृषोदरादिः ॥ चिलिं विलासंचिनोतिवा । चिञ् । बाहुलकात् मक् ॥ चेङ्गो इतिगौडप्रसिद्धे मत्स्ये ॥

चिलिचिलिः । पुं । विलासे ॥

चिलिचीमः । पुं । } वाखियागङ्क
चिलिचीमिः । पुं । } इतिगौडप्रसिद्धे चिलिचिमे ॥

चिलिमिलिका । स्त्री । चिलमिलिकार्थे ॥

चिलिमीनकः । पुं । चिलिचिमेमत्स्ये ॥

चिलिमीलिका । स्त्री । चिलमिलिकार्थे ॥

चिलीचिमः । पुं । }
चिलीचिमिः । पुं । } नलमीने । चिलिचिमे ॥
चिलीमः । पुं । }

चिल्लः । पुं । आतायिनि । खभ्रान्तौ । चील इति भाषा ॥ चिल्लति । चिल्ल शैथिल्ये भावकरणेच । अच् ॥ क्लिन्ननेत्रे ॥ क्लिन्ननेत्रवति ॥ क्लिन्नेचक्षुषी अस्य । क्लिन्नस्य चिल्पिल् चक्षुषीति चिलादेशो लश्च प्रत्ययः । चक्षुर्गतःक्लेदरोगः चिल्लशब्दवाच्यः । तद्योगाच्चक्षुस्तद्योगात् पुरुषोपीतिव्याख्यातारः ॥

चिल्लकः । पुं । लोभ्रे ॥

चिल्लभक्ष्या । स्त्री । कट्टविलासिन्याम् ॥

चिल्लाभः । पुं । प्रसह्यचौरे । गांठकटा लुटेरा पिंडारा जूवाचोर इत्यादि भाषा ॥

चिल्लिः । पुं । भ्रूमध्ये ॥

चिल्ली । स्त्री । क्षुद्रवास्तुकशाके । गौडवास्तुके । बथुआ इति प्रसिद्धे शाके ॥ लोध्रे ॥ झिल्ल्याम् ॥ चिल्लति । चिल्ल शैथिल्ये । अच् । गौ० ङीष् ॥

चिचिल्लिका । स्त्री । क्षुद्रक्षुपविशेषे । रक्तादलायाम् ॥

चिवुः । पुं । चिबुके । ओष्ठाधोभागे । ठोडि इति भाषा ॥ चीवति । चीव्यते वा । चीवृआदानसंवरणयोः । मृगय्वादित्वात् कुः ॥ चिनोतिशोभां वा । प्राग्वत् ॥

चिवुकम् । न । चिवौ ॥ स्वार्थेकन् ॥ पुं । मुचुकुन्दवृक्षे ॥

चिह्नम् । न । लाञ्छने । लक्षणे ॥ पताकायाम् ॥ चह्यतेऽनेन । चहपरिकल्कने । बा०नक् उपधाया इत्त्वम् ॥ लघ्वादि (।ऽ) त्रिकले ॥

चिह्नकारी । त्रि । घोरदर्शने ॥ विघातिनि ॥

चिह्नधारिणी स्त्री । श्यामालतायाम् ॥

चिह्नितः । त्रि । अङ्कित । चिह्नविशिष्टे ॥

चिल्लः । पुं । } गंधारी इति पर्वत-
चिल्लकः । पुं । } प्रसिद्धे वृक्षे ॥ चिल्लकोवातनिर्हारी श्लेष्मघ्नोधातुपुष्टिकृत् । आग्नेयो विषवद्यस्यफलं मत्स्यनिषूदनम् ॥

चीडा । स्त्री । चीडागन्ध इति गौड प्रसिद्धेगन्धद्रव्ये । दारुगन्धायाम् ॥

चीत्कारः । पुं । भयध्वनौ ॥

चीनः । पुं । देशविशेषे ॥ यथा । कांशीरन्तु समारभ्य कामरूपात्तु पश्चिमे । भोटान्तदेशोदेवेशि मानसेशाद्दक्षिणे ॥ मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्तित इति तन्त्रशास्त्रम् ॥ तद्देशजे मनुष्ये । चीनदेशाश्च वै पूर्वं क्षत्रिये पश्चाद्विहितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥ आगमोक्ते सम्प्रदायविशेषे ॥ अंशुकविशेषे । मखमल इत्याधुनिक भाषाप्रसिद्धे बहुविधाद्भुतवस्त्रे ॥ चीणा इतिप्रसिद्धे व्रीहि विशेषे ॥ चीनकः कङ्गुभेदोस्ति सचेयः कङ्गुवद्गुणैः ॥ तन्तौ ॥ मृगविशेषे ॥ न । पताकायाम् ॥ सीसके ॥ चिनोति । चिञ् ० । बाहुलकान्नक् दीर्घश्च ॥

चीनकः । पुं । चीणा इति प्रसिद्धधान्ये । काकाङ्गी ॥ कङ्गुन्याम् ॥ चीनकर्पूरे ॥

चीनकर्पूरः । पुं । चीनाकपूर इति भाषाप्रसिद्धे कर्पूरविशेषे । कृत्रिमे । मेघसारे । धवले ॥

चीनजम् । न । तीक्ष्णलौहे ॥

चीनपिष्टम् । न । सिन्दूरे ॥ चीनस्य पिष्टम् ॥ सीसके ॥

चीनवङ्गम् । न । सीसके ॥

चीनाकः । पुं । चीनियाकपूर इति प्रसिद्धे कर्पूरविशेषे ॥ चीनाकसंज्ञः

कर्पूरः कफक्षयकरः स्मृतः । कुष्ठकण्डूविषच्छर्दि स्थयातिक्तरसस्मृतः ॥

चीनाकर्कटी । स्त्री । चित्रकूटदेशप्रसिद्धायां कर्कट्याम् । राजकर्कट्याम् ॥

चीरम् । न । गोस्तने ॥ वस्त्रविशेषे ॥ रेखाभेदे ॥ लेखनभेदे ॥ चूडायाम् ॥ सीसके ॥ जीर्णवस्त्रखण्डे ॥ चीराणि किं पथि न सन्ति दिशन्ति भिक्षां मिति भागवतम् ॥ इत्यस्य चि ॥ चिनोति । चिञ्० । शुसिचि मीनां दीर्घश्चेतिक्रन् ॥

चीरकः । पुं । विक्रियालेखे । विकार लेखने ॥

चीरपत्रिका । स्त्री । चञ्चुशाके ॥

चीरपर्णः । पुं । शालवृक्षे ॥

चीरभृत् । पुं । तापसे ॥

चीरिः । स्त्री । नेत्रांशुके ॥ इतिशब्द रत्नावली ॥

चीरिका । स्त्री । झिल्ल्याम् । कच्छावाम् ॥

चीरितच्छदा । स्त्री । पालङ्क्यशाके ॥

चीरी । स्त्री । झिल्ल्याम् ॥ कच्छाटिकायाम् ॥ नेत्रांशुके ॥ गौ०ङीष् ॥

चीरुकम् । न । चेलुर इति गौड प्रसिद्धे फले ॥

चीवका । स्त्री । झिल्ल्याम् ॥ चीति रौति । रुशब्दे । बाहुलकात् कक् ॥

चीर्णः । त्रि । शीलिते ॥ सञ्चिते ॥

चीर्णपर्णः । पुं । निम्बागमे ॥ खर्जूरीभूरुहे ॥

चील्लिका । स्त्री । झिल्ल्याम् । चीर्याम् । चीरिकायाम् । चील्ल्याम् ॥

चीवरम् । न । भिक्षोर्वस्त्रे ॥ चिनोति । चिञ्चयने । छित्वरच्छत्वरधीवरेत्यादिनाष्वरच् धातोर्दीर्घश्च ॥

चीवरी । पुं । बुद्धभिक्षुके ॥ मत्वर्थीयइनिः ॥

चुक्कारः । पुं । सिंहनादे ॥

चुक्रः । पुं । अम्ले ॥ अम्लवेतसे ॥ न । चूकइति प्रसिद्धे अम्लद्रव्यविशेषे । तिन्तडीके । वृक्षाम्ले ॥ चूका इति प्रसिद्धे पत्रशाके । अम्लवास्तुके । वृक्षाम्ले ॥ चुक्र मत्यम्ल मुष्णञ्च दीपनं पाचनं परम् । शूलगुल्मविबन्धामवातश्लेष्महरम् परम् ॥ वमितृष्णाश्यवैरस्यहृत् पीडावह्निमान्द्यहृत् ॥ काञ्जिकप्रभेदे । रसाम्ले । सहस्रवेधे ॥ सन्धानविशेषे ॥ यथा । यन्मस्त्वादिशुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥ द्विगुणं गुडमध्वारनालमस्तुक्रमाद्हेति परिभाषा ॥ चकतेऽनेन चक्यतेवा । चक तृप्तौ प्रतिघातेच । स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दि…चक्रिरम्योरच्चो

पधाया इतिरक् ॥

चुक्रकम् । न । चूका इतिप्रसिद्धे शाके ॥

चुक्रफलम् । न । वृक्षाम्ले ॥

चुक्रवास्तूकम् । न । चुक्रे । चूका इति भाषा ॥

चुक्रशाकम् । न । शाकविशेषे ॥ चुक्रशाकमतिकोमलं शिलापेषितं कटुकतैलसंयुतम् । सैन्धवैलमरिचान्वितं पुनर्भोक्तुरेव रसनारसंमयेत् ॥ चुक्रं चुक्रतरं स्वादु वातघ्नं पित्तकृत् सरम् । रुच्यं लघुतरं पाकेसदम्लाकं सुरोचकम् ॥

चुक्रा । स्त्री । चाङ्गेर्याम् । अम्लोणी इति भाषा ॥

चुक्राम्लम् । न । वृक्षाम्ले ॥

चुक्राम्ला । स्त्री । चाङ्गेर्याम् ॥ चिञ्चायाम् ॥ काञ्जिकप्रभेदे ॥

चुक्रिका । स्त्री । चाङ्गेर्याम् ॥ तिन्तिड्याम् ॥ चकयति । चकव्यथने । चक्रिरम्योरुच्चोपधाया इति रक् । चुक्रमिव । इवेप्रतिकृतौ वितिकन् ॥ कुचाङ्गेर्याम् ॥

चुक्री । स्त्री । चाङ्गेर्याम् ॥ चुक्रिकायाम् । चूका इति भाषा ॥ चुक्रीत्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् । रुच्या लघुतरापाकेऽम्लाके नातिरोचनी ॥ गौरादित्वान्ङीष् ॥

चुचुकः । पुं । न । चूचुके कुचानने ॥

चुचूः । पुं । सुनिषण्णकशाके ॥

चुञ्चुः । पुं । ब्राह्मणेन वैदेह्यांयोषायामुत्पादिते सङ्करजातौ ॥ मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥ छुच्छुन्दर्याम् ॥

चुञ्चुरी । स्त्री । तिन्तिडीबीजैर्द्यूते ॥

चुञ्चुली । स्त्री । चुञ्चुरीक्रीडायाम् । तिन्तिडीकास्थिभिर्द्यूतक्रीडायाम् ॥

चुण्टा । स्त्री । } कूपे ॥ कूपसमीपाऽ

चुण्टी । स्त्री । } ल्पजलाशये ॥

चुतः । पुं । } गुदद्वारे ॥

चुतिः । स्त्री । }

चुन्दी । स्त्री । कुट्टन्याम् ॥

चुप्पः । त्रि । मन्दगमनकर्त्तरि ॥ चोपति । चुपमन्दायांगतौ । चुपः किच्चेतिदशपादीस्थपाठात् पः ॥

चुम्बम् । न । मुखे ॥ चुम्बति । चुविवक्त्रसंयोगे । कुजेन्द्रेतिरन् ॥

चुम्बकः । पुं । स्वतः प्रसिद्धे अयस्कान्ते । लोहकर्षके । कान्तपाषाणे ॥ चुम्बको लेखनः शीतो मेदोविषगरापहः ॥ घटस्योर्द्ध्वविलम्बने ॥ त्रि । बहुग्रन्थैकदेशज्ञे ॥ कामुके । चुम्बनपरे ॥ धूर्त्ते ॥

चुम्बनम् । न । चूंवना इतिप्रसिद्धे मुखसंयोगे ॥ तस्य स्थानानि यथा ।

मुखे स्तने ललाटे च कण्ठे च नेत्रयो रपि । गण्डे च कर्णयोश्चैव कक्षोः भ्रमभूर्द्धसु ॥ चुम्बनस्थान मित्युक्तं विषेयं कामुकैरिहेतिकामशास्त्रम्॥

चूरा । स्त्री । चौर्य्ये ॥

चुटी । स्त्री । उपकूपे । कूपसमीपस्था ल्पजलाधारे । खेल इति भाषा ॥

चुलिमाला । स्त्री । मात्रावृत्तप्रभेदे ॥ दोहादलशेषे यदा पञ्चकलो विमलोहिविराजति । फणिपतिन्नृपतिः किलतदा चुलिमालामिह तामनुगायति ॥ यथा । स्मितपटुकपटविलोकितै रपहतमानसपङ्कजलोचन । दृष्टिपथेभवितासिमम गोपवधूजनशोकविमोचनेति ॥

चुलुकः । पुं । घनपङ्के ॥ प्रसृतौ ॥ भाण्डप्रभेदे ॥ न । माषमज्जनजले ॥

चुलुकी । पुं । शिशुमाराकृतिमत्स्ये ॥

चुलुम्पः । पुं । बालखालने ॥

चुलुम्पा । स्त्री । छाग्याम् ॥

चुलुम्पी । स्त्री । शिशुमाराकृतिमत्स्ये ॥

चुल्लः । पुं । क्लिन्ननेत्रे ॥ चि । तद्युक्त॥ क्लिन्ने चक्षुषी अस्य । चुल्चेति क्लिन्नस्य चुलादेशो लश्च प्रत्ययः । चवर्गतः क्लेदरोमस्तुल्लवल्लवाच्यः । तद्योगाच्चक्षु स्तद्योगात् पुरुषोपीति

व्याख्यातारः ॥

चुल्लकी । स्त्री । शिशुमारे ॥ कुण्डी भेदे ॥ कुलान्तरे ॥

चुल्लिः । स्त्री । चूल्हा इति प्रसिद्ध पाकार्थमग्निस्थाने । अग्न्यन्ते । उद्धाने ॥ चितायाम् ॥ चुल्यते ऽन्न । चुल्ल भावकरणे । इन् ॥ चुद्यते ऽग्निर्वा । चुदप्रेरणे । बाहुलकाल्लः लिक्॥

चुल्ली । स्त्री । चितायाम् ॥ उद्धाने । चूल्हा इति भाषा । कृदिकारादिति ङीष् ॥

चुस्तः । पुं ✓। चुस्ते । मांसपिण्डक विशेषे ॥ आखोभृष्टमांसे ॥ पनसादिफलस्यासारभागे ॥

चूचुकम् । न । कुचाग्र । कुचानने । स्तनवृन्ते ॥ चूष्यते । चूषपाने । बाहुलकादुकः । पृषोदरादित्वात् षस्य चः । चूचुइत्यव्यक्तं कायति पीयमानम् । अन्येभ्योपीतिडः ॥

चूडकः । पुं । कूपे ॥ इति त्रिकाण्डशेषः ॥

चूडा । स्त्री । वडभ्याम् ॥ शिखायाम् । जुटिकायाम् ॥ बाहुभूषणे ॥ अग्रे ॥ भूषणमात्रे । शिरःशिखाभूषणेषु चूडेतियादवः ॥ मयूरशिखायाम् ॥ कूपे ॥ दशसंस्कारान्तर्गतसंस्कार विशेषे ॥ चुम्बादि (।ऽ) चिक्कणे ॥ चू

च्यते । चुडसमुच्छ्राये । भिदादित्वादङ्दीर्घश्च ॥ यद्वा । चुषते । चुट० । भिदादित्वादङ् डत्वंदीर्घत्वञ्च निपातनात् ॥

चूडाकर्म्म । पुं । दशसंस्कारान्तर्गतसंस्कारविशेषे । चौले । चूडाकरणे ॥

चूडामणिः । पुं । शिरोरत्ने ॥ काकचिञ्चाफले ॥ चूडायामणिः ॥ उपरागविशेषे ॥ यथा । सूर्य्यवारेरवेर्ग्रासः सोमवारेविधोर्ग्रहः । चूडामणिरितिख्यातस्तत्रानन्तफलंलभेदिति ॥

चूडाम्लम् । न । हस्ताम्ले ॥

चूडालम् । न । मस्तके ॥ त्रि । चूडायुक्ते ॥ चूडाऽस्त्यस्य । प्राणिस्थादातोलजन्यतरस्याम् ॥

चूडाला । स्त्री । उच्चटायाम् ॥ श्वेतगुञ्जायाम् ॥ नागरमुस्तायाम् ॥ लजन्तात्टाप् ॥

चूडावान् । त्रि । चूडायुक्ते ॥ पचेम तुप् ॥

चूतः । पुं । आम्रवृक्षे । रसाले ॥ चोष्यतेस्म । चूषपाने । क्तः । पृषोदरादिः ॥ च्योततिरसमितिवा । च्युतिरक्षरणे । अच् ॥ गुदद्वारे ॥

चूतकः । पुं । आम्रे ॥ कूपके ॥

चूर्णः । पुं न । सम्पेषणेनजातेरजसि । चूरण चूर्ण चून चूर इत्यादिभाषा

प्रसिद्धे । क्षोदे ॥ तल्लक्षणादि यथा । अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् । तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्राकर्षसम्मिता ॥ चूर्णे गुडःसमो देयः शर्कराद्विगुणामता । चूर्णेतु भर्जितं हिङ्गुदेयं नोत्क्लेदकृद्भवेत् ॥ लिहेच्चूर्णंद्रवैःसर्वैर्घृताद्यैर्द्विगुणोन्मितैः । पिबेच्चतुर्गुणैरेव चूर्णमालोडितंद्रवैः ॥ चूर्णावलेहगुटिकाकल्कानामनुपानकम् । पित्तवातकफातङ्के त्रिद्व्येकपल माहरेदिति भावमिश्रः ॥ चूर्णौषधस्यपूर्णवीर्य्यं पक्षत्रयपर्य्यन्तंतिष्ठति ॥ धूलौ ॥ चूना इति प्रसिद्धे क्षार विशेषे ॥ चूर्ण्यते । चूर्णपेषणे । चु० । एरच् ॥

चूर्णकः । पुं । सक्तुषु ॥ स्वार्थेके चूर्णशब्दार्थे ॥ न । गद्यप्रभेदे ॥ यथा । अपादःपदसन्तानोगद्यं तत्तुत्रिधामतम् । चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥ अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः । तत्तुवैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥ भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् । वृत्तैकदेशसम्बन्धाद्वृत्तगन्धिपुनःस्मृतम् ॥ तत्रचूर्णकं यथा । सहि त्रयाणामेवजगतांगतिः परम पुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गुरा

र्णी धरणीमवलोक्य करुणार्द्रहृदय
स्तस्या भारमवतारयितुं रामकृष्ण
स्वरूपेणांशतो यदुवंशे अवततारे
ति ॥ पुं । आमलकविशेषे ॥

चूर्णकारः । पुं । चूनरी इति गौडभा
षाप्रसिद्धे नटकन्यायांपुण्ड्रकाज्जा-
ते वर्णसङ्करजातिविशेषे ॥

चूर्णकुन्तलः । पुं । शिरस्थे क्षुद्रकुन्तले
। अलके ॥ चूर्णस्यकर्चूरादिचोदस्य
कुन्तलः ॥

चूर्णखण्डः । पुं । न । कर्करे । कङ्करइ
तिकांकर इतिचभाषा ॥

चूर्णदासी । स्त्री । पिष्टकारिण्याम् ।
पिसनहारी इतिभाषा ॥

चूर्णपारदः । पुं । हिङ्गुले ॥

चूर्णशाकाङ्कः । पुं । गौरसुवर्णशाके॥

चूर्णा । स्त्री । वासयोगे । पटवासादि
चोदे । निवासयुक्तिषु । सुगन्धिचू
र्णेः॥ चूर्णते । चूर्ण॰ ॥ घञ् ॥

चूर्णिः । स्त्री । पातञ्जले महाभाष्ये॥
कपर्दके ॥ शतसङ्ख्यककपर्दकेषु॥
चूर्णस्यकरणम् । तत्करोतीतिणय
न्तादचइः॥यद्वा। चरणं चोरणंवा। घृ
णिपृश्निपार्ष्णिचूर्णिभूर्णि इतिसाधुः॥

चूर्णिका । स्त्री । सक्तुषु ॥

चूर्णितः । त्रि । संशलिते ॥ कृत चूर्णे ॥

चूर्णी । स्त्री । महाभाष्ये ॥ कपर्दीक
शते ॥ कृदिकारादिति पक्षेङीष् ॥

चूर्णीकृत् । पुं । महाभाष्यकारे । पत
ञ्जलौ ॥

चूर्णीकृतः । पुं । गन्धविशेषे ॥ यथा ।
गन्धचूर्णं गन्धपत्रं चूर्णं सुमनसां त
था । प्रशस्तगन्धयुक्तानां पञ्चचूर्णा
नियानिच ॥ तानि गन्धाह्वयानिस्युः
सगन्धः प्रथमःस्मृत इति ॥ त्रि । कृ
तचूर्णे ॥

चूलः । पुं । कपाटाधो भागान्तरे ॥

चूलकः । पुं । केशे ॥

चूला । स्त्री । गृहोपरिगृहे । चन्द्रशा
लायाम् ॥ चूडायाम् ॥

चूलिकम् । न । घृतभृष्टसमितायाम्॥

चूलिका । स्त्री । हस्तिकर्णमूले ॥ चू-
ल्यते ऽनया । चूलसमुच्छ्राये । सं
ज्ञायामितिण्वुल् ॥ नाटकाङ्गे ॥

चूषा । स्त्री । कक्ष्यायाम् । गजमध्यब
न्धनरज्ज्वाम् ॥ चूष्यते पीयते पृष्ठ
मांसेनाकृष्यतां नीयते । चूषपाने ।
कर्मणिघञर्थे कः ॥

चेकितानः । पुं । नृपविशेषे ॥

चेटः । पुं । दासे ॥ चेटति । चिटपर
प्रेष्ये । अच् ॥

चेटकः । पुं । दासे । भृत्ये ॥ चेष्यते ।
चिट॰ । कृञादिभ्योवुन् ॥ उपपति
नायकविशेषे । सन्धानन्तरे ॥

चेटिः । स्त्री । दास्याम् ॥ चेटति । चिट० । इन् ॥

चेटिका । स्त्री । दास्याम् ॥ स्वार्थे कः ॥ करण्याम् ॥

चेटी । स्त्री । दास्याम् ॥ चेटति । चिट० । सर्व्वधातुभ्य इन् । कृदिकारादक्तिनः इति पक्षे ङीष् ॥ करण्याम् ॥

चेडिका । स्त्री । } चेटिकायाम् । दास्याम् ॥
चेडी । स्त्री । }

चेत् । अ । यद्यर्थे । पक्षान्तरे ॥ असन्देहेऽपिसन्देहवचने ॥ यथा । सत्यश्चेद्गुरुवाक्यमेव पितरो देवाश्च चेद्योगिनी प्रीता चेत् परदेवता चयदि चेद्वेदाः प्रमाणं हि चेत् । शाक्तीयं यदि दर्शनं भवति चेदाज्ञाप्यमोघास्ति चेत् स्वातन्त्र्या अपिकौलिकाश्च यदि चेत् स्याम् मे जयः सर्व्वदेति ॥ चेतति । चिती संज्ञाने । विच् ॥

चेतकः । त्रि । चेतनकर्त्तरि ॥ चेतयति । चिती० । ण्वुल् ॥

चेतकी । स्त्री । हरीतक्याम् ॥ त्रिरेखा चेतकी ज्ञेयेति तस्यालक्षणम् ॥ चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः । षडङ्गुलायता शुक्ला कृष्णा त्वेकाङ्गुला स्मृता ॥ काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत् । काचित् स्पर्शेन दृष्ट्या ऽन्या चतुर्धा भेदयेच्छिवा ॥ चेतकीपादपच्छायामुपसर्पन्ति ये नराः । भिद्यन्ते तत् क्षणादेव पशुपक्षिमृगादयः ॥ चेतकी तु धृता हस्ते यावत् तिष्ठति देहिनः । तावद्भिद्येत वेगैस्तु प्रभावान्नात्र संशयः ॥ नृपादिसुकुमाराणां कृशानां भेषजद्विषाम् । चेतकी परमा शस्ता हिता सुखविरेचिनी ॥ गौरादित्वात् ङीष् ॥

चेतनः । त्रि । प्राणिनि ॥ पुं । मनुष्ये ॥ आत्मनि । प्राणादिप्रवर्त्तके ॥ रथादौ नियता चेष्टा चेतनेनाऽनधिष्ठिते । न दृष्टा चेतनस्तेन प्राणादीनां प्रवर्त्तकः ॥ चेतति । चिती० । नं० ल्युः ॥

चेतमकी । स्त्री । हरीतक्याम् ॥

चेतना । स्त्री । संविदि । धियि । बुद्धौ ॥ स्वरूपज्ञानव्यञ्जिकायां प्रमाणासाधारणकारणिकायां चित्तवृत्तौ ज्ञानाख्यायाम् भगवतो विभूतौ ॥ चेतयतेऽनया । चित सञ्चेतने । चु० । ण्यासश्रन्थो युच् । टाप् ॥ जीवनाख्याम् ॥ चेतनाना मधिष्ठानं मनो देहश्चसेन्द्रियः । केशलोमनखाग्रान्त मलद्रवगुणैर्विना ॥

चेतनास्थानम् । न । सर्व्वशरीरे ॥ हृदये ॥

चेतनीया । स्त्री । ऋद्धिनामौषधौ ॥

चेतः । न । चित्ते ॥ चितीं । असुन् ॥ पुं । चैतन्य ॥ साक्षीचेता इति-श्रुतेः ॥

चेतोंशुः । पुं । जीवे ॥ चेतसश्चैतन्यस्य अंशुरिव ॥

चेतोमुखः । पुं । चैतन्यदीप्तानन्दप्तिप्रधाने प्राज्ञे ॥ स्वप्नादिप्रतिबोधं चेतः प्रतिद्वारीभूतत्वात् । स्वप्नोजागरितञ्चेति प्रतिबोधशब्दितं चेतस्तत् प्रतिद्वारभूतत्वं द्वारभावेन स्थितत्वम् न हि स्वप्नस्य जागरितस्य वा सुषुप्तद्वारमन्तरेण सम्भवोऽस्ति तयोस्तत्कार्यत्वात् अतःसुषुप्ताभिमानी प्राज्ञः स्थानद्वयकारणत्वात् चेतोमुखव्यपदेशभागित्यर्थः ॥

चेदिः । पुं । देशविशेषे । चैपुरे । डाहले ॥ पुंभूम्नि । तद्देशस्थे । चेदयः ॥

चेदिपतिः । पुं । उपरिचरवसौ ॥ चेदिराजे ॥ चेदीनां देशविशेषाणांपतिः ॥

चेदिराट् । पुं । शिशुपाले ॥ चेदिषुराट् यस्य । सं॰ क्विप् ॥ यद्वा । चेदीनांराट् । अन्येऽपि क्विप् । इतिकेचित् । वस्तुतस्तु सत्सूद्विषेति क्विप् ॥

चेदिराजः । पुं । शिशुपाले ॥ चेदीनां देशविशेषाणांराजा । टच् ॥ उपरिचरवसौ ॥

चेवी । स्त्री । रागिणीविशेषे ॥ इतिहलायुधः ॥

चेयम् । त्रि । चेतव्यमात्रे ॥ चेतुंयोग्यम् । चिञ्॰ । अर्हकृत्यतृचश्चेति योग्यतायामचोयत् ॥

चेलम् । न । वस्त्रे ॥ त्रि । अधमे ॥ चिलति चिल्यते वा । चिलवसने । चेलति चेल्यते वा । चेलृगतौ । अच् । घञ्वा ॥

चेलकम् । न । चेलशब्दार्थे ॥ स्वार्थेकः ॥

चेलानः । पुं । चेलना इति गौडप्रसिद्धे फललताविशेषे । अल्पप्रमाणके ॥

चेलालः । पुं । फललताविशेषे । चित्रफले । लतापनसे । सुखाशे ॥

चेलिका । स्त्री । चेवली इति प्रसिद्धे पट्टवस्त्रे ॥ यथा । सेयं कृष्णस्य वनिता पीतशाटीपरिच्छदा । रक्तचेलिकयाच्छन्ना शातकुम्भघनस्तनी । इति पाद्मेपातालखण्डम् ॥

चेली । स्त्री । अधमायाम् ॥ गौरादित्वान् ङीष ॥ चेलडितिपचादौटित्वान्ङीप्वा ॥

चेलीमः । पुं । वालियाख्यमीने ॥

चेलुकः । पुं । बुद्धभिक्षुशिष्ये । श्रमणेरे ॥

चेष्टक: । पुं । रतिबन्धविशेषे ॥ यथा । पादमेकं हृदिन्यस्य इतरेणैवचेष्टयेत् । कान्त: क्रोडे स्थितांनारींबन्धोयंचेष्टकोमत: ॥ त्रि । चेष्टाकर्त्तरि ॥

चेष्टा । स्त्री । कायपरिस्पन्दनादिरूपायां क्रियायाम् । प्राणधर्मे ॥

चेष्टानाश: । पुं । प्रलये ॥

चेष्टितम् । न । गतौ ॥ चेष्टायाम् ॥ चरित्रे ॥ त्रि । चेष्टान्विते ॥

चैकितान: । पुं । चिकितानस्यर्षेरपत्ये ॥

चैकितानेय: । पुं । ब्रह्मदत्ताख्येऋषिविशेषे ॥ चिकितानस्यापत्यं चैकितान: तदपत्यंयुवाचैकितानेय: ॥

चैकितायन: । पुं । दल्भ्यगोत्रापत्यत्वात् दाल्भ्ये ऋषिविशेषे ॥ चिकितायनस्यापत्यम् । अण् ॥

चैतन्यम् । न । चेतनायाम् ॥ ब्रह्मणि । सर्वभूतभौतिकप्रपञ्चाधिष्ठानप्रकाशे ॥ चैतन्यं परमाणूनां प्रधानस्यापिनेष्यते । ज्ञानक्रियेजगत्कर्त्र्यौदृष्येते चेतनाश्रये ॥ नेष्यतेवैशेषिकै:सांख्यैश्चेतिशेष: ॥ प्रकृतौ ॥ भावेस्वार्थेवाष्यञ् ॥

चैत्त: । पुं । विज्ञानस्कन्धातिरिक्तस्कन्धाभावे ॥

चैत्य: । पुं । उद्देश्यपादपे । ग्रामादि-

प्रसिद्धिहेतौ महावृक्षे । देवतरौ । देवावासे ॥ जिनबिम्बे ॥ जिनसभातरौ ॥ बुद्धे । न । आयतने ॥ चिताचिह्ने ॥ बुद्धवेद्ये ॥ जिनसभायाम् ॥ यज्ञस्थाने ॥ जनानां विश्रामस्थाने ॥ देवस्थाने ॥ चित्यामिचित्येचेतिसाधु: । चित्यायाइदम् । तस्येदमित्यण् ॥

चैत्यगृहम् । न । चतुष्पथमण्डपे ॥

चैत्यद्रु: । पुं । अश्वत्थाऽगमे ॥ प्रख्यातवृक्षे ॥

चैत्यद्रुम: । पुं । अश्वत्थवृक्षे ॥ प्रसिद्धद्रुमे ॥ ग्रामादिसमीपे ख्यातवृक्षे ॥

चैत्यमुख: । पुं । कमण्डलौ ॥

चैत्यवृक्ष: । पुं । चैत्यद्रुमे ॥

चैत्योपराग: । पुं । कार्त्स्न्यादिसर्वप्रपञ्चसम्बन्धे ॥ चैत्येनउपराग: ॥

चैत्र: । पुं । मासविशेषे । चैत्रिके । मधौ ॥ अत्रजातस्यफलम् । नृत्यमंभाषी विनयी सुवेशोभोगी सुखी स्यान्मधुरान्नभोजी । सत्सङ्गयुक्तो द्विजदेवभक्तो भवेन्मनुष्योमधुमासजन्मा ॥ चैत्रीपौर्णमास्यस्मिन् । विभाषाफाल्गुनीत्यादिनापक्षेऽण् ॥ अद्रिविशेषे ॥ चित्रागर्भजे बुधपुत्रे सप्तद्वीपाधिपतौ सुरथराजस्यपितामहे ॥ बुद्धभिक्षुके ॥ न ।

स्थते ॥ देवकुले । देउल इति गौडभाषा ॥ मृतकचैत्ये ॥

चैत्रकः । पुं । मधुमासि ॥ न । चित्रकस्यशाकादौ ॥

चैत्ररथम् । न । कुबेरस्योद्याने ॥ मेरोः प्राच्यांयोविष्कम्भशैल स्तस्यमू-लोद्याने ॥ चित्ररथेन गन्धर्वेण निर्वृत्तम् । तेननिर्वृत्तमित्यण् ॥

चैत्रावली । स्त्री । चैत्र्यांपूर्णिमायाम् । मधूत्सवे । सुवसन्ते ॥

चैत्रिकः । पुं । चैत्रे । मधुमासि ॥ चैत्रीपौर्णमास्यस्मिन् । विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यइतिपक्षेठक् । ठस्येकः ॥

चैत्री । स्त्री । चैत्रपूर्णिमायाम् ॥ चित्रायुक्ता पौर्णमासी । नक्षत्रेणयुक्तः कालइत्यण् । ततोङीप् ॥

चैद्यः । पुं । दमघोषात्मजे । शिशुपाले ॥ चेदीनांजनपदानामयम् । वृद्धेत्कोशलाजादाञ्ञ्यङितिञ्यङ् ॥ पुंभूम्नि । चेदिदेशोद्भवे । चेदिषु ॥

चैलम् । न । मृदुवस्त्रे ॥ चेलति चेल्यतेवा । चेलृगतौ । अच् घञ्वा । ततःप्रज्ञाद्यण् ॥

चोकम् । न । हेमाह्वायामूले ॥

चोचः । पुं । गीते ॥ त्रि । शुचौ ॥ स्वभावशुचा वरणादिदेशे ॥ दक्षे ॥

अभीक्ष्णे ॥ मनोज्ञे । चोखा इति भाषा ॥

चोचम् । न । वल्के ॥ चर्मणि ॥ गुडत्वचि ॥ त्वक्पत्रे । तेजपातइतिभाषा ॥ प्रशस्तंचोचमस्यास्ति । अर्शआद्यच् ॥

चोटी । स्त्री । शाट्याम् ॥ इतिहै० ॥

चोडः । पुं । प्रावरणे ॥ कञ्चुके ॥ पुंभूम्नि । देशविशेषे । चोडाः ॥

चोदकः । त्रि । प्रेरके ॥ चोदयति । चुदप्रेरणे । हेतुमण्णिजन्तात् कर्मणि ण्वुल् ॥

चोदनम् । न । प्रेरणे ॥

चोदना । स्त्री । विधौ ॥ चोदनाचोपदेशश्च विधिश्चैकार्थवाचिनः इतिभट्टोक्तिः ॥ विधिवाक्ये । क्रियायाः-प्रवर्त्तके वचने ॥ चोदना नामलिङ्लोट्तव्यादिशब्दव्यवस्थापितवि-धिनिषेधरूपयजनादिक्रियाप्रवर्त्तकं वचनमभिधीयते ॥ तर्जनायाम् ॥ प्रवर्त्तनायाम् ॥ प्रेरणायाम् ॥ शब्दभावनायाम् ॥ चोद्यते प्रवर्त्यतेऽनयेति । युच् ॥

चोदनागुडः । पुं । कन्दुके ॥

चोदितः । त्रि । प्रेरिते ॥

चोद्यम् । न । अद्भुते ॥ प्रश्ने ॥ पूर्वपक्षे ॥ चोद्यंवा परिहारोवा क्रियतां द्वैतभाषया । अद्वैतभाषया चोद्यं

नास्ति नापितदुत्तरम् ॥ त्रि । चोदनार्हे । प्रेर्ये । प्रेरणायोग्ये ॥ चोदितुंयोग्यः । अर्हेकृत्यतृचश्चेति यत् ॥

चोपनम् । न । शनैर्गमने ॥ मौने ॥ चुपेर्ल्युट् ॥

चोरः । पुं । स्तेयकर्त्तरि । तस्करे । दस्यौ । प्रच्छन्नापहारिणि ॥ गन्धद्रव्यविशेषे ॥ कृष्णशट्याम् ॥ चोरयति । चुरस्तेये । पचाद्यच् ॥

चोरकः । पुं । पृक्कायाम् । ग्रन्थिपर्णभेदे । भंडिउरइति नैपालभाषा ॥

चोरघातः । पुं । राज्ञांहस्तिविशेषे ॥ चोरंहन्ति । हन० । कृत्यल्युटोबहुलमित्यण् ॥

चोरपुष्पिका । स्त्री । शङ्खिन्याम् ॥ चोरपुष्प्येव । स्वार्थेकन् ॥

चोरपुष्पी । स्त्री । शङ्खिन्याम् । केशिन्याम् । सांखाहूली इतिभाषा ॥ चोरइवपुष्पमस्याः रात्रिविकाशित्वात् । पाककर्णेतिङीष् ॥

चोरस्नायुः । स्त्री । काकनासालतायाम् ॥

चोरा । स्त्री । चोरपुष्प्याम् ॥

चोरिका । स्त्री । चौर्य्ये ॥

चोरितः । त्रि । मुषिते ॥ चोर्यतेस्म । चुर० । क्तः ॥

चोलः । पुं । कूर्पासके । स्त्रीणां कञ्चुलिकाख्ये आप्रपदीनकञ्चुके ॥ चोल्यते ऽनेनवा । चुलसमुच्छ्राये । अच् घोवा ॥ चोला इति प्रसिद्धे पुंसो वस्त्रविशेषे ॥ अधुना ताञ्जोर इति प्रसिद्धे देशे । द्रविडतैलङ्गयोर्मध्ये चोलदेशः प्रकीर्त्तितः । लम्बकर्णा श्चते प्रोक्ता स्तद्देशे ऽवान्तरे भवेत् ॥ चीनदेशस्थहृदविशेष ॥ श्मश्रुधारिणि वेदयागानधिकारिणि म्लेच्छविशेषे । पूर्वमयं क्षत्रिय आसीत् स गरोराजास्य धर्मनाशं वेशान्यत्वञ्च चकार ॥ न । वसने ॥

चोलकः । पुं । बाणवारके । कवचे ॥ न । वल्कले ॥

चोलकी । पुं । करीरे ॥ नारङ्गे ॥ किष्कुपर्वणि ॥

चोलपडुकः । पुं । शिरोवेष्टे ॥

चोलनम् । न । नागरङ्गे ॥ किष्कुपर्वणि ॥ करीरे ॥

चोलहृदः । पुं । चीनदेशीयसरोविशेषे ॥

चोली । स्त्री । कूर्पासके । अंगिया इतिभाषा ॥ अल्पश्चोलः गौरादित्वान् ङीष् ॥

चोलोण्डुकः । पुं । शिरोवेष्टे । उष्णीषे ॥

चोषः । पुं । दाहविशेषे । पार्श्वस्थिता

ग्निनेव सन्तापे ॥ चूषणेनेव पीडायाम् ॥

चोष्यः । त्रि । इक्षुदण्डादौ । यद्दन्तैर्निष्पीड्य रसांशं निगीर्य्याऽवशिष्टं त्यज्यते तच्चोष्यमुच्यते ॥

चोक्षः । पुं । सिन्धुवारे । हयोत्तमे ॥

चौडम् । न । चूडाकरणकर्म्मणि ॥ चूडाप्रयोजनमस्य । चूडादिभ्य उपसङ्ख्यानमित्यण् ॥

चौण्ड्यम् । न । जलाशयविशेषे ॥ तज्जले ॥ शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् । लतावितानसञ्छन्नं चौण्ड्यमित्यभिधीयते ॥ चौण्ड्यं वह्निकरं नीरं रूक्षं कफहरं लघु । मधुरं पित्तनुद्रुच्यं पाचनं विशदं स्मृतम् ॥

चौपैया । स्त्री । मात्रावृत्तविशेषे ॥ यथा । चौपैयाछन्दं चिंशन्मात्रं फणिपतिपिङ्गलभणितम् कुरुसततुरङ्गममतिहृदयङ्गममन्तेगुरुमुपनीतम् । यदि दशवसुरविभिश्छन्दोविद्भिः क्रियते यतिरभिरामम् सपदि स्तवसमये नृपतिः कवये वितरति संसदि कामम् ॥ यथा । कालियकुलगञ्जन दुरितविभञ्जनसज्जनरञ्जनकारी । गोवर्द्धनधारी गोपविहारी वृन्दावनसञ्चारी । हतदुर्ज्जयदानवपालितमानवमुदिताखण्डलपाली सङ्गतगोपालीनिधुवनशाली भवतु मुदे वनमालीति ॥

चौरः । पुं । पाटच्चरे । तस्करे ॥ चोरपुष्पौषधौ ॥ सुगन्धे ॥ चोरणम् । चुरस्तेये । अप्रत्ययात् । संज्ञापूर्वकत्वान्नगुणः । चुराशीलमस्य । छत्रादिभ्योणः ॥ चोर एव वा । स्वार्थिकः प्रज्ञादण् ॥

चौरा । स्त्री । चोरपुष्पिकायाम् ॥

चौरिका । स्त्री । चौर्य्ये ॥ चोरस्य भावः कर्म्म वा । मनोज्ञादित्वाद्वुञ् ॥

चौर्य्यम् । न । चौरिकायाम् । स्तैन्ये ॥ चोरस्य कर्म्म भावो वा । ब्राह्मणादित्वात् ष्यञ् ॥

चौलम् । न । मुण्डनकर्म्मणि । चूडाकरणे ॥

चौलुक्यः । पुं । राजर्षिविशेषे ॥ चुलुकस्य गोत्रापत्यम् । गर्गादित्वात् यञ् ॥ त्रि । चुलुकेन कृते ॥

च्यवनः । पुं । भार्गवे ऋषिविशेषे ॥ न । पतने ॥

च्युतः । त्रि । क्षरिते । गलिते ॥ च्यूयते स्म । च्युङ् गतौ । क्तः ॥ गत्यर्थाकर्म्मकेति कर्त्तरि क्तो वा ॥ त्रुटिते ॥

च्युताचारः । त्रि । स्खलितव्रते ॥

च्युतिः । स्त्री । क्षरणे ॥ यथा । धैर्य्यच्यु

ति: ॥ भगे । योनौ ॥ गुह्यद्वारे ॥

च्युतोपल: । पुं । भ्रष्टरत्ने ॥ भ्रष्टपाषाणे ॥

च्युप: । पुं । वक्त्रे । मुखे ॥ च्यवन्ते भाषन्तेऽनेन । च्युङ्० । अनेकार्थत्त्वाज्ज्ञापणे । च्युव: किच्चेतिप: ॥

च्योतत् । त्रि । श्च्योतति ॥

च्यौत: । पुं । गन्तरि ॥ अण्डजे ॥ चीणपुण्ये । च्यवते । च्युङ्० । जनिदच्यादिना त्नण् ॥

छ:

छ: । पुं । छकारे ॥ छेदने ॥ त्रि । निर्मले ॥ तरले ॥ न । गृहे ॥

छग: । पुं । छागे । अजे ॥

छगण: । पुं । न । करीषे । छाणा इति भाषा ॥ इति हेमचन्द्र: ॥

छगल: । पुं । छागे ॥ न । नीलवस्त्रे ॥ छ्यति । छो छेदने । छोगुगह्रस्वश्चेति कलच् ॥

छगलक: । पुं । छागे ॥ स्वार्थे क ॥

छगलण्ड । पुं । दक्षिणदेशे समुद्रसन्निधौ प्रचण्डदेव्या: स्थाने ॥

छगला । स्त्री । वृद्धदारकवृक्षे ॥

छगलान्त्रिका । स्त्री । वृद्धदारकभेषजे ॥ छगलस्येवान्त्रमस्या: । गौरादित्वान्ङीष् । काप् । ह्रस्व: ॥

छगलान्त्री । स्त्री । वृद्धदारकवृक्षे ॥ वृके ॥ छगलस्येवान्त्रमस्या: । गौरादित्वान्ङीष् ॥

छगली । स्त्री । वृद्धदारकभेषजे ॥ छागमातरि ॥

छच्छिका । स्त्री । छाछ इति प्रसिद्धे तक्रभेदे ॥ छच्छिका सरहीनं स्यादच्छा प्रचुरवारिका ॥ छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी । वातनुत् कफकृत् सा तु दीपनी लवणान्विता ॥ सरहीनम् दधि इति सम्बन्ध: ॥

छटा । स्त्री । दीप्तौ ॥ परम्परायाम् ॥

छटाफल: । पुं । गुवाकवृक्षे ॥

छटाभा । स्त्री । विद्युति ॥

छत्र: । पुं । अतिच्छत्रे । मलेनपत्रेणाच्छत्राकारे वृक्षे । छातारियाविष छातनाविष स्वरविष इति च गौडभाषा ॥ भूतृणे ॥

छत्रम् । न । आतपत्रे । छाता इति छत्री इति च भाषा ॥ अथ छत्रलक्षणम् । निचितन्तु हंसपत्रै: कृकवाकुमयूरसारसानां वा । दौकूलेन नवेन तु समन्ततश्छादितं शुक्लम् ॥ मुक्ताफलैरुपचितं प्रलम्बमालाविलं स्फटिकमूलम् ॥ षड्हस्तशुद्धहैमं नवपर्वनगैकदण्डन्तु ॥ दण्डार्द्धविस्तृतं तत्

समाहृतं रत्नभूषितमुदग्रम् । नृप ते स्तदातपत्रं कल्याणपरं विजयदञ्च ॥ युवराजनृपतिपत्न्योः सेनापतिदण्डनायकानाञ्च । दण्डोऽर्द्धपञ्चहस्तः समपञ्चकृतोऽर्द्धं विस्तारः ॥ अन्येषा मुष्णघ्नं प्रसादपट्टैर्विभूषितशिरस्काम् । व्यालम्बिरत्नमालं छत्रं कार्यन्तु मायूरम् ॥ अन्येषान्तु नराणां शीतातपवारणान्तु चतुरस्रम् । समवृत्तदण्डयुक्तं छत्रं कार्यन्तु विप्राणाम् ॥ ६ ॥ इति वाराह्यामेक सप्ततितमोऽध्यायः ॥ ७१ ॥ विशेषोयुक्तिकल्पतरौद्रष्टव्यः ॥ छादयति छाद्यतेऽनेनवा । छद अपवारणे । णयन्तः । ष्ट्रन् । इस्मन्त्रन्क्विषु चेतिह्रस्वः ॥ पत्रपात्रपवित्रेत्यादिलिङ्गानुशासनात् पुंस्त्वमपिबोध्यम् ॥

छत्रकः । पुं । मत्स्यरङ्गखगे ॥ अतिच्छत्रे । रांगाकुलियाखडा इति गौड भाषा ॥ ईश्वरगृहविशेषे ॥ न । छत्रार्थे ॥

छत्रमुच्छः । पुं । गुण्डतृणे ॥

छत्रचक्रम् । न । राज्ञां शुभाशुभज्ञानबोधके समयामृतोक्ते चक्रविशेषे ॥

छत्रधरः । पुं । } छत्रस्यधारके । छा
छत्रधारः । पुं । } याकरे । छाताधा

र इति भाषा ॥

छत्रपत्रम् । न । स्थलपद्मे ॥ पुं । भूर्जवृक्षे ॥

छत्रपुष्पकः । पुं । तिलकवृक्षे ॥

छत्रभङ्गः । पुं । नृपक्षये । नृपनाशे ॥ स्वातन्त्र्ये ॥ वैधव्ये ॥

छत्रवृक्षः । पुं । मुचुकुन्दे । पुष्पवृक्षविशेषे ॥

छत्रा । स्त्री । मधुरिकायाम् । मिसौ ॥ अतिच्छत्रे ॥ धान्याके ॥ शिलीन्ध्रे ॥ छत्रमस्याः अस्ति । अच् । छत्राकारस्तवकत्वात् ॥ मञ्जिष्ठायाम् ॥ टाप् ॥

छत्राकः । पुं । जालवर्बुरकेवृक्षे ॥ न । शिलीन्ध्रे ॥

छत्राकी । स्त्री । रास्नायाम् ॥ छत्र मकति । अककुटिलायांगतौ । कर्मण्यण् ॥

छत्रातिच्छत्रः । पुं । छत्रातिच्छत्रायाम् । छत्रवत्तृणे । छत्राकारे जलोद्भवे सुगन्धाख्यतृणविशेषे ॥

छत्राधान्यम् । न । धन्याके ॥

छत्रिका । स्त्री । हिलीरे । शिलीन्ध्रे ॥

छत्री । त्रि । छत्रवति ॥ मत्त्वर्थेइनिः ॥ पुं । नापिते ॥

छत्त्वरः । पुं । गृहे ॥ कुञ्ज ॥ छादयति । छद० । छित्वरच्छत्त्वरेत्यादिना

ष्वरच् । दस्य तकारो निपातनात् ॥

छदः । पुं । पत्रे । पक्षाग्रे ॥ गरुति । पक्षे ॥ ग्रन्थिपर्णे ॥ तमालवृक्षे ॥ छाद्यते ऽनेन । छद॰ । णिजभावे पुंसि संज्ञायामिति घः । छाद्यते ऽनेन वा । छादेर्घे इति ह्रस्वः ॥

छदनम् । न । पत्रे । पर्णे ॥ पक्षे ॥ पिधाने ॥ तेजपात इति प्रसिद्धे तमालपत्रे ॥ छाद्यते ऽनेन । छद॰ । आधृषाद्वेति णिजभावपक्षे करणे ल्युः ॥

छदपत्रः । पुं । भूर्जपत्रवृक्षे ॥

छदिः । पुं । छदिषि । छप्पर इति छान इति च भाषाप्रसिद्धे ॥

छदिः । स्त्री । पटले । छान इति भाषा ॥ छादयति छाद्यते ऽनेन वा । छद॰ । चु॰ । अर्चिशुचीति इसिः । इस्मन्निति ह्रस्वः ॥ छदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम् ॥

छद्मजितः । त्रि । व्याजलब्धे ॥ छद्मना मिषेण जितो लब्धः ॥

छद्मतापसः । पुं । वैडालव्रतिके ॥

छद्म । न । कपटे । व्याजे । शाठ्ये ॥ अपदेशे ॥ स्वरूपाच्छादने ॥ छाद्यते ऽनेन । छद॰ चु॰ । मनिन् । इस्मन्त्रन्क्विषु चेति ह्रस्वः ॥

छद्मिका । स्त्री । गुडूच्याम् ॥

छद्वरः । पुं । छत्वरे ॥

छन्दः । पुं । वशे ॥ अभिप्राये ॥ विषभेदे ॥ इच्छायाम् ॥ यथा । छन्दः कामः कर्म पापं भयं स्यात् कर्मणः फलम् । अनर्थरूपं वितथ मन्वैते वीक्ष्यते नहि ॥ कर्मशब्देन धर्माधर्मावुच्येते ॥ छन्द्यते छन्दनं वा । छदि संवरणे इच्छायामपि । घञ् ॥

छन्दःपर्णः । पुं । मायामये संसारवृक्षे ॥ छन्दांसि छादनात् तत्त्ववस्तुप्रावरणात् संसारवृक्षरक्षणाद्वा कर्मकाण्डानि ऋग्यजुःसामलक्षणानि । तानि पर्णानीव पर्णानि यस्य । यथा वृक्षस्य परिरक्षणार्थानि पर्णानि भवन्ति तथा संसारवृक्षस्य परिरक्षणार्थानि कर्मकाण्डानि । धर्माधर्मतद्धेतुफलार्थत्वात् छन्दसाम् ॥

छन्दःस्तुत् । पुं । गरुडे । वैनतेये ॥ छन्दोभिः स्वावयवैः स्तौति । ष्टुञ्॰ क्विप् तुक् ॥

छन्दः । न । वेदे ॥ स्वैराचारे ॥ अभिलाषे ॥ नियताक्षरपादरूपे गायत्र्यनुष्टुबादौ । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीषु सप्तसु ॥ पद्ये ॥ पद्यस्य लक्षणं यथा । पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥ सममर्द्धसमं वृत्तं विषम

च्चेतितत्त्रिधा । समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥ आदिस्तृतीयवच्च यस्य पादस्तुर्यो द्वितीयवत् । भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥ एषामर्थः । अक्षरसङ्ख्यातमक्षरगणनया परिप्राप्तं वृत्तमुच्यते । मात्राकृता मात्रागणनयानिर्णीता जातिः जातिसंज्ञका भवति ॥ समं समचतुष्पादम् । अर्द्धसमं यस्य प्रथमः पादः तृतीयेन पादेन तुल्यः । चतुर्थः पादो द्वितीयेन पादेन तुल्यः । विषमं पृथक्लक्षणचतुष्पादम् । इति ॥ तत्तु नानाविधम् । तस्य पिङ्गलादयो बहवो ग्रन्थाः सन्ति ॥ छन्दसां लक्षणोदाहरणानि तत्तत् स्थाने द्रष्टव्यानि ॥ चन्दनम् चन्द्यते ऽनेनवा । चदिआह्लादने-दीप्तौच । चन्देरादेश्छइत्यसुन् ॥

छन्दस्यः । त्रि । इच्छयाकृते ॥ छन्दसा निर्मितः । छन्दसो निर्मित इति यत् ॥

छन्दोगः । पुं । सामगे । सामवेदज्ञे ब्राह्मणे ॥ छन्दोगायति । गैशब्दे । गापोष्टगिति टक् ॥

छन्दोगपरिशिष्टम् । न । कात्यायनमुनिकृते सामवेदिनां कर्मबोधके गोभिलसूत्राणां परिशेषशास्त्रे ॥

छन्दोभङ्गः । पुं । छन्दसःपतने ॥ अपि

माषं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिराम् ॥

छन्दोविचितिः । स्त्री । श्रुतच्छन्दसां प्रत्यायके शास्त्रे ॥

छमम् । न । निर्जनस्थाने । रहसि ॥ छम्यतेस्म । छद० । क्तः । आगमशास्त्रानित्यत्वान्नेट् ॥ त्रि । छादिते । ढका इतिभाषा ॥ छाद्यतेस्म । छद० । णिजन्तः । वादान्तेत्यादिना साधुः ॥

छमण्डः । त्रि । मृतपितृके । छोरा छोरीइतिछोकरा छोकरी इतिचभाषा इत्युणादिकोषः ॥

छर्दम् । न । वमने ॥

छर्दनः । पुं । अलम्बुषाख्ये ॥ निम्बवृक्षे ॥ मदनवृक्षे ॥ न । वमने ॥

छर्दापनिका । स्त्री । कर्कव्याम् ॥

छर्दिः । स्त्री । वमनरोगे । वमथौ ॥ छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः । निरुच्यते छर्दिरिति दोषोवक्त्रं प्रधावितः ॥ छर्दयति । छृदीसन्दीपने । णिजन्तादचइः ॥ कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्यमेवच । हृद्रोगस्तमकश्चेति ज्ञेयाश्छर्द्देरुपद्रवाः ॥

छर्दिका । स्त्री । उत्कासिकायाम् । छर्दिषि ॥ विष्णुक्रान्तायाम् ॥

छर्दिकारिपुः । पुं । सूक्ष्मैलायाम् ॥ त्रि

। छर्दिघ्ने ॥
छर्दिघ्नः । पुं । अरिष्टे । निम्बे । मालके ॥
छर्दिः । स्त्री । वमौ । वमने ॥ छर्दति
। छृदीसन्दीपने । अर्चिशुचीत्यादि
ना इसिः ॥
छर्दी । स्त्री । वमने ॥ आमाशयोत्क्ले
शभवाहि सर्वा श्छर्द्यो मता लङ्घन
मेवतस्मात् । विधीयते मारुतजां
विनातु संशोधनं वा कफपित्तहारी
तिवैद्यकम् ॥ कृदिकारादक्तिन इति
ङीष् ॥
छलम् । न । स्खलिते । कूटयुद्धादिना
युद्धमर्यादायाश्चलने ॥ छद्मनि । शा
ठ्ये । व्याजे । स्वरूपाच्छादने ॥ ता
त्पर्यान्तरेण प्रयुक्तस्य शब्दस्याऽर्था
न्तरेणकथने ॥ तथाचाक्षपादप्रणी
तं सूत्रम् । वचनविघातोऽर्थविक
ल्पोपपत्त्या छलम् । ५० ॥ अर्थस्यवा
ऽभिमतस्य योविकल्पोविरुद्धः क-
ल्पोऽर्थान्तरकल्पनेतियावत् तदुप
पत्त्या युक्तिविशेषेण योवचनस्य वा
क्तस्य विघातो दूषणं तच्छलमि
त्यर्थः । वक्तृतात्पर्याऽविषयार्थक
ल्पनेन दूषणाभिधानमिति फलितम्
। तात्पर्याविषयत्वम् विशेष्ये विशे
षणे संसर्गेवा ॥ यथा । नेपालादा
गतोयं नवकम्बलवत्त्वादित्यत्र नव
संख्यापरत्वकल्पनयाऽसिद्ध्यभिधान
म् । प्रमेयं धर्मत्वादित्यत्र पुण्यत्वा
र्थकल्पनया भागासिद्ध्यभिधानम् ।
वह्निमान् धूमादित्यत्र धूमावयवे
व्यभिचाराभिधानम् ॥ तत्त्रिविधं
वाक्छलं सामान्यच्छलमुपचारच्छ
लञ्च ॥ ५१ ॥ छानम् । छोच्छेदने ।
वृषादित्वात्कलः ॥
छलना । स्त्री । परप्रतारणायाम् ॥
छलितः । पुं । स्खलिते । छले ॥
छल्ली । स्त्री । विरुधि ॥ सन्ताने ॥ व-
ल्कले । छाल इति भाषा ॥ कुसुम
विशेषे ॥
छविः । स्त्री । शोभायाम् ॥ रुचि ॥
छ्यति असारम् । छो० । कृविघृष्वि-
च्छवीत्यादिनाक्विन्नन्तोनिपातितः
॥ छिनत्ति तमो वा । छिदिरद्वैधी-
करणे ॥
छाः । पुं । शावके ॥ इत्येकाक्षरः ॥
छा । स्त्री । छादने ॥
छागः । पुं । वस्ते । छागलके । अजे ।
बर्करे । बकरा इतिभाषा ॥ ततप
रीक्षोक्तायुक्तिकल्पतरौ भोजराजे
न । नक्षत्राणां विभेदेन नराणां तु
गणत्रयम् । तेषांशुभाय निर्दिष्टं पशु
वस्तत्रयंबलौ ॥ येकृष्णाः शुचयश्छागाः
पशवोन्ये तथैवच । देवजातिभिरुत्

छागः

सृज्यास्तेसर्वार्थोपसिद्धये ॥ येपीता
हरितावापिनरजाते हरीरिताः ।
ये शुक्लाश्चमहान्तोवारश्चोजातेः शु
भप्रदाः ॥ योमोहादथवा ज्ञानाद्व-
लिमन्यं प्रयच्छति । वधएवफलं तस्य
नान्यत् किञ्चित् फलंभवेदिति ॥
अस्यमांसगुणाः । छागमांसं लघुस्नि
ग्धं स्वादुपाकं त्रिदोषनुत् । नाति
शीत मदाहिस्यात् स्वादुपीनसनाश
नम् ॥ परंबलकरंरुच्यंबृंहणं वीर्यव
र्द्धनम् ॥ अजायाश्चप्रसूताया मांसं
पीनसनाशनम् । शुष्ककासेऽरुचौशो
षेहितमग्नेश्चदीपनम् ॥ अजासुत
स्यबालस्य मांसं लघुतरंस्मृतम् । हृ
द्यंज्वरहरं श्रेष्ठंसुस्वादुबलदं भृशम्
॥ मांसंनिष्कासिताण्डस्य छागस्य क
फकृन्मत । स्रोतः शुद्धिकरं बल्यं मां
सदं वातपित्तनुत् ॥ वृद्धस्य वातलं
रूक्षं तथा व्याधिमृतस्यच । ऊर्द्धज
त्रुविकारघ्नंछागमुण्डंरुचिप्रदमिति॥
*॥ अथछागलक्षणम् । छागशुभाशु
भलक्षण मभिधास्ये नवदशाष्टदन्ता
स्ते । धन्याः स्थाप्यावेश्मनि सन्त्याज्याः
सप्तदन्तास्ते ॥ दक्षिणपार्श्वेमण्डल
मसितं शुक्लस्य शुभफलं भवति ।
ऋष्यनिभः कृष्णलोहितवर्णानांश्वे
तमतिशुभदम् ॥ स्तनवद्वलम्बतेय

छागः

कण्ठेऽजानां मणिः सविज्ञेयः । एक
मणिःशुभफलकृद् धन्यतमा द्वित्रि
मणयोये ॥ मुण्डाः सर्वेशुभदाः सर्वं
सिताः सर्वं कृष्णदेहाश्च । अर्द्धासि
ताः सितार्द्धा धन्याःकपिलार्द्धकृष्णाश्च
॥*॥ अथचतुर्णां कुट्टककुट्टिकजटि
लवामनानां क्रमेण लक्षणं करोति ।
विचरति यूथस्याग्रे प्रथमं वाम्भोव
गाहते योऽजः । सशुभः सितमूर्द्धा
वा मूर्द्धनि वा कृत्तिकायस्य ॥ सपृष
तकण्ठशिरावा तिलपृष्ठनिभश्चताम्रदृ
क्प्रशस्तः । कृष्णचरणः सितोवा कृ
ष्णोवा श्वेतचरणोयः ॥ यःकृष्णाण्ड
श्वेतो मध्ये कृष्णेन भवतिपट्टेन ।
योवाचरति सशब्दं मन्दञ्च सशो-
भनश्छागः ॥ ऋष्यशिरोरुहपादो
योवाप्राक्पाण्डुरोऽपरेनीलः । स-
भवति शुभकृच्छागः श्लोकश्चाप्यत्र
गर्गोक्तः ॥ तमाह । कुट्टकः कुट्टिक
श्चैव जटिलो वामनस्तथा । तेच-
त्वारःश्रियः पुत्रा नालक्ष्मीके वस
न्तिवै ॥*॥ अथाऽप्रशस्तानां लक्षण
म् ॥ अथाऽप्रशस्ताः खरतुल्यनादाः
प्रदीप्तपुच्छाः कुनखा विवर्णाः । निकृ
त्तकर्णाद्विपमस्तकाश्च भवन्ति तेषां
सिततालुजिह्वाः ॥*॥ अथ शुभलक्ष
णानि । वर्णैः प्रशस्तै र्मणिभिः प्रयुक्ता

मुण्डाश्च ये ताम्रविलोचनाश्च । ते पूजिता वेश्मनि मानवानां सौख्यानि कुर्वन्ति यशःश्रियश्चेति ॥ पुरोडाशे ॥ न । छागीदुग्धे ॥ छ्यति । छो०। छायते छिद्यते वा । छापूञ्भ्यः किदिति गन् ॥ त्रि । छागच्छाग्योःसम्बन्धिनि ॥ मत्स्यविशेषे ॥ यथा । श्वेतं सुपाकं समदीर्घहस्तं भिः शल्कं छागलकं वदन्ति । गले द्विकण्टःकिलतस्यपृष्ठे कण्टःसुपथ्यो रुचिदोषापद इति ॥

छागणः । पुं । करीषाग्नौ । गोठेकी आग इतिभाषा ॥

छागभोजी । पुं । वृके ॥ त्रि । छागभक्षके ॥

छागरथः । पुं । अग्नौ ॥ छागोरथोऽस्य ॥

छागलः । पुं । छागे ॥ छगलएव । प्रज्ञाद्यण् ॥ आत्रेये ऋषिविशेषे ॥ छगलस्य अपत्यम् । विकर्णशुङ्गच्छगलाद्वित्यण् ॥

छागलकः । पुं । अजे । स्तुभे । बर्करे । छागे ॥ स्वार्थेकः ॥

छागलाद्यम् । न । भैषज्यरत्नावल्युक्ते भिषजांघृतविशेषे ॥

छागलान्त्रिका । स्त्री । वृद्धदारकवृक्षे ॥

छागलान्त्री । स्त्री । वृके ॥

छागवाहनः । पुं । अग्नौ ॥

छागिका । स्त्री । छाग्याम् ॥ स्वार्थेकः । केण इति ह्रस्वः ॥

छागी । स्त्री । अजायाम् । छागमातरि ॥ छागात् जातेरितिङीष् ॥

छागीदुग्धम् । न । अजाक्षीरे । छागं कषायं मधुरं शीतं ग्राहि पयो लघु । रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥ अजानांलघुकायत्वान्नाना द्रव्यनिषेवणात् । नात्यम्बुपानाद्व्यायामात् सर्वव्याधिहरंपयः ॥

छातः । त्रि । छिन्ने ॥ दुर्बले ॥ छायते स्म । छो० क्तः । छतिस्मवा । गत्यर्थेतिक्तः । शाच्छोरन्यतरस्यामितीत्वाभावः ॥

छात्रः । पुं । अन्तेवासिनि । शिष्ये ॥ गुरुदोषाच्छादनं छत्रम् । तच्छीलमस्य । छत्रादिभ्योणः ॥ न । मधुप्रभेदे ॥ वरटाःकपिलाःपीताः प्रायोहिमवतोवने । कुर्वन्ति छत्रकाकारं तज्जंछात्रंमधुस्मृतम् ॥ छात्रंकपिलपीतंस्यात् पिच्छिलंशीतलंगुरु । स्वादुपाकं कृमिश्वित्ररक्तपित्तप्रमेहजित् ॥ भ्रमतृण्मोहविषहृत्तर्पणञ्चगुणाधिकम् ॥

छात्रकम् । न । छात्रेमधुनि ॥ यथा । छत्राकारन्तुपटलं सरघाः पीतपिङ्गलाः । याः कुर्वन्तितदुत्पन्नंमधुच्छा

चरमीरितम् ॥ शिवमेवकूमिमच्च विद्याच्छाग्यं गुणोत्तरम् ॥

छात्रगण्ड: । पुं । पदार्थविदि । श्लोकार्धपदवेत्तरि ॥

छात्रदर्शनम् । न । हैयङ्गवीने ॥ इति शब्दचन्द्रिका ॥ मिथ्यावलोकने ॥

छात्रादिनिलय: । पुं । मठे ॥ छात्रोऽन्तेवासी आदिर्येषां परिव्राजकतपस्विकादीनाम् तेषांनिलय: ॥

छादनम् । न । दले । पत्रे ॥ आच्छादने ॥ अन्तर्द्धाने ॥ पुं । नीलाम्लानवृक्षे ॥

छादित: । त्रि । संवृते । आच्छादिते ॥ यथा । घनतरघनवृन्दैश्छादितो- पुष्पवन्तावित्युद्भट: ॥ छाद्यतेस्म । छद्•वाद्यान्तात्क्तप्रत्ययेसाधु: ॥

छादिषेयम् । न । तृणे ॥ छदिषे इदम् । छदिरुपधिवल्लेर्ढञ् ॥

छाद्मिक: । त्रि । कापटिके । व्याजेन चरत्तरि ॥ छद्मना चरति । ठक् ॥

छान्दस: । पुं । श्रोत्रिये । वेदाध्ययनकर्त्तरि । वेदवेत्तरि ॥ छन्दोधीते वेत्तिवा । पक्षे तदधीतेतद्वेदेत्यण् ॥ छन्दसो व्याख्यानस्तत्र भवोवा । छन्दसोयदणौ इत्यण् । यतिस्तु छन्दस्य: ॥ त्रि । छन्दसम्बन्धिनि ॥

छान्दोग्यम् । न । छन्दोगानांधर्मे आम्नाये समूहेच ॥ चरणेभ्योधर्मवदिति छन्दोगौक्थिकेतिञ्य: ॥ सामवेदोपनिषदि ॥

छाया । स्त्री । आतपाभावे । भावानुगायाम् । श्यामायाम् ॥ प्रतिबिम्बे ॥ अर्कयोषिति । संज्ञाप्रतिकृतौ ॥ पालने ॥ उत्कोचे ॥ कान्तौ ॥ सच्छोभायाम् ॥ पङ्क्तौ ॥ तमसि ॥ अतिधृतिसंज्ञकोनविंशाक्षरा वृत्तिविशेषे ॥ यथा । भवेत् सैवच्छायातयुगगयुताश्चाद्द्वादशान्ते यदा ॥ सैव मेघविस्फूर्जितैवेत्यर्थ: । यथा । अभीष्टंजुष्टोयो वितरति सतां श्याकशाखोज्ज्वल: स्फुरन्नानारत्नस्तबकिततनु श्चिवांशुकालम्बित: । न यस्याङ्घ्रिच्छाया मपगतवतां संसाररतीव्रातप स्तनोतिप्रोत्तापं स जगद्वतात् कंसारिकल्पद्रुम: ॥ इति । छो० । श्यादधातिगा: । आतो युक् ॥ यद्वा । मा छाससिभ्योय: ॥ सादृश्ये ॥

छायाकर: । त्रि । छत्रधारे । छाताधार इतिभाषा ॥

छायातनय: । पुं । शनैश्चरे ॥ छायायास्तनय: ॥

छायातरु: । पुं । स्थिरच्छायवृक्षे ॥

छायात्मज: । पुं । शनिग्रहे ॥

छायापथ: । पुं । आकाशे ॥ देवपथे ।

नभः सरिति ॥ स्वातीपथे ॥ छाया पथोनाम ज्योतिश्चक्रमध्यवर्त्तीकश्चि त्तिरश्चीनोऽवकाशइतिमल्लिनाथः॥

छायापुत्रः । पुं । मन्दे । शनौ ॥

छायापुरुषः । पुं । आकाशेद्रष्टव्ये निजच्छायारूपे पुरुषे ॥ तदवलोकन विधिर्योगप्रदीपिकायां द्रष्टव्यः ॥

छायाभृत् । पुं । चन्द्रे ॥

छायामित्रम् । न । आतपत्रे । छत्रे ॥

छायामृगधरः । पुं । विधौ । चन्द्रे ॥

छायावृक्षः । पुं । छायाप्रधाने वृक्षे ॥ शाकपार्थिवादिः ॥

छायासुतः । पुं । शनौ ॥

छिः । पुं । गर्हायाम् ॥ इत्येकाक्षर-कोषः ॥

छिक्कनी । स्त्री । चवकृति । नकछिक नीतिख्यातौषधौ ॥ छिक्कनी कटुका रुच्यातीक्ष्णोष्णा वह्निपित्तकृत् । वातरक्तहरीकुष्ठकृमिवातकफापहा ॥

छिक्करः । पुं । मृगविशेषे ॥ मांसं छिक्करजं कृत्तमाज्ये तप्ते सुभृष्टकम् । दधिसैन्धवहिङ्ग्वाढ्यं सुधूलेनाति धूपितम् ॥ कषायं मधुरं स्वादु कफपित्तानिलापहम् । विपाकेकटुकं प्रोक्तं विशेषेणाग्निवर्द्धनम् ॥

छिक्का । स्त्री क्षुते ॥ छींकइतिभाषा॥

छिक्किका । स्त्री । छिक्कन्याम् ॥

छितः । त्रि । लूने ॥ छायतेस्म । छो० । क्तः । शाछोरन्यतरस्यामितीत्वंशा॥

छित्तिः । स्त्री । छेदे ॥ छिद्रे ॥ छिद्यते छेदनं वा । छिदिर्० । स्त्रियांक्तिन् ॥ पुं । करञ्जवृक्षे ॥

छित्वरः । त्रि । धूर्त्ते ॥ वैरिणि ॥ न । छेदनद्रव्ये ॥ छिनत्ति । छिदिर्० । छित्वरछत्वरेत्यादिनाष्वरच् निपातनादकारस्यतकारोगुणाभावश्च॥

छिद् । त्रि । छेदनकर्त्तरि ॥ छिनत्ति । छिदिर्० । क्विप् ॥

छिदकम् । न । वज्रे ॥

छिदा । स्त्री । छेदने । द्वैधीकरणे ॥ छिदिर्० । षिद्भिदादिभ्योऽङ् । टाप् ॥

छिदिः । स्त्री । कुठारे ॥ शस्त्रे ॥ छिनत्ति । छिदिर्० । इन् ॥ इगुपधात्कित्कुटी त्यादिनाइः कित्वा ॥

छिदिरः । पुं । पावके ॥ रज्जौ ॥ करवाले ॥ परश्वधे ॥ छिनत्ति । छिदिर्० । इषिमदिमुदिखिदिच्छिदी-त्यादिनाकिरच् ॥

छिदुरः । त्रि । वैरिणि ॥ धूर्त्ते ॥ न । छेदनद्रव्ये ॥ छेदके ॥ छिनत्ति तच्छीलः । छिदिर्० । विदिभिदि च्छिदेःकुरच् ॥

छिद्रम् । न । दूषणे ॥ रन्ध्रे ॥ निम्नं

छिद्रानुसारिभिः ॥ अवकाशे ॥ गर्त्ते ॥ अष्टमभवने ॥ छिद्रयते । छिद्रभेदने । घञ् । यद्वा । छिद्यते । छिदिर् ० । स्फायितञ्चीतिरक् ॥

छिद्रवैदेही । स्त्री । गजपिप्पल्याम् ॥

छिद्रान्तः । पुं । नले । पोटगले ॥

छिद्राफलम् । न । मायाफले ॥

छिद्रितः । त्रि । विद्धे । कृतच्छिद्रे । वेधिते । वींधा इति भाषा ॥ छिद्रयते स्म । छिद्र० अदन्तः । क्तः ॥

छिन्नः । त्रि । कृत्ते । छाते । लूने । कृतच्छेदने । काटा । चीरा । फाडा इति भाषा ॥ छिद्यते स्म । छिदिर् ० । क्तः ॥

छिन्नग्रन्थिनिका । स्त्री । त्रिपर्णिकायाम् ॥

छिन्नद्वैधः । त्रि । अवशादिभिरिपाकेषु निवृत्तसर्वसंशये ॥

छिन्नपत्री । स्त्री । अम्बष्ठायाम् ॥

छिन्नमस्ता । स्त्री । महाविद्याप्रभेदे । प्रचण्डचण्डिकायाम् ॥ छिन्नं मस्तं यस्याः ॥ त्रि । छिन्नमस्तके ॥

छिन्नरुहः । पुं । तिलकवृक्षे ॥

छिन्नरुहा । स्त्री । अमृतायाम् । गुडूच्याम् ॥ छिन्नारोहति । रुह० । इगुपधेतिकः । ङ्यापोरिति ह्रस्वः ॥ शल्लक्याम् ॥ स्वर्णकेतक्याम् ॥

छिन्नवेशिका । स्त्री । पाठायाम् ॥

छिन्ना । स्त्री । छिन्नमस्तायां देव्याम् ॥ गुडूच्याम् ॥ दुस्वर्याम् । पुंश्चल्याम् ॥ क्तान्ताच्छिदेष्टाप् ॥

छिन्नोद्भवा । स्त्री । गुडूच्याम् । गिलोय इतिविख्यातायाम् ॥

छिलिहिण्टः । पुं । पातालगरुडाख्यौषधौ ॥ छिलिहिण्टः परं वृष्यः कफघ्नः पवनापहः ॥ छिलिहिण्डोपि ॥

छुच्छुका । स्त्री । छुच्छुन्दर्याम् ॥

छुच्छुन्दरी । स्त्री । गन्धमुख्याम् । छुछुंदर इतिभाषा ॥

छुद्रम् । न । प्रतीकरणे ॥ रश्मौ ॥

छुपः । पुं । क्षुपे ॥ स्पर्शने ॥

छुरणम् । न । विलेपने ॥

छुरा । स्त्री । सुधायाम् । चूर्णे । लेपनद्रव्ये । चूना इति भाषा ॥

छुरिका । स्त्री । शस्त्रविशेषे । असिपुत्र्याम् ॥ छुरति । छुरच्छेदने । क्वुन् ॥ इगुपधेतिके क्वन् वा । ह्रस्वम् ॥

छुरितः । त्रि । खचिते ॥ रञ्जिते ॥ रूषिते ॥

छुरी । स्त्री । छुरिकायाम् ॥

छूरिकापत्री । स्त्री । श्वेतायाम् ॥

छूरी । स्त्री । छुरिकायाम् ॥ इतिभरतः ॥

छेकः । त्रि । गृह्यके । गृहाश्रिते मृगे पक्षिणि च ॥ नागरे । विदग्धे ॥ छ

ति छायते वा । छो० । वा० डेकन् ॥

छेका । स्त्री । मत्तायाम् ॥

छेकानुप्रासः । पुं । अलङ्कारविशेषे ॥ सोऽनेकस्य सकृत् पूर्व्वः । अनेकस्य अर्थाद्व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः । उदाहरणं यथा । ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी । दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥

छेकोक्तिः । स्त्री । वक्रोक्तौ ॥ छेकाया उक्तिः ॥

छेत्ता । त्रि । छेदनकर्त्तरि ॥ छिनत्ति । छिदिर्० । तृच् ॥

छेदः । पुं । खण्डे ॥ छेदने ॥ छेदनम् छिद्यते वा । छिदिर्० । घञ् ॥

छेदनम् । न । भिदि ॥ कल्पने । वर्द्धने । कर्त्तने । अखण्डस्य द्विधाकरणे । छांगना काटना इति भाषा ॥ छिदिर्० । ल्युट् ॥

छेदनीयः । पुं । कतकवृक्षे ॥ त्रि । छेद्ये ॥ छेदितुं योग्यः । अर्हे कृत्यतृचश्चेति अनीयर् ॥

छेदवत् । त्रि । विच्छेदयुक्ते ॥

छेदिः । त्रि । छेत्तरि ॥ छिनत्ति । छिदिर्० । कृपिशिकुटिहटतिविदिच्छिदिकीर्त्तिभ्यश्चेति इन् ॥

छेदितः । त्रि । छिन्ने ॥

छेद्यः । त्रि । छेदनीये ॥ परिच्छेद्ये ॥ ॥ छेत्तुं शक्यः । शकिलिङ्चेति शक्याऽर्थे कृत्यः ॥

छेमण्डः । पुं । पितृहीने । छोंडा छोरा इत्यादिभाषा ॥ इत्युणादिकोषः ॥

छेलकः । पुं । छागे ॥

छेलिका । स्त्री । अजायाम् । छाग्याम् ॥

छल्लुः । पुं । सोमराज्याम् ॥

छैदिकः । पुं । वेतसे ॥ छिन्नप्ररूढत्वात् छेदं नित्यमर्हति छेदादिभ्यो नित्यमितिठञ् ॥

छोटिका । स्त्री । तर्ज्जन्यङ्गुष्ठशब्दे । अङ्गुलिध्वनौ ॥

छोटी । पुं । कैवर्त्ते । धीवरे ॥

छोरणम् । न । परित्यागे । छोडना इति भाषा ॥ इतित्रिकाण्डशेषः ॥

छोलङ्गः । पुं । मातुलुङ्गे । टावानेबु इतिगौड भाषा ॥

छोहारा । स्त्री । द्वीपान्तरखर्जूरिकायाम् ॥ खर्जूरी गोस्तनाकारा परद्वीपादिहागता । जायते पश्चिमे देशे सा छोहारेतिकीर्त्यते ॥

जः

जः । पुं । जकारे ॥ मृत्युञ्जये ॥ जन्मा

म् ॥ तातमाचे ॥ जनार्दने ॥ वेगे ॥ भुक्तौ ॥ विषे ॥ गुरुमध्यगे(।ऽ।) ॥ त्रि। वेगिते ॥ जेतरि॥ आयते। जनी०। अन्येभ्योपिदृश्यतइतिडः ॥

जकुटः । पुं । मलयाचले ॥ शुनि ॥ ॥ न । वार्त्ताकुपुष्पे ॥

जक्षणम् । न । भक्षणे ॥

जक्षिः । स्त्री । भोजने ॥

जगच्चक्षुः । पुं । सूर्ये ॥

जगत् । पुं । वायौ ॥ त्रि । जङ्गमे ॥ न । विश्वस्मिन् । लोके । सचराचरे प्रपञ्चभूते भोगोपयोगिपरिकरसहिते मायामये जन्तुचक्रे ॥ यथा । न निरूपयितुं शक्या विस्पष्टं भासते चया । सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे ॥ स्पष्टं भातिजगच्चेदमशक्यं तन्निरूपणम् । मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ॥ यथा। यदुपतेः क्वगता मथुरापुरी रघुपतेः क्वगतोत्तरकोशला । इति विचिन्त्य कुरुष्व मनःस्थिरं न सदिदं जगदित्यवधारयेति रूपसनातन गोस्वामिनौ ॥ गच्छति । गम्लृ-गतौ । द्युतिगमिजुहोतीनांद्वेचेति क्विपि द्वित्वे गमःक्वावितिमलोपे तुकि जगत् जगतौ । यद्वातु वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेति व्युत्पा

द्यते तद्। उगिदचामिति नुमि जगन् जगन्ता विद्यादिबोध्यम् ॥ साम विशेषे ॥

जगती । स्त्री । भुवने । लोके । जगति ॥ च्चायाम् ॥ जने ॥ जम्बूवप्रे ॥ वास्तुविशेषे ॥ छन्दोविशेषे । द्वादशाक्षरायांहस्तौ ॥ गच्छति । गम्लृ०। वर्त्तमाने पृषदिति साधुः । शतृवद्भावादुगितश्चेतिङीप् ॥ यद्वा । द्युतिगमिजुहोतीनां द्वेचेति क्विप् । गमः क्वावितिमलोपे तुक् ॥

जगतीधरः । पुं । भूधरे ॥ जगत्याः धरः ॥

जगत्कर्त्ता । पुं । ब्रह्मणि ॥ जगतः कर्त्ता ॥

जगत्पतिः। पुं। परमेश्वरे। हिताहितोपदेशकवेदप्रणेतृत्वेन सर्वस्य जगतः पालयितरि ॥ जगतां पतिः ॥

जगत्प्रभुः । पुं । नारायणे ॥ जगत् जङ्गमाजङ्गमम् तस्यप्रभुः स्वामी ॥ बुद्धे ॥

जगत्प्राणः । पुं । समीरणे । वायौ ॥ जगतां प्राणः ॥

जगत्साक्षी । पुं । सूर्ये ॥ जगतांसाक्षी॥

जगदम्बा । स्त्री । जगज्जनन्याम् । गौर्याम् । पार्वत्याम् ॥ जगतामम्बा ॥

जगदम्बिका । स्त्री । दुर्गायाम् ॥

जगद्धात्री । स्त्री । दुर्गाप्रभेदे ॥

जगदाधारः । पुं । वायौ ॥ काले ॥ त्रि । जगतामाश्रये ॥ जगताम् आधारः ॥

जगदीशः । पुं । विष्णौ ॥ जगतामीशः ॥

जगद्गौरी । स्त्री । मनसादेव्याम् ॥

जगद्बलः । पुं । वायौ ॥ जगतो बलं येन ॥

जगद्योनिः । पुं । सदाशिवे ॥ विधातरि ॥ विष्णौ ॥ स्त्री । प्रकृतौ ॥ भूमौ ॥ जगतो योनिः ॥

जगद्रूपम् । न । नामरूपात्मके विश्वस्मिन् ॥ अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥

जगद्वहा । स्त्री । धरित्र्याम् ॥

जगद्विनाशः । युगान्ते ॥ जगतां विनाशो यस्मिन् जगत्याः विनाशः ॥

जगनुः । पुं । जन्तौ ॥ वैश्वानरे ॥

जगन्नाथः । पुं । विष्णौ ॥ पुरुषोत्तमक्षेत्रे । उड्यानपीठस्थे भैरवे ॥ उड्यानेविमलाक्षेत्रे जगन्नाथस्तु भैरवः । त्यागमशास्त्रम् ॥ शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् । कलेर्दश सहस्रान्ते ययौ त्यक्त्वा हरेः पदमिति ब्रह्मवैवर्त्तम् ॥ वैशाखस्यामले पक्षे अष्टम्यां पुष्ययोगतः । कृता प्रतिष्ठा भो विप्राः शोभने गुरुवासरे ॥ कृता ब्रह्मणा विशेषः ॥ स्कन्दापद्मे च स्थिहरे

निवेदितं नियोजयेद् यः पितृदेवकर्मसु । तृप्यन्ति तस्मै पितरः सुराश्च प्रयान्ति लोकं मधुसूदनस्येति महाप्रसादमाहात्म्यस्थं वचनम् ॥

जगन्निवासः । पुं । जगतामाधारे सर्वाश्रये परात्मनि ॥ जगतां निवासः ॥

जगन्नुः । पुं । जगन्वर्षे ॥

जगरः । पुं । कवचे । सन्नाहे ॥ जगता गृह्यते । प्रातिपदिकाद्धात्वर्थे इति णिच् । बाहुलकाद्दरः । जागर्त्ति । अच् । पृषोदरादिर्वा ॥

जगलः । पुं । मदनद्रुमे ॥ मेदके । सुराकल्के ॥ पिष्टमद्ये ॥ त्रि । धूर्त्ते । कितवे ॥ भृशं गलति गल्यते वा । गल अदने । यङ्लुगन्तात् अच् । संज्ञापूर्वकत्वाद्दीर्घो ऽकित इति न दीर्घः ॥

जग्धम् । त्रि । भुक्ते । भक्षिते ॥ अद्यते स्म । अद॰ । क्तः । अदो जग्धिर्ल्यप्ति किति इति जग्धिः । इकार उच्चारणार्थः । धत्वम् । झरो झरि सवर्णे ॥

जग्धतृणः । त्रि । भक्षिततृणे ॥ जग्धं तृणमनेन ॥

जग्धिः । स्त्री । विघसे । भोजने । जेमने ॥ अदनम् । अद॰ । स्त्रियां क्तिन् । अदो जग्धिर्ल्यप्ति किति ॥

जघनम् । न । स्त्रियः श्रोणिपुरोभागे

॥ कटौ ॥ हन्यते । हन्तेः शरीराव
यवेद्वेचेत्यच् ॥ यद्वा । वक्रं हन्ति ।
यङ्लुगन्तादच् । अनित्यमागमशा-
सनमित्यभ्यासस्यनुगतोऽनुनासिका-
न्तस्येतिनुक् न ॥

जघनकूपौ । पुं । कुकुन्दरयोः ॥ द्विव
चनान्तोयमिति हलायुधः ॥

जघनचपला । स्त्री । मात्रावृत्तेष्वार्या-
प्रभेदे ॥ यथा । प्राक्प्रतिपादितम
र्द्धे प्रथमेचरमेदलेतुचपलायाः । स
ल्माश्रयेत सोक्ता विशुद्धधीभि र्जघ
नचपला ॥ यथा । कृष्णः शृङ्गारपटु
र्यौवनमदचञ्चलः सुललिताङ्गः ।
आसीद्व्रजाङ्गनानां मनोहरोजघ
नचपलानामिति ॥

जघनेफला । स्त्री । काकोदुम्बरिका
याम् । कटुम्बरी इति भाषा ॥ जघ
नेफलमस्याः । अमूर्द्धेतिसप्तम्याः अ
लुक् ॥

जघन्यः । त्रि । चरमे ॥ गर्हिते ॥ ध-
र्मार्थकामाः सममेवसेव्या योह्येक
सक्तः सजनोजघन्यः ॥ अल्पे ॥ पुं ।
शूद्रे ॥ न । मेहने । शिश्ने ॥ अश्ले
षा शतभिषा आर्द्रा स्वातिः ज्येष्ठा
भरणी एषु नक्षत्रेषु ॥ जघनेभवः ।
दिगादित्वात् यत् शरीरावयवत्वा
द्वा ॥ यद्वा । कुटिलं हन्यते । हन्ते
र्यङ्लुगन्तादचोयत् । अनित्यमागम
शासनमिति नुगतोऽनुनासिकान्त-
स्येति ननुक् ॥ जघनमिवबा ।-
शा० यः ॥

जघन्यजः । पुं । स्त्री । वृषले । शूद्रे ॥
त्रि । कनिष्ठे ॥ जघन्येऽवरकाले जा
तः । सप्तम्यांजनेर्डः ॥ जघन्यात् त्या
ज्यात् जातः । जनी० । पञ्चम्यामजा
ताविति डः ॥

जघन्यभम् । न । जघन्यसंज्ञकेषु ष
ट्सु नक्षत्रेषु ॥ जघन्यञ्चतत्भञ्च ॥

जघ्निः । पुं । हननयोग्यास्त्रे ॥

जघ्नुः । त्रि । घातके । हन्तरि ॥ हन्ति
। हन० । कुर्भश्चेतिचकारात् अन्य
तोपि कुर्द्दातोर्द्वित्वञ्च ॥

जङ्गमः । त्रि । स्थावरेतरे । चरे । च
रिष्णौ ॥ वक्रंगच्छति । गत्यर्थानां
नित्यंकौटिल्यइति यङ्भृशार्थे वा-
। पचाद्यच् ॥

जङ्गमकुटी । स्त्री । छत्रे ॥ वारित्रा-
याम् ॥

जङ्गमगुल्मः । पुं । प्रचारिपदातिसमू
हे । गस्त इति भाषा ॥

जङ्गमेतरः । त्रि । स्थावरे ॥

जङ्गलः । पुं । न । पिशिते ॥ त्रि । नि
र्जनस्थाने ॥ वनप्रधानदेशे ॥

जङ्गालः । पुं । सेतौ ॥ देशविशेषे ।

जंगलादिति ख्याते ॥ इति जटाधरः ॥

जङ्घलम् । नं । विषे ॥ इतिचिकाण्डशेषः ॥

जङ्घन्यमानः । त्रि । अतिशयेन हन्यमाने । भृशंपीड्यमाने ॥

जङ्घा । स्त्री । प्रसृतायाम् । गुल्फोर्द्ध जान्वधोभागे । टङ्गायाम् । टांग जांघ इतिच भाषा ॥ जायन्ते रोमाण्यस्याम् । जनी॰ । अच् । तस्य जङ्घ च ॥ यद्वा । जङ्घन्यते कुटिलं गच्छति । हन्तेर्यङ्लुगन्तात् अन्येभ्योपीति-ड: ॥ टाप् ॥

जङ्घाकरिकः । त्रि । धावके । जाङ्घिके । जङ्घाजीविनि ॥ जङ्घामाध्यस्थानु पचारात् गतिर्जङ्घा । सैवकरो रा-जदेयो भागः आकरः श्रेष्ठो वा । जङ्घाकरोऽस्यास्ति । अतइनिठनाविति ठन् ॥ जङ्घेव करीहस्ती यस्येति वा । कन् ॥

जङ्घात्राणम् । न । जङ्घासन्नाहे । मञ्चुगो ॥

जङ्घालः । त्रि । वेगिनि । अतिजवे ॥-अतिशयिता जङ्घास्य ॥ सिध्मादित्वा ल्लच् ॥ पशुविशेषाणांगणे ॥ हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशम्बराः । राजीवोपिच मुण्डीचेत्याद्या जङ्घालसंज्ञकाः ॥ हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः । कुरङ्गईष-त्ताम्रः स्याद्धरिणाकृतिकोमहान् ॥ ऋष्यो नीलाण्डको लोके स रोझ इतिकीर्त्तितः । पृषतश्चन्द्रबिन्दुः स्याद्धरिणात्किञ्चिदल्पकः । न्यङ्कुर्बहुविषाणोथशम्बरोगवयान् महान् । राजीवस्तुमृगोज्ञेयोराजीभिः परितोवृतः ॥ योमृगः शृङ्गहीनः स्यात् समुण्डीति निगद्यते ॥ जङ्घालाः प्रायशः सर्वेपित्तश्लेष्महराः स्मृताः । किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥

जङ्घिलः । त्रि । जङ्घाले ॥ अतिशयिते जङ्घेऽस्य । पिच्छादित्वात् इलच् ॥

जजः । पुं । योधे ॥ जजति । जजयुद्धे । पचाद्यच् ॥

जञ्जपूकः । त्रि । वाचाले ॥ पुनःपुनर्भृशंवा गर्हितं जपति तच्छीलः । यजजपदशांयङ इत्यूकः

जञ्जभ्यमानः । त्रि । गात्रविनामेन विदारितमुखेपुरुषे ॥ इति कर्ममीमांसा ॥

जटा । स्त्री । केशविकारे । लग्नकचे । व्रतिनः शिखायाम् । सटायाम् ॥ जायते जन्यतेवा । जनेष्टन्लोपश्चेति टन् धातोरन्त्यस्य लोपश्च ॥ मूले । शिफायाम् । जड इति भाषा ॥ मांस्याम् ॥ वेदपाठविशेषे ॥ सामगा-

नोपकरणे ॥ रुद्रजटायाम् ॥ शताव र्याम् ॥ जटति । जटसङ्घाते । अच् । टाप् ॥ जटाऽस्त्यस्याः । अर्शआद्यच् ॥

जटाजूट: । पुं । जटासमूहे ॥ जटा नां- जूटोबन्ध: ॥

जटाज्वाल: । पुं । प्रदीपे ॥

जटाटङ्क: । पुं । शिवे ॥ जटायांटङ्को- यस्य ॥

जटाटीर: । महादेवे । शिवे ॥

जटाधर: । पुं । महेश्वरे ॥ बुद्धभेदे ॥ ध रति । धृञ्० । पचाद्यच् । जटानांध र: ॥ त्रि । जटाधारिणि ॥ जटाधर: सन् जुहुधीह पावकम् ॥

जटामांसी । स्त्री । नलदे । मांस्याम् । सुगन्धिद्रव्यविशेषे ॥

जटायु: । पुं । अरुणपुत्रे सम्पातेः क नीयसि दशरथसखे गृध्रविशेषे ॥ ॥ जटांयाति प्राप्नोति । या० । मृ० कु: ॥ गुग्गुलौ ॥

जटायुध: । पुं । गुग्गुलौ ॥

जटायु: । पुं । जटायौ ॥ गुग्गुलौ ॥ जटाआयुरस्य ॥

जटाल: । पुं । कर्पूरे ॥ गुग्गुलौ ॥ मु- ष्कके ॥ वटे ॥ त्रि । जटाधरे । जटा वति ॥ जटाऽस्त्यस्य । प्राणिस्थादा- तोलजन्यतरस्याम् ॥

जटाला । स्त्री । जटामांस्याम् ॥ टाप् ॥

जटावान् । त्रि । जटिले ॥

जटावती । स्त्री । जटामांस्याम् ॥

जटावल्ली । स्त्री । गन्धमांस्याम् ॥ रुद्र जटायाम् ॥

जटि: । पुं । प्लक्षद्रुमे ॥ जटायाम् ॥ स मूहे । जटति । जट० । सर्वधातुभ्य इन् ॥

जटित: । त्रि । खचिते ॥

जटी । पुं । प्लक्षागमे । पाकरि इति भाषा ॥ सर्पविशेषे ॥ त्रि । जटायुक्ते ॥ मत्वर्थे व्री० इनि: ॥

जटिल: । पुं । जटावति ब्रह्मचारिप्रभे दे ॥ सिंहे । केशरिणि ॥ त्रि । जटा युक्ते ॥ यथा । यश्चिन्तितं तदिह दूर तरं प्रयाति यच्चेतसा नगणितं तदि हाभ्युपैति । प्रातर्भवामि वसुधाधि पचक्रवर्त्ती सोऽहं व्रजामि विपिने- जटिल स्तपस्वीति ॥ जटाऽस्त्यस्य । - पि० इलच् ॥

जटिला । स्त्री । जटामांस्याम् ॥ पिप्प ल्याम् ॥ वचायाम् ॥ दमनकवृक्षे ॥ राधिकाश्वश्र्वाम् ॥ टाप् ॥

जटी । स्त्री । प्लक्षवृक्षे ॥ जटामांस्याम् ॥ कृदिकारादिति ङीष् ॥

जटुल: । पुं । पिप्लौ । देहस्थेकृष्णलक्ष्म णि । जडुल इति भाषा ॥ जटति । जट० । बाहुलकादुलच् ॥

जठरः । पुं । न । कुक्षौ ॥ त्रि । वृद्धे ॥ कर्कशे । कठिने ॥ जायतेऽस्मिन् जन्तुर्मलो वा । जनेररष्ठचेत्यरः । पृषोदरादिः ॥

जठरनुत् । पुं । आरग्वधे ॥

जठरामयः । पुं । जलोदररोगे ॥

जडः । पुं । स्वनाम्ना प्रसिद्धे पुरुषे ॥ यथा । इष्टं वाऽनिष्टं वा सुखदुःखं वा न वेत्ति यो मोहात् । परवशगः स भवेदिह नाम्ना जडसंज्ञकः पुरुष इति ॥ वेदग्रहणासमर्थे । मूर्खे ॥ न । वारिणि ॥ सीसके ॥ त्रि । हिमग्रस्ते ॥ मूके ॥ अप्रज्ञे । बुद्धिविकले ॥ अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत् ॥ अनुद्यमे ॥ जलति घनीभवति । जलघातने । अच् । डलयोरेकत्वम् ॥

जडक्रियः । त्रि । चिरक्रिये । दीर्घसूत्रिणि ॥ जडा क्रिया यस्य ॥

जडता । स्त्री । जाड्ये । सैमिष्ये । अपाटवे ॥ विरहदुःखेन जीवनमात्रस्थितौ ॥

जडभरतः । पुं । ऋषभपुत्रे । राजनि ॥ यन्नाम्नेदं भारतं वर्षमभूत् ॥

जडा । स्त्री । शूकशिम्ब्याम् ॥ भूम्यामलक्याम् । अम्बायाम् ॥ जडयति । तत्करोतीति णिजन्तात् अच् । टाप् ॥

जडिमा । पुं । जडतायाम् ॥ यथा । इष्टाऽनिष्टापरिज्ञानं यत्र प्रश्ने ष्वऽनुत्तरम् । दर्शनश्रवणाभावो जडिमा सोऽभिधीयते ॥ जडस्य भावः । इमनिच् ॥

जडुलः । पुं । जटुले ॥ जलति । जल । बा० उलच् । डलयोरैक्यम् ॥

जतु । न । अलक्ते । लाक्षायाम् ॥ जायते । जनी० । फलिपाटीत्यु: तोऽन्तादेशश्च ॥

जतुकम् । न । हिङ्गुनि ॥ लाक्षायाम् ॥ जटुले ॥ जत्विव । इवे प्रतिकृताविति कन् ॥

जतुका । स्त्री । अजिनपत्रायाम् । चर्मचटिकायाम् ॥ गन्धद्रव्यविशेषे । जन्याम् ॥ पर्पट्याम् ॥ मालवदेशप्रसिद्धे लताविशेषे । तिर्यक्फलायाम् । निशान्धायाम् । जनेष्टायाम् ॥ कन्नन्तात् टाप् ॥

जतुकारी । स्त्री । जतुकालतायाम् ॥

जतुकृत् । स्त्री । जयम । चक्रवर्त्तिन्याम् । गन्धद्रव्यविशेषे । चकवत इति भाषा ॥ जतु करोति । क्विप् ॥

जतुकृष्णा । स्त्री । पर्प्ट्याम् ॥

जतुनी । स्त्री । चर्मचटिकायाम् ॥

जतुपुत्रकः । पुं । नये । द्यूतोपकरणविशेषे । पाशकगुटिकायाम् ॥

जतुमणिः । पुं । क्षुद्ररोगविशेषे ॥ यथा । समनुन्नतमरुजं मण्डलकफर क्तजम् । सहजं लक्ष्मचैकेषां लक्ष्यो जतुमणिस्तु सः ॥ इतिनिदानम् ॥

जतुरसः । पुं । अलक्तके ॥

जतुका । स्त्री । अजिनपत्रायाम् ॥ जनीवृक्षे । चकवत इतिभाषाप्रसिद्धे ॥ जायते आरोग्यमनया । जनी० । उलूकादयश्चेति निपातनात् क्वचिदकिङि स्यपिनलोपः ॥

जत्रु । न । स्कन्धवक्षयोः सन्धौ । कण्ठस्याधोभागे स्थितयोरस्थ्नोः ॥ कक्षयोर्वक्षसः सन्धौ जत्रुणी समुदाहृते ॥ जायते बाहुरस्मात् । जनी० । जत्र्वादित्वात् रुप्रत्ययोनकारस्य तकारश्च ॥

जत्रुकम् । न । शिश्वरजतुनि ॥

जनः । पुं । लोके ॥ पृथग्जने । पामरे ॥ शास्त्रीयविवेकहीने ॥ महर्लोकोर्द्ध्वलोके ॥ जनोऽष्टकोऽव्यवच्छिन्नः पितृवर्ज्जनाश्रयः ॥ जननं जनः जन्म । भावेघञ् । जनिवध्योश्चेतिनवृद्धिः ॥ समुद्रस्य दैत्यविशेषेषु ॥ माकन्राक्ये मुनौ ॥

जनकः । पुं । पितरि ॥ मिथिलाधिपेविदेहे ॥ कारणे ॥ जनयति । जनीप्रादुर्भावे । ण्वुल् । जनिवध्यो

श्चेतिन वृद्धिः ॥ पि । उत्पादयितरि ॥

जनकतनया । स्त्री ।
जनकनन्दिनी । स्त्री । } सीतायाम् ॥

जनकराजकूपः । पुं । तीर्थविशेषे ॥

जनकसुता । स्त्री । जानक्याम् ॥

जनकात्मजा । स्त्री । श्रीरामपत्न्याम् । सीतायाम् ॥ जनकस्य आत्मजा ॥

जनकारी । पुं । अलक्तके ॥ नाम्नोऽयम् ॥ इतिराजनिर्घण्टः ॥

जनङ्गमः । पुं । चण्डाले ॥ अधार्मिकान् जनान् गच्छति । जनेभ्यो गच्छतिवा । गमश्चेति खच् मुमागमः ॥

जनता । स्त्री । जनानां समूहे ॥ ग्रामजनबन्धुभ्यस्तल् । तदन्तः स्त्रियाम् ॥ जनत्वे ॥ भावेतल् ॥

जननम् । न । वंशे ॥ जन्मनि ॥ जन्यते । जनी० जनजनने वा । स्वार्थः । कर्मणिल्युट् ॥ दीक्षयाध्वरेय जमानस्यजन्मनि ॥ पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति ये दीक्षयन्तीत्यादिश्रुतेः । मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने । तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनादितिमनुस्मृतेश्च ॥

जननिः । स्त्री । जनीनामगन्धद्रव्ये ॥

जननी । स्त्री । मातरि । प्रस्वाम् ॥ दयायाम् ॥ कटुकायाम् ॥ मञ्जिष्ठायाम् ॥ अलक्तके ॥ जटामांस्याम् ॥

जनीनामजनम्बद्धये ॥ जनयति । जनीं। कृत्यल्युटो बहुलमितिल्युट्। टित्वात् ङीप् ॥

जनपदः। पुं। देशे। नीवृति ॥ जनःपदं वस्तु यत्र ॥ जने ॥

जनपदी। पुं। जनपदस्वामिनि ॥

जनप्रवादः। पुं। कौलीने। वचनीयतायाम्। लोकापवादे ॥

जनप्रियः। पुं। धान्यके ॥ शोभाञ्जने ॥ त्रि। जनानां प्रीतिविषये ॥

जनमेजयः। पुं। परीक्षितराजस्य पुत्रे। पारीक्षिते ॥ पुरुराजपुत्रे ॥ जनमेजयति। खश्प्रत्यये: कर्त्तरि खश्। अरुद्विषदजन्तस्य मुम् ॥

जनयिता। पुं। ताते। पितरि ॥ जनयति। जनी। तृच् ॥

जनयित्री। स्त्री। जनन्याम्। मातरि ॥ तृजन्तात्। ऋन्नेभ्यो ङीप् ॥

जनरवः। पुं। लोकवादे ॥ यथा। परीवादस्तथ्यो भवति वितथो वापि महतां तथा प्युच्चैर्धाम्नां हरति महिमानं जनरवः। तुलोत्तीर्णस्यापि प्रकटनिहताशेषतमसो रवेस्तादृक्-तेजो नहि भवति कन्यां गतवतः ॥ इति सल्लापसेन: ॥

जनलोकः। पुं। महर्लोकोपरिभुवने। जनलोकः स्थितेरूर्ध्वं मेककोटि

प्रमाणतः। कोटिद्वयेन संख्यातो जनोभूर्लोकतोऽधमे: ॥ निवसन्त्यमला यत्र मानसा ब्रह्मणः सुताः। सनन्दनाद्या योगीन्द्राः सर्वे तेऽपूर्ध्वरेतस इति काशीखण्डम् ॥

जनवल्लभः। पुं। श्वेतरोहितवृक्षे ॥ त्रि। लोकप्रिये ॥

जनवादः। पुं। जनप्रवादे ॥

जनवार्त्ता। स्त्री। लोकानां किंवदन्त्याम् ॥

जनश्रुतिः। स्त्री। सर्वजनगतसाधारणलोकप्रसिद्धौ। किंवदन्त्याम् ॥ जनेभ्यः श्रूयते। श्रु श्रवणे। क्तिन् ॥

जनस्थानम्। न। दण्डकारण्ये ॥ दण्डकारण्यस्यान्तिके स्थानविशेषे ॥

जनातिगः। त्रि। लोकातिशयिनि ॥ जनमतिगच्छति। गम०। अन्यत्रापीति डः ॥

जनान्तः। पुं। देशे। जिला इति पारस्य भाषा ॥ इति धनञ्जयः ॥

जनान्तिकम्। न। अप्रकाशे। अगोचरे ॥ त्रिपताकाकरेणाऽन्यानपवार्य्यान्तिके कथाम्। अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते जनान्तिकम् ॥

जनार्द्दनः। पुं। नारायणे। विष्णौ ॥ सर्वैःसाधुभिर्जनैः स्वाभिलषिताभ्युदयनिःश्रेयससिद्धये अर्द्यते याच्यते

इति जनुत्पत्तौ अर्दतेर्यान्तात् कृत्यल्युटो बहुलमिति कर्मणि ल्युट् ॥ यद्वा । जननं जनः जन्म । तमर्दय ति इति जनार्दनः । अर्द हिंसायाम् । नन्द्यादित्वाल्ल्युः ॥ जनाःसमुद्रस्थादैत्यभेदाः तेषामर्दन इति वा ॥ जनान् दुर्जनान् अर्दयति हिनस्ती तिवा ॥

जनाशनः । पुं । वृके ॥

जनाश्रयः । पुं । मण्डपे ॥ जनानांलोकाना माश्रयः ॥

जनिः । स्त्री । उत्पत्तौ । अभूतप्रादुर्भावे ॥ नाऽसतो जन्मनायोगः सतः सत्त्वान्नचेष्यते । कूटस्थे विक्रिया नास्ति तस्माद् भ्रान्ततोजनिः ॥ जननम् । जनी० । जनिघसिभ्यामिण् । जनिवध्योश्चेति वृद्धिनिषेधः ॥

जनितः । त्रि । उत्पादिते ॥

जनित्वः । पुं । पितरि ॥ जायतेऽस्मात् । जनी० । जनिदेच्यादिना जनेरित्वन् । जनित्वौ मातापितरौ ॥

जनित्वा । स्त्री । मातरि ॥ टाप् ॥

जनिनीलिका । स्त्री । महानील्याम् ॥

जनिमा । पुं । जन्मनि ॥ जायते । जनी० । जनिमृङ्भ्यामिमनिच् ॥

जनी । स्त्री । सीमन्तिन्याम् ॥ वध्वाम् । जतुकायाम् ॥ जायते गर्भेऽ स्यां वा ऽस्याम् ॥ उत्पत्तौ ॥ ओषधीभेदे । जतूकायाम् ॥ जायते आरोग्यमन या । जनी० । जनिघसिभ्यामितीण् । जनिवध्योश्चेति नवृद्धिः । कृदिकारादितिङीष् ॥

जनुः । न । जन्मनि ॥ जननम् । जनी० । जनेरुसिः ॥

जनूः । स्त्री । जनने । जन्मनि ॥

जनेष्टः । पुं । मुद्गरवृक्षे ॥

जनेष्टा । स्त्री । जतुकायाम् ॥ जातीपुष्पे ॥ वृद्धिनामौषधौ ॥ हरिद्रायाम् ॥

जनोदाहरणम् । न । यशसि ॥

जनौः । पुं । जनरक्षके ॥ जनान् अव ति । अव० । क्वोरित्यूठ् । वृद्धिः । ग्लौवत् ॥

जन्तुः । पुं । प्राणिनि । जननशीले ॥ अविद्यादि हृदयग्रन्थिभिर्युते संसारिणि । वस्तुस्वरूपादर्शिनि ब्रह्मादिस्त म्बपर्यन्ते प्राणिजाते ॥ जायते । जनी० । कमिमनिजनीति तुः ॥

जन्तुकम्बुः । पुं । कृमिशङ्खे ॥

जन्तुका । स्त्री । नाडीहिङ्गुनि । राम ठ्याम् ॥ लाक्षायाम् ॥

जन्तुघ्नः । पुं । बीजपूरे ॥ न । विडङ्गे ॥ हिङ्गुनि ॥ त्रि । जन्तुघातिनि ॥

जन्तुघ्नी । स्त्री । विडङ्गे ॥

जन्तुनाशनम् । न । हिङ्गुनि ॥ विडङ्गे ॥

जम्ब

जम्बुपादपः । पुं । कोषाम्रवृक्षे ॥
जम्बुफलः । पुं । उदुम्बरे ॥ जम्बवः फलेऽस्य
जम्बुमारी । स्त्री । निम्बूके ॥
जम्बुला । स्त्री । काश्मर्य्ये ॥
जम्बुवल्ली । स्त्री । पिडङ्गे ॥
जम्भः । पुं । न । जन्मनि ॥ जननम् । इ
षुयुधीति बाहुलकात् जनेर्मक् ॥
जम्मकीलः । पुं । हरौ ॥
जम्मदः । पुं । पितरि ॥
जम्मदा । स्त्री । मातरि ॥
जम्म । न । आत्मशरीरसम्बन्धे । उत्पत्तौ
। जनने । शुभाशुभकर्मवशात् पौनः
पुन्येनतत्तद्विविधयोनिषूद्भवे । गर्भ
वासयोनिद्वारनिःसरणरूपे विग्रह
भेदग्रहणे ॥ वासना कर्म विपाकचयं
जन्मप्रयोजकम् ॥ उक्तञ्च सारकलि
कायाम् । गर्भात् कोटिगुणं दुःखं
योनियन्त्रनिपीडने । संमूर्च्छितस्य
जठराज्जायमानस्य देहिनः ॥ जाय
मानः पुरीषासृङ्मूत्रशुक्राविलान
नः । प्राजापत्येन वातेन पीड्यमाना
स्थिबन्धनः ॥ अधोमुखो वैक्रियतेप्र
बलैः सूतिमारुतैः । क्लेशान्निष्क्रा-
न्तिमायातिजठरान्मातुरातुर इति
॥ प्रेत्यभावे ॥ सच अपूर्वदेहेन्द्रि
यादिसम्बन्धः । निकायविशिष्टाभिर
पूर्वाभिर्देहेन्द्रिय मनो ऽहङ्कारबुद्धि

जन्मी

वेदनाभिः पुरुषस्याभिसम्बन्धो जन्म
। नतु पुरुषस्य परिणामः तस्यापरि
णामित्वात् । जन्माद्य स्यतः सत्त्वं
किन्तु देहेन संयुतिः । प्रादुर्भावो
जनेरर्थः सतएवसयुज्यतेऽस्यसूक्तः ॥
प्रथमतारायाम् ॥ जननम् जायते-
वा । जनी । मनिन् ॥
जन्मबन्धविनिर्मुक्तः । त्रि । जन्मात्मके
न बन्धेन विश्लेषेणात्यन्तिकत्वरूपता
न निरवशेषंत्यक्ते ॥
जन्ममासः । पुं । जन्मनोमासे ॥ आर
भ्य जन्मदिवसं यावत् त्रिंशद्दिनं भवे
त् । जन्ममासः स विज्ञेयो वर्जितः
सर्वकर्मसु ॥
जन्मर्क्षम् । न । जन्मनो नक्षत्रे ॥
जन्मवर्त्म । न । योनौ । भगे ॥ जन्म
नोवर्त्म ॥
जन्मान्तरम् । न । परलोके । भवान्त-
रे । जन्मन ॥
जन्माष्टमी । स्त्री । श्रीकृष्णस्य जन्मति
थौ ॥ सातुमुख्यचान्द्रेण श्रावणस्य-
कृष्णाष्टमी । गौणचान्द्रेण भाद्रस्य कृ
ष्णाष्टमी ॥ अथ भाद्रपदे मासि कृ
ष्णाष्टम्यां कलौयुगे । अष्टाविंशति
मे जातः कृष्णोऽसौदेवकी सुतः ॥
जन्मी । पुं । प्राणिनि ॥ जन्मोऽस्या
स्ति । अतइनिः ॥ जन्मनाऽस्याष्टिवा ॥

व्री० इति ॥

जन्मेजयः । पुं । जनमेजये राज्ञि ॥ जन्मनैवाभिमुखेन शत्रूनेजितवान् यतः । एजृकम्पने धातोर्हि जन्मेजय इति श्रुत इति निरुक्तिः ॥ शकन्ध्वादित्वात् पररूपम् ॥

जन्यः । पुं । जनके ॥ न । हट्टे ॥ परीवादे । कौलीने ॥ युधि । सङ्ग्रामे ॥ त्रि । उत्पाद्ये ॥ जनकस्य स्वभावोऽपि जन्ये तिष्ठति निश्चितम् । यथा श्रीकृष्णपादाङ्कं कालीयवंशमस्तके ॥ नवोढाज्ञातिमित्रभृत्येषु ॥ नववरस्य ज्ञातिमित्रभृत्येषु ॥ वरस्निग्धे । जामातृवत्सले ॥ देहे ॥ जननम् । जनेर्यक् ॥ जायते वा । भव्यगेये तिसाधुः ॥ यद्वा । जायते जनयति वा । अचो यत् तकिशसिचतियतिजनिभ्यो यद्वाच्यः । जनेर्यद्विधिः स्वरार्थः । अहन्लोपर्यदिति यतापि रूपसिद्धेः । नच वृद्धिप्रसङ्गः जनिवध्योश्चेति निषेधात् ॥ जनस्य जल्पः मतजनहलादितियत् ॥ यद्वा । जनीं वधूं वहति प्रापयति । संज्ञायामिति साधुः ॥

जन्या । स्त्री । मातृवयस्यायाम् ॥ मुदि । प्रीतौ ॥ जायतेऽस्याम् । जनयति वा । ण्यदन्तात् यदन्ताद्वा टाप् ॥

जन्युः । पुं । प्राणिनि ॥ अग्नौ ॥ धातरि । परमेष्ठिनि ॥ जायते । जनी० । यजिमनिशुन्धिदसिजनिभ्यो युच् ॥

जपः । पुं । श्रुतिमन्त्राद्यावृत्तौ ॥ जपस्तद्भाषणं ध्येयसम्मुखीकरणं मुने । मानसस्यान्तःसञ्जल्परूपस्य उपांशुसंज्ञकस्य च स्वसंवेद्यलघुध्वनेर्भाष्यस्य च श्रूयमाणस्य मन्त्रस्य ध्येयसम्मुखीकरणायावर्त्तने ॥ मन्त्रार्थध्याने जपस्य फलजनकत्वमुक्तं तन्त्रशास्त्रे । यथा । यथा पशुर्भारवाही न तस्य भजते फलम् । तथैवार्थानभिज्ञो न जपस्य फलमश्नुत इति ॥ स्वाध्याये ॥ जपनम् जप्यते वा । जप मानसे च । व्यधजपोरनुपसर्गे इत्यप् ॥

जपनम् । न । जपे ॥

जपपरायणः । पुं । जपनशीले । जपासक्ते ॥

जपा । स्त्री । जवावृक्षे ॥ जपा सङ्ग्राहिणी केश्या त्रिसन्ध्या कफवातजित् ॥ जपति । जप० । पचाद्यच् । टाप् ॥

जप्यम् । त्रि । अघमर्षणादौ ॥ जप्यते । जप० । पोरदुपधादिति यत् ॥

जप्येश्वरः । पुं । सिद्धस्थानविशेषे ॥ यथा । जप्येश्वरे महास्थाने शङ्करी च त्रिशूलिनी । त्रिशूली शङ्करस्तत्र सर्वपापविमोचक इति ॥

जंवाला । स्त्री । सत्यकामस्य मातरि ॥

जमजः । त्रि । यमजे ॥

जमदग्निः । पुं । परशुरामपितरि । ऋचीकमुनिपुत्रे भृगुवंशजे यमदग्निमुनौ ॥

जमनम् । न । भोजने ॥ जमुअदने । ल्युट् ॥

जम्पती । पुं । सहोक्त्या जायापत्योः ॥ जाया च पतिश्च राजदन्तादिगणे पाठात् जायाशब्दस्य जमभावो निपात्यते ॥ नित्यं द्विवचनान्तः ॥

जम्बालः । पुं । शैवाले ॥ पङ्के ॥ जमति । जमु० । वाहुलकादालम् ॥ यद्वा । जम्ब अदने इति धातुः । भावे घञ् । जम्बं लाति । लादाने । आतोनुपेतिकः । पृ० ॥

जम्बालिनी । स्त्री । नद्याम् । शैवलिन्याम् ॥

जम्बीरः । पुं । जंभीरी इति जमट् इति च पर्वतीयभाषाप्रसिद्धे दन्तशठे । जम्भीरे । जम्भले ॥ जम्बीरमुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् । शूलकासकफक्लेशच्छर्दितृष्णामदोषजित् ॥ आस्यवैरस्यहृत्पीडा वह्निमान्द्यकृमीन् हरेत् । स्वल्पजम्बीरिका तद्वत्तृष्णाछर्दिनिवारिणी ॥ प्रस्थपुष्पे । मरुवा इति ख्याते ॥ अर्जके ॥ सितार्जके ॥ जम्यते । जमु० । गमभीरां

दयश्चेति ईरन्नन्तः साधुः ॥ यद्वा । जम्यते । विच् । वीरयति । वीर विक्रान्तौ । अच् । जम् चासौ वीरश्च ॥

जम्बुः । स्त्री । जामन इति प्रसिद्धे वृक्षे । सुरभिपत्रायाम् । नीलफलायाम् ॥ मेरुसरिति ॥ जम्बुद्वीपे ॥ जम्बुद्वीपं चितेर्नाभिस्तद्वृत्तं लक्षयोजनम् । क्षाराब्धिना परिवृतं परिवृत्तेन तावता ॥ न । जम्बूफले । जाम्बवे ॥ जमति । जमु० । अन्दृदृन्भूजम्बू इत्यादिना कू प्रत्ययो बुगागमश्च निपातितः । वाहुलकात् ह्रस्वः ॥ फले तु जम्ब्वाः फलम् । जम्ब्वा वेत्यणोऽभावे ओरञ् । फले लुक् । ह्रस्वो नपुंसके ॥

जम्बुकः । पुं । जम्बूकार्थेषु ॥ गोलापजाम इति गौडभाषाप्रसिद्धे वृक्षे ॥ श्योनाकप्रभेदे ॥ जमति । जमु० । मृगय्वादयश्चेति साधुः ॥ शृगाले ॥

जम्बुद्वीपः । पुं । न । भूमेः सप्तद्वीपान्तर्गते द्वीपविशेषे । जम्बूद्वीपे ॥

जम्बुमार्गः । पुं । तीर्थविशेषे ॥

जम्बुलः । पुं । जम्बूले ॥

जम्बुवनजम् । न । श्वेतजवापुष्पे ॥

जम्बूः । स्त्री । मेरुतरङ्गिण्याम् ॥ नागदमन्याम् ॥ जामन इति प्रसिद्धे वृक्षे । राजफलायाम् । सुरभिपत्राया

म् ॥ सा बृहत्क्षुद्रभेदेन द्विविधा । तत्र बृहत्याः पर्यायाः । महाजम्बूः महापत्रा राजजम्बूः बृहत्फला फलेन्द्रः नन्दः महाफला सुरभिपत्रा चेति ॥ विष्टम्भित्वं रोचनत्वं गुरुत्वञ्च फलेगुणाः ॥ क्षुद्रायाःपर्यायाः । सूक्ष्मकृष्णफला दीर्घपत्रा मध्यमा ॥ अथ वनजम्बूपर्यायाः । भूमिजम्बूः काकजम्बूः नादेयी शीतपल्लवा सूक्ष्मपत्रा जलजम्बुका ॥ फलगुणाः । जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहनुत् ॥ जम्ब्वाःफले । जम्बुनि । जाम्बवे ॥ जम्बूद्वीपे ॥ जमति । जमु० । जम्बूइनभू जम्बूकफेलूकर्कन्धूदिधिषूरित्युणादि सूत्रेण कूप्रत्ययोवुगागमश्च निपातितः ॥ जायते वा । जनेर्वा तौ तिनैवनिपातितौ ॥ फलेतु जम्ब्वाःफलम् । जम्ब्वा वेत्यणोऽभावपक्षे ओरञ् । तस्य लुप्चेतिलुप् । लुपियुक्तवत् ॥ जम्बुद्वीपे ॥

जम्बूकः । पुं । फेरवे । शृगाले ॥ नीचे ॥ पश्चिमाशापतौ । वरुणे ॥ गुलापजामनइति प्रसिद्धे फलवृक्षे ॥ श्योनाकप्रभेदे । जमति । जमु० । उलूकादित्वात् साधुः ॥

जम्बूका । स्त्री । काकलीद्राक्षायाम् । निर्बीजायाम् । रक्ताधिकायाम् ॥

जम्बूद्वीपम् । न । पुं । भूमेःसप्तद्वीपान्तर्गते द्वीपविशेषे ॥ यथा । भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनांनिवेशः ॥ इतिसिद्धान्तशिरोमणिः ॥ पुराणमतेनतु । अयंद्वीपः पद्मकोषमध्यवर्त्तिकोषइवलक्षयोजनविस्तीर्णः पद्मपत्रमिवसमवर्त्तुलः लक्षयोजनविस्तृतलवणसमुद्रेण वेष्टितः । यस्मिन् प्रत्येकनवसहस्रयोजनायामानि नववर्षाणितेषांवर्षाणामष्टौ सीमापर्वताःसन्तीति ॥

जम्बूलः । पुं । जम्बूविटपे ॥ केतकीवृक्षे । क्रमचच्छदे ॥ न । वरपक्षीयस्त्रीणांपरिहासवचने ॥

जम्बूलमालिका । स्त्री । कन्यावरयोर्मुखचन्द्रिकायाम् ॥ जम्बूलानांवरपक्षीयस्त्री परिहासवचनानांमालिका श्रेणी ॥ इतिहरिवंशटीकायांनीलकण्ठः ॥

जम्भः । पुं । दैत्यविशेषे ॥ दन्ते ॥ जम्बीरे ॥ भक्षणे ॥ अंशे ॥ हनौ ॥ तूणे ॥ जम्भयति । जभीगात्रविनामे । पचाद्यच् । रधिजभोरचीति नुम् ॥

जम्भकः । पुं । जम्भार्थेषु ॥ जभी० । खु लृट्चाविति ण्वुल् । नुम् ॥ स्वार्थे कोवा ॥

जम्भका । स्त्री । जृम्भायाम् ॥

जम्भगः । पुं । राक्षसविशेषे ॥

जम्भद्विट् । पुं । इन्द्रे ॥

जम्भभेदी । पुं । हरिहये । इन्द्रे ॥ जम्भमसुरंभेत्तुं शीलमस्य । सुप्यजातौणिनिस्ताच्छील्ये इति णिनिः ॥

जम्भरः । पुं । जम्बीरे ॥

जम्भलः । पुं । जम्बीरे ॥ बुद्धदेवताविशेषे ॥ जम्भयति । जभी० । वृषादित्वात्कलः । रधिजभोरचीतिनुम् ॥

जम्भला । स्त्री । राक्षसीविशेषे ॥ यथा समुद्रस्योत्तरेतीरे जम्भला नाम राक्षसी । तस्याःस्मरणमात्रेण विशल्यागर्भिणी भवेदिति ॥

जम्भा । स्त्री । जृम्भायाम् ॥ इतिराजनिर्घण्टः ॥

जम्भारिः । पुं । इन्द्रे ॥ वह्नौ ॥ वज्रे ॥ जम्भस्यारिः ॥

जम्भी । पुं । जम्बीरे ॥ इतिशब्दचन्द्रिका ॥

जम्भीरः । पुं । जंभीरी इति ख्याते जम्बीरद्रुमे ॥ जम्भयति । जभी० गम्भीरादित्वात् ईरन् । रधिजभोरचीतिनुम् ॥

जयः । पुं । अग्निमन्थे ॥ जयन्ते ॥ युधिष्ठिरे ॥ शत्रुपराभवीकरणे । विजये । उत्कर्षप्राप्तौ । पराजितापेक्षयोत्कर्षलाभे । जीत इति भाषा ॥ जयोरन्ध्र प्रहारिणाम् ॥ वीररसे ॥ नारायणस्य पार्षदविशेषे ॥ इक्ष्वाकुवंशजे विजयनन्दनराजे ॥ दक्षिणद्वारगृहे ॥ अष्टाविंशतितमे वत्सरे ॥ क्षत्रियास्तु तथा वैश्याः शूद्राश्चनटनर्त्तकाः । पीडितास्ते वरारोहेजये सर्वेनसंशयः ॥ जयनम् जीयतेऽनेनवा । जि० एरच् ॥ जयतिवा । पचाद्यच् ॥ शास्त्रविशेषे ॥ यथोक्तं ब्रह्मचारिकाण्डे भविष्यपुराणे । अष्टादशपुराणानि रामस्यचरितं तथा । विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत ॥ कार्ष्णंच पञ्चमोवेदो यन्महाभारतंस्मृतम् । सौराश्चधर्माराजेन्द्रमानवोक्ता महीपते ॥ जयेतिनाम एतेषांप्रवदन्तिमनीषिण इति ॥

जयकोलाहलः । पुं । पाशकभेदे ॥ जयस्य कोलाहलो यस्मिन्सः ॥-जयध्वनौ ॥

जयढक्का । स्त्री । जीतकाडङ्का इति भाषा प्रसिद्धे वाद्यविशेषे ॥

जयदत्तः । पुं । इन्द्रपुत्रे । पाकशासनौ ॥

जयद्रथः । पुं । सिन्धुराजे ॥

जेयनम् । न । तुरङ्गादिसन्नाहे ॥ जये ॥ जिजये । ल्युट् ॥

जयनी । स्त्री । इन्द्रसुतायाम् ॥

जयन्तः । पुं । इन्द्रपुत्रे । पाकशासनौ ॥ भीमे ॥ चन्द्रे ॥ शिवे । शम्भौ ॥ ॥ कृष्णानुजे ॥ ध्रुवकविशेषे ॥ तल्लक्षणं यथा । आदिताले जयन्तःस्यात् शृङ्गाररससंयुतः । रुद्रसंख्याक्षरपद आयुर्वृद्धिकरः परइतिदामोदरः ॥ जयति । जि० तृभूवहिवसीत्यादि नाझच् । झोन्तः ॥ तीर्थविशेषे ॥

जयन्तिका । स्त्री । हरिद्रायाम् ॥ जायती त्वगितिच प्रसिद्धद्रव्ये ॥

जयन्ती । स्त्री । जयायाम् । तर्कार्याम् ॥ नादेय्याम् ॥ अस्यागुणाः । मदगन्धयुक्तत्वम् । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कृमिभूतनाशित्वम् । कण्ठविशोधनत्वम् । तथकृष्णारसायनी । इतिराजनिर्घण्टः ॥ उमायाम् । गौर्याम् ॥ इन्द्रपुत्र्याम् ॥ पताकायाम् ॥ जीवन्त्याम् ॥ योगविशेषे ॥ यथा । जयं पुण्यञ्चकुरुतेजयन्तीमितितांविदुः । रोहिणी सहिताकृष्णा मासेच श्रावणे ऽष्टमी ॥ अर्द्धरात्रादधश्चोर्द्ध्वं कलयापियदाभवेत् । जयन्तीनामसा प्रोक्ता सर्वपापप्रणाशिनी ॥ यात्रायोगविशेषे ॥ यथा । यस्यस्योऽष्टगतश्चन्द्रो लग्नादेकादशे स्थितः । जयन्तानामयोगोऽयं शत्रुपक्षविनाशकृत् ॥ जयति । जि० । तृभूवहिवसि भासि साधि गडि मण्डि जिनन्दिभ्यश्चेति झच् सच षित् । झोन्तः । षित्त्वात् ङीष् ॥

जयपत्रम् । न । डिक्री इति डिगरी इतिच इङ्ग्रेजभाषा प्रसिद्धे विजयपत्रे । विवादविषयकजयबोधकलिपौ ॥ यथा । यद्वृत्तं व्यवहारात्तु पूर्वपक्षोत्तरादिकम् । क्रिया ऽवधारणोपेतं जयपत्रे ऽखिलं लिखेत् ॥ पूर्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः । प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते इति ॥ अश्वमेधीययज्ञघोटककपालबद्धायां लिपौ ॥ यथा । त्रैलोक्यविजयीरामो रावणान्तकरः प्रभुः । तदीक्षितो वाजिमेधे तस्यायं प्रोक्षितः पशुः ॥ पालितो लक्ष्मणेनैव सुलक्षणविलक्षितः । सम्पूज्यचपरित्याज्यः सर्वैरितिचसंस्कृताम् ॥ इतिवाशिष्ठरामायणम् ॥

जयपालः । पुं । दन्तीवीजे । सारके । जमालगोटा इति भाषा ॥ विधातरि ॥ विष्णौ ॥ नृपे ॥ इतिशब्दरत्नावली ॥

जयपुत्रकः । पुं । पाशकविशेषे ॥

जयमङ्गलः । पुं । ज्वरघ्ने औषधविशेषे ॥ राजवाह्ये हस्तिनि ॥ ध्रुवकविशेषे ॥ यथा । चतुर्विंशतिवर्णाङ्घ्रिः कथितो जयमङ्गलः । शृङ्गारवीरयोरेव ताले चाँचपुटे च स इति ॥

जयवाहिनी । स्त्री । शच्याम् । इन्द्राण्याम् ॥ चामधारा महेन्द्राणी चेन्द्राणी जयवाहिनीति रभसः ॥ जयवादिनीति पाठान्तरम् ॥ माहेय्याम् ॥ जयसैन्ये ॥ जयस्य वाहिनी ॥

जयशेखरः । पुं । स्वर्चमूलत्रिकोणोच्चस्थानगो यदि गीष्पतिः । जयशेखरयोगोऽयं नानाऽमितफलप्रदः इति वर्णिते यात्रायोगे ॥

जया । स्त्री । जयन्त्याम् ॥ तिथिविशेषे । त्रयोदश्यष्टमी चैव तृतीया च जया स्मृता ॥ पथ्यायाम् । हरीतक्याम् ॥ उमायाम् । दुर्गायाम् ॥ व्युत्पत्तिर्यथा । जयः कल्याणवचनो ह्याकारो दातृवाचकः । जयं ददाति या नित्यं सा जया परिकीर्त्तितेति ब्रह्मवैवर्त्तपुराणम् ॥ दुर्गायाः सख्याम् ॥ बुद्धशक्तिविशेषे । तारायाम् ॥ गणिकारिकायाम् । अग्निमन्थवृक्षे ॥ विजयायाम् । भङ्गायाम् ॥ पताकाविशेषे ॥ नीलदूर्वायाम् ॥ शान्तावृक्षे ॥ जयति । जि० । पचाद्यच् । टाप् ॥

जयारवः । पुं । वन्दिनां जय जयेति शब्दे ॥

जयावहा । स्त्री । भद्रदन्तीवृक्षे ॥

जयाश्रया । स्त्री । जरडीतृणे ॥

जयाह्वा । स्त्री । भद्रदन्तीवृक्षे ॥

जयी । त्रि । जययुक्ते । विजयिनि ॥ जेतुंशीलमस्य । प्रजोरिनिरित्यधिकारे जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्चेति इनिः ॥

जय्यः । त्रि । जेतुं शक्ये ॥ जि जये जि अभिभवे वा । शकि लिङ् चेति शक्ता बचोयत् । गुणः । क्षय्यजय्यौ शक्यार्थे इति यान्तादेशः ॥

जरठः । त्रि । कर्कशे ॥ पाण्डौ ॥ कठिने ॥ जीर्णे ॥ जीर्यति । जृष् वयोहानौ । बाहुलकादठः ॥ पुं । जरायामिति विश्वः ॥

जरडी । स्त्री । तृणविशेषे । गमाटिकायाम् । सुनालायाम् ॥

जरणः । पुं । न । जीरके ॥ अजाज्याम् । कृष्णजीरके ॥ हिङ्गुनि ॥ सौवर्चले ॥ कुष्ठौषधौ ॥ पुं । कासमर्दे ॥ जरयति । जृष्० । नन्द्यादित्वाल्ल्युः

जरणद्रुमः । पुं । अश्वकर्णवृक्षे ॥

जरणा । स्त्री । कृष्णजीरके ॥

जरन् । त्रि । जरातुरे । वृद्धे ॥ पुराण

मे ॥ जीर्य्यति । जृष् ० । जीर्णैर-
टन् ॥

जरती । स्त्री । जीर्णायाम् । वृद्धायाम्
॥ उगितश्चेति ङीप् ॥

जरत्कारुः । पुं । जरत्कारुमुनौ ॥

जरत्कारुः । पुं । मुनिविशेषे । यायाव
रे ॥ इति त्रिकाण्डशेषः ॥

जरत्कारुः । स्त्री । मनसादेव्याम् ॥

जरत्कारुप्रिया । स्त्री । मनसादेव्याम् ॥

जरद्गवः । पुं । वृद्धोक्षे ॥ जरन् चासौ गौ
श्च । पूर्व्वकालैकेति समासः । गोरत
द्धितलुकीति टच् ॥ गृध्रविशेषे ॥

जरन्तः । पुं । महिषे ॥ त्रि । वृद्धे ॥ जी
र्य्यति । जृष् ० । जृविशिभ्यां झच् ॥

जरमानः । पुं । पुरुषे ॥ जीर्य्यते । जृष् ०
। छन्दस्यसानच्शुजृभ्यामित्यसानच् ॥

जरा । स्त्री । विस्रसायाम् । वयःकृत
श्लथमांसाद्यवस्थाविशेषे । प्रज्ञाश-
क्तितेजोनिरोधपरपरिभवादिरू-
पायां वलिपलितादिलक्षणायां व
योहानौ ॥ सा तु कालकन्या । यथा ।
कालकन्या जरा साक्षात् लोकस्तां
नाभिनन्दति । स्वसारं जगृहे मृत्युः
क्षयाय यवनेश्वरः ॥ इति श्रीभागव
तम् ॥ एषां भेदप्रभेदेन चतुःषष्ठि
रुजः स्मृताः । मृत्युकन्यासुताश्चैव
जरा तस्याश्च कन्यका ॥ जराच भ्रा

तृभिः सार्द्धं शश्वद्भ्रमति भूतलम् ।
एते चोपायवेत्तारं न गच्छन्ति च
सन्ततम् ॥ पलायन्ते च तं दृष्ट्वा वै
नतेय मिवोरगाः ॥ चक्षुर्जलञ्च व्या
यामः पादाधस्तैलसेवनम् । कर्णे
तैलं मूर्द्ध्नि तैलं जराव्याधिविनाशनम्
॥ वसन्ते भ्रमणं वह्निसेवा ऽस्वल्पं क
रोति यः । वालाञ्च सेवते काले जरा
तं नोपगच्छति ॥ खातशीतोद-
कस्नायी सेवते चन्दनद्रवम् । नोपया
ति जरा तञ्च निदाघे ऽनिलसेवि-
नम् ॥ प्रावृडुष्णोदकस्नायी घन-
तोयं न सेवते । समये च समाहा-
री जरा तं नोपगच्छति ॥ शरद्रौ
द्रं न गृह्णाति भ्रमणं तत्र वर्जये-
त् । खातस्नायी समाहारी जरा तं
नोपतिष्ठते ॥ खातस्नायी च हेमन्ते
काले वह्निं निषेवते । भुङ्क्ते नवा
न्नमुष्णञ्च जरा तं नोपगच्छति ॥ शि
शिरे ऽशुकवह्निञ्च नवोष्णान्नञ्च सेव
ते । य एवोष्णोदकस्नायी जरा तं नो
पगच्छति ॥ सद्योमांसं नवान्नञ्च
वालास्त्रीक्षीरभोजनम् । घृतञ्च से
वते यो हि जरा तं नोपगच्छति ॥
भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीय
ते जलम् ॥ । नित्यं भुङ्क्ते च ताम्बू
लं जरा तं नोपगच्छति ॥ दधि हैय

क्षीरञ्च नवनीतं तथा गुडम्। नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति॥ शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि। तं सेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह॥ रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम्। तमुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि॥ इति ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डम्॥ अस्या औषधं यथा। पलाशचूर्णं समधु गव्याज्यामलकान्वितम्। सविडङ्गं पीतमाचं नरं कुर्यान्महामतिम्॥ मासैकेन महादेव जरामरणवर्जितः॥ पलाशबीजं सघृतं तिलमध्वन्वितं समम्। समाहं भक्षितं रुद्र जरां नयति संचयम् इति गारुडे १९६ अध्यायः॥ चौरिकावृक्षे॥ राक्षसीविशेषे॥ यथा। अन्यस्यामपि भार्य्यायां शकले द्वे वृहद्रथात्। ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते॥ जीर्य्यत्यनया। जृष्०। षिद्भिदादिभ्योऽङ्। ऋदृशोऽङि गुणः। टाप्॥ या च भार्य्या विरूपाक्षी कश्मला कलहप्रिया। वचनोत्तरवक्त्री च सा जरा न जरा जरेति चाणक्यम्॥

जरातुरः। त्रि। जर्जरे। जरारोगग्रस्ते॥

जरापुष्टः। पुं। जरासन्धे॥

जराभीरुः। पुं। मदने। कामदेवे॥ त्रि। जराभयशीले॥

जरायणिः। पुं। जरासन्धे॥

जरायुः। पुं। उल्वे। गर्भाशये। गर्भावरणचर्म्मणि॥ येन वेष्टितो गर्भः कुक्षौ तिष्ठति स जरायुः॥ या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते इति भगवतीगीतोक्तेः॥ जटायौ पक्षिराजे॥ जरामेति। किञ्जरयेः श्रिणा इति ञुण्॥

जरायुजः। त्रि। मनुष्यपश्वादौ॥ पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः। रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजा इति मनुः॥ या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते। शुक्रशोणितयोर्योगस्तस्मिन् सञ्जायते यतः। तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुज इति श्रीभागवते भगवतीगीता॥ जरायोर्जातः। पञ्चम्यामिति जनेर्डः॥

जरासन्धः। पुं। चन्द्रवंशीयनृपविशेषे। मागधभूपे। बार्हद्रथे॥ अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात्। ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते॥ जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत्सुतः इति भागवतम्॥ जरया सन्धितो यस्मात् जरासन्धस्त

तःस्मृतः ॥

जरासन्धजित् । पुं । भीमसेने ॥

जरी । त्रि । वृद्धे ॥ इतिहेमचन्द्रः ॥

जर्त्तृयम् । न । मांसे ॥ स्वयमांसे ॥ जीर्यति । जृष्० । जृञ्भ्या मू्न् ॥ पुं । असुरविशेषइतिवेदभाष्यम् ॥

जर्ज्जरम् । न । शैवले ॥ शक्रध्वजे ॥ त्रि । जरातुरे ॥ जीर्णे ॥ जर्जति । जर्जप रिभाषणभर्त्सनयोः । वाहुलका दरः ॥

जर्ज्जरीकः । त्रि । वहुच्छिद्रद्रव्ये ॥ जरातुरे ॥ जर्जति । ऊर्ज० । पर्फरीका दयश्चेति साधुः ॥

जर्णः । पुं । चन्द्रे ॥ वृक्षे ॥ जीर्यति । जृष० । हृद्जृसीतिनन् ॥ त्रि । जीर्णे ॥

जर्त्तिकः । पुं । जट्ट इतिप्रसिद्धे वाहीक देशस्थेशूद्रे ॥ यथा । शाकलं नाम नगर मापगानामनिम्नगा । जर्त्तिका नामवाहीका स्तेषांवृत्तं सुनिन्दित मितिभारतेकर्णपर्व ॥

जर्त्तिलः । पुं । अरण्यतिले ॥ जर्त्तिलः कथ्यतेसद्भिररण्य प्रभवस्तिलः ॥

जर्त्तुः । पुं । योनौ ॥ मतङ्गजे ॥ जायते । जनो० । जनेस्तुरश्च । न इत्यविभ क्तिकोनिर्द्देशः । तुप्रत्ययोरेफश्चान्ता देशः ॥

जलः । त्रि । जडे ॥ न । गोकर्णे ॥

ह्रीवेरे ॥ नीरे । अम्बुनि । तोये ॥ ॥ पञ्चभूतान्तर्गतभूतविशेषएतत् ॥ अस्योत्पत्त्यादयो निरूप्यन्ते ॥ रूपमाचाद्धि कुर्वाणात् तेजसो दैवचो दितात् । रसमात्रमभूत् तस्मादम्भो जिह्वारसग्रहः ॥ वर्णः शुक्लो रसस्पर्शौ जलेमधुरशीतलौ । स्नेहस्तद्द्रवत्त्व न्तुसांसिद्धिकमुदाहृतम् ॥ नित्यता दिप्रथमवत् किन्तुदेहमयोनिजम् । इन्द्रियंरसनंसिन्धुहिमादिर्विषयोम त इतिकारिकावली ॥ जलंचतुर्विधं प्राहु रन्तरीक्षोद्भवं वुधाः । धाराजं कारकञ्चैव तौषारं हैममि त्यपि ॥ हेमन्ते सारसं तोयं ताडागं वाहितं स्मृतम् । हेमन्तविहितं तोयं शिशिरेपिप्रशस्यते ॥ वसन्तग्रीष्मयोःकौपं वाप्यं वानैर्झरंजलम् । नदेयं वारिनादेयंवसन्तग्रीष्मयोर्वुधैः । विषवद्घनच्छन्नानां पत्राद्यैर्द्दूषितं यतः ॥ औद्भिदं वान्तरीक्षंवा कौपंवा प्रावृषिस्मृतम् । शस्तं शरदि नादेयं नीर मंशूदकंपरम् ॥ दिवा रविकरैर्जुष्टं निशिशीतकरांशुभिः । चेयमंशूदकंनाम स्निग्धंदोषत्रयापहम् ॥ अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् । बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥ अन्यच्च

। शरदि स्वच्छमुदयादगस्त्यस्याखिलं
हितम् ॥ वृद्धसुश्रुतस्तु । पौषे वारि
सरोजातं माघे तत्तु तडागजम् । फा
ल्गुने कूपसम्भूतं चैत्रे चौण्ड्यं हितं म
तम् ॥ वैशाखे नैर्झरं नीरं ज्येष्ठे श
स्तं तथौद्भिदम् । आषाढे शस्यते कौ
पं श्रावणे दिव्यमेव च ॥ भाद्रे कौपं
पयः शस्तमाश्विने चौण्ड्यमेव च ।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रश
स्यते ॥ पानविधिस्तु । अत्यम्बुपाना
न्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दो
षः । तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ॥
अल्पाम्बुपानविषयस्तु । अरोचके
प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये
। मुखप्रसेके जठरे कुष्ठे नेत्रामयेज्व
रे ॥ व्रणे च मधुमेहे च पिबेत् पानी
यमल्पकम् ॥ पानावश्यकन्तु । जी
वनं जीविनां जीवो जगत्सर्वन्तु तन्म
यम् । अतोऽत्यन्तनिषेधेऽपि न कश्चि
द्वारि वारयेत् ॥ अन्नेनापि विना जन्तुः
प्राणान् धारयते चिरम् । तोयाभा
वे पिपासार्त्तः क्षणात् प्राणैर्विमुच्य
ते ॥ हारीतोऽप्याह । तृष्णा गरीय
सी घोरा सद्यः प्राणविनाशिनी । त
स्माद्देयं तृषार्त्ताय पानीयं प्राणधा
रणम् ॥ तृषितो मोहमायाति मो

जलम्

हात् प्राणान् विमुञ्चति । अतः सर्वा
स्ववस्थासु न क्वचिद्वारि वारयेत् ॥ प्र
शस्तजलन्तु । अगन्धमव्यक्तरसं सु
शीतं तर्षनाशनम् । अच्छं लघु च हृ
द्यञ्च तोयं गुणवदुच्यते ॥ निन्द्यं जल
म् । पिच्छिलं कृमिलं क्लिन्नं पर्णशै
वालकर्द्दमैः । विवर्णं विरसं सान्द्रं
दुर्गन्धं न हितं जलम् ॥ अतिनिन्द्यं
जलम् । कलुषं छन्नमम्भोजपर्णनी
लीतृणादिभिः । दुर्द्दर्शजमसंस्पृष्टं
सौरचान्द्रमसांशुभिः ॥ अनार्त्तवं
चार्षिकमपि प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्त्तव्यं सर्वदोषप्रकोपन
म् ॥ तत्कुर्यात् स्नानपानाभ्यां तृ-
ष्णाध्मानोदरज्वरान् । कासाग्निमा-
न्द्याभिष्यन्दकण्डूगण्डादिकांस्तथा ॥
दुष्टोदकनिर्द्दोषीकरणोपायस्तु । नि-
न्दितञ्चापि पानीयं क्वथितं सूर्य्यतापि
तम् । सुवर्णरजतं लोहं पाषाणं सि
कतां मृदम् ॥ भृशं सन्ताप्य निर्वाप्य
सप्तधा साधितं तथा । कर्पूरजातीपु
न्नागपाटलादिसुवासितम् ॥ शुचि
सान्द्रपटस्रावैः क्षुद्रजन्तुविवर्जितम्
। स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोष
वर्जितम् ॥ पर्णमूलबिसग्रन्थिमुक्ता
कनकशैवलैः । गोमेदेन च वस्त्रेण कु
र्यादम्बुप्रसादनम् ॥ जलस्य पाकाव

धिस्तु । आमंजलंजीर्य्यति याममा
त्रं तदर्द्धमात्रं शृतशीतलञ्च । तदर्द्ध
मात्रन्तुशृतंकदुष्णं पय: प्रपाकेषयए
वकाला: ॥ विशेष: पानीये द्रष्टव्य:
॥ पूर्व्वाषाढाख्ये नक्षत्रे ॥ जलति । ज
लमपवारयते । पचाद्यच् ॥ ईशाने चा
पिपूर्व्वस्मिन्पश्चिमेचतथोत्तरे । शि
विरस्थजलं भद्रमन्यत्राशुभमेवच ॥
जलकण्टक: । पुं । शृङ्गाटके ॥ कुम्भीरे ॥
जलकपि: । पुं । शिशुमारे ॥
जलकपोत: । पुं । जलपारावते ॥
जलकरङ्क: । पुं । नारिकेलफले ॥ अम्बु
जे ॥ शङ्खे ॥ जललतायाम् ॥ मेघे ॥
जलकल्क: । पुं । जम्बाले ॥
जलकाक: । पुं । जलकौवा इति प्रसि
द्धे दात्यूहे पक्षिणि । पानीकौडि
इतिगौडभाषा ॥ स्निग्धंगुरुहिमंहृ
द्यंमांसंजलपक्षिणान्तु वातहरम् ॥
जलकाङ्क: । पुं । हस्तिनि ॥
जलकाङ्क्षी । पुं । हस्तिनि ॥ त्रि । जला
ऽभिलाषिणि ॥
जलकान्तार: । पुं । वरुणे ॥
जलकामुक: । पुं । कुटुम्बिनीवृक्षे ॥
जलकिराट: । पुं । ग्राहे ॥
जलकुक्कुट: । पुं । कारण्डवखगे । मद्गौ ॥
जलकुक्कुटी । स्त्री । गङ्गाचिल्ल्याम् ॥
जलकुक्कुभ: । पुं । कोयष्टिखगे । कोडा

पार्खी इति गौडभाषा ॥
जलकुन्तल: । पुं । शैवाले ॥
जलकुब्जक: । पुं । पङ्कारे ॥
जलकूपी । स्त्री । कूपगर्त्ते ॥ पुष्करि
ण्याम् ॥
जलकूर्म्म: । पुं । शिशुमारे ॥
जलकेश: । पुं । शैवाले ॥
जलक्रीडा । स्त्री । नद्यादौवयस्यादि-
भि: सहजलनि: क्षेपादिरूपायां खे
लायाम् । व्याख्युक्ष्याम् । करपशि
कायाम् ॥ परितापिषु वासरेषु प
श्यं स्फटलेखास्थितमात्तसौम्यकम्
। सुविशोधितनक्रमीनजालं व्यवगा
हेत जलं सुहृत्समेत: ॥
जलगुल्म: । पुं । जलावर्त्ते ॥ कच्छपे ।
कमठे ॥ जलचत्वरे ॥
जलङ्ग: । पुं । ओषधिविशेषे । महा
काले ॥
जलचत्वरम् । न । चहरइतिख्याते ज
लगुल्मे । चातरजल इति गौड
भाषा ॥
जलचर: । पुं । ग्राहादियादस्सु ॥ जले
चरति । चर० । चरेष्ट: ॥
जलचारी । पुं । मत्स्ये ॥ त्रि । जलच
रमात्रे ॥
जलज: । पुं । हिज्जलवृक्षे ॥ शैवले ॥
वानीरवृक्षे ॥ शङ्खे ॥ कुपीलौ ॥ क

किंमीनोस्तु जलजावन्त्याद्धं मकरस्यचेति प्रसिद्धराशिषु ॥ मत्स्ये ॥ न । पद्मे ॥ शङ्खे ॥ क्षारविशेषे । खोखारे ॥ त्रि । जलजाते ॥ जलेजातः । जनी° । डः ॥

जलजन्तुः । पुं । यादसि ॥ जलानां जन्तुः ॥

जलजन्तुका । स्त्री । जलौकायाम् ॥

जलजन्म । न । पद्मे ॥ जले जन्मास्य ॥

जलजम्बूका । स्त्री । क्षुद्रजम्बाम् । भुञिजामन वनजामन इतिचभाषा ॥

जलजिह्वः । पुं । नक्रे ॥

जलडिम्बः । पुं । शम्बूके । संखुला इति भाषा ॥

जलतण्डुलीयः । पुं । कञ्चटे ॥

जलतापिकः । पुं । इल्लीशमत्स्ये ॥ काकचीमत्स्ये ॥

जलतापी । पुं । जलतापिके ॥

जलतालः । पुं । इल्लीशे ॥

जलतिक्तिका । स्त्री । शल्लकीवृक्षे ॥

जलत्रा । स्त्री । छत्रे । जङ्गमकुट्याम् ॥

जलदः । पुं । मुस्तके ॥ मेघे ॥ त्रि । जलदानकर्त्तरि ॥ जलंददाति । डुदाञ्° । आतोनुपेतिकः ॥

जलदागमः । पुं वर्षाकाले ॥

जलदाशनः । पुं । शालवृक्षे ॥

जलदुर्गम् । न । अब्दुर्गे ॥

जलद्राक्षी । स्त्री । शालिञ्च्याम् ॥

जलद्रोणी । स्त्री । नौकायाः सेकभाजने । अवगाहे ॥

जलधरः । पुं । मेघे ॥ मुस्तके ॥ तिनिशवृक्षे ॥ समुद्रे ॥ त्रि । जलधारिणि ॥ जलस्यधरः ॥

जलधरमाला । स्त्री । मेघपङ्क्तौ ॥ जगतीसंज्ञकद्वादशाक्षरावृत्तेर्भेदे । मोभस्मौचेज्जलधरमालाब्ध्यङ्कैः ॥ याभक्तानां कलिदुरितोत्तप्तानां तापच्छेदेजलधरमालानव्या । भव्याकाशादिनकरपुत्रीकूले केलीलोलाचरितनुरव्यात् सावः ॥

जलधरमालाकालः । पुं । वर्षाकाले ॥

जलधिः । पुं । समुद्रे । रसमात्रायाअविशेषात् क्षारोदादिसप्तसु ॥ तेच । क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपिबहिर्द्वीपेषु पृथक् परितउपकल्पिताः ॥ जलानिधीयन्तेऽत्र । डुधाञ्° । कर्मण्यधिकरणेचेतिकिः । आकारलोपः ॥ दशशङ्कुसङ्ख्यायाम् । शतलक्षकोटिषु १००००००००००००००॥

जलधिगा । स्त्री । नद्याम् । सरिति ॥ जलधिं गच्छति । गम्लृ° । डः ॥

जलधिजा । स्त्री । लक्ष्म्याम् ॥ जलधौ जाता । सप्तम्यां जनेर्डः ॥ चि । अब्धिजमाघे ॥

जलधेनुः । स्त्री । दानार्थकृत्रिमधेनौ ॥

जलनकुलः । पुं । उद्रे । जलमार्जारे । उद्‌विलाव इति भाषा । धाडिया इति गौडभाषा ॥

जलनिधिः । पुं । उदन्वति । समुद्रे ॥ जलानि नितरां धीयन्तेऽत्र । कर्मण्यधिकरणेचेतिधाञः किः । जलानां निधिरितिवा । नेरुपसर्गस्योपसर्गान्तर निवृत्त्यर्थमुपादानम् ॥

जलनिर्गमः । पुं । श्वमे । अम्बुमार्गे ॥ प्राकारगृहभित्त्यादिषु जलनिःसरणजालके ॥ नद्यादावधःस्थस्यजलस्योर्द्ध्वं निस्सरणे ॥ निर्गमनम् । गम्लृ० । ग्रहवृद‍निश्चिगमश्चेत्यप् ॥ निर्गम्यतेऽनेनवा करणे खनोघचेतिघः । जलानां निर्गमः ॥

जलमोलिका । स्त्री । शैवाले ॥ स्वार्थेकन् । ह्रस्वः ॥

जलनीली । स्त्री । शैवाले ॥ जलंनीलयति । णीलवर्णे । णिच् । कर्मण्यण् ॥

जलन्धरः । पुं । असुरविशेषे ॥

जलपतिः । पुं । वरुणे । दैत्यदेवे ॥ समुद्रे ॥

जलपवित्रम् । न । संन्यासिनांत्रिदण्डवद्धेवस्त्रे ॥ तत्तुवितस्तिमात्रं शुक्लवस्त्रं सर्वदाचमनादौ जलशोधनार्थंचतुष्कोणादोरं द्विकोणादोरंवा भवति ॥

जलपारावतः । पुं । कोपिनि । जलकपोते ॥

जलपित्तम् । न । वह्नौ ॥ जलानां पित्तमिव दाहकत्वात् ॥

जलपिप्पली । स्त्री । जलपीपर इति भाषाप्रसिद्धे पिप्पलीविशेषे । लाङ्गल्याम् । शारदाम् ॥ जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः । सङ्ग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ॥ कटुपाकरसा रुच्याकषाया वह्निवर्द्धिनी ॥ जलस्य पिप्पलीव ॥

जलपृष्ठजम् । न । शैवाले ॥

जलप्रायम् । न । अनूपे ॥ जलंप्रायंयत्र ॥

जलप्रियः । पुं । चातके ॥ मत्स्ये ॥

जलप्लवः । पुं । उद्रे । जलनकुले ॥

जलफलम् । न । शृङ्गाटके ॥

जलबन्धकः । पुं । जलमध्यगे स्रोतोभेदकरे दारुशिलादौ । विदारके । कूपके ॥

जलबन्धुः । पुं । मीने ॥

जलबुद्‌बुदम् । न । जलबिम्बे । बुलबुला बुद्‌बुदा इतिच भाषा ॥ यथा ।

मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्। यः करोति स वैमूढो जलबुद्बुदसन्निभे ॥

जलब्रह्मी। स्त्री। हिलमोचाम्॥

जलभूः। पुं। मेघे॥ जलपिप्पल्याम्॥

जलमक्षिका। स्त्री। वारिकूमौ॥

जलमद्गुः। पुं। मत्स्यरङ्गविहङ्गमे॥

जलमधूकः। पुं। जलमहुआ इतिख्याते मधूकवृक्षप्रभेदे। दीर्घपत्रे। मङ्गल्ये॥

जलमसिः। पुं। मेघे॥ इतिहारावली॥

जलमार्गः। पुं। प्रणालके। प्रणाल्याम्। पनाला पनारा इतिच ख्याते॥

जलमार्जारः। पुं। जलनकुले॥

जलमुक्-ग्। पुं। धूमयोनौ। मेघे॥ जलं मुञ्चति। मुचृमोचणे। क्विप्॥

जलमूर्त्तिः। पुं। शिवे॥ जलं मूर्त्तिर्यस्य॥ स्त्री। करकायाम्॥ जलस्य मूर्त्तिः॥

जलमोदम्। न। उशीरे॥

जलयन्त्रम्। न। फुहारा इतिख्याते धारायन्त्रे॥

जलयन्त्रगृहम्। न। जलमध्यकृतगृहे। जलभवने। जलमहल इति भाषा॥ समुद्रगृहे। फुहारेकाघरइतिभाषा॥

जलयन्त्रनिकेतनम्। न। जलयन्त्रगृहे॥

जलयन्त्रमन्दिरम्। न। समुद्रगृहे। फुहारेकाघरइतिभाषा॥

जलरङ्कः। पुं।
जलरङ्कुः। पुं। } दात्यूहपक्षिणि॥
जलरङ्गः। पुं।

जलरण्डः। पुं। जलकणे॥ इतिहेमः॥

जलरसः। पुं। लवणे॥

जलरुण्डः। पुं। जलावर्त्ते॥ पयोरेणौ॥ भुजङ्गमे॥ इतिमेदिनी॥

जलरुट्-ड्। पुं। पद्मे॥

जलरुहम्। न। पद्मे॥ जले रोहति। रुह०। इगुपधेतिकः॥

जलरूपः। पुं। मकरे॥ इतित्रिकाण्डशेषः॥

जललता। स्त्री। तरङ्गे॥ इतिहारावली॥

जलवराटः। पुं। जलवसन्ताख्यव्रणे। रोगे॥ पानीवसन्त इतिगौडभाषा॥

जलवल्कलः। पुं। कुटृणे। कुम्भिकायाम्॥

जलवल्ली। स्त्री। शृङ्गाटके॥

जलवानीरः। पुं। अम्बुवेतसे॥ जले जातोवानीरः। शाकपार्थिवादिः॥

जलवायसः। पुं। मद्गुपक्षिणि॥

जलवालकः। पुं। विन्ध्यपर्वते॥

जलवालिका। स्त्री। विद्युति॥

जलवासः। पुं। विष्णुकन्दे॥ न। उशीरे॥

जलवाहः । पुं । मेघ ॥ जलंवहति । वहेः कर्मण्यण् ॥

जलवाहकः । पुं । महिषे । लुलापे ॥ जलस्य वाहकः ॥

जलविडालः । पुं । जलनकुले ॥

जलविन्दुजा । स्त्री । यावनालीशर्करायाम् ॥

जलबिल्वः । पुं । कर्कटे ॥ पञ्चाङ्गे ॥ जलचत्वरे । चातरजल इति गौड भाषा । चहर इतिभाषा ॥

जलविषुवम् । न । आश्विनचिह्निते । तुलासङ्क्रान्तौ ॥ ज्योतिर्विदां चक्रविशेषे ॥

जलविहङ्गमः । पुं । सलिलकुक्कुटकारण्डवकलहंसादिषु ॥

जलवृश्चिकः । पुं । चिङ्गटमत्स्ये ॥

जलवेतसः । पुं । परिव्याधे । वानीर वृक्षे ॥ जलेजातोवेतसः । शाकपार्थिवादिः । जलजोवेतसः शीतःसङ्ग्राहीवातकोपनः ॥

जलव्यधः । पुं । कङ्कचोटमत्स्ये ॥

जलव्यालः । पुं । अलगर्द्दसर्पे । अलाध इतिभाषा ॥ जलस्थो व्यालः ॥ क्रूरकर्म्मणि जलजन्तौ ॥

जलशयः । पुं । विष्णौ ॥ शेते ऽस्मिन् । पुंसीतिशीङोघः । जलेशयः शय्याऽस्य ॥

जलशयनः । पुं । विष्णौ ॥ जलेशयनं यस्य ॥

जलशायी । पुं । नारायणे ॥

जलशुक्तिः । स्त्री । शम्बूके ॥

जलशूकम् । न । शैवाले ॥

जलशूकरः । पुं । कुम्भीरे ॥

जलसर्पिणी । स्त्री । जलौकायाम् ॥

जलसूचिः । पुं । कङ्कचोटिमत्स्ये ॥ शृङ्गाटके ॥ शिशुमारे ॥ काके ॥ स्त्री । जलौकायाम् ॥

जलस्तम्भनम् । न । मन्त्रादिना जलगतिवारणे ॥

जलस्था । स्त्री । गण्डदूर्वायाम् ॥

जलहम् । न । स्वल्पजलयन्त्रगृहे ॥

जलहरणम् । न । मात्रावृत्तप्रभेदे ॥ यथा । लघुगुरुकनियमगत मिह फणिपतिमत मवगत मतिसुखनिगद पदम् दशवसुभुवने यति रिह यदि भवतिहि रसिकजन हृदयविहितम दम् । वसुविमलचतुष्कलगणहत गुणगणचरणविरामाहितसगणम् कचिदपि गुरुसहितं भवति कहितं छन्दः सुन्दरि जलहरणम् ॥ यथा ॥ उपगम्य निभृततर मभिनवजलधर सुभगसुदर्शनचक्रधरम्-सखिकथयहृदयरुज मुरगराजभुजममलकमलदलनयनवरम् । अति

कुटिलकठिनशठ मपनय मविशठ दर्शन मपि न ददासि चिरा द्रुचि राङ्गलतासदृशीनवयौवनकान्ति र चिरमिहरुचिरतरा ॥

जलहस्ती । पुं । ग्राहाख्ययादसि ॥

जलहासः । पुं । समुद्रफेने । फेने ॥ इ तिचिकाण्डशेषः ॥

जलाकाशः । पुं । जलस्थाकाशे ॥ यथा । घटावच्छिन्नखे नीरं यत् तत्र प्रति विम्बितः । साभ्रनक्षत्र आकाशो ज लाकाशउदीर्यते ॥

जलाची । स्त्री । जलपिप्पल्याम् ॥

जलाखुः । पुं । जलप्लवे ॥

जलाच्चलम् । न । स्रोतोवारिनिर्गमे ॥ शैवाले ॥

जलाटनः । पुं । लोहपृष्ठे । कङ्कखगे ॥

जलाटनी । स्त्री । जलौकायाम् ॥

जलाटक्कः । पुं । नक्रराजे । हांगर- इतिभाषा ॥ न । पोताधाने ॥

जलात्मिका । स्त्री । जलौकायाम् ॥

जलाधारः । पुं । तडागादिजलाशये ॥ जलपात्रे । आध्रियतेऽस्मिन् । धृङ् अवस्थाने । अध्यायन्यायोद्यावेत्यत्र अवहाराधारावायानामुपसंख्यानाद् घञ् । जलस्य आधारः ॥

जलाधिदैवतः । पुं । न । वरुणे ॥ न । पूर्वाषाढानक्षत्रे ॥

जलाम्बिका । स्त्री । कूपे ॥

जलायुका । स्त्री । जलौकायाम् ॥ जल मस्याः आयुः इत्यर्थे पृषोदरादित्वा त् साधुः ॥

जलार्णवः । पुं । वर्षाकाले ॥ जलस मुद्रे ॥

जलार्द्रः । पुं । आर्द्रवस्त्रे ॥

जलार्द्रा । स्त्री । याज्ञिकानां व्यजनवि शेषे । धुविचे ॥ धुवित्रं तालवृन्तंस्या दुतक्षेपव्यजनञ्चतत् । जलेनार्द्रं ज लार्द्रास्यादिति वैजयन्ती ॥ क्लिन्न- वस्त्रे ॥

जलालुः । पुं । पानीयालौ ॥

जलालुकम् । न । पद्मकन्दे ॥

जलालुका । स्त्री । जलौकायाम् ॥

जलालूकम् । न । शालूके । पद्मादिक न्दे । मृणालमूले ॥

जलालोका । स्त्री । जलौकायाम् ॥

जलावर्त्तः । पुं । अम्भसाम्भ्रमे । जल- गुल्मे ॥

जलाशयः । पुं । तडागादिजलाधारे ॥ शृङ्गाटके ॥ समुद्रे ॥ न । उशीरे ॥ लामज्जके ॥ त्रि । जडाशये ॥ जल माशयो हृदय मस्य ॥ जलमाशेते तिष्ठन्त्यत्रवा । पुंसीतिघः ॥ जलेआ शेते वा । अच् ॥

जलाशया । स्त्री । गुण्डालाहृचे ॥

जलाश्रयः । पुं । वृत्तगुण्डतृणे ॥

जलाश्रया । स्त्री । शूलीतृणे ॥ जला-कायाम् ॥

जलाष्ठीला । स्त्री । पुष्करिण्याम् ॥

जलाह्वयम् । न । उत्पले ॥

जलूका । स्त्री । जलौकायाम् ॥

जलेचरः । पुं । हंसमद्गुवकादिजलचरपक्षिणि ॥ जले चरति । चरेष्टः । तत्पुरुषे कृतीत्यलुक् ॥

जलेच्छया । स्त्री । हस्तिशुण्डावृक्षे ॥

जलेजातम् । न । पद्मे ॥

जलेन्द्रः । पुं । वरुणे ॥ जम्भले । पूर्वयक्षे ॥ महोदधौ ॥ जलाना मिन्द्रः ॥

जलेन्धनः । पुं । वाडवाग्नौ ॥ न । सौरविद्युदादितेजसि ॥

जलेरुहा । स्त्री । कुटुम्बिनीवृक्षे ॥

जलेवाहः । पुं । डूबाइति गोताखोर इतिचख्याते जातिविशेषे ॥ यथा । जलेवाहा नयाहूय वहूंस्तत्र न्ययोजयत् । तत्कृत्वा परमं यत्न मापु राभरणं न तत् । इति पाद्मे पातालखण्डम् ॥

जलेशयः । पुं । मत्स्ये ॥ जले शेते । शीङ्० । अधिकरणे शेतेरित्यच् । शयवासेष्वित्यलुक् ॥

जलेश्वरः । पुं । वरुणे ॥ समुद्रे ॥ जलानामीश्वरः ॥

जलोका । स्त्री । जलौकायाम् ॥

जलोच्छ्वासः । पुं । परीवाहे । प्रवृद्धजलस्य निर्गममार्गे । समधिकजलस्य सर्वतो वहने वा । समधिकजलस्योपायैर्निष्कासने वा ॥ जलानि उच्छ्वसन्त्येभिः । श्वसप्राणने । हलश्चेति घञ् ॥ जलानामुच्छ्वसनं वा । भावे घञ् ॥

जलोदरम् । न । जठरामये ॥ तस्य-निदानादि यथा । यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः । पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि ॥ स्नेहोपलिप्तेष्वथवापि तेषु दकोदरं पूर्ववदभ्युपैति । स्निग्धं महत् तत्परिवृत्तनाभिसमाततं पूर्णमिवाम्बुना च ॥ यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत् । जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम् । बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितमिति ॥

जलोद्धतगतिः । स्त्री । द्वादशाक्षरायाजगत्याः प्रभेदे ॥ यथा । जसौ जसयुतौ जलोद्धतगतिः । यथा । यदीयहलतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः । विलासविपिनं विवेश सहसा करोतु कुशलं हली स जगताम् ॥

जलोद्भवा । स्त्री । लघुब्राह्म्याम् ॥

जलोद्भूता । स्त्री । गुण्डालाक्षुपे ॥

जलोरगी । स्त्री । जलौकायाम् ॥

जलौकाः । स्त्री । जलौकायाम् ॥ जलमोकः स्थानमस्याः । ओकस् सान्तम् प्रसिद्धम् ॥

जलौकसः । स्त्री । भूम्नि । रक्तपायाम् ॥ जलमोकः स्थानमासाम् । सान्तोयं बहुवचनान्त इत्यमरः ॥ जलोरगी जलौकातु जलौकाच जलौकसीति संसारावर्त्ता बहुवचनं प्रायिकमिति वदन्ति ॥

जलौकसः । पुं । रक्तपायाम् ॥ जलमोकोस्यास्ति । अर्शआद्यच् । जलौकसेनेव रक्ताकृष्टिनिपुणेन वेश्याजनेनेति वासवदत्ता ॥

जलौका । स्त्री । जलोरग्याम् । रक्तपायाम् ॥ * ॥ अथातो जलौकावचारणीयमध्यायं व्याख्यास्यामः ॥ * ॥ नृपाढ्यबालस्थविरभीरुदुर्बलनारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः । तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं शृङ्गजलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वैर्व्वा ॥ * ॥ भवन्ति चात्र ॥ उष्णं समधुरं स्निग्धं ग-

वां शृङ्गं प्रकीर्त्तितम् । तस्माद्वातोपसृष्टे तु हितं तदवसेचने ॥ शीताधिवासा मधुरा जलौका वारिसम्भवा तस्मात्पित्तोपसृष्टे तु हिता सात्ववसेचने ॥ अलाबु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम् । तस्माच्छ्लेष्मोपसृष्टे तु हितं तदवसेचने ॥ * ॥ तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदाचूषणात् । सान्तर्दीपयाऽलाब्वा ॥ * ॥ अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुकाः जलमासामोक इति जलौकसः । ताद्वादश तासां सविषाः षट् । तावत्य एव निर्विषाः । तत्र सविषाः । कृष्णा कर्बुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्बुरा । रोमशा महापार्श्वा कृष्णमुखी अलगर्द्दा । इन्द्रायुधवदूर्द्ध्वराजिभिश्चित्रिता इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति । ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरो दाहश्छर्दिर्मदः सदनमि-

ति लिङ्गानि भवन्ति । तत्र महागदः पानालेपननस्यकर्म्मादिषु प्रयोज्यः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ॥ * ॥ अथ निर्व्विषाः । कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति ॥ * ॥ तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धा मुद्गवर्णा कपिला । किञ्चिद्रक्ता वृत्तकाया पिङ्गाऽऽशुगा च पिङ्गला । यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी । मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यमुखी पुण्डरीकमुखी । स्निग्धपद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्वर्थे ॥ इत्यविषा व्याख्याताः ॥ तासां यवनपाण्ड्यसह्यपौतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्व्विषाश्च विशेषेण भवन्ति ॥ तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः । पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भःसु च निर्व्विषाः ॥ * ॥ भवति चात्र ॥ क्षेत्रेषु विचरन्त्येता

जलौका

सलिलेषु सुगन्धिषु । न च सङ्कीर्णचारिण्यो न च पङ्कशयाः सुखाः ॥ * ॥ तासां ग्रहणमार्द्रचर्म्मणान्यैर्व्वा प्रयोगैर्गृह्णीयात् । अथैनां नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् । भक्ष्यार्थञ्चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य निदध्यात् । स्थापार्थं तृणमौदकानि च पत्राणि । त्र्यहात् त्र्यहाच्चान्यज्जलं भक्ष्यं च दद्यात् सप्तरात्रात्-सप्तरात्राच्च घटमन्यं संक्रामयेत् ॥ * ॥ भवति चात्र ॥ स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः । अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः ॥ अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात् । गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलशरावमध्ये मुहूर्त्तं स्थिता विगतक्लमा ज्ञात्वा ताभीरोगं ग्राहयेत् । सूक्ष्मशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयात् । अगृह्णन्त्यै क्षीरबिन्दुं शोणितबिन्दुं वा दद्यात् शस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत् । यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृ

ह्णातीति गृह्णन्तीं चार्द्रवस्त्रावच्छन्नां धारयेत्सेचयेच्च । दंशे तोदकण्डू-प्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत् । अथ शोणितगन्धेन नं मुञ्चेन्मुख मस्याः सैन्धवचूर्णेनावकिरेत् । अथपतितां तण्डुलकण्डन प्रदिग्धगात्रीं तैलल वणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुली भ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैः शनैरनुलोम मनुमार्जयेत् तां मुखाद्वामयेत् यावत्स म्यग्वान्तलिङ्गानीति । सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत् । या सीदति न चेष्टते सा दुर्वान्ता तां पुनः सम्यग्वामयेत् । दुर्वान्तायाव्याधिरसाध्यइन्द्रमदो नाम गदो भवति । अथ सुवान्तां तां पूर्ववत्सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेत्वध्रीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैःप्रदिह्यादिति । भवतिचात्र ॥ चेत्राणि ग्रहणं जातीःपोषणं सावचारणं । जलौकसाञ्च यो वेत्ति तत्साध्यान्स जयेद्गदान् ॥ इति सुश्रुते सूत्रस्थाने * १३ ऽध्यायः ॥ जलमोको ऽस्याः । ओकस्पचःके

इतिनिपातनादोको ऽदन्तः । टाप् ॥

जल्पः । पुं । विजिगीषुवचने । स्वपक्षस्थापनपरपक्षदूषणवत्यां विजिगीषुकथायाम् ॥ यथोक्तोपपन्न च्छल-जातिनिग्रहस्थानसाधनोपालम्भोजल्पः । न्यायसूत्राम् १ । ४२ ॥ यथोक्तेषु यदुपपन्नं तेनोपपन्नइत्यर्थः । मध्यमपदलोपीसमासः ॥ भाषणे ॥ वादे ॥ जल्पनम् । जल्पव्यक्तायां वाचि । घञ् ॥

जल्पकः । त्रि । वहुभाषिणि ॥ जल्पति । जल्प० ण्वुल् ॥

जल्पन् । त्रि । व्याहरति ॥

जल्पनम् । न । कथने ॥ किं मिथ्याशत जल्पनेन सततं रेवक्रारामंवद ॥ त्रि । वहुभाषिणि ॥ जल्पति । जल्प० । नं द्यादित्वाल्ल्युः ॥

जल्पाकः । त्रि । वाचाले । वहुकुत्सितभाषिणि ॥ जल्पति । जल्प० । तच्छीलः । जल्पभिक्षेतिषाकन् । षित्त्वात् स्त्रियां जल्पाकी ॥

जल्पितः । त्रि । उक्ते । कथिते ॥ जल्प्यतेस्म । जल्प० । क्तः ॥ न । कथने ॥

जवः । पुं । वेगे ॥ त्रि । वेगवति ॥ जु इति सौत्रोधातुः । जवनम् । ऋदोरप् ॥ न । सवेगगतिवचने ॥ वेगाख्यगुणे ॥

जवनः । पुं ॥ वेगिहये ॥ जवनोऽश्वः । जु इति सौत्रो गतौ वेगे च । जुचङ्क्रम्येति युच् ॥ इउनान इति जन प्रसिद्धे देशे ॥ म्लेच्छजातिविशेषे । जवनदेशोद्भवे प्रथमतः क्षत्रिये पश्चाद्विहितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥ सगरोऽस्य सर्वशिरोमुण्डनं सर्वधर्मबहिष्कृतत्वञ्च चकार ॥ श्रीकारीमृगे ॥ घोटके ॥ न । वेगे । स्यदे ॥ त्रि । वेगिनि ॥

जवनालम् । न । जुन्हरी जुवार इति च प्रसिद्धे धान्ये ॥

जवनिका । स्त्री । कनात चिक सिरकी इत्यादिभाषाप्रसिद्धे व्यवधायकवस्त्रादौ । प्रतिसीरायाम् । तिरस्करिण्याम् । व्यवधानपट्याम् ॥ जवन्त्यस्याम् । जु० । ल्युट् । कन् ॥

जवनी । स्त्री । अपथ्याम् ॥ औषधीभेदे ॥

जवसम् । न । घासे ॥ इति शब्दरत्नावली ॥

जवा । स्त्री । ओड्रपुष्पे ॥ ओडहुले ॥ जवति । जु० । अच् । टाप् ॥ मरुप्रसिद्धे चद्रजन्तुविशेषे ॥

जवादि । न । सुगन्धिद्रव्यविशेषे । गन्धराजे । कृत्रिमे । मृगधर्मजे ॥ जवादि नीरसं स्निग्ध मीषत्पिङ्गं सुगन्धदम् । आतपे बहुलामोदं रात्रौ योग्यञ्च तन्मतमिति लक्षणम् ॥

जवाधिकः । पुं । जवने । वेगाधिकहये ॥ जवेन अधिकः ॥ त्रि । अतिशयवेगवति ॥

जवापुष्पम् । न । ओड्रपुष्पे ॥ जवायाः पुष्पम् ॥

जवी । त्रि । वेगवति ॥ जवोऽस्यास्ति । इनिः ॥ उष्ट्रे ॥ घोटके ॥

जविष्ठः । त्रि । अतिवेगवति ॥ अतिशयेन जववान् । अतिशायने इष्ठन् । विन्मतोर्लुगिति मतुपो लुक् ॥

जवीयः । त्रि । जववत्तरे ॥ अस्मादीयसुनि मतुपो लुक् ॥

जसुरिः । पुं । वज्रे ॥ जस्यति । असुमोक्षणे । जसिसहोरुरिन् । जसुरये श्राम्याय असुरिं बुधित मितिवेदभाष्यम् ॥

जहकः । पुं । काले ॥ बाले ॥ निर्मोहे ॥ निर्मोके ॥ जहाति । ओहाक्० । जहातेर्द्वे चेति कुन् ॥ त्रि । त्यागिनि ॥

जहदजहल्लक्षणा । स्त्री । अंशान्तरपरित्यागेनांशान्तरलक्षणायाम् । भागत्यागलक्षणायाम् । वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तौ ॥ यथा । सोऽयं देवदत्तः इतिवाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभाव

सम्बन्धइति ॥

जहल्लक्षणा । स्त्री । वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धिन्यर्थान्तरे प्रवृत्तिरूपायां लक्षणायाम् ॥ यथा । गङ्गायां घोषः प्रतिवसतीति वाक्ये गङ्गाघोषयो राधाराधेयभावलक्षणस्य वाक्यार्थस्याऽशेषतोविरुद्धत्वात् वाच्यार्थमशेषं परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वात् जहल्लक्षणा सङ्गच्छते ॥

जहत्स्वार्था । स्त्री । जहल्लक्षणायाम् ॥ जहत्स्वार्थात्तत्रैव यत्र वृत्तिर्विरोधिनीत्युक्तेः ॥

जहा । स्त्री । मुण्डितिकायाम् ॥

जहानकः । पुं । प्रलये ॥ इति हेमचन्द्रः ॥

जहुः । पुं । अपत्ये ॥ यथा । मृगजहुना मृगापत्येनेति श्रीधरस्वामी ॥

जह्नुः । पुं । चन्द्रवंशोद्भवेकुशराजपुत्रे ॥ गङ्गाऽऽगमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनया ऊरुं भित्त्वा वहिर्निर्गमिता । तेन सा जाह्नवीति ख्यातिमागता ॥ विष्णौ ॥ जनान् संहारसमयेऽपह्नुतेऽपनयति । ह्नु ह्नु अपनयने । क्विप् ॥ जहात्यविदुषः भक्तान् नयति परमिति वा ॥ हा । जहाति । ओहाक् त्यागे । बाहुलकात्तेर्नु ऽन्तलोपश्चेति नुः ॥

जह्नुतनया । स्त्री । गङ्गायाम् ॥ जह्नोराजर्षेस्तनया ॥

जह्नुसप्तमी । स्त्री । वैशाखशुक्लसप्तम्याम् ॥ शुक्लपक्षस्य सप्तम्यां वैशाखे जह्नुपुत्रिकाम् । प्रपूजयेत् सुखार्थाय स्वर्गमोक्षफलाय चेत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥

जह्नुसुता । स्त्री । गङ्गायाम् ॥

जा । स्त्री । यातरि । भर्त्तुर्भ्रातृभार्यायाम् ॥ इत्येकाक्षरकोषः ॥

जागतः । पुं । प्रगाथविशेषे ॥ जगती आदिरस्य । सोऽस्यादिरिति च्छन्दसः प्रगाथेष्विभ्यण् ॥ न । जगतीछन्दसि ॥ स्वार्थेऽण् ॥

जागरः । पुं । जागरणे । स्वप्नः कारणस्य कृतसविकाशे ॥ जागृनिद्राक्षये । भावे घञ् ॥ जाग्रोविचीतिगुणः ॥

जागरणम् । न । जागरे । निद्राभावे ॥ प्रमितिर्जागरे जाग्रद् भ्रमः स्वप्नोऽथ मूढता । पापाद्द्विजस्य सुप्तिः स्यादेवंजागरणं त्रिधा ॥ जागृ० । ल्युट् ॥

जागरा । स्त्री । जागर्य्यायाम् ॥ जागरणम् । स्त्रियामधिकारे जागर्त्तेरकारो वा । जाग्रोविचिणल्ङित्स्विति गुणः ॥

जागरितम् । न । इन्द्रियैरर्थोपलब्धौ ॥ स्वप्नदर्शनहेतुकर्मक्षये जागरित

मागच्छन् स्वोपाध्यन्तःकरणेन्द्रिय-
सचिवः सन्नतद्दिन्द्रियविषयाननुमेयां
श्चस्थूलान् व्यावहारिकान् पदार्था
ननुभवति तदिदमस्य जागरितमि
त्युक्तम् ॥ जागृ० । क्तः ॥

जागरितस्थानः । पुं । अयं स्थूलोपहित
चैतन्ये विश्वशब्दवाच्ये ॥ जागरितं-
स्थानमस्य ॥

जागरितान्तम् । न । जागरितमध्ये जा
गरितविषये ॥

जागरिता । त्रि । सजागरे । जागरूके
॥ जागरणशीलः । जागृ० । तृन् ॥

जागरी । त्रि । जागरूके ॥ जागरमस्या
स्ति । इनिः ॥

जागरूकः । त्रि । अप्रमत्ते । सजागरे ।
जागरितरि । जागरणशीले ॥ जाग
र्त्तितच्छीलः । जागृ० । जागरूकस्
तिजागर्त्तेरूकः ॥

जागर्त्तिः । स्त्री । जागरणे ॥ स्त्रियां-
क्तिन् ॥

जागर्य्या । स्त्री । जागरे ॥ जागरणम् ।
जागर्त्तेरकारोवेति पक्षेशः । यक् ।
जाग्रोविचीतिगुणः ॥

जाङ्गुडम् । न । कुङ्कुमे ॥ पुं । देशवि
शेषे ॥ तत्रस्थं कुङ्कुममत्युत्कृष्टं भवति ।

जागृत् । पुं । जागरणे ॥ जागृ० । क्वि
प्तुकौ ॥

जागृवान् । त्रि । जागरूके ॥

जागृविः । पुं । अग्नौ ॥ नृपे ॥ जागर्त्ति
। जागृ० । जृशस्तृजागृभ्यः क्विन् ॥

जाग्रत् । त्रि । जागरणविशिष्टे ॥ स्त्री ।
जागरितावस्थायाम् ॥ यथा । श्रो
त्रादिभिर्ज्ञानेन्द्रियैः शब्दादिविषयं य
दवगम्यते सा जाग्रदवस्था । साच त्रि
धा । यथा । प्रमितिर्जागरे जाग्रत्
भ्रमः स्वप्नोऽयमुच्यते । पानादिज
न्यासुप्तिः स्यादेवं जागरणं त्रिधा ॥
जाग्रति । जागृ० । शतृ ॥

जाग्रिया । स्त्री । जागरणे ॥ जागरणम् ।
जागृ० । जागर्त्तेरकारोवेति पक्षेशः ।
यक् । गुणात् परत्वेन रिङादेशइति
धातुपारायणम् ॥

जाघनी । स्त्री । ऊरौ ॥ इतित्रिकाण्ड
शेषः ॥

जाङ्गलः । पुं । कपिञ्जले पक्षिणि ॥
स्वनामख्याते मित्रादिदेशे ॥ आ-
काशशुभ्र उच्चश्च स्वल्पपानीयपाद
पः । शमीकरीरबिल्वार्कपीलुकर्क
न्धुसङ्कुलः ॥ हरिणैणर्ष्यपृषतगोक
र्णखरसङ्कुलः । सुस्वादुफलवान् दे
शो वातलो जाङ्गलः स्मृतः ॥ * ॥ मां
सवर्गेऽत्र जङ्घाला बिलस्थाश्च गुहा
शयाः । तथा पर्णमृगाश्चैव विष्कि
राः प्रतुदा अपि ॥ प्रसहा [illegible]

कारणाभावकल्पनात् गोपदस्य गोत्वविशिष्टे शक्तिरेवस्यादिति ॥ नित्यत्वे सत्यनेकसमवेतत्वं जातित्व मिति न्यायसिद्धान्तमुक्तावलिः ॥ * ॥ गोत्वादौ ॥ तस्य लक्षणं यथा । आकृतिग्रहणाजाति र्लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैःसह ॥ अस्यार्थः । आक्रियते व्यज्यतेऽनयेति आकृतिःसंस्थानम् । गृह्यतेऽनेनेतिग्रहणंज्ञानम् । आकृत्याग्रहणं यस्याः सा आकृतिग्रहणा । जातिराकृतिग्रहणा भवति । संस्थानव्यङ्ग्येत्यर्थः । तेन मनुष्यगोमृगहंसादीनां पृथक् पृथक् संस्थानैर्व्यज्यमाना मनुष्यत्वगोत्वमृगत्वहंसत्वादि र्जातिः ॥ एवं ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक्संस्थानाभावत् ब्राह्मणत्वादेर्जातित्वं नायातमिति लक्षणान्तरमाह । लिङ्गानाञ्च न सर्वभागिति । या सर्वाणि लिङ्गानि नभजते साच जातिरित्यर्थः । स्त्रीपुंसयोरपत्यान्ताद्विचतुःषट्पदोरगाः । जाति भेदाः पुमाख्याश्च इत्यमरसिंहेजातिभेदानां स्त्रीपुंसयोरेवेतिनियमे ब्राह्मणादीनां सर्वलिङ्गभाक्त्वा भावाज्जातित्वम् । किन्त्वज्ञातहंसस्य

जनस्य हंसं दृष्टवतोपि तस्य संस्थानेन हंसत्वंव्यञ्जितुं नशक्यते इति हंसस्यापिजातित्वं नायातमिति पूर्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यापिसर्वलिङ्गभाक्त्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्यदोषः । इतिदोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह । सकृदाख्यातनिर्ग्राह्येति । सकृदेकवारमाख्यातेन उपदेशेन निर् निश्चयेन ग्राह्या ग्रहीतुं शक्या इत्यर्थः । तेन ईदृशोहंसइत्युपदेशे हंसंदृष्टवतस्तस्य संस्थानेन हंसत्वं व्यञ्जितुं शक्यतएवेति पूर्वलक्षणस्य नदोषः । एवं देवदत्तादिसंज्ञाशब्दस्यैकस्मिन्नुपदेशेपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं कुल मिति सर्वलिङ्गभाक्त्वात् संस्थानव्यङ्ग्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह । गोत्रञ्चेति । पुत्रपौत्रप्रभृतिकमपत्यं गोत्रमिति पूर्वाचार्यपरिभाषितं गोत्रमिहगृह्यते गार्गीवात्सीत्यादि । चतुर्थलक्षणमाह । चरणैः सहेति । चरणश्चजातिरित्यर्थः । चरणश

न्दो वेदैकदेशवाचीकठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचकएव नतुजातिवाचकः । तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तम् गार्ग्यादीनां यञश्चेतिङी पिसिद्धेपि जातिसंज्ञाफलन्तु गार्गी भार्य्यायस्यासौ गार्गीभार्य्य इत्यादौ जातेश्चेति पुंवद्भावनिषेधः । गार्गी चासौ भार्याचेति गार्ग्यभार्या इत्यादौ पुंवत्कर्मधारयेतिपुनः पुंवद्भावः ॥ * ॥ प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः । असर्वलिङ्गां बह्वर्थां तां जातिं कवयोविदुः ॥ गोत्रञ्च चरणानिचेत्यपरस्य जातिलक्षणम् । यथापूर्वं जातिलक्षणं तथा कुमारीभार्यइति भवितव्यम् । यथोत्तरं तथाकुमारभार्य इति इतिभाष्यम् ॥ जननम् जनयति वा । जनी० । स्त्रियांक्तिन् । जनसनेत्यात्वम् ॥ * ॥ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः । साधर्म्यवैधर्म्याभ्यामिति सावधारणोनिर्देशः । तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः ॥ षड्जादिसप्तसु ॥ काव्यालङ्कारभेदे ॥ घटत्वादिरूपाजातिर्हि घटादिशब्द प्रवृत्तौनिमित्तम् ॥

जातिकोषम् । न । जातीफले । जायफल इतिभाषा ॥

जातिकोषी । स्त्री । जातीपत्याम् । जाविची इतिभाषा ॥

जातिधर्म्मः । पुं । ब्राह्मणत्वादिनिबन्धने अध्ययनाध्यापनादौ ॥ जातेर्धर्मः ॥

जातिफलम् । न । जातिकोषे ॥

जातिब्राह्मणः । पुं । तपःश्रुतविहीने विप्रे ॥ यथा । तपः श्रुतञ्च योनिश्च एतद्ब्राह्मणकारणम् । तपःश्रुताभ्यां योहीनो जातिब्राह्मणएवसःइति ॥ जात्याजन्मना ब्राह्मणः ॥

जातिभ्रंशकरम् । न । नवविधपातकान्तर्गते पातकविशेषे ॥ यथा । ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः । जैह्म्यञ्च मैथुनंपुंसि जातिभ्रंशकरंस्मृतमिति ॥

जातिवैरम् । न । स्वाभाविकशत्रुत्वे ॥ तत् पञ्चविधम् । स्त्रीकृतम् १ यथा श्रीकृष्णशिशुपालयोः ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोणद्रुपदयोः ॥ सापत्नम् ४ यथा मूषिकनकुलयोः ॥ अपराधजम् ५ यथा पूजनीब्रह्मदत्तयोः । इतिमहाभारतम् ॥

जातिशस्यम् । न ।
जातिसारम् । न । } जातीफले ॥

जातिस्मर: । पुं । तीर्थविशेषे ॥ त्रि । पूर्वजन्मजातिस्मरणवति ॥

जाती । स्त्री । सुमनायाम् । सुमनसि । मालत्याम् । चमेली इतिभाषा ॥ तत्पुष्पे ॥ क्तिन्नन्तात् क्तिजन्ताद्वा ङीष् ॥ जात्या: पुष्पम् । पुष्पमूलेषु बहुलमित्यनुदात्तादेरञो ऽस्य लुक् ॥

जातीकोशम् । न । जायफल इतिप्रसिद्धे जातीफले ॥

जातीपत्री । स्त्री । सुमन: पत्रिकायाम् । जावित्री इतिभाषा ॥ जातीपत्री लघु: स्वादु: कटूष्णा रुचिवर्णकृत् । कफकासवमिश्वासतृष्णाकृमिविषापहा ॥

जातीफलम् । न । जातीकोषे ॥ जातीफलं रसेतिक्तं तीक्ष्णोष्णं रोचनं लघु । कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् ॥ निहन्ति मुखवैरस्यमलदौर्गन्ध्यकृष्णता: । कृमिकासवमिश्वासशोषपीनसहृद्रुज: ॥ जात्यं फलम् । जातीलताया: फलं वा ॥

जातीय: । त्रि । जातौभवे ॥ वृद्धाच्छ: ॥ प्रकारार्थबोधके तद्धितप्रत्ययविशेषे ॥ यथा । तार्किकप्रकार: । तार्किकजातीय: । प्रकारवचनेजातीयर् ॥

जातीरसम् । न । बोले ॥

जातु । अ । कदाचिदर्थे ॥ यथा । जातु जनो नैति सुखं कर्मवाहुल्यात् कर्मणैव याति सुखं ज्ञानचुरत्वात् । ज्ञानरसं ब्रह्मरसं येन निपीतं द्वारभयं मारभयं तेनविगीतमिति ॥ ॥ सम्भावे ॥ विगर्हणे ॥ अविकल्पे ॥ निषेधे ॥ जायति । जैत्यये । बाहुलकात् तुन् ॥

जातुकम् । न । हिङ्गुनि ॥ इतिशब्दचन्द्रिका ॥

जातुधान: । पुं । राक्षसे ॥ जातु कदाचित्यर्थ्यंप्राप्य धानं सन्निधानमस्य ॥

जातुषम् । त्रि । लाक्षानिर्मिते ॥ जतुनोविकार: । त्रपुजतुनो:षुगित्यण् ॥

जातूकर्ण: । पुं । ऋषिविशेषे ॥ वैद्यशास्त्रप्रवर्त्तके मुनिविशेषे ॥

जातेष्टि: । स्त्री । वैश्वानरं द्वादशकपालंनिर्वपेत् पुत्रेजातइतिजातकर्माङ्गत्वेन विहितायामिष्ट्याम् ॥

जातोक्ष: । पुं । दम्यवत्से । युवरुषे ॥ जातश्चा सा वुक्षाचा । अचतुरेति साधु: ॥ उत्पन्न उक्षा जातोक्ष इत्यमर: । अत्रउत्पन्नोदृहदम्यभाव:-प्राप्तवलीवर्दभावोवार्थ: ॥

जात्य: । त्रि । श्रेष्ठे । कुलीने ॥ कान्ते

॥ जातौभवः । यत् ॥

जात्यन्धः । त्रि । जन्मान्धे ॥

जात्याभासः । त्रि । मायोत्पन्ने रज्जुस र्पादौ ॥ अजातिसत् जातिवदाभासते इतिविग्रहः ॥

जात्युत्तरम् । न । असदुत्तरे ॥

जानकी । स्त्री । सीतायाम् ॥

जानपदः । पुं । जने ॥ देशे ॥ त्रि । जनपदोत्पन्ने ॥ जनपदे भवः । उत् सादित्वादञ् ॥

जानपदी । स्त्री । जनपदोत्पन्नवृत्तौ ॥ जानपदात् वृत्तौ वाच्यायां जान पदकुण्डेत्यादिना ङीष् ॥ अजन्यत्वे न टिड्ढेतिङीप्याद्युदात्तः ॥ जनप दप्रभवायाम् ॥

जानानः । त्रि । ज्ञानवति ॥

जानु । न । ऊरुजङ्घयोर्मध्यभागे । अष्ठीवति । घोंटु इति भाषा ॥ जा यते । जनी० । दृसनिजनीतिञुण् । अभिवध्योश्चेति नप्रवर्त्तते अनुबन्ध द्वयसामर्थ्यात् ॥

जानुकम् । न । जानुनि ॥ स्वार्थेयावादि भ्यःकन् ॥

जानुकारकः । पुं । रवेःपार्श्वगविशेषे ॥

जापः । पुं । जपे ॥ जपैर्भावेघञ् ॥

जापकः । त्रि । जपकर्त्तरि ॥ जपति । जपमानसे । ण्वुल् ॥

जापनम् । न । निरसने ॥ निर्वर्त्तने ॥

जाबालः । पुं । सत्यकामेमुनौ ॥ जबालाया अपत्यम् । अण् ॥

जाबालिः । पुं । मुनिविशेषे ॥

जामदग्न्यः । पुं । जमदग्निसुते । परशुरामे ॥ जमदग्नेर्गोत्रापत्यम् । गर्गादिभ्योयञ् इत्यनन्तरापत्येपि गोत्रत्वाध्यारोपात् यञ् । अनन्तरविवक्षायान्तु कण्वन्धकेत्यऽणि जामदग्न इतिबोध्यम् ॥

जामलम् । न । तन्त्रशास्त्रविशेषे । यामले ॥

जामाता । पुं । दुहितुःपत्यौ ॥ सूर्यावर्त्ते । सुलचिया इति गौडप्रसिद्धे शाके ॥ धवे । वल्लभे ॥ जायां माति मिमीते मिनोति वा । मा० । माङ्० । डुमिञ्० वा । नप्तृनेष्ट्रितिसाधुः ॥

जामिः । स्त्री । स्वसरि । भगिन्याम् ॥ कुलस्त्रियाम् ॥ दुहितरि ॥ स्नुषायाम् ॥ शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदेतिमनुः । गृहपतिसंवर्द्धनीयसन्निहितसपिण्डस्त्रियोजामयइतिकुल्लूकभट्टः ॥ जायति जायतेवा । जैवये । बाहुलकात्मिः ॥ यद्वा । जमति । अमु अदने । बाहुलकादिञ्दीर्घश्च-

॥ कर्मणीजादिभ्यस्तीत् वेति-
स्वामी ॥
जामिता । स्त्री । आलस्ये ॥
जामा । स्त्री । कुलयोषायाम् ॥ स्वसरि
॥ ङीष ॥
जामेय: । पुं । भागिनेये ॥ जाम्याअप
त्यम् । स्त्रीभ्योढक् ॥
जाम्बवम् । न । जम्बूफले ॥ जम्ब्वा:फल
म् । जम्ब्वा वेत्यण् । तस्यविधानात्
लुक् ॥ सुवर्णे ॥ कपिविशेषे ॥ नगर
विशेषे ॥
जाम्बवान् । पुं । ब्रह्मणःपुत्रे । रामाय
सादिप्रसिद्धपराक्रमे ऋक्षराजे ॥-
जाम्बवता । स्त्री । जाम्बवतोदुहितरि
श्रीकृष्णपत्न्याम् ॥ नागदमन्याम् ।
जाम्बवी । स्त्री । नागदमन्याम् ॥
जाम्बुवान् । पुं । जाम्बवति ॥
जाम्बूनदम् । न । स्वर्णे ॥ धुस्तूरे ॥ का
ञ्चनविशेषे ॥ यथा जाम्बूनदेनाम्ब
सदृशं लोहमस्तिचेत् । तथा चक्रु-
कधर्मेण समयोग्य: समोभवेदिति॥
समय: आचार: ॥ जम्बूरसस्य नद्यां
भवम् । तत्रभवइत्यण् ॥ तीरमृत्त
द्रसंप्राप्य सुखवायुविशोषिता । जा
म्बूनदाख्यं भवति सुवर्णं सिद्धभूषण
म् ॥ तद्रसं जम्बूरसम् ॥ यथा मेरु
मन्दरपर्वतस्थजम्बूफलानां समुत्थ

निपातविशीर्णानां मनस्थिप्रायाणा
मिभकायनिभानां रसेन जम्बूनाम
नदी इलावृतं वहति । तस्या उभ-
योस्तीरयो र्मृत्तिका जम्बूरसेनानु
विध्यमाना वाय्वर्कसंयोगविपाके-
न सदामरलोकाभरणं जाम्बूनदं-
नाम स्वर्णं भवति ॥ इति श्रीभाग
वतम् ॥
जम्बूनदेश्वरी । स्त्री । देवीविशेषे ॥
तत्स्थाने ॥
जायकम् । न । कालीयके । पीतवर्णे
सुगन्धिकाष्ठप्रभेदे । काथिया इति
गौडभाषा ॥ जयति गन्धान्तरम् ।
जिक्षभिभवे । ण्वुल् ॥
जायमान: । पुं । उत्पन्ने ॥
जाया । स्त्री । विधिनाविवाहितायां
स्त्रियाम् । पत्न्याम् । द्वितीयाश्रम्
॥ जायतेऽस्याम् । अनी० । अनेकस् ।
येविभाषेत्यात्त्वम् । पतिर्भार्यां संप्र
विश्य गर्भीभूत्वेह जायते । जायाया
स्तद्धि जायात्वं यदस्यां जायते पुन:
॥ लग्नात् सप्तमभवने ॥
जायाघ्न: । त्रि । तिलकालकादिचिह्न-
॥जायांहन्ति । हन० । अमनुष्यक
र्तृके चेतिटक् ॥ ङीपि जायाघ्नी ॥
जायाजीव: । पुं । नटे ॥ जाययाजीव
ति । जीव० । इगुपधेतिक: ॥

जायानुजीवी । पुं । नटे ॥ बकवृचि ॥ वेश्यापतौ ॥ दुःस्थे ॥

जायापती । पुं । द्विवचनान्तः । सहोक्त्या भार्याभर्त्तारौ ॥ जाया च पतिश्च । रा जदन्तादिषु निपातनात् पूर्वनिपातः ॥

जायुः । पुं । औषधे ॥ जयति रोगान् । जि० । कृवापाजिमिस्वदिसाध्यशूभ्य उण् इत्युण् ॥

जारः । पुं । उपपतौ ॥ जरयति । जृष्० । दारजारौ कर्त्तरि णि लुक् चेति घञ् । जीर्यतेऽनेनेति करणे वा घञ् ॥

जारजः । त्रि । विजन्मनि । अनियुक्तासुते ॥ जारात् जातः । जनी०ड्ः ॥

जारणी । स्त्री । स्थूलजीरके ॥

जारद्गवी । स्त्री । मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषे ॥ यथा । ज्येष्ठानुराधाविशाखावीथीजारद्गवीमता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यत इति ॥

जारितः । त्रि । शोषिते ॥

जारी । स्त्री । औषधीभेदे । जाडी इति गौडभाषा ॥

जारुथ्यः । पुं । त्रिगुणदक्षिणाकयज्ञे ॥

जालः । पुं । नीपवृक्षे ॥ न । गवाक्षे । जाली इति भाषा ॥ आनाये । सूत्रादिनिर्मिते मत्स्यादिजन्तुरोधकवस्तुनि ॥ क्षारके । पक्ष्यादिधारणार्थे पाशे ॥ दम्भे ॥ वृन्दे । गर्वे ॥ इन्द्रजाले ॥ जलेक्षिप्यते । शेषत्वे वा ॥ अथवा तिघनीभवति । जलघातने । ज्वलितीति वा ॥ यद्वा । जालयति । जलसंवरणे । चु० । पचाद्यच् ॥

जालकः । पुं । गवाक्षे ॥ न । कोरके ॥ दम्भे ॥ कुलाये ॥ आनाये ॥ न । स्त्री । मोचकफले ॥ नवकलिकासन्दे । क्षारके ॥ समूहे ॥

जालकारः । त्रि । जालकर्त्तरि ॥

जालकारकः । पुं । मर्कटके । लूतायाम् ॥ त्रि । जालकर्त्तरि ॥ जालस्य-कारकः ॥

जालकिनी । स्त्री । मेष्याम् ॥

जालगर्द्दभः । पुं । रोगविशेषे ॥ तस्य लक्षणं यथा । विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् । दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभ इति ॥

जालगोणिका । स्त्री । कराठालाशाम् ॥

जालजीवी । पुं । धीवरे ॥

जालन्धरः । पुं । पीठविशेषे ॥ त्रिगर्त्तदेशे ॥ पुंभूम्नि । जालन्धराः ॥ तद्देशस्थेषु । त्रिगर्त्तेषु ॥

जालपात् । पुं । हंसे ॥

जालपादः । पुं । शरारिप्रभृतिपक्षिविशेषेषु ॥ जालाकारपादत्वादेषाम् ॥

जालप्राया । स्त्री । योद्धृणां लोहमय्या

मङ्गल्याचायाम् ॥

आलवर्व्वुरक: । पुं । वर्व्वुरवृक्षविशेषे । क्षुद्राके ॥ आलवर्व्वुरको रूक्षो वातरोगकफापह: । पित्तदाहकर: स्वोष्ण: कषायश्च प्रकीर्त्तित: ॥

आलवान् । त्रि । मायाविनि ॥

आलिक: । पुं । वागुरिके । आलजीविनि ॥ लूतायाम् ॥ कैवर्त्ते ॥ त्रि । ग्राम आलिनि ॥ जालेन चरति । पर्पादिभ्यष्ठन् । ङीषि आलिकी ॥

आलिका । स्त्री । वस्त्रविशेषे ॥ स्त्रीणां मुखावरणवस्त्रे ॥ गिरिसारे ॥ जलौकायाम् ॥ विधवायाम् ॥ मटामालोहरचिताङ्गरचितायाम् । लोहकना है ॥ चारके ॥

आलिनी । स्त्री । चित्रार्थगृहे । चित्रशालायाम् ॥ कोषातक्याम् ॥ राजकोषातक्याम् । तोरणी इति यस्या: प्रसिद्धि: ॥

आली । स्त्री । पटोलिकायाम् । तोरणी इति प्रसिद्धलतायाम् ॥ पटोले ॥ जलति । जल० । ज्वलितीतिण: । जातेरिति गौरादित्वाद्वाङीष् ॥

जाल्म: । पुं । पामरे ॥ क्रूरे ॥ असमीक्ष्यकारिणि ॥ जालयति जाल्यते वा । जलजपवारणे । बाहुलकान्मक: । नेडुशिकृति ॥ जालं करोतीति वा ॥

जावाल: । पुं । सत्यकामेमुनौ ॥ जवालाया अपत्यम् । अण् ॥ अजाजीवे । छागजीविनि । गडरिया इतिभाषा ॥ जवमलति आलाति वा । अल० । अण् कोवा । जवालो ऽज: तस्यायम् । अण् ॥

जावकम् । न । कालीयनामगन्धद्रव्ये ॥ इतिसारसुन्दरी ॥

जाषी । पुं । ध्रुवकप्रभेदे ॥ जाषीति नाम्ना ध्रुवको द्वाविंशत्यक्षरान्वित: । सन्निपातेन तालेन शृङ्गारे ऽभीष्टदो रसे ॥ नाम्न: शब्दोयम् ॥

जाहक: । पुं । घोङ्ग खगे । घोँघ इति भाषा ॥ मार्जारे ॥ खट्वायाम् ॥ कारण्याम् । जलौकायाम् ॥ गात्रसङ्कोचिनिप्राणिविशेषे । कामरूपिणि । बिलवासे ॥

जाह्नवी । स्त्री । गङ्गायाम् । त्रिपथगायाम् ॥ जानुद्वारा पुरा दत्ता जह्नु: सम्पीयकोपत: । तस्य कन्या स्वरूपा च जाह्नवी तेनकीर्त्तितेतिब्रह्मवैवर्त्ते पुराणम् ॥ जह्नोरपत्यं स्त्री । अण् । ङीप् ॥

जाह्नवीय: । त्रि । गाङ्गे ॥ जाह्नव्या अयम् । तस्येदमित्यर्थे वृद्धाच्छ: ॥

जि: । पुं । पिशाचे ॥ त्रि । जेतरि ॥ इत्येकाक्षरकोष: ॥

जिगत्नुः । पुं । प्राणे ॥ जिगंसति । ग त्नु० । गमेः सन्वच्चेतिक्नुः । अनुदात्तोपदेशेत्यादिना मलोपः ॥

जिगमिषा । स्त्री । गमनेच्छायाम् । गन्तुमिच्छायाम् ॥

जिगमिषुः । त्रि । गन्तुमिच्छौ ॥

जिगीषा । स्त्री । जेतुमिच्छायाम् । जयस्पृहायाम् ॥ जेतुमिच्छति जिगीषति । जिगीषतीति जिगीषा । अ प्रत्ययात् । टाप् ॥ व्यवसाये ॥ प्रकर्षे ॥

जिगीषुः । त्रि । जयेच्छौ । जेतुमिच्छौ । निश्चयोत्साहवति ॥

जिघत्सा । स्त्री । क्षुधायाम् । बुभुक्षायाम् ॥ अत्तुमिच्छा घस्तुमिच्छा वा । अदेः सन्नन्तादप्रत्ययः । लुङ्सनोर्घस्लृ इतिघस्लादेशः ॥

जिघत्सुः । त्रि । क्षुधार्त्ते । बुभुक्षिते ॥ अत्तुमिच्छुः । अदेः सनि लुङ्सनोर्घस्लृ । ततः सनाशंसेत्युः ॥

जिघांसकः । त्रि । हननेच्छुके ॥

जिघांसा । स्त्री । हननेच्छायाम् ॥ हन्तुमिच्छेत्यर्थः ॥

जिघांसुः । पुं । शत्रौ ॥ त्रि । हन्तुमिच्छौ ॥ हन्तेः सन्नन्तादुप्रत्ययः । अभ्यासाच्चेतिकुत्वम् । अज्झनगमांसनीतिदीर्घः ॥

जिघृक्षा । स्त्री । गृहीतुमिच्छायाम् ॥

जिघृक्षुः । त्रि । गृहीतुमिच्छौ ॥ गृहेः सन्नन्तादुः ॥

जिघ्रः । त्रि । घ्राणकर्त्तरि ॥

जिङ्गिनी । स्त्री । वृक्षविशेषे । प्रमोदिन्याम् । झिङ्गिन्याम् ॥ जिङ्गनीमधुरासोष्णा कषाया योनिशोधिनी । कटुका व्रणहृद्रोगवातातीसारहृत्पटुः ॥

जिङ्गी । स्त्री । मञ्जिष्ठायाम् ॥ जिङ्गति । जिगिगतौ । पचाद्यच् । गौरादित्वान् ङीष् ॥

जिजीविषा । स्त्री । जीवितुमिच्छायाम् ॥

जिजीविषुः । त्रि । जीवितुमिच्छौ ॥

जिज्ञासनीयः । त्रि । जिज्ञासितव्ये । जिज्ञास्ये ॥

जिज्ञासा । स्त्री । ज्ञातुमिच्छायाम् ॥

जिज्ञासितम् । त्रि । ज्ञातुमिष्टे ॥ विचारिते ॥ कृतजिज्ञासे ॥

जिज्ञासुः । त्रि । मुमुक्षौ । आत्मज्ञानार्थिनि ॥ ज्ञातुमिच्छौ ॥ बहुश्रुतः स्वल्पभाषी जिज्ञासुर्ज्ञानवानपीति तन्त्रम् ॥

जितः । त्रि । प्राप्तपराजये । परिभूते । पराजिते ॥ यथा । नहि जिते जैत्रे स्यात् मुषितम् ॥ भजते विदे

श मधिकेनजित स्तदनुप्रवेश स्तथ वा कुशलः ॥ लब्धे । स्वायत्तीकृते । वशीकृते ॥ पुं । अर्हदुपासकविशेषे ॥

जितकामः । चि । सदाशिवे ॥ जितः-कामोयेन ॥

जितकाशिः । नि । दृढमुष्टौ ॥ इतिमहाभारतेनीलकण्ठः ॥

जितकाशी । चि । जितःहवे । जयिनि ॥ जितेनजयेन काशते प्रकाशते । काशृदीप्तौ । शीले णिनिः ॥

जितक्रोधः । पुं । शिवे ॥ विष्णौ ॥ जितः क्रोधो येन ॥ जितक्रोधः कथं तर्हिसुरारीन् हन्ति माधवः । वेदमार्गस्थापनार्थं ननु कोपवशात्प्रभुः ॥ भृगुपादघातेनापिक्रोधानुत्पत्तेः ॥ चि । जितामर्षे ॥

जितनेमिः । पुं । आश्वत्थे । अश्वत्थनिर्मितेदण्डे ॥ चि । जितनेमिके ॥

जितशत्रुः । पुं । दृत्तार्हत्पितरि ॥ चि । कृतशत्रुपराजये ॥

जितसङ्गदोषः । चि । प्रियाप्रियसन्निधावपि रागद्वेषविवर्जिते ॥ जिताः सङ्गजनिता दोषा येन ॥

जितात्मा । चि । जितेन्द्रिये ॥ जितआत्मायेन ॥

जितामित्रः । पुं । हरौ ॥ जिता अमित्रा बाह्या आभ्यन्तराश्च येन ॥ चि ॥ कृतशत्रुपराजये ॥

जितारिः । पुं । बुद्धे ॥ वृत्तार्हत्पितरि ॥ त्रि । जितशत्रौ ॥ जिताअरयोयेन ॥

जिताष्टमी । स्त्री । जीमूताष्टम्याम् ॥

जिताहवः । पुं । जितकाशिनि ॥

जितुमः । पुं । मिथुनराशौ ॥

जितेन्द्रियः । चि । स्ववशीकृतसर्वबाह्येन्द्रिये । शान्ते ॥ यथा । श्रुत्वा स्पृष्ट्वा च दृष्ट्वाच भुक्त्वा घ्रात्वाच यो नरः । न हृष्यति ग्लायतिवा सविज्ञेयो जितेन्द्रियः ॥ जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनियेन ॥ दान्ते ॥ पुं । कामवृद्ध्याख्ये क्षुपविशेषे ॥

जितेन्द्रियाह्वः । पुं । कामवृद्धिवृक्षे ॥

जित्तमः । चि । जयशीलानांमध्ये उत्तमे ॥

जित्यः । पुं । हलौ । दृढहले । कृष्टसमीकरणार्थं स्थूलकाष्ठे ॥ विपूयवि नीयजित्या मुञ्जकल्कहलिषु इति निपातनात् क्यप् ॥

जित्वा । पुं । जयिनि ॥ जयति । जि० । शीङ्क्रुशीत्यादिनाक्वनिप् ॥

जित्वरः । त्रि । जेतरि ॥ जयशीलः । इण्नशजिसर्त्तिभ्यःक्वरप् ॥

जित्वरी । स्त्री । काशिकापुर्याम् ॥ टिड्ढेतिङीप् ॥ जयशीलायाम् ॥

जिनः । पुं । अर्हति ॥ बुद्धे ॥ विष्णौ ॥

अतिवृद्धे ॥ विश्वाकृत्रिमबाहिर्मि मुनि विशेषे ॥ त्रि । जित्वरे ॥ जयति । जि० । दृषुषिधृजिदीक्षुष्यविभ्यो नक् ॥

जिनसद्म । न । जिनगृहे । चैत्ये । विहारे ॥

जिनसुतः । पुं । बुद्धे ॥ बुद्धोनाम्ना जिनसुतः कीकटेषु भविष्यति । इति श्रीभागवतम् ॥

जिनेन्द्रः । पुं । बुद्धे ॥ जिनानामिन्द्रः ॥

जिविः । पुं । काले । समये ॥ पक्षिणि ॥ जीर्यति जीर्यते वा । जॄष्० । जीर्यतेः क्रिन्रश्चवः इति क्रिन्प्रत्यये रश्चवादेशः । बाहुलकादि लिवे निदीर्घोन ॥

जिष्णुः । पुं । वासवे ॥ अर्जुने ॥ विष्णौ ॥ अर्के ॥ वसुषु ॥ त्रि । जित्वरे ॥ जयति । जयनशीलो वा । जिजये ऽभिभवे वा । ग्लाजिस्थश्चेतिग्स्नुः ॥

जिहीर्षा । स्त्री । हर्तुमिच्छायाम् ॥ हृञ्० । अप्रत्ययादित्यः ॥

जिह्मः । त्रि । कुटिले ॥ मन्दे ॥ न । तगरपादपे ॥ जहाति हीयते वा । ओहाक्० । जहातेःसन्वदालोपश्चेतिमन् ॥

जिह्मगः । पुं । सर्पे ॥ मदने ॥ त्रि । मन्दगे ॥ जिह्मंकुटिलंगच्छति । गम्लृ० । अन्येभ्योपीतिडः ॥

जिह्मता । स्त्री । सङ्कोचे ॥

जिह्मप्रायः । त्रि । कपटबहुले ॥

जिह्ममेहनः । पुं । भेके ॥

जिह्मशल्यः । पुं । खदिरे ॥

जिह्मितः । त्रि । घूर्णित ॥

जिह्मः । पुं । न । तगरमूले ॥

जिह्वलः । त्रि । लुब्धे । लोलुपे ॥ यथा । श्राद्धंकृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः । पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः ॥

जिह्वा । स्त्री । रसनायाम् । रसज्ञानेन्द्रिये ॥ अस्याः परीक्षा यथा । शाकपत्रप्रभारूक्षा स्फुटिता रसना ऽनिलात् । रक्ता श्यामा भवेत् पित्ता लिप्ता र्द्रा धवला कफात् ॥ परिदग्धा खरस्पर्शा कृष्णा दोषत्रये ऽधिके । सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणेति भावमिश्रः ॥ लेढि लिहन्त्यनया वा । लिह० । शेवयह्व जिह्वेतिसाधुः ॥

जिह्वानिर्लेखनम् । न । जिह्वामार्जने । जीभी करना इति भाषा ॥ जिह्वामार्जनद्रव्ये । जीभी इति भाषा ॥ तत्तु दशाङ्गुलं कोमलं कृशं स्वर्णरूप्यताम्र लोहनिर्मितं जिह्वामलापकर्षणे प्रशस्तम् । तस्यगुणाः । वक्त्रवैरस्यजिह्वाश्रितमलनाशित्वम् । आ

रोग्यहृच्चिकारित्वच्चेतिराजवल्लभः ॥

जिह्वापः । पुं । शुनि ॥ मार्जारे ॥ व्याघ्रे ॥ द्वीपिनि । चित्रव्याघ्रे ॥ भल्लूके ॥ सिंहे ॥ जिह्वयापिबति । पा० । कः ॥

जिह्वामलम् । न । कुसुके ॥

जिह्वामूलीयः । पुं । कखाभ्यां प्रागर्द्धविसर्गसदृशे (ꣳ) विसर्गप्रभेदे ॥ जिह्वामूलेभवः । जिह्वामूलाङ्गुलेश्छः ॥

जिह्वारदः । पुं । खगे ॥

जिह्वालिट् । पुं । कुक्कुरे ॥ मार्जारे ॥ जिह्वयालेढि । लिह० । क्विप् ॥

जिह्वाशल्यः । पुं । खदिरवृक्षे ॥

जिह्वास्वादः । पुं । लेहने ॥ आस्वदनम् । ष्वद० । घञ् । जिह्वयाआस्वादः ॥

जीनः । त्रि । वृद्धे ॥ जिनातिस्म । ज्या० । गत्यर्थेतिक्तः । ग्रहिज्येतिसम्प्रसारणम् ॥ हलइतिदीर्घः । ल्वादिभ्यश्चेतिनत्वम् ॥ चर्मपुटे ॥

जीमूतः । पुं । अद्रौ ॥ धृतिकरेइति मेदिनी ॥ भृतिकरेइतिहेमः ॥ देवताडे ॥ जीमूतइव ॥ पयोधरे ॥ वासवे घोषके ॥ मुस्तके ॥ जयति नभः जीयतेऽनिलेनवा । जि० । जेर्मूट्चोदात्तइतिक्तः । जेर्दीर्घश्च ॥ जीवस्योदकस्यमूतःपटबन्धोयस्येति वा । पृ० ॥ जीवनं जलं मूतं बद्धमनेन । मूङ्बन्धने । कर्मणि क्तः । पृषोदरादित्वात् वनशब्दलोपः ॥ ज्यानं जी । ज्या० । सं० क्विप् । जियावयोहान्यामूतोबद्धइति वा ॥ जीवनं मुञ्चति वा । पृ० ॥

जीमूतकः । पुं । देवदाल्याम् ॥

जीमूतकूटः । पुं । पर्वते ॥

जीमूतमूलम् । न । शठ्याम् ॥

जीमूतवाहनः । पुं । इन्द्रे ॥ जीमूतावाहनमस्य ॥ धर्मरत्ननामकस्मृतिसङ्ग्रहकर्त्तरि ॥

जीमूतवाही । पुं । धूमे ॥

जीमूताष्टमी । स्त्री । गौणाश्विनकृष्णाष्टम्याम् ॥

जीरः । पुं । जीरके ॥ खड्गे ॥ अणौ ॥ जुवति । जुःसौत्रः । जोरीचेतिरक् ॥ जिनाति वा । ज्या० । ज्यश्चेतिरग्वा ॥

जीरकः । पुं । अजाज्याम् । जीराइति भाषा ॥ जीरात् संज्ञायामितिकन् ॥ अस्यगुणायथा । जीरकत्रितयं-रूक्षं कटूष्णंदीपनं लघु । सङ्ग्राहिपित्तलंमेध्यं गर्भाशयविशुद्धिकृत् ॥ ज्वरघ्नं पाचनं बल्यं वृष्यं रुच्यं कफापहम् । चक्षुष्यं पवनाध्मानगुल्म-च्छर्द्यतिसारहृदिति भावप्रकाशः ॥

जीरणः । पुं । जीरके ॥

जीरिका । स्त्री । वंशपत्रीतृणे ॥

जीर्णः । पुं । जीरके ॥ न । शैलजे ॥ त्रि ।

वृद्धे । जरति ॥ पुरातने ॥ परिपक्वे ॥ जीर्य्यति स्म । जॄष् । गत्यर्थेति क्तः । ऋतइत् । निष्ठानत्वम् ॥

जीर्णज्वरः । पुं । पुरातनज्वरे ॥ अस्य सामान्यलक्षणं यथा । यो द्वादशभ्यो दिवसेभ्य ऊर्द्ध्वं दोषचय स्तद्विगुणेभ्य ऊर्द्धम् । त्वचां तनौ तिष्ठति मन्दवेगो भिषग्भिरुक्तो ज्वर एष जीर्ण- इति ॥

जीर्णदारु । न । विधारा इति प्रसिद्धे वृद्धदारकभेदे । सुपुष्पिकायाम् ॥

जीर्णपत्रः । पुं । पट्टिकालोध्रे ॥

जीर्णपत्रिका । स्त्री । वंशपत्रीतृणे ॥

जीर्णपर्णः । पुं । कदम्बे ॥ न । पुरातनपत्रे ॥ त्रि । तद्वति ॥

जीर्णफञ्जी । स्त्री । जीर्णदारुणि ॥

जीर्णवज्रम् । न । वैक्रान्तमणौ ॥

जीर्णवस्त्रम् । न । पटच्चरे । मलवस्त्रे ॥ जीर्णञ्च तद्वस्त्रञ्च ॥ त्रि । तद्युक्ते ॥

जीर्णवुध्नः । पुं । पट्टिकालोध्रे ॥ कैवर्त्तीमुस्तके ॥

जीर्णवुध्नकम् । न । परिपेले ॥

जीर्णा । स्त्री । स्थूलजीरके ॥

जीर्णास्थिमृत्तिका । स्त्री । अकाल्यर्थं कृत्रिममृद्विशेषे ॥ यथा । अथ वक्ष्ये तु जीर्णास्थिमृत्तिकाकरणं प्रिये । शिवालयतले कुर्य्याद्दीर्घं गर्त्तं मनोहरम् ॥ निःक्षिपेत् तत्र नानास्थि सञ्चयं विचतुष्पदाम् । सर्ज्जिक्षारं महाक्षारं मलक्षारं यवक्षानिच ॥ गन्धकोऽभ्रजलं चेप्यं नानामूत्राणि तत्र च । एवं कृत्वा मासषट्कं दद्यात् पाषाणमृत्तिकाम् ॥ कल्कास्थ्यूर्द्ध्वं तदूर्द्ध्वन्तु कुर्य्यादग्नीष्टकां शुभाम् । त्रिवर्षाज्जायते सर्व्वमेकीभूतं दृषत्समम् ॥ ततो निष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्म्ममेत् । प्रशस्तं भोजनं तत्र दूषये दन्नदूषणम् ॥ महाविषस्य संयोगात् तस्य भङ्गः प्रजायते । दूषीविषादिसंयोगात् पात्रे स्फोटाभवन्तिहि ॥ तत्र चित्तं चतुर्व्विधं पात्रं कृष्णं प्रजायते । एवं ज्ञात्वा तत्र दद्यान्न कदाचिद्विषादिकमितरा वर्णः ॥

जीर्णिः । स्त्री । ज्यानौ । जीर्णत्वे ॥ जरणम् । जॄष् वयोहानौ । क्तिन् । ऋल्वादिभ्यः क्तिन्निष्ठावत् । रदाभ्यामिति नत्वम् ॥

जीर्णोद्धारः । पुं । भग्नमन्दिरादेः संस्कारे ॥

जीर्य्यन् । त्रि । वयोहानिं प्राप्नुवति ॥

जीर्व्विः । पुं । कुठारे । परशौ ॥ जॄष् । जॄशॄस्तॄजागृभ्यः क्विन् ॥

जीवः । पुं । प्राणिनि ॥ बृहस्पतौ ॥ इत्य

भेदे ॥ वृहस्पतौ ॥ असुधारणे ॥ कर्णे ॥ मनुष्यादिकीटपर्यन्ते प्राणिमात्रे । कार्यकरणसङ्घाते ॥ अनेकान्तवादिनां जीवास्तिकायसंज्ञया परिभाषिते जीवपदार्थे ॥ त्रिविधश्चासौ अनादिसिद्धमुक्तबद्धभेदात् । अनादिसिद्धोऽर्हन् जीवास्तिकायाख्यः । अपेतमोहादिबन्धो मुक्तः । मोहाद्यावृतस्तु बद्ध इति ॥ * ॥ उपाधिप्रविष्टे ब्रह्मणि । वाङ्मनः प्राणकरणग्रामानुप्रविष्टे । घटावच्छिन्नाकाशवत् शरीरचितयावच्छिन्ने चैतन्ये ॥ दर्पणस्थमुखप्रतिबिम्बवत् बुद्धिस्थे चैतन्यप्रतिबिम्बे ॥ साभासाहङ्कारे । चित्प्रतिबिम्बे ॥ प्राणादिकलापस्य धारयितरि ॥ प्राणान् चेतनरूपेण धारयन् जीव उच्यते ॥ लिङ्गदेहे ॥ एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम् । एष चेतनया युक्तो जीव इत्यभिधीयते ॥ इति श्रीभागवतम् ॥ पञ्चविधं पञ्चतन्मात्रात्मकम् । । त्रिवृत् त्रिगुणम् । षोडशविकारात्मना विस्तृतमित्यर्थः ॥ * ॥ विज्ञानमयकोषावच्छिन्नश्चिदात्मा कर्त्तृत्वभोक्तृत्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव उच्यते ॥ वालाग्रशतभागस्य शत-

धा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ * ॥ जीवो नाम देहादिव्यतिरिक्तस्तत्साक्षी त्वम्पदार्थो योऽयं विज्ञानमयः योऽयं संसरति योऽयं संसारी न तु देहादिर्जीवः तस्य दृश्यस्य द्रष्टृत्वानुपपत्तेः ॥ * ॥ अस्ति देवि परब्रह्मस्वरूपी निष्कलः शिवः । सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलोऽव्ययः ॥ स्वयंज्योतिरनाद्यन्तो निर्विकारः परात्परः । निर्गुणः सच्चिदानन्दस्तदंशा जीवसंज्ञकाः ॥ अनाद्यविद्योपहिता यथाग्नौ विस्फुलिङ्गकाः । देहाद्युपाधिसम्भिन्नास्ते कर्मभिरनादिभिः ॥ सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः । तत्तज्जातियुतं देहमायुर्भोगञ्च कर्मजम् ॥ प्रतिजन्म प्रपद्यन्ते तेषामप्यपरं पुनः । सूक्ष्मं लिङ्गशरीरं तदामोक्षादक्षयं प्रिये ॥ इति कुलार्णवे १ उल्लासः ॥ पुं । न । जीविते ॥ जीवनम् । जीव० । हलश्चेति घञ् ॥ जीवति वा । इगुपधलक्षणः कः ॥ जीवयति वा । अच् । मृतसञ्जीवनमन्त्रज्ञत्वात् ॥

जीवकः । पुं । प्राणके द्रुमे ॥ पीतसाले । विजयसार इति ख्याते ॥ क्षपणे ॥ सर्पणे ॥ अष्टवर्गान्तर्गतौषधविशेष

। कूर्चशीर्षे । ह्रस्वाङ्गे ॥ अस्यस्वरूप पर्यायगुणाः । यथा । जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ । रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥ जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत् ॥ जीवको मधुरः शृङ्गी ह्रस्वाङ्गः कूर्चशीर्षकः । ऋषभो वृषभो धीरो विषाणी न्द्राक्ष इत्यपि ॥ जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ । मधुरौ पित्तदाहाश्रः कार्श्यवातक्षयापहाविति ॥ त्रि । सेवके । सेविनि ॥ वृद्धाशिनि ॥ जीविनि ॥ आहितुण्डिके ॥ जीवयति । जीव० । ण्वुल् ॥ जीवतात् आशिषिचेतिवुन् ॥

जीवघनः । पुं । हिरण्यगर्भे ॥ घनोमूर्त्तिः । जीवलक्षणो घनः जीवघनः सैन्धवखिल्यवत् ॥

जीवजीवः । पुं । चकोरे ॥

जीवञ्जीवः । पुं । चकोरे ॥ जीवंजीवयति । तद्दर्शनेनविषनाशात् । कृत्यल्युटो बहुलमिति बाहुलकात् खच् ॥ खगान्तरे ॥ द्रुमप्रभेदे ॥

जीवत्तोका । स्त्री । जीवद्वत्सायाम् । जीवस्वाम् ॥ इतिहेमः ॥

जीवत्वम् । न । कूटस्थादीनां चतुर्णां समूहे ॥ तथाहि । कूटस्थंब्रह्म अन्तःकरणम् अन्तःकरणाश्रयाऽविद्या चिदाभासश्चेति चतुष्टयंमिलितंसज्जीवत्वमितिनीलकण्ठशैवः ॥

जीवत्पतिः । स्त्री । सधवायाम् ॥

जीवत्पितृकः । त्रि । विद्यमानपितृके ॥ यथा । अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम् नजीवत्पितृकः कुर्यात् कृतेऽपि पितृहाभवे दितिरघुनन्दनः ॥

जीवथः । पुं । कूर्मे ॥ प्राणे ॥ मयूरे ॥ मेघे ॥ त्रि । चिरायुषि ॥ धार्मिके ॥ जीवति । जीव० । शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ॥

जीवदः । पुं । वैद्ये ॥ विद्विषि । रिपौ ॥ ग्रन्थिपर्णे ॥ त्रि । जीवनदातरि ॥ जीवं ददाति । डुदाञ्० । कः ॥

जीवदात्री । स्त्री । ऋद्धिनामौषधौ ॥

जीवधनम् । न । गवादिपशुषु ॥

जीवनम् । न । वर्त्तने । जीविकायाम् ॥ जीवन्त्यनेन । जीव० । ल्युट् ॥ नीरे । जले ॥ प्राणधारणे । आयुषि । जन्ममृत्य्वोर्मध्यकाले ॥ हीनजीवना द जीवनं वरम् ॥ मज्जनि ॥ हैयङ्गवीने ॥ पुं । पुत्रे । जीवकौषधे ॥ वाते ॥ क्षुद्रफलकवृक्षे ॥ जीव्यतेऽनेन । जीव० । करणाऽधिकरणयोश्चेतिकरणे ल्युट् ॥

जीवनकम् । न । अन्ने ॥

जीवनयोनिः । स्त्री । यत्नविशेषे ॥ स तु । अतीन्द्रियः शरीरे प्राणसञ्चारकारणम् । इतिभाषापरिच्छेदः ॥

जीवनहेतुः । पुं । वर्त्तनोपाये ॥ विद्याशिल्पंभृतिःसेवागोरक्षंविपणिःकृषिः । वृत्तिर्भैक्ष्यंकुसीदञ्च दशजीवनहेतवः ॥

जीवना । स्त्री । मेदौषधे ॥

जीवनाघातम् । न । विषे ॥

जीवनावासः । पुं । वरुणे ॥ जीवनमावासो यस्य ॥

जीवनिका । स्त्री । हरीतक्याम् ॥

जीवनी । स्त्री । गुर्जरदेशे डोडो इति प्रसिद्धायां जीवन्त्याम् । मधुस्रवायाम् । काकोल्याम् ॥ डोड्याम् ॥ मेदायाम् ॥ महामेदायाम् ॥ यूथ्याम् ॥ जीव्यतेऽनया । जीव० करणेल्युट् ॥

जीवनीयकम् । न । } जले । वारि-
जीवनीयकम् । न । } णि ॥ जीवनाय हितम् । छः ॥ जीवनीयगणे ॥

जीवनीयगणः । पुं । औषधविशेषे ॥ यथा । अष्टवर्गः सयष्टीको जीवन्ती मुद्गपर्णिका । माषपर्णी गणोऽयन्तु जीवनीय इतिस्मृतः ॥ जीवनो मधुरश्चापि नाम्ना सपरिकीर्त्तितः ॥ जीवनीयगणः प्रोक्तः शुक्रकृद् बृंहणो हिमः ॥ गुरुर्गर्भप्रदः स्तन्यः कफकृत् पित्तरक्तहृत् । तृष्णां शोषं ज्वरं दाहं भ्रमं मूर्च्छां व्यपोहति ॥ अपिच । अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकस्तथा । जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथेतिवैद्यक परिभाषा ॥

जीवनीया । स्त्री । जीवन्त्याम् । गुर्जरे डोडी इति प्रसिद्धायाम् ॥ जीवनाय हिता । तस्मै हितमिति छः ॥

जीवनेत्री । स्त्री । सैंहल्याम् ॥

जीवनौषधम् । न । जीवातौ । मृतसञ्जीवनौषधे ॥ येनम्रियमाणो जीवति । जीवनस्य औषधम् ॥

जीवन्तः । पुं । प्राणे ॥ औषधे ॥ जीवशाके ॥ त्रि । आयुष्मति ॥ जीव्यात् । जीव० । तृहिनन्दि जीविप्राणिभ्यःषिदाशिषीतिझच् । झोन्तः ॥

जीवन्तिका । स्त्री । गुडूच्याम् ॥ जीवशाके ॥ वन्दायाम् ॥ हरीतक्याम् । जीवति । जीव० । तृहिनन्दीति झचःषित्वात् ङीष् । कन् ॥

जीवन्ती । स्त्री । जीवन्याम् । मधुस्रवायाम् ॥ जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा ॥ रसायनी बलकरी चक्षुष्या ग्राहिणी लघुः ॥ शाकप्रकारस्तु जीवन्त्याः कोमलं

पचं स्विन्नं तक्रसुभर्जितम्। हिङ्गुना संयुते तैले तक्रं क्षिप्त्वा प्रलेपयेत् ॥ डोडी इति गुर्जरेऽस्याः प्रसिद्धिः॥ शम्याम्॥ गुडूच्याम्॥ वन्दायाम्॥ डोड्याम्॥ हरीतक्याम्॥ जीवन्ती स्वर्णवर्णिनीति लक्षणाम्॥ जीवति जीवयति वा। जीव०। लटःशतुरुगित्वात् ङीप्॥

जीवन्मुक्तः। त्रि। आत्मविदि। जीवन्नेव मुक्तसंसारे॥ जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वाद्खिलबन्धरहितो-ब्रह्मनिष्ठ इति॥*॥ ननुजीवन्मुक्तो व्यवहरतिन वा। आद्ये तस्य बद्धान्नविलक्षणता। द्वितीये देहस्यानुपयोगात् सद्यः पातप्रसङ्ग इत्यत आह। अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादि भाजनेन शरीरेण आन्ध्यमान्द्यपटुत्वादि भाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनचान्तःकरणेन पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमाननि ज्ञानाविरुद्धान्यारब्धफलानिच पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यतीति। दृष्टान्तेनोक्तमर्थं स्पष्टयति। यथेन्द्रजालमिति ज्ञानवान् तदिदमिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। उक्तञ्च। सुषुप्तिवज्जाग्रति यो न पश्यति द्वयन्तु पश्यन्नपिचाऽद्वयत्वतः। तथाच कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः इति॥ वेदविद्याष्टतं ज्ञानं देशिकस्य मुखात् स्वयम्। गृहीत्वाष्टोत्तरशतं ये पठन्ति द्विजोत्तमाः। प्रारब्धक्षयपर्यन्तं जीवन्मुक्ताभवन्तिते॥ अष्टोत्तरशत मुपनिषदाम्॥ कौलिके॥ यथा। धन्या माहेश्वराः स्वार्थप्रत्यभिज्ञानशालिनः। स्वपरिज्ञानमात्रेण जीवन्मुक्ता भवन्तिहि॥ महामन्त्रप्रभावेण कुलाचारप्रभावतः। स्वेच्छाचारा निर्विकल्पा जीवन्मुक्ताहि कौलिकाः॥ योन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते॥ जीवन्नेव मुक्तः॥

जीवन्मुक्तिः। स्त्री। जीवतो बन्धनिवृत्तौ॥ जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति तन्निवृत्ति-स्वरूपाजीवन्मुक्तिः॥

जीवन्मुक्त्युपायः। पुं। कुलमार्गे॥ जी

वन्मुक्ते कषायस्तु कुत्समार्गेश्विनापर इतिसद्दाश्चिवोक्तेः ॥
जीवपुत्रः । पुं । } जीयापोताइति
जीवपुत्रकः । पुं । } प्रसिद्धे पुत्रजीव द्रुमे ॥
जीवपुष्पा । स्त्री । वृहज्जीवन्त्याम् ॥
जीवप्रिया । स्त्री । हरीतक्याम् ॥
जीवभद्रा । स्त्री । जीवन्तीलतायाम् ॥ ऋद्धिनामौषधे ॥
जीवभूतः । त्रि । प्राणधारणोपाधिना कर्त्ता भोक्ता संसारीति मयैव प्रसिद्धिमुपगते ॥
जीवमन्दिरम् । न । शरीरे ॥
जीवला । स्त्री । सैंहल्याम् ॥
जीवलोकः । पुं । संसारे ॥ यथा । माता पिता गुरुजनः स्वजनो ममेति मायोपमे जगति कस्य भवेत् प्रतिज्ञा । एको यतो व्रजति कर्मपुरः सरोऽयं विश्रामवृक्षसदृशः खलुजीवलोकः ॥ सायंसायं वासवृक्षं समेताः प्रातः प्रातस्तेनतेनप्रयान्ति । त्यक्त्वान्योन्यं तञ्च वृक्षं विहङ्गा यद्वत् तद्वज्ज्ञातयोऽज्ञातयश्चेति ॥ जीवानांलोकः ॥
जीववल्ली । स्त्री । चीरकाकोल्याम् ॥
जीवशाकः । पुं । मालवप्रसिद्धे शाकविशेषे । जीवन्ते । रक्तनाले । ताम्रपत्रे ॥
जीवशुक्ला । स्त्री । चीरकाकोल्याम् ॥
जीवश्रेष्ठा । स्त्री । ऋद्धिनामौषधे ॥
जीवसञ्ज्ञः । पुं । कामवृद्धिवृक्षे ॥
जीवसाधनम् । न । धान्ये ॥
जीवसूः । स्त्री । जीवद्वत्सायाम् । जीवत्तोकायाम् ॥
जीवस्थानम् । न । मर्मणि ॥
जीवा । स्त्री । जीवन्तिकायाम् । मधुस्रवायाम् । डोडी इति गुर्जरभाषा ॥ मौर्व्याम् । धनुर्योगुणे ॥ वचायाम् ॥ शिञ्जिते ॥ भूमौ ॥ वृत्तौ ॥ जीवति । जीव० । पचाद्यच् । टाप् ॥
जीवातुः । पुं । न । अन्ने । भक्ते ॥ जीविते ॥ जीवनौषधे । मृतसञ्जीवनौषधे ॥ जीवयति जीवत्यनेन वा । जीव० । जीवेरातुः ॥
जीवात्मा । पुं । देहिनि । जीवे । पुनर्भविनि ॥
जीवाधारः । पुं । चेत्रे ॥ हृदये ॥
जीवान्तकः । पुं । जीवनार्थं पक्ष्यादीनां घातके । शाकुनिके ॥ त्रि । जीवनाशके ॥ जीवानां अन्तकः ॥
जीवाला । स्त्री । सैंहल्याम् ॥
जीवास्तिकायः । पुं । अनेकान्तवादिनां जीवपदार्थे ॥
जीविका । स्त्री । आजीवे । जीवनो-

पाये ॥ जीवन्त्याम् ॥ जीव्यते ऽनया । जीव० । गुरोश्चहलःइत्यः । संज्ञायां कन् । कुम्भा ॥

जीवितम् । न । प्राणने । जीवने ॥ त्रि । जीवनान्विते ॥ ब्रह्मादीनामपिजीवितं स्वल्पमेव ॥ यथा । ये समर्था जगत्यस्मिन् सृष्टिस्थित्यन्तकारिणः । तेपि काले प्रलीयन्ते कालोहिबलवत्तर इतिस्मृतेः ॥

जीवितकालः । पुं । जीवनावच्छिन्नकाले । आयुषि ॥ जीवितस्यकालः ॥

जीवितज्ञा । स्त्री । नाड्याम् ॥ हे०रा० ॥

जीविताशा । स्त्री । जीवनलोभे ॥ जीर्यंति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः । जीविताशा धनाशाच जीर्यतो ऽपिनजीर्यति ॥

जीवितेशः । पुं । यमे ।पितृपतौ ॥ प्राणनाथे ॥ चन्द्रे ॥ सूर्ये ॥ त्रि । जीवितेश्वरे ॥ प्रिये ॥ जीवितस्वामिनि ॥ जीवातौ ॥

जीवी । पुं । प्राणिनि ॥ जीविनां दारुणो रोगः कर्मभोगः शुभाशुभः । भक्तो वैद्यस्तं निहन्ति कृष्णभक्तिरसायनात् ॥

जीवेष्टिः । स्त्री । बृहस्पतिसवे ॥

जीवोत्पत्तिवादः । पुं । पाञ्चरात्राणां वादे ॥ तथा । ब्रह्मणोवासुदेवात्स्यात् जीवः सङ्कर्षणाभिधः । आयते च मन स्तस्मात् प्रद्युम्नाख्यं ततः पुनः ॥ अहङ्कारो ऽनिरुद्धाख्य श्चत्वारो विश्वरूपकाः । वासुदेवाराधनाद्यैर्जायतेवन्धमोचनमिति ॥

जीवोपाधिः । पुं । सुषुप्त्यादिषु ॥ त्रयो जीवोपाधयः । तथाहि । सुषुप्तौ बुद्ध्यादिसंस्कारोपरञ्जित मज्ञानमात्र मुपाधिः । स्वप्ने जाग्रद्वासनामयं लिङ्गशरीर मुपाधिः । जाग्रदवस्थायाम्तु सूक्ष्मशरीरसंसृष्टंस्थूलशरीरमुपाधिरिति ॥

जीव्या । स्त्री । गोक्षुरदुग्धायाम् ॥ जीवन्त्याम् ॥ हरीतक्याम् ॥

जुः । स्त्री । त्वरागमने ॥ सामान्यगमने ॥

जुगुप्सनम् । न । निन्दने ॥ त्रि । जुगुप्साशीले ॥ जुगुप्सते तच्छीलः । गुपेरनुदात्तेतश्चेतियुच् ॥

जुगुप्सा । स्त्री । निन्दायाम् ॥ घृणायाम् । घिन् इतिभाषा ॥ जुगुप्सनम् । गुपगोपनकुत्सनयोः । गुपेर्निन्दायांसन् । अप्रत्ययादिति भावेस्त्रियामः । टाप् ॥

जुगुप्सितः । त्रि । निन्द्ये ॥

जुङ्गः । पुं । वृन्दारके ॥ जुङ्गति । जुगिवर्जने । अच् ॥ जुङ्ग्यते वा । घञ् ॥

जुङ्गकः । पुं । वृन्दारकवृक्षे ॥ स्वाथ

कम् ॥

जुटकम् । न । जटायाम् ॥ इति शब्द रत्नावली ॥

जुटिका । स्त्री । शिखायाम् । चोटी-इति भाषा ॥ संहतकेशेषु ॥ जूडा जूटी इति भाषा ॥

जुषन् । त्रि । सेवमाने ॥

जुषमाणः । त्रि । प्रीयमाणे ॥ सेवमाने ॥

जुष्ककः । पुं । मुद्गयूषे ॥

जुष्टम् । न । उच्छिष्टे । झूठ झूंठ इति च भाषा ॥ त्रि । सेविते ॥ प्रीते । जुष्य ते स्म । जुषी प्रीतिसेवनयोः । क्तः ॥

जुष्यः । त्रि । सेव्ये ॥

जुहुराणः । त्रि । कुटिले ॥ चन्द्रे ॥ जुहूर्षति । हुर्च्छा कौटिल्ये । हुर्च्छेः सनोलुक् छलोपश्चेत्यानच् ॥ जुहुराणं कौटिल्यकारि इति भाष्यम् ॥

जुहुवान् । पुं । अनले ॥

जुहुवाणः । पुं । अध्वर्यौ ॥ जातवेदसि ॥ चन्द्रे ॥

जुहूः । स्त्री । स्रुग्भेदे । पलाशकाष्ठनिर्मिते ऽर्द्धचन्द्राकृतिरूपे यज्ञपात्रे ॥ पर्णमये यज्ञपात्रविशेषे ॥ जुहोति अनया वा । हुदानादनयोः । द्युतिगमि जुहोतीनां द्वे चेति क्विप् जुहोतेर्दीर्घश्च ॥ चैलोक्यात्मनः कोषस्य प्राग्भागे ॥ जुह्वत्यस्यां दिग्निकर्मि-

णः प्राङ्मुखाः सन्तः इति ॥

जूः । स्त्री । आकाशे ॥ सरस्वत्याम् ॥ पिशाच्याम् ॥ जवने ॥ जुः सौत्रोगतौ । भ्राज भासेति क्विप् दीर्घश्च । जूः जुवौ जुवः ॥ क्विब्वचिप्रच्छीत्यादिना क्विप् दीर्घौ वा ॥

जूटः । पुं । जटायाम् । जूडा इतिभाषा ॥ बन्धे ॥

जूटकः । पुं । न । केशबन्धे । जटायाम् ॥

जूतिः । स्त्री । जवने । वेगे ॥ जुः सौत्रो वेगे । क्तिन् । ऊतियूतीत्यादिना निपातनाद्दीर्घः ॥

जूतिका । स्त्री । कर्पूरविशेषे ॥

जूर्णः । पुं । उलपे ॥

जूर्णाख्यः । पुं । उलू इति गौडप्रसिद्धे तृणविशेषे । खरच्छदे । सूच्यग्रे ॥

जूर्णाह्वयः । पुं । देवधान्ये । जुवार इति भाषा ॥ इति हेमचन्द्रः ॥

जूर्णिः । स्त्री । वेगे ॥ आदित्ये ॥ ज्वरति । ज्वररोगे । वीज्याज्वरिभ्यो निः ॥

जूर्त्तिः । स्त्री । ज्वरे ॥ ज्वरणम् । ज्वर० । क्तिन् । ज्वरत्वरेत्यूठ् ॥

जूषः । पुं । न । यूषे ॥

जूषणम् । न । धातृपुष्प्याम् । धाइका फूल इतिभाषा ॥

जृम्भः । त्रि । मुखादिविकाशे । जृम्भायाम् ॥ जृम्भाख्यं समीरणात् ॥

पीत्वैकं श्वासमनिलः पुनस्त्यजति वेगवान् । आलस्यनिद्रायुक्तस्य स जृम्भ इति कथ्यते ॥ अस्य चिकित्सा । यथा । शुण्ठी पिप्पल्यूषणं दीप्यकश्च सिन्धूद्भूतं चेति सर्वं पृथग्वा । द्रूपं वा सूक्ष्मचूर्णीकृतं वा जृम्भाभङ्गस्तत्कृतः स्यात्तदैव ॥ जृम्भावेगे समुत्पन्ने शोभनेशयनेनरम् । स्वापयेत् तेन नियमाज्जृम्भावेगः प्रशाम्यति ॥ जृम्भावेगः क्षयं याति कटुतैलेन मर्द्दनात् । भोजनात् स्वादुभोज्यानां तथा ताम्बूलभक्षणादिति ॥ जृम्भणम् । जृभि० । घञ् ॥

जृम्भणम् । न । जृम्भे ॥ जृभिगात्रविनामे ॥ भावे ल्युट् ॥

जृम्भमाणः । त्रि । जृम्भां कुर्वाणे ॥ विवर्द्धमाने ॥

जृम्भा । स्त्री । विकाशे ॥ मुखविदारणे । जृम्भे ॥ जृभि० । गुरोश्चेष्यः । टाप् ॥

जृम्भिका । स्त्री । जृम्भे ॥

जृम्भितम् । न । स्त्रीणां करणे ॥ ईहायाम् । त्रि । चेष्टिते ॥ प्रवृद्धे ॥ जृम्भे ॥ स्फुटिते । प्राप्तविकाशे ॥ जृम्भः सञ्जातोऽस्य । तारकादित्वादितच् ॥

जृम्भिणी । स्त्री । एलापर्ण्याम् ॥

जेतुम् । अ । वशीकर्त्तुमित्यर्थे ॥

जेता । त्रि । जित्वरे । जैत्रे ॥ जयनशीलः । तृन् । तृच्वा ॥ विजितोत्कर्षो जेतुरुत्कर्षो भवति ॥ पुं । मधुच्छन्दसः पुत्रे ऋषिविशेषे ॥

जेन्ताकः । पुं । चरकोक्ते स्वेदविशेषे ॥

जेमनम् । न । भोजने । जीमना इति भाषा ॥ जमु अदने । ल्युट् ॥

जेयः । त्रि । जेतव्यमात्रके ॥ जेतुं योग्यः । अर्हे कृत्यतृचश्चेति योग्यतायामचो यत् ॥

जैत्रः । पुं । पारदे ॥ न । औषधे ॥ त्रि । जेतरि ॥ जेतैव । प्र० अण् । जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति ॥

जैत्ररथः । त्रि । जयशीले ॥ इति हलायुधः ॥

जैत्री । स्त्री । जयन्तीवृक्षे ॥

जैनः । पुं । जिनमतावलम्बिनि । बौद्धे ॥ जिनस्यायम् । अण् ॥

जैपालः । पुं । जयपालवृक्षे ॥

जैमिनिः । पुं । पूर्वमीमांसाचार्ये ऋषिविशेषे ॥ अयं सामवेदधरो वेदव्यासशिष्यो वज्रवारकः ॥ यथा । मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् । विद्युदग्निभयं नास्ति पठितेच गृहोदरे इति ॥

जैवम् । त्रि । जीवसम्बन्धिनि ॥ जीवस्येदम् । अण् ॥

जैवलिः । पुं । प्रवाहणे ॥ जीवलस्या

जोऽपत्यम् । इञ् ॥

जैवातृकः । पुं । ग्लावि । सोमे ॥ भेषजे ॥ कर्पूरे ॥ त्रि । आयुष्मति । दीर्घायुषि ॥ कृशे ॥ जीवति जीवयति वा । जीव० । जीवेरिच्यनु घृतौ आतृकन् इद्धिश्चेतिसाधुः ॥

जैह्माशिनेयः । पुं । जिह्माशिनोऽपत्ये ॥ शुभ्रादित्वाट्ढक् । दाण्डिनायनेतिटिलोपाभावः ॥

जैह्म्यम् । न । कुटिलत्वे ॥

जोङ्गकम् । न । अगुरुणि ॥ जुङ्गति जुङ्ग्यते वा । जुगिवर्जने । क्वुन् । पृषोदरादिः ॥

जोङ्गटः । पुं । गर्भिण्यभिलाषे । दोहदे ॥ इति हारावली ॥

जोटिङ्ग । पुं । महादेवे ॥ महाव्रतिनि ॥

जोडः । पुं । जोडने ॥ जोडनम् । जुड बन्धने । घञ् ॥

जोडनम् । न । बन्धने ॥

जोन्नालः । पुं । }
जोन्नाला । स्त्री । } देवधान्ये ॥

जोषणम् । न । सेवने ॥

जोषम् । अ । सुखे ॥ प्रशंसायाम् ॥ तूष्णीमर्थे ॥ लङ्घने ॥ जुषते । जुषते । वाहुलकाद्दम् ॥

जोषा । स्त्री । योषिति ॥ जुषते जुष्यते वा । जुषी प्रीतिसेवनयोः । घञ् घञ्वा ॥ ॰

जोषिका । स्त्री ॥ कलिकायाम् ॥

जोषित् । स्त्री । योषिति ॥ हृस्रुरुहियुषिभ्य इतिपाठे जुषेरितिः ॥

जोषिता । स्त्री । स्त्रियाम् ॥ जोष्यते स्म । णिजन्तात्कर्मणि क्तः ॥

जोष्यः । त्रि । प्रियेविषये ॥ जोष्यान् हि जुषतः काञ्चः संप्रासौऽ भिच्छतोमम ॥

जोह्लम् । न । } पञ्चमात्रस्यदि-
जोह्लकम् । न । } तीये (ऽ । ऽ) पर्याये ॥

ज्ञः । पुं । ब्रह्मणि । स्वप्रकाशे ॥ चान्द्रमसात्मने । बुधग्रहे ॥ विचक्षणे । विदुषि ॥ पद्मासने । चतुरानने ॥ भौमे ॥ जानाति । ज्ञा अवबोधने । इगुपधेतिकः । आतोलोपइटिचेत्या लोपः ॥

ज्ञपितः । त्रि । ज्ञप्ते ॥ ज्ञप्यतेस्म । ज्ञा मारणादौमित् । ण्यन्तःक्तः । वाद्दान्तशान्तेतिसाधुः ॥

ज्ञप्तः । त्रि । ज्ञपिते ॥ ज्ञप्यतेस्म । ज्ञा अवबोधने मारणादौचवर्तते । मारणादौमित् । ण्यन्तः । क्तः । वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः इतिसाधुः ॥

ज्ञप्तिः । स्त्री । बुद्धौ । मनोषायाम् ॥

ज्ञपयति । ज्ञपमिच्च । अयं ज्ञाने ज्ञापने मारणतोषणनिशामनेषु च वर्त्तते । चुरादिः । तत्र ज्ञानार्थकात् ज्ञपेरर्थान्तरत्वात् प्राप्तं युचं बाधित्वा बाहुलकात् क्तिन् ॥ ज्ञाने ॥ ज्ञातेस्तु कारणं राम शिष्यप्रश्नैककेवला ॥

ज्ञातः । त्रि । ज्ञानेन विषयीकृते । प्रतीते । बुद्धे । प्रमिते ॥ ज्ञा० । क्तः ॥

ज्ञातनन्दनः । पुं । वर्द्धमानार्हद्विशेषे ॥

ज्ञातव्यः । त्रि । अवगन्तव्ये । बोध्ये ॥ मन्तव्ये ॥

ज्ञातसिद्धान्तः । पुं । तान्त्रिके । शास्त्रतत्त्वज्ञे । तत्त्वार्थज्ञातरि ॥ ज्ञाताः सिद्धान्ता येन ॥ आगमभाषया सर्वसिद्धान्तोपरि विराजमाने कौले ॥ यथा । सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम् । वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥ दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् । सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हीति ॥

ज्ञातिः । पुं । ताते । पितरि ॥ पितृव्यादिपितृपक्षे । सगोत्रे । सपिण्डसहोदरादौ । स्वजने ॥ स चतुर्विधः । सप्तमपुरुषपर्य्यन्तं सपिण्डः । ततस्त्रिपुरुषपर्यंतं सकुल्यः । ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकः । जन्मनामज्ञातिपर्य्यन्तमपि समानोदकाः । ततःपरं गोत्रजः ॥ ज्ञातिद्रोहे दोषो यथा । यानि कानि च पापानि ब्रह्महत्यादिकानि च । ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोडशीम् ॥ जानाति । ज्ञा० । क्तिच् ॥ ज्ञायते वा । क्तिन् ॥

ज्ञाता । त्रि । ज्ञानशीले । विदुरे । ज्ञानिनि ॥ ज्ञानाश्रये । अहङ्कारादिप्रकाशकत्वेन चेतने ॥ जानाति । ज्ञा० । तृन् ॥ वृत्तिद्वारा विषयज्ञानवति ॥

ज्ञातेयम् । न । ज्ञातित्वे ॥ ज्ञातेर्भावः कर्म वा । कपिज्ञात्योर्ढक् ॥

ज्ञानः । पुं । जीवे ॥ शब्दासावमश्च । विषयान्जानाति प्राप्नोति चेत्यर्थः ॥

ज्ञानम् । न । विशेषेण सामान्येन चावबोधे ॥ पदार्थग्राहिकायां वृत्तौ ॥ यथा । ज्ञानंद्विधा वस्तुमात्रद्योतकं निर्विकल्पकम् । सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा ॥ सङ्कल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चयाः । ऊहोऽनध्यवसायश्च तथान्येऽनुभवा अपि ॥ इत्यादिभेदेनानेकविधाभवन्तीत्यर्थः ॥ सम्यगवबोधे ॥ न्यायमते । अप्रमाच प्रमाचेति ज्ञानं द्विविधमुच्यते । तच्छून्ये तन्मतिर्यास्यादप्रमा सानिरूपिता ॥ तत प्र

पञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः । आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ॥ भवेन्निश्चयरूपासा संशयोऽथ प्रदर्श्यते । किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ॥ तदभावाऽप्रकाराधीस्तत्प्रकारा तु निश्चयः ॥ स संशयो भवेद्या धीरेकत्राभावभावयोः । साधारणादिधर्म्मस्य ज्ञानं संशयकारणम् ॥ दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् । पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ॥ गुणः स्याद्भ्रमभिन्नस्तु ज्ञानमत्रोच्यते प्रमा । अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ॥ ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते । तत् प्रमा नाऽप्रमा नापि ज्ञानं यन्निर्विकल्पकम् ॥ प्रकारत्वादिशून्यं हि सम्बन्धानवगाहमात् ॥ इति भाषापरिच्छेदः ॥ * ॥ योगे तु । एकत्वं बुद्धिमनसो रिन्द्रियाणाञ्च सर्व्वशः । आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ॥ इति मोक्षधर्म्मः ॥ एकत्वं बुद्धिमात्रेणावस्थानम् बुद्धिवृत्तिनिरोध इति यावत् ॥ देवताध्यानादौ ॥ विवेकविज्ञाने । शास्त्राचार्य्योपदेशजे परमात्मविषये साक्षान्मोक्षफले आत्मनिश्चये ॥ तत्त्वज्ञाने ॥ शास्त्रे ॥

ज्ञानम्

मोक्षफलिकार्य्याधिधि ॥ जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूते नित्यस्वप्रकाशे सच्चिदानन्दरूपाद्वितीये परमार्थसत्ये ॥ आत्मानात्मसर्व्वपदार्थावबोधे ॥ विवेकसामर्थ्ये ॥ अहङ्ग्रहोपासने ॥ शब्दयुक्तिभ्यामात्मनिश्चये ॥ अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः ॥ इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु । नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरति र्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ सात्त्विकादिभेदात् तत् त्रिविधम् । यथा । सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ सात्त्विकं सर्व्वसंसारोच्छित्तिकारणम् ॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् । वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ यत्तु कृत्स्नवदेकस्मिन् कार्य्ये स-

ज्ञानहेतुकम् । अतत्त्वार्थवदल्पञ्च त
त्तामसमुदाहृतम् ॥ राजसं ताम
सञ्च संसारकारणम् ॥ आत्मनः श्र
वणमननाभ्यां परिनिष्पन्ने ॥ प्रमा-
णजन्यचेतोवृत्त्यभिव्यक्तसच्चिद्रूपे ॥
परमात्मध्यानसाधने ॥ शास्त्रादात्मत-
त्त्वावगमे ॥ आत्मसाक्षात्कारे ॥ सा
ङ्गवेदतदर्थविषयेऽवबोधे ॥ ब्रह्मात्मै
क्यसाक्षात्कारे ॥ * ॥ गुणपुरुषान्यता
ख्यातौ ॥ अध्यवसाये ॥ * ॥ महा-
वाक्यजन्याखण्डाकारायां वृत्तौ ॥ स्व
स्वरूपस्फुरणे ॥ ब्रह्मैवाहं समः शा-
न्तः सच्चिदानन्दलक्षणः । नाहं देहो
ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥
निर्विकारो निराकारो निरवद्यो
ऽहमव्ययः । नाहं० ॥ निरामयो नि
राभासो निर्विकल्पोऽहमाततः । ना
हं० ॥ निर्गुणो निष्क्रियो नित्यो नि
त्यमुक्तोऽहमच्युतः । नाहं० ॥ नि
र्मलो निश्चलोऽनन्तः शुद्धोऽहमजरा
मरः । नाहं० ॥ लोकवासनया जन्तोः
शास्त्रवासनयापि च । देहवासनया
ज्ञानं यथावन्नैव जायते ॥ * ॥ ज्ञा
नमुत्पद्यते पुंसां क्षयात् पापस्य कर्म
णः । यथा दर्पणतलप्रख्ये पश्यत्या-
त्मानमात्मनि ॥ वेदे ॥ ज्ञायते ऽने
न । ज्ञा० । करणे ल्युट् ॥ सम्यग्ज्ञप्ति

रेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु । य
देकं केवलं ज्ञानं तदेवास्मि परं बृ
हत् ॥ ज्ञानाग्निनाविलासोयं ज्ञान-
ध्यानेन शाम्यति । ज्ञानात् ज्ञानं परि
त्यज्य ज्ञानमेवावशिष्यते ॥

ज्ञानगम्यम् । न । ज्ञेये ब्रह्मणि ॥ ज्ञा
नेन अमानित्वादिनासाधनकलापेन
ज्ञानहेतुतया ज्ञानशब्दितेन गम्यं
प्राप्यं ज्ञेयं ब्रह्म न तु तद्विना ॥ ज्ञानेन
गम्यते । गम्लृ० । पोरदुपधादितियत् ॥
त्रि । परमेश्वरे । परमात्मनि ॥ नक
र्मणा न ज्ञानकर्मभ्यां गम्यते किन्तु
ज्ञानेनैवगम्यत इति सहस्रनामभा
ष्यम् । विवृतञ्चैतत् तारकब्रह्मज्ञान
न्सरस्वतीयतिना ॥ यथा । ज्ञानेनै
व गम्यो ज्ञानगम्यः । सर्ववाक्यं साव
धारणमितिन्यायात् ज्ञानेनैवेत्यव
धारणलाभ इत्यभिप्रेत्याह । नकर्म
णेति । अनेन केवलकर्मणां साक्षा
न्मोक्षसाधनत्वं व्यावर्त्यते । नज्ञान
कर्मभ्यामित्यनेन समुच्चयो वार्यत
इति ॥

ज्ञानतपाः । पुं । विदुषि । आत्मविदि
॥ ज्ञानमेवतपः सर्वकर्मक्षयहेतुर्यस्य
सः । नहिज्ञानेन सदृशं पवित्रमिह
विद्यते ॥

ज्ञानदग्धशरीरः । त्रि । सर्वसङ्गनिवृ-

त्येभिक्षो ॥ ज्ञानदग्धशरीरस्य पुन
र्दाहो नास्तीत्युशनाः । सर्वस
ङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न
तस्य दहनं कार्यं नैवपिण्डोदकक्रि
या ॥ निदध्यात् प्रणवेनैव बिले भि
क्षोः कलेवरम् । प्रोक्षणं खननञ्चा
पि सर्वं तेनैवकारयेत् ॥

ज्ञानदर्पणः । पुं । पूर्वजिने । मञ्जुघोषे ॥

ज्ञानदा । स्त्री । शारदायाम् ॥ ज्ञानं
ददाति । डुदाञ्० । आतदूतिकः
॥ त्रि । ज्ञानप्रदातरि ॥

ज्ञानदाता । पुं । ब्रह्मोपदेष्टरि श्रीगुरौ
॥ पितुर्दशगुणा माता गौरवेणेति
निश्चितम् । मातुः शतगुणः पूज्यो
ज्ञानदाता गुरुः प्रभो ॥ ज्ञानस्य
दाता ॥

ज्ञानदीपः । पुं । दीपसदृशज्ञाने ॥
स्वप्रकाशचैतन्यानन्दाद्वितीयस्वरूप-
आत्मा सएव सविषयान्तःकरणपरि
णामरूपोदीपउच्यते ॥ ज्ञानं दी-
पइव ॥

ज्ञानदीपितः । त्रि । ज्ञानेनप्रकाशिते
॥ध्यानपूर्वकसमाधौ॥ ज्ञानं वेदान्तशा
स्त्रजन्यो ब्रह्मात्मैक्यसाक्षात्कारः तेन
अविद्यातत्कार्यनाशद्वारादीपितः प्र
त्यक्तोज्ज्वलितः ॥

ज्ञाननिर्धूतकल्मषः । त्रि । अवधूताप

रमहंसे ॥ ज्ञानेन निर्धूतं समुन्मू
लितं पुनर्देहसम्बन्धकारणं कल्मषं
पुण्यपापात्मकं कर्म यस्य ॥

ज्ञाननिष्ठः । त्रि । ज्ञानिनि ॥ ज्ञाने नि
ष्ठाऽस्य ॥

ज्ञानप्लवः । पुं । ज्ञानपोते ॥

ज्ञानमयः । पुं । शिवे ॥ त्रि । अखण्ड
ब्रह्माकारे प्रकाशस्वरूपे ॥ ज्ञानं
तत्त्वतः समस्तपदार्थावबोधस्तदा-
त्मकः ॥

ज्ञानयज्ञः । पुं । न्यायेन वेदार्थनिश्चय
परे ॥ ब्रह्माग्नावपरे यज्ञं यज्ञेनैवो
पजुह्वति । ब्रह्माग्नौ सत्यज्ञानान
न्तानन्दरूपं निरस्तसमस्तविशेषं ब्र-
ह्म तत्पदार्थः तस्मिन्नग्नौ यज्ञं प्र-
त्यगात्मानं त्वं पदार्थम् यज्ञेनैव य
ज्ञशब्दःआत्मनामसु यास्कनपठितः
इत्थम्भूतलक्षणे तृतीया एवकारो भे
दाभेदव्यावृत्त्यर्थः त्वंपदार्थाभेदेनै
वोपजुह्वति तत्स्वरूपतया पश्यन्ती
त्यर्थः । अपरे पूर्वस्मात् कर्मयोगि
नो विलक्षणास्तत्त्वदर्शननिष्ठाःसन्न्या
सिनइत्यर्थः ॥ * ॥ महापापवतां
नृणां ज्ञानयज्ञो न रोचते । प्रस्तुत
ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वतः ॥
भोगसारत्वविभ्रान्त्या ज्ञाने भोगी
घृणातिमि । प्रद्वेषोऽशुद्धचित्तस्य

अज्ञापापवनोभवेत् ॥

ज्ञानयोगः । पुं । निष्ठाविशेषे । ज्ञानमेव ब्रह्मणा युज्यते इति ज्ञानयोगनिष्ठायाम् ॥ ब्रह्मज्ञानप्राप्त्युपाये

ज्ञानयोगव्यवस्थितिः । स्त्री । जीवन्मुक्तौ ॥ आत्मसाक्षात्कारमनोनाशवासनाक्षयानुकूलपुरुषप्रयत्नाभ्यां विशिष्टासंसारविलक्षणावस्थितिः ॥

ज्ञानलक्षणा । स्त्री । विविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षे ॥ तल्लक्षणं यथा । विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणेति । अस्यार्थः । तद्विषयज्ञापकतद्विषयज्ञानम् । यथा पूर्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम् ॥

ज्ञानवान् । त्रि । ज्ञानिनि ॥ ब्रह्मविदि ॥ ज्ञानमस्यास्ति । मतुप् ॥

ज्ञानवापी । स्त्री । काश्यन्तर्गततीर्थविशेषे । ज्ञानोदतीर्थे ॥

ज्ञानसाधनम् । न । इन्द्रिये ॥

ज्ञानसिद्धिः । स्त्री । ब्रह्मात्मैक्यबोधे ॥

ज्ञानस्कन्धः । पुं । निर्विकल्पके ॥

ज्ञानस्वरूपः । पुं । जीवे ॥ ज्ञास्यावन् स । विषयान् जानाति प्राणितिच । तादृशस्वरूपोजीवः ॥

ज्ञानाग्निदग्धकर्मा । त्रि । पण्डिते ॥ कर्मादावकर्मादिदर्शनं ज्ञानं तदेवा

ग्नि स्तेन दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य सः ॥

ज्ञानापोहः । पुं । विस्मरणे ॥

ज्ञानाभ्यासः । पुं । श्रवणाद्यावृत्तौ ॥ तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् । एतदेकपरत्वञ्च ज्ञानाभ्यासं विदुर्बुधाः ॥ सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत् सदा । इदं जगदहञ्चेति बोधाभ्यासं विदुः परम् ॥

ज्ञानावस्थितचेताः । पुं । स्थितप्रज्ञे ॥ निर्विकल्पकब्रह्मात्मैक्यबोध एवाऽवस्थितं चेतो यस्य सः ॥

ज्ञानासिः । पुं । आत्मविषयकनिश्चयखड्गे ॥

ज्ञानी । त्रि । पदवाक्यन्यायादिज्ञाननिपुणे । तत्त्वदर्शिनि । कृतसाक्षात्कारे ॥ परोक्षज्ञानवति ॥ स्वतोऽपरोक्षं ज्ञानमसम्भावनादिप्रतिबन्धेन फलमजनयन् परोक्षमित्युपचर्यते ॥ भगवत्तत्त्वसाक्षात्कारो ज्ञानं तेन नित्ययुक्ते ॥ तीर्थमाये । निवृत्तसर्वकामे । निष्कामभक्ते । तत्त्वज्ञानवति ॥ ज्ञानिनां हृदयाम्भोजे हृल्लेखा परमेश्वरीति देवीगीता ॥ पुं । दैवज्ञे ॥ ज्ञानमस्यास्ति । अतइनिठनाविति इनिः ॥

ज्ञानेन्द्रियम् । न । धीन्द्रियेषु । श्रोत्र

त्वक्चक्षुर्जिह्वाघ्राणाख्येषु ॥ एता न्याकाशादीनां सात्त्विकांशेभ्यो व्य स्तेभ्यः पृथक् पृथक् क्रमेणोत्पन्नानि ॥ यथोक्तं देवीभागवते । पञ्चभूतस्थस त्त्वांशैः श्रोत्रादीनां समुद्भवः । ज्ञाने न्द्रियाणां राजेन्द्र प्रत्येकमिति ॥ ज्ञा नसाधनमिन्द्रियम् ज्ञानार्थमिन्द्रियं-वा ॥ क्रमशो दिग्वातार्कप्रचेतोऽश्वि नौज्ञानेन्द्रियाणां देवताः ॥ शब्दस्प र्शरूपरसगन्धाश्च क्रमशो ज्ञानेन्द्रि याणां विषयाः ॥

ज्ञापकम् ॥ त्रि । गमके । बोधके ॥ नि दर्शने ॥ ज्ञापयति । ज्ञा० ण्वुल् ॥

ज्ञापनम् । न । बोधने । जनावना इति भाषा ॥

ज्ञापिका । स्त्री । बोधिकायाम् ॥

ज्ञापितः । त्रि । लक्षिते ॥ सूचिते ॥ प्रबोधिते ॥

ज्ञीप्स्यमानः । त्रि । बोधयितुमिष्टेर्थे ॥

ज्ञेयम् । त्रि । वेदितव्ये । ज्ञानविषये । ज्ञानकर्मणि ॥ अज्ञातत्वात् ज्ञातु मर्हे ब्रह्मणि ॥ जडस्य ज्ञानत्वाभावेन ज्ञातुमनर्हत्वात् ॥ * ॥ ज्ञेयं यत् तत् प्रवक्ष्यामि यद् ज्ञात्वाऽमृतमश्नुते । अनादिमत् परम्ब्रह्म न सत् तन्ना सदुच्यते ॥ सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रु

तिमल्लोके सर्व मावृत्य तिष्ठति ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविव-र्जितम् । असक्तं सर्वभृच्चैव निर्गु णं गुणभोक्तृच ॥ वहि रन्तश्च भूता ना मचरं चरमेवच । सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिकेच तत् ॥ अविभक्तं विभक्तेषु विभक्त मिव चस्थितम् । भूतभर्त्तृच तज्ज्ञेयं ग्र सिष्णु प्रभविष्णु च ॥ ज्योतिषा मपि तज्ज्योति स्तमसः पर मुच्यते । ज्ञा नं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धि ष्ठितम् ॥ ज्ञातुं योग्यम् । ज्ञा० । अ चोयत् । ईयति । गुणः ॥

ज्या । स्त्री । मातरि ॥ वसुधायाम् ॥ मौर्व्याम् । धनुर्गुणे ॥ जिनाति । ज्या वयोहानौ । अघ्न्यादित्वात् यग न्तोनिपातितः ॥ अन्येभ्योपीति डो-वा । टाप् ॥

ज्याघातवारणम् । न । गोधायाम् । त ले ॥ ज्यायाः शिञ्जिन्या गुणस्य आ-घात स्तस्य वारणम् ॥

ज्यानिः । स्त्री । जीर्णे ॥ हानौ ॥ नदि न्याम् ॥ ज्यानम् । ज्या० । ग्लाज्याहा भ्योनिः ॥ यद्वा । जिनाति । ज्या० । वीज्याज्व रिभ्योनिः ॥

ज्यायान् । त्रि । अतिवृद्धे । वर्षीयसि ॥ अति प्रशस्ते ॥ अयमनयो रतिश

येन वृद्धः प्रशस्यो वा । ज्य च वृद्धस्य च । द्विवचनेतीयसुनि वृद्धप्रशस्ययो ज्यादेशः । ज्यादादीयस इत्यात्वम् ॥

ज्यायसी । स्त्री । अतिप्रशस्तायाम् ॥ वृद्धायाम् ॥ ज्येष्ठायाम् ॥ ङीप् ॥

ज्येष्ठः । पुं । शुक्रे । ग्रीष्मर्त्तोः प्रथमे मासि ॥ ज्येष्ठी पूर्णमास्य ऽस्मिन् । साऽस्मिन् पौर्णमासीत्यण् । संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः ॥ त्रि । अतिवृद्धे ॥ श्रेष्ठे ॥ अयमेषामतिशयेन वृद्धः प्रशस्यो वा । अतिशायने तमबिष्ठनाविती ष्ठनि वृद्धस्य च ज्य चेत्यनेनच वृद्धप्रशस्ययोर्ज्यादेशः ॥ अग्रजे ॥

ज्येष्ठतातः । पुं । पितुरग्रजे ॥ तातस्य ज्येष्ठः । राज० ज्येष्ठस्यपूर्वनिपातः ॥

ज्येष्ठवर्णः । पुं । ब्राह्मणे ॥ वर्णानां ज्येष्ठः । राज० ॥ कर्मधारयो वा ॥ त्रि । श्रेष्ठवर्णे ॥

ज्येष्ठवला । स्त्री । सहदेव्याम् ॥

ज्येष्ठश्वश्रूः । स्त्री । कुल्याम् । पत्न्या ज्येष्ठभगिन्याम् । बडीसाली इति जेठसास इति च भाषा ॥

ज्येष्ठसामगः । पुं । ज्येष्ठसाम्नांगातरि ॥ तानि च आरण्यके गीयन्ते ॥

ज्येष्ठसाम । न । सामप्रभेदे । आरण्यके गीयमाने सामनि ॥ तद्व्यञ्जना कृष्यते ॥

ज्येष्ठस्थानम् । न । तीर्थविशेषे ॥ अत्र महादेवस्तिष्ठति ॥

ज्येष्ठा । स्त्री । अश्विन्यादिष्वष्टादशे नक्षत्रे ॥ सत्कीर्त्तिपुत्रैर्विविधैः समेतो वित्तान्वितोऽत्यन्तलसत्प्रतापः । श्रेष्ठप्रतिष्ठो विकलस्वभावो ज्येष्ठा भवेद्यस्य च जन्मकाले ॥ गृहगोधायाम् ॥ मध्यमाङ्गुलौ ॥ गङ्गायाम् ॥ अलक्ष्म्याम् ॥ नायिकाभेदे । परिणीतत्वे सति भर्त्तुरधिकस्नेहायाम् ॥ प्रथमजायाम् ॥ ज्येष्ठस्त्रियाम् ॥ ज्येष्ठस्यस्त्री । पुंयोगलक्षणङीषं बाधित्वाअजादित्वाट्टाप् ॥

ज्येष्ठामूलीयः । पुं । ज्येष्ठे ॥ ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्वजम् ॥

ज्येष्ठाम्बु । न । तण्डुलाम्बुनि । मण्डे ॥

ज्येष्ठाश्रमः । पुं । गृहिणि ॥ यस्मात्त्रयोप्याश्रमिणो ज्ञानेनान्नेन चाऽन्वहम् । गृहस्थेनैव धार्यन्ते तस्माज् ज्येष्ठाश्रमो गृही ॥ ज्येष्ठ आश्रमो यस्य । कर्मधारयो वा ॥

ज्येष्ठाश्रमी । पुं । गृहस्थे । गृहस्थो ब्रह्मचारी च वानप्रस्थोथभिक्षुकः । चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः ॥ ज्येष्ठश्चासावाश्रमी च ॥

ज्येष्ठी । स्त्री । गृहगोधायाम् । छिपकली इति भाषा ॥

ज्येष्ठः । पुं । ज्येष्ठमासे । शुक्रे ॥ विदेशरतिः पुरुषः सुतीव्रः क्षमान्वितः स्यात् खलु दीर्घसूत्रः । विचित्रबुद्धिं विदुषां वरिष्ठो ज्येष्ठाभिधाने जननं हि यस्य ॥ ज्येष्ठीपूर्णमास्यस्मिन् । साऽस्मिन् पौर्णमासीत्यण् ॥

ज्येष्ठिनेयः । पुं । ज्येष्ठाया अपत्ये ॥ कल्याण्यादित्वात् ढक् इनङादेशश्च ॥

ज्यैष्ठी । स्त्री । ज्येष्ठपूर्णिमायाम् ॥ ज्येष्ठयायुक्ता पौर्णमासी । नक्षत्रेणयुक्तः कालइत्यण् । ततोङीप् ॥ गृहगोधायाम् ॥

ज्यैष्ठ्यम् । न । ज्येष्ठत्वे ॥ यथा । विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्यतः । वैश्यानां धान्यधनतः शूद्राणामेवजन्मतइतिमनुः ॥

ज्योक् । अ । कालभूयस्त्वे ॥ प्रश्ने ॥ शीघ्रार्थे ॥ सम्प्रत्यर्थे ॥

ज्योतिरिङ्गः । पुं । खद्योते ॥

ज्योतिरिङ्गणः । पुं । तमोमणौ । खद्योते ॥ ज्योतिर्नेत्रं तदद्भिरिङ्गति । इगि गतौ । बहुलमन्यत्रार्थेऽपीतियुच् ॥

ज्योतिर्मोक्षहृदः । पुं । तीर्थविशेषे ॥

ज्योतिर्विंत् । पुं । कालपरमार्थवादिनि ॥

ज्योतिर्व्वीजम् । न । खद्योते ॥

ज्योतिश्चक्रम् । न । चन्द्रसूर्यादिग्रहनक्षत्रमण्डले । राशिचक्रे ॥ सप्तविंशतिभं ज्योतिश्चक्रं स्तिमितवायुगम् । तदष्टांशो भवेद्राशि र्नवर्क्षचरणाङ्कितः ॥

ज्योतिश्शास्त्रम् । न । ग्रहनक्षत्रादीनां तत्त्वनिर्णायके शास्त्रे ॥ सिद्धान्त संहिताहोरारूपस्कन्धत्रयात्मकम् । वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम् ॥ विनैतदखिलं श्रौतस्मार्त्तं कर्म न सिद्ध्यति । तस्माज्जगद्धितायेदं ब्रह्मणानिर्मितं पुरा ॥ अतएवद्विजैरेतदध्येतव्यं प्रयत्नतः ॥

ज्योतिषम् । न । वेदाङ्गविशेषे ॥ ग्रहगणादिगणनशास्त्रे । पञ्चस्कन्धमिदंशास्त्रं होरागणितसंहिताः । केरलिःशकुनंचेति ज्योतिश्शास्त्रमुदीरितम् ॥ वेदाहि यज्ञार्थ मभिप्रवृत्ताः कालानुपूर्व्या विहिताश्चयज्ञाः । तस्मादिदं कालविधानशास्त्रं योज्योतिषं वेद सवेदयज्ञान् ॥ यथा शिखा मयूराणां नागानां मणयो यथा । तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्धिसंस्थितम् ॥ केवलोभाद्य मोहाद्य योऽविप्रो ऽज्ञानतोपिवा । शूद्राणामुपदेशन्तु दद्यात् सनरकं व्रजेत् ॥ ज्योतिश्चक्राधिष्ठातृदेवताः । सूतेय

ज्योतिष्ठ — ज्योत्स्न:

ज्ये इत्यस्य । संज्ञापूर्वकत्वाद्वृद्धि: ॥
ज्योतिषी । स्त्री । तारायाम् ॥
ज्योतिष्क: । पुं । चित्रकवृक्षे ॥ मेथिका बीजे ॥ गणिकारिकावृक्षे ॥ पुंभूम्नि । ज्योतिष्का: । चन्द्रार्कग्रहनक्षत्र तारकासु ॥ न । मेरो:शृङ्गान्तरे ॥ तदीयभागे तस्याद्र: शृङ्गमादित्य सन्निभम् । यत्तज्ज्योतिष्कमित्याहु:सदापशुपते: प्रियम् ॥ तस्या:प्रख्यातं ईशानभागे ॥
ज्योतिष्टोम: । पुं । षोडशर्त्विक्साध्ये यज्ञविशेषे ॥ अग्निष्टोमस्तोमोर्ध्व वाभवति ॥ ज्योतींषि स्तोमा यस्य यज्ञस्य सोयं ज्योतिष्टोम: । ज्योतिरायुष: स्तोम इतिषत्वम् । सलोप: ॥
ज्योतिष्मान् । पुं । सूर्ये ॥ प्लक्षद्वीपस्थेऽद्रिविशेषे ॥ त्रि । दीप्तियुक्ते ॥ ज्योतिरस्यास्ति । मतुप् ॥
ज्योतिष्मती । स्त्री । पारावतांघ्र्याम् । कटभ्याम् । मालकांगणी इतिभाषा ॥ ज्योतिष्मती कटु स्तिक्ता सरा कफ समीरजित् । अत्युष्णा वामनी ती क्ष्णा वह्निबुद्धिस्मृतिप्रदा ॥ रात्रौ ॥ उगित्त्वान् ङीप् ॥
ज्योतिष्ठ । अग्नौ ॥ दिवाकरे ॥ मेथिका याम् ॥ न । दृष्टौ । नेत्रकनीनिकामध्ये ॥ अग्नेये ॥ प्रकाशे ॥ नक्षत्रादिभा

ज्योतन:
सत्त्वे प्रभृत्यपि चैतन्ये । आदित्यादीनां वृक्षादीनाञ्च बाह्यानामान्तराणामपि जडज्योतिषां चैतन्यज्योतिषोऽवभासकत्वोपपत्ते: ॥ विज्ञाने ॥ द्योतते द्योतनं वाऽनेनवा । द्युत० । द्युतेरिसिन्नादेश्चज: ॥
ज्योतीरथ: । पुं । ध्रुवे । औत्तानपादौ ॥
ज्योत्स्ना । स्त्री । चन्द्रातपे ॥ ज्योतिस्संयुक्तनिशि ॥ कौमुद्याम् ॥ सितपक्षे रात्र्याम् ॥ ज्योतिरस्त्यस्या: । ज्योत्स्नातमिस्रेत्यादिना ज्योतिषउपधालोपो नप्रत्ययश्च निपात्यते ॥
ज्योत्स्नाप्रिय: । पुं । चकोरे ॥
ज्योत्स्नावृक्ष: । पुं । दीपाधारविशेषे ॥
ज्योत्स्नी । स्त्री । पटोलिकायाम् । चचेंडा इति प्रसिद्धे दीर्घफले ॥ चन्द्रिकायुक्तायां रात्रौ । चांदनीरात इति भाषा ॥ रेणुकानामगन्धद्रव्ये ॥ ज्योत्स्नाऽस्त्यस्या: । ज्योत्स्नादिभ्यउपसंख्यानमित्यण् । संज्ञापूर्वकत्वाद्वृद्ध्यभाव: । ङीप् ॥
ज्योतिषिक: । पुं । दैवज्ञे । कालपरमाण्वादिज्ञे ॥ ज्योतिषमधीते वेदवा । क्रतूक्थादीति ठक् ॥
ज्यौत्स्न: । पुं । शुक्लपक्षे ॥ ज्योत्स्नाऽस्मिन्नस्ति । ज्योत्स्नादिभ्यश्च ॥ त्रि । दीप्ते । ज्योत्स्नायुक्ते ॥

ज्यौत्स्निका । स्त्री । चन्द्रिकायुक्तायां रात्रौ ॥ पटोल्याम् ॥

ज्यौत्स्नी । स्त्री । ज्योत्स्नया युक्तायां रात्रौ ॥ ज्योत्स्न्याम् ॥ अणन्तत्वान्ङीप् ॥

ज्वरः । पुं । स्वनामप्रसिद्धे रोगे । जूर्त्तौ । रोगपृष्ठे । महागदे ॥ तस्योत्पत्तिः संख्याचोक्ता भिषग्भिः । दक्षापमानसंक्रुद्धरुद्रनिश्वाससम्भवः । ज्वरोऽष्टधा पृथग्द्वन्द्व संघातागन्तुजः स्मृतइति ॥ तथाहि । वातिकः पैत्तिकश्चैव कफजो वातपित्तजः । वातश्लेष्मप्रभूतश्च पित्तश्लेष्मोद्भवस्तथा ॥ संघातागन्तुजा वेवं ज्वरोऽष्टविधउच्यत इति ॥ अपिच । जनकः सर्वरोगाणां दुर्वारो दारुणो ज्वरः । शिवभक्तश्च योगीच सएव विकृताकृतिः ॥ भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः । भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥ मन्दाग्निस्तस्यजनको मान्द्यमेर्जनकास्त्रयः । पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥ इत्यादि वैद्यशास्त्रतो विशेषोऽवगन्तव्यः ॥ ज्वरणम् । ज्वररोगे । घञ् । संज्ञापूर्वकत्वात् वृद्ध्यभावः ॥ ज्वरति । अच् वा ॥ सन्तापहेतुत्वाच्छोके ॥ ज्वरमुक्तस्य लक्षणं यथा ।- स्वेदो लघुत्वं शिरसः कण्डूः पाको

मुखस्य च । क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ॥

ज्वरघ्नः । पुं । गुडूच्याम् ॥ वास्तूके ॥ त्रि । ज्वरनाशके ॥

ज्वरघ्नी । स्त्री । } मञ्जिष्ठायाम् ॥
ज्वरहन्त्री । स्त्री । }

ज्वराग्निः । पुं । आधिमन्थवे । ज्वररूपाग्नौ ॥

ज्वराङ्गी । स्त्री । भद्रदन्तिकायाम् ॥

ज्वरान्तकः । पुं । नेपालनिम्बे ॥ आरग्वधे ॥ औषधविशेषे ॥ त्रि । ज्वरनाशके ॥

ज्वरापहा । स्त्री । बिल्वगुल्म्याम् । बिल्वपत्र्याम् ॥ त्रि । ज्वरनाशके ॥

ज्वरारिः । पुं । ज्वरघ्नौषधविशेषे ॥

ज्वरितः । त्रि । ज्वरिणि ॥ ज्वरः सञ्जातोऽस्य । तारकादित्वादितच् ॥

ज्वरी । त्रि । ज्वरयुक्ते ॥ गुर्वभिष्यन्दि काले वा ज्वरी नाद्यात् कथञ्चन ॥

ज्वलः । पुं । ज्वाले । दीप्तौ ॥ त्रि । दीप्तिविशिष्टे ॥ ज्वलति । ज्वल दीप्तौ । अच् ॥

ज्वलका । स्त्री । अग्निशिखायाम् ॥ इति हेमचन्द्रः ॥

ज्वलत् । त्रि । दीप्तिमति ॥

ज्वलनः । पुं । अग्नौ ॥ चित्रकवृक्षे ॥ त्रि । दहने ॥ ज्वलति । ज्वल० । कुच

उक्तम्यदन्तम्यह्मर्षिज्वलसुचकषप-
तपदः इति ताच्छील्यादिषुवुञ् ॥

ज्वलनाश्मा । पुं । सूर्यकान्तमणौ ॥

ज्वलितः । त्रि । दग्धे ॥ उज्ज्वले ॥ भा-
स्करे ॥ उज्ज्वलिते ॥ ज्वल० । क्तः ॥

ज्वलिनी । स्त्री । मूर्वालतायाम् ॥

ज्वालः । पुं । अग्निशिखायाम् ॥ त्रि ।
दीप्तिविशिष्टे ॥ ज्वलति । ज्वल० ।
ज्वलितकसन्तेभ्योणः ॥

ज्वाला । स्त्री । अग्निशिखायाम् ॥ टाप् ॥

ज्वालागर्दभकः । पुं । जालगर्दभरोगे ॥

ज्वालाजिह्वः । पुं । अग्नौ ॥

ज्वालामरिचम् । न । रक्तमरिचे । पि
पली लालमरिच इत्यादि भाषा ॥

ज्वालामुखी । स्त्री । जालन्धरपीठान्त-
र्गतपीठस्थानविशेषे ॥ तत्र भगवत्या
जिह्वापतिता । तत्राम्बिका देवी ।
उन्मत्तनामको भैरवश्च ॥ तथाहि ।
ज्वालामुख्यां महाजिह्वा देव उन्म-
त्तभैरवः । अम्बिका सिद्धिदानाम्नी
स्तनं जालन्धरे मसेति तन्त्रचूडाम
णिः ॥ देव्यन्तरे ॥ ज्वालामुखं यस्याः ॥

ज्वालिका । स्त्री । ज्वालायाम् । जाल
इति भाषा ॥

झः

झः । पुं । झञ्झानिले ॥ सुरगुरौ ॥ दै-
त्यराजे ॥ ध्वनौ ॥ झञ्झावाते ।
झंखड इतिख्याते । प्रचण्डानिले ॥
वृष्टौ ॥ त्रि । नष्टवसुनि ॥

झगझगायमानः । त्रि । चाकचिक्य
युक्ते ॥

झगिति । अ । शैघ्ये ॥

झङ्कारः । पुं । भ्रमरादिसमूहशब्दे ॥

झङ्कृतिः । पुं । कांस्यतालादिध्वनौ ॥

झञ्झा । स्त्री । वाते ॥ तारवादौ ॥
नष्टे ॥ ध्वनिविशेषे ॥ अनुकरणशब्दे ॥

झञ्झानिलः । पुं । प्रावृषिकवायौ ॥

झञ्झावातः । पुं । झञ्झानिले ॥

झटा । स्त्री । भूम्यामलक्याम् । शितु-
मकौषधौ ॥ अव्यते । झटसङ्घाते ।
घञ् । संज्ञापूर्वकत्वान्नवृद्धिः ॥

झटिः । पुं । क्षुद्रवृक्षे ॥ झट० । इन् ॥

झटिति । अ । शीघ्रार्थे । तत्क्षणार्थे
॥ झट० । सम्पदादित्वात् क्विप् । झट
मेति । इण्० । क्तिच् ॥

झणत्कारः । पुं । } कङ्कणादिध्वने र-
झनत्कारः । पुं । } नुकरणशब्दे ॥

झम्पः । पुं । सम्पातपतने । लम्फे ॥ स्वे
च्छाधीनपतने ॥

झम्पारुः । पुं । वानरे ॥

झम्पाशी । पुं । मत्स्यरङ्गविहङ्गमे ॥

झंम्पी । पुं । वानरे ॥

झरः । पुं । निर्झरे । उत्सान्निर्गते गिरिवारिप्रवाहे ॥ झरणम् । झृष व योहानौ । कर्त्तरि अच् ॥

झरा । स्त्री । झरे । निर्झरे ॥ षित्वात् टाप् ॥

झरिः । स्त्री । झरे ॥ झरणम् । झृष० । अच् इः ॥

झरी । स्त्री । गिरिवारिप्रवाहे ॥ कृदिकारादक्तिन इति ङीष् ॥

झर्झरः । पुं । कलियुगे ॥ वाद्यभाण्डविशेषे । बड़ीझाँझ इतिभाषा ॥ गौडास्तु चर्म्मपुटाच्छादितकाष्ठस्थाने इति वारड इतिख्यातेच । डिण्डिमोऽथ झर्झरी प्रोक्तो झर्झरः पटहः स्मृतः । इति तत्पर्य्यायाः । झल्लकी झल्ली झल्लरी झर्झरी इतिशब्दरत्नावलीप्याहुः ॥

नेपालभाषया झ्यालीति प्रसिद्धे कांस्यवाद्ये ॥ नदविशेषे ॥ झञ्झर इति प्रसिद्धे जलपात्र विशेषे ॥ झरणा झञ्झरी इतिच ख्याते पाकसाधने लौहद्रव्ये ॥ झर्झ इति शब्दं राति । आतोनुपेति कः ॥ यद्वा । झर्झति । झर्झ परिभाषणभर्त्सनयोः । बाहुलकात् अरः ॥

झर्झरकः । पुं । कलियुगे ॥ स्वार्थबोधकेषु झर्झरशब्दार्थेषु ॥ कः ॥

झर्झरा । स्त्री । वेश्यायाम् ॥

झर्झरिका । स्त्री । रोटिकाविशेषे ॥ यथा । धूमसीरचिता रोटी प्रोक्ता झर्झरिकाबुधैः । झर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृतेति ॥

झर्झरी । स्त्री । झर्झरवाद्ये ॥ झाँझरी इति ख्याते स्वल्पेऽरिवाद्ये ॥ धूमसी रोटिकायाम् ॥

झर्झरीकः । पुं । न । शरीरे ॥ झर्झति । झर्झ परिभाषणभर्त्सनयोः । पर्फरीकादित्वात् साधुः ॥

झलज्झला । स्त्री । हस्तिकर्णास्फालने ॥

झल्लरी । स्त्री । हुडुक्के । झर्झरवाद्ये ॥ बालकुन्तले । केशवक्रे ॥

झषा । स्त्री । नागबलौषधौ ॥ कन्यायाम् ॥

झल्लः । पुं । व्रात्यात् क्षत्रियात् सवर्णायामुत्पन्नवर्णसङ्करजातिविशेषे ॥ करणे । मल्ले ॥ भाँड इति प्रख्याते प्रहासके ॥

झल्लकम् । न । कांस्यनिष्पन्ने करताले ॥ यथा । शिवागारे झल्लकञ्च सूर्य्यागारेच शङ्खकम् । दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत् ॥

झल्लकण्ठः । पुं । कपोते ॥

झल्लरी । स्त्री । हुलुक्कवाद्ये ॥ वक्रकेशेषु ॥ झर्झते । झर्झ० । बाहुलकादरन् । पृषोदरादिः । गौरादित्वात्

ध्वाप् ॥ युद्धे ॥ झरे ॥

झल्लिका । स्त्री । उद्वर्त्तनमले । झिल्ली इति भाषा ॥ द्योते ॥ दीप्तौ । आतपरुचौ ॥

झल्ली । स्त्री । झर्झरवाद्ये ॥

झल्लीषकः । पुं । तर्कुवासके । चरखा इति भाषा ॥

झषः । पुं । मत्स्ये । मीने ॥ मीनराशौ ॥ तापे ॥ अटव्याम् ॥ न । खिले ॥ झषति । झषहिंसार्थः । पचाद्यच् ॥ यद्वा । झष्यते । खनोघचे-तिघः ॥

झषकेतनः । पुं । } कामदेवे । मदने ॥ झषोमकरः केतनङ्केतुर्वा यस्य ॥
झषकेतुः । पुं । }

झषा । स्त्री । नागबलायाम् ॥ टाप् ॥

झषाङ्कः । पुं । अनिरुद्धे । कन्दर्पे ॥

झषाशनः । पुं । शिशुमारे ॥ त्रि । मत्स्यादे ॥

झषोदरी । स्त्री । व्यासमातरि ॥

झाङ्कृतम् । न । चरणालङ्कारविशेषे ॥

झाटः । पुं । निकुञ्जे ॥ कान्तारे ॥ व्रणादीनांमार्जने ॥ न । सङ्घाते ॥ झटनम् । झट० । घञ् ॥

झाटलः । पुं । घण्टापाटलौ । लोध्रविशेषे ॥ झाटं सङ्घातं लाति । ला० । आतोनुपेतिकः ॥

झाटलिः । पुं । स्त्री । वाटविटपे ॥

झाटा । स्त्री । भूम्यामलक्याम् ॥ यूथी वृक्षे ॥ झट्यते । झटसङ्घाते । घञ् ॥

झाटामला । स्त्री । }
झाटिका । स्त्री । } भूम्यामलक्याम् ॥
झाटी । स्त्री । }

झामकम् । न । दग्धेष्टकाविशेषे । झामा इति झांवा इति च भाषा ॥

झामरः । पुं । तर्कुशाणे । तकुवेकीसाण इतिभाषा ॥

झार्झरः । त्रि । झार्झरिके । झर्झरवाद्यकर्त्तरि ॥ झर्झरवादनं शिल्पमस्य । मड्डुकझर्झरादन्यतरस्यामित्यण् ॥

झार्झरिकः । त्रि । झार्झरे ॥ झर्झरवादनं शिल्पमस्य । पक्षेठक् ॥

झालिः । स्त्री । पानकविशेषे ॥ यथा । आम्रमामफलं पिष्टं राजिकालवणान्वितम् । भृष्टहिङ्गुयुतं पूतं घोलितं झालिरुच्यते ॥ झालिरुरोचिजिह्वायाः कण्ठस्यं कण्ठशोधिनी । मन्दं मन्दं निपीता सा रोचनी वह्निबोधिनी ॥

झावुः । पुं । झाउ इतिख्याते पिचुलवृक्षे ॥ झामितिशब्दं वेति गच्छति । वी गत्यादिषु । मित० डुः ॥

झावुकः । पुं । पिचुले । झाउ इतिभाषा ॥ संज्ञायांकन् ॥

जिङ्गकम् । न । फलविशेषे ॥

जिङ्गिनी । स्त्री । उल्कायाम् ॥ जिङ्गिनीवृक्षे ॥

जिङ्गी । स्त्री । जिङ्गिनीवृक्षे ॥

जिञ्जिमः । पुं । दावाग्नौ ॥

जिञ्जिरिष्टा । स्त्री । जिञ्झिरी इति गौड़प्रसिद्धे क्षुपविशेषे । पीतपुष्पायाम् । रोमाञ्चफलायाम् ॥

जिञ्जी । स्त्री । जिल्ल्याम् ॥ यथा । जिञ्जा वाऽथ क्षममधुरा कूजन्ती मधुराकृतिरित्यागमः ॥

जिण्टिका । स्त्री । झिण्ट्याम् ॥ कन् ॥

जिण्टी । स्त्री । सैरीयके ॥ झिमिति रटति । रट० । अच् । पृषोदरादिः । गौरादित्वान्ङीष् ॥ अस्यागुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयशूलवातकफशोफकासत्वग्दोषनाशित्वञ्चेति राजनिर्घण्टः ॥ कुब्जरवृक्षे ॥

जिरिका । स्त्री ।
जिरी । स्त्री ।　　} जिल्ल्याम् । झींगुर इ० झींगर इतिच भाषा ॥
जिरीका । स्त्री ।

जिल्लिः । स्त्री । वाद्यविशेषे ॥ यथा । घण्टा शङ्खस्तथा भेरीमृदङ्गो झिल्लिरेव च । पञ्चानां शस्यते वाद्यं दैवाराधनेष्वेतिगूढार्थदीपिका ॥

जिल्लिका । स्त्री । जिल्लीकायाम् । चीर्याम् ॥ उद्वर्त्तनांशुके ॥ आतपद्युतौ ॥ विलेपनस्य मले ॥ स्वार्थे कन् ॥

जिल्ली । स्त्री । कीटविशेषे । झींगर इति भाषाप्रसिद्धे । झिरिकायाम् । चीर्याम् ॥ आतपद्युति ॥ वर्त्याम् ॥ उद्वर्त्तनांशुके ॥ स्थालीदग्धान्ने ॥ चिल्लति । चिल्ल शैथिल्ये । अच् । पृषोदरादित्वात् साधुः । गौरादित्वान् ङीष् ॥

जिल्लीकण्ठः । पुं । गृहकपोते ॥

जिल्लीका । स्त्री । जिल्लिकार्थेषु ॥

जीरुका । स्त्री । जिल्ल्याम् । झींगुर इति भाषा । झीतिरौति । रुशब्दे । वाहुलकात् कक् ॥

जुण्टः । पुं । अमकाण्डद्रुमे । स्तम्बे । गुल्मे । झुण्ड इति भाषा ॥

जुमरिः । स्त्री । रागिणी विशेषे ॥ यथा । प्रायःशृङ्गारबहुला माध्वीकमधुरा मृदुः । एकैव झुमरिर्लोके वर्णादिनियमोज्झिता ॥ अतो लक्षणमेतस्या नोदाहारि विशेषकम् । इदं हि शालगं सूचं प्रसिद्धं व्यपरञ्जनम् ॥ इति सङ्गीतदामोदरः ॥

जूषिः । स्त्री । क्रमुकभेदे ॥ दुष्टदैवस्मृतौ ॥

जोडः । पुं । गुवाकवृक्षे ॥ इतिभूरिप्रयोगः ॥

ञः

ञः । पुं । ञकारे ॥ बलीवर्द्दे ॥ शुक्रे ॥ वामगतौ ॥ गायने ॥ घर्घरध्वनौ ॥ *॥*॥ इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलारामभिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना तथाश्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ ञवर्गः समाप्तिङ्गतः ॥ १ ॥

तत् सत्

टः

टः । पुं । टकारे ॥ वामने ॥ पादे ॥ निस्वने ॥ न । करङ्के ॥ टङ्कारे ॥ टगणे ॥

टङ्कदेशीयः । पुं । वास्तूकशाके ॥ इति त्रिकाण्डशेषः ॥

टक्कनामानः । पुंभूम्नि । देशविशेषे । वाहीकेषु ॥ वाहीकाष्टक्कनामानः इति हेमचन्द्रः ॥

टगणः । पुं । त्रयोदशभेदभिन्ने षामात्रिके । यथा । (ऽऽऽ शिवः १) (॥ऽऽ शशिः २) (।ऽ।ऽ दिनपतिः ३) (ऽ॥ऽ सुरपतिः ४) (॥॥ऽ शेषः ५) (।ऽऽ। अहिः ६) (ऽ।ऽ। सरोजम् ७) (॥ऽ। धाता ८) (ऽऽ॥ कलिः ९) (॥ऽ॥ चन्द्रः १०) (।ऽ॥। ध्रुवः ११) (ऽ॥॥ धर्मः १२) (॥॥॥ शालिकरः १३) इति षण्मात्रे त्रयोदशभेदाः ॥

टगरः । पुं । टङ्कणक्षारे ॥ हेलाविलासे ॥ त्रि । केकराक्षे ॥

टङ्कः । पुं । कोपे ॥ असिकोषे ॥ खड्गे ॥ ग्रावदारणे । टाँकी इति भाषा ॥ चतुर्माषकस्वरूपेमाने । चतुर्विंशतिरत्तिकारूपे वा ॥ दर्पे ॥ परशौ ॥ राजाम्रे ॥ पुं । न । नीलकपित्थे ॥ खनित्रे ॥ टङ्कने ॥ टङ्कयति । टकि बन्धे । चुरादिः । अच् ॥ टम् इति शब्दं कायति वा । कै० । आतो ऽनुपेतिकः सुपीति वा ॥

टङ्ककः । पुं । रजतमुद्रायाम् । रूप्या इति भाषा इत्यमरटीका सारसुन्दरी ॥

टङ्ककपतिः । पुं । रूप्याध्यक्षे ॥

टङ्ककशाला । स्त्री । रजतमुद्रागृहे । टकशाल इति भाषा ॥ इत्यमरटीका सारसुन्दरी ॥

टङ्कटीकः । पुं । शिवे ॥ इतित्रिकाण्डशेषः ॥

टङ्कणः । पुं । न । रसशोधने । मालतीतीरजे । लोहद्राविणि । सुहागा इति प्रसिद्धे क्षारे ॥ टङ्कणं वह्निकृद्रूक्षं-कफघ्नं वातपित्तकृत् ॥ टङ्कयते ल्युट् । पृषोदरादिः ॥

टङ्कनम् । न । टङ्कणे ॥

टङ्का । स्त्री । जङ्घायाम् । टाँग इति भाषा इतिमेदिनी ॥

टङ्कानकः । पुं । अश्मदारणे ॥

टङ्कारः । पुं । विस्मये ॥ प्रसिद्धौ ॥ शिञ्जिनीध्वनौ ॥ टमितिशब्दं करोति । कृ० । अण् ॥

टङ्कारी । स्त्री । टेकारी इति गौड प्रसिद्धे क्षुपविशेषे ॥ टङ्कारी वातजित् तिक्ता श्लेष्मघ्नी दीपनी लघुः । शोथोदरव्यथाहन्त्री स्थिता पीठ विसर्पिणाम् ॥

टङ्कः । पुं । न । खनित्रे ॥ खड्ग विशेषे । असौ ॥ जङ्घायाम् । टांगइतिभाषा॥

टङ्कणः । पुं । न । } टङ्कणे ॥ इति
टङ्गनः । पुं । न । } राजवल्लभः ॥

टङ्गिनी । स्त्री । पाठायाम् । अम्बष्ठायाम् । आकनादी इति गौडभाषा ॥

टङ्कनी । स्त्री । ज्येष्ठ्याम् । छिपकली इतिबिस्तुय्या इतिचभाषा ॥

टट्टरी । स्त्री । अनृताख्याने । मृषावादे । टरटर इति भाषा ॥ लम्पावाद्ये ॥ पटहवाद्ये ॥

टट्टरः । पुं । भेरीरावे ॥

टलनम् । न । विक्लवे ॥

टवर्गः । पुं । टादिपञ्चवर्णेषु ॥

टवर्गीयः । पुं । टवर्गभवेवर्णे । वर्गान्ताच्चेतिच्छः ॥

टा । स्त्री । पृथिव्याम् ॥

टाङ्कम् । न । मद्यप्रभेदे ॥

टाङ्करः । पुं । नागवीटे ॥

टारः । पुं । रङ्गे ॥ तुरङ्गे ॥ खङ्गे ॥

टिटिभः । पुं । } टिट्टिभे ॥
टिटिभकः । पुं । }

टिट्टिभः । पुं । टटीहरी इति भाषाप्रसिद्धे कोयष्टिखगे । टीठि इति गौड भाषा ॥ टिट्टि शब्दं भाषते । टिट्टि शब्देन भाति वा । अन्येभ्योपीतिडः ॥ दानवविशेषे ॥

टिट्टिभकः । पुं । कोयष्टिके । टिट्टिभे ॥ स्वार्थे कन् ॥

टिण्टिणिका । स्त्री । अम्बुशिरीषिकायाम् ॥

टिण्डिशः । पुं । ढिंडसी इतिटिण्डा इतिचभाषाप्रसिद्धे फलशाकविशेषे । मुनिनिर्मिते । रोमशफले । डिण्डिशे ॥

टिप्पनी । स्त्री । टीकायाम् ॥

टीका । स्त्री । विषमपदव्याख्यायाम् ॥ वृत्तौ ॥ व्याख्यामात्रे ॥ टीक्यते गम्यतेऽर्थोऽनया । टीकृगतौ । गुरोश्च हलइत्यः । टाप् ॥

टुण्टुकः । पुं । श्योनाकवृक्षे ॥ कृष्णखदिरवृक्षे ॥ टुनटुनि इति गौडप्रसिद्धे पक्षिविशेषे ॥ श्योनाकप्रभेदे ॥ त्रि । अल्पे ॥ टुण्टु इति कायति । कै० । आत इतिकः ॥

टुनाका । स्त्री । तालमूल्याम् ॥

टेरः । त्रि । वक्रचक्षुषि । टेरके ॥

टेरकः । त्रि । वलिरे । केकरे । वक्रचक्षुषि । भैंगा इति भैंडाइतिचभाषा ॥

ठः

ठः । पुं । ठकारे ॥ मण्डले ॥ चन्द्रबिम्बे ॥ शून्ये ॥ लोकगोचरे ॥ महेश्वरे ॥ ध्वनौ ॥ ठगणे ॥ पुं । न । अनुकरणशब्दे ॥

ठक्कुरः । पुं । विष्णुप्रतिमायाम् । ठाकुर इतिभाषा ॥ द्विजोपाधिविशेषे ॥ यथा । नृसिंहठक्कुरः ॥ वल्लपालठक्कुर इति ॥

ठगणः । पुं । अष्टभेदभिन्ने पञ्चमात्रिके ॥ यथा (।ऽऽ इन्द्रासनम् १) (ऽ।ऽ शूरः २) (।।।ऽ चापः ३) (ऽऽ। हीरः ४) (।।ऽ। शेखरम् ५) (ऽ।।। कुसुमम् ६) [ऽ।।। अहिगणः ७] ।।।।। पापगणः ८] इति ॥

ठठम् । अ ।
ठठठम् । अ । } अनुकरणशब्दे । ठन् ठन् इति ठनम् ठनम् इति चभाषा ॥ यथा । रामाभिषेके मदविह्वलायाः कक्षाच्च्युतो हेमघटस्तरुण्याः । सोपानमारुह्य चकार शब्दं ठठं ठठं ठं ठठठं ठठं ठः ॥ इतिमहानाटकम् ॥

डः

डः । पुं । डकारे ॥ वाडवाग्नौ ॥ शिवे ॥ शब्दे ॥ त्रासे ॥ डगणे ॥

डगणः । पुं । पञ्चभेदभिन्ने चतुर्मात्रिके ॥ यथा [ऽऽ गजः १] [।।ऽ रथः २] [।ऽ। तुरङ्गमः ३] [ऽ।। पदातिः ४] (।।।। पत्तिः ५] इति ॥

डङ्गरः । पुं । डिङ्गरे ॥

डङ्गरी । स्त्री । गजदन्तफलायाम् । दीर्घेर्वारुम् । ककडीइति तरोइतिच भाषा ॥

डङ्गारी । स्त्री । डङ्गरीफले ॥

डण्डः । पुं । डंडारीतिख्याते मत्स्ये ॥ डण्डमत्स्यो रसे तिक्तः पित्तं रक्तं कफं हरेत् । वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः ॥

डमः । पुं । चाण्डाल्यां लेटाज्जाते डोम इति प्रसिद्धे ऽन्त्यजे ॥

डमरः । पुं । अशस्त्रकलहे ॥ विप्लवे । धाकडलुमटनादौ । डाका इतिधाडा इतिचभाषा ॥ परचक्रादिभये ॥ न । भीत्यापलायने । शृगालिकायाम् ॥ डम इतिशब्दस्य रानम् । रा० । बाहुलकात् घञर्थेकः ॥

डमरुः । पुं । वाद्यप्रभेदे । कापालिकयोगिवाद्य ॥ चमत्कारे ॥ डमिति शब्द मियर्त्ति । मृगय्वादित्वाद्दर्त्तेः कुः । गणपाठादेवगुणः ॥

डयनम् । न । पुरुषस्कन्धवाह्ये यानविशेषे । कर्णीरथे । चौडोल इतिख्याते ॥ डीयते ऽनेन । डीङ् विहायसागतौ । ल्युट् ॥ नभोगतौ ॥

डल्लकम् । न । वंशादिरचितेपात्रविशेषे । डगरा डाला छबडा छावी इतिभाषा ॥ त्रिशतञ्च षष्ठ्यधिकं डल्लकं वस्त्रसंयुतम् । सभोज्यं सोपवीतञ्च सोपहारं मनोहरमिति ब्रह्मवैवर्त्तेप्रकृतिखण्डम् ॥

डवित्थः । पुं । काष्ठमये मृगे ॥ डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृग इति सुपद्मव्याकरणोक्तेः ॥

डहुः । पुं । लकुचे । लिकुचे । बडहल इतिप्रसिद्धेवृक्षे ॥ दहति तोहति वा । दहभस्मीकरणे । तुहिर् अर्दने वा । मृगय्वादिषु निपातितः ॥

डा । स्त्री । डाकिन्याम् ॥

डाकिनी । स्त्री । कालीगणविशेषे ॥ डाकानांसमूहे ॥ खलादित्वादिनिः ॥

डाङ्गरी । स्त्री । डङ्गरीफले ॥

डामरः । पुं । चमत्कारे ॥ शिवोक्तषड्विधे शास्त्रविशेषे ॥ तेषांनामानि श्लोकसङ्ख्याश्चोक्तावाराहीतन्त्रे । यथा । डामरः षड्विधोज्ञेयः प्रथमो योगडामरः । श्लोकास्तत्र त्रयस्त्रिंशत् तथापञ्चशतानिच । त्रिविंशतिसहस्राणि श्लोकानिचेहसङ्ख्यया ॥ १ ॥ एकादशसहस्राणि सङ्ख्याताः शिवडामरे । श्लोकाः सप्तैवनिश्चित्य ईश्वरेणैवभाषिताः ॥ २ ॥ तावच्छ्लोकसहस्राणि पञ्चश्लोकशतानि च । गुणोत्तराणि दुर्गायाडामरे कथितानिच ॥ ३ ॥ नवश्लोकसहस्राणि नवश्लोकशतानिच । सारस्वते तथा श्लोकाः पञ्चैवपरिकीर्त्तिताः ॥ ४ ॥ स्वरसङ्ख्या सहस्राणि श्लोका

र्नां ब्रह्मडामरे। पञ्चोत्तरशतान्य सङ्ख्यातानिशिवेनतु ॥ ५ ॥ षष्टिः श्लोकसहस्राणि गान्धर्वडामरोत्त-मे। श्लोकाश्चषष्टिसङ्ख्याता ब्रह्मणाव्यक्तयोनिनेति ॥ तथाहि। यो गडामरः २३५३३। शिवडामरः-११००७। दुर्गाडामरः ११५०३। सारस्वतडामरः ९९०५। ब्रह्मडामरः ७१०५। गन्धर्वडामरः ६००६०॥ इति॥ भूतडामरादयोऽन्येपिसन्ति। भूतानांडामरश्चमत्कारोऽत्रेतिनिवन्धकारः॥ डमरे॥

डाहलः। पुं। चैद्य। चेपुरेदेशे॥

डाहुकः। पुं। दात्यूहखगे॥

डिङ्करी। स्त्री। दिङ्कर्याम्॥

डिङ्गरः। पुं। ढङ्गरे॥ क्षेपे॥ खले॥ धूर्त्ते॥ सेवके॥

डिण्डिमभाण्डम्। न। वादित्रविशेषे॥ पटहमृदङ्गकरटाः समेता यत्र वाद्यन्ते तानि डिण्डिमभाण्डानीतिव्याख्यानात्॥

डिण्डिमः। पुं। डौंडी इतिख्याते वाद्यभेदे॥ यथा। श्लोकार्द्धेनच यत्-प्रोक्तं तदुक्तं ग्रन्थकोटिभिः॥ ब्रह्मसत्यं जगन्मिथ्येत्येष वेदान्तडिण्डिमः॥ गजघण्टानादे॥ यथा। मतिरेव बला गरीयसी तदभावे करिणामियं दशा। इतिघोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन्॥ पामीयामलके॥ डिण्डि इतिशब्दं-मिनोतिप्रकाशयति। डुमिञ्०। डः॥

डिण्डिरः। पुं। समुद्रफेने॥

डिण्डिशः। पुं। डिंडसी ढेंढस टिण्डा इत्यादि भाषाप्रसिद्धे मुनिनिर्मि-ते। रोमशफले॥ डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः। सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः॥ * ॥ निश्शेषवीजं स्वतिवृत्तखण्डं सहिङ्गुकं प्रोज्झितचण्डशब्दम्। स्नेहेप्रतप्तं चलदर्धखण्डं रुचिप्रदं डिण्डिशकं सपिण्डम्॥

डिण्डीरः। पुं। अब्धिकफे। समुद्रफे-ने॥ डिण्डि इतिशब्दम् ईरयति। ईरगतौ कम्पनेच। अच् अणवा॥

डिण्डीरमोदकम्। न। गृञ्जने॥

डित्थः। पुं। काष्ठमये गजे॥ डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगइतिसुपद्मव्याकरणोक्तेः॥ विशेषलक्षणयुक्ते पुरुषे॥ यथा। श्यामरूपोयुवाविद्वान् सुन्दरः प्रियदर्शनः। सर्वशास्त्रार्थवेत्ताच डित्थइत्यभिधीयतइति कलापटीका॥

डिमः। पुं। नाटकस्य रूपकविशेषे॥

डिम्बः। पुं। भयध्वनौ॥ अण्डे॥ पु-

प्लुते ॥ प्रीहनि ॥ विप्लवे । डमरे । अशब्दकलहे ॥ एरण्डे ॥ भये ॥ डिम्बनम् । डिविनोदे । घञ् ॥

डिम्बाहवः । पुं । भूभृताशून्ये युद्धे ॥

डिम्बिका । स्त्री । जलविम्बे ॥ श्योणाक वृक्षे ॥ कामुकस्त्रियाम् ॥

डिम्भः । त्रि । वालिशे । वैधेये ॥ वाले । शिशौ ॥ डिम्भयति । डिभिसङ्घाते । चुरादिः । पचाद्यच् ॥ डिंभ्यते वा घञ् ॥ अस्त्ररूपान्तरं डिम्बो पीतिविरूपकोषः ॥

डिम्भकः । पुं । डिम्भे ॥ स्वार्थे कः ॥

डिम्भचक्रम् । न । स्वरोदयोक्ते नराणां शुभाशुभनिर्णायके चक्र वि० ॥ यथा । डिम्भचक्रे न्यसेद्भानि भानुभादित्रिमस्तके । मुखे नेत्रे हृदयस्कन्धे चैकैकं बाहुहस्तयोः ॥ हृदिपञ्च नाभिगुह्ये चैकैकं षट्चजानुनोः । चरणाभ्यां तथैकैकं जन्मर्क्षपतनात् फलम् ॥ शीर्षस्थे छत्रलाभः स्यात् वक्त्रे मिष्टान्नभोजनम् । स्कन्धे धनी च बाहुभ्यां स्थानभ्रष्टो भवेन्नरः ॥ पाणिभ्यां तस्करो लक्ष्मीर्हृद्यल्पायुश्च नाभितः । गुह्ये कामी भ्रमी जान्वो- रल्पजीवी च पादयोरिति स्वरोदयः ॥

डिम्भा । स्त्री । स्तनपायाम् ॥ टाप् ॥

डीनम् । न । पक्षिगतिप्रभेदे पतनमा

त्रे ॥ कर्णपर्वणि विशेषोऽस्य द्रष्टव्यः ॥ आगमशास्त्रविशेषे यथा । डामरं डमरं डीनं श्रुतं काशीविलासैकम् । सप्तकोटि महाग्रन्था मन्मथक्ताद्वि निर्गताः ॥ इति मुण्डमालातन्त्रम् ॥ डयनम् । डीङ् विहायसागतौ । नपुंसके भावेक्तः । श्वादयश्चोदितः । ओदितश्चेति निष्ठातस्य नः ॥

डीनडीनकम् । न । खगानांगतिक्रिया विशेषे ॥ तेषांपतनं निर्विशेषणाच्च कुत्सितञ्च डीनडीनकपदवाच्यम् ॥

डीनावडीनम् । न । पक्षिणांगतिविशेषे ॥ तत्तु एकस्यांगतौ गत्यन्तर- मिश्रणम् ॥ अधःकुत्सितगमनञ्च ॥

डीयमानः । त्रि । आकाशं प्रत्युत्- च्छति ॥

डुण्डुः । पुं । डुण्डुभसर्पे ॥

डुण्डुभः । पुं । राजिलेसर्पे ॥ डुण्डुरि त्यनुकरणशब्दः । तम् भणति तेन भातीति वा । अन्येभ्योपीतिडः ॥ यद्वा । लड्यते । ओलडिउत्क्षेपे । घञ् । डलयोरेकत्वम् । डभति । डभपूरणे । इगुपधेतिकः । डण्डश्चासावुभश्च । पृषोदरादिः ॥ द्विमुखो डुण्डुभःस्मृतः ॥

डुण्डुलः । पुं । क्षुद्रोलूके । पिङ्गले । इ रुद्राविधि ॥

डोमः

डुलिः । स्त्री । कमठ्याम् ॥ डोलयति । डुलउत्क्षेपे । इगुपधादिति किः ॥

डुलिका । स्त्री । खञ्जनाकृतिपक्षिविशेषे ॥

डुली । स्त्री । चिल्लीशाके ॥

डोडिका । स्त्री । सुमदृष्याम् । करे बया इति प्रसिद्धे फलशाकविशेषे ॥ डोडिकापुष्टिदा रुष्या रुच्या वह्निप्रदा लघुः । हन्ति पित्तकफार्शांसि कृमिगुल्मविषामयान् ॥ * ॥ बालं डोडीफल मविकलं स्विन्नमीषच्च तोये स्नेहे शिङ्गुप्रचयिनिततो वेसवारेण सिद्धम् । गव्यं तक्रं क्वथित तिन्तिडे साधितं रामठेन खादन् स्वादुन् निभृत ममृतं निन्दितं भोक्तृभिः कैः ॥ * ॥ सन्धूज्य पुष्कं तरणेःप्रतापात् प्रतप्त माज्ये नवडोडिशाकम् । सबेसवारं रामठदत्तवासं खादन्नरो निन्दति व्यञ्जनानि ॥ डोडिका बालका रुच्या शीता गुर्वी विषापहा । सुस्विन्ना रोचनी रुक्षा अस्विन्ना कफकर्करी ॥

डोडी । स्त्री । डोडिकायाम् ॥ क्षुप विशेषे । जीवन्त्याम् । सुखालुकायाम् ॥

डोमः । पुं । स्वनामाख्याते ऽस्पृश्यजातौ ॥ यथा । चण्डालश्चैव डोमश्च मानकश्च तथा इति । ढक्कडोरस्त्वैव भण्डोरो भूषुवडश्च इत्याश्रमी ॥ इयामुण्डी शिरूधारी समायते यत्र क्वचित् । स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेदिति मत्स्यसूक्ततन्त्रे ३९ पटलः ॥

डुण्डिः

डोरम् । न । }
डोरकम् । न । } हस्तादिबन्धनसूत्रे ॥

डोरडी । स्त्री । वृहत्याम् ॥ इति राजनिर्घण्टः ॥

ढः

ढः । पुं । ढकारे ॥ ढक्कायाम् ॥ शुनि ॥ श्वलाङ्गूले ॥ निर्गुणे ॥ ध्वनौ ॥ ढगणे ॥

ढक्का । स्त्री । यशःपटहे ॥ ढगिति कायति । कैशब्दे । आतश्चेतिकः ॥

ढक्कारी । स्त्री । तारिणीदेव्याम् ॥

ढगणः । पुं । भेदत्रयविशिष्टे त्रिमात्रिके ॥ यथा । (।ऽ ध्वजः १) (ऽ। तालः २) (।।। ताण्डवम् ३) इति ॥

ढालम् । न फलके ॥

ढाली । त्रि । चर्मिणि ॥

ढामरा । स्त्री । हंस्याम् ॥

ढुण्ढिः । पुं । श्रीगणेशविशेषे ॥ यथा । अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः

सर्वेषां ढुण्ढिततया भवढुण्ढिनामा । काशीप्रवेशमपि कोऽलभतेऽपदेशी तोषं शिवा तव विनायक ढुण्ढिराज ॥ इति काशीखण्डगणेशं प्रति शिववाक्यम् ॥

ढोलः । पुं । स्वनामख्याते वाद्यविशेषे ॥

णः

णः । पुं । णकारे ॥ बुद्धदेवताविशेषे । विन्दुदेवे ॥ भूषणे ॥ गुणवर्जिते ॥ पानीयनिलये ॥ निर्णये ॥ ज्ञाने ॥

णयः । पुं । ब्रह्मलोकस्थे समुद्रोपमे सरोविशेषे ॥

* ॥ * ॥ इत्यादिगौडकुलोत्पन्नाढीचवालप्रधानोपनामतुलारामभिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना सयाश्रीसद्गुरुकृष्णावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ टवर्गः समाप्तः ॥ १ ॥ * ॥ * ॥ * ॥ * ॥ * ॥

तत् सत्

तः

तः । पुं । तकारः ॥ चौरे ॥ अन्ते ॥ पुच्छे ॥ क्रोडे ॥ म्लेच्छे ॥ रत्ने ॥ सुगते ॥ योधे ॥ गौरविवर्जितपुच्छे ॥ क्रोष्टुपुच्छे ॥ स्त्री । न । तरणे ॥ पुण्ये ॥ तटति । तटउच्छ्राये । डः ॥

तक्किलः । त्रि । धूर्त्ते ॥

तक्किला । स्त्री । औषधे ॥

तक्रम् । न । चतुर्थांशजलसंयुक्ते दधिनि । गोरसजे । दण्डाहते । कालसेये ॥ तत्पञ्चविधम् । यथा । ससरं निर्जलं घोलं मथितन्त्वसरोदकम् । तक्रं पादजलं प्रोक्त मुदश्विच्चार्द्धवारिकम् ॥ छच्छिकासरहीनास्यादच्छा प्रचुरवारिका ॥ * ॥ तुर्य्यांशेन जलेन संयुतमतिस्थूलं सदम्लं दधिप्रायो माहिष मंशुकेन विमले मृद्भाजने गालयेत् । भृष्टंहिङ्गुचजीरकञ्च लवणं राजीञ्च किञ्चिन्मितां पिष्ट्वा तत्र विमिश्रयेद्भवतितत् तक्रं नकस्य-प्रियम् ॥ अस्य गुणा यथा । तक्रं चिक्कणं वह्निदीपनं पाचनं परम् । उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ॥ अपिच । तक्रं ग्राहि कषायाम्लं स्वादु

पाकरसं लघु । वीर्य्योष्णं दीपनं हृ-
द्यं शोगर्भ वमननाशनम् ॥ ग्रहण्या-
दिमतां पथ्यं भवेत् सङ्ग्राहिलाघवा-
त् ॥ * ॥ किञ्च स्वादुविपाकित्वान्न
च पित्तप्रकोपणम् । कषायोष्णवि का-
शित्वाद्रौक्ष्याच्चापि कफापहम् ॥ न
तक्रसेवी व्यथते कदाचिन्न तक्रदग्धाः
प्रभवन्ति रोगाः । यथा सुराणामसृ-
तं सुखाय तथा नराणां भुवि तक्रमा-
हुः ॥ समुद्धृतघृतं तक्रं पथ्यं लघु विशे-
षतः । स्तोकोद्धृतघृतं तस्माद्गुरु वृ-
ष्यं कफापहम् ॥ अनुद्धृतघृतं सा-
न्द्रं गुरुपुष्टिकफप्रदम् ॥ * ॥ वाते-
ऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्
। पित्ते स्वादु सिताढ्यं तत् सव्योषं स-
चितं कफे । * ॥ हिङ्गुजीरयुतं घोलं सै-
न्धवेन सुसंयुतम् । भवेदतीव वातघ्न-
मर्शोऽतीसारहृत् परम् ॥ रुच्यं पुष्टि-
दं बल्यं वस्तिशूलविनाशनम् । मूत्र-
कृच्छ्रे तु सगुडं पाण्डुरोगे सचित्र-
कम् ॥ शीतकालेऽग्निमान्द्ये च तथा
वातामयेषु च । अरुचौ स्रोतसां रो-
धे तक्रं स्यादमृतोपमम् ॥ तत्तु ह-
न्ति गरच्छर्द्दिप्रसेकविषमज्वरान् ।
पाण्डुमेदोग्रहण्यर्शो मूत्रग्रहभगन्द-
रान् ॥ मेहं गुल्ममतीसारं शूल-
प्लीहोदरारुचीः । श्वित्रकोठघृतव्या-

पीन् कुष्ठशोथतृष्णाकृमीन् ॥ नैव त-
क्रं क्षते दद्यान्नोष्णकाले न दुर्बले
। न मूर्च्छाभ्रमदाहेषु न रोगे रक्त-
पैत्तिके ॥ * ॥ यान्युक्तानि दधीन्य-
ष्टौ तद्गुणं तक्रमादिशेत् ॥ अथाम-
पक्वतक्रगुणाः । तक्रमामं कफं कोष्ठे ह-
न्ति कण्ठे करोति च । पीनसश्वासका-
सादौ पक्वमेव प्रयुज्यते ॥ तञ्चति
सङ्कोचे वा । तञ्चु गतौ । स्फायितञ्ची-
ति रक् । न्यङ्क्वादिः ॥

तक्रकूर्च्चिका । स्त्री । छाना इति गौड-
भाषाप्रसिद्धे दुग्धविकृतौ ॥ उष्ण-
दुग्धे तक्रयोगाज्जाता स्यात् तक्र-
कूर्च्चिका ॥ तक्रेण सह पक्वक्षीरे ॥
तक्रेणपक्वं यत्क्षीरं सा भवेत् तक्र-
कूर्च्चिकेति ॥

तक्रपिण्डः । पुं । क्षीरविकृतौ ॥ दध्ना
तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभागेन हीनं यत् तक्रपिण्डः स-
उच्यते ॥

तक्रमांसम् । न । मांसप्रकारविशेषे ॥
यथा । पाकपात्रे घृतं दत्त्वा हरिद्रां-
हिङ्गुभर्ज्जयेत् । छागादेः सकलास्थ्या-
ऽपिस्वखण्डान्यष्टौ च भर्ज्जयेत् ॥ सिद्धि-
योग्यं जलं दत्त्वा पचेन्मृदुतरं य-
था । राजिकाक्तयुते तक्रे मांसखण्डा-
निधारयेत् ॥ तक्रमांसमासमं च

सुरुच्यं बलप्रदम् । कफघ्नं पित्तलं किञ्चित् सर्वाहारस्य पाचनम् ॥

तक्रवामनः । पुं । नारङ्गे ॥

तक्राटः । पुं । मन्थानदण्डे ॥ तक्रे अटति । अट० । अच् ॥

तक्षः । पुं । भरतात्मजे । तक्षशिलाधीशे ॥ न । चित्रानक्षत्रे ॥

तक्षकः । पुं । पातालस्थाष्टनागान्तर्गत नागराजविशेषे । कश्यपात्कद्रूगर्भे जाते इन्द्रसखे ॥ वर्द्धकौ । तक्षिण ॥ वृक्षविशेषे ॥ विश्वकर्मणि ॥ तक्षति । तक्षूतनूकरणे । ण्वुल् ॥

तक्षणम् । न । कृशकरणे । तक्षू० । ल्युट् ॥

तक्षणी । स्त्री । वास्याम् । वाइस इति भाषा ॥ गौरादिः ॥

तक्षा । पुं । त्वष्टरि । वर्द्धकौ ॥ काष्ठं तक्ष्णोति तक्षति वा । तक्षू० । कनिन् युवृषि तक्षीति कनिन् ॥

तक्षशिला । स्त्री । देशविशेषे ॥ नगरीविशेषे । सिन्धुदेशे भरतात्मजस्य तक्षस्य राजधान्याम् ॥

तगणः । पुं । अन्त(ऽऽ।)लघौ ॥ तसंज्ञको गणः ॥

तगरः । पुं । चांदनी इति देशभाषा प्रसिद्धे पुष्पवृक्षविशेषे । सितपुष्पे । वक्रच्छदे । कालपर्णे । टगर इति गौडभाषा ॥ मदनवृक्षे ॥ न । नन्द्यावर्त्तवृक्षे । पिण्डतगर इति कोङ्कणभाषा । तगरमूल इति गौडभाषा ॥ तन्मूले तत्पुष्पे च ॥ तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम् । विषाऽपस्मारमूर्च्छाक्षिरोगदोषत्रयापहम् ॥ काहुस्थवृक्षे ॥

तगरपादिकम् । न । तगरे । नन्द्यावर्त्ते ॥

तगरपादी । स्त्री । मते । तगरे ॥

तङ्कः । पुं । दुःखेन जीवने ॥

तङ्कनम् । न । दुःखेनजीवने ॥ तकि० । ल्युट् ॥

तङ्गः । पुं । जनपदविशेषे ॥

तङ्गणः । पुं । नीवृद्विशेषे ॥

तच्छीलः । त्रि । तत्स्वभावे ॥ यःस्वभावतः फलनिरपेक्षस्तत्र प्रवर्त्तते स तच्छीलः ॥

तज्जः । त्रि । सांदृष्टिकार्थे ॥ तज्जाते ॥

तज्ज्ञः । त्रि । तदभिज्ञे ॥ तत् जानाति । इगुपधेति कः ॥

तञ्ची । स्त्री । विष्णुपत्न्याम् ॥

तटः । त्रि । प्रतीरे । कूले । रोधसि । तटति । तट उच्छ्राये । अच् ॥ न । क्षेत्रे ॥

तटस्थः । त्रि । तीरस्थे ॥ तटे तिष्ठति । स्था० । कः ॥ न । तद्भिन्नत्वे सति त

द्रोणकस्वमितिलंचयाश्चिते स्वरू
पेतरस्थले ॥ स्वरूपा ऽनन्वयित्वे
सति विशेषस्थानतरं संख्येतरस्थावर्त्त
कस्वरूपे लक्षणे ॥

तटाकः । पुं । तडागे । पद्माकरे ॥ त
टमकति । अकक्कुटिलायांगतौ । क
र्म्मण्यण् ॥

तटागः । पुं । तडागे ॥ तटमगति । अ
गकुटिलायांगतौ । कर्मण्यण् ॥

तटिनी । स्त्री । नद्याम् ॥ तटमस्त्यस्याः
। अतइनिठनावितीनिः । पुष्करादि
भ्योदेशेइति इनिर्वा । ऋन्नेभ्यइति
ङीप् ॥

तटी । स्त्री । तीरे । कूले ॥ तटति ।
तट०। अच् । जातित्वात् ङीप् ॥

तडाकः । पुं । तडागे ॥ तड्यते । तड
आघाते । पिनाकादयश्चेतिसाधुः ॥

तडागः । पुं । जलाधारविशेषे । पद्मा
करे ॥ प्रशस्तभूमिभागस्थो बहुसं
वत्सरोषितः । जलाशय स्तडागः
स्यादित्याहुःशास्त्रकोविदाः ॥ * ॥
पञ्चशतधनुः परिमिते जलाशये ॥
यथा । चतुर्विंशाङ्गुलोहस्तो धनुस्त
च्चतुरुत्तरः । शतधन्वन्तरञ्चैव तावत्
पुष्करिणीशुभा । एतत्पञ्चगुणः प्रो
क्तस्तडागइतिनिर्णयः ॥ इतिमत्स्य
वर्द्धमानधृतोवसिष्ठः ॥ शब्दकूटके॥

तड्यते । तड० आघाते । तडागाद
यश्चेति निपातितः ॥

तडाघातः । पुं । ऊर्द्धीकृत्यहस्तिशु
ण्डाघाते ॥ यथा । उच्चैःकरिकराघा
ते तडाघातं विदुर्बुधाःइति ॥

तडित् । स्त्री । विद्युति ॥ ताड्यत्यभ्र
म् । तड० । ताडेर्णिलुक्चेतीति प्र
त्ययः ॥ अन्तिके ॥

तडित्वान् । पुं । वारिदे । मेघे ॥ तडि
तःसन्त्यस्मिन् । मतुप् ॥ मुस्तके ॥

तण्डकः । पुं । न । खञ्जने ॥ फेने ॥
समःसमासवाचि । समस्तपदजात
के ॥ गृहदारुणि ॥ तरुस्कन्धे ॥ त्रि ।
मायाबहुले ॥ तण्डते । तडिताडने
। ण्वुल् ॥ उपघातके ॥

तण्डुः । पुं । शिवद्वारपालविशेषे ॥

तण्डुरीणः । पुं । कीटमात्रे ॥ न । त-
ण्डुलोदके ॥ त्रि । बर्बरे ॥ इतिहे
मचन्द्रः ॥

तण्डुलः । पुं । धान्यादिनिकरे । धान्या
दिसारे । चाउरइतिचाँवलइतिचभा
षा ॥ तण्डुलोमेघजन्तुघ्नः सनवस्त्व
तिदुर्ज्जरः ॥ ताड्यते । तड आघाते
। सानसिवर्णसिपर्णसितण्डुलाङ्कुशे-
त्यादिना निपातनादुलच् प्रत्ययो
नुमागमश्च ॥ यद्वा । भ्रियन्तेकुण्डने
तन्यन्ते ताड्यंते वा इति तण्डुलाः ।

कृष्णलुटितसिताभ्रउलम् तण्ड-स्यादेश. ॥ विडङ्गे ॥ अल्पमारिषे ॥

तण्डुलधरा । स्त्री । नवविधद्रव्या-न्तर्गतद्रव्यविशेषे ॥

तण्डुला । स्त्री । महासमङ्गायाम् ॥ विडङ्गे ॥

तण्डुलाम्बु । न । ओष्ठाम्बुनि । तण्डुलोदके ॥

तण्डुलिकाश्रमः । पुं । तीर्थविशेषे ॥

तण्डुली । स्त्री । यवतिक्ताख्यलतायाम् ॥ शशाण्डुल्याम् ॥ तण्डुलीयशाके ॥

तण्डुलीकः । पुं । अल्पमारिषे ॥

तण्डुलीयः । पुं । मेघनादे । अल्पमारिषे । बहुवीर्ये । सुशाके । चौला-इ इतिभाषा ॥ तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् । सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ॥ तण्डुलायहितः । विभाषाहविरपूपादिभ्य इति छः ॥ विडङ्गतरौ ॥ ताप्ये ॥

तण्डुलीयकः । पुं । तण्डुलीयशाके ॥ विडङ्गे ॥ स्वार्थे कन् ॥

तण्डुलीविका । स्त्री । } विडङ्गे ॥
तण्डुलुः । पुं । }

तण्डुलेयः । पुं । } तण्डुलीयशाके ॥
तण्डुलेरः । पुं । }

तण्डुलोत्थम् । न । तण्डुलाम्बुनि ॥

तण्डुलोदकम् । न । तण्डुलाम्बुनि ॥ यथा । जलमष्टगुणं दत्त्वा पलैक-विंशत्तण्डुलात् । भावयित्वा ततो देयं तण्डुलोदककर्मणीति वैद्यकपरिभाषा ॥

तण्डुलौघः । पुं । वेटवंशे ॥ तण्डुलसमूहे ॥

तण्डुल्यः । पुं । तण्डुलीयशाके ॥ तण्डुलायहितः । विभाषाहविरपूपादि-भ्य इति यत् ॥

तण्डुवीणः । पुं । कीटभावे ॥ न । तण्डुलोदके ॥ त्रि । बर्बरे ॥ इति मेदि-निकरः ॥

तत् । भ्व । हेसौ ॥ ततोति । ततुवि-स्तारे । क्विप् । गमादीनां क्वाविष्य-नुनासिकलोपे तुक् ॥

ततम् । न । वीणादिवाद्ये ॥ पुं । वायौ ॥ त्रि । व्याप्ते ॥ विस्तृते । कृष्णे ॥ तन्यते । तनु० । तनिमृङ्भ्यां किच्चे-ति तनोतेस्तन् ॥ तन्यते स्म वा । तनु० । क्तः । अनुदात्तोपदेशेति न-लोपः ॥

ततपत्री । स्त्री । कदलीवृक्षे ॥

ततमः । त्रि । बहुषु मध्ये एकस्मिन् ॥

ततरः । त्रि । द्वयोर्मध्ये एकस्मिन् ॥

ततवत् । त्रि । विस्तारयुक्ते ॥

ततः । अ० । आदेशे ॥ पादपूरणे ॥ आन

र्थे ॥ कर्मान्तरे ॥ हेतौ ॥ पञ्चम्य र्थे ॥ तस्मात् । पञ्चम्यास्तसिल् । त्यदाद्यत्वम् ॥

ततस्त्यः । त्रि । ततोभवे ॥ तत्सम्बन्धिनि ॥ अव्ययात् त्यप् ॥

ततिः । स्त्री । श्रेण्याम् ॥

तत्कालः । पुं । तदात्वे । वर्त्तमानकाले ॥ सचासौ कालश्च ॥

तत्कालधीः । त्रि । प्रत्युत्पन्नमतौ । उपस्थितबुद्धौ ॥ तत्कालेधीर्यस्य ॥

तत्क्रियः । त्रि । कर्मकारे । वेतनं विनाकर्मकारके ॥

तत्क्षणः । पुं । सद्योर्थे ॥ सचासौ क्षणश्च । सएवक्षणो वा ॥

तत्त्वम् । न । याथार्थ्ये । स्वरूपे । अनारोपितस्वरूपे ॥ परमात्मनि । ब्रह्मणि ॥ ब्रह्मभावे ॥ तदितिसर्वनाम सर्वञ्च ब्रह्म तस्यनाम तदिति । तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं तत्त्वमिति पूज्यपादानां व्याख्यानम् ॥ आदिमध्यावसानेषु दुःखं सर्वमिदं यतः । तस्मात सर्वं परित्यज्य तत्त्वनिष्ठो भवानघेत्युपदेशः ॥ अथाहुर्गौडपादाचार्याः । तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तुबाह्यतः । तत्त्वीभूतस्तदारामस्तत्त्वाद प्रच्युतो भवेदिति ॥ तत्त्वं चागमसंसिद्धं मिथ्या हुर्वेद वादिनः ॥ विलम्बितनृत्ये ॥ ततनं तत् । तनु । क्विप् । अन्येषामपीतिवः । अत्यद्भुत्युपलक्षणंगीतवाद्ययोः ॥ वाद्यप्रभेदे ॥ चेतसि ॥ वस्तुनि ॥ अद्वयज्ञाने ॥ पारमार्थिके । धर्मिस्वरूपे ॥ मूलप्रकृत्यादिचतुर्विंशतिषु ॥ मूलप्रकृतिरविकृति र्महदाद्याःप्रकृतिविकृतयः सप्त । षोडशकस्तुविकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ तस्यभावः । त्वः ॥*॥ वेदान्ता बहुतर्ककर्कशमतिग्रस्ताःपरं मायया भाट्टाः कर्मकलाकुला हतधियो द्वैतेहि वैशेषिकाः । अन्ये भेदरता विवादकलहा स्ते तत्त्वतो वञ्चिता स्तस्मात् सिद्धमतं स्वभावकमयं धीरः परंसंश्रयेत् ॥ सत्त्वरजस्तमस्सु ॥ तत्त्वन्तु नानामुनिभिर्नानाविधमुक्तम् । विस्तरभिया तन्न सङ्गृहीतम् ॥*॥ सर्वस्मिन् दृश्येबाध्यमानेऽपि तद्बाधाधिष्ठानत्वेन स्वयमबाध्यमान मनारोपितं स्वरूपं तत्वमितिविवरणकाराः । अस्यपर्यायाः अमृतं सत्यं परमार्थं सतत्वमित्येते एकार्थवाचिनः परमार्थतो ब्रह्मणोवाचकाः शब्दाइतिभाष्यकाराः ॥

तत्त्वज्ञानम् । न । ब्रह्मज्ञाने ॥ कुड्डेर्गुणविशेषे ॥ यथा । प्रमाणप्रमेयसंशय

प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। इति गौतमः॥ अनारोपितवस्तुप्रत्यये॥ इदं सर्वं द्वैतजातमद्वितीये चिदानन्दात्मनि मायया कल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानन्दोऽद्वयोऽहमस्मीति परिज्ञाने॥ तत्त्वस्य ज्ञानम्॥

तत्त्वज्ञानार्थदर्शनम्। न। तत्त्वज्ञानार्थस्यालोचने॥ तत्त्वज्ञानस्याहं ब्रह्मास्मीति साक्षात्कारस्य वेदान्तवाक्यकरणकस्यामानित्वादिसर्वसाधनपरिपाकफलस्य अर्थः प्रयोजनमविद्यातत्कार्यात्मकनिखिलदुःखनिवृत्तिरूपः परमानन्दावाप्तिरूपश्च मोक्षः तस्य दर्शनम् आलोचनम्। तत्त्वज्ञानफलालोचने हि तत्साधने प्रवृत्तिः स्यात्॥

तत्त्वतः। अ। यथावदर्थे॥

तत्त्वदर्शी। त्रि। वस्तुयाथात्म्यदर्शनशीले ब्रह्मविदि कृतसाक्षात्कारे॥ तत्त्वं वस्तुनो याथात्म्यम् तद्द्रष्टुं शीलं यस्य। णिनिः॥

तत्त्वभावः। पुं। नेति नेतीत्यादिश्रुतिनिर्दिष्टे विदिताविदिताभ्यामन्यस्मिन्नद्वयस्वभावे॥

तत्त्वविचारः। पुं। भूतार्थचिन्तायाम्॥

तत्त्ववित्-द्। त्रि। स्वरूपविदि। याथात्म्यविदि। ब्रह्मविदि॥ शैवे॥ शैवो हि आत्मविद्याशिवा इति सञ्ज्ञोपलक्षितानि तत्त्वानि सर्वजगत्प्रवर्त्तकानीति मन्यते॥ तत्त्वं स्वरूपं सकलसंसारधर्मविलक्षणं सच्चित्सुखरूपं ब्रह्माहमस्मीति वेत्ति जानातीति तत्त्ववित्॥

तत्पत्री। स्त्री। हिङ्गुतरुपत्र्याम्॥

तत्पदलक्ष्यार्थः। त्रि। अज्ञानादिसमष्ट्युपाध्युपहिताधारभूतेऽनुपहितचैतन्ये। चिदेकरसरूपिणि॥

तत्पदवाच्यः। त्रि। तत्पदाभिधे॥

तत्पदवाच्यार्थः। त्रि। अज्ञानादिसमष्टिः एतदुपहितसर्वज्ञत्वादिविशिष्टचैतन्यम् एतदनुपहितचैतन्यञ्चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवतीतिश्रुत्यादितेऽर्थे॥

तत्पदाभिधः। त्रि। तत्पदवाच्ये॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधस्त्याहुः॥

तत्पदार्थः। पुं। जगत्कारणे परमात्मनि॥ यज्जगत्कारणं तत्त्वं तत्पदार्थः स उच्यते॥ तदिति पदस्य अर्थः॥

तत्परः। त्रि। तद्गते॥ आसक्ते॥ तत्

परमुत्तमं यस्य । तेनपूर्यते वा । पृ पालनपूरणयोः । कदोरप् ॥

तत्परायणः । त्रि । तदासक्ते ॥

तत्पुरुषः । पुं । प्रायउत्तरपदार्थप्रधाने समासविशेषे ॥ सच द्वेधा । व्यधिकरणपदः समानाधिकरणपदः सङ्ख्यापूर्वपदश्चेति ॥

तत्फलः । पुं । कुवलये ॥ कुष्ठाख्यौषधौ ॥ चोरनामसुगन्धिद्रव्ये ॥

तत्र । अ । तस्मिन् । सप्तम्यर्थे ॥ सप्तम्यास्त्रल् ॥ तस्यामवस्थायाम् ॥

तत्रत्यः । त्रि । तत्रभवे ॥ अव्ययात्त्यप् ॥

तत्रभवान् । त्रि । श्लाघ्ये । पूज्ये ॥ इतराभ्योपिदृश्यन्त इतिप्राग्दीव्यतीयः प्रथमार्थेत्रल् । सुप्सुपेतिसमासः ॥

तथा । अ । साम्ये ॥ अभ्युपगमे ॥ पृष्टप्रतिवाक्ये ॥ समुच्चये ॥ निश्चये ॥ तेन प्रकारेण । प्रकारवचनेथाल् । विभक्तित्वात् त्यदाद्यत्वम् ॥

तथागतः । पुं । बुद्धमुनौ । सुगते ॥ तथा सत्यंगतं ज्ञानं यस्य यथापुनरावृत्तिर्नभवति तथा तेनप्रकारेण गत इति तथागतः । सुप्सुपेतिसमासः । तथाच सुगतिसाधकतास्योक्ता भवति । तदुक्तंबौद्धागमे । यथागतास्ते मुनयः शिवांगतिं तथागतः सोपि ततस्तथागतइति ॥ त्रि । प्रक्रान्तगतिशालिनि ॥ तथाभूते ॥

तथाच । अ । पूर्वोक्तार्थदृढीकरणे ॥

तथाहि । अ । निदर्शने ॥ प्रसिद्धमेवेत्यर्थे ॥ तथाच हिच ॥

तथैव । अ । तद्वदेवेत्यर्थे ॥

तथ्यम् । न । सत्ये । ऋते ॥ त्रि । तद्वति ॥ तथा साधुः । तत्रसाधुरिति-यत् ॥

सः । त्रि । पूर्वोक्ते । बुद्धिस्थस्य परामर्शे । सो० इतिभाषा ॥ तद्देशकालाद्यवस्थादौ दृष्टः स इति कथ्यते ॥ विप्रकृष्टविषये ॥ स्त्री । सा ॥ न । तत् तद् । सत्यज्ञानादिलक्षणलक्षितस्य तत्त्वमस्यादिश्रुतिप्रसिद्धस्य ब्रह्मणोनाम्नि ॥ यथा । तदित्यनभिसन्धाय फलं यज्ञतपः क्रियाः । दानक्रियाश्चविविधाः क्रियन्तेमोक्षकाङ्क्षिभिरिति ॥ तदिति ब्रह्माभिधानमुच्चार्य अनभिसन्धायचकर्मणः फलमित्यर्थः ॥ तनोति । तनु० । त्यजितनियजिभ्यो डिदित्यदिः ॥

तदनन्यत्वम् । न । तदभिन्नत्वे ॥ तस्मात् अनन्यत्वं नाम पृथक्सत्ताराहित्यम् ॥

तदन्यबाधितार्थप्रसङ्गः । पुं । दोषविशेषे ॥ यथा । धूमो यदि वह्निव्यभि

चारी स्यात्वर्ष्णिजन्यो न स्यादित्यादिः ॥

तदर्पणम् । न । वस्तुनःप्रत्यर्पणे । प्रतिदाने । स्वामिने निक्षेपार्पणे ॥ तस्य अर्पणम् ॥

तदा । अ । तस्मिन् काले ॥ तदोदाच ॥ सर्वैकान्येति था दा ॥

तदात्मा । पुं । तत्स्वरूपे ॥ तस्यात्मा ॥

तदात्वम् । न । वर्त्तमानकाले ॥ तदेत्यस्यभावः । तस्यभावस्त्वतलौ ॥

तदादिः । त्रि । तदाप्रभृतौ ॥ सकालः आदिर्यस्य यस्मिन्वा ॥

तदानीम् । अ । तस्मिन्काले । तदार्थे ॥ तदोदाच । दानीञ्च ॥

तदामुखम् । न । आरम्भे ॥

तदेषः । त्रि । सहोक्त्या प्रत्यक्षमेवेत्यर्थे ॥

तद्गतः । त्रि । तत्परे ॥

तद्गतमानसः । त्रि । एकाग्रचित्ततयेष्टगतान्तःकरणे ॥

तद्गुणः । पुं । काव्यालङ्कारप्रभेदे ॥ स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् । वस्तु तद्गुणतामेति भण्यतेसतु तद्गुणः ॥ वस्तुतिरस्कृतनिजरूपं केनापिसमीपगतेनप्रगुणतया स्वगुणसम्पदा परक्तं तत्प्रतिभासमेवं गत् समासादयति स तद्गुणः । तस्याऽप्रकृतस्य गुणोऽस्यास्तीति । उदाहरणम् । विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या । रत्नैः पुनर्यत्ररुचा रुचं स्वामानन्यिरे वंशकरीरनीलैः ॥ अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षयाच हरिन्मणीनां प्रगुणवर्णता ॥

तद्ग्रहः । त्रि । तदभिनिवेशे ॥ तस्मिन् ग्रहस्तद्ग्रहः ॥

तद्दिनम् । अ । दिनमध्ये ॥ प्रतिदिने इतिहेमचन्द्रः ॥ न । पूर्वोक्तदिने ॥

तद्धनः । त्रि । कृपणे ॥ इतिहेमः

तद्धर्म्मा । पुं । विनापिशीलेन स्वधर्म्मायमिति यः प्रवर्त्तते सतद्धर्म्मा ॥

तद्धितः । पुं । वृत्तिविशेषे । तद्धिताद्यधिकारविहितप्रत्ययेषु ॥ तेचद्विविधाः । प्रकृत्यर्थभिन्नार्थाः स्वार्थिकाश्च ॥ तेभ्यःप्रयोगेभ्योहितः ॥

तद्वत् । त्रि । पूर्वोक्तवति ॥ सयथास्ति । मतुप् ॥ तत्सदृशे ॥ तेनतुल्ये ॥ तुल्यार्थे वतिः ॥

तद्वला । स्त्री । वाणविशेषे ॥ इतिहेमचन्द्रः ॥

तद्बुद्धिः । स्त्री । परमात्मसाक्षात्कारपरायांबुद्धौ ॥ त्रि । सर्वदा निर्बीजसमाधिभाजिकृतसाक्षात्कारे ॥ तस्मिन् ज्ञानप्रकाशिते परमात्मतत्त्वे

सच्चिदानन्दघने एव वाह्यसर्वविषयपरित्यागेन साधनपरिपाकात्पर्यवसिता बुद्धिरन्तःकरणवृत्तिः साक्षात्कारलक्षणायस्य स तथा ॥

तनयः । त्रि । पुत्रे ॥ तनोति कुलम् तन्यते वा । तनु० । वलिमलितनिभ्यःकयन् ॥

तनया । स्त्री । दुहितरि । पुत्र्याम् ॥ टाप् ॥ चक्रकुल्यायां लतायाम् ॥ घृतकुमार्याम् ॥

तनिका । स्त्री । तनी इति भाषाप्रसिद्धे बन्धनरज्जौ ॥ यथा । वितानतनिका ॥

तनिमा । पुं । तनुत्वे । तानवे ॥ तनोर्भावः । पृथ्वादित्वात् इमनिच् ॥

तनिष्ठः । त्रि । क्षुद्रे ॥ अयमेषामतिशयेनतनुः । अतिशायने इष्ठन् ॥

तनीयान् । त्रि । अल्पे ॥ अयमनयोरतिशयेन तनुः । द्विवचनविभज्येती यसुन् ॥

तनुः । स्त्री । काये । शरीरे ॥ त्वचि ॥ स्त्रियाम् ॥ तन्वाम् ॥ वोतोगुणवचनादिति पाक्षिकोङीषभावः ॥ त्रि । अल्पे ॥ विरले ॥ कृशे ॥ तनोति तन्यतेवा । तनु० । भृमृशीत्यु: ॥ लघ्वे ॥

तनुकम् । न । सूचे ॥ तनुसूत्र इति यावादिषु पाठात् कन् ॥

तनुक्षीरः । पुं । आम्रातके ॥

तनुच्छदः । पुं । वर्मणि ॥ तनुश्छाद्यते ऽनेन । छद० । पुंसिसंज्ञायामिति घः ॥

तनुच्छायः । पुं । जालवर्वुरकवृक्षे ॥ ॥ स्त्री । न । शरीरच्छायायाम् ॥ तनोश्छाया । विभाषासेनेति वा क्लीवत्वम् ॥

तनुजः । पुं । पुत्रे ॥ तनोर्जातः । डः ॥

तनुजा । स्त्री । पुत्र्याम् ॥ टाप् ॥

तनुत्रम् । न । वर्मणि । सन्नाहे ॥ तनुं त्रायते । त्रैङ्० । आतोनुपेतिकः ॥

तनुत्राणम् । न । कवचे । तनुत्रे ॥ शरीररक्षणे ॥

तनुत्वचा । स्त्री । क्षुद्राग्निमन्थे ॥

तनुपत्रः । पुं । इङ्गुदीवृक्षे ॥

तनुभस्त्रा । स्त्री । नासिकायाम् ॥ तनोर्भस्त्रेव ॥ तन्वांचर्मप्रसेविकायाम् । छोटी भाथी इति छोटीमसक इतिच भाषा ॥

तनुभृत् । पुं । जीवे ॥

तनुमध्या । स्त्री । गायत्रीछन्दः प्रभेदे ॥ त्यौचेत्तनुमध्या । य० । मूर्त्तिर्मुरशत्रोरत्यद्भुतरूपा । आस्तां ममचित्ते नित्यं तनुमध्या ॥

तनुरसः । पुं । घर्मे । स्वेदजले ॥ अल्प

रसे ॥ त्रि । तद्विशिष्टे ॥

तनुरुट् । न । रोमणि ॥

तनुरुहम् । न । तनुरुहे ॥ त्रि । तनौ रूढे ॥

तनुवात: । पुं । नरकविशेषे ॥

तनुत्रम् । न । वर्मणि । सन्नाहे ॥ तनुं त्रायते आवृणोति आच्छादयति । कृञ० । कर्मण्यण् ॥

तनुबीज: । पुं । राजबदरे ॥

तनुव्रण: । पुं । वल्मीकरोगे ॥

तनु: । न । शरीरे ॥ तनोति तन्यते वा । तनु० । अर्त्तिपृवपियजितनिधनितपिभ्योनिदित्युसिप्रत्यय: । तनुषी तनूंषि ॥

तनुसञ्चारिणी । स्त्री । बालिकायाम् ॥

तनुसर: । स्वेदे ॥ तनो:सरति । सृ० । अच् ॥

तनू: । स्त्री । काये । शरीरे ॥ तनोति तन्यते वा । तनु० । भृमृशीत्यु: । प्राणिजातेरित्यूङ् ॥ कृषिचमितनिधनीत्यूर्वा ॥

तनूकृत: । त्रि । तष्टे । सूक्ष्मीकृते ॥ अतनुस्तनु:कारि । कृञ: क्त: ॥

तनूज: । पुं । पुत्रे ॥ त्रि । शरीरजे ॥ तन्वा:जात: । पञ्चम्यामितिड: ।

तनूजनि: । पुं । पुत्रे ॥ तन्वा:जनिर्यस्य ॥

तनूजा । स्त्री । पुत्रिकायाम् ॥ टाप् ॥

तनूनपम् । न । आज्ये । घृते ॥ तन्वा जनं कृशं पाति । पा० । क: ॥

तनूनपात् । पुं । अग्नौ । पावके ॥ तनूं शरीरं न पातयति । नभ्राण्नपादिति निपातित: । तनूनपातौ । तनूनपात: ॥ तनूं स्वस्वरूपं न पाति नरक्षति । आशुविनाशित्वात् इति तनूनपाच्छब्द: । उगिदचामितिनुमि तनूनपात् तनूनपातौ तनूनपात इतिवा ॥ तन्वा जनं कृशं पाति । तनूनपं घृतादि तत् अत्ति । अदो ऽनन्न इतिविट् । तनूनपात् तनूनपादौ तनूनपादइतिवा ॥ चित्रके ॥

तनूरुहम् । न । रोम्णि ॥ पक्षिपक्षे । पतत्रे ॥ पुत्रे ॥ तन्वां रोहति । रु० । इगुपधेतिक: । मू०कोषा ॥

तनूह्रद: । पुं । पायौ । गुदे ॥

तन्ति: । स्त्री । प्रसारितरज्ज्वाम् ॥ दाम्न्याम् ॥

तन्तु: । पुं । सूत्रे ॥ ग्राहे ॥ अपत्ये ॥ सन्ततौ ॥ तनोति तन्यते वा । तनु० । सितनीतितुन् ॥

तन्तुकाष्ठम् । न । तूल्याम् । तांतका काठ इति भाषा ॥

तन्तुकी । स्त्री । नाड्याम् ॥

तन्तुकीट: । पुं । कोषकारे । गुटिपोका इतिगौड भाषा । रेसमकाकीडा

इति भाषा ॥

तन्तुणः । पुं । ग्राहे । हाँगर इतिगौडभाषा ॥

तन्तुनागः । पुं । ग्राहे ॥

तन्तुनाभः । पुं । लूतायाम् ॥

तन्तुनिर्य्यासः । पुं । तालवृक्षे ॥

तन्तुपर्व्व । न । परमेश्वरोपवीतदानतिथौ । श्रावण्यां पूर्णिमायाम् ॥

तन्तुभः । पुं । सर्षपे ॥ तन्तुना भाति । भा० । सुपीतिकः ॥ वत्से ॥

तन्तुरम् । न । } मृणाले ॥
तन्तुलम् । न । }

तन्तुली । स्त्री । सितापाके । चासनी इतिभाषा ॥

तन्तुवापः । पुं । तन्त्रवाये । कुविन्दे ॥ तन्तून् वपति । टुवप्० । कर्मण्यण् ॥

तन्तुवायः । पुं । लूतायाम् ॥ तन्तून् वयति । वेञ्० । ह्वावामश्चेत्यण् ॥ तन्त्रवाये । कुविन्दे । कोली इतितांती इतिच भाषा ॥

तन्तुविग्रहा । स्त्री । कदल्याम् ॥

तन्तुशाला । स्त्री । गर्त्तिकायाम् । तन्तुवयनगृहे ॥ तन्तूनां शाला ॥

तन्तुसन्ततम् । न । ऊते । स्यूते । वुनाकपडा इतिभाषा ॥

तन्तुसारः । पुं । गुवाकवृक्षे ॥

तन्त्रम् । न । कुटुम्बकृत्ये ॥ सिद्धान्ते ॥ उत्तमौषधे ॥ प्रधाने ॥ तन्तुवाये ॥ परिच्छदे ॥ हेतौ ॥ उभयार्थप्रयोजके । उभयोर्द्देशेनसकृत्प्रवृत्तौ ॥ इतिकर्त्तव्यतायाम् ॥ राष्ट्रे ॥ परच्छन्दे ॥ करणे ॥ अर्थसाधके ॥ तन्त्रौ ॥ स्वराष्ट्रचिन्तायाम् ॥ परिजने ॥ वापसाधने । तन्तुवायशलाकायाम् ॥ तन्यन्ते तन्तवोऽस्मिन् । ष्ट्रन् ॥ प्रबन्धे ॥ शपथे ॥ धने ॥ गृहे ॥ वपनसाधने ॥ कुले ॥ श्रुतिशाखाविशेषे ॥ शास्त्रविशेषे ॥ तस्यलक्षणं यथा । सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णयएवच । देवतानाञ्च संस्थानं तीर्थानां चैव वर्णनम् ॥ तथैवाश्रमधर्मश्चविप्रसंस्थानमेवच । संस्थानञ्चैवभूतानां यन्त्राणाञ्चैवनिर्णयः ॥ उत्पत्तिर्विबुधानाञ्च तरूणांकल्पसंज्ञितम् । संस्थानं ज्योतिषां चैव पुराणाख्यानमेवच ॥ कोषस्य कथनञ्चैव व्रतानांपरिभाषणम् । शौचाशौचस्यचाख्यानं नरकाणाञ्चवर्णनम् ॥ हरचक्रस्याख्यानं स्त्रीपुंसोश्चैवलक्षणम् । राजधर्मो दानधर्मो युगधर्म स्तथैवच ॥ व्यवहारः कथ्यतेच तथाचाध्यात्मवर्णनम् । इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥ *॥ च. ब्रतस्य माहात्म्यम् । विष्णुर्वरिष्ठोदेवानां ह

ह्रदानामुदधिस्तथा । नदीनाञ्चयथा गङ्गा पर्व्वतानांहिमालयः॥ अश्वत्थः सर्व्ववृक्षाणां राज्ञामिन्द्रोयथावरः। देवीनाञ्चयथादुर्गा वर्णानां ब्राह्मणोयथा॥ तथासमस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्। सर्व्वकामप्रदं पुण्यं तन्त्रं वैवेदसम्मितम्॥ कीर्त्तनंदेवदेवस्य हरस्यमतमेवच। पावनं श्रद्दधानानामिहलोकेपरत्रचेति॥ तच्च चतुःषष्टिसंख्यकम्। यथा। सिद्धीश्वरं महातन्त्रं कालीतन्त्रंकुलार्णवम्। ज्ञानार्णवंनीलतन्त्रं फेत्कारी तन्त्रमुत्तमम्॥ देव्यागममुत्तराख्यं श्रीक्रमं सिद्धियामलम्। मत्स्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा॥ वाराहीतन्त्रं देवेशि योगिनीतन्त्रमुत्तमम्। गणेशविमर्षिणी तन्त्रं नित्यातन्त्रं शिवागमम्॥ चामुण्डाख्यं महेशानि मुण्डमालाख्यतन्त्रकम्। हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम्॥ कुलप्रकाशकं देविकल्पं गान्धर्व्वकंशिवे। क्रियासारं निवन्धाख्यं स्वतन्त्रतन्त्रमुत्तमम्॥ सम्मोहनं तन्त्रराजं ललिताख्यं तथाशिवे। राधाख्यं मालिनी तन्त्रं रुद्रयामलमुत्तमम्॥ वृहच्छ्रीक्रमतन्त्रञ्च गवाक्षं सुकुमुद्दिनी। विशु

तन्त्रम्

द्धेश्वरतन्त्रञ्च मालिनीविजयं तथा॥ समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम्। योगिनी हृदयं तन्त्रं भैरवं परमेश्वरि॥ सनत्कुमारकं तन्त्रंयोनितन्त्रं प्रकीर्त्तितम्। तन्त्रान्तरञ्च देवेशिनवरत्नेश्वरंतथा॥ कुलचूडामणितन्त्रं भावचूडामणीयकम्। मन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा॥ कामधेनुःकुमारीच भूतडामरसंज्ञकम्। मालिनीविजयं तन्त्रं यामलं ब्रह्मयामलम्॥ विश्वसारं महातन्त्रं महाकालं कुलामृतम्। कुलोड्डीशं कुब्जिकाख्यं यन्त्रचिन्तामणीयकम्॥ एतानितन्त्ररत्नानि सफलानियुगेयुगे। कालीविलासकादीनि तन्त्राणि परमेश्वरि॥ कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु। महाचीनादितन्त्राणि अविकल्पे महेश्वरि॥ सुसिद्धानि वरारोहे रथक्रान्तासु भूमिषु। इति सिद्धिसारस्वतम्॥ *॥ अपिच। चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति। सफलानीह वाराहे विष्णुक्रान्तासु भूमिषु॥ कल्पभेदेन तन्त्राणि कथितानिच यानिच। पाषण्डमोहनायैव विफलानीह सुन्दरीति महाविश्वसारतन्त्रम्॥ चि। आयत्ते

॥ साङ्ख्यादिशास्त्रविशेषे ॥ मन्यन्ते व्युत्पाद्यन्ते तत्त्वान्यनेनेति व्युत्पत्तेः ॥ तननम् । तन्यते ऽनेन वा । तनु० । ष्ट्रन् ॥ यद्वा । तन्त्रणम् । तन्त्र्यते वा । तन्त्रि कुटुम्बधारणे । घञ् ॥

तन्त्रकम् । न । अनाहते । नवीनवस्त्रे ॥ तन्त्रादचिरापहृते इति साधु ॥

तन्त्रकाष्ठम् । न । तन्त्रवायस्य तुरीम् ॥

तन्त्रता । स्त्री । अनेकमुद्दिश्य सकृत्प्रवृत्तौ ॥ यथा । आग्नेयाष्टकपालैन्द्रदध्यैन्द्रपयोयागानां त्रयाणाम् आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत्-सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिध्यति । तथा नानाब्रह्मवधसत्त्वे सर्वोद्देशेन सकृत् प्रायश्चित्ते कृते ब्रह्मवधजन्यपापनाशः । तन्त्रता-बाहुलश्च । अदृष्टार्थैकजातीयकर्मणः कालदेशकर्त्रादीनां प्रयोगानुवन्धवैधहेतुभूतानामभेदे उद्देश्यविशेषाग्रह इति । एवञ्च स्नातोऽधिकारी भवति दैवे पैत्रे च कर्मणि । पवित्राणां तथा जाप्ये दाने च विधिदर्शिते इति विष्णूक्तम् । अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चनेति दक्षोक्तञ्च क्रियाङ्गस्नानं कर्त्तृसंस्कारद्वारैव तद्धि नकर्त्तव्याशेषकर्मार्थमेकमेव न तु प्रतिकर्मैकर्त्तव्यम् । इति प्रायश्चित्ततत्त्वम् ॥

तन्त्रवापः । पुं । तन्त्रवाये ॥ तन्तवो वितन्यन्ते यत्र तत् तन्त्रम् । तद्वपति । टुवप० । कर्मण्यण् ॥

तन्त्रवायः । पुं । कुविन्दे ॥ वर्णसङ्करजातिरयम् ॥ अस्योत्पत्तिर्यथा । ताम्रकुट्टाच्छङ्खकार्य्यां मणिकारश्च जायते । मणिकारात् ताम्रकुट्ट्यां मणिबन्धी व्यजायत ॥ मणिबन्धान्मणिकार्य्यां तन्त्रवायाश्च जज्ञिरे । इति पराशरपद्धतिः ॥ तन्तवो वितन्यन्ते यस्मिन् । तत् तन्त्रम् । तद्वयति । वेञ्० । ह्वावामश्चेति कापवादोऽण् ॥

तन्त्रिका । स्त्री । गुडूच्याम् ॥ तन्त्रयते । तत्रि० । ण्वुल् ॥ तन्त्र्येव वा । कन् । ह्रस्वः ॥

तन्त्रिपालकः । पुं । जयद्रथनृपे ॥

तन्त्रीः । स्त्री । वीणागुणे ॥ अमृतायाम् । गुडूच्याम् ॥ देहशिरायाम् ॥ नाड्याम् ॥ रज्ज्वाम् ॥ नदीविशेषे ॥ युवतीप्रभेदे ॥ वीणाप्रभेदे । तन्त्र्यते । तत्रि० । अवितॄस्तृतन्त्रिभ्य ईः ॥

तन्द्रा । स्त्री । निद्रायाम् ॥ आलस्ये । प्रमीलायाम् ॥ तस्या निदानं लक्षणञ्च । यथा । तमोवातकफात् तन्द्रेति ॥ इन्द्रियार्थेष्वसंवित्ति गौर

वं जृम्भणं क्लमः । निद्रार्त्तस्येव यस्येहा तस्य तन्द्रीं विनिर्दिशेदिति ॥ निद्रायां प्रवृद्धस्य क्लमाभावः । तन्द्रायान्तु प्रबोधितस्यापि क्लम इत्यनयोर्भेदः ॥ तत् राति । तत्पूर्वाद्रातेरातोनुपेतिकः । टाप् ॥ तत् द्रातिवा । द्राकुत्सायांगतौ । स्पृहिगृहीत्यादिना तदोनान्तत्वं निपात्यते ॥ निद्रातन्द्रेतिवा निपात्यते ॥ तन्द्रा च सुखस्य भार्या निद्रायाःकन्या प्रीतेर्भगिनी । यथा । निद्राकन्या च तन्द्रा सा प्रीतिरन्या सुखप्रिये । याभ्यांव्याप्तं जगत्सर्वं विधिपुत्रविधेर्विधाविति ॥

तन्द्रालुः । त्रि । निद्रालौ ॥ तत् द्राति । द्रा० । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुजिति तच्छीलादिषु आलुच् । तच्छब्दस्य नान्तत्वं समासश्च निपात्यते ॥

तन्द्रिः । स्त्री । आलस्ये ॥ निद्रायाम् ॥ तन्द्रायाः करणम् । तत्करोतीतिण्यन्तादृचः ॥ यथा । तदिः सौत्रोधातुः ॥ तस्मात् वङ्क्यादयश्चेत्यौणादिकः क्रिन् ॥

तन्द्रिका । स्त्री । तन्द्र्याम् ॥

तन्द्रितः । त्रि । अलसे ॥ तन्द्रा सञ्जाता अस्य । ता० इतच् ॥

तन्द्री । स्त्री । अत्यन्तश्रमादिना सवेन्द्रियासामर्थ्ये । प्रमीलायाम् ॥ तन्द्र्याः कृदिकारादितिङीष् ॥ तत् रातिवा । आतोनुपेतिकः । गौ० ङीष् ॥ तत् द्रातिवा । द्रा० । निद्रातन्द्रेति तदोनान्तत्वं निपात्यते ॥

तन्निष्ठः । त्रि । सर्वकर्मसन्न्यासेन ब्रह्मात्मैक्यविचारपरे ॥ तस्मिन्नेव ब्रह्मणि सर्वकर्मानुष्ठानविक्षेपनिवृत्त्या स्थितिर्यस्य सः ॥ तस्मिन् स्थिते ॥

तन्मयः । त्रि । तद्भावभाविते ॥ अभेदे ॥

तन्मात्रम् । न । शब्दादीनां सूक्ष्मेषु । शब्दतन्मात्राणि स्पर्शतन्मात्राणीत्यादिपदवाच्येषु ॥ नत्वेषां शान्तादिर्विशेषोऽस्ति । यथोक्तं विष्णुपुराणे । तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता । तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते ॥ न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिण इति ॥ सा मात्रा यस्मिन् तत् । त्रि । तावन्मात्रे ॥

तन्यतुः । पुं । वायौ ॥ निशि ॥ तनोति । तनु० । ऋतन्यञ्जीत्यादिना यतुच् ॥ तन्यतुर्गर्जितमिति तन्यतुरशनिरिति च वेदभाष्यम् ॥

तन्वस्था । स्त्री । अभिव्यक्तस्यापि सत्कार्ये ऽलाभात कार्याजनने ॥

तन्विः । स्त्री । पृश्निपर्ण्याम् ॥

तन्वी । स्त्री । कृशाङ्ग्याम् ॥ वोतो गुणवचनादिति ङीष् । तनुशब्दस्तनुत्वं गुणमुक्त्वा तद्द्रव्यमभिधत्त इति गुणवचनः ॥ शालपर्ण्याम् ॥ संस्कृति संज्ञके चतुर्विंशत्यक्षरात्मके छन्दसि ॥ भूतमुनीनैर्यतिरिह भतना स्भौ भनयाश्च यदि भवति तन्वी ॥ यथा । माधवमुग्धे मधुकरविरुतैः कोकिलकूजितमलयसमीरैः । कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यविगततनुदाहा ॥ पद्मपलाशैर्विरचितशयने देहजसञ्ज्वरभरपरिदूने । निश्वसती सा मुहुरतिपरुषं श्यामलकेतवनिवसतितन्वी ॥ इति ॥

तपः । पुं । ग्रीष्मे । ज्येष्ठाषाढयोः ॥ तपति । तपसन्तापे । पचाद्यच् ॥

तपःकरः । पुं । तपस्वीमत्स्ये ॥ त्रि । तपस्याकारके ॥

तपःक्लेशसहः । त्रि । दान्ते ॥ तपसंःक्लेशः । सहते । षह० । अच् । तपःक्लेशस्य सहः ॥

तपःस्थः । त्रि । तपसि स्थिते ॥ सुपिस्थ इति कः ॥

तपःस्थली । स्त्री । काश्याम् ॥

तपती । स्त्री । छायानामसूर्यपत्न्याम् ॥ सूर्यसुतायाम् ॥ नदीविशेषे ॥

तपनः । पुं । सवितरि ॥ अरुष्करे । भल्लातवृक्षे ॥ निरयान्तरे ॥ ग्रीष्मे ॥ अर्कवृक्षे ॥ क्षुद्राग्निमन्थवृक्षे ॥ सूर्यकान्तमणौ ॥ तापे ॥ तपति । तप० । ल्युः ॥

तपनच्छदः । पुं । आदित्यपत्रवृक्षे ॥

तपनतनया । स्त्री । यमुनायाम् ॥ तपनस्य तनया ॥ शमीवृक्षे ॥

तपनमणिः । पुं । सूर्यकान्तमणौ ॥

तपनात्मजा । स्त्री । गोदावरीनद्याम् ॥ यमुनायाम् ॥ तपनस्य आत्मजा ॥

तपनी । स्त्री । गोदावर्याम् ॥

तपनीयम् । न । स्वर्णे ॥ तप्यतेऽनेन । तप० । कृत्यल्युटश्चेत्यनीयर् ॥

तपनीयकम् । न । सुवर्णे ॥

तपनेष्टम् । न । ताम्रे ॥

तपस् । पुं । माघमासे ॥ शिशिरे ॥ तपत्यस्मिन् । तप० । असुन् ॥

तपस् । न । जनलोकोपरिवर्त्तिनि लोकविशेषे ॥ यथा । तपोऽर्ककोटितेजास्ते महायोगी सनन्दनः । ऋभुः सनत्कुमारश्च सनकश्च महातपाः इति ॥ ध्यानादिलक्षणे ब्रह्मणि ॥ कन्यायामित्राद्यणात् दृष्ट्वा तपस्यात्तापयतीत्युक्तेः ॥ आलोचने ॥ ज्ञाने ॥ स्वधर्मे । स्वाश्रमविहितकर्मणि ॥ देहक्लेशजनककर्मणि ॥ नवमभवने ॥ कांशानम-

ने ॥ तपोनानशनात्परम् ॥ क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहने ॥ चित्तप्रसादहेतुभूते व्रतनियमोपासनादिकर्मणि ॥ काष्ठमौनाकारमौनादिव्रते ॥ कायेन्द्रियमनसां समाधाने ॥ शास्त्रीयमार्गेण कायेन्द्रियमनसां शोषणे ॥ कृच्छ्रचान्द्रायणप्राजापत्यादिरूपे प्रायश्चित्ते ॥ अग्निचित्तसप्तशिलारोहणादौ ॥ वानप्रस्थस्यासाधारणधर्मे ॥ तच्च शारीरादिभेदात्त्रिविधम् । यथा । देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् । स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते ॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ॥ तदपि सात्त्विकादिभेदात् त्रिविधं यथा । श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ सत्कारमानपूजार्थं तपोदम्भेनचैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ मूढग्राहेणात्मनो यत् पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतमि-

ति ॥ मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमन्तपः ॥ ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् । वैश्यस्य तु तपो वार्त्ता तपः शूद्रस्य सेवनम् ॥ तपनम् तप्यतेऽनेन वा । तप० । तपति ईष्टे । तप ऐश्वर्य्ये वा । असुन् ॥

तपसः । पुं । चन्द्रे ॥ तपति । तप० । अत्यविचमितमिनमीत्यादिना ऽसच् ॥ पक्षिणि ॥

तपस्तक्षः । पुं । इन्द्रे ॥ इति हेमचन्द्रः ॥

तपस्थः । त्रि । तपसि स्थिते ॥ सुपिस्थ इति कः । खर्परे शरीति पाक्षिको विसर्गलोपः ॥

तपस्यः । पुं । फाल्गुने मासि ॥ अर्जुने ॥ तपसि साधुः । तत्र साधुरिति यत् ॥ न । कुन्दपुष्पद्रुमे ॥

तपस्या । स्त्री । नियमस्थितौ । व्रतचर्य्यायाम् । तपश्चर्य्यायाम् ॥ तपश्चरति तपस्यति । कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोरिति क्यङ् । तपस्यति इति तपस्या । अप्रत्ययादिति स्त्रियामप्रत्ययः । टाप् ॥

तपस्वी । त्रि । तापसे । पारिकाङ्क्षिणि ॥ कृच्छ्रचान्द्रायणादितपःप्रधाने वानप्रस्थादौ ॥ अनुकम्प्ये । दीने ॥ प्रशस्ततपसि ॥ तपोऽस्यास्ति । तपःसहस्राभ्यामिति विनिः ॥ पुं । ना

रदे ॥ घृतकरञ्जे ॥ तपस्यारञ्ज इति गौडभाषा प्रसिद्धे मत्स्ये। चेच्छके ॥ इतिराजनिर्घण्टः ॥

तपस्विनी । स्त्री । तपोयुक्तायाम् ॥ जटामांस्याम् ॥ कटुरोहिण्याम् ॥ महाश्रावणिकायाम् ॥ सन्तापवत्याम् ॥ ऋन्नेभ्यइतिङीप् ॥

तपस्विपत्रः । पुं । दमनकवृक्षे ॥

तपात्ययः । पुं । वर्षाकाले ॥ तपस्यात्ययो यस्मिन् ॥

तपितः । त्रि । तप्ते। तपा इतिभाषा॥

तपिनी । स्त्री नक्षत्रे ॥

तपुः । न । सूर्ये ॥ अग्नौ ॥ शत्रौ ॥ तपति । तप॰ । अर्त्तिपृवपियजितनिधनितपिभ्योनिदित्युसिः। तपुषी तपूंषि ॥

तपोधनः । पुं । तापसे । तपस्विनि ॥ दमनकवृक्षे ॥ तपोधनंयस्य ॥

तपोधना । स्त्री । मुण्डीर्याम् ॥

तपोनिष्ठः । पुं । सदाध्ययननिष्ठे तापसविशेषे ॥

तपोयज्ञः । पुं । तपस्विनि ॥ कृच्छ्रचान्द्रायणादितपएवयज्ञोऽस्य ॥

तपोवटः । पुं । ब्रह्मावर्त्तदेशे ॥

तपोवनम् । न । गुह्यकलोकवत्सफलके तीर्थविशेषे॥

तप्तः । त्रि । प्रज्वलिते ॥ तप्यतेस्म। तप॰। क्तः ॥ तापयुक्ते । सन्तापिते ॥

तप्तकम् । न । तवा इति लोकप्रसिद्धे पोलिकादिसाधने ॥

तप्तकुम्भः । पुं । नरकविशेषे ॥

तप्तकृच्छ्रः । पुं । व्रतविशेषे ॥ यथा । तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः इति ॥ अथ पराशरोक्तो विशेषः ॥ यथा। षट्पलन्तु पिबेदम्भस्त्रिपलन्तु पयःपिबेत्। पलमेकंपिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते। इति ॥ पयोघृतमुदकं वायुतसंप्रतित्र्यहं पिबेत् सतप्तकृच्छ्रः। इति गौतमः॥

तप्तपाषाणकुण्डम् । न । नरकविशेषे॥

तप्तबालुकः । पुं । नरकविशेषे ॥

तप्तमासकम् । न । पुण्यपापयोःपरीक्षाविशेषे ॥

तप्तमुद्रा । स्त्री । शरीरधार्याग्नितप्तधातुमयभगवदायुधचिह्ने ॥ यथा । आषाढशुक्लद्वादश्यां हरौशिशयिषे सति । वैष्णवःपारणं कृत्वा तप्तमुद्राश्च धारयेत् ॥ ब्राह्मणःक्षत्रियो वैश्यःशूद्रश्चैकान्तितद्द्वये । कुर्वन्नात्मार्पणं तप्तमुद्राभिर्देह मङ्कयेत् ॥ * ॥ तप्तमुद्राधारणनिन्द्यतोक्ता वायुपुराणे । अग्निनैवचसन्तप्तं चक्र

माद्राय वैष्णवः । धारयेत् सर्ववर्णा
नां हरिसालोक्यसिद्धये ॥ ब्रह्माण्डे ।
कृत्वा धातुमयीं मुद्रां तापयित्वा स्व
कां तनुम् । चक्रादिचिह्नितां भूप धा-
रयेद्वैष्णवो नरः ॥ नारदीयपञ्च-
रात्रे । द्वादशारन्तु षट्कोणं वलयत्र
यसंयुतम् । हरेः सुदर्शनं तप्तं धार
येत् तद्विचक्षणः ॥ सौपर्णे च श्रीभ-
गवद्गरुडसंवादे तप्तमुद्राप्रकरणे ।
गरुत्मन्विशेषेण सर्ववर्णेष्वयंविधिः ।
विप्रो वा क्षत्रियो वापि वैश्यः शूद्रस्त-
थैव च ॥ पाद्मे । अग्निहोत्रं यथानि
त्यं वेदस्याध्ययनं यथा । ब्राह्मणस्य त
थैवेदं तप्तचक्रादिधारणम् ॥ किञ्च
तत्रैवोत्तरखण्डे श्रीशिवोमासंवादे ।
शङ्खचक्राङ्कनं कुर्याद्ब्राह्मणो बाहु-
मूलयोः । हुताग्निनैव सन्तप्य सर्वपा
पापनुत्तये ॥ चक्रं वा शङ्खचक्रे वा त
थापञ्चायुधानि वा । धारयित्वैव विधि
वद् ब्रह्मकर्म समारभेत् ॥ * ॥ कि
ञ्चतत्प्रसङ्ग एव । अधृत्वा विधिना च
क्रं ब्राह्मणः प्राकृतो भवेत् । किञ्च ।
न तस्य किञ्चिदश्नीयाद् दपिक्रतुसह-
स्रिणः । सर्ववेदविदो वापि सर्वशा
स्त्रविशारदः । अधृत्वा विधिना चक्रं
ब्राह्मणः पतितो भवेत् ॥ किञ्च ।
तप्तेनैवाङ्कनं कुर्याद्ब्राह्मणस्य विधा-
नतः । श्रौतस्मार्त्तादिसिद्ध्यर्थं मन्त्र-
सिद्ध्यै तथैव च ॥ हरेः पूजाधिकारा
र्थं चक्रं धार्यं विधानतः । वैष्णवत्व-
स्य सिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः ॥
किञ्च । उपवीतादिवद्धार्याः शङ्ख
चक्रादयस्तथा । ब्राह्मणस्य विशेषेण
वैष्णवस्य विशेषतः ॥ * ॥ अत्र । यो
हवै सुश्लोकमौले धर्ममनुतिष्ठमा-
नोऽग्निनाचक्रं धत्ते । अग्निर्वै सह-
स्रारः सहस्रारो नेमिर्नेमिना तप्त
नुः सायुज्यं सलोकतामाप्नोतीत्या
द्याः श्रुतयो बह्व्य उदाहृताः सन्ति-
वेङ्कटाचार्यादिभिः । तद्भिन्नानि पुरा
णवचनानि चतानि गौरवभिया न लि
खितानि । मन्वादिस्मृतिषु रामाय-
णभारतादिष्वदृष्टत्वात् मन्वर्थविप
रीतायाः स्मृतेरप्रशस्तत्वाच्च ॥
तप्तरूपकम् । न । रौप्ये ॥
तप्तसुराकुण्डम् । न । नरकान्तरे ॥
तप्तसूर्म्मिकुण्डम् । न । नरकविशेषे ॥
तप्ताङ्गारः । पुं । महानरकान्तरे ॥
तमः । पुं । तमोगुणे ॥ तमालवृक्षे ॥
स्वर्भानौ ॥ न । पादाग्रे ॥ अन्धकारे ॥
ताम्यति । तमुग्लानौ । पचाद्यच् ॥
तमनम् । भावेघञ् । नोदात्तोप
देशस्येतिनवृद्धिः ॥
तमःपतिः । पुं । क्रियाद्दङ्निरोद्धरि वा

मदेवनाशे ॥

तमःप्रधानः । पुं । तमोगुणप्रधानमायोपाधिके परमात्मनि ॥ त्रि । तमोगुणप्रधाने ॥

तमःप्रभः । पुं । नरकविशेषे ॥

तमःप्रभा । स्त्री । नरकभूमिभेदे ॥

तमकः । पुं । श्वासरोगप्रभेदे ॥

तमङ्गकः । पुं । इन्द्रकोषे । मञ्चके ॥

तमतः । त्रि । तृषिते । तृष्णापरे ॥ ताम्यति । तमुकाङ्क्षायाम् । भृमृदृशियजी इत्यादिना ऽतच् ॥

तमप्रभः । पुं । नरकविशेषे ॥

तमरम् । न । वङ्गे ॥ इति हेमः ॥

तमस् । न । चक्षुर्वृत्तेर्निरोधके शार्वरादिध्वान्ते ॥ शोके ॥ पापे ॥ कार्य्याकार्य्याविवेके ॥ अविद्यायाम् ॥ मन्दान्धकारे ॥ मोहान्धकारे ॥ विशेषदर्शनविरोधिदोषे ॥ सर्व्वदेहिनां मोहनेप्रकृतेर्गुणविशेषे ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति ॥ गुरुवरणकमेवतमस्तं साङ्ख्याचार्य्यैः । तमस्त्वयमविक्रियम् । तन्मोहहेतु सन्मोहात्मकं तमः । भेदस्तमसोऽष्टविधः । तमसो ऽविद्याया अष्टविधो भेदः । अष्टसु अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिरविद्या तमस्तस्याष्टविधविषयत्वादष्टविधत्वम् ॥ मले ॥ ताम्यति तम्यते ऽनेनवा । तमुग्लानौ । असुन् ॥ पुं । न । विधुन्तुदे ॥

तमसम् । न । अन्धकारे ॥ ताम्यति ग्लानिं प्राप्नोत्यनेनास्मिन्वा । तमु० । अत्यविचमितमीत्यादिना ऽसच् ॥

तमसा । स्त्री । नदीविशेषे ॥

तमस्ततिः । स्त्री । ध्वान्ते । अन्धकारसमूहे ॥ तमस ततिः ॥

तमस्विनी । स्त्री । क्षपायाम् । रात्रौ ॥ तमो ऽस्त्यस्याम् । अस्मायामेधास्रजो विनिः ॥ हरिद्रायाम् ॥

तमा । स्त्री । रजन्याम् ॥ तमालद्रुमे ॥ ताम्यत्यस्याम् । तमु० । अच् । टाप् ॥

तमालः । पुं । तिलके । पुण्ड्रे ॥ खड्गे । असौ ॥ वरुणद्रुमे ॥ तापिञ्छे । कालस्कन्धे ॥ तमालः शालवदेशो दावविस्फोटहृत्परः । कृष्णखदिरे ॥ ताम्यति । तमु० । तमिविशिविडी तिकालन् ॥ न । पत्रके । तेजपात इतिभाषा ॥

तमालकम् । न । सुनिषण्णशाके ॥ पत्रके ॥ पुं । न । तमालद्रुमे ॥

तमालपत्रम् । न । तापिञ्छ । कालस्कन्धे ॥ तिलके ॥ पत्रके । तेजपात-इतिभाषा ॥ तमालस्य पत्रमिव तदा-

कृतित्वात् ॥

तमालिका । स्त्री । ताम्रवल्ल्याम् ॥ भूम्यामलक्याम् ॥ तामलिप्तदेशे ॥

तमाली । स्त्री । ताम्रवल्ल्याम् ॥ वरुणवृक्षे ॥

तमिः । स्त्री । रात्रौ ॥

तमिस्रम् । न । कोपे ॥ तिमिरे । अन्धकारे ॥ तमोऽस्त्यत्र । भावप्रधानो निर्देशः । ज्योत्स्नातमिस्रेति साधु ॥ तमिस्राख्याश्रयत्वेनास्येति वा । अर्श आद्य ॥

तमिस्रपक्षः । पुं । कृष्णपक्षे ॥

तमिस्रा । स्त्री । कृष्णपक्षनिशायाम् ॥ भूतरात्रौ ॥ दर्शयामिन्याम् ॥ तमस्ततौ । तमसां समूहे ॥ तत्रत्यवयवभूतानि तमांसि विद्यन्ते । तमोबहुत्वमस्त्यस्याम् । ज्योत्स्नातमिस्रेति तमस उपधाया इत्वं रप्रत्ययश्च निपातितः । टाप् ॥

तमी । स्त्री । यामिन्याम् । रात्र्याम् ॥ ताम्यन्त्यस्याम् । तमु० । इन् । कृदिकारादितिङीष् ॥ हरिद्रायाम् ॥

तमोगुणः । पुं । विषादात्मके । विषादो मोह स्तत्स्वरूपे ॥

तमोघ्नः । पुं । सूर्ये ॥ वह्नौ ॥ इन्दौ ॥ बुद्धे ॥ शङ्करे ॥ विष्णौ ॥ तमो हन्ति । हनः । अमनुष्यकर्तृके चेति टक् ॥

तमोज्योतिः । पुं । खद्योते ॥ तमसि ज्योतिरस्य ॥

तमोनुत्-द् । पुं । चन्द्रे ॥ सूर्ये ॥ अग्नौ ॥ दीपे ॥ तमो नुदति । णुद० । क्विप् ॥

तमोनुदः । पुं । प्रकृतेः प्रेरके स्वयम्भुवि ॥ आदित्ये ॥

तमोपहः । पुं । सहस्रांशौ ॥ मृगाङ्के ॥ वह्नौ ॥ तमोऽपहन्तीति विग्रहे अपेक्लेशतमसोरित्यनेन अपपूर्वाद्धन्ते स्तमसि कर्मोपपदे कर्त्तरि डः ॥ जिने ॥

तमोभित्-द् । पुं । तमोनुदर्थे ॥ खद्योते ॥ तमो भिनत्ति । भिदिर्० । क्विप् तुकौ ॥

तमोमणिः । पुं । खद्योते ॥ तमसो मणिरिव ॥ गोमेदकमणौ ॥

तमोलिप्ती । स्त्री । तमोलुक इति नाम्ना प्रसिद्धे देशे । तामलिप्ते । वेलाकूले ॥

तमोविकारः । पुं । रोगे ॥

तमोविशालः । पुं । मूलतः सर्गे पश्वादि स्थावरान्ते ॥ मूलतः सर्गोपि मोहमयत्वात्तमोबहुलः ॥

तमोहरः । पुं । चन्द्रे ॥ न । ज्योतिषि ॥ निर्गुणं वामभागे च सव्यभागेऽद्भुता निजा । मध्ये नाथः स्वयं ज्योतिस्तज्ज्यो

तिर्मेतमोहरम् ॥ त्रि । तमसोहर ज्ञानकर्त्तरि ॥ हरति । हृञ् । अच् । तमसोहरः ॥

तम्पा । स्त्री । } गवि । सौरभेय्याम् ॥
तम्बा । स्त्री । } इति हेमचन्द्रः ॥

तम्बिका । स्त्री । तम्ब्याम् ॥

तम्बी । स्त्री । तयी इति भाषाप्रसिद्धे कान्स्यविकृभाण्डे ॥

तय: । पुं । रक्षके ॥ तयति । तयरक्षणे गतौ च । अच् ॥

तर: । पुं । तरणे ॥ न । लोभे ॥ तरति । तॄ० । अप् । तरणं वा । ऋदोरप् ॥

तरक्ष: । पुं । तरख इति प्रसिद्धे तरक्षौ ॥

तरक्षु: । पुं । मृगादने । तेंदुवा वाघ इति तरख इत्यादि भाषाख्याते लघुव्याघ्रे ॥ तरं गतिं मार्गं वा क्षिणोति । क्षिणु हिंसायाम् । मित० डुः ॥

तरक्षुक: । पुं । तरक्षौ ॥ संज्ञायां कन् ॥

तरङ्ग: । पुं । वायुना नद्यादिजलस्य तिर्य्यगूर्द्ध्वप्लवने । भङ्गे । ऊर्म्याम् । लहर ढेउ इत्यादि भाषा ॥ तरति । तॄ प्लवनसन्तरणयोः । तरत्यादिभ्यश्चे त्यङ्गच् ॥ अम्बादिसमुत्काले ॥

तरङ्गिणी । स्त्री । नद्याम् । तटिन्याम् ॥ तरङ्गाः सन्त्यस्याम् । अतइनिः । पुष्करादित्वादिनिर्वा । ऋन्नेभ्यो ङीप् ॥

तरङ्गित: । त्रि । भङ्गमति । सञ्जाततरङ्गे ॥ तरङ्गाः सञ्जाता अस्य । ता० इतच् ॥ यद्वा । तरङ्गवत् कृतः अस्मात् तत्करोतीति णिचि कर्त्तरि क्तः । णाविष्टवद्भावान्मतुपो लुक् ॥

तरण: । पुं । भेलके । उडुपे । डोंगा इति भाषा ॥ स्वर्गे ॥ न । पारगमने । सन्तरणे ॥ प्लवनपूर्व्वकदेशान्तरगमने ॥

तरणि: । पुं । द्युमणौ । सूर्य्ये ॥ भेलके ॥ अंशौ । किरणे ॥ ताम्रे ॥ स्त्री । नौकायाम् ॥ घृतकुमार्य्याम् ॥ तरन्त्यनेन संसारम् । तरन्त्यनया वा । तॄ० । अर्त्तिसृधृधमीत्यादिना तरतेरनिः ॥

तरणिपेटक: । पुं । काष्ठाम्बुवाहिन्याम् ॥

तरणिरत्नम् । न । माणिक्ये ॥

तरणी । स्त्री । नावि ॥ घृतकुमार्य्याम् ॥ पद्मचारिण्याम् ॥ कृदिकारादक्तिन इति ङीष् ॥

तरण्ड: । पुं । न । वडिशीसूत्रबन्धनकाष्ठे । ढड इति डगन इति च भाषा ॥ प्लवे ॥ नौकायाम् ॥ कुम्भतुम्बीरम्भादिजप्लवे ॥ पुं । देशविशेषे ॥ तरति । तॄ० । बाहुलकादण्डन् ॥

तरण्डपादा । स्त्री । } नावि ॥ इ-
तरण्डा । स्त्री । } तिशब्दर-
तरण्डी । स्त्री । } त्नावली ॥

तरतमः । अ । न्यूनाधिकभाविनेऽर्थे ॥ तरन्-द्ध । स्त्री । भेलके । प्लवे ॥ प्रथमान्ते ॥ चारपद्मविषद्भ्रमे ॥

तरटी । स्त्री । काष्ठविशेषे । तीव्रायाम् । रक्तवीजकायाम् ॥

तरण्डी । स्त्री । पक्वान्नविशेषे ॥ यथा । घृतेन मर्दितां दद्या कनिक्कां फेनयेत् ततः । विधायवटिका स्पष्टा भ्रजेते मन्दाग्निना पचेत् ॥ प्रक्षिप्ताः खण्डपाकेन कर्पूरेण विमिश्रयेत् । ततएता: समरिचा स्तरण्ड्यस्तु ता: स्मृता: ॥ बल्या पुष्टिकरी हृद्या वृष्या पित्तानिलापहा । सुस्निग्धा कफदा चार्थं किञ्चित्तन्द्रामकृद्भिता ॥

तरन्तः । पुं । समुद्रे ॥ भेके ॥ आसारे । राक्षसे ॥ तीर्यते । तॄ० । तॄभूवहि वसी भ्यादिना झच् सचचित् ॥

तरन्ती । स्त्री । नौकायाम् ॥ तरति तीर्यते ऽनया वा । झच: षित्वान् ङीष् ॥

तरपण्यम् । न । आतरे । नद्यादितरणा स्मुल्के ॥ तरणम् । तॄ० । ऋदोरप् । तरस्य पण्यम् ॥

तरम्बुजम् । न । तरबूज इति प्रसिद्धे फले ॥ यथा । ज्येष्ठेमासि मल्हैरा नि पौर्णमास्यां निशार्धके । तृष्णा करा महाकाली भ्रमन्ती चित्रका । इ॰ मुबमाचात्वाया तस्कैदं इदं तरम्बुजम् ॥ तस्माद्रम यत्नात् तृष्णावद्दासिंहरप्रिया ॥ यो मोहाया तु फलं रम्यं सचिरायुस्तु युगभि व्यु स्तरकामाख्यातन्त्रम् ॥

तरलः । पुं । हारमध्यमणौ ॥ हारे ॥ तले ॥ त्रि । चञ्चले ॥ कामुके । पिङ्गे ॥ भास्वरे ॥ मध्यशून्यद्रव्ये ॥ द्रवीभूते ॥ तरति । तॄ० । अलच् ॥ सरलातिवा । आतङ्कतिक: ॥ वृषादिन्वाद्वा कल: ॥

तरलनयना । स्त्री । चञ्चलनेत्रायांवनितायाम् ॥ तरलेलोलेनयनेयस्या: ॥

तरलनयनि: । पुं । वर्णवृत्तविशेषे ॥ द्विजवरगणयुग मुपनय सकुसुमलगणमिहरचय । सुदतिविमलमतिफणिपतिनिगदितमतरलनयनिरिति ॥ यथा । अपहरदुरहर मनद्र मभिमतकलियुगभवडर । हिमगिरिविहितमयनवर सुकृतसुलभमवमधरेति ॥

तरललोचना । स्त्री । चञ्चललोचनायाम् ॥ तरले लोचने यस्या: ॥

तरला । स्त्री । यवाग्वाम् ॥ सुरायाम् ॥ मधुमक्षिकायाम् ॥ तरं लाति । ला० । क: । टाप् ॥

तरलायित: । पुं । चञ्चलाचरिते ॥

तरलित: । त्रि । आन्दोलिते । प्रेङ्खोलित

ते । कम्पिते । धूते । प्रेङ्खिते । न्यञ्चिते । ता० इतच् ॥

तरवारिः । पुं । तरवार इति प्रसिद्धे खड्गे ॥ इति हेमचन्द्रः ॥ चतुरङ्गा रिपोः सेना भिन्दन्ती तरवारिभिर्जित नरराजस्य ॥ विशेषतस्तस्यान्यत् खड्गपरीक्षायां युक्तिकल्पतरौ च द्रष्टव्यः ॥

तरः । न । बले ॥ रोगे ॥ जवे । वेगे ॥ सवेगगतिवचने ऽस्य प्रयोगः ॥ तीरे ॥ कपौ । प्लवगे ॥ वेगान्वयगुणे ॥ तरन्त्यनेन । तॄ० । असुन् ॥

तरसम् । न । मांसे ॥ तरो बलमस्त्यस्मिन् । अर्शआद्यच् ॥

तरसा । अ । झटित्यर्थे । शैघ्र्ये ॥

तरस्थानम् । न । घट्टे ॥ तरस्य स्थानम् ॥

तरस्वी । पुं । गरुडे ॥ वायौ ॥ त्रि । शूरे ॥ वेगिनि ॥ तरो बलं जवो वाऽस्यास्ति । अस्मायामेधास्रजो विनिः ॥

तरान्धुः । पुं । नौविशेषे । हाडे । व-हने ॥

तरालुः । पुं । नौकाविशेषे ॥

तरिः । स्त्री । नौकायाम् ॥ वस्त्रादीनां पेटके ॥ दशायाम् ॥ तरन्त्यनया । तॄ० । अच इः ॥

तरिकः । पुं । प्लवे । भेलके ॥

तरिका । स्त्री । नावि ॥

तरिणी । स्त्री । नौकायाम् ॥

तरिता । स्त्री । तर्ज्जन्याम् ॥ गाँजा इति भाषाप्रसिद्धमञ्जर्याम् ॥ यथा । संविदा कालकूटश्च ताम्रकूटश्च धुस्तूरम् । अहिफेनं खर्जुरसस्तारिका तरिता तथेति तन्त्रम् ॥

तरिरथः । पुं । अरित्रे ॥ इति हारावली ॥

तरी । स्त्री । वस्त्रादिपेटके ॥ द्रोण्याम् ॥ वेडायाम् । नावि ॥ गदायाम् ॥ धूमे ॥ दशायाम् ॥ तरन्त्यनया । तॄ । अच इः । कृदिकारादक्तिन इति ङीष् ॥ पक्षाद्गौरादिपाठात् ङीष् वा ॥

तरीः । स्त्री । नावि ॥ तरन्त्यनया । तॄ० । अवितृस्तृतन्त्रिभ्य ईः ॥

तरीषः । पुं । स्वर्गे ॥ महोदधौ ॥ शोभनाकारे ॥ भेले ॥ व्यवसाये ॥ समर्थे ॥ बोधे ॥ तरन्ति येन । तॄ० । कॄतॄभ्यामीषन् ॥

तरीषी । स्त्री । शक्रकन्यायाम् ॥

तरुः । पुं । अगमे । द्रुमे ॥ तरन्ति नरकमनेन रोपकाः । तॄ० । भृमृशीतृचरीति उप्रत्ययः ॥

तरुकुणिः । पुं । पक्षिविशेषे । वाग्गुदे । वागुड इति भाषा ॥

तरुखण्डः । पुं । तरूणां समूहे ॥ दृश्यादिभ्यः खण्डः ॥

तरुजीवनम् । न । द्रुममूले ॥

तरुणः । पुं । एरण्डे ॥ स्थूलजीरके ॥ न । कुब्जपुष्पे ॥ त्रि । यूनि । जाततारुण्ये ॥ नूतने ॥ तरति । तॄ । चोरश्च लोवेत्युनन् ॥

तरुणज्वरः । पुं । सप्ताहावधिज्वरे ॥ यथा । आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः ॥

तरुणदधि । न । पञ्चदिनातीतदधिनि ॥

तरुणी । स्त्री । युवत्याम् । द्वितीयवयःप्राप्तायांनार्याम् ॥ आषोडशाद्भवेद्बाला तरुणी त्रिंशता मतेत्युक्तः ॥ तरति । तॄ । चोरश्चलोवेत्युनन् । वयस्यचरमइति ङीप् । नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति वा ॥ गौरादिङीष् वा । स्वरेविशेषः ॥ घृतकुमार्याम् । सहायाम् ॥ दन्तीवृक्षे ॥ चीडानामगन्धद्रव्ये ॥ सेवती इतिभाषाप्रसिद्धे पुष्पे । सहायाम् । गन्धाढ्यायाम् ॥

तरुणीकटाक्षमालः । पुं । तिलकवृक्षे ॥

तरुतूलिका । स्त्री ।
तरुदूलिका । स्त्री । } वातुल्याम् । वादुड पक्षीइतिभाषा ॥

तरुनखः । पुं । कण्टके ॥

तरुभुक् । पुं । वन्दाके ॥

तरुमृगः । पुं । वानरे ॥

तरुरागः । पुं । नवीनपल्लवे । किशलये ॥

तरुराजः । पुं । तालद्रुमे ॥

तरुरुहा । स्त्री ।
तरुरोहिणी । स्त्री । } वन्दाके ॥

तरुवल्ली । स्त्री । जतुकालतायाम् ॥

तरुविलासिनी । स्त्री । नवमल्लिकायाम् । सप्तलालतायाम् ॥ तरोर्विलासिनी ॥

तरुशायी । पुं । खगे । पक्षिणि ॥

तरुसारः । पुं । कर्पूरे ॥ इतिहारावली ॥

तरुस्था । स्त्री । वन्दाके ॥

तरूटः । पुं । उत्पलकन्दे ॥

तर्कः । पुं । काङ्क्षायाम् ॥ वितर्के । व्यभिचारशङ्कानिवर्त्तके ॥ सचपञ्चविधः । यथा । आत्माश्रयः १ । अन्योन्याश्रयः २ । चक्रकः ३ । अनवस्था ४ । प्रमाणबाधितार्थकः ५ इति ॥ ऊहे । अविज्ञाततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थं ऊहे ॥ अनुमाने ॥ व्याप्यारोपेण व्यापकारोपे । व्याप्यारोपात् व्यापकप्रसञ्जने । यथा । वह्निर्नस्यात् तर्हिधूमोपि न स्यात् ॥ मीमांसादितर्कशास्त्रे । आगमाविरोधिन्यायेन आगमार्थपरीक्षणे । विचारे ॥ बुद्धिसाध्ये । स्वबुद्ध्यभ्यूहमात्रे ॥ हेतुदृष्टान्तात्मनि ॥ तर्कणम् ।

तर्कभाषार्थश्चुरादौ पटपुटेत्यि-
ग्डके पठितः । भावेघञ् ॥ तर्कोऽ
र्थवाद इति कर्कोपाध्यायः । यथा ।
अक्ताः शर्करा उपदधातीतिविधिः-
श्रूयते । तत्राञ्जनसाधनं घृतं तैलं वा
तन्मध्ये केनाक्ता इतिसंशये तेजो-
वै घृतमित्यर्थवादात् घृतेनाक्ता इ
तिनिर्णीयते। अतस्तर्कोऽर्थवादः ॥
तर्कोमीमांसेति कल्पतरुकारः ॥ *
॥ अचिन्त्याः खलुयेभावा न तांस्त-
र्केण योजयेत् । नाऽप्रतिष्ठिततर्के
ण गम्भीरार्थस्यनिश्चयः ॥

तर्क्कः । पुं । याचके ॥ तर्ककारके ॥

तर्क्कयन् । त्रि । उत्प्रेक्षमाणे ॥

तर्क्कविद्या । स्त्री । आन्वीक्षिक्याम् ॥
तर्कस्य न्यायस्य विद्या ॥ तथाहि । च
तुर्विधेभ्यः पृथिव्यादिपरमाणुभ्योवि
श्वमुत्पद्यते त एवोपादानभूता ना
न्यत् । निमित्तकारणमीशः कर्तृत्वा
त् कुलालवदिति तर्कविद्यायाः प्रमे
यम् ॥ * ॥ अहोदुर्मतयः सर्वाः पुरुष
स्यनिरूपणे । तर्कविद्या न जानन्ति अ
मेयं पुरुषोत्तमम् ॥ अमेयम् अभिन्न
निमित्तोपादानत्वात् । यतएतदपि
न जानन्ति सर्वं प्रमेयजातं घटादिव
त् कार्यमिति परमाणूपादानकारण
मप्यपेक्षणीयमेवेति । परमाणूनां
प्रमेयत्वहेतुना कार्यत्वसिद्धौ तयो
पादानमपेक्षणीयम् । एवं तत्रतत्रा
पीत्यनवस्था स्यात् । अतोऽप्रमेयः
परमात्मैवोपादानं नान्यदन्यकल्पि
तम् अनपेक्षणात् । तथाहि । अम्भः
शीतकरान्तरीक्षनगरस्वप्नेन्द्रजाला-
दिवत् कार्यं मेय मसत्यमेत दुद
यध्वंसादियुक्तं जगत् । शुक्तौ रूप्य
मिव स्रजीव भुजगः स्वात्मावबोधे
हरा वद्याते प्रभवत्ययास्तमयते-
तत्त्वावबोधोदयादिति प्रबोधचन्द्रो
दयः ॥

तर्क्कारी । स्त्री । जयाद्रुमे । अरणी इ
तिभाषा । नाडी इतिकश्चित् । त
र्कमृच्छति । ऋगतौ । कर्मण्यण् ।
ङीप् । गौरादित्वात् ङीष्वा ॥

तर्क्किणः । पुं । } दद्रुघ्ने ॥ इतिरत्न-
तर्क्किलः । पुं । } माला ॥

तर्क्की । त्रि । तर्कविशिष्टे । मीमांसके
॥ यथा । त्रैविद्यो हेतुकस्तर्की नैरु
क्तो धर्मपाठकः । त्रयश्चाश्रमिणः पू
र्वे परिषत् स्याद्दशावरेतिमनुः ॥

तर्क्कुः । पुं । कपालनालिकायाम् । त-
र्कुव्याम् ॥ कृत्यतेनेन । कृतीवेष्टने
। कृतेराद्यन्तविपर्ययश्चेत्युः । कका
रतकारयोर्विनिमयः । तकुआ इति
भाषा ॥

तर्कुटम् । न । कर्त्तने । कातना इति भाषा ॥ इतित्रिकाण्डशेषः ॥

तर्कुटी । स्त्री । तर्कुः ॥ इतिहारावली ॥

तर्कुपिण्डः । पुं । तर्कुस्थितमृत्पिण्डे । वर्त्तुलायाम् ॥ इतिहारावली ॥

तर्कुपीठी । स्त्री । तर्कुपिण्डे ॥ इति हारावली ॥

तर्कुलासकः । पुं तर्कुभ्रमणयन्त्रे । जलोले । चरखा इतिभाषा ॥ इ०हा० ॥

तर्कुशाणः । पुं । तर्कुघर्षणपाषाणे । जामरे । सामके ॥ इतित्रिकाण्डशेषः ॥

तर्क्षुः । पुं । तरक्षुके ॥ इतिशब्द० ॥

तर्क्ष्यः । पुं । यवक्षारे ॥

तर्ज्जनम् । न । भर्त्सने ॥ भयजनने ॥ तर्ज्ज० । ल्युट् ॥

तर्ज्जनी । स्त्री । प्रदेशिन्याम् । अङ्गुष्ठनिकटाङ्गुलौ ॥ तर्ज्जते ऽनया । तर्ज्जभर्त्सने । करणे ल्युट् ॥

तर्ज्जिकः । पुं । देशविशेषे । तायिके ॥

तर्ज्जितः । त्रि । भर्त्सिते ॥ तर्ज्जितस्म । तर्ज्जभर्त्सने । क्तः ॥

तर्णः । पुं । वत्से ॥ तृणोति तर्णोति वा । तृणु अदने । अच् ॥

तर्णकः । पुं । गोवत्से । वत्से । बच्छा इतिभाषा ॥ सद्योजातस्तु तर्णकः ॥ तृणोति तर्णोति वा । तृणु० । क्वुन् ॥

तर्णिः । पुं । सूर्ये ॥ प्लवे ॥ इतिशब्दा० ॥

तर्त्तरीकम् । न । वहित्रे । पोते । जहाज इतियवनभाषा ॥ त्रि । पारगे ॥

तर्द्दः । त्रि । हिंसके ॥ तर्द्दहिंसायाम् । अच् ॥

तर्द्दूः । पुं । दारुनिर्मितदर्व्याम् । दारुहस्तके । डोइ इतिभाषा ॥ अन्नतरणोपकरणे ॥ तरति० । तृ० । बोदुट्चेत्यूट्डागमश्च ॥ तर्द्दति । तृणत्तिवा । तर्द्द० । उतृदिर्हिंसानादरयोर्वा । दाहुलकात् ऊः ॥

तर्प्पणम् । न । तृप्तौ ॥ प्रीणने ॥ यज्ञकाष्ठे ॥ महायज्ञविशेषे । पितृयज्ञे । पितृद्देश्याम्बुदाने । पितॄणां कव्यवाहादीनाञ्च विधिना जलाम्बुदाने न तृप्तिसम्पादने ॥ तद्द्विविधम् । प्रधानमङ्गञ्च ॥ तत्राद्यं यथा । तर्पणञ्च शुचिः कुर्यात् प्रत्यहं स्नातको द्विजः । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥ विधवामधिकृत्य । तर्पणं प्रत्यहं कार्यं भर्त्तुः कुशतिलोदकैः । तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकमिति ॥ * ॥ द्वितीयं यथा । नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥ तर्पणाकरणे दोषो यथा । नास्ति-

कुभार्या यस्यापि न तर्पयति यैस्सु तः । पिबन्ति लेहनिःस्रावं पितरो वै जलार्थिन इति ॥ जीवत्पितृकस्य तन्निषेधो यथा । दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च । न जीवत्पितृको भूप कुर्यात् कृत्वाघमाप्नुयादिति ॥ तृप्तीकरणे । भावे ल्युट् ॥

तर्पणी । स्त्री । गुरुस्कन्धवृक्षे ॥

तर्पणेच्छुः । पुं । भीष्मे ॥ त्रि । तर्पणाकाङ्क्षे ॥

तर्पिणी । स्त्री । चारव्याम् । पद्मचारिण्यामोषधौ ॥

तर्मं । न । यूपाग्रे ॥ तरति । तृ° सर्वधातुभ्योमनिन् ॥

तर्वटः । पुं । वत्सरे ॥ चक्रमर्दे ॥

तर्षः । पुं । लिप्सायाम् ॥ उदन्यायाम् ॥ भेलके ॥ तर्षणम् । ञितृषपिपासायाम् । घञ् ॥ तरन्त्यनेन । तृ° वृतवदीतिसोऽत्र ॥

तर्षणम् । न । तृषि । पिपासायाम् ॥ ञितृष° । ल्युट् ॥

तर्षितः । त्रि । सतृष्णे । तृषिते । तिसाया इति भाषा ॥

तर्हि । अ । विशेषे ॥ तदार्थे ॥ तस्मिन् काले । अनद्यतनेर्हिलन्यतरस्याम् ॥

तल: । पुं । तालमहीरुहे ॥ चपेटे ॥ त्सरौ ॥ सव्येन पाणिना तन्त्रीघाते ॥ आधारे ॥ स्वभावे ॥ पुं । न । अधोभागे । अकृष्टे । तले इति नीचे इति च भाषा ॥ स्वरूपे ॥ यथा । महीतलम् ॥ न । कानने । वने ॥ कार्यबीजे ॥ आलवाले । गर्त्ते ॥ पादतलस्यमध्ये ॥ स्त्री । न । । ज्याघातवारणे ॥

तलति । तलप्रतिष्ठाम् । पचाद्यच् ॥

तलकम् । न । पुष्करिण्याम् । तलाव इति हिंदू भाषा ॥ इति हारावली ॥

तलप्रहारः । पुं । चपेटे । चर्वणे । तलाघाते ॥

तलसारकम् । न । अश्वस्य वक्षस्थलबन्धनरज्जौ । वक्रपट्टे । तङ्ग इति भाषा ॥

तलहृदयम् । न । पादतलस्यमध्ये ॥

तला । स्त्री । गोधायाम् । ज्याघातवारणे ॥

तलाची । स्त्री । नलनिर्मितेकटे ॥

तलातलम् । न । अतलादिषु पञ्चमेऽधोभुवने ॥

तलिका । स्त्री । वक्रपट्टे । तलसारके ॥

तलित् । स्त्री । विद्युति । तडिति ॥ डलयोरेकत्वस्मरणात्वर्णविपर्ययः ॥

तलितः त्रि । आज्यादिभृष्टमांसादौ ॥

तलितमांसम् । न । एकमांसप्रभेदे । भृष्टमांसे ॥ यथा । शुद्धमांसविधाने न मांसं सम्यक् प्रसाधितम् । पुनस्तदाज्ये सम्भृष्टं तलितं प्रोच्यते बु-

धेः ॥ तलितं बलमेधाग्निमांसौजः शुक्रहृद्धिकृत् । तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम् ॥

तलिनः । त्रि । विरले ॥ स्तोके ॥ स्वच्छे ॥ दुर्बले ॥ न । शय्यायाम् ॥ तलति तल्यते वा । तल० । तलिपुलिभ्यामिनन् ॥

तलिमम् । न । कुट्टिमे ॥ तल्पे ॥ चन्द्रहासे ॥ विताने ॥

तलुनः । पुं । पवने ॥ यूनि ॥ तरति । तॄ० । त्रोरश्चलोवे त्युनन् ॥

तलुनी । स्त्री । युवत्याम् । तरुण्याम् ॥ वयस्यचरम इति नञ्संज्ञिति वा ङीप् । गौ० ङीष् वा ॥

तलेक्षणः । पुं । शूकरे ॥ इतिशब्दा० ॥

तलोदरी । स्त्री । भार्यायाम् ॥

तलोदा । स्त्री । नद्याम् ॥

तल्कम् । न । वने ॥ इतित्रिकाण्डशेषः ॥

तल्पम् । न । अट्टे ॥ कलत्रे । दारेषु ॥ शय्यायाम् ॥ तल्यतेऽस्मिन् । तल० । खष्पशिल्पशष्पेतिसाधु ॥

तल्पकीटः । पुं । मत्कुणे ॥

तल्पनम् । न । करिपृष्ठे ॥ पृष्ठवंशस्य मांसे ॥

तल्लः । पुं । जलाधारविशेषे । तलाव इति हिन्दूभाषा ॥ न । विले । बालवाले ॥ त्रि । तस्मिन् लीने ॥

तल्लजः । पुं । मतल्लिकायाम् । प्रशस्ते ॥ लजति । लजकान्तौ । पचाद्यच् । तच्चलजः । अयमजहल्लिङ्गः समासे उत्तरपदे भवति । यथा । प्रशस्ताकुमारी कुमारीतल्लजः । तल्लजस्य रूढिशब्दत्वात् प्रशंसावचनैश्चेतिसमासः ॥

तल्लिका । स्त्री । कुञ्चिकायाम् । कूर्चिकायाम् । कूंची ताली इत्यादि भाषा ॥

तल्ली । स्त्री । तरुण्याम् ॥

तवक्षीरम् । न । पयःक्षीरे । यवजे । तीखुर इतिभाषा ॥ तवक्षीरन्तु मधुरं शिशिरं दाहपित्तहृत् । क्षयकासकफश्वासास्रदोषं हन्ति च सेवनात् ॥

तवक्षीरी । स्त्री । गन्धपत्रायाम् ॥

तवराजः । पुं । यवासशर्करायाम् ॥

तवराजोद्भवखण्डः । पुं । यवासशर्कराभवखण्डे । सिद्धमोदके ॥

तवर्गः । पुं । तादिपञ्चवर्णेषु ॥

तवर्गीयः । पुं । तवर्गभवे वर्णे ॥ वर्गान्ताच्चेति ठक् ॥

तविषः । पुं । स्वर्गे ॥ महोदधौ ॥ तवेतिसौत्रोधातुः । तवेर्णिद्वेतिटिषच् ॥ सुवर्णे ॥ शोभनाकृतौ ॥ व्यवसाये ॥ भेले ॥

तविषी। स्त्री। महत्कन्यायाम् । धरिण्याम् ॥ नद्याम् ॥ वैदिकनिघण्टौ तु बलेपि ॥ टित्त्वान् ङीप् ॥

तष्टः। त्रि। तनूकृते ॥ तक्ष्यतेस्म। तक्षू॰ । क्तः। स्फोरितिकलोपः। षेट्त्वम् ॥

तष्टिः। स्त्री। काष्ठतक्षणे ॥

तसरः। पुं। वस्त्रजात्यन्तरे। टसर इति भाषा ॥ सूत्रवेष्टने। तासनी इति गौडभाषाप्रसिद्धे तन्त्रवायोपकरणे ॥ तनोति। तनु॰। तनूपृषिभ्यांक्सरन्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

तस्करः। पुं। चोरे ॥ द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान्। प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः॥ प्रकाशवञ्चकास्तेषां नानापण्योपजीविनः। प्रच्छन्नवञ्चकास्त्वेते येस्तेनाटविकादयः॥ तत्करोति। दिवाविभेत्यत्र किंयत्तद्बहुष्विच्यच ॥ तद्बृहतोः करपत्योरितिसुट्दलोपौ ॥ दमनवृक्षे ॥ पृक्काशाके ॥

तस्करस्नायुः। पुं। काकनासालतायाम् ॥

तस्करी। स्त्री। कोपनायां नार्य्याम् ॥

तस्थिवान्। त्रि। स्थितिमति। स्थिते ॥ ष्ठा॰। छन्दसिलिट्। द्वित्वादिकार्यम्। लिटः कानजादेशः ॥ क्वसु-श्चेतिक्वसुप्रत्ययोवा ॥

तस्थूः। पुं। स्थावरे ॥

ताच्छील्यम्। न। नियमतत्त्वभावतायाम् ॥ भावेष्यञ् ॥

ताटङ्कः। पुं। तालपत्रे। कर्णिकायाम्। ताडङ्के ॥ गुर्वक्षरे ऽ ॥

ताटस्थ्यम्। न। उदासीनत्वे ॥ निकटस्थत्वे ॥

ताडः। पुं। ताडने ॥ घोषे। शब्दे ॥ मुष्टिमेयतृणादिषु ॥ अद्रौ ॥

ताडका। स्त्री। राक्षसीविशेषे ॥

ताडकान्तकः। पुं। श्रीरामे ॥

ताडकाफलम्। न। बृहदेलायाम् ॥

ताडकेयः। पुं। मारीचराक्षसे ॥ ताडकाया अपत्यम्। स्त्रीभ्योढक् ॥

ताडङ्कः। पुं। कर्णभूषायाम्। कर्णदर्पणे। कानतडक्का इतिभाषा ॥

ताडनम्। न। आघाते ॥ यथा। शतापराधे वनितां पुष्पेणापि न ताडयेत्। दोषान्न गणयेत् स्त्रीणां गुणानेव प्रकाशयेदितिमान्त्रिकाः ॥ लालने बहवोदोषास्ताडने बहवोगुणाः। तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्नतु लालयेत् ॥

ताडनी। स्त्री। अश्वताडनयष्ट्याम्। कशायाम् ॥ ताड्यतेऽनया। तडआघाते। ण्यन्तः। ल्युट्। ङीप् ॥

ताडपत्रम् । न । ताडङ्के ॥

ताडागम् । न । तडागोदके ॥ यथा । प्रशस्तभूमिभागस्थो बहुसंवत्सरोषित: । जलाशय स्तडाग: स्यात्ताडागं तज्जलं स्मृतम् ॥ ताडागमुदकं स्वादु कषायं कटुपाकि च । वातलं बहुविशूच मसृक्पित्तकफापहम् ॥ तडागस्येदम् । अण् ॥

ताडि: । स्त्री । तालीद्रुमे । ताडियात इतिगौड भाषाप्रसिद्धे ॥

ताडी । स्त्री । पत्रद्रुमे । तालियात- इति गौडभाषा ॥ आभरण विशेष इतिदुर्गसिंह: ॥

ताड्यमान: । त्रि । पटहादिवाद्ये ॥ त्रि । तत्कालताडिते । हन्यमाने । ताडनयुक्ते ॥

ताण्ड: । पुं । मुन्यन्तरे ॥

ताण्डव: । पुं । न । लास्ये । नृत्ये ॥ पुंनृत्यं ताण्डवंप्राहु: स्त्रीनृत्यं लास्यमुच्यते ॥ तण्डुना प्रोक्तम् । तेनप्रोक्तमित्यण् ॥ तृणान्तरे ॥ उद्धतनृत्ये ॥ चित्रघुनि (।।।) ॥

ताण्डवतालिक: । पुं । नन्दिनि । शिवद्वारिणि ॥

ताण्डवप्रिय: । पुं । शिवे ॥ त्रि । नृत्यप्रिये ॥ ताण्डवं प्रियं यस्य ॥

ताण्डवितम् । न । नर्त्तिते ॥

ताण्डि । न । नृत्यशास्त्रे ॥

ताण्डी । पुं । साम्न: शाखाविशेषा ऽध्यायिनि ॥

तात: । पुं । जनके । पितरि ॥ अनुकम्प्ये ॥ त्रि । पूज्ये ॥ चतुष्कले (ऽ॥) आदिगुरौ ॥ तनोति । तनु° । दुतनिभ्यांदीर्घश्चेति क्त: । अनुदात्तेति नलोप: ॥

तातगु: । पुं । क्षुद्रताते । काका चाचा इतिभाषा ॥ त्रि । जनकस्यहिते ॥

तातजनयित्र्यौ । स्त्री । मातापित्रो: ॥ द्विवचनान्तोयम् ॥

ताततुल्य: । त्रि । पितृसमे । मनोजवसे ॥ तातेन तुल्य: ॥

तातन: । पुं । खञ्जने ॥

तातल: । पुं । व्याधि । रोगे ॥ पाके ॥ लोहकूटे ॥ मनोजवे । ताततुल्ये ॥ त्रि । तप्तमात्रे ॥

ताति: । पुं । पुत्रे ॥ इतिजटाधर: ॥

तात्कालिक: । पुं । तत्कालभवे ॥

तात्कालिकविकार: । पुं । विलासाख्ये भावे ॥ तात्कालिकविकार: स्याद्विलासो ऽङ्गक्रियादिषु ॥

तात्पर्य्यम् । न । तत्परतायाम् ॥ वक्तुरिच्छायाम् ॥ अभिप्राये ॥ तत्परस्य भाव: । ष्यञ् ॥

तादर्थ्यम् । न । तदर्थत्वे । तस्मैइदम्

तदर्थम् । तस्य भावः । ब्राह्मणादित्वात् ष्यञ् ॥

तादात्म्यम् । न । तत्स्वरूपे ॥ अभेदसम्बन्धे ॥ तस्य आत्मा तदात्मा । तदात्मनो भावः । ब्रा० ष्यञ् ॥

तादृक्षः । त्रि । तादृशि ॥ सदृवदृश्यते । तमिव पश्यति वा । दृशिर् प्रेक्षणे । त्यदादिष्विष्यत्र कोऽपिवाच्य इति क्सः । आसर्वनाम्नः इत्यत्र दृक्षे चेति वार्त्तिकेनात्वम्

तादृक्-ग् । त्रि । तथाविधे । उपमानगोचरे । तादृक्षे ॥ तमिवेमं पश्यन्ति सदृवायं पश्यति दृश्यते वा । त्यदादिषु दृश इति क्विन् । आसर्वनाम्न इत्यात्वम् । व्रश्चेति षः । जशत्वेन डः । कुत्वेन गः । चर्त्वपक्षे कः ॥

तादृशः । पुं । तादृशि ॥ सदृवदृश्यते तमिव पश्यति वा । त्यदादिष्विति कञ् ॥

तानः । पुं । गानाङ्गविशेषे ॥ यथा । विस्तार्यन्ते प्रयोगा यै र्मूर्च्छनाशेषसंश्रयाः । तानास्तेप्यूनपञ्चाशत् सप्तस्वरसमुद्भवाः ॥ तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक् । तस्युः पञ्च सहस्राणि त्रयस्त्रिंशच्छतानि च ॥ न । विस्तारे ॥ ध्यानविशेषे ॥

तानवम् । न । तनुत्वे ॥ गाधेतनुतायाम् ॥ यथा । तानवं तनुतागात्रे दौर्बल्यभ्रमणादिकृत् ॥ तनोर्भावः । इगन्तत्वेऽण् ॥

तानूरः । पुं । आवर्त्ते । पयसाम्भ्रमे ॥

तान्तः । त्रि । ग्लाने ॥ क्लान्ते । श्रान्ते ॥

तान्तवः । त्रि । प्रावरणान्तरे ॥ तन्तूनां विकारः । ओरञ् ॥

तान्त्रिकः । त्रि । ज्ञातसिद्धान्ते । शास्त्रतत्त्वज्ञे । ब्रह्मवादिनि कौलिके ॥ यथानरेषु तन्त्रज्ञाः सरितां जाह्नवी यथा । यथाऽहं त्रिदिवेशानामागमानामिदं तथा ॥ तन्त्रं सिद्धान्तमधीते वेद वा । उक्थादित्वाट्ठक् ॥ तन्त्रसम्बन्धिनि ॥

तान्दूरम् । न । मांसव्यञ्जनप्रभेदे ॥ यथा । अङ्गारपूर्णगर्त्ते यद्वलय मवलम्बितम् । संस्कृतं पिहितं मांसं पक्वं तान्दूर मुच्यते ॥ सुस्वादुतान्दूरम् । पचेत्कर्त्तरीचस्थं वह्निसम्भारसम्भृतम् । चतुर्दिक्खण्डलाकारे पार्श्वप्रज्वलितानले । विपक्वं सुरभि स्वादु तान्दूरमिति कीर्त्तितम् ॥ अन्यच्च । कोष्ठिकायां सुसम्भार मत्स्य मवलम्बितम् । मांसं पिधाय वाह्यामिन्धनयास्वेदितं वरम् ॥ तान्दूरं रुचिदं बल्यं मृदु पथ्यतमं स्मृतम् । सद्योहृतं नवं स्थूल·मन्यथा-

दोषकारकमिति ॥

तापः । पुं । सन्तापे ॥ कृच्छ्रे ॥ तपनम् । तपसन्तापे । घञ् ॥

तापकः । पुं । ज्वरे ॥ त्रि । तापकृति ॥ तापयति । तप० । णवुल् ॥

तापत्यः । पुं । अर्जुने ॥ इति पु० ॥

तापत्रयम् । न । आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रये ॥ आध्यात्मिकादिमैत्रेय ज्ञात्वा तापत्रयं बुधः । उत्पन्नज्ञानवैराग्यःप्राप्नोत्यात्यन्तिकं फलम् ॥ तापानां त्रयम् ॥

तापनः । पुं । सूर्ये ॥ कामवाणे ॥ असुरविशेषे ॥ सूर्यकान्तमणौ । त्रि । तापके । तापयितरि ॥ तापयति । तप० । कर्त्तरि ल्युः ॥

तापनीयः । पुं । निष्कपरिमिते सुवर्णे ॥ तपनीयस्य विकारःपरिमाणः । जातरूपेभ्यःपरिमाणे इत्यण् ॥

तापसः । पुं । दमनकवृक्षे ॥ बकपक्षिणि ॥ न । तमालपत्रे । तेजपात इतिभाषा ॥ त्रि । तपस्विनि ॥ वानप्रस्थे ॥ तपोऽस्यास्ति । अण्चेत्यण् ॥ यद्वा । तपःशीलमस्य । छत्रादिभ्योणः ॥

तापसतरुः । पुं । } इङ्गुदीवृक्षे । इं
तापसद्रुमः । पुं । } गुआ इतिभाषा ॥ तापसोपयुक्तस्तरुः ॥

तापसद्रुमसन्निभा । स्त्री । गर्भदात्री

क्षुपे ॥

तापसप्रियः । पुं । पियालद्रुमे ॥

तापसप्रिया । स्त्री । द्राक्षायाम् ॥

तापसेष्टः । पुं । पियाले । चारे ॥

तापहरी । स्त्री । ताहरी इति प्रसिद्धे व्यञ्जनपदार्थे ॥ यथा । घृते हरिद्रा संयुक्ते माषाणां भर्जयेद्वटीः । तण्डुलांश्चाऽपिनिर्द्धौतान् सहैवपरिभर्जयेत् ॥ सिद्धियोग्यं जलं तत्रप्रक्षिप्य कुशलः पचेत् । लवणार्द्रकहिङ्गूनि मात्रया तत्रनिःक्षिपेत् ॥ एषासिद्धिं समायाता प्रोक्ता तापहरीबुधैः ॥ भवेत्तापहरीबल्या वृष्या श्लेष्माणमाचरेत् । इंहणीतर्पणीरुच्यागुर्वी तत्र गुणाःस्मृताः ॥

तापिञ्छः । पुं । तमालवृक्षे ॥ तापिनं छादयति । छद० । कर्मण्यण् । पृषोदरादिः ॥ न । तमालपुष्पे ॥ तापिञ्छस्यपुष्पम् । फलेलुगितितद्धितस्यलुक् । विहीनं प्रसवे सर्वमिति क्लीवता ॥

तापिञ्जम् । न । धातुमाक्षिके ॥ इति राजनिर्घण्टः ॥

तापितः । त्रि । पीडिते ॥ जातसन्तापे ॥ तपगया इति भाषा ॥ तापःसञ्जातोऽस्य । ता० इतच् ॥

तापी । पुं । बुद्धे ॥ त्रि । तापयति ॥

तापोस्या ऽस्ति । अतइनिठनाव-
तीनिः ॥

तापी । स्त्री । विन्ध्याद्रिप्रसिद्धायां पश्चिमवाहिन्यां सरिति ॥ यमुनायाम् ॥

तापीजम् । न । स्वर्णमाक्षिके ॥

ताप्यः । पुं । न । धातुमाक्षिके ॥

ताप्यकम् । न । माक्षिके ॥

तामः । पुं । भीषणे ॥ दोषे ॥

तामरम् । न । जले ॥ घृते ॥इ° रुद्रः ॥

तामरसम् । न । पद्मे ॥ ताम्रे ॥ काञ्चने ॥ तामरे जले सस्ति । षसस्वप्ने । अन्येभ्योपीतिडः ॥ यद्वा । तम्यते । तमु° । घञ् । नोदात्तोपदेशस्येतिनिषेधस्यानित्यत्वान्न वृद्धिनिषेधः । रस्यते । रसआस्वादे । चु° । अदन्तः । एरच् । तामञ्चतद्रसञ्च ॥ जगतीछन्दःप्रभेदे । यथा । इह वद तामरसं नजजायः ॥ स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् । तवमुखतामरसं मुरशत्रो हृदयतडागविकाशिममास्तु ॥

तामलकी । स्त्री । भूम्यामलक्याम् ॥ तामस्या सा आमलकी च । पृषोदरादिः ॥

तामलिप्तम् । न । } तमोलुकइति
तामलिप्ती । स्त्री । } प्रसिद्धे दामलिप्ते देशे । विष्णुगृहे ॥

तामसः । पुं । भुजगे ॥ खले ॥ उलूके ॥ भूतादावहङ्कारे ॥ अधर्माज्ञानावैराग्यानैश्वर्याभिधानेषु चतुर्षु बुद्धिधर्मेषु ॥ चतुर्थमनौ ॥ न । कृष्णधने ॥ यथा । पार्श्वकद्यूतचौर्यार्त्तिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यत्तु तत् कृष्णं समुदाहृतम् ॥ पार्श्वकः अपात्रःसन्पात्रतया योर्ज्जयति । आर्त्त्योपरपीडया । प्रतिरूपकेण कृत्रिमरत्नादिना । साहसेन समुद्रयानगिर्यारोहणादिना । व्याजेनब्राह्मणवेशेनशूद्रादिना । कृष्णं तामसम् । त्रि । तमसायुक्ते ॥ तमोवृत्तौ ॥

तामसकीलकः । पुं । राहुसुतेषु केतुष ॥ यथा । तामसकीलकसञ्ज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत् । वर्णस्थानाकारैस्तान् दृष्ट्वार्कें फलं ब्रूयात् ॥ ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः । ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि ॥ तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम । नगतरुशिखरामर्द्दः सशर्करो वातिमारुतश्चण्डः ॥ ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहाः । निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पाताः ॥ अम्भःकलुषादीनामुत्पातानां नि

ष्फलत्वमाह । न पृथक् फलानि-तेषां शिखिकीलकराहुदर्शनानि यदि । तदुदयकारण मेषां केत्वादीनां फलं क्रमाद् ब्रूयात् ॥ * ॥ तामसकीलानां दर्शनवशात् फलमाह । यस्मिन् यस्मिन् देशे दर्शन मायान्ति सूर्यविम्बस्थाः । तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम् ॥ ॥ क्षुत्प्रम्लानशरीरा मुनयोप्युत्सृष्टधर्मसच्चरिताः । निर्मांसबालहस्ताः कृच्छ्रेणायान्ति परदेशम् ॥ तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासमुकुलिताक्षिपुटाः । सन्तः सन्नशरीराः शोकोद्भव वाष्पसंरुद्धदृशः ॥ क्षामा जुगुप्समानाः स्वनृपतिपरचक्रपीडिताः मनुजाः । स्वनृपतिचरितं कर्मच पुराकृतं प्राप्नुवन्त्यन्ये ॥ गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः । सरितो यान्ति तनुत्वं क्वचित् क्वचिज्जायते सस्यम् ॥ * ॥ तेषामाकृतिवशेनफलमाह । दण्डेनरेन्द्रमृत्युर्व्याधिभयं स्यात् कवन्धसंस्थाने । ध्वाङ्क्षेचतस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे ॥ राजोपकरणरूपै श्छत्रध्वजचामरादिभिर्विद्धः । राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा ॥ एको दुर्भिक्षकरो द्व्याद्याः स्युर्नरपतेर्वि

नाशाय । सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्नः ॥ * ॥ विशेषफलान्याह । दृश्यन्तेच यत स्तेरविबिम्बस्योत्थितामसोत्पाताः । आगच्छति लोकानां तेनैवभयं प्रदेशेनेति वाराहीसंहिता ॥

तामसयज्ञः । पुं । यज्ञविशेषे ॥ यथा । विधिहीन मसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ तामसानां यज्ञः ॥

तामसाहारः । पुं । तामसप्रकृतीनामाहारे ॥ यातयामं गतरसं पूतिपर्युषितञ्चयत् । उच्छिष्ट मपिचामेध्यं भोजनं तामसप्रियम् ॥

तामसिकः । त्रि । तामसे । तमोगुणकार्ये ॥

तामसी । स्त्री । निशायाम् ॥ दुर्गायाम् ॥ तमोन्वितायाम् ॥ जटामांस्याम् ॥

तामिस्रः । पुं । विपर्ययविशेषे ॥ सचाष्टादशधा । यथा । शब्दादयोदशविषया रञ्जनीयाः स्वरूपतः । ऐश्वर्यञ्चाणिमादिकं नस्वरूपतोरञ्जनीयम् । किन्तुरञ्जनीयशब्दाद्युपायः । ते चशब्दादय उपस्थिताः परेणोपहन्यमाना स्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्तीति श

ब्दादिभिर्दशभिः सहाविमाऽष्टक-
मष्टादशेति । तद्विषयोद्वेषस्तामि-
स्रो ऽष्टादशविषयत्वादष्टादशधेति
साङ्ख्याः ॥ भोगेच्छाप्रतिघाते स
ति क्रोधे ॥ राक्षसे । तमिस्राचारि
णि ॥ न । अन्धकारमये नरके ॥ प
रवित्तापत्यकलत्रापहर्त्ता यमदूतै
र्यत्र निपात्यते ॥ तमिस्रं तस्मिन्
अस्त्याऽस्मिन्वा । ज्योत्स्ना तमिस्र-
त्यण् ॥

ताम्बूलम् । न । क्रमुके । गुवाके ॥ ना
गवल्लीदले । पानइति प्रसिद्धे ॥ ता
म्यति । तम् । पिञ्जादित्वात् ऊलच्
धातोर्वुक् दीर्घत्वञ्च ॥ ताम्बूलं कटु
तिक्तमुष्णमधुरं क्षारं कषायान्वि
तं वातघ्नं कृमिनाशनं कफहरं दुर्ग
न्धनिर्नाशनम् । वक्त्रस्याभरणं विशु
द्धिकरणं कामाग्निसंदीपनं ताम्बूल
स्य सखे त्रयोदशगुणाः स्वर्गेपि ते दु
र्लभाः ॥ अपिचाहुः । ताम्बूलं विश-
दं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ।
वश्यं तिक्तं कटु क्षारं रक्तपित्तकरं
लघु ॥ बल्यं श्लेष्मास्यदौर्गन्ध्यमलवा
तश्रमापहम् ॥ * ॥ अनिधाय मु-
खेपर्णं पूगं स्वादयते नरः । मतिभ्रं
शो दरिद्रः स्यादन्ते न स्मरते हरि
म् ॥ * ॥ पर्णमूले वसेद्व्याधिः पर्णा

ग्रे पापसञ्चयः । चूर्णपर्णं हरेदायु
शिराबुद्धिविनाशिनी ॥ मायुरग्र वि
षंमूले मध्य ऽलक्ष्मी र्व्यवस्थिता ।
तस्मादग्रञ्च मूलञ्च मध्यं पर्णस्य वर्ज
येत् ॥ चूर्णाधिकं हरतिगन्ध मथा-
धिपूगं रागं तथाधिकदलञ्च सुगन्धि
कारि । ताम्बूलमुत्तममिदं रसना-
ग्रभिन्नपर्णं निशास्वधिकमुचित पर्ण
मह्नि ॥ ताम्बूलं न हितं प्रोक्तं शरी
रे रूक्षदुर्बले । ज्वरास्यशोषपित्ता
स्रमदमूर्च्छाक्षिरोगिषु ॥ ताम्बूला
त्युपयोगात् स्याच्छोषः पित्तानिला
स्रता । देहदृक्केशदन्ताग्निश्रोत्रव
र्णबलक्षयः ॥ * ॥ विना पर्णं मुखे
दत्त्वा गुवाकं भक्षये यदि । ताव द्भ
वति चाण्डालो यावद्गङ्गां नगच्छति
॥ * ॥ ताम्बूलं विधवास्त्रीणां यती
नां ब्रह्मचारिणाम् । तपस्विनाञ्च वि
प्रेन्द्र गोमांससदृशं धुवम् ॥ इति ब्र
ह्मवैवर्त्तपुराणम् ॥

ताम्बूलकरङ्कः । पुं । पानवट्टा इतिप्रसि
द्धे ताम्बूलपात्रे । स्थग्याम् ॥

ताम्बूलदः । त्रि । वागुलिके । ताम्बूल
दातरि ॥ इतिविकाण्डशेषः ॥ ताम्बूलं
ददाति । दुदाञ् । आतइतिकः ॥

ताम्बूलपत्रः । पुं । पिण्डालौ ॥

ताम्बूलरागः । पुं । मसूरे ॥ ताम्बूल

रङ्गे ॥

ताम्बूलवल्लिका । स्त्री । ताम्बूल्याम् ॥

ताम्बूलवल्ली । स्त्री । ताम्बूल्याम् ॥ ताम्यति । तम् + । क्विप् । अनुनासिकस्येति दीर्घः । वेल्लति । वल्लमञ्जने । चुरादीनाञ्च वा । इगुपधेति कः । ताम् चासौ वुल्लश्च । पृषोदरादिः । ताम्बूलाख्या वल्ली । शाकपार्थिवादिः ॥

ताम्बूलिकः । पुं । ताम्बूलिनि ॥

ताम्बूली । त्रि । रास्वां ताम्बूलाधिकृते । तंबोली इति प्रसिद्धे आख्यन्तरे ॥

ताम्बूली । स्त्री । ताम्बूलवल्ल्याम् ॥ ताम्बूलात् गौरादित्वात् ङीष् ॥

ताम्रम् । न । ताबाँ इति प्रसिद्धे तैजसधातुविशेषे । शुल्वे । म्लेच्छमुखे । नैपालिके ॥ अस्योत्पत्त्यादयो यथा । शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले । तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥ जपाकुसुमसङ्काशं स्निग्धं मृदु घनक्षमम् । लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥ कृष्णं रूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम् । लोहनागयुतञ्चेति शुल्वं दुष्टं प्रकीर्त्तितम् ॥ ताम्रं कषायं मधुरं सतिक्तमम्लञ्च पाके कटु सारकञ्च । पित्तापहं श्लेष्महरञ्च शीतं तद्रोपणं स्याल्लघु लेखनञ्च ॥ पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम् । शोथं कृमिं शूलमपाकरोति प्राहुः परे वृंहणमल्पमेतत् ॥ एकोदोषो विषं ताम्रे त्वसम्यङ्मारिते ऽष्टते । दाहः स्वेदो रुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमः ॥ तस्य शोधनविधिर्यथा । पत्रलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत् । निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा । एवं ताम्रस्य पत्राणां विशुद्धिः सम्प्रजायते ॥ तस्य मारणविधिर्यथा । सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः । वासरत्रयमम्लेन ततः खल्वे विनिः क्षिपेत् ॥ पादांशं सूतकं दत्त्वा याममम्लेन मर्दयेत् । तत उद्धृत्य पत्राणि लेपयेद् द्विगुणेन च ॥ गन्धकेनाम्लपृष्टेन तस्य कुर्याच्च गोलकम् । ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं सपुनर्नवाम् ॥ तत्कल्केन बहिर्गोलं लेपयेद् द्व्यङ्गुलोन्मितम् । धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् ॥ वालुकाभिः प्रपूर्य्याथ विभूतिलवणाम्बुभिः । दत्त्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपा

चयेत् ॥ क्रमवृद्ध्याग्निना सम्यक् यामचतुष्टयम् । स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छूरणद्रवैः ॥ यामैकं गोलकं तच्च निःक्षिपेच्छूरणोदरे । मृदालेपस्तु कर्त्तव्यः सर्वतेऽङ्गुष्ठमात्रकः ॥ पाच्यं गजपुटे क्षिप्तं मृतं भवति निश्चितम् । वमनञ्च विरेकञ्च भ्रमं क्लममथारुचिम् ॥ विदाहं स्वेदमुत्क्लेदं न करोति कदाचनेति ॥ अरुणे । शुल्वनिभे ॥ पुं । कुष्ठरोगप्रभेदे ॥ त्रि । अरुणवर्णवति ॥ ताम्यति तम्यतेवा । तमु० । अमितम्योर्दीर्घश्चेति रक् दीर्घौ ॥

ताम्रकम् । न । ताम्रे ॥ स्वार्थेकः ॥

ताम्रकर्णी । स्त्री । अञ्जननामपश्चिमदिग्हस्तिकरिण्याम् ॥ ताम्रौ कर्णौ यस्याः । पाककर्णेति नासिकेति वा ङीष् ॥

ताम्रकारः । पुं । ताम्रकुट्टके । शौल्विके । कसेरा इति भाषा प्रसिद्धे वर्णसङ्करजातौ ॥ उत्पत्तिः कंसकारे द्रष्टव्या । ताम्रं करोति । डुकृञ् । कर्मण्यण् ॥

ताम्रकुट्टकः । पुं । कांस्यकारे ॥ ताम्रं कुट्टयति । पुं । कुट्टच्छेदे । कर्मण्यण् । स्वार्थेकः ॥

ताम्रकूटः । तमाखु इति प्रसिद्धे क्षुपे ॥ यथा । संविदाकालकूटञ्च ताम्रकूटञ्च धुस्तुरम् । अहिफेनं खर्जुरसस्तारिकातरिता तथा ॥ इत्यष्टौ सिद्धिद्रव्याणि यथा सूर्याष्टकं प्रिये इति कुलार्णवतन्त्रम् ॥

ताम्रकृमिः । पुं । इन्द्रगोपकीटे ॥

ताम्रगर्भम् । न । तुत्थे ॥

ताम्रचूडः । पुं । कुक्कुटे ॥ ताम्रा चूडाऽस्य ॥ कुक्कुरद्रुमे ॥

ताम्रत्रपुजम् । न । कांस्ये ॥

ताम्रदुग्धा । स्त्री । गोरक्षदुग्धायाम् ॥

ताम्रपट्टम् । न । ताम्रनिर्मितलेख्यपत्रे ॥ यथा । दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यन्तु कारयेत् । आगामिभद्रनृपतेः परिज्ञानाय पार्थिवः ॥ पटे वा ताम्रपट्टे वा समुद्रोपरिचिह्नितमिति मिताक्षरा ॥

ताम्रपत्रः । पुं । जीवशाके ॥ न । ताम्रनिर्मितपत्रे ॥

ताम्रपर्णः । पुं । भारतवर्षीयोपद्वीपे ॥

ताम्रपर्णी । स्त्री । चोलदेशवर्त्तिन्यां सरिद्वारायाम् ॥

ताम्रपल्लवः । पुं । अशोकतरौ ॥

ताम्रपाकी । पुं । गर्दभाण्डवृक्षे ॥

ताम्रपादी । स्त्री । हंसपद्याम् ॥

ताम्रपुष्पः । पुं । भूमिचम्पके । भूंचांपा इति भाषा ॥ कोविदारे । रक्तकाञ्चने ॥

ताम्रपुष्पिका । स्त्री । जपाकुसुमे ॥ रक्तत्रिवृति ॥

ताम्रपुष्पी । स्त्री । धातक्याम् ॥ पाटलावृक्षे ॥ जपायाम् ॥

ताम्रफलः । पुं । अङ्कोठवृक्षे ॥

ताम्रमूला । स्त्री । दुरालभायाम् ॥ लज्जालौ ॥ कच्छुरायाम् । खिराइ इति गौडभाषा ॥

ताम्रवर्णः । पुं । पक्षिवाचवृक्षे ॥

ताम्रवर्णा । स्त्री । जवायाम् ॥

ताम्रवल्ली । स्त्री । चित्रकूटादिदेशप्रसिद्धायां लतायां लतायाम् । ताल्याम् । तमाल्याम् ॥ मञ्जिष्ठायाम् ॥

ताम्रबीजः । पुं । कुलत्थे ॥

ताम्रवृक्षः । पुं । कुलत्थे ॥ रक्तचन्दने ॥

ताम्रवृन्तः । पुं । कुलत्थे ॥

ताम्रवृन्ता । स्त्री । कुलत्थिकायाम् ॥

ताम्रशिखी । पुं । कुक्कुटे ॥

ताम्रसारम् । न । रक्तचन्दने ॥ इतिरत्नमाला ॥

ताम्रसारकम् । न । रक्तचन्दने ॥ पुं । रक्तखदिरे ॥ इतिराजनिर्घण्टः ॥

ताम्रा । स्त्री । ताम्रवल्ल्याम् ॥ सैंहल्याम् ॥ ताम्रवर्णायाम् ॥

ताम्राकुः । पुं । उपद्वीपभेदे ॥

ताम्राक्षः । पुं । कोकिले ॥ ताम्रेऽक्षिणी यस्य ॥ त्रि । ताम्रनयने ॥

ताम्राभम् । न । रक्तचन्दने ॥

ताम्रारुणा । स्त्री । तीर्थविशेषे ॥

ताम्रार्द्धम् । न । कांस्ये ॥

ताम्राश्मा । पुं । पद्मरागमणौ ॥

ताम्रिकः । पुं । कांस्यकारे ॥ त्रि । ताम्रसम्बन्धे ॥ ताम्रस्यायम् । अध्यात्मादित्वात् ठञ् ॥ ताम्रघटनं शिल्पमस्य वा शिल्पमिति ठक् ॥

ताम्रिका । स्त्री । गुञ्जायाम् ॥ मानरन्ध्रापात्रे ॥

ताम्री । स्त्री । वाद्यविशेषे । मानरन्ध्रायाम् ॥ विकारिकायाम् ॥

तायनम् । न । स्फीततायाम् । समृद्धत्वे ॥ तायृसन्तानपालनयोः । ल्युट् ॥

तायिकः । पुं । तर्जिकाभिधदेशे ॥

तारः । पुं । वानरविशेषे ॥ मुक्ताविशुद्धौ ॥ शुद्धमौक्तिके ॥ देवीप्रणवे ॥ यथा । काश्यां विश्वेश्वरोऽहं गिरिपतितनया संयुता वामभागे शुण्डातुण्डेन दक्षे त्रिपथगतटिनीतीरपृष्ठैकभागे । मायाबीजञ्च कर्णे सुरमुनिसहितो ध्यानयुक्तं वदामि प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनामेति ॥ प्रणवे ॥ गर्भजन्मजरामृत्युसंसाराद्भवबन्धनात् । तारयतीति तारः ॥ तरक्षे ॥ शिरोभवध्वनौ ॥ स्त्री । न । नक्षत्रे ॥ नेत्र

मध्ये । कनीनिकायाम् ॥ अ । कृष्णे ॥ अध्ययनरूपायांसिद्धौ ॥ त्रि । स्फुरितदीधितौ ॥ अत्युच्चनादे ॥ निर्मले ॥ अत्युच्चैः ॥ तारयति अतिक्रामति अन्यान् शब्दान् । तॄ० । बहुलमेतन्निदर्शन मिति चुरादिगणसूत्रात् स्वार्थे णिच् । पचाद्यच् ॥ यद्वा । तार्यते ऽनेनवा । घञ् घोरा ॥

तारकः । पुं । दैत्यविशेषे ॥ कर्णधारे ॥ भेलके ॥ न । दृशि ॥ स्त्री । कनीनिकायाम् ॥ ऋक्षे ॥ त्रि । त्रातरि ॥ संसारसमुद्रस्य तरणकारणे तारयितरि ॥ अतिजगतीप्रभेदे वृत्तविशेषे । यथा । यदि तोटकवृत्तपदे गुरुरन्त्यम् भवतीह तदा किलतारकवृत्तम् । फणिनायकपिङ्गलवर्णित मेतद्धर पण्डितमण्डलिकाहृतचित्तम् ॥ यथा । अतिभारतरं हृदि चन्दनपङ्कं मनुते सरसीपवनं विषशङ्कम् । तवदुस्तरतारवियोगपयोधे र्नहि पारमसौ भविता परमार्थेः ॥ तारयति । तॄ० । ण्वुल् ॥

तारकजित् । पुं । कार्त्तिकेये । षडानने ॥ तारकं जयति । जि० । क्विप् । तुक् ॥

तारकराजः । पुं । चन्द्रे ॥

तारका । स्त्री । न । नेत्रकनीनिकायाम् ॥ ऋक्षे । नक्षत्रे ॥ तारकाज्योतिषीत्यमरस्त्वं ॥ स्त्री । इन्द्रवारुण्याम् ॥

तारकारिः । पुं । कार्त्तिकेये । महासेने ॥ तारकस्य दैत्यविशेषस्य अरिः ।

तारकिणी । स्त्री । निशायाम् ॥

तारकितम् । न । नभसि ॥ तारकाः सञ्जाता अस्य । तदस्यसञ्जातंतारकादिभ्यइतच् ॥

तारणः । पुं । भेलके ॥ अष्टादशेवत्सरे ॥ अतिदृष्टिश्च जायेत धान्यस्याथप्रपीडनम् । यशं भवति सामान्यं तारणे सुरवन्दिते ॥ त्रि । तरणकारयितरि ॥ तारयति । तॄ० । ल्युः ॥ सन्तारणे ॥

तारणिः । स्त्री । नावि ॥

तारतण्डुलः । पुं । धवलयावनाले ॥

तारतम्यम् । न । तरतमयोर्भावे । न्यूनाधिक्ये ॥ यथा । निर्धनं निधनमेतयोर्द्वयोस्तारतम्यविधिमुग्धचेतसाम् ॥ बोधनाय विधिना विनिर्मितो रेफणत्वजयवैजयन्तिका ॥

तारतारम् । न । आगमाविरोधिना न्यायेन आगमार्थपरीक्षणरूपे तर्के । तृतीयायांसिद्धौ ॥

तारदी । स्त्री । तरदीवृक्षे ॥

तारपुष्पः । पुं । कुन्दवृक्षे ॥

तारमाक्षिकम्। न। रूप्यमाक्षिके। रजतोपधातौ॥ तारमाक्षिकमन्यत्तु तद्भवेद्रजतोपमम्। किञ्चिद्रजतसाहित्यात् तारमाक्षिकमीरितम्॥ अनुकल्पतया तस्य ततो हीनगुणाः स्मृताः। न केवलं रूप्यगुणा वर्त्तन्ते तारमाक्षिके॥ द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणा यतः॥ स्यात् तारमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम्। चक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम्॥ अर्शः शोथं क्षयं कण्डुं त्रिदोषमपि नाशयेत्॥ मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान्। तथैव मालां व्रणपूर्विकाञ्च करोत्यशुद्धं रजताख्यमाक्षिकम्॥ शोधनन्तु। कर्कोटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम्। भावयेदातपे तीव्रे विमला शुद्ध्यति ध्रुवम्॥ विमला तारमाक्षिकम्। कर्कोटी खखसा। मारणन्तु कुलत्थस्य कषायेण घृष्टा तैलेन वा पुटेत्। तैलेन वाजमूत्रेण म्रियते तारमाक्षिकम्॥

तारलः। पुं। विटे॥ इति भूरिप्रयोगः॥

तारवायुः। पुं। अत्युच्चशब्दवति पवने॥

तारविमला। स्त्री। तारमाक्षिके॥

तारशुद्धिकरम्। न। सीसके॥

तारा। स्त्री। बुद्धदेवताभेदे॥ पञ्चकन्यान्तर्गतकन्यायाम्। वालिसुग्रीवयोर्भार्यायाम्॥ सुरगुरोर्भार्यायाम्॥ कनीनिकायाम्॥ नक्षत्रे॥ यथा। एकतारं नभो दृष्ट्वा स्वर्गेभ्यो नारदो मुनिः। तावद्भवति चण्डालो यावदन्यं न पश्यति॥ तत्र लिङ्गानुशासनं यथा। हस्ता स्वाती श्रवणा अश्लेषे मृगशिरा नपुंसि स्यात्। पुंसि पुनर्वसुपुष्यौ मूलन्त्वली स्त्रियां शेषाः॥ शेषाः तारा इति सम्बन्धः॥ चीडायाम्॥ मुक्तायाम्॥ शिवगृहिण्याम्॥ द्वितीयायां महाविद्यायाम्॥ यथा। लीलया वाक्प्रदा यस्मात् तेन लीलसरस्वती। तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी॥ उग्रापत्तारिणी यस्मा दुग्रतारा प्रकीर्त्तितेति॥ तरन्त्यनया। तॄ०। भि० अङ्। ऋदृशोऽङीति गुणः। निपातनाद्दीर्घः। अदन्तलक्षणष्टाप्॥

ताराकूटम्। न। तृतीये योटके। तारामैत्र्याम्॥ यथा। वरर्क्षादपि कन्यर्क्षं कन्यर्क्षाद्वरभावधि। पृथगङ्कैर्हृते शेषं त्रिपञ्चसप्तभन्नसदिति॥

तारापतिः। पुं। शिवे॥ चन्द्रे॥ बृहस्पतौ॥ वालिनि॥ सुग्रीवे॥

तारापथः। पुं। आकाशे॥

तारापीडः । पुं । निशाकरे । चन्द्रे ॥

ताराभूषा । स्त्री । रात्र्याम् ॥

ताराभ्रः । पुं । कर्पूरे ॥

तारामण्डलः । पुं । ईश्वरगृहविशेषे ॥

तारामार्गः । पुं । आकाशे ॥

तारारात्रिः । स्त्री । आगमोक्ते पर्वविशेषे ॥ यथा । भाद्रे मासि कृष्णपक्षे भौमवारे कुजर्क्षगे । अर्द्धरात्रौ सक्रमश्च सा तारा रात्रिरीरितेति ॥

तारारिः । पुं । विटमाक्षिके ॥

तारावती । स्त्री । कालिकापुराणप्रसिद्धायां चन्द्रशेखरभूपपत्न्याम् ॥

तारिकम् । न । तरमूल्ये ॥

तारिका । स्त्री । ताडीतिख्याते तालरसे ॥

तारिणी । स्त्री । बुद्धदेव्यन्तरे । लोके श्वरात्मजायाम् ॥ * ॥ शिवपत्न्याम् । द्वितीयायां महाविद्यायाम् ॥

तारुण्यम् । न । यौवने ॥ तरुणस्य भावः । ब्राह्मणादित्वात् ष्यञ् ॥

तारेयः । पुं । वालिवानरपुत्रे । अङ्गदे ॥ ताराया अपत्यम् । ढक् ॥

तार्क्षवम् । न । तर्क्षोर्विकारे ॥ तदवयवे ॥ कोपधाच्चेत्यण् ॥

तार्क्किकः । त्रि । तर्कतत्परे । तर्कशास्त्रविदि ॥ तर्कमधीते । ठक् ॥ स च षड्विधो यथा । स्याद्वादवाद्यार्हतः स्याच्छून्यवादीतु सौगतः १ । नैयायिकस्त्वक्षपादः २ । योगः साङ्ख्यस्तु कापिलः ३ । वैशेषिकः स्यादौलूक्यो ४ । बार्हस्पत्यस्तु नास्तिकः ५ । चार्वाकौ लौकायतिकश्चेत्येते ६ ते षड् पितार्किकाः ॥ आत्मनोऽचिद्रूपवादिनोऽनात्मवाद्येते स्वबुद्धिपरिकल्पितं यद्दिच्छन्ति तद्वदन्ति ॥

तार्क्ष्यः । पुं । कश्यपे ॥

तार्क्ष्यी । स्त्री । पाताल‌गरुडीलतायाम् ॥

तार्क्ष्यः । पुं । अश्वे ॥ सर्पे ॥ गरुडाग्रजे ॥ गरुडे ॥ तार्क्षस्य कश्यपस्यापत्यम् । गर्गादित्वात् यञ् । बहुत्वे तार्क्षाः ॥ एकस्मिन्कल्पे तृक्षमुनेरपत्यत्वात्तार्क्ष्यो गरुडः । गर्गादित्वात् यञ् । बहुत्वे यञञोश्चेति लुकि तृक्षाइत्यन्ये ॥ सुवर्णे ॥ स्यन्दने ॥ अश्वकर्णाख्यतरौ ॥ न । रसाञ्जने ॥

तार्क्ष्यजम् । न । रसाञ्जने ॥

तार्क्ष्यध्वजः । पुं । हरौ । विष्णौ ॥ इति हेमचन्द्रः ॥

तार्क्ष्यनायकः । पुं । गरुडे ॥ इतिराजनिर्घण्टः ॥

तार्क्ष्यप्रसवः । पुं । अश्वकर्णवृक्षे ॥

तार्क्ष्यशैलम् । न । सतुत्थया दार्व्या कृतासञ्जने । रसगर्भे । रसाञ्जने ॥ तार्क्ष्य

शैले भवम्। अण्॥

तार्णकम्। त्रि। तृणनिर्मिते॥

तार्त्तीयीकः। त्रि। तृतीये॥ तीयादीकक् स्वार्थे वा वाच्यः॥

तालः। पुं। करतले॥ अङ्गुष्ठमध्यमाभ्यां संमिते। विस्तृताभ्यामङ्गुष्ठमध्यमाभ्यां सम्मिते दीर्घपरिमाणविशेषे॥ तलस्यायम्। तल॰। हलश्चेति घञ्॥ करास्फाले। करास्फोटे॥ कांस्यमयवाद्यभाण्डे॥ त्सरौ॥ तालद्रुमे। दीर्घपादपे। लेख्यपत्रे॥ पक्वं तालफलं पित्तरक्तश्लेष्मविवर्द्धनम्। दुर्जरं बहुमूत्रञ्च तन्द्राऽभिष्यन्दशुक्रदम्॥ तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः। श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः॥ तालमज्जा तालफलवीजमज्जा। तालजं तरुणं तोय मतीवमदकृन्मतम्। अम्लीभूतं तदा तत् स्यात् पित्तकृद्वातदोषहृत्॥ *॥ मानविशेषे॥ यथा। तालो द्वादशभिर्जानुपरिणाहपरिभ्रमैरिति। हस्तेन जानुमण्डलपरिभ्रमणं यावत्या कालमात्रया क्रियते तावतीभिर्द्वादशभिस्तालाख्यः कालांशो ज्ञेयः॥ *॥ गीतकालक्रियामाने। अयं स्वर इयत् कालं गेयः इयत्कालं विलम्बितम् इयत्कालं द्रुतम् इयत्कालं मध्यमिति बोधयितुम् ईदृशैर्हस्तैरङ्गुल्याकुञ्चनप्रसारणादिक्रियाभिर्नर्त्तितव्यं गातव्यञ्चेत्येवंरूपे कालक्रिययोर्माने॥ कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियायाः परिस्पन्दात्मिकायाः परिच्छेदहेतुस्तालः॥ *॥ तस्योत्पत्तिर्यथा। गौरीहरयोर्नृत्येन तालो बभूव। तस्य कारणम्। क्रिया कालश्च। हरनृत्यस्य ताण्डवम् गौर्य्यानृत्यस्य लास्यमिति संज्ञा। अर्थात् पुरुषनृत्यस्य ताण्डवम् नार्यानृत्यस्य लास्यमिति नाम। ताण्डवलास्ययो राद्यक्षरयोर्मेलनेन ताल इति संज्ञा॥ *॥ आदिगुरुत्रिकले (ऽ।)॥ ताडयति तल्यते वा। चु॰। पचाद्यच्। घञ् वा॥ न। हरिताले॥ तालीशपत्रे॥ दुर्गासिंहासने॥ तालफले॥ धनुषि॥ तालस्य विकारः। तालादिभ्योऽण्। तालाद्धनुषि। अन्यत्तालमयम्॥

तालकम्। न। द्वारपिधानसाधनयन्त्रे। ताला इति भाषा॥ हरिताले॥ तुवरिकायाम्

तालकाभः। पुं। हरितवर्णे॥ त्रि। तद्वति॥

तालक्षीरकम्। न। तालसम्भूतनवक्षीरे॥

तालकी । स्त्री । } तालजसुरायाम् ।
तालती । स्त्री । } ताडी इतिभाषा ।

तालध्वजः । पुं । बलदेवे ॥ तालो लेख्यपत्रो ध्वजोऽस्य ॥

तालनवमी । स्त्री । भाद्रशुक्लनवम्याम् ॥

तालध्वजा । स्त्री । पुरीविशेषे ॥

तालपत्रम् । न । ताडङ्के । कर्णाभरणविशेषे । कर्णिकायाम् ॥ तालस्य पत्रम् । स्वर्णरचितस्यापीदमेवनाम ॥ तालतरोः पर्णे ॥

तालपत्रिका । स्त्री । तालमूल्याम् ॥

तालपत्री । स्त्री । मूषिकपर्ण्याम् । रण्डायाम् ॥ मधुरौषधौ ॥

तालपर्णम् । न । मुरानामगन्धद्रव्ये ॥

तालपर्णी । स्त्री । मुरानामनिगन्धद्रव्ये । गन्धिन्याम् ॥ तालःपर्णमस्याः । तालशब्दः तालपर्णसदृशे लाक्षणिकः । पाककर्णेतिङीष् ॥ मधुरिकायाम् ॥

तालपुष्पम् । न । प्रपौण्डरीके ॥ तालद्रुकुसुमे ॥

तालभृत् । पुं । बलदेवे ॥

तालप्रलम्बम् । न । तालजटायाम् ॥

तालमूलिका । स्त्री । तालमूल्याम् । मुसल्याम् ॥ तालोमूलमस्याः । तालशब्दस्तालमूलसदृशे लाक्षणिकः । पाककर्णेतिङीष् । स्वार्थे कन् ॥

तालमूली । स्त्री । तालमूलिकायाम् । दीर्घकन्दायाम् । मुसल्याम् ॥ तालमूलीतु विद्वद्भि र्मुसलीति निगद्यते । मुसली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः । तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा ॥ ॥

ताललक्ष्मा । पुं । बलदेवे ॥

तालवृन्तम् । न । तालपत्रनिर्मिते व्यजने ॥ यथा । परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम् । तालवृन्तेन किङ्कार्यं लब्धे मलयमारुते ॥ अस्य वायोर्गुणा यथा । त्रिदोषशमनोवायुर्लघुरस्य प्रकीर्त्तितइति ॥

तालवृन्तकम् । न । व्यजने ॥ तालस्येव वृन्तमस्य । तालेकरतले वृन्तमिव बन्धनमस्य वा ॥

तालव्यम् । त्रि । तालुजाते ॥ शरीरावयवत्वात् यत् ॥

तालाख्या । स्त्री । मुरायाम् ॥

तालाङ्कः । पुं । बलभद्रे । प्रलम्बघ्ने ॥ तालोवृक्षविशेषोऽङ्को ध्वजोऽस्य ॥ करपत्रे ॥ शाकभेदे ॥ महालक्षणसम्पूर्णपुरुषे ॥ पुस्तके ॥ हरे ॥

तालावचरः । पुं । नटे ॥ इ०त्रि० ॥

तालिः । स्त्री । भूम्यामलक्याम् ॥

तालिकः । पुं । प्रसारिताङ्गुलिपाणौ । चपेटे । तले ॥ लिखितस्यनिबन्ध

ने। काञ्चनक्याम् ॥

तालिका। स्त्री। चपेटे ॥ तालमूल्याम् ॥ ताम्रवल्ल्याम् ॥

तालितम्। न। वाद्यभाण्डे ॥ तुलितपटे ॥ गुणे ॥

तालिशः। पुं। शैले। पर्व्वते ॥

ताली। स्त्री। जटायाम्। वितुन्नकौषधौ। भुञ आवला इतिभाषा ॥ तालद्रुमे ॥ आढक्याम्। तुवरिकायाम्। अरहर इतिभाषा ॥ द्वारोद्घाटनयन्त्रे ॥ तालमूल्याम्। ताम्रवल्ल्याम् ॥ तालजातसुरायाम्। ताडी इति भाषा ॥ * ॥ मध्याख्यच्छन्दोभेदे ॥ यथा। ताली सा निर्द्दिष्टा। उद्दिष्टौ मो यश्च ॥ यथा। जानीते जानीते। सारूप्यं वैरूप्यम् ॥ अस्य नारीत्यपि संज्ञोक्ता छन्दोमञ्जर्याम्। मोनारी ॥ तालयति। तल०। णयन्तादच्। गौरादित्वाज्जातित्वाद्वा ङीष् ॥

तालीपत्रम्। न। तालीशे ॥

तालीशम्। न। तालीशपत्रे ॥ तालीशं लघु तिक्तोष्णं श्वासकासकफाऽनिलान्। निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान् ॥ भूम्यामलक्याम् ॥

तालीशपत्रम्। न। तालीशाख्याते वृक्षविशेषे। धात्रीपत्रे। शुकोदरे ॥ भूम्यामलक्याम् ॥

तालु। न। काकुदे। जिह्वेन्द्रियाधिष्ठाने स्वनाम्नैव प्रसिद्धे ॥ तदस्य नेमवर्णाः। तृ०। शोरश्चल इति अुण् ॥ तालयति। तल०। चु०। मृगय्वादित्वात् कुर्बा ॥

तालुकम्। न। तालुनि ॥ स्वार्थे यावादित्वात् कन् ॥

तालुजिह्वः। पुं। कुम्भीरे ॥

तालूरः। पुं। आवर्त्ते ॥

तावकः। त्रि। त्वदीये ॥ तवायम्। तस्येदमित्यण्। तवकममकावेकवचने इति तवकादेशः। स्त्रियां तावकी ॥

तावकीनः। त्रि। त्वदीये ॥ तवायम्। युष्मदस्मदोरन्यतरस्यां खञ्चेति खञ्। पश्चात्तवकादेशः ॥

तावत्। अ। माने ॥ अनुक्रमे ॥ अवधारणे ॥ सम्भ्रमे ॥ परिच्छेदे ॥ कार्त्स्न्ये ॥ अधिकारे ॥ अवधौ ॥ तत् परिमाणमस्य। तद्धिता इति बहुवचनेनान्येऽनुक्ता अपि तद्धिता ज्ञापिताः। तेन डावतुप्रत्ययः ॥ तदारभ्यार्थे ॥ यथा। भर्त्ता पिता वत् क्रथकैशिकानामिति रघुः ॥

तावान्। त्रि। तत्परिमाणविशिष्टे ॥ ॥ तत् परिमाणमस्य। यत्तदेतेभ्यः

परिमाणे इति वतुप्। आसर्वनाम्न इत्यात्वम् ॥

तावतिथः। त्रि। तावताम् पूरणे ॥ डट्। वतोरिथुक् ॥

तावरम्। न। चापगुणे ॥ इतिभूरि० ॥

ताविषः। पुं। स्वर्गे ॥ महोदधौ ॥ काञ्चने ॥ तवेति सौत्रोधातुः। तवेर्णिद्वेतिटिषच् ॥

ताविषी। स्त्री। चन्द्रकन्यायाम् ॥ भूमौ ॥ नद्याम् ॥ देवकन्यायाम् ॥ टित्त्वान्ङीप् ॥

तावुरिः। पुं। वृषराशौ ॥ इतिहट्ठ० ॥

ताष्कनः। पुं। यशे ॥

तिक्तः। पुं। तीता इतिप्रसिद्धे रसे ॥ तिक्तः शीत तृषामूर्च्छाज्वरपित्तकफान् जयेत्। स्वयः स्वयमरोचिष्णुः कण्ठस्तन्यास्यशोधनः ॥ सुगन्धे ॥ वत्सपद्रुमे ॥ कुटजे ॥ न। पर्पटौ षधौ ॥ त्रि। तिक्तरसान्विते ॥ तेजयति। तिज०। सामान्यापेक्षज्ञापका त्तुरादीनांणिजभावे गन्त्यर्थाकर्मके तिक्तः ॥

तिक्तकः। पुं। पटोले ॥ भूमिनिम्बे। चिरतिक्ते। चिरायता इतिभाषा ॥ कृष्णखदिरे ॥ निम्बे ॥ इङ्गुदीवृक्षे ॥ तिक्तार्थे ॥ तिक्तएव। स्वार्थे कन् ॥

तिक्तगन्धिका। स्त्री। गन्धपत्रायाम् ॥

तिक्तकर्कोटकी। स्त्री। वन्ध्याकर्कोटिकायाम्। नागदन्त्याम्। बाँजखकरोल इतिभाषा ॥

तिक्तका। स्त्री। तिक्तालाबाम्। कटुतुम्ब्याम् ॥

तिक्तगन्धिका। स्त्री। वराहक्रान्तायाम् ॥

तिक्तगुञ्जा। स्त्री। करञ्जे। चतुरसायाम् ॥

तिक्ततण्डुला। स्त्री। पिप्पल्याम् ॥

तिक्ततुण्डी। स्त्री। कटुतुण्डीलतायाम् ॥

तिक्ततुम्बी। स्त्री। कटुतुम्ब्याम् ॥ तिक्ताचासौतुम्बीच ॥

तिक्तदुग्धा। स्त्री। अजशृङ्ग्याम् ॥ क्षीरिण्याम् ॥

तिक्तद्रुमः। पुं। पञ्चतिक्ते ॥

तिक्तधातुः। पुं। पित्ते ॥

तिक्तपत्रः। पुं। कर्कोटके ॥ तिक्तानि पत्राणि यस्य ॥

तिक्तपर्वा। स्त्री। हिलमोच्याम् ॥ गुडूच्याम् ॥ मधुयष्ट्याम् ॥ दूर्वायाम् ॥

तिक्तपुष्पा। स्त्री। पाठायाम् ॥

तिक्तफलः। पुं। कतकवृक्षे ॥

तिक्तफला। स्त्री। यवतिक्तायांलतायाम् ॥ वार्त्ताक्याम् ॥ षड्भुजायाम् ॥

इति राजनिर्घण्टः ॥

तिक्तभद्रः । पुं । पटोले ॥

तिक्तमरिचः । पुं । कतकवृक्षे ॥

तिक्तरोहिणिका । स्त्री । } कटुका-
तिक्तरोहिणी । स्त्री । } याम् । क
टुम्बाम् ॥ तिक्ताश्चासौ रोहिणी च ॥

तिक्तवल्ली । स्त्री । मूर्वालतायाम् ॥

तिक्तवीजा । स्त्री । कटुतुम्ब्याम् ॥

तिक्तशाकः । पुं । खदिरवृक्षे ॥ वरुण द्रुमे ॥ तिक्तःशाकोऽस्यपत्राणाम् । वरुणस्य शाकमध्ये पाठात् ॥ पत्रसुन्दरवृक्षे ॥

तिक्तसारः । पुं । खदिरे ॥ तिक्तःसारोऽस्य ॥ न । दीर्घरोहिषकतृणे ॥

तिक्ता । स्त्री । कटुक्याम् ॥ पाठायाम् ॥ यवतिक्तायां लतायाम् ॥ षड्भुजायाम् ॥ छिक्कन्याम् ॥ टाप् ॥

तिक्ताख्या । स्त्री । कटुतुम्ब्याम् ॥

तिक्ताङ्गा । स्त्री । पातालगरुडीलतायाम् ॥

तिग्मम् । न । तीक्ष्णे । पैना इति भाषा ॥ त्रि । तद्वति ॥ तेजयति । तिज० । युजिरुचितिजां कुश्चेति मक् कवर्गश्चान्तादेशः ॥

तिग्मरश्मिः । पुं । सूर्य्ये ॥ तिग्मारश्मयोऽस्य ॥

तिग्मांशुः । पुं । सूर्य्ये ॥ तिग्माःकराः अंशवोऽस्य ॥

तिजिलः । पुं । चन्द्रे ॥ तेजते । तिज० । गुपादिभ्यःकिदितीलच् ॥

तिण्टी । स्त्री । त्रिवृति ॥ सतीलायाम् ॥

तितउः । पुं । चालन्याम् ॥ तनोति तन्यते वा । तनु० । तनोतेर्डउः सन्वच्च । सन्वद्भावाद्द्वित्वमभ्यासस्येत्वञ्च । बहुच्छिद्रसमोपेतं चालनं तितउस्मृतमित्युक्तेः क्लीवत्वमपि ॥

तितिक्षा । स्त्री । क्षान्तौ । क्षमायाम् । परापराधसहने ॥ सर्वदुःखसहने । शीतोष्णमानापमानलाभालाभशोकहर्षादिद्वन्द्वसहिष्णुतायाम् ॥ सहोऽतितिक्षाम । शाल्यमहोदानफलं महत् । यदागतोहरिश्चन्द्रोमहेन्द्रस्यसलोकताम् ॥ तिजेः क्षमायां सन्नन्तादप्रत्ययेटाप् ॥

तितिक्षितः । त्रि । क्षान्ते । सोढे ॥ तितिक्षासञ्जाताऽस्य । तारकादित्वात् इतच् ॥

तितिक्षुः । त्रि । क्षमान्विते । क्षान्ते । सहिष्णौ । जीवनविच्छेदमतिरिक्तमीत । द्विन्द्वसहिष्णावितिस्वासारः ॥ तितिक्षते । तिजेः क्षमायाम् । गुप्तिज्किद्भ्यःसन् । तितिक्षशशीलः । सनाशंसभिक्षउः ॥

तितिभः । पुं । इन्द्रगोपकीटे ॥ इ० हे० ॥

तितीर्षुः । त्रि । तरितुमिच्छौ ॥ तरतेः सन्नन्तादुप्रत्ययः ॥

तिन्तिडीकः । पुं । वृक्षविशेषे ॥ ओषधिविशेषे ॥ तिम्यति । तिम आर्द्रीभावे । पर्फरीकादयश्चेति तिमेर्मकारस्य डकारोऽभ्यासस्य तुक् ईकन्प्रत्ययश्च । तिन्तिडीचिञ्चाम्लिकेत्यमरटीकाव्याख्यान्तरम् । तथाच । तिन्तिडी चाम्लिका चिञ्चा तिन्तिडीका कपिप्रियेति वाचस्पतिः ॥

तित्तिरः । पुं । तित्तिरिपक्षिणि । तीतर इतिभाषा ॥ तित्ति इतिशब्दं राति । रा० । आतोनुपेतिकः ॥

तित्तिरिः । पुं । तित्तिरे ॥ तित्तिरिः कृष्णवर्णः स्यात् सतु गौरः कपिञ्जलः ॥ तित्तिरिर्वर्णदो ग्राही हिक्कादोषत्रयापहः । श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणैः ॥ तित्ति इति शब्दं रौति । रु० । बाहुलकात् किः ॥ मुनिविशेषे ॥ यजुःशाखाविशेषे ॥

तिमः । पुं । कामे ॥ काले ॥ अनले ॥ तेजयति । तिज० । तिथपृष्ठगूथयूथप्रोथाइतिथक् तिजेर्जलोपश्चनिपातनात् ॥

तिथिः । स्त्री । पुं । प्रतिपदादिपञ्चदशसु । चन्द्रकलाक्रियारूपासु । चन्द्रकलाक्रियोपलक्षिते वा काले ॥ अतति । अत० । अततेरिथिन् । पृषोदरादित्वात् अलोपः ॥ यद्वा । तनोति विस्तारयति चन्द्रकला यः कालविशेषः स तिथिः ॥ चन्द्रकलया तन्यते इति वा ॥ उक्तञ्च । तन्यन्ते कलया यस्मात् तस्मात् तास्तिथयः स्मृता इति ॥ अमादिपौर्णमास्यन्ता याएव शशिनः कलाः । तिथयस्ताः समाख्याताः षोडशैववरानने ॥ तत्रप्रथमकलाक्रियारूपा प्रतिपत् । एवंद्वितीयादिकलाक्रियारूपाद्वितीयादिः । साचवृद्धिरूपाचेत् शुक्ला ह्रासरूपाचेत् कृष्णा । यथा । तत्पक्षावुभौ मासे शुक्लकृष्णौ क्रमेणहि । चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥ पक्षयोरुभयोस्तु तिथयः क्रमात् पञ्चदश स्मृताः । दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके ॥ * ॥ गोभिलोक्तामावास्या घटकउपवेशभावापन्नसमसूत्रपातन्यायेन राश्येकांशच्छेदेन सहावस्थानयुक्तार्कमण्डलाच्चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्लाः प्रतिपदादितत्तत्तिथयउत्पत्तिः । एवंगोभिलोक्तपौर्णमासीघटकस-

समराश्यन्तस्थानरूपपरमनियोगा-
नन्तरमर्कमण्डलप्रवेशाय चन्द्रम-
ण्डलस्य राशिद्वादशांशद्वादशांशभो
गात्मकप्रवेशरूपसन्निकर्षेण कृष्णा
या स्तत्तिथेश्चोत्पत्तिरिति। यथा
। अर्कादिनिःसृतः प्राचीं यद्यात्य
हरहः शशी। भागैर्द्वादशभि स्तत्
स्यात् तिथिश्चान्द्रमसं दिनम्॥ विं
शांशक स्तथा राशेर्भाग इत्यभिधी
यते। आदित्याद्विप्रकृष्टस्तु भागद्वा
दशकं यदा॥ चन्द्रमाः स्यात् तदा-
रामतिथिरित्यभिधीयते॥ *॥ सा
दैवकृत्ये पूर्वाह्णयुताग्राह्या। एका
दश्युपवासातिरिक्तस्थले सर्वत्रास्त
व्यापिनीग्राह्या॥ *॥ पञ्चदश-
सङ्ख्यायाम्॥ पञ्चदशाङ्के॥

तिथिक्षयः। पुं। अमावास्यायाम्॥ इ
तिशब्दार्थकल्पतरुः॥ तिथेःक्षये॥

तिथिप्रणीः। पुं। निशाकरे। चन्द्रे॥

तिथी। स्त्री। प्रतिपदादितिथिषु॥

तिनाशकः। पुं। तिनिशवृक्षे॥

तिनिशः। पुं। स्यन्दनद्रुमे। अतिमुक्त
के। वञ्जुले। तिनास इतिसादन
इतिच प्रसिद्धे वृक्षे॥ तिनिशः श्लेष्म
पित्तास्रमेदःकुष्ठप्रमेहजित्। तुव
रः श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणु
त्॥ अतिशयेन नेशति। गिशसमा
धौ। इगुपधेतिकः॥ यद्वा। अति-
क्रान्तोनिशाः। अत्यादय इतिसमासः
। पृषोदरादिः॥

तिन्तिडः। पुं। दैत्यविशेषे॥ चिञ्चा
याम्॥ वृक्षाम्ले॥

तिन्तिडिका। स्त्री। चिञ्चायाम्॥ वृ
क्षाम्ले॥

तिन्तिडी। स्त्री। चिञ्चायाम्। अम्लिका
याम्। अम्ली इति इम्ली इतिचभाषा॥
अम्लिकायाःफलं पक्वं मर्दितं वारिणा
दृढम्। शर्करामरिचोन्मिश्रं लवङ्गे
न्दुसुवासितम्॥ अम्लिकाफलसम्भूतं
पानकं वातनाशनम्। पित्तश्लेष्मकरं
किञ्चित् सुरुच्यं वह्निबोधकम्॥ चि
ञ्चे॥ चुक्रे॥ तिम्यति। तिमआर्द्रीभा
वे। अणीकादयश्चेतिनिपातितः॥

तिन्तिडीकम्। न। वृक्षाम्ले। चुक्रे॥
तिम्यति। तिम०। अनीकादयश्चेति
साधु॥ वल्ल्यन्तरे॥ तिन्तिड्याम्॥

तिन्तिडीका। स्त्री। चिञ्चायाम्॥

तिन्तिडीचूतम्। न। चुञ्चुर्याम्। ति
न्तिडी बीजैर्विंहितेचूते। आकरी
वाकरी इतिभाषा॥

तिन्तिषा। स्त्री।
तिन्तिलिका। स्त्री। } चिञ्चायाम्।
तिन्तिली। स्त्री। } तिन्तिड्याम्॥
तिन्तिलीका। स्त्री।

तिन्दिशः । पुं । डिण्डिशे ॥

तिन्दुः । पुं । तिन्दुके । तेंदू इतिभाषा ॥ तिम्यति । तिम० । मृगय्वादित्वात् कुः ॥

तिन्दुकः । पुं । स्फूर्जके । कालस्कन्धे । शितिसारके । तिन्दौ । तेंदू इति भाषा ॥ स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु । पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु ॥ ततसारं विषरोगजित् ॥ विस्पतिन्दुकमप्येवं विशेषात् ग्राहिशीतलम् ॥ न । कर्षपरिमाणे । इति वैद्यकपरिभाषा ॥ तिन्दोःसंज्ञायां कन् ॥

तिन्दुकिः । स्त्री । तिन्दुके ॥

तिन्दुकिनी । स्त्री । आवर्त्तक्याम् ॥

तिन्दुकी । स्त्री । तिन्दुके ॥ तिम्यति । तिम०। बाहुलकात् दुकप् गुणाभावश्च । ङीप् ॥

तिन्दुलः । पुं । तिन्दुकवृक्षे ॥

तिमिः । पुं । समुद्रे ॥ महाकाये सामुद्रे मत्स्यविशेषे ॥ अस्तिमत्स्य स्तिमिर्नाम शतयोजनविस्तरइतिदर्शनात् । अचरामायणे रामवाक्यम् । अस्तिमत्स्यस्तिमिर्नाम तथाचास्ति तिमिङ्गिलः । तिमिङ्गिलगिलोप्यस्ति तद्गिलोप्यस्तिराघवेति ॥ ताम्यति । समुद्राकाङ्क्षायाम् । क्तमितमिशति

तस्मादमतरङ्गेति इन् ॥

तिमिकोषः । पुं । अब्धौ ॥

तिमिङ्गिलः । पुं । मत्स्यविशेषे ॥ तिमिं गिरति । गृनिगरणे । मू० कः । अचिविभाषेतिलत्वम् । गिलेऽगिलस्येतिमुम् ॥

तिमिङ्गिलगिलः । पुं । महामत्स्यविशेषे ॥ गिरति । गृ० । मूलविभुजादित्वात् कः । लत्वम् । गिलङ्गिलतीति तिमिङ्गिलगिलः । तिमीनां गिलगिलः । गिलेगिलेचेतिमुम् ॥

तिमितः । त्रि । निश्चले ॥ क्लिन्ने ॥ तिम्यतिस्म । तिम० । अकर्मकत्वात् कर्त्तरि क्तः ॥

तिमिरम् । न । अन्धकारे । ध्वान्ते ॥ नेत्रामयान्तरे ॥ तल्लक्षणं । यथा । तिमिराख्यः सवैदोषश्चतुर्थं पटलङ्गतः । रुणद्धि सर्वतोदृष्टिं लिङ्गनाशमतः परम् ॥ * ॥ भुक्त्वा पाणितलंघृष्ट्वा चक्षुषोर्यदिदीयते । अचिरेणैवतद्वारि तिमिराणि व्यपोहति ॥ तिम्यति । तिम० । इषिमदीतिकिरच ॥

तिमिरच्छित् । पुं ।

तिमिररिपुः । पुं । सूर्ये ॥

तिमिरनाशनः । पुं ।

तिमिषः । पुं । आम्लकर्कट्याम् ॥ इति-

त्रिकाण्डशेष: ॥ नाटाम्ने ॥

तिमी । स्त्री । तिमिमत्स्ये ॥ इ०द्वि० ॥

तिरश्ची । स्त्री । पशो:पक्षिणश्चस्त्रियाम् ॥

तिरश्चीन: । त्रि । तिर्य्यग्भूते ॥ विभाषाञ्चेरदिक्स्त्रियामिति स्वार्थेख: ॥

तिरस् । अ । अन्तर्द्धौ ॥ तिर्य्यगर्थे ॥ अवज्ञायाम् । तिरस्कारे ॥ तरति । तॄ० । असुन् । क्वचिदपवादविषयेप्युत्सर्गोऽभिनिविशते इति गुणविषये इर् ॥

तिरस्करिणी । स्त्री । जवनिकायाम् । अवधानपट्याम् । समान त्रिकसिरस्की इत्यादिभाषा ॥ तिरस्करोति तिरस्क्रियते ऽनया वा । ग्रह्यादित्वात् णिनि: । निपातनाद् वृद्ध्यभाव: । संज्ञापूर्वकत्वाद्वा ॥ देवीविशेषे ॥

तिरस्कार: । पुं । अधिक्षेपे । अनादरे ॥

तिरस्कृत: । त्रि । अनादृते ॥

तिरस्कृति: । स्त्री । दोषस्मृत्याधिक्कारे । उपेक्षायाम् । अनादरे ॥

तिरस्क्रिया । स्त्री । अनादरे ॥ तिरस्करणम् । कृञ:शचेति भावे श: । तिरसोऽन्यतरस्यामिति सत्वम् ॥

तिरिटि: । पुं । इक्षुग्रन्थौ ॥

तिरिम: । पुं । शालिविशेषे ॥

तिरिव: । पुं । शालिभेदे ॥

तिरीट: । पुं । लोध्रे ॥ न । स्वर्णे ॥ किरीटे ॥ तीर्य्यते मस्तमनेन । तॄ० । कृतॄकृपिभ्य: कीटन् । इत्वरपरत्वे ॥

तिरीटक: । पुं । रक्तलोध्रे ॥ स्वार्थे क: ॥

तिरोधानम् । न । अन्तर्द्धाने । व्यवधायाम् । अपिधाने ॥ तिर:पूर्वाद्दुधाञो ल्युट् । तिरोऽन्तर्द्धाविति गतित्वे कुगतीतिसमास: ॥

तिरोभाव: । पुं । पिधाने ॥ प्रलये ॥

तिरोभूत: । त्रि । अन्तर्हिते ॥

तिरोहित: । त्रि । अन्तर्हिते ॥ छन्ने ॥ नष्टे ॥ तिरोधीयतेस्म हितेोतिस्मवा । डुधाञ् धारणपोषणयो: हिगतौ वा । गत्यर्थेति कर्त्तरि क्त: । धाञस्तु कर्मणि क्त: । भावक्तान्ताभ्यामर्श आद्यच्वा ॥

तिर्य्यक्पाती । त्रि । साचिविप्रसारिणि । कुटिलद्दष्टौ ॥

तिर्य्यक्स्रोता: । पुं । पशुपक्ष्यादौ ॥ सच ब्रह्मणोऽष्टम:सर्ग: । यथा । तिरश्चामष्टम: सर्ग: सोष्टाविंशद्विधोमत: ॥ तेषांलक्षणं यथा । अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनइति । अविद:स्वस्नानादिज्ञानशून्या: । भूरितमस: आहारादिमात्रनिष्ठा: । घ्राणज्ञा घ्राणेनैवेष्टमर्थं जानन्ति । हृदि अवेदिन: दीर्घानुसन्धानशून्या:-

॥ अष्टाविंशतिभेदा यथा ; गौ-
रजोमहिषः कृष्णः शूकरो गवयो-
रुरुः । द्विशफाः पशवश्चेमे अवि
रुष्ट्रश्च सत्तम ॥ खरोऽश्वोऽश्वतरो-
गौरः शरभश्चमरी तथा । एते
चैकशफाः क्षत्तः शृणु पञ्चनखान् पशू
न् ॥ श्वा शृगालो वृको व्याघ्रो मार्जारः
शशशल्यकौ । सिंहः कपिर्गजः कूर्म्मो
गोधा च मकरादयः ॥ कङ्कगृध्रवकश्ये
नभासभल्लूकबर्हिणः । हंससारसच
क्राह्वकाकोलूकादयः खगाः ॥ इति
श्रीभागवतम् ॥ गवादय उष्ट्रान्ता द्वि
शफा द्विखुरा नव । खरादयश्चमर्य्यन्ता
एकशफाः षट् । श्वादयो गोधान्ताः
पञ्चनखा द्वश । एते भूचराः सप्तविंश
तिः । मकरादयो जलचराः कङ्कादयः
खगाः अभूचरत्वेनैकीकृत्य गणी
ताः । एवमष्टाविंशति भेदान् वदन्ति
। अन्येषामपि तिर्य्यक्प्राणिनां यथाय
थमेतेष्वन्तर्भावः । इति श्रीधरस्वा-
मिनः ॥

तिर्य्यगुड्डीनम् । न । पक्षिणस्तिर्य्यग्गम-
मने ॥

तिर्य्यग्यानः । पुं । कर्कटे । कुलीरे ॥

तिर्य्यङ्मुखः । पुं । नक्षत्रविशेषेषु ॥ अश्वि-
नी रेवती हस्ताचित्रे स्वातिपुनर्वसू
। ज्येष्ठाम्रगा नुराधाश्च नव तिर्य्यङ्मु

खाः स्मृताः ॥

तिर्य्यक् । अ । वक्रे । साचि ॥ तिरश्चा-
र्थे ॥ तिरोर्थे ॥

तिर्य्यङ् । त्रि । विहङ्गमे ॥ पक्षौ ॥
वक्रगामिनि ॥ तिर्य्यगञ्चति । तिरस
स्तिर्य्यलोप इति तिरिः ॥ स्त्रियां ति
रश्ची ॥

तिर्य्यक् । पुं । पक्षौ ॥ खगादौ ॥

तिलः । पुं । स्वनामप्रसिद्धे होमधान्ये
। पापघ्ने । पितृतर्पणे ॥ तिलः कृष्णः
सितो रक्तः सवर्णान्यस्तिलः स्मृतः
॥ तिलो रसे कटुस्तिक्तो मधुरस्तु
वरो गुरुः । विपाके कटुकः स्वादुः-
स्निग्धोष्णः कफपित्तकृत् ॥ बल्यः के
श्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणेहि-
तः । दन्त्योऽल्पमूत्रकृद् ग्राही वात
घ्नोऽग्निमतिप्रदः ॥ कृष्णः श्रेष्ठतम-
स्तेषु शुक्लो मध्यमः सितः । अन्य
हीनतराः प्रोक्तास्तज्ज्ञै रक्तादय-
मतः ॥ तिलस्य फलम् तिलः । अ
वयवे च प्राणीत्यण् । तस्य फलपाके
तिलुप युक्तवद्भावः ॥ तिलकालके ॥

तिलकः । पुं । पुष्पवृक्षविशेषे । चुरके
। क्षुरपुष्प्याम् । छिन्नरुहे । सुत-
जीवे । वासन्तसुन्दरे ॥ तिलकः क
टुकः पाके रसे चोष्णो रसायनः । क
फकुष्ठकृमीन् वस्तिमुखदन्तगदान्-

हरेत् ॥ तिलति । तिलस्नेहने । कु
न् शिल्पिसंज्ञयोः । तिलस्नेति वा ।
कन् ॥ तेलति । तिलगतौ वा । इ-
गुपधेति कः * स्वार्थे कन् वा ॥ अश्व
विशेषे ॥ रोगविशेषे ॥ तिलकालके
॥ ध्रुवकप्रभेदे ॥ यथा । पञ्चविंशति
वर्णाङ्घ्रिस्तिलको ध्रुवको भवेत् । इ
ष्टस्त्वत्पुटे तालेरसेवीरेऽद्भुते
पिबेति ॥ मरुवके ॥ न । सौवर्चले ॥
क्लोम्नि ॥ रुचके । मातुलुङ्गे ॥ पुं ।
न । स्वनामाप्रसिद्धे विशेषके । चन्द
नादिना ललाटादिद्वादशाङ्गेषु कृते
चिह्नविशेषे । तमालपत्रके ॥ शिवा
गमे दीक्षितैस्तु धार्यं तिर्यक्त्रिपुण्ड्रक
म् । विष्णवागमे दीक्षितस्तु ऊर्द्ध्वपु
ण्ड्रं विधारयेत् ॥ ऊर्द्ध्वपुण्ड्रं द्विजः कु
र्यात् क्षत्रियाणां तथैव च । वैश्यानां
तु तथा विप्र शूद्रादेर्मण्डलाकृतम्-
॥ अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये ऽन्ति-
जनाधमाः । तेषां ललाटे धिक्कृतं-
शुनःपादो न संशयः ॥ दृष्ट्वा भाले-
द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् ।
कार्य्यः कृष्णस्मृतिं कृत्वा वक्त्रेणाच्छाद
येन्मुखम् ॥ ललाटे दक्षिणे ब्रह्मा व
सेद्वामे महेश्वरः । मध्ये विष्णुर्वसे
न्नित्यं तस्मान् मध्यं न लेपयेत् ॥ *
॥ काम्यं नैमित्तिकं नित्यं यत्किञ्चि
त्कर्म नारद । वर्णाश्रमाणां तत्ता-
स्ति स्नानान्ते तिलकं विना ॥ त्रि ।
प्रधाने ॥

तिलकटम् । न । तिलानां रजसि ॥ अ
लाबूतिलोमाभङ्गाभ्यो रजस्युपसङ्-
ख्यानमिति कटच् ॥

तिलकल्कः । पुं । पिण्याके । खल इति
भाषा ॥

तिलका । स्त्री । हारप्रभेदे ॥ गायत्री
छन्दोभेदे । सगणद्वितयं भवतीह य
दा । रसवर्णपदा तिलकेति तदा ॥ य
था । वनमालिकया सकलालिकया
। पुनरेति कथं मम दृष्टिपथम् ॥

तिलकालकः । पुं । गात्रस्थतिले ॥ ति
लवकालकः ॥ रोगविशेषे । कृष्णा
नि तिलमात्राणि नीरुजानि समानि
च । वातपित्तकफोद्रेकात् तान्विद्या
त् तिलकालकान् ॥

तिलकाश्रयः । पुं । ललाटे ॥

तिलकिट्टम् । न । पिण्याके । खल इ
ति खली इति च भाषा ॥

तिलकी । स्त्री । सतिलके । तिलकयु
क्ते ॥ शिखी तिलकी कर्म कुर्य्यादिति
स्मृतिः ॥

तिलचित्रपत्रकः । पुं । तैलकन्दे ॥

तिलचूर्णम् । न । चूर्णीकृततिलेषु ।
तिलकल्के । पलले । तिलकुट इति

भाषा ॥

तिलतण्डुलकम्‌ । न । आलिङ्गने ॥ तिलमिश्रिततण्डुलेषु ॥

तिलतैलम्‌ । न । तिलानां स्नेहे ॥ स्नेहे तैलच्‌ ॥ पथ्याख्यगुणाँ स्तैले ॥

तिलधेनुः । स्त्री । दानाय तिलनिर्मितायां धेनौ ॥

तिलपर्णः । पुं । श्रीवेष्टे ॥ न । चन्दने ॥ तिलतरुपर्णे ॥

तिलपर्णिका । स्त्री । रक्तचन्दने ॥

तिलपर्णी । स्त्री । रक्तचन्दने ॥ श्रीवासे ॥ सिल्हके ॥ मलयजे ॥ इति हेमचन्द्रः ॥ तिलस्येवपर्णान्यस्याः । पाककर्णेतिङीष्‌ ॥ यद्वा । तिलपर्णीनदी आकरोऽस्याः ॥

तिलपिञ्जः । पुं । निष्फलतिलवृक्षे । तिलपेजे ॥ निष्फलस्तिलः । तिलान्निष्फलात्‌पिञ्जपेजौ ॥

तिलपेजः । पुं । तिलपिञ्जे ॥ निष्फलस्तिलः । पेजः ॥

तिलमयूरः । पुं । मयूरविशेषे । गुरुवाटके ॥

तिलरसः । पुं । } तिलतैले ॥
तिलस्नेहः । पुं । }

तिलाकल्कजः । पुं । तैलकल्के ॥

तिलापत्या । स्त्री । कृष्णजीरके ॥

तिलित्सः । पुं । सर्पविशेषे । गोनसे ॥

तिलगतौभ्वादिः । तिलस्नेहने तुदादिः । तेलनम्‌ तिल्‌ । सं० क्विप्‌ । तिलमेति । इण्० । क्विप्‌ तुक्‌ । तिलित्‌ तिलितं स्यति । षोन्तकर्मणि । कः ॥ यद्वा । तेलनम्‌ तिलिः । कृष्यादित्वादिक्‌ । तिलिं त्सरति । त्सरच्छद्मगतौ । अन्येभ्योपीतिडः ॥

तिलोत्तमा । स्त्री । स्वर्वेश्यायाम्‌ ॥ अस्याः नामकारणं महाभारते । तिलंतिलं समानीय रत्नानां यद्विनिर्मिता । तिलोत्तमेति तत्‌ तस्या नामचक्रे पितामहः ॥

तिलौदनम्‌ । न । कृशरे ॥

तिल्यम्‌ । न । तैलीने । तिलक्षेत्रे ॥ तिलानाम्भवनङ्क्षेत्रम्‌ । विभाषा तिलमाषोमाभङ्गाणुभ्य इतिपक्षेयत्‌ ॥ तिलेभ्योहितं वा । खलयवमाषतिल वृषब्रह्मणश्चेति यत्‌ ॥

तिल्वः । पुं । लोध्रे ॥ तिलत्यनेनाङ्गम्‌ । तिलस्नेहने । उल्वादयश्चेतिसाधुः ॥ श्वेतरक्तलोध्रयोः ॥

तिल्वकः । पुं । लोध्रे ॥ स्वार्थे कः ॥

तिष्ठद्गु । अ । दोहनकाले ॥ तिष्ठन्तिगावो यस्मिन्‌ काले । तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावेनिपातनात्कृत्वादेशः प्रथमासमानाधिकरणे मपादेशस्या सम्भवात्‌ ॥

तिष्यः । पुं । पुष्यनक्षत्रे ॥ तुष्यन्त्य ऽस्मिन् । तुष । कृर्दतिष्येतिनिपातन सकारप् उपधायाश्च ॥ त्वेषति वा । त्विषदीप्तौ । अघ्न्यादित्वात् यक् ॥ कलियुगे ॥ यथा । सत्संप्रदायप्रवनाय तिष्ये शिष्यैश्चतुर्भिः सहयोवतीर्णः । उक्तो वृहत् सङ्गमतन्त्रराजे श्रीशङ्कराचार्य्यगुरुं तमीडेइति ॥ त्रि । तिष्ये जाते ॥ अणोलुक् ॥

तिष्यकः । पुं । पौषमासे ॥

तिष्यपुष्या । स्त्री । आमलक्याम् ॥

तिष्यफला । स्त्री । धात्र्याम् । आमलक्याम् ॥ नित्यमामलकैर्लक्ष्मीरिति श्रवणात् तिष्यं मङ्गल्यं फलमस्याः । अजादित्वात् टाप् ॥ तिष्ये कलियुगे फलमस्याः सेवयेति वा ॥

तिष्या । स्त्री । आमलक्याम् ॥

तीक्ष्णः । पुं । यवाग्रजे । यवक्षारे ॥ श्वेतकुशे ॥ कुन्दुरुके ॥ न । सामुद्रलवणे ॥ विषे ॥ लौहे ॥ आजौ । युद्धे ॥ मरणे ॥ खरे । तिग्मे ॥ चव्यके ॥ शस्त्रे ॥ शीघ्रे ॥ मुष्कके ॥ नक्षत्रविशेषाणां गणे ॥ शक्राहिमित्रमूलाश्च मन्त्राह तीक्ष्णा दारुणा ॥ त्रि । तिग्मे ॥ उष्णे ॥ आत्मत्यागिनि ॥ निरालसे ॥ सुपुत्रौ ॥ योगिनि ॥ तेजयति । तेज्यते अनेनवा । तिज० । तिजेर्दीर्घश्चेति क्स्नप्रत्ययो दीर्घश्च ॥ क्रूरहृदये ॥

तीक्ष्णकः । पुं । गौरसर्षपे ॥ मुष्कके ॥

तीक्ष्णकण्टकः । पुं । कितवद्रुमे । धत्तूरे ॥ इङ्गुद्याम् ॥ करीरे ॥ वर्बूरे ॥

तीक्ष्णकण्टका । स्त्री । कन्थारीवृक्षे ॥

तीक्ष्णकन्दः । पुं । पलाण्डौ ॥

तीक्ष्णकर्म्मा । त्रि । तीक्ष्णचेष्टे । आयःशूलिके ॥

तीक्ष्णकल्कः । पुं । तुम्बुरुवृक्षे ॥

तीक्ष्णकान्ता । स्त्री । मङ्गलचण्डिकाप्रभेदे ॥

तीक्ष्णगन्धः । पुं । शोभाञ्जने ॥ कुन्दुरौ ॥ रक्ततुलस्याम् ॥ तीक्ष्णोगन्धो ऽस्य ॥ गन्धके ॥

तीक्ष्णगन्धकः । पुं । शोभाञ्जने ॥ तीक्ष्णोगन्धो ऽस्य । शेषाद्विभाषेति-कप् ॥

तीक्ष्णगन्धा । स्त्री । वचायाम् ॥ राजिकायाम् ॥ श्वेतवचायाम् ॥ कन्थार्याम् ॥ सूक्ष्मैलायाम् ॥ जीवन्त्याम् ॥ तीक्ष्णोगन्धोयस्याः ॥

तीक्ष्णतण्डुला । स्त्री । पिप्पल्याम् ॥ तीक्ष्णास्तण्डुला यस्याः ॥

तीक्ष्णतैलम् । न । सुरायाम् ॥ स्नुहीक्षीरे ॥ सर्जरसे ॥

तीक्ष्णत्वम् । न । आशुकारित्वे । तीक्ष्णतायाम् ॥ भावे त्वः ॥

तीक्ष्णदंष्ट्रः । व्याघ्रे ॥ भैरवे ॥ त्रि । तीक्ष्णदंष्ट्रावति ॥

तीक्ष्णपत्रः । पुं । तुम्बुरुवृक्षे ॥

तीक्ष्णपुष्पम् । न । लवङ्गे ॥

तीक्ष्णपुष्पा । स्त्री । केतक्याम् ॥

तीक्ष्णफलः । पुं । तुम्बुरुवृक्षे ॥

तीक्ष्णमूलः । पुं । कुलञ्जने ॥ शिग्रौ ॥

तीक्ष्णरसः । पुं । यवक्षारे ॥ तीक्ष्णो रसोऽस्य ॥

तीक्ष्णशूकः । पुं । यवे ॥ तीक्ष्णः शूकोऽस्य ॥

तीक्ष्णसारा । स्त्री । शिंशपायाम् ॥

तीक्ष्णा । स्त्री । वचायाम् ॥ सर्पकङ्कालिकौषधौ ॥ कपिकच्छ्वाम् ॥ महाज्योतिष्मत्याम् । अत्यम्लपर्ण्याम् ॥

तीक्ष्णायसम् । न । तीखाइतिगौड प्रसिद्धे लोहविशेषे । शस्त्रायसे ॥

तीरः । पुं । त्रपुणि । सीसके ॥ न । कूले । रोधसि ॥ गङ्गातीरे ॥ यथा । सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते- ॥ भाद्रकृष्णचतुर्दश्यां यावदाक्रमते जलम् । तावद्गर्भं विजानीयात् तदूर्द्ध्वं तीरमुच्यते ॥ शस्त्रविशेषे । सायके ॥ तीरयति । पारतीरकर्म्म समाप्तौ । पचाद्यच् ॥

तीरभुक्तिः । पुं । तिरहुत इति प्रसिद्धे विदेहदेशे ॥ तीरे भुक्तिरस्य ॥

तीरितः । त्रि । शास्त्रव्यवस्थानिर्णीते ॥ न । कर्म्मणः समाप्तौ ॥ तीर० । भावे क्तः ॥

तीर्णः । त्रि । अभिभूते ॥ प्लुते ॥ उत्तीर्णे ॥ यथा । तीर्णाः पूर्णाः कति न सरितो लङ्घिताः के न शैलाः नाक्रान्ता वा कति वनभुवः क्रूरसत्त्वारघोराः । पापैरेतैः किमिव दुरितं कारितो नास्मि कष्टं यद्दृष्टास्ते धनमदमसीम्लानवक्त्रादुरीशाः ॥ एतैः परिग्रहैः ॥ तरतेः कर्त्तरि क्तः ॥

तीर्णपदी । स्त्री । तालमूल्याम् ॥

तीर्णा । स्त्री । प्रतिष्ठाख्यवृत्तविशेषे ॥ यथा । यस्मिन् वृत्ते कर्णः कर्णः । वेदैर्वर्णैः सा स्यात् तीर्णा ॥ यथा । वंशीवादैर्दत्तोन्मादैः । हृत्त्वा चेतः कामो यातः ॥ अस्याः कन्येत्यपि संज्ञा । मगौ चेत् कन्येति लक्षणात् ॥

तीर्थम् । न । शास्त्रे ॥ शास्त्रानुक्तविषये ॥ अध्वरे । यज्ञे ॥ क्षेत्रे । पुण्यक्षेत्रे ॥ उपाये ॥ नारीरजसि ॥ अवतारे । जलावतारे ॥ ऋषिजुष्टाम्बुनि ॥ पात्रे ॥ विद्यायाः पात्रे ॥ यथा । ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः । विद्यया विद्यां यः प्राह ता-

नि तीर्थानि षण्मुमेति विश्वःप्रवचनम् ॥ उपाध्याये ॥ गुरौ ॥ मन्त्रिणि ॥ इति मेदिनिकरः ॥ सचिवे ॥ इति हेमचन्द्रः ॥ योनौ ॥ दर्शने ॥ निपाने । नद्यवतारप्रदेशे । घट्टे ॥ उपङ्कुपजलाशये ॥ मखे ॥ विप्रे ॥ तीर्य्यतेऽनेन वा तरन्त्यनेन वा । तॄ॰ । पातृ तुदिवचिरिचिसिचिभ्यस्थक् ॥ हस्तगततीर्थानि यथा । अङ्गुल्यग्रे दैवं तीर्थं स्वल्पाङ्गुल्यो र्मूले कायम् । मध्येङ्गुष्ठाङ्गुल्योः पैत्रं मूले त्वङ्गुष्ठस्य ब्राह्मम् ॥ तीर्थं त्रिविधम् । जङ्गममानसस्थावरभेदात् । तथाहि । ब्राह्मणा जङ्गमं तीर्थं निर्म्मलं सार्वकामिकम् । येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनो जनाः ॥ * ॥ अगस्त्य उवाच । शृणु तीर्थानि गदतो मानसानि ममानघे । येषु सम्यङ् नरः स्नात्वा प्रयाति परमाङ्गतिम् ॥ सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं सर्वत्रार्जवमेव च ॥ दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्यं परं तीर्थं तीर्थञ्च प्रियवादिता ॥ ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यं तीर्थं मुदाहृतम् । तीर्थानामपि तत् तीर्थं विशुद्धिर्मनसः परा ॥ एतत्ते कथितं देवि मानसं ती-

र्थं लक्षणम् ॥ * ॥ भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु ॥ यथा शरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृताः । तथा पृथिव्या उद्देशाः केचित् पुण्यतमाः स्मृताः ॥ प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा । परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥ तस्माद्भौमेषु तीर्थेषु मानसेषु च निश्चयः । उभयोरपि यः स्नाति स याति परमां गतिम् ॥ * ॥ तीर्थागमने दोषो यथा । अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च । अदत्त्वा काञ्चनं गाञ्च दरिद्रो नाम जायते ॥ * ॥ गमने फलं यथा । अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः । न तत्फलमवाप्नोति तीर्थाभिगमने न यत् ॥ तीर्थान्यनुस्मरन् धीरः श्रद्दधानः समाहितः । कृतपापो विशुद्ध्येत किं पुनः शुद्धकर्मकृत् ॥ तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते । न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति ॥ * ॥ तीर्थफलभागिनो यथा । यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥ प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् । अहङ्कारविमुक्तश्च स ती॰ ॥

अदाम्भिको निरारम्भो ह्यल्पाहारो जितेन्द्रियः । विमुक्तः सर्वसङ्गैर्यः स तीर्थ० ॥ अकोपनोऽमलमतिः सत्यवादी दृढव्रतः । आत्मोपमश्च भूतेषु स तीर्थ० ॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः । हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥ इति काशीखण्डम् ॥ कृते तु पुष्करं तीर्थं त्रेतायां नैमिषं तथा । द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥

तीर्थकरः । पुं । जिने ॥ करोतीति करः । तीर्थस्य करः ॥ कपिलकणभुगादिशास्त्राकारेषु ॥

तीर्थकृत् । पुं ।
तीर्थङ्करः । पुं । } जिने ॥

तीर्थराजिः । स्त्री ।
तीर्थराजी । स्त्री । } अविमुक्ते । काश्याम् ॥

तीर्थवाकः । पुं । केशे ॥ इति हेमचन्द्रः ॥

तीर्थसेवी । पुं । वकपक्षिणि ॥ इति राजनिर्घण्टः ॥ त्रि । तीर्थवासिनि ॥

तीवरः । पुं । अम्बुधौ ॥ व्याधे ॥ तेओर इति गौडप्रसिद्धे वर्णसङ्करजातिविशेषे ॥ स तु राजपुत्रस्त्रियां क्षत्त्रियाज्जात इति ब्रह्मवैवर्त्तपुराणम् ॥ शूद्रीकभार्यायां पुण्ड्रकाज्जात इति पराशरपद्धतिः ॥ तरति तीर्य्यतेऽत्र । तॄ० । छित्वरच्छत्वरेत्यादिना ष्वरजन्तो निपातितः ॥

तीवरी । स्त्री । तीवरस्त्रियाम् ॥ षित्त्वात् ङीष् ॥

तीव्रः । पुं । शिवे ॥ न । लोहे ॥ तीरे ॥ त्रपुणि । सीसके ॥ तीक्ष्णे ॥ त्रि । दुःसहे ॥ अत्युष्णे ॥ नितान्ते । अतिशये ॥ अद्रव्यवर्त्तमानः क्लीवे । द्रव्यगामितु वाच्यलिङ्गः । यथा । तीव्रं भुङ्क्ते । तीव्रो नरः । कटौ । कटुरसादौ ॥ तीक्ष्णे ॥ तीवति । तीव स्थौल्ये । बाहुलकात् रक् । यद्वा । तेजति । तिज निशाने । बाहुलकाद् रन् दीर्घो जस्य च वः ॥

तीव्रकण्ठः । पुं । शूरणे ॥

तीव्रगन्धा । स्त्री । यवान्याम् ॥

तीव्रज्वाला । स्त्री । धातक्याम् ॥

तीव्रवन्धः । पुं । तामसवृत्तौ ॥

तीव्रवेदना । स्त्री । यातनायाम् ॥ तीव्राचासौ वेदनाच ॥

तीव्रा । स्त्री । कटुरोहिण्याम् ॥ राजिकायाम् ॥ गण्डदूर्वायाम् ॥ नदीविशेषे ॥ महाज्योतिष्मत्याम् ॥ तरदीवृक्षे ॥ तुलस्याम् ॥

तु । अ । पादपूरणे ॥ भेदे ॥ समुच्चये ॥ अवधारणे ॥ पक्षान्तरे ॥ नियोगे ॥ प्रशंसायाम् ॥ विनिग्रहे ॥ उक्ताशङ्कानिरस्यर्थे ॥ तुदति । तुद

व्यथने । मितद्र्वादित्वात् डुः ॥
तुकाक्षीरी । स्त्री । वंशरोचनायाम् ॥
तुगा । स्त्री । वंशरोचनायाम् ॥
तुगाक्षीरी । स्त्री । वंशरोचनायाम् ॥
तद्भेदेपीतिकश्चित् ॥
तुङ्गः । पुं । पुन्नागद्रुमे ॥ पर्वते ॥ बुध
ग्रहे ॥ नारिकेले ॥ गण्डके ॥ योग
विशेषे ॥ यथा । अजवृषभमृगाङ्ग-
नाकुलीरा झषवणिजौच दिवाकरा
दितुङ्गाः । दशशिखिमनुयुक् ति
थीन्द्रियांशै स्त्रिनवकविंशतिभिश्च ते
स्तनीचाः ॥ अपिच । सूर्याच्चुचान्
क्रियवृषमृगस्त्रीकुलीरान्त्ययूके दि
ग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशाँ
श्च विंशान् । अंशानेतान् वदति य
वन श्चान्त्यतुङ्गान् सुतुङ्गांस्तानेवां-
शान् मदनभवनेष्वाहु नीचान् सु
नीचानिति ॥ न । किञ्जल्के ॥ त्रि
। उन्नते ॥ उग्रे ॥ प्रधाने ॥ तुञ्ज्यते ।
तुजिहिंसायाम् । घञ् । न्यङ्क्वादिः ॥
तुङ्गकः । पुं । पुन्नागवृक्षे ॥
तुङ्गकारण्यम् । न । तीर्थविशेषे ॥
तुङ्गभद्रः । पुं । मदोत्कटे ॥
तुङ्गभद्रा । स्त्री । दक्षिणदेश प्रसिद्धे स
रिद्विशेषे ॥ अस्याजलगुणा यथा । त
ज्जलं निर्मलं स्निग्धं स्वादुप्रोक्तं तथा
गुरु । कण्डुपित्तास्रदं प्रायः सात्म्यं
मेधाकरं मतमिति ॥
तुङ्गशेखरः । पुं । पर्वते ॥
तुङ्गा । स्त्री । वंशलोचनायाम् ॥ शम्या
म् ॥ अनुष्टुप्छन्दोभेदे ॥ द्विगुणम
गणकर्णैः सुललितवसुवर्णैः । रसि-
कविदितरङ्गा भवतिकिलतुङ्गा ॥
यथा । विहरसि ममचित्ते मदनवि
शिखकृत्ते । न नयनविषयस्त्वं व्रजसि
तदपिमेत्वम् ॥
तुङ्गी । पुं । उच्चस्थानस्थिते ग्रहे ॥
तुङ्गिनी । स्त्री । महाशतावर्याम् ॥
तुङ्गी । स्त्री । हरिद्रायाम् ॥ शाकभेदे
॥ बर्बरायाम् ॥ तुञ्जति । तुजि० ।
अच् । न्यङ्क्वादिः । गौरादि ङीष्
॥ निशायाम् ॥
तुङ्गीपतिः । पुं । चन्द्रे ॥ इ० त्रि० ॥
तुङ्गीशः । पुं । शिवे ॥ कृष्णे ॥ सूर्ये ॥
तुच्छः । त्रि । शून्ये ॥ अल्पे ॥ हीने ॥
न । पुलाकजे । भुसइतिभूसा इतिच
भाषा ॥ तोदनं तुद् । संपदादित्वा
द्भावे क्विप् । तुदाव्यथया छ्यति ।
छोछेदने । मूलविभुजादित्वात् कः
॥ तुदं श्यति वा । आतइतिकः ॥
तुच्छद्रुः । पुं । एरण्डवृक्षे ॥
तुच्छधान्यकम् । न । पुलाके ॥
तुच्छ्या । स्त्री । तुत्थायाम् । नीलीवृक्षे ॥
तुञ्जः । पुं । दैत्ये ॥ तुञ्जते । तुजिहिं

सायाम् । पचाद्यच् ॥

तुण्डेट् । पुं । दैत्येभ्योपिशक्ते ॥ ईश० । क्विप् । तुण्डेभ्यः ईट् ॥

तुण्डुमः । पुं । रन्ध्रबभ्रौ । उन्दुरौ ॥ इतित्रिकाण्डशेषः ॥

तुण्डिः । स्त्री । तोडने ॥ तोडति । तुड तोडने । सर्वधातुभ्य इन् ॥

तुणिः । पुं । नन्दिवृक्षे । तूणी इतिभाषा ॥ तूणयति । तूणसङ्कोचे । अच इः । पृषोदरादिः ॥ तूणीवृक्षः कटुः पाके कषायो मधुरो लघुः । तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित् ॥

तुण्डम् । न । आनने । वक्त्रे ॥ तुण्डति । तुडि तोडने । पचाद्यच् ॥

तुण्डकेरिका । स्त्री । कार्पास्याम् ॥

तुण्डकेरी । स्त्री । विम्बिकायाम् । कुन्दुरु इतिकंदूरी इतिचख्यातौषधौ । तेलाकुचा इतिगौडभाषा ॥ प्रशस्तं तुण्डम् । प्रशंसायां कन् । तुण्डकमीर्त्ते । कर्मण्यण् ॥

तुण्डिः । पुं । मुखे ॥ चञ्चौ ॥ तुन्दकूप्याम् ॥ स्त्री । नाभौ ॥ तुण्डेरिन् ॥

तुण्डिः । स्त्री । विम्बफलायाम् ॥ वृद्धायां नाभौ । टूंडीइतिसूंडी इतिचभाषा ॥ तुण्डते । तुडि० । सर्वधातुभ्य इन् ॥

तुण्डिका । स्त्री । विम्बिकायाम् ॥ नाभौ । तुन्दकूप्याम् । टूंडी इतिसूंडी इतिचभाषा ॥

तुण्डिकेरी । स्त्री । कर्पास्याम् । समुद्रान्तायाम् । कपास इतिभाषा ॥ विम्बिकायाम् ॥ तुण्डं चञ्चुरस्त्यस्याः । अतइतिठन् । तुण्डिकान् शरीराणि ईरयति । ईर० । कर्मण्यण् ॥

तुण्डिकेशी । स्त्री । विम्बिकायाम् ॥

तुण्डिभः । त्रि । वृद्धनाभौ ॥ अतिशयिता तुण्डि वृद्धानाभिरस्य । तुन्दिवलिवटेर्भ इतिसूत्रे मूर्द्धन्योपधोयंतुण्डिरिति माधवः ॥

तुण्डिलः । त्रि । वृद्धनाभौ ॥ तुण्ड्यते । तुडि० । सर्वधातुभ्य इन् । ततः सिध्मादित्वाल्लच् ॥ मुखरे ॥ तुण्ड्यते । तुडि० । सलिकल्यनीति इलच् ॥

तुत्थः । पुं । अग्नौ ॥ न । अञ्जनभेदे । मयूरके । शिखिग्रीवे ॥ तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेणतद्भवेत् । किञ्चित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणञ्च तत् ॥ तुत्थकं कटुकं क्षारं कषायं वामकं लघु । लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ॥ विषाश्मकुष्ठकण्डूघ्नं खर्परञ्चापि तद्गुणम् । अस्यशोधनम् । विष्ठया मर्द्दयेत्तुत्थं मार्जारककपोतयोः । दशांशं टङ्कणं दत्त्वा पचेल्लघुपुटे ततः ॥ पुटेद्

भा पुटं चोद्रे देयं तुत्थविशुद्धये ॥

तुथति । तुद्व्यथने । पाहृतुदीति थक् ॥ तुत्थयतिवा । तुत्थ आवरणे । अच् ॥ कर्परीतुत्थे ॥

तुत्थकम् । न । तुत्थे ॥

तुत्था । स्त्री । नील्याम् ॥ सूक्ष्मैला-याम् ॥ महानील्याम् ॥

तुत्थाञ्जनम् । न । अञ्जनप्रभेदे । शि-खिग्रीवे । वितुन्नके ॥ तुत्थयति तु-त्थरतेवा । तुत्थ० । अच् एरञ्चा । तुत्थञ्च तदञ्जनञ्च ॥

तुन्तुभः । पुं । सर्षपे ॥ तुदति । तुद० । वाहुलकादुभच् । पृषोदरादिः ॥

तुन्दम् । न । उदरे । कुक्षौ ॥ तुदति । तुद० । इगुपधेतिकः । आच्छीन-द्योरित्यत्र नुमिति योगविभागान्नुम् ॥ यद्वा । तर्णोत्यकम् । तृणु अदने । अब्दादयश्चेतिसाधु ॥ त्रि । तुन्दिले ॥ तुन्दमस्त्यस्य । अर्शआदिभ्योऽच् ॥

तुन्दकूपिका । स्त्री । } नाभौ ॥
तुन्दकूपी । स्त्री । }

तुन्दपरिमृजः । त्रि । अलसे । मन्दे ॥ तुन्दमुदरं परिमार्ष्टि । मृजूशुद्धौ । तुन्दशोकयोः परिमृजापनुदोरि-तिकः ॥

तुन्दवान् । त्रि । तुन्दिले ॥ अतिशयितं तुन्दमुदरमस्य । तुन्दादिभ्य इलच्चेति

चान्मतुप् ॥

तुन्दिः । पुं । गन्धर्वविशेषे ॥ न । उदरे ॥ स्त्री । नाभौ ॥

तुन्दिकः । त्रि । बृहत्कुक्षौ । तुन्दिले ॥ अ-तिशयितंतुन्दमुदरमस्य । तुन्दादिभ्य इलच्चेतिचकाराट्ठन् ॥

तुन्दिका । स्त्री । नाभौ ॥

तुन्दी । त्रि । पीनकुक्षौ । पिचण्डिले । तुन्दिले ॥ अतिशयितं तुन्दमस्त्य-स्य । तुन्दादिभ्य इलच्चेति चकारा-दिनिः ॥

तुन्दिभः । त्रि । तुण्डिभे ॥ तुन्दिर्वृद्धा नाभिरस्त्यस्य । तुन्दिवलिवटेर्भः ॥

तुन्दिलः । त्रि । दृहत्कुक्षौ । पिचिण्डि-ले ॥ अतिशयितं तुन्दमस्त्यस्य । तु-न्दादिभ्य इलच्चेति इलच् ॥

तुन्दिलफला । स्त्री । त्रपुष्याम् ॥

तुन्नः । पुं । नन्दीवृक्षे ॥ तुद्यते । तुद० । क्तः ॥ त्रि । छिन्ने । द्विधाकृते ॥ व्य-थिते ॥

तुन्नकः । पुं । तुन्ने ॥

तुन्नवत् । त्रि । बहुच्छिद्रे ॥

तुन्नवायः । पुं । सौचिके । दर्जी इति भाषाप्रसिद्धे ॥ तुन्नंच्छिन्नं वयति । वेञ्तन्तुसन्ताने । ह्वावामश्चेत्यण् ॥

तुभः । पुं । छागे ॥ तोभते । तुभहिं-सायाम् । इगुपधेतिकः ॥

तुमुलः । पुं । कलिद्रुमे ॥ व्याकुले त्रि ॥ न । रणसङ्कुले ॥ तवनम् तौति दा । तुःसौचः । बाहुलकान्मुलक् ॥ सङ्कीर्णे । सङ्कुले ॥

तुम्बः । पुं । तुम्ब्याम् । अलाब्वाम् ॥ तुम्बति रुचिम् । तुबि अर्द्दने । अच् ॥

तुम्बकः । पुं । तुम्बे ॥ स्वार्थे कः ॥ राजालाबौ ॥

तुम्बा । स्त्री । वृहत्फलायां तुम्ब्याम् ॥ वर्त्तुलालाब्वाम् ॥ गवि ॥

तुम्बिः । स्त्री । अलाब्वाम् ॥ तुम्बति रुचिम् । तुबि० । सर्व्वध तुभ्य इन् ॥

तुम्बिका । स्त्री । अलाब्वाम् ॥ कटुतुम्ब्याम् ॥

तुम्बिनी । स्त्री । कटुतुम्ब्याम् ॥

तुम्बी । स्त्री । अलाब्वाम् । तूंबी इति भाषा ॥ तुम्बति रुचिम् । तुबि अर्द्दने । अच् । गौ० ङीष् ॥ इत्यन्ये तु कृदिकारादक्तिन इति ङीष्वा ॥ कुलिकवृन्ते इति रत्नमाला ॥

तुम्बीपुष्पम् । न । अलाबूपुष्पे । लता स्कुजे ॥

तुम्बुकम् । न । अलाबूफले । तूंबा इति भाषा ॥ पुं । अलाब्वाम् ॥

तुम्बुरी । स्त्री । शुन्याम् । कुक्कुर्याम् ॥ धान्याके ॥ इति मेदिनी ॥

तुम्बुरुः । पुं । अर्हदुपासकविशेषे ॥ गन्धर्व्वप्रभेदे । स्वर्गगायके ॥ वृक्षविशेषे । शूलघ्ने । तीक्ष्णफले ॥ लघ्वादि (।ऽ) त्रिकले ॥ न । कुस्तुम्बुरुणि ॥ तिन्दुकीफले ॥ तुम्बुरु प्रथितं तिक्तं कटु पाकेऽपि तत्कटु । रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च ॥ वातश्लेष्माक्षिकर्णौष्ठशिरोरुग्गुरुजन्तुकृमीन् । कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥

तुरम् । न । तूर्णे । शीघ्रे ॥ वेगे ॥ त्रि । तद्वति ॥ तुतोर्त्ति । तुरत्वरणे । कः ॥

तुरगः । पुं । चित्ते ॥ वाजिनि ॥ तौरङ्गाम् । तुरत्वरणे । घञर्थे कः । बाहुलकाद् घञ्वा । संज्ञापूर्व्वकत्वान्नगुणः । तुरेण तुरया वा गच्छति । अन्येभ्योऽपीति डः ॥

तुरगगन्धा । स्त्री । अश्वगन्धायाम् ॥

तुरगब्रह्मचर्य्यकम् । न । अभावात् स्त्रीपरित्यागे ॥

तुरगलीलकः । पुं । तालप्रभेदे ॥ द्रुतद्वन्द्वं विरामान्तं लघुस्तुरगलीलके ॥

तुरगस्कन्धः । पुं । तुरगाणां समूहे ॥ नरकरितुरगाणां स्कन्धश्च ॥

तुरगी । त्रि । सादिनि । अश्वारोहे ॥

तुरगी । स्त्री अश्वगन्धायाम् ॥ वडवायाम् ॥

तुरङ्गः । पुं । अश्वे । घोटके ॥ चित्ते ॥ तुरेण गच्छति । गमेः सुपिवाच्य इति खच् । खच्चवाडित् । अरुर्द्विषदिति मुम् ॥ चतुष्कले (ऽ।) मध्यगुरोः संज्ञायाम् ॥

तुरङ्गकः । पुं । हस्तिघोषायाम् । घोषकाकृतौ ॥

तुरङ्गद्वेषिणी । स्त्री । महिष्याम् ॥

तुरङ्गप्रियः । पुं । यवे ॥

तुरङ्गमः । पुं । अश्वे ॥ तुरेण गच्छति । गम्लृ० । गमेरितिखच् । अरुर्द्विषदजन्तस्यमुम् ॥

तुरङ्गवक्त्रः । पुं । किन्नरे ॥ तुरङ्गस्येव वक्त्रमस्य ॥

तुरङ्गवदनः । पुं । किन्नरे । किम्पुरुषे ॥ तुरङ्गस्येव वदनमस्य ॥

तुरङ्गारिः । पुं । करवीरे ॥

तुरङ्गारोहः । त्रि । अश्वारोहे । सादिनि ॥ तुरङ्गमारोहति । वहेः कर्मण्यण् ॥

तुरङ्गिका । स्त्री । देवदालीलतायाम् ॥

तुरङ्गी । त्रि । अश्वारोहे ॥ मत्वर्थे इनिः ॥

तुरङ्गी । स्त्री । अश्वगन्धायाम् ॥ घोटिकाश्वे ॥ वडवायाम् ॥

तुरायणम् । न । यज्ञविशेषे ॥ असङ्गत्वे ॥ तुतोर्त्ति । तुरत्वरणे । कः । तुरस्यायनम् । पूर्वपदादितिणत्वम् । त्वरितस्थितिगमनमसङ्गं भवति ॥

तुराषाट्-ड् । पुं । आखण्डले । इन्द्रे ॥ तुतोर्त्ति । तुर० । इगुपधज्ञाप्रीकिरःकः । तुरं वेगवन्तं साहयति अभिभवति षहमर्षणे प्रसहनमभिभवइतिहस्तेः । ण्यन्तात् सहेःक्विप् । सहेःसाडःसइतिषत्वम् । अन्येषामपीतिपूर्वपदस्यदीर्घः । आकृतिगणोऽयम् ॥

तुरिः । स्त्री । तुर्याम् ॥ तुतोर्त्ति । तुर० । इन् ॥

तुरी । स्त्री । तन्तुवायस्य काष्ठनिर्मिते उपकरणविशेषे । तुल्याम् ॥ कृदिकारादितिङीष् ॥

तुरीयम् । न । ब्रह्मणि । सर्वाधारभूतेऽनुपहितचैतन्ये ॥ घटश्चासदवच्छिन्नाकाशयोर्जलाशय जलगतप्रतिबिम्बाकाशयोश्च आधारानुपहिताकाशवदनयो रज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितचैतन्यं तत् तुरीयमित्युच्यते । आधारश्चासौ अनुपहितश्चासौ आकाशश्च सतथा तद्वदितियावत् । यद्वाकाशस्य घमाश्रयत्वं जलाश्रयत्वं वा नास्ति तदनारम्भकत्वात् तथाप्यवकाशमन्तरेण तयोःस्थित्यनुपपत्तेस्त दाश्रय[illegible]

चैतन्यस्य तुरीयत्वं विश्वाद्यपेक्षया द्र-
ष्टव्यम् ॥ त्रि । चतुर्थे ॥ यथा तुरीयं
वाचो मनुष्या वदन्तीति । वाचस्तु
रीयत्वं पराद्यपेक्षया कुलगोरूप
देशात् ज्ञातव्यम् ॥ चतुर्णां पूरणः
चतुरश्छयतावाद्यक्षरलोपश्चेतिछः ॥

तुरीयवर्णः । पुं । शूद्रे ॥ तुरीयश्चासौ
वर्णश्च ॥

तुरुष्कः । पुं । गन्धद्रव्यविशेषे । धूमे ।
सिह्लके । पीतसारे । शिलारस इ
ति भाषा ॥ म्लेच्छजाति विशेषे
तुरुक इति भाषा ॥ देशविशेषे । तुर
कस्थान इतिभाषा ॥ श्रीवासे ॥ तु
तोर्त्ति । तुर० । बाहुलकादुस् गुणा
भावश्च । स्वार्थे कन् ॥ सरुष्कुश्च
इतिकश्चित् ॥

तुर्य्यः । त्रि । तुरीये । चतुर्थे ॥ चतुर्णां
पूरणः । चतुरश्छयतावितियत् आ
द्यक्षरलोपश्च ॥

तुर्वसुः । पुं । म्लेच्छानां राज्ञि । म्लेच्छाधा
रपरे । ययातिराजस्य पुत्रविशेषे ॥

तुलजापुरम् । न । दक्षिणदेशप्रसिद्धे
दुर्गास्थाने ॥

तुलसी । स्त्री । स्वनाम्ना प्रसिद्धायां
वैष्णव्याम् । वृन्दायाम् । पर्णासे ॥
तुलसी कटुका तिक्ता हृद्योष्णा
दाहपित्तकृत् । दीपनी कुष्ठकृच्छ्रा-
स्रपार्श्वरुक् कफवातजित् ॥ शुक्ला
कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्ति
ता ॥ तुलास्वसादृश्यम् स्यति ।
अस्तु क्षेपणे । कर्म्मण्यण् । ङीप् । श-
कन्ध्वादिः ॥ यस्या देव्यास्तुलाना
स्ति विश्वेषु च निखिलेषु च । तुलसी
तेन विख्याता इति देवीभागवतम् ॥ * ॥
यद्धर्म्मकर्म्म कुरुते मनुजः पृथिव्यां
नारायणप्रियतमां तुलसीं विना च ।
तत् सर्व्वमेव विफलं भवति द्विजेन्द्र
पद्मेक्षणो नहि तुष्यति देवदेवः
॥ * ॥ तुलसीकाष्ठनिर्म्माणमालां
गच्छन्ति ये नराः । पदे पदेऽश्वमेधानां
लभन्ते निश्चितं फलम् ॥ प्रभाते तु
लसीं दृष्ट्वा स्वर्णदानफलं लभेत् ।
मालतीं यूथिकां कुन्दं माधवीं के
तकीं तथेत्यादि ब्रह्मवैवर्त्तपुराणे
श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥

तुलसीद्वेषा । स्त्री । वर्वर्याम् । सुरसा
याम् ॥

तुला । स्त्री । सादृश्ये ॥ माने ॥ गृहा-
णां दारुबन्धाय पीठिकायाम् । उप
रिस्थाप्यदारुधारभूते स्तम्भाग्रपीठे
॥ पलशते ॥ भाण्डे ॥ सप्तमराशौ ।
वृके । धटे ॥ अस्य काचानचक्राश्चि
तैतद्राशिफलम् । वृषतुरङ्गजकाङ्ग-
विकृतो विजसुरार्च्चनहाननताः पु

मान् । शशिनि तौलिगते बहुदार भाग् त्रिभवसंस्थितचित्रितविक्रमः ॥ तुलालग्नजातस्यफलम् । तुलालग्ने पुमान्जातः सुधीः सत्कर्म्मतत्परः । विद्वान् सर्वकलाविज्ञो धनाढ्यो जन पूजितः ॥ तोल्यतेऽनयावा तोलनं वा । तुलउन्माने । भिदाद्यङ् । तुलोपमाभ्यामिति निर्देशात् गुणाभावः ॥ * ॥ परीक्षाविशेषे ॥ यथा हुताशः । ब्राह्मणस्यधटोदेयः क्षत्रियस्यहुताशनः । वैश्यस्य सलिलं देयं शूद्रस्यविषमेवतु ॥ साधारणः समस्तानांकोषःप्रोक्तो मनीषिभिः । विषवर्ज्जं ब्राह्मणस्य सर्वेषान्तुतुलास्मृता ॥

तुलाकोटिः । स्त्री । मानभेदे ॥ अर्वुदे ॥ नूपुरे ॥ तुलां तुलयावा कोटयति । कुटपरितापे । चु० । अच्इः ॥ तुलाकारंकोटिरग्रमस्यवा ॥

तुलाकोटी । स्त्री । तुलाकोटौ ॥

तुलाकोषः । पुं । तुलापरीक्षायाम् ॥

तुलाधरः । पुं । तुलाराशौ ॥ तुलागुणे ॥ त्रि । वाणिजके ॥ तुलायाः धरोधारकः ॥

तुलापुरुषदानम् । न । तुलादानइतिलोकप्रसिद्धे दाने । यथा । आदकुसर्वदा ...तुलापुरुषसंज्ञकमिति ॥ शौड

तुलापुरुष... षोडशमहादानान्तर्गतदानविशेषे ॥

तुलामानम् । न । स्वर्णादीनांपरिच्छेदार्थंक्रियमाणे । काँटा इतिभाषाप्रसिद्धे ॥

तुलाबीजम् । न । गुञ्जायाम् ॥

तुलिः । स्त्री । तुल्याम् ॥

तुलिका । स्त्री । खञ्जनिकायाम् ॥

तुलिकायन्त्रम् । न । ज्योतिर्विदांयन्त्रविशेषे ॥

तुलितः । त्रि । तुलया परिच्छिन्ने । तुलाइति तुलगया इतिचभाषा ॥ उपमिते ॥ समीकृते ॥ तुलयतेस्तुलकरोतेर्णयन्तात् कर्मणिक्तः ॥

तुलिनी । स्त्री ।
तुलिफला । स्त्री । } शाल्मलिद्रुमे ॥

तुली । स्त्री । तुर्य्याम् । तन्तुवायकाष्ठविशेषे ॥

तुल्यः । त्रि । सदृशे । समे । समाने ॥ तुलया सम्मितः । नौवयोधर्म्मेत्यादिना यत् ॥

तुल्यपानम् । न । बहुभिरात्मीयैर्जनैः सहमिलित्वा एककालेकृते पाने । सपीतौ ॥ इत्यमरः ॥ तुल्यंततपानञ्च ॥

तुल्ययोगिता । स्त्री । अर्थालङ्कारविशेषे ॥ यथा । नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥ नियतानां प्राक-

रणिकानामेवाप्राकरणिकानामेव वा। क्रमेणोदाहरणम्। पाण्डुक्षामं वदनं हृदयं सरसं तवालसञ्च वपुः। आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥ कुमुदकमलनीलनीरजालि र्ललितविलासजुषोर्दृशोः पुरः का। अमृतममृतरश्मिरम्बुजन्मप्रतिहतमेकपदे तवाननस्य॥ अन्यदपि। प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः। औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति॥

तुवरः। पुं। न। कषायरसे॥ तवति हिनस्ति रोगान्। तुरिति सौत्रो धातुः। छित्वरच्छत्वरेत्यादिना ष्वरच्॥ धान्यविशेषे। तुवरयावनाले॥ त्रि। कषायरसवति॥

तुवरयावनालः। पुं। धान्यविशेषे। तुवरे। रक्तयावनाले॥ तुवरो यावनालस्तु कषायोष्णो विरेचकः। सङ्ग्राही वातशमनो विदाही शोषकारकः॥

तुवरिका। स्त्री। तुवर्याम्। आढक्याम्। तुवर इति अरहर इति च भाषा॥ तुवरोऽस्त्यस्याः। अतइनिठनाविति ठन्। टाप्॥ सुराष्ट्रमृत्तिकायाम्। फिट्करी इतिभाषा॥

तुवरी। स्त्री। आढक्याम्। अरहर इति तूर इति च भाषा॥ काक्ष्याम्। सौराष्ट्रमृदि। फिट्करी इतिभाषा॥ तोरी इतिप्रसिद्धे धान्ये॥ यथा। तुवरी ग्राहिणी शीता लघ्वी कफविषास्रजित्। तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठकृमि प्रणुत्॥

तुवरीतैलम्। न। तुवर्याः स्नेहे॥ स्नेहे तैलञ्च। तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित्। वह्निकृद्विषहृत् कण्डूकुष्ठकोठकृमिप्रणुत्॥ मेदोदोषापहञ्चापि व्रणशोधहरं परम्॥

तुवरीशिम्बः। पुं। रक्तचक्रमर्दके॥

तुविः। स्त्री। तुम्ब्याम्॥ इ०श०मा॥

तुषः। पुं। धान्यत्वचि॥ विभीतकद्रुमे॥ तुष्यति। तुषतुष्टौ। इगुपधेति कः॥

तुषग्रहः। पुं। वह्नौ॥

तुषधान्यम्। न। मुद्गादिषु॥ मुद्गो माषो राजमाषो निष्पावश्च मकुष्ठकः। चणकाढकिमङ्गल्या स्त्रितुटः सकलायकः॥ तुषधान्यानि प्रोक्तानि वैद्यशास्त्रे भिषग्वरैः॥

तुषसारः। पुं। अग्नौ॥ इतिशब्दमाला॥

तुषानलः। पुं। तुषजाग्नौ। कुकूले॥

तुषाम्बु। न। तुषोदके॥

तुषारः। पुं। शीकरे॥ हिमे॥ देश

विशेषे ॥ हिमभेदे ॥ कर्पूरभेदे ॥
त्रि । शीतले ॥ तोषयति । तुषेरन्त
र्भावितण्यर्थात् कर्मः किदिष्यनु-
वृत्तौ तुषाराद्यश्चेत्यारन् ॥

तुषारकालः । पुं । हेमन्ते ॥

तुषारकिरणः । पुं । चन्द्रे ॥

तुषाराम्बु । न । तौषारे ॥

तुषितः । पुं । गणदेवताप्रभेदे ॥ रुचे
स्तनयस्य यज्ञाख्यस्य विष्णोर्द्वादश-
सुपुत्रेषु ॥ ते यथा । तोषः प्रतोषः-
सन्तोषो भद्रः शान्तिरिडस्पतिः । इ
ध्मः कविर्विभुः स्वह्नः सुदेवो रोच
नो द्विषट् ॥ तुषिता नाम ते देवा-
आसन् स्वायम्भुवान्तरे ॥ तुष्यति ।
तुष० । रुचिवचिकुचिकुटिभ्यः कि
तजिति बाहुलकात् कितच् ॥ यद्वा
। तोषणं तुट् । संपदादित्वात् क्वि
प् । ततस्तारकादित्वादितच् ॥ प्राणा
पानावुदानश्च समानो व्यान एव च
। चक्षुः श्रोत्रं रसो घ्राणः स्पर्शो बुद्धि
र्मनस्तथा । द्वादशैते हि तुषिता देवाः
स्वारोचिषेऽन्तरे ॥ केषाञ्चिन्मते षट्
त्रिंशत् तुषिता मताः ॥

तुषोत्थम् । न । तुषोदके ॥ इति राजनि० ॥

तुषोदकम् । न । काञ्जिके ॥ काञ्जि-
कभेदे ॥ अस्य लक्षणं यथा । तुषो
दकं यवैरामैः सतुषैः शकली कृतैः
। यवैरुदकसहितैः सन्धानवर्गोक्त-
त्वात् । तुषाम्बु दीपनं हृद्यं पाण्डु
कृमिगदापहम् । तीक्ष्णोष्णं पाचनं
पित्तरक्तकृद्वस्तिशूलनुत् ॥

तुष्टः । त्रि । परितृप्ते । सन्तोषविशिष्ट
। प्राप्तपरितोषे ॥ स्त्रियो जारेण तु
ष्यन्ति गावः स्वच्छन्दचारतः । कुञ्ज
राः पांशुवर्षेण ब्राह्मणाः परनिन्दया
॥ तुष्यते स्म । तुष० । क्तः ॥

तुष्टिः । स्त्री । तोषे । अधिगतार्थाद
न्यत्र तुच्छत्वबुद्धौ ॥ भोगेष्वेतावता
लमितिबुद्धौ ॥ साचानन्तपत्नी । य
था । अनन्तपत्नी तुष्टिश्च पूजिता यस्मि
न्नाभवत् । यया विना न सन्तुष्टाः सर्वे-
लोकाश्च सर्वतः इति श्रीदेवीभागव
तम् ॥ नवधा तुष्टिः । ताः परिगणय
ति । आध्यात्मिकाश्चतस्रः प्रकृत्युपा
दानकालभागाख्याः । बाह्या विषयो
परमात् पञ्च नव तुष्टयोऽभिमताः
॥ प्रकृतिव्यतिरिक्त आत्मास्तीति य
द्यतोऽस्य श्रवणमननेस्तः । ततो वि
वेकसाक्षात्काराय तु असदुपदेशतु
ष्टो न प्रयतते तस्य चतस्र आध्या
त्मिकास्तुष्टयो भवन्ति । प्रकृतिव्यति
रिक्तमात्मानमधिकृत्य यस्मात् ता
स्तुष्टयस्तस्मादाध्यात्मिकाः । कास्ता
इत्यत आह । प्रकृत्युपादानकालभा

गाख्याः। प्रकृत्यादिराख्यायासां तास्तथोक्ताः। प्रकृत्याद्यर्थविभागस्तत्तच्छब्दार्थं निरूपणे यथास्थानं द्रष्टव्यः॥ बाह्या दर्शयति। बाह्याविषयोपरमादित्यादिना। बाह्यास्तुष्टयो विषयोपरमात् पञ्च। याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः आत्मज्ञानाभावेऽनात्मानमधिकृत्यप्रवृत्ताः. ताश्चवैराग्येसतिभवन्तितुष्टयइतिवैराग्यहेतुपञ्चकत्वाद्वैराग्याणि पञ्च तत् पञ्चत्वात् तुष्टयःपञ्चेति। उपरम्यतेऽनेनेत्युपरमोवैराग्यम् विषयादुपरमोविषयोपरमस्तस्मात्। विषयाभोग्याःशब्दादयःपञ्च उपरमाअपि पञ्च। तथाहि अर्जनरक्षणक्षयभोगहिंसादोषदर्शन हेतुजन्मानः एकापारपारापारपारतःपारानुत्तमाम्भोत्तमाम्भसंज्ञकाः पञ्चोपरमाभवन्ति। एकापाराद्यर्थविभागश्चयथास्थानं द्रष्टव्यः। तदेवमाध्यात्मिकाभिश्चतसृभिर्बाह्याभिश्चपञ्चभिर्नव तुष्टयोऽभिहिताःसाङ्ख्याचार्यैः॥ तोषणम्। तुष०। क्तिन्॥ तुष्टिर्नुरक्तताऽर्थस्यकृतार्थोऽस्मीतियामतिः॥

तुष्टिदानम्। न। पारितोषिके॥ तुष्टि

दानमेव चाराणां हि वेतनम् तेहि तल्लाभात् स्वामिकार्येष्वतीव त्वरयन्ते इति नीतिवाक्यामृतम्॥

तुष्टुः। पुं। कर्णमणौ॥ इति शब्दचन्द्रिका॥

तुष्टुषितः। त्रि। स्तोतुमभिप्रेते॥

तुहिनम्। न। हिमे॥ चन्द्रतेजसि॥ तोहति तुह्यतेऽनेनवा। तुहिर् अर्दने। वेपितुह्योर्ह्रस्वश्चेतीनन्प्रत्ययः लघूपधगुणे कृते ह्रस्वश्च॥

तुहिनांशुः। पुं। चन्द्रे॥ कर्पूरे॥

तुहिनांशुतैलम्। न। कर्पूरतैले॥

तूणः। पुं। उपासङ्गे। तूणीरे। निषङ्गे॥ तूण्यतेऽनेन। तूणसङ्कोचने। चु०। घञ्॥ तूणयति वा। अच्॥

तूणकम्। न। अतिशर्करीसंज्ञकच्छन्दोविशेषे॥ यथा। तूणकं समानिकापदद्वयं विनान्तिमम्॥ यथा। सा सुवर्णकेतकं विकाशि भृङ्गपूरितं पञ्चबाणबाणजालपूर्णहेमतूणकम्। राधिकावितर्क्य माधवाद्यमासिमाधवे मोहमेति निर्भरं त्वया विना कलानिधे॥

तूणा। स्त्री। इषुधौ। तूणे॥ टाप्॥

तूणी। पुं। नन्दीवृक्षे। पीतके॥ त्रि। तूणयुक्ते॥

तूणी। स्त्री। तूणे॥ नील्याम्॥ तूण्य

तेऽनया । तूणपूरणे । हलश्चेतिघ ञ् । गौरादित्वात् ङीष् ॥

तूणीकः । पुं । नन्दीवृक्षे ॥

तूणीरः । पुं । तूणे । निषङ्गे ॥ तूर्णी शरैः सङ्कोचं राति । रादाने आदा नेच । आतोनुपेतिकः ॥ यद्वा । तूण्यते । तूण० । बाहुलकादीरन् ॥

तूतकम् । न । तुत्थे । तूतिया इति भाषा ॥

तूदः । पुं । नूदे । अश्वत्थाकारे पार्श्व पिप्पल इति ख्याते तूत इतिच प्रसिद्धे वृक्षे ॥ अस्यफलगुणाः । तूदं पक्कं गुरु स्वादु हिमं पित्तानिलापहम् । तदेवामं गुरु सर मल्लोष्णं रक्तपित्तकृत् ॥ तूदति । तुदव्यथने । इगुपधेतिकः । पृषोदरादिः ॥

तूरम् । न । वाद्यसामान्ये ॥ ताड्यमाने पटहादौ ॥

तूरी । स्त्री । धत्तूरे ॥ इतिभावप्रकाशः ॥

तूर्णम् । न । शीघ्रे । सत्वरे ॥ त्रि । त इति ॥ त्वरतेस्म । ञित्वरासम्भ्रमे । गत्यर्थाकर्मकेतिकर्त्तरिक्तः इच्यम्त्वरसङ्घुषास्वनामितीड भावपक्षे ज्वरत्वरेत्यूठ् । रदाभ्यामितिणत्वम् ॥

तूर्णिः । पुं । मले ॥ त्वरायाम् ॥ त्वरते त्वरयते वा । ञित्वरा० । वहिश्रियुद्रुग्लाहात्वरिभ्यो नित्निनिः ॥

तूर्य्यम् । न । वाद्ये ॥ वाद्यप्रभेदे ॥ आदिगुरु (ऽ।) त्रिकले ॥

तूर्य्यखण्डः । पुं । ढ्गडवाद्ये ॥

तूलम् । न । ब्रह्मदारुणि । ब्रह्मणेष्टे । तूदे ॥ आकाशे ॥ पुं । न । पिचौ । निर्वीजकार्पासे । रुयी इति भाषा ॥ तूलयति तूल्यते वा । तूलनिष्कर्षे । इगुपधेतिकः घोषा ॥

तूलकम् । न । तूले ॥

तूलकार्म्मुकम् । न । तूलस्फोटनार्थे धनुषि । पिञ्जले । तूलधनुषि ॥

तूलचापः । पुं । } तूलकार्मुके । धुनक इति भाषा ॥
तूलधनुः । न । }

तूलनालिका । स्त्री । पिञ्जिकायाम् । पांइज इति गौडभाषा ॥

तूलनाली । स्त्री । तूलनालिकायाम् ॥

तूलपिचुः । पुं । तूले ॥

तूलवृक्षः । पुं । शाल्मलीवृक्षे ॥

तूलशय्या । स्त्री । तूलिकायाम् ॥ तूलस्यशय्या । तूलेननिर्मिताशय्यावा । शाकपार्थिवादिः ॥

तूलशर्क्करा । स्त्री । कार्पासबीजे । विनौरा इति बिनौला इति कपासिआ इतिचभाषा ॥

तूलसेचनम् । न । कर्त्तने । सूत्रकर्त्तने । कातना इतिभाषा ॥ इ० श० च० ॥

तूला । स्त्री । कार्पास्याम् ॥ वर्त्याम् ॥

तूलिः । स्त्री । तूल्याम् ॥ स्वनामख्याते चित्रकरोपकरणे । ईषिकायाम् ॥ तूलति । तूल० । इगुपधात् किदिति इन् ॥

तूलिका । स्त्री । शय्योपकरणे । तोसक इति भाषा ॥ आलेख्यस्य लेखन्याम् । कूर्चिकायाम् ॥ यथा । जगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि । स्वयमेव समालिख्य प्रीणाति भगवान् शिवः ॥ आत्ममये महति पटे विविधजगच्चित्रमात्मनालिखितम् । स्वयमेव केवलमसौ पश्यन् प्रमुदं प्रयाति परमात्मेति ॥ ईषिकायाम् । वीरणादिशलाकायाम् ॥ सुवर्णादेरावर्त्तनपरीक्षणार्थं निक्षिप्य मायायां शलाकायाम् ॥ तूलति तूल्यते वा । तूल० । क्वुन् ॥

तूलिनी । स्त्री । शाल्मलिद्रुमे ॥ शब्दमालायाम् ॥

तूलिफला । स्त्री । शाल्मलौ ॥

तूली । स्त्री । नील्याम् ॥ वर्त्याम् ॥ तूलिकायाम् ॥ चित्रलेखन्याम् । चित्रसाधनद्रव्ये । कूर्चिकायाम् ॥ ङीष् ॥

तूवरः । पुं । काले ऽप्यश्मश्रुपुरुषे ॥ प्रौढाशृङ्गानडुहि । काले ऽजातशृङ्गे अपि ॥ पुरुषव्यञ्जनत्यक्ते ॥ कषाय

रसे ॥ तौति । तुः सौत्रोगत्यादौ । बाहुलकादुरो दीर्घश्च ॥ यद्वा । तनोति । बाहुलकात् डुः । तूश्चासौ वरश्च आच्छादकः ॥

तूवरी । स्त्री आढक्याम् ॥ सौराष्ट्रमृत्तिकायाम् ॥

तूष्णींशीलः । त्रि । तूष्णीके । मौनयुक्ते ॥ तूष्णीं शीलं यस्य ॥

तूष्णीकः । त्रि । मौनयुक्ते । मौनशीले ॥ तूष्णींशीलः । शीले कोमलोपश्च । केवा इति ह्रस्वेन मलोपस्तामर्थात् अन्यथाठपमेवविदध्यात् । ठपि अव्ययानामिति टिलोपेन सिद्धस्यात् ॥

तूष्णीकाम् । अ । मौने ॥ अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः । मित्त्वादन्त्यादचः परः ॥

तूष्णीम् । अ । मौने ॥ तोषणम् । तुषतुष्टौ । बाहुलाम् नीम् उपधाया ऊत् ॥ घटाकाशं महाकाशइवात्मानं परात्मनि । विलाप्याखण्डभावेन तूष्णीं भव महामुने इत्युपदेशः ॥

तूस्तम् । न । रेणौ ॥ जटायाम् ॥ तोसति । तुसशब्दे । बाहुलकात् तन् धातोर्दीर्घश्च ॥

तूखम् । न । जातीफले ॥

तूखम् । न । अर्जुने । तृणमाषे ॥ तृ

णविशेषे नडादौ ॥ तृण्यते । तृणु अदने । घञ् । संज्ञापूर्वकत्वाद्गुणो न ॥ यद्वा । तृहति । तृहूहिंसाया म् । तृहेः क्नोहलोपश्च ॥ अग्निचौर भयं रोगो राजपीडा धनक्षतिः । स ङ्गृहे तृणकाष्ठानां कृते । षस्वादिप- ञ्चके ॥

तृणकन्दः । पुं । कशेरुणि ॥

तृणकाण्डम् । न । तृणानां समूहे ॥ दूर्वादिभ्यःकाण्डः ॥

तृणकुङ्कुमम् । न । सुगन्धद्रव्यप्रभेदे । तृणपुष्पे । गन्धाधिके ॥ कटुत्वमुष्ण त्वं कफमारुतशोफकण्डूतिपामाकु- ष्ठामदोषनाशित्वं परमभास्वरत्वञ्चे त्यस्यगुणाः ॥

तृणकुटी । स्त्री । कायमाने । तृणौ कसि ॥

तृणकूर्म्मः । पुं । तुम्ब्याम् ॥

तृणकेतुः । पुं । } वंशे ॥
तृणकेतुकः । पुं । }

तृणगोधा । स्त्री । चित्रकोले ॥ कृक- लासे ॥

तृणग्रन्थिः । स्त्री । स्वर्णजीवन्त्याम् ॥

तृणग्राही । पुं । नीलमणौ ॥ कपूर इति प्रसिद्धे मणिविशेषे । तृणमणौ ॥

तृणजातिः । स्त्री । उलपादौ ॥

तृणज्योतिः । न । रात्रौ प्रकाशशालिनि

लताविशेषे ॥

तृणता । स्त्री । कार्मुके । धनुषि ॥ तृ णत्वे ॥ भावेतल् ॥

तृणद्रुमः । पुं । नारिकेलादिवृक्षेषु ॥ ताले ॥ गुवाके ॥ ताल्याम् ॥ केत क्याम् ॥ खर्जूरे ॥ खर्जूर्याम् ॥ हि- न्ताले ॥

तृणधान्यम् । न । नीवारे । श्यामा- कादौ । उडिधान इतिगौडभाषा ॥ तृणमिवधान्यम् अकृष्टोत्पन्न- त्वात् ॥

तृणध्वजः । पुं । वंशे ॥

तृणनिम्बः । पुं । नेपालनिम्बे ॥

तृणपत्रिका । स्त्री । इक्षुदर्भायाम् ॥

तृणपत्री । स्त्री । गुण्डाशिन्याम् ॥

तृणपुष्पम् । न । तृणकुङ्कुमे ॥

तृणपुष्पी । स्त्री । सिन्दूरपुष्पीवृक्षे ॥

तृणपूली । स्त्री । चाँच इतिगौडेषु प्र सिद्धे । चञ्चायाम् ॥

तृणमणिः । पुं । तृणग्राहिणि ॥

तृणमत्कुणः । त्रि । लग्नके । आमिन् इतिभाषा ॥ इतित्रिकाण्डशेषः ॥

तृणराजः । पुं । नारिकेले ॥ तालवृक्षे ॥ तृणानां राजा । टः ॥

तृणराजाह्वः । पुं । तालद्रुमे ॥ तृणरा जइत्याह्वायस्य ॥

तृणराजाह्वयः । पुं । तालवृक्षे ॥ तृण

राजदन्त्याद्वयोरस्य ॥

तृणवल्वजा । स्त्री । वल्वजायाम् ॥

तृणबीजः । पुं । तृणबीजोत्तमः । पुं । } श्यामाके ॥

तृणशीतम् । न । गन्धतृणे । कत्तृणे ॥

तृणशीता । स्त्री । जलपिप्पल्याम् ॥

तृणशून्यम् । न । मल्लिकायाम् ॥ केतकीशाखिनः फले ॥ तृणशून्येष्वानेसाधु । तत्रसाधुरितियत् ॥ त्रि । तृणरहिते ॥

तृणषट्पदः । पुं । वरोले । बरटायाम् । बरडै इति ततैया इतिच भाषा ॥

तृणसारा । स्त्री । कदल्याम् ॥ तृणानि सारमस्याम् ॥

तृणसिंहः । पुं । कुठारे ॥

तृणहर्म्यः । पुं । मयटे । तृणनिर्मितशालिकायाम् । मैडा इतिभाषा ॥

तृणाग्निः । पुं । वल्कले । तृणोत्थवह्नौ ॥

तृणाङ्घ्रिपः । पुं । मन्थानकतृणे ॥

तृणाञ्जनः । पुं । कृकलासे ॥

तृणाढ्यम् । न । पर्वततृणे । मृगप्रिये ॥

तृणाम्लम् । न । लवणतृणे । लूणियाशाक इतिभाषा ॥

तृणाह्वक् । पुं । तृणकुङ्कुमे ॥

तृणेक्षुः । पुं । वल्वजायाम् ॥

तृणोत्तमः । पुं । उलपतृणे ॥

तृणोद्भवः । पुं । नीवारे ॥

तृणौकः । न । कायमाने । तृणनिर्मितगृहे ॥

तृणौषधम् । न । एलवालुकाख्यगन्धद्रव्ये ॥

तृण्या । स्त्री । तृणसमूहे । तृणानां संहतौ ॥ तृणानांसमूहः । पाशादिभ्योयः ॥

तृतीयः । त्रि । त्रयाणां पूरणे । तीसरा इतिभाषा ॥ त्रेःसम्प्रसारणञ्चेतितीयप्रत्ययः सम्प्रसारणञ्च ॥

तृतीयकः । पुं । तृतीयकस्तृतीयेऽह्नि लक्षणलक्षितज्वरविशेषे ॥ तृतीयेऽह्नि त्यागमद्दिनंगृहीत्वा । यत्तउक्तम् । दिनमेकमतिक्रम्य योभवेत् सतृतीयक इति ॥ तृतीयेऽह्निभवः । कालप्रयोजनाद्रोगइतिकन् ॥ त्रिके ॥ तृतीयेन रूपेण ग्रहणम् । तावतिथंग्रहणमितिलुग्वाइतिकन् ॥

तृतीयप्रकृतिः । स्त्री । क्लीबे ॥ स्त्रीपुंसावपेक्ष्य तृतीयाचासौप्रकृतिश्चेति विग्रहः ॥

तृतीया । स्त्री । तिथिविशेषे । चन्द्रमण्डलस्य तृतीयकलाक्रियारूपायाम् । तत्क्रियोपलक्षिते काले वा ॥ सकलगुणगभीरो भूमिपालानुरागी परनगरविगाही सर्वलोकोपकारी । परविषयनिवासी कौतुकी सत्य

वादी भवति निखिलविद्यो यस्तृतीयाप्रसूतः ॥ टा भ्याम् भिस् इति त्रिके ॥ टाप् ॥

तृतीयाकृतम् । त्रि । त्रिगुणाकृते । त्रिवारकृष्टक्षेत्रे ॥ तृतीयंकृतम् । कृञो द्वितीयतृतीयेति डाच् ॥

तृतीयाप्रकृतिः । स्त्री । नपुंसके ॥ स्त्रीपुंसावपेक्ष्य तृतीया प्रकृतिः तृतीयः प्रकारः । असमस्तमेतत् । समासे तु तृतीयप्रकृतिरेव ॥

तृपत् । पुं । चन्द्रे ॥ छत्रे ॥ तृप्यति तृपप्रीणने । संस्तृतृपदृदिति अति प्रत्ययान्तो निपातितः ॥

तृपला । स्त्री । लतायाम् ॥ तृप्यति । तृप० । कलस्तृपश्चेति तृपतेः कल-प्रत्ययः ॥

तृप्तः । त्रि । हृष्टे । प्रमुदिते । प्रीते । तृप्तियुक्ते ॥ तृप्यतिस्म । तृप० । क्तः ॥

तृप्तिः । स्त्री । तर्पणे । सौहित्ये । भक्षणादिनाकाङ्क्षानिवृत्तौ ॥ सर्वकामाप्तौ । अलम्प्रत्ययेनेच्छाविच्छित्तौ ॥ तर्पणम् । तृप० । स्त्रियां क्तिन् ॥

तृप्रः । पुं । घृते ॥ पुरोडाशे ॥ तृप्यतेऽनेन । तृप० । स्फायितञ्चीतिरक् ॥ न । काष्ठे ॥ दुःखे ॥

तृप्राशुः । त्रि । तृप्रं न सहते । आशुः ॥

तृफला । स्त्री । त्रिफलायाम् ॥ तृफति । तृफ तृप्तौ । कलस्तृपश्चेति चकारात् तृफतेरपि कलः ॥

तृफुः । पुं । सर्पजातौ ॥

तृट् । स्त्री । लिप्सायाम् । वाञ्छायाम् ॥ उदन्यायाम् ॥ स्मरपुत्र्याम् । कामकन्यायाम् ॥ तर्षणम् । ञितृषपिपासायाम् । संपदादि क्विप् ॥

तृषा । स्त्री । तृषि ॥ भागुरिमते टाप् । तृषापि न कृशाममेति प्रयोगः ॥ लाङ्गलिकीवृक्षे ॥

तृषाभूः । स्त्री । क्लोमनि । फोँपडा इति भाषा ॥

तृषाह्वम् । न । जले ॥

तृषाह्वकम् । न । मधुरिकायाम् ॥

तृषाह्वा । स्त्री । मधुरिकायाम् ॥

तृषितः । त्रि । सतृषि । तृषयायुक्ते ॥ तृट्सञ्जाताऽस्य । तारकादित्वादितच् ॥

तृषितोत्तरा । स्त्री । असनपर्ण्याम् ॥

तृष्णक् । त्रि । लुब्धे ॥ तृष्यति । ञितृष० । तच्छीलः । स्वपितृषोर्नजिङ् ॥

तृष्णा । स्त्री । तर्षे । पिपासायाम् ॥ प्यास इति भाषा ॥ लिप्सायाम् । अप्राप्ताभिलाषे । अनात्मीयस्वीकारेच्छायाम् ॥ इदं मे न चीयतामितीच्छायाम् ॥ उचितव्ययाकरणेनापि

धनरत्नादेरर्जितस्य कार्य्येऽव्ययमपि तृष्णाभेदः ॥ लोभे ॥ या दुस्त्यजा दुर्मतिभि र्जीर्य्यतो या न जीर्य्यति । तां तृष्णां दुःखनिवहां शर्म्मकामो द्रुतं त्यजेत् ॥ तर्षणम् । ञितृष० । तृषिशुषिरसिभ्यः कित् इति नः ॥ विशेषो भावप्रकाशे चतृष्णायाम् ॥

तृष्णाक्षयः । पुं । शान्तौ ॥ परमानन्दप्राप्तिहेतौ ॥ तथाच वेदव्यासः । यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हन्तः षोडशीं कलामिति ॥ पिपासानाशे ॥ तृष्णायाः क्षयः ॥

तृष्णारिः । पुं । पर्पटे ॥ इति राजनिर्घण्टः ॥

ते । अ । त्वयेत्यर्थे ॥

तेजःकार्य्यम् । न । घृतादिकार्य्ये व्यञ्जनपक्वादौ ॥ तेजसःकार्य्यम् ॥

तेजःफलः । पुं । तेजफल इति तेजबल इति च प्रसिद्धे वृक्षविशेषे । गन्धफले । बहुफले ॥ अस्य गुणाः । तेजःफलः कटुस्तीक्ष्णः सुगन्धिर्दीपनो मतः । वातश्लेष्मारुचिश्वासश्वासनाशकरः स्मृतः इति ॥

तेजनः । पुं । वंशे ॥ मुञ्जे ॥ शरमुञ्जे ॥ तेजयति शत्रु मस्त्रिं वा । तिजनिशाने । ञु० । नन्द्यादित्वाद् युः ॥

तेजनकः । पुं । गुन्द्रे । शराभिधतृणे ॥ तेजयति । तिज० । ञु० । संज्ञायां कन्वा ॥

तेजनी । स्त्री । मूर्वायाम् ॥ ज्योतिष्मत्याम् ॥ तेजति । तिजपालने । ल्युट् । गौरादित्वान्ङीष् ॥

तेजपत्रम् । न । गन्धजाते । पत्रके । त्वक्पत्रे । तेजपात इति प्रसिद्धे द्रव्ये ॥

तेजलः । पुं । कपिञ्जलपक्षिणि ॥

तेजवती । स्त्री । गजपिप्पलिकायाम् ॥

तेजस् । न । दीप्तौ ॥ प्रभावे ॥ पराक्रमे ॥ रेतसि ॥ नवनीते ॥ अग्नौ ॥ तापकेज्योतिषि ॥ शरीरगतायां कान्तौ ॥ सुवर्णे ॥ मज्जनि ॥ पित्ते ॥ असहने ॥ यथा । अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेप्यसहनं तत्तेजः समुदाहृतम् ॥ प्रागल्भ्ये ॥ पराभिभवसामर्थ्ये ॥ परैरनभिभाव्यत्वे ॥ अप्रतिहताज्ञत्वे ॥ चैतन्यात्मकेज्योतिषि ॥ क्षीबालकादिभिर्मूढैरनभिभाव्यत्वे ॥ लिङ्गदेहे ॥ हयवेगे ॥ तेजोनाम दर्पापरनामा सत्त्वगुणविकारः प्रकाशकोऽन्तःसारविशेषः । यथाह भोजराजः । तेजो निसर्गजं सत्त्वं वाजिनां स्फुरणं रजः । क्रोधस्तम इति ज्ञेया स्त्रयोपिसहजा गुणाः ॥ तच्चद्विविधम् । सततोत्थितं भयोत्थितञ्चेति

। यथाह्रस्व एव। धारासु वेजिताग्नेश्च निर्गमात् प्रेरणं विना। अविच्छिन्नमिवाभाति तत् तेजः सततोत्थितम्॥ कषाणपाषाणादिघातैर्यत् साध्वसात् स्फुरितमुत्तरित्ति॥ * ॥ शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्रादुत्पन्ने-शब्दस्पर्शरूपगुणे तृतीयमहाभूते ॥ यथा। तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते। अधिभूतं ततोरूपं सूर्यस्तत्राधिदैवतम्॥ उष्णस्पर्शवत्ते-जः। तद्द्विविधम्। नित्यमनित्यञ्च। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः कृष्णतारा-ग्रवर्त्ति। विषयश्चतुर्विधः। भौमदिव्योदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तान्नस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादीति तर्कसङ्ग्रहः॥ स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्। नैमित्तिकं द्रवत्वन्तु नित्यतादि चपूर्ववत्॥ इन्द्रियं नयनं वह्निस्वर्णादिर्विषयो मतः इति भाषापरिच्छेदः॥ तेजयति तेज्यते ऽनेन वा। तिज०। असुन्॥ तेजोजलमिति छन्दोनिरुक्तः॥

तेजस्कारः। त्रि। तेजोवृद्धिकारके ॥

तेजस्वी। त्रि। तेजोयुक्ते ॥ सकान्तिमति ॥ तेजोऽस्त्यस्यास्मिन्वा। विनिः ॥

तेजस्विनी। स्त्री। ज्योतिष्मत्याम्॥ महाज्योतिष्मत्याम्॥ तेजवती तेजवत्काच तेजवत्वादिनामाख्याते तेजःफले ॥ तेजस्विनी कफश्वासकासामयवातहृत्। पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥ भावप्रकाशः ॥

तेजितः। त्रि। शाने। शाणादिना तीक्ष्णीकृते। शाणिते। निशिते॥ तेज्यते स्म। तिज०। चु०। क्तः॥

तेजीयान्। त्रि। तेजोयुक्ते ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥

तेजोमन्थः। पुं। गणिकारिकायाम्॥ तेजोमन्थानि। अन्य०। कर्णिकायाम्॥

तेजोमयः। पुं। तेजःप्रचुरे चैतन्यप्रधाने ज्योतिर्मये। अन्तःकरणोप-हितत्वात् वासनामये स्वप्ने ॥

तेजोमात्रा। स्त्री। इन्द्रिये ॥ तेजसो मात्रा ॥

तेजोरूपम्। न। प्रकाशरूपे ब्रह्मणि ॥ त्रि। प्रभारूपे ॥

तेजोवती। स्त्री। गजपिप्पल्याम्॥ चव्ये ॥ महाज्योतिष्मत्याम्॥ वह्नि

कुर्वीत प्रयता । एकपीठसमधिष्ठाय हे
मन्त्रमात्रगोपुरा । यत्र तेजोवती व
शिरुच्चमूलनिषेविता ॥ तेजवती
चव्यकाष्ठे ॥

तैजोवत्यः । पुं । क्षुद्राग्निमन्थे ॥

तैलः । पुं । नानाङ्गविशेषे ॥ यथा ।
तैलेतिशब्दस्तेन: स्वात्मसङ्गतानां प्रद
र्शकः । तैषाब्देनोच्यते गौरी सशब्दे
नोच्यतेश्वरः । तैलमाङ्गलिकश्चायं
मध्यस्थेनहतिस्मृत इतिसङ्गी० ॥

तैमः । पुं । समुन्दने । आर्द्रीभावे ॥
तैमनम् । तिमआर्द्रीभावे । घञ् ॥

तैमनम् । न । आर्द्रीकरणे ॥ निष्ठाने
। व्यञ्जने । तीमना इति तेमन इति
भाषा ॥ तिम० । ल्युट् । तिम्यते ऽ
नेन वा करणे वा ल्युट् ॥

तैलकी । स्त्री । वृक्षप्रभेदे ॥

तैलकम् । न । केलिकानने ॥ क्रीडाया
म् ॥ तेवनेन वनं मत्ता नदीतीर्त्त्वा
कुञ्जकाइतिरामायणम् ॥

तैक्ष्ण्यम् । न । तीक्ष्णतायाम् ॥

तैजसः । पुं । इन्द्रियाणां कारणे । राज
साहङ्कारे ॥ तेजोमयान्तःकरणोपहि
तत्वात् स्थूलप्रपञ्चशरस्थाने स्वप्नव्य
ष्ट्युपहितचैतन्ये ॥ तेजसि परमा
त्मनि स्थिते ॥ न । धातुद्रव्ये । सर्व
ताप्रसृते ॥ तेजसोविकारः । तं-
स्यविकारइत्यण् ॥ यथा । तेजो ऽ
स्यस्य । ज्योत्स्नाद्यण् ॥ तीर्थविशेषे
॥ मन्त्रघृतादिभिः सैनापत्ये कार्त्ति
केयो ऽभिषिक्तः ॥

तैजसावर्त्तिनी । स्त्री । मूषायाम् ॥ तै
जसेरविकारः सुवर्णादि तावर्त्यते ऽ
स्याम् । वृतुवर्त्तने । णिजन्तः । अधि
करणेल्युट् । ङीप् ॥

तैतिलः । पुं । गण्डकपशौ ॥ न । चतु
र्थकरणे ॥ कलासुहृच्च । वचनाभि-
लाषी सुमूर्त्तिसन्तानितकामदेवः ।
मता गुणज्ञः कुशलः सुशीलस्तैत्ते-
तिलाख्यंकरणं प्रसूतौ ॥

तैत्तिडीकम् । न । तित्तिडीकस्यावय
वे ॥ तद्विकारे ॥ कोपधाच्चेत्यण् ॥
तित्तिडीकैःसंस्कृते ॥ कुलालकोप-
धादण् ॥

तैत्तिरः । पुं । तित्तिरिपक्षे ॥ न । ति
त्तिरीणां गणे ॥ तित्तिरीणां समूहः
। अनुदात्तादेरञ् ॥

तैत्तिरिकः । पुं । शाकुनिकविशेषे ॥
तित्तिरान्हन्ति । ठक् ॥

तैत्तिरीयकः । पुं । यजुर्वेदीयशाखा-
विशेषस्याध्येतरि ॥

तैत्तिरीया । स्त्री । यजुर्वेदशाखावि
शेषे ॥

तैमिरिकः । त्रि । तिमिररोगयुक्तचक्षुषि ॥

तैरश्ची । स्त्री । कुनीत्याम् । रागद्वेषु पक्षिविशेषे ॥

तैर्थिकः । पुं । तीर्थकरे । कपिलकणभुगादिषु ॥

तैर्य्यग्योनः । पुं । त्रिविधभूतादिसर्गेष्वेकस्मिन् सर्गे ॥ स च पशुमृगपक्षिसरीसृपस्थावरभेदात् पञ्चविधो भवति ॥

तैलम् । न । तिलसर्षपादिजनितस्नेहे । इत्यमरः । स्नेहे । तेल इति भाषा ॥ तिलस्य विकारः । तस्य विकार इत्यण् ॥ तिलादिस्नेहवस्तूनां स्नेह स्नेहमुदाहृतम् । तत्तु वातहरं सर्वं विशेषात्तिलसम्भवम् ॥ नास्ति तैलात्परं किञ्चिद्भेषजं मारुतापहम् ॥ तिलतैलं गुरु स्थैर्यबलवर्णकरं सरम् । वृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥ सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् । वीर्य्येणोष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत् ॥ लेखनं बद्धविण्मूत्रं गर्भाशयशोधनम् । दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत् ॥ श्रोत्रयोनिशिरःशूलनाशनं लघुतापकरम् । त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजने ऽन्यथा ॥ छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते । भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारि-

ते ॥ तथाभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते । वस्तौ पाने च संस्कारे नस्ये कर्णाक्षिपूरणे ॥ सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ॥*॥ ननु स्नेहनृंहणयोः कथं सामानाधिकरण्यमित्याह । रूक्षादिदुष्टः पवनः स्रोतःसङ्कोचयेद्यदा । रसोऽसम्यग्वहन् कार्श्यं कुर्य्याद्रक्तादिवर्द्धनम् ॥ तेषु प्रविष्टस्तरसा सौक्ष्म्यविन्ध्यत्वमार्द्दवैः । तैलं स्वमं रसं नेतुं कृशानां तेन बृंहणम् ॥ व्यवायि सूक्ष्मतीक्ष्णोष्णसरत्वैर्मेदसः क्षयम् । शनैः प्रकुरुते तैलं तेन लेखनमीरितम् ॥ दृढं पुरीषं बध्नाति स्खलितं तत् प्रवर्त्तयेत् । ग्राहकं सारकं चापि तेन तैलमुदीरितम् ॥ घृतमब्दात्परं पक्कं हीनवीर्य्यं प्रजायते । तैलं पक्कमपक्कं वा चिरस्थायि गुणाधिकम् ॥ तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम् । अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥ तैलानां सार्षपादीनां यथास्थानं गुणोरणम् ॥*॥ प्रातःस्नाने कृते श्राद्धे द्वादश्यां ग्रहणे तथा । मद्यलेपसमं तैलं तस्मात्तैलं विवर्जयेत् ॥ घृतञ्च सार्षपं तैलं यत्तैलं पुष्पवासितम् । अदुष्टं पक्कतैलञ्च तैलाभ्यङ्गेषु नित्यशः ॥*॥ कर्म्मभूमन्दव

तिलद्वयं कीर्त्तिलाभश्चयोमे भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्रलाभः । अर्थभ्रंशो निर्भवति च गुरौ भार्गवे शोकयुक्तस्तैलाभ्यङ्गात् तनयमरणं तद्वर्ज्जेद्दीर्घमायुः ॥ सिल्हके ॥

तैलकन्दः । पुं । तिलाङ्कितदले । द्रावककन्दे ॥ लोहद्राविलं कटुत्वमुष्णत्वं वातापस्मारविषशोफनाशित्वं रसबन्धकारित्वं देहसिद्धिकारित्वञ्चेत्यस्य गुणा इति राजनिर्घण्टः ॥

तैलकारः । पुं । तेली इति प्रसिद्धे वर्णसङ्करजातिप्रभेदे । धूसरे । चाक्रिके । तैलिनि ॥ कोटकस्त्रीगर्भे कुम्भकाराज्जातोयमिति । ब्र० ब्र० खं ॥

तैलकिट्टम् । न । खल इति भाषाप्रसिद्धे तैलमले । पिण्याके ॥

तैलङ्गः । पुं । अन्ध्रदेशे ॥ श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः । तैलङ्गदेशो देवेशि ध्यानाध्ययनतत्परः ॥

तैलचौरिका । स्त्री । तैलपायिकायाम् ॥

तैलद्रोणी । स्त्री । कण्ठपर्य्यन्तमज्जनार्थं तैलपूर्णकाष्ठादिनिर्मितपात्रविशेषे ॥ तत्रावस्थितिगुणाः । वातरोगव्याकुलाङ्गरोगपङ्गुबाधिर्य्यमिन्मिनगद्गदधन्वङ्गस्तब्धपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्त्रकचयरुधिरभवमूत्रकृच्छ्रवस्तिरोगेषु प्रशस्त-

मिति राजवल्लभः ॥

तैलधान्यम् । न । तिलादिषु ॥ तिलातसी च तौरी च द्विविधश्चापि सर्षपः । द्विधा राजी खाखसञ्च बीजं कौसुम्भसम्भवम् । एतानि तैलधान्यानि प्रोक्तानि पूर्व्वसूरिभिः ॥

तैलपर्णः । पुं । पर्व्वतविशेषे ॥ न । ग्रन्थिपर्णे ॥

तैलपर्णकम् । न । ग्रन्थिपर्णद्रव्ये ॥

तैलपर्णिकम् । न । हरिचन्दने ॥ तिलपर्णीवृक्षविशेषे जातम् । तत्र जात इत्यण् । ङीप् । स्वार्थे कन् । केऽण इति ह्रस्वः ॥ तैलपर्णो गिरिस्तत्राकर इति स्वामी ॥ पुं । चन्दनविशेषे ॥

तैलपर्णी । स्त्री । मलयजे चन्दने ॥ श्रीवासे ॥ सिल्हके ॥ तिलपर्णीवृक्षे जाता । तत्र जात इत्यण् । ङीप् ॥

तैलपा । स्त्री । तैलपायिकायाम् ॥

तैलपायिका । स्त्री । सपक्षकीटविशेषे । परोष्ण्याम् । तिलचटा इति भाषा ॥ तैलं पिबति । पा पाने । ण्वुल् ॥

तैलपिपीलिका । स्त्री । पिपीलिकाप्रभेदे । कपिजाङ्गिकायाम् ॥

तैलफलः । पुं । इङ्गुद्याम् ॥ बिभीतके ॥

तैलभाविनी । स्त्री । जातीपुष्पद्रव्ये ॥

तैलमाची । स्त्री । वर्त्याम् ॥ दीपकू

प्याम् ॥

तैलमाता । स्त्री । स्वधायाम् ॥ पतन म् पातः । तिलस्यपातः । तिलपातो ऽस्याम् । घञः काश्यांक्रियेतिञः । घञन्तात् क्रियावाचिनः प्रथमान्ता दस्यामित्यर्थेञःस्यात् तदन्तांस्त्रिया म् । श्येनतिलस्येतिमुम् ॥

तैलसाधनम् । न । गन्धद्रव्यविशेषे । काकोले । कक्कोले । काकला इति गौडेषु प्रसिद्धे कोषफले ॥

तैलस्फटिकः । पुं । तृणमणौ ॥ इ० हे ॥

तैलाक्तः । त्रि । तैलेनसिक्ते ॥

तैलागुरु । न । दाहागुरुणि ॥

तैलाटी । स्त्री । बरटायाम् ॥

तैलाम्बुका । स्त्री । तैलपायिकायाम् ॥

तैलिकः । पुं । तैलकारे । तैलार्थंतिला दिपीडकानां पेष्टरि ॥

तैली । पुं । तैलकारे । चाक्रिके ॥ त्रि । तैलसम्बन्धिनि ॥

तैलिनी । स्त्री । दशावर्त्याम् । तैल कीटे । षड्बिन्द्वाम् ॥

तैलिशाला । स्त्री । तैलिकगेहे । य न्त्रगृहे ॥

तैलीनम् । न । तिल्ये । तिलक्षेत्रे ॥ तिलानां भवनं क्षेत्रम् । विभाषाति लेतिखञ् ॥

तैषः । पुं । पौषमासे ॥ तिष्येणयुक्ता पौर्णमासी यस्मिन् । साऽस्मिन् पौर्णमासीत्यर्थे सञ्ज्ञायाम् तुनक्ष त्रेभ्योऽणित्यण् । तिष्यपुष्ययोर्नक्षत्रा णियलोपः । ङीप् ॥ ततःसाऽस्मिन् पौर्णमासीत्यण् ॥

तैषी । स्त्री । पौष्याम् ॥ तिष्येणयु क्ता पौर्णमास्यस्मिन् । नक्षत्रेणय्यु क्तः । तिष्यपुष्ययोर्नक्षत्राणियलोपः । ङीप् ॥

तोकम् । न । अपत्ये । पुत्रदुहित्रोः ॥ तौति । तुःबौद्धौ हिंसावृद्धिपूर्त्तिषु । बाहुलकात्कः ॥

तोक्मः । पुं । हरिते ॥ हरिद्वर्णे । अ पक्वयवे ॥ पक्वयवाङ्कुरे इति श्रीधर स्वामी ॥ हरिद्वर्णे ॥ न । कर्णमले ॥ तकति तक्यते वा । तकहसनेऽहासे च । बाहुलकान्मः ओत्वञ्च ॥ मेघे ॥ इत्युज्ज्वलदत्तः ॥

तोटकम् । न । द्वादशाक्षरपादे जगती छन्दोभेदे ॥ यथा । विनिधेहि चतुः सगणं रुचिरं रविसङ्ख्यकवर्णकृतं सुचिरम् । फणिनायकपिङ्गलसंजपि तं कुरु तोटकवृत्तमिदं रुचिरम् ॥ यथा । सकलं मनसा क्रियया जनि तं समवेक्ष्यविमाश्रितयानुगतम् । प रिचिन्तनकश्चिद्दृतो निखिला हवि माधिकृतेन न सम्भवतीति ॥

तोडः । पुं । भेदे ॥ तोडनम् । तुडतो डने ॥ घञ् ॥

तोडनम् । न । दारणे ॥ हिंसने । भेदे ॥

तोत्रम् । न । प्रतोदे । प्राजने । गवा दिपशूनां ताडनदण्डे ॥ वैणुके । हस्तिन स्ताडनदण्डे ॥ तुद्यते ऽनेन । तुदव्यथने । दाम्नीतिष्ट्रन् ॥

तोदः । पुं । व्यथायाम् ॥ तोदनम् । तुद० । घञ् ॥

तोदनम् । न । व्यथने ॥ तोत्रे । वृष भादिप्रेरणदण्डे ॥ तुद० । ल्युट् ॥

तोदितः । त्रि । प्रेरिते ॥

तोमरः । पुं । न । सर्वलायाम् । गडाँ साइति लवणी इतिवा ख्याते ऽस्त्रे ॥ हस्तक्षेप्यसमल्यदण्डे । रायबांस इ तिभाषा ॥ स्थूलाग्रगदायाम् ॥ खड्गा दि (।ऽ) चिह्ने ॥ छन्दोभेदे ॥ यथा । प्रथमंकरं विनिधाय जगच्च- यञ्चनिधाय । कुरु तोमरं सुखका- रि फणिराजवक्त्रविहारि ॥ यथा । सखि मादके मधुमासि व्रजसुन्दरं किमिहासि । सहतेनकिं विहरामि किमुपावकं प्रविशामीति ॥

तोमरधरः । पुं । अग्नौ ॥ इतिशब्दा० ॥

तोमरिका । स्त्री । आढक्याम् । तुवर इतिभाषा ॥

तोयम् । न । अम्बुनि । जले ॥ यथा

अमृतं तोय मभक्ष्यं सर्वसङ्करम् ॥ उद्धृतं वामहस्तेन यत्तोयं पिबति द्विजः । सुरापानेन तुल्यं स्या न्मनुराह प्रजापतिः ॥ अगन्धमव्यक्तरसं शीत लञ्च तृषापहम् । अच्छं लघु च प- थ्यञ्च तोयंगुणवदुच्यते ॥ तौति । तुः सौत्रआवरणार्थः । तोरादिकोयः ॥ पूर्वाषाढायाम् ॥

तोयकामः । पुं । अम्बुवेतसे । परिव्याधे ॥ त्रि । जलाभिलाषिणि ॥

तोयकृच्छ्रम् । न । जलमात्रपानरूप- व्रतविशेषे ॥ इतिमिताक्षरा ॥

तोयडिम्भः । पुं । घनोपले ॥ इ०हा० ॥

तोयदः । पुं । मेघे ॥ मुस्तके ॥ न । आज्ये ॥ त्रि । जलदातरि ॥ जलदा न माहात्म्यंमहाभारते दानधर्मे । अप्रदत्तेनरेवह प्राणाहत्ताभवन्त्यु त । प्राणदानाद्धि परमंनदान मिह विद्यते ॥ अन्नं वापिप्रभवति पानी- यात् कुरुसत्तम । नीरजातेन हि विनान किञ्चित् संप्रवर्त्तते ॥ अग्नौ षध्योमहाराजवीरुधश्चजलोद्भवाः । यतः प्राणभृतां प्राणाः सम्भवन्ति विशांपते ॥ तस्मात्पानीयदानाद्धि न परं विद्यते क्वचित् । तच्चदद्यान्नरो नित्यंयदीच्छेद्भूतिमात्मनः ॥ धन्यं यशस्य मायुष्यं जलदानं विशेष्यते

। अर्बुदंध्वाप्यधि कौन्तेय सदा तिष्ठति तोयदः ॥ सर्वकामानवाप्नोतिकीर्त्तिं चैवेहशाश्वतीम् । प्रेत्यचानन्त्यमश्नाति पापेभ्यश्चप्रमुच्यते ॥ तोयदोमनुजव्याघ्रस्वर्गं गत्वामहाद्युते । अक्षयान् समवाप्नोतिलोकानित्यब्रवीन्मनुरिति ॥ तोयंददाति । डुदाञ्० । कः ॥

तोयधरः । पुं । मुस्तायाम् ॥ सुनिषण्णाख्यभेषजे ॥ घने । मेघे ॥ तोयस्यधरः ॥

तोयधिः । पुं । उदन्वति । समुद्रे ॥ तोयानि धीयन्तेऽत्र । डुधाञ्० । कर्मण्यधिकरणेचेतिकिः । आतोलोपः ॥

तोयधिप्रियम् । न । लवङ्गे ॥

तोयनिधिः । पुं । अब्धौ । समुद्रे ॥ तोयानि निधीयन्तेऽत्र । डुधाञः किः ॥ तोयानां निधिर्वा ॥

तोयपिप्पली । स्त्री । लाङ्गल्याम् । शकुलादन्याम् । गौडभाषया काँचड़ा इतिप्रसिद्धे जलजशाके ॥ तोयस्य पिप्पलीव ॥

तोयपुष्पी । स्त्री । पाटलावृक्षे ॥

तोयप्रसादनः । पुं । न । कतके ॥ षष्ठी समासः ॥

तोयप्रसादनफलम् । न । कतकफले ॥

तोयफला । स्त्री । इर्वारौ ॥

तोयवल्ली स्त्री । कारवेल्ले ॥

तोयशाला । स्त्री । प्रपायाम् ॥

तोयशुक्तिका । स्त्री । जलशुक्तौ ॥

तोयसूचकः । पुं । भेके ॥ इ० शब्दा० ॥

तोयात्मा । स्त्री । विष्णौ ॥ यथा । यस्य केशेषुजीमूता नद्यः सर्वाङ्गसन्धिषु । कुक्षौसमुद्राश्चत्वार स्तस्मै तोयात्मनेनमइति ॥

तोयाधिवासिनी । स्त्री । पाटलावृक्षे ॥

तोयेशः । पुं । वरुणे ॥ शतभिषायाम् ॥

तोरणः । पुं । न । बहिर्द्वारे । द्वारवाह्यभागे ॥ स्तम्भोपरिचिते सिंहद्वाराख्ये ॥ तुरन्त्यत्र । तुरत्वरणहिंसयोः । अधिकरणे ल्युट् युज्वा ॥ तोलयन्त्यत्रेतिवा । तुलउन्माने । रलयोरेकत्वम् ॥ ततुरत्यनेनवा । तुरत्वरणे । जौहोत्यादिकः ॥ न । कन्धरायाम् ॥ कन्धरातोरणं कण्ठीति हारावली ॥

तोलः । पुं । न । गुञ्जाशीतिसम्मितं । तोलके ॥

तोलकः । पुं । न । कोले । इङ्क्षणे । वटके । कर्षार्द्धे । अशीतिगुञ्जामिते ॥ षोडशमाषके षण्णवतिरक्तिकापरिमाणे । तोला इतिभाषा । कर्षे ॥ इतिवैद्यकपरिभाषा ॥

तोषः । पुं । तुष्टौ ॥

तौक्षिकः । पुं । धनूराशौ ॥

तौतातिकम् । न । तुतातभट्टकृतमीमांसाशास्त्रे ॥

तौतिकः । पुं । शुक्तौ ॥ न । मुक्तायाम् ॥

तौरङ्गिकः । पुं । अश्वारोहे । सादिनि ॥

तौरायणिकः । पुं । यजमाने ॥ तुरायणं यज्ञविशेषं निर्वर्त्तयति । पारायणतुरायणेत्यादिना ठञ् ॥

तौर्य्यम् । न । तूर्य्यमुरजादौ भवे शब्दरूपे ॥

तौर्य्यत्रिकम् । न । नृत्यगीतवाद्येषु समुदितेषु ॥ तुरी त्वरायाम् । क्व चलोपश्चम् । गुणं बाधित्वा बाहुलकादुश्चिचेति दीर्घः । तूर्य्यं मुरजादि तत्र भवं तौर्य्यंशब्दः । त्रयोंऽशा यस्य तत् त्रिकम् । सङ्ख्याया अतिशदन्तायाः कन् । तौर्य्योपलक्षितं त्रिकमिति विग्रहः ॥

तौलः । पुं । तुलाराशौ । तौलिनि ॥ त्रि । तुलासम्बन्धिनि ॥

तौलिकः । पुं । चित्रकारे ॥

तौलिकिकः । पुं । चित्रकारे । रङ्गाजीवे ॥

तौल्यम् । त्रि । तुलया परिच्छिन्ने ॥ तुल्यमेव । स्वार्थे ष्यञ् ॥

तौषारम् । न । हिमोदकविशेषे । तुषारजले ॥ अपि मन्दाः समुद्रान्ते वह्निरापस्तदुद्भवाः । धूमावयवनिर्मुक्तास्तौषाराख्यास्तु ताः स्मृताः ॥ अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ता हिताः ॥ तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम् । कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत् ॥ नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते तद्भवा वह्निभवाः धूमावयवनिर्मुक्ताः धूमांशरहिता आपः तुषाराख्या इत्यर्थः ॥ तुषारस्येदम् । तस्येदमित्यण् ॥

त्यक्तः । त्रि । हीने । विधूते । समुज्झिते । कृतत्यागे । छोडा इतिभाषा ॥ त्यज्यते स्म । त्यज हानौ । क्तः ॥

त्यक्तव्यः । त्रि । त्यजनीये ॥

त्यक्तसर्व्वपरिग्रहः । त्रि । समस्तभोगोपकरणरहिते विरक्ते ॥ त्यक्ताः सर्व्वे परिग्रहा येन ॥

त्यजनम् । न । त्यागे । वर्ज्जने ॥

त्यः । त्रि । तच्छब्दार्थे ॥ सर्व्वादिः । त्यजति । त्यज० । त्यजितनियजिभ्यो डिदित्यदिः ॥ स्त्रियां त्या । क्लीवे त्यत् ॥ शाब्दाकाशयोः ॥

त्यागः । पुं । दाने । अर्थिषु मुक्तहस्ततायाम् । धर्म्मेणोपार्ज्जितार्थस्य सत्पात्रे विनियोगे ॥ वर्ज्जने ॥ सर्व्वकर्म्मफलाभिसन्धिवर्ज्जने । कर्म्माधिकारिक

र्त्तृकफलाभिसन्धिपूर्व्वककर्म्मत्यागे ॥ स च सात्त्विकादिभेदात् त्रिविधो भवति ॥ यथा । नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥ १ ॥ दुःखमित्येव यत्कर्म्म कायक्लेशभयात् त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ २ ॥ कार्य्यमित्येव यत्कर्म्म नियतं कुरुतेऽर्ज्जुन । सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः ॥ ३ ॥ अपि च । विशेषणाभावात् विशेष्याभावात् उभयाभावाच्च त्रिविधो भवति । तथाहि । फलाभिसन्धिपूर्व्वककर्म्मत्यागः सत्यपि कर्म्मणि फलाभिसन्धित्यागादेकः १ । स च सात्त्विकत्वादादेयः ॥ सत्यपि फलाभिसन्धौ कर्म्मत्यागात् द्वितीयः २ । स च दुःखबुद्ध्याकृतो राजसः विपर्य्यासेन कृतस्तामसः इति भेदात् द्विविधो हेयो भवति ॥ फलाभिसन्धेः कर्म्मणश्च त्यागात् तृतीयः ३ । स च कर्म्मानधिकारिकर्त्तृको नैर्गुण्यरूपः ॥ सोऽपि साधनफलभेदेन द्विविधः । तत्र सात्त्विकेन फलाभिसन्धित्यागपूर्व्वककर्म्मानुष्ठानरूपेण त्यागेन शुद्धान्तःकरणस्योत्पन्नविविदिषस्य आत्मज्ञानसाधनश्रवणाख्यवेदान्तविचा-

राय फलाभिसन्धिरहितत्यागः कर्म्मशुद्धौ सत्यां तत्साधनस्य कर्म्मणो वैतृष्ण्ये जातइवाऽवहननस्य परित्यागः स एकः साधनभूतो विविदिषासन्न्यास उच्यते ॥ द्वितीयस्तु जन्मान्तरकृतसाधनाऽभ्यासपरिपाकादस्मिन् जन्मनि आदावेवोत्पन्नात्मबोधस्य कृतकृत्यस्य स्वतएव फलाभिसन्धेः कर्म्मणश्च परित्यागः फलभूतः स विद्वत्सन्न्यास इत्युच्यते ॥ * ॥ त्यागः प्रपञ्चरूपस्य चिदात्मत्वावलोकनात् । त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ * ॥ त्यागेन युक्ता दिवमुत्पतन्ति त्यागेन हीना नरकं व्रजन्ति । न त्यागिनां दुष्करमस्ति किञ्चित् त्यागो हि सर्व्वव्यसनानि हन्ति ॥ त्यजनम् । त्यज हानौ । घञ् ॥ विवेकिपुरुषे ॥ इति शब्दरत्नावली ॥ उपेक्षायाम् ॥

त्यागफलम् । म । ज्ञाननिष्ठायाम् ॥

त्यागी । चि । दातरि ॥ शूरे ॥ वर्ज्जनशीले ॥ सात्त्विकत्यागेन युक्ते ॥ न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ नहि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः । यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥

त्यजति तच्छीलः । सम्पृचानुरुधे तिघिनुण् ॥

त्यागिमः । त्रि । त्यागजे ॥ त्यागेन निर्वृत्तः । भावप्रत्ययान्तादिमप् ॥

त्याजितः । त्रि । विसर्जिते ॥ त्यजेर्ण्यन्तात् द्विकर्मकात् कर्मणि क्तः । ण्यन्ते कर्त्तुश्च कर्मणामित्युक्तेः ॥

त्याज्यः । त्रि । त्यागयोग्ये । वर्जनीये । वर्ज्ये ॥ तीरे प्रतिग्रहस्त्याज्यो त्याज्यो धर्मस्य विक्रयः ॥ अपिच । पित्रं न्नतिशयंमत्तं शोधितं वाप्यशोधितम् । त्याज्यो भवति कौनां दण्डनीयो ऽपिभूभृत इति ॥ त्यजेश्चेति ण्यति कवर्गादेशाभावः ॥

त्रङ्गः । पुं । प्रतिमार्गे ॥

त्रङ्गा । स्त्री । प्रतिमार्गे । उद्रङ्गे ॥

त्रपः । पुं । सलज्जे ॥ त्रपते । त्रपूष् लज्जायाम् । षित्त्वादङ् ॥

त्रपा । स्त्री । लज्जायाम् ॥ कुलटायाम् ॥ त्रपते ऽनया । त्रपूष्० । षिद्भिदादिभ्योङ् । टाप् ॥ कुले ॥ कीर्त्तौ ॥ इतिशब्दरत्नावली ॥

त्रपाकः । पुं । म्लेच्छविशेषे ॥

त्रपारण्डा । स्त्री । वेश्यायाम् ॥

त्रपिष्ठः । त्रि । तृप्रतमे ॥ अयमेषामतिशयेनतृप्रः । अतिशायने इष्ठन् । प्रियस्थिरेति तृप्रस्यत्रबादेशः ॥

त्रपीयान् । त्रि । तृप्रतरे ॥ अतिशयेन तृप्रः । द्विवचनविभज्येति ईयसुन् ॥ प्रियस्थिरेति तृप्रस्यत्रबादेशः ॥

त्रपु । न । सीसके ॥ रङ्गे ॥ अग्निं दृष्ट्वा त्रपते लज्जतइव । त्रपूष० । शृस्वृ स्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्युः ॥

त्रपुकर्कटी । स्त्री । त्रपुष्याम् ॥

त्रपुटी । स्त्री । सूक्ष्मैलायाम् ॥ इ०र०॥

त्रपुलम् । न । रङ्गे । राँग इति भाषा ॥

त्रपुषम् । न । कर्कटीप्रभेदे । सुधावासे । सुशीतले । लघुखीरा वालनखीरा इत्यादिभाषा ॥ त्रपुषं लघु नीलञ्च नवं तृट्क्लमदाहजित् । स्वादुपित्तापहं शीतं रक्तपित्तहरं परम् ॥ तत् पक्व मम्लमुष्णंस्यात् पित्तलं कफवातनुत् । तद्बन्मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित् ॥

त्रपुषी । स्त्री । कर्कट्याम् । खीरा इति भाषा ॥

त्रपु । न ।
त्रपुसम् । न । } रङ्गे ॥

त्रपुसी । स्त्री । महेन्द्रवारुण्याम् ॥ कर्कट्याम् ॥ लताविशेषे । पीतपुष्पायाम् । खीरा इति भाषा ॥

त्रयम् । न । त्रितये ॥ त्रयो ऽवयवाः अस्य । सङ्ख्यायाअवयवेतयप् । द्वि

शिर्भातवस्त्राभरणा ॥

त्रयी । स्त्री । त्रिवेद्याम् । ऋग्यजुःसामा ख्यश्रुतित्रये ॥ ब्रह्माऽथपुरुषो रुद्र स्त्रयमेतत् त्रयीमयम् । सर्गादावृ ग्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः । रुद्रःसाममयोऽन्ताय तस्मात् तस्या शुचिर्ध्वनिः ॥ पुरन्ध्याम् ॥ सुमतौ ॥ सोमराजीवृक्षे ॥ भवान्याम् । दुर्गा याम् ॥ यथा । ऋग्यजुःसामभागेन साङ्गवेदगताधिया । त्रयीति पठ्यते लोकेदृष्टादृष्टार्थसाधिनीति देवी पुराणम् ॥ त्रितये ॥ टिड्ढेतिङीप् ॥

त्रयीतनुः । पुं । सूर्ये ॥ त्रयी तनुर्य स्य सः ॥

त्रयीधर्म्मः । पुं । त्रय्या विधीयमाने ज्यो तिष्टोमादिकर्म्मणि ॥ त्रय्याःधर्मः त्र यीधर्मः ॥

त्रयीमुखः । पुं । ब्राह्मणे ॥ त्रयी मुखे यस्य ॥

त्रयोदशः । त्रि । त्रयोदशानाम्पूरणे ॥ तस्यपूरणेडट् ॥

त्रयोदश । त्रि । सङ्ख्याविशेषे १३ । ते रह इति भाषा ॥ सङ्ख्येये ॥ त्रय श्च दशच । त्र्यधिकादशेति वा । त्रे स्त्रय इतित्रयस् । कस्त्वोत्वगणाः ॥

त्रयोदशी । स्त्री । तिथिविशेषे ॥ सा चन्द्रस्य त्रयोदशकलाक्रियारूपा च त्रयोदशकलाक्रियावच्छिन्नकालरूपा वेति तिथ्यादितत्त्वम् ॥ रूपान्वितः सात्त्विकभावहीनः सुखीचवाल्ये ज नतीप्रियश्च । सदालसः शिल्पगुणै कवेत्ता त्रयोदशी जन्मतिथिर्यदि स्यात् ॥

त्रय्यात्मा । पुं । सूर्ये ॥ त्रयीआत्मास्व रूपंयस्य ॥

त्रसम् । न । वने ॥ त्रि । जङ्गमे ॥ त्रस ति । त्रसीउद्वेगे । पचाद्यच् ॥

त्रसनः । त्रि । सन्त्रासयुक्ते ॥

त्रसरः । पुं । तन्तुवायोपकरणविशेषे । सूत्रवेष्टने । तासनी इति गौडभा षा ॥ त्रसनम् । त्रसी० । अरन् ॥

त्रसरेणुः । पुं । परमाणुषट्के । संयु ताद्व्यणुकत्रये ॥ जालान्तरगतेभानौ यत्सूक्ष्मं दृश्यते रजः । प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥ वैद्य कपरिभाषया त्रिंशत् परमाणुप रिमाणे । ध्वंस्याम् ॥ यथा । जाला न्तरगतेसूर्यकरे ध्वंसीविलोक्यते । त्रसरेणुस्तु विज्ञेय स्त्रिंशता परमाणु भिरिति ॥ स्त्री । सूर्यपत्न्याम् ॥

त्रस्तः । त्रि । भीते ॥ चकिते ॥ न । शीघ्रे ॥

त्रस्नुः । त्रि । त्रासशीले । भीरौ ॥ त्रस्य ति । त्रसी० । त्रसिगृधिधृषिक्षिपेः

क्तः । नेड्वशीतिनेट् ॥

त्राणम् । न । त्रायमाणायामोषधौ ॥ रक्षणे ॥ त्रि । रक्षिते ॥ त्रायते स्म । त्रैङ् पालने । क्तः । नुदविदेति पक्षे नत्वम् ॥ रक्षके ॥ त्रायते । कर्त्तरि ल्युट् वा ॥

त्राणा । स्त्री । त्रायमाणायाम् ॥

त्रातः । त्रि । रक्षिते ॥ त्रायते स्म । त्रैङ्० । क्तः । नुदविदोन्दत्राघ्राह्रीभ्यो न्यतरस्यामिति पक्षे नत्वाभावः ॥

त्राता । त्रि । पालयितरि ॥ त्रायते । त्रैङ्० । तृच् ॥

त्रान्तः । पुं । त्रावसाने शब्दे ॥ त्रोन्तेयस्य । यथा । यावान् कश्चित् त्रान्तः शब्दोऽयं नपुंसके तु बोद्धव्यः ॥ यथा । पत्रच्छत्रछत्रमित्रकलत्रादयो नपुंसकाः पठ्यन्ते ॥

त्रापुषम् । त्रि । त्रपुणो विकारे ॥ त्रपुजतुनोः षुगित्यण् ॥

त्रायन्ती । स्त्री । वार्षिके । त्रायमाणायाम् । बलभद्रिकायाम् ॥ त्राणं त्राः । संपदादित्वात् क्विप् । त्राम् अयति । इगतौ । शतृप्रत्ययः । उगितश्चेति ङीप् ॥ त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा । ज्वरहृद्रोगगुल्मास्रभ्रमशूलविषप्रणुत् ॥

त्रायमाणः । त्रि । रक्ष्यमाणे ॥

त्रायमाणा । स्त्री । लता इति बहुला

इति च गौडभाषाप्रसिद्धायां देवबलायाम् । वार्षिकौषधौ । त्रायन्त्याम् ॥ अस्या गुणा यथा । शीतत्वं मधुरत्वं गुल्मज्वरकफास्रभ्रमतृष्णाक्षयग्लानिविषच्छर्द्दिविनाशित्वमिति राजनिर्घण्टः ॥ त्रायते । त्रैङ्० । शानच् चानश् वा ॥

त्रासः । पुं । भये ॥ त्रसी उद्वेगे । घञ् ॥ मणिदोषे ॥

त्रासजिह्मः । त्रि । भयक्लिष्टे ॥ त्रासेन जिह्मः ॥

त्रासदायी । त्रि । भयदातरि । शङ्खे ॥ इति हेमचन्द्रः ॥

त्रासनः । त्रि । भयावहे ॥

त्रयः । पुं । त्रिसङ्ख्यायाम् । तीन इति भाषा ॥ त्रि । सङ्ख्येये । त्रिसङ्ख्याविशिष्टे ॥ यथा त्रयो देवाः न तु देवानां त्रयः ॥ तरति । तॄ० । तरतेर्ड्रिः । त्रयः त्रीन् त्रिभ्य इत्यादि रूपाणि ॥ तिस्रो भार्याः शिशवास्त्रयो भृत्याश्च बान्धवाः । ध्रुवं वेदविरुद्धाश्च न ह्येते मङ्गलप्रदाः इति ब्रह्मवैवर्त्तपुराणम् ॥

त्रिंशः । त्रि । त्रिंशत्तमे । तीसवाँ इति भाषा ॥ त्रिंशतः पूरणः । तस्य पूरणे डट् ॥

त्रिंशकः । त्रि । त्रिंशद्भिः क्रीते ॥ त्रिंश

त्रिंशदभ्यांशवुणसंख्यायामित्यसं-
ख्यायामार्हीयेष्वर्थेषु डवुन् । टि
लोप: ॥

त्रिंशत् । स्त्री । सङ्ख्याविशेषे । तीस
इतिभाषा ॥ सङ्ख्येये ॥ त्रयोदश
त: परिमाणमस्य । पङ्क्ति विंशति
त्रिंशच्चत्वारिंशदितिनिपातनात् प्र-
कृतेस्त्रिन् भाव: शच्च प्रत्यय: ॥

त्रिंशत्पत्रम् । न । कुमुदे । कैरवे ॥ त्रिंश
त्सङ्ख्यकानिपत्राणि यस्मिन् तत् ॥

त्रिंशांश: । पुं । राशेस्त्रिंशदंशे ॥ यथा ।
पञ्चपञ्चाद्रिवाणा विषमेत्रिंशदंश
का: । माहेयशनिजीवज्ञशुक्राणां व्यु
त्क्रमात्समे ॥ विषमराशौ कुज-
शनिगुरुबुधशुक्राणां पञ्चपञ्चाष्टसप्त
पञ्चमितास्त्रिंशदंशका: क्रमात्ज्ञेया:
। समराशौ व्युत्क्रमात् तेषां विपर्यये
ण त्रिंशांशाज्ञेया: ॥ यथा मेषोविष
मराशि: तत्र प्रथमावधिपञ्चांशा भौ
मस्य । षष्ठांशमारभ्य दशमांशपर्य
न्तं पञ्चांशा: शने: । एकादशांशमा
रभ्याष्टादशांशपर्यन्तमष्टावंशागुरो:
। ऊनविंशांशमारभ्य पञ्च विंशांश-
पर्यन्तं सप्तांशाबुधस्य । तत: षड्विंशां
शमारभ्य त्रिंशांशपर्यन्तं पञ्चांशा:-
शुक्रस्य त्रिंशांशा:क्रमात्ज्ञेया: । मि
थुनसिंहतुलाधनु:कुम्भेष्वप्येवम् ॥
समराशौ व्युत्क्रमाद्यथा । वृषेप्रथ-
मांशमारभ्य पञ्चांशाभृगो: । ततो
द्वादशांशपर्यन्तं सप्तांशाबुधस्य । त
तोविंशांशपर्यन्तमष्टावंशागुरो: । त
त: पञ्चविंशांशपर्य्यन्तं पञ्चांशा:शने:
। ततस्त्रिंशदंशपर्यन्तं पञ्चांशा: कुज
स्य त्रिंशांशा: ॥ एवंकर्ककन्यावृश्चि-
कमकरमीनेष्वपिबोध्या: ॥

त्रिकम् । न । पृष्ठाधरे । पृष्ठवंशाधोभागे
। कटिभागे ॥ त्रये ॥ त्रिपथसंस्थाने
॥ त्रिफलायाम् ॥ त्रिकटुनि ॥ त्रिम
दे ॥ यथा । गुडूचीसारसंयुक्तात् त्रि
कषयसमन्वयात् । वातरक्तं निह-
न्त्याशु सर्वरोगहरन्त्वय: ॥ त्रयाणां
सङ्घ: । सङ्ख्याया: संज्ञासङ्घसूत्रा
ध्ययनेष्वितिकन् ॥ तृतीयके ॥ तृ
तीयेनरूपेण ग्रहणं ग्रन्थस्य । तावति
थं ग्रहणमितिलुग्वेति कन् पूरणप्र
त्ययस्यच वालुक् ॥ पुं । गोक्षुरे ॥

त्रिककुत् । पुं । त्रिकूटाचले ॥ त्रीणि
ककुत् सदृशानि शृङ्गाण्यस्य ॥

त्रिककुद्धामा । पुं । विष्णौ ॥ ऊर्द्ध्वाधो
मध्याभेदेन तिसृणां ककुभां धाम
त्राश्रयोय: ॥ तिसृणां ककुभांदिशां
समाहार इतिविग्रहे तद्धितार्थोत्त
रपदसमाहारेचेति समाहारेद्विगु
रेकवचनमित्येकवद्भावे सनपुंस-

कमितिनपुंसकत्वेन त्रिककुप् तस्य धाम अधिष्ठानं प्रकाशो वेति। इदञ्च समासात्मकमेकंनाम। त्रिकक्कुभामितिभाष्यं न विग्रहप्रदर्शकं किन्तु फलितार्थकथनम्॥

त्रिकटः। पुं। गोक्षुरके॥

त्रिकटु। न। कटुत्रिके। त्र्यूषणे। व्योषे॥ विश्वोपकुल्यामरिचं त्रयं त्रिकटुकाच्यते॥ त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्। गुल्ममेहकफस्थौल्यमेदः श्लीपदपीनसान्॥ त्र यायां कटूनां मरिचशुण्ठिपिप्पलीनां समाहारः॥

त्रिकण्टः। पुं। गोक्षुरके॥ पञ्चगुप्ते। क्षुद्रीप्रभेदे। तिकांटाखूदर इतिभाषा॥ टेङ्गरा इतिगौडप्रसिद्धे मत्स्ये॥ न। कण्टकत्रये। मिलित वृहच्छ्वदंष्ट्रानीदुस्पर्शात्रयरूपे॥ त्रीणि कण्टकानि यस्य यस्मिन्वा॥

त्रिकण्टकः। पुं। गोक्षुरकवृक्षे॥ लघुगर्गमत्स्ये॥

त्रिकर्म्मकृत्। पुं। इज्याध्ययनदानानां कर्त्तरि॥

त्रिकशूलम्। न। वातजन्यव्यथाविशेषे॥ स्फिगस्थ्नोः पृष्ठवंशास्थ्नो यः सन्धिस्तत्त्रिकं स्मृतम्। तत्र वातेन या पीडा त्रिकशूलं तदुच्यते॥

त्रिका। स्त्री। कूपस्थनेमौ। कूपस्थान्ते रज्ज्वादिधारणयन्त्रे॥ तिस्रोऽवयवाऽस्याः। सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्वितिकन्॥

त्रिकायः। पुं। सुगते॥ त्रयःकाया अस्य॥

त्रिकार्षिकम्। न। मिलितनागराऽतिविषामुस्तात्रयरूपे॥

त्रिकालम्। न। कार्यकालतत्पूर्वापरकालेषु॥

त्रिकालज्ञः। त्रि। सर्वज्ञे॥ पुं। बुद्धे॥ त्रिकालं जानाति। ज्ञा०। आतइत्यिकः॥

त्रिकालदर्शी। पुं। मुनौ॥ त्रि। सर्वज्ञे। भूतभविष्यद्वर्त्तमानवेत्तरि॥ त्रिकालं पश्यति। दृशिर्०। गृह्यादित्वाणिनिः॥

त्रिकालवित्। पुं। बुद्धे॥ त्रि। त्रिकालज्ञे॥ त्रिकालंवेत्ति। विद०। क्विप्॥

त्रिकूटः। पुं। त्रिककुत्पर्वते। लङ्कापुराधारे। सुवेले॥ क्षीरोदार्णवतीरवर्त्तिनिशैलविशेषे। यत्र गजेन्द्रो गरुडगामिना श्रीनारायणेनोद्धृतः। अस्यवर्णनं वामनपुराणे द्रष्टव्यम्॥ न। सामुद्रलवणे॥

त्रिकूटपर्वतः। पुं। तीर्थविशेषे॥

त्रिकूटलवणम्। न। द्रोणीलवणे॥

त्रिकोणम्। न। लग्नात् नवमपञ्चमस्थानयोः॥ योनौ॥ कामरूपपीठे॥ करतोयां समारभ्य यावद्दिक्करवासिनी। शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम्॥ त्रि। त्र्यस्रे॥

त्रिकोणफलम्। न। शृङ्गाटके॥

त्रिक्षारम्। न। क्षारत्रये॥

त्रिखुरः। पुं। कोकिलाक्षवृक्षे॥

त्रिखम्। न। त्रपुषे॥

त्रिखट्वम्। न। खट्वात्रये॥ तिसृणां खट्वानां समाहारः॥

त्रिखट्वी। स्त्री। त्रिखट्वे॥ द्विगोरिति ङीप्॥

त्रिगङ्गम्। न। तीर्थविशेषे॥

त्रिगणः। पुं। त्रिवर्गे॥ त्रयाणां धर्मार्थकामानां गणः॥

त्रिगर्त्तः। पुं। सुशर्माख्यनृपतेर्देशे। जालन्धरे॥ तद्देशजे त्रिगर्त्ताः॥ गणितान्तरे॥

त्रिगर्त्तकः। पुं। त्रिगर्त्ते॥ त्रिगर्त्त एव। स्वार्थे कः॥

त्रिगर्त्ता। स्त्री। कामुकाङ्गनायाम्॥ घुर्घुरिकायाम्॥

त्रिगुणम्। न। प्रधाने। प्रकृतौ॥ त्रयो गुणाः सुखदुःखमोहा अस्येति व्युत्पत्तेः। तदनेन सुखादीनामात्मगुणत्वं पराभिमतं पराकृतं भवति॥

व्यक्ते॥ सत्त्वरजस्तमस्सु॥ त्रयाणां गुणानां समाहारः॥ त्रि। गुणत्रययुक्ते॥

त्रिगुणा। स्त्री। तुल्यगुणत्रयात्मिकायां प्रकृतौ॥

त्रिगुणाकृतम्। न। त्रिहल्ये। त्रिःकृष्टक्षेत्रे॥ त्रिगुणङ्कृतम्। सङ्ख्यायाश्च गुणान्ताया इति डाच्॥

त्रिगुणात्मकम्। न। अज्ञाने॥ गुणाः लोहितशुक्लकृष्णाः अज्ञानकार्येषु तेजोवन्नेष्वन्तरप्रकृतिषु श्रुतिप्रसिद्धाः। तथाच कार्यगतत्रिरूपेण कारणमप्यज्ञानमव्याकृतात्मकं त्रिरूपेण त्रिगुणात्मकम्। यद्वा रजस्सत्त्वतमो लक्षणास्त्रयो गुणास्तद्युक्तमज्ञानं गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकं भवति॥ त्रयो गुणा आत्मानो यस्य॥

त्रिगुणितः। त्रि। त्रिरावृत्तकृते॥

त्रिजटा। स्त्री। राक्षसीविशेषे॥ सीतापक्षपातिनीयं रावणालये॥ विल्ववृक्षे॥

त्रिजातम्। न। समानतया मिलिते षुत्वगेलापत्रेषु॥ यथा। एलादिभिरुद्दिष्टं त्रिजातं त्रिसुगन्धिकम्। चतुर्जातं सनागन्तु इयं वातकफापहमिति॥

त्रिजातकम्। न। त्रिसुगन्धि। तुल्येषु त्वगेलापत्रकेषु॥ एतच्च रोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत्। लघु पित्ताग्निकृद्वर्ण्यं कफवातविषापहम्॥ त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्। नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥

त्रिणता। स्त्री। धनुषि॥ त्रिषु स्थानेषु नता। पूर्वपदादिति णत्वम्॥ टाप्॥

त्रिणाचिकेतः। पुं। अध्वर्युव्रते॥ तद्योगात् पुरुषे॥ त्रिःकृत्वो नाचिकेतोऽग्निश्चितो येन तस्मिन्॥ तद्विद्यान स्तदध्ययन स्तदनुष्ठानवान् वा य स्तस्मिन्॥

त्रिणेत्रः। पुं। त्र्यम्बके। हरे॥ त्रि। नेत्रत्रयविशिष्टे॥ त्रीणि नेत्राणि यस्य। पूर्वपदात् संज्ञायामग इति गिरिनद्यादीनां वेति वा णत्वम्॥

त्रितक्षम्। न। तक्ष्णां त्रये॥ त्रयाणां तक्ष्णां समाहारः॥

त्रितयम्। न। त्रये॥ त्रयोऽवयवा अस्य। सङ्ख्याया अवयवे तयप्॥

त्रिदण्डम्। न। चतुरङ्गुलगोवालवेष्टनादन्योन्यसम्बन्धे यतेर्दण्डविशेषे॥ पुं। सन्न्यासाश्रमे॥ यथा। यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवती ति विष्णुभागवतम्॥ त्रयाणां दण्डानां समाहारः॥ त्रिदण्डमस्त्यस्य। अच्॥

त्रिदण्डी। पुं। त्रिदण्डधारिणि सन्न्यासिविशेषे॥ वाङ्मनःकायानां निषिद्धाभिधानासत्सङ्कल्पप्रतिषिद्धव्यापारत्यागवति॥ यथा मनुः। वाग्दण्डोऽथ मनोदण्डः कायदण्ड स्तथैव च। यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते इति॥ त्रिदण्डमस्यास्ति। इनिः॥

त्रिदला। स्त्री। गोधापदीलतायाम्॥

त्रिदलिका। स्त्री। चर्मकषायाम्॥ इति शब्दचन्द्रिका॥

त्रिदशः। पुं। देवे। निर्जरे॥ तृतीया यौवनाख्या दशा यस्य सः। त्रिशब्दस्य तृतीयार्थता त्रिविभागवत्। त्रिदशयोः सङ्ख्याऽस्य वेति वहुव्रीहिः। वहुव्रीहौ सङ्ख्येये डजवहुगणात् इति डच्॥ त्रीन् तापान् दशति। दंश दशने। मूलविभुजादित्वात् कः। पृ॰नलोप इति वा॥ जन्मसत्ताविनाशाख्या स्तिस्रो दशाः यस्य। न तु मर्त्त्यानामिव वाल्ययौवनवार्द्धक्याख्याः॥ त्रयस्त्रिंशद्देवमुख्यगणे॥ त्र्यधिका त्रिराहृत्ता दश त्रिदशाः। अधिकाद्य सहपार्थान्तर्भावेनैकार्थीभावः। ते च अर्का द्वादश रुद्रा एकादश वसवोऽष्टौ विश्वेदेवौ चाविति॥ एकएवाच

शब्दकल्पद्रुमोऽभयार्थ इतिकृताधिका रात्रिदशाहस्तव्याख्यातः ॥

त्रिदशगोपः । पुं । इन्द्रगोपकीटे ॥

त्रिदशदीर्घिका । स्त्री । स्वर्गङ्गायाम् ॥

त्रिदशमञ्जरी । स्त्री । तुलस्याम् ॥

त्रिदशवर्त्म । न । नभसि ॥ त्रिदशानां वर्त्म ।

त्रिदशाचार्य्यः । पुं । जीवे । सुरगुरौ ॥ त्रिदशानाम् आचार्यः ॥

त्रिदशाधिपः । पुं । शक्रे ॥

त्रिदशाध्यक्षः । पुं । विष्णौ ॥ गुणत्रयेण सञ्जातानां तिसृणां दशानां जाग्रदादीनां अध्यक्षः स्वामी ॥ त्रिदशानां देवानां वा अध्यक्षः ॥

त्रिदशायुधम् । न । वज्रे ॥

त्रिदशारिः । पुं । दैत्ये ॥ त्रिदशानाम् अरिः ॥

त्रिदशालयः । पुं । स्वर्लोके ॥ त्रिदशानाम् आलयः ॥ सुमेरुपर्वते ॥

त्रिदशावासः । पुं । त्रिविष्टपे । स्वर्गे ॥ त्रिदशानाम् आवासः ॥

त्रिदशाहारः । पुं । अमृते । पीयूषे ॥

त्रिदशेश्वरी । स्त्री । दुर्गायाम् ॥

त्रिदालिका । स्त्री । चर्मकषायाम् ॥

त्रिदिनव्रतम् । न । नैमित्तिकव्रतविशेषे ॥ यथा । शरत्कुक्कुटकोलाश्विकी वत्सोद्विजातयः । शीघ्रसृप्तं चरको पितृश्राद्धेषु त्रिदिनव्रतात् ॥ दिवसेऽस्मिन् निराहारो द्वितीयं कणभोजनः । तृतीयन्तु नयेदह्नि त्रिदिनव्रतम- न्विकेऽतिकुरुत्यात्प्रवसेतुः ॥

त्रिदिनस्पृक् । पुं । त्र्यहस्पर्शे । अहस्तिथिचयस्पर्शे ॥ यथा । त्रिदिनस्पृक् दिनचयस्पर्शनादङ्गः । तथाहोरात्रस्य चाण्वयेन तिथ्यन्तद्वयं यदि स्पृश्यते तदा त्रिदिनस्पृक् स्यादित्यर्थः ॥

त्रिदिवः । पुं । स्वर्गे ॥ त्रयो ब्रह्मविष्णुरुद्राः दीव्यन्त्यत्रेति त्रिदिवः । हलश्चेति घञ् । संज्ञापूर्वकत्वान्नगुणः ॥ यद्वा । सात्त्विकराजसतामसभेदेन त्रिविधा दीव्यन्ति व्यवहरन्ति प्रकाशन्ते वा । इगुपधत्वात्कः ॥ यद्वा तृतीया द्यौः । पञ्चर्थैकविधानम् । वृत्तिविषये सङ्ख्याशब्दस्य पूरणार्थत्वम् ॥ न । खे । नभसि ॥ सुखे ॥

त्रिदिवा । स्त्री । नदीविशेषे ॥

त्रिदिवेशः । पुं । देवे । निर्जरे ॥ त्रिदिवस्य ईशः ॥

त्रिदिवोद्भवा । स्त्री । स्थूलैलायाम् ॥

त्रिदिवौकाः । पुं । देवे । सुरे ॥

त्रिदृक् । पुं । शिवे । महादेवे ॥ त्रि । त्रिनेत्रे ॥

त्रिदोषः । पुं । सन्निपाते ॥ न । वात-

चित्तकफरूपे दोषत्रये ॥

त्रिदोषजः । पुं । त्रिदोषजनिते सन्निपातरोगे ॥ अस्य पूर्वरूपम् । सर्वलिङ्गसमावायः सर्वदोषप्रकोपजे ॥ सर्वदोषप्रकोपजे पूर्वं सर्वलिङ्गसमावायः । इतिश्रयितजृम्भामेघदाहाद्या रुचिसहितानां श्रमादीनां समवायोभवति ॥ * ॥ त्रिज्वरे वातकफोत्थेवा त्रिदोषजेवाद्दशमूलमिश्रः । किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिनेवा त्रिवृताविमिश्रः ॥

त्रिधा । अ । त्रिप्रकारे ॥ यथा । त्रिधाकरोति ॥

त्रिधातुः । पुं । गणेशे ॥ न । धातुत्रये ॥

त्रिधामा । पुं । विष्णौ ॥ शिवे ॥ अग्नौ ॥ मृत्यौ ॥ त्रीणिधामानि स्थानानि भूरादीनि सत्त्वादीनि वा यस्य सः ॥ न । स्त्री । धामत्रये ॥

त्रिधारकः । पुं । गुण्डतृणे ॥

त्रिधारस्नुही । स्त्री । व्यस्त्रे । स्नुहीविशेषे ॥

त्रिधाविशेषः । पुं । सूक्ष्मादिविशेषे ॥ यथा । सूक्ष्मामातापितृजाः सहप्रभूतै स्त्रिधाविशेषाः स्युः । सूक्ष्मास्तेषां नियता मातापितृजानिवर्त्तन्ते ॥ सूक्ष्मशरीरमेकः मातापितृजोद्वितीयः महाभूतनिवृतीयोविशेषः । तेषांमध्ये सूक्ष्मानियताः मातापितृजानिवर्त्तन्ते कीटान्ता वा भस्मान्ता वा विडन्तावेति ॥ त्रिप्रकारकोविशेषः ॥

त्रिधासर्गः । पुं । भूतादिसर्गे ॥ अष्टविकल्पोदैव स्तैर्यग्योनश्चपञ्चधाभवति । मानुष्यश्चैकविधः समासतोयं त्रिधासर्गः ॥ ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रः गान्धर्वः याक्षः राक्षसः पैशाच इत्यष्टविकल्पोदैवः सर्गः । १ ॥ पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधस्तैर्यग्योनः सर्गः । २ ॥ मानुष्यस्त्वेकविधः । ३ ॥ ब्राह्मणाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपिवर्णेष्वविशेषात् ॥

त्रिनयनः । पुं । विषमनयने । शिवे ॥ त्रीणिनयनान्यस्य । क्षुभ्नादिषु चेति निषेधात् पूर्वपदात् संज्ञायामग इतिणत्वाभावः ॥ त्रि । नेत्रत्रयवति ॥

त्रिनयना । स्त्री । उमायाम् ॥ टाप् ॥

त्रिनेत्रः । पुं । शिवे । हरे ॥ त्रीणिनेत्राणियस्य ॥ त्रि । नेत्रत्रयविशिष्टे ॥

त्रिनेत्रचूडामणिः । पुं । शशाङ्के । चन्द्रे ॥

त्रिनेत्रा । स्त्री । वाराहीकन्दे ॥ नेत्रत्रययुक्तायाम् ॥

त्रिपञ्च । त्रि । त्रिगुणितपञ्चसु । पञ्च

दशसु ॥

त्रिपथाङ्गम् । न । पञ्चदशसङ्ख्याङ्केषु निदिध्यासनाङ्गसाधकसाधनविशेषेषु ॥ तानि यथा । यमोऽथ नियमस्त्यागो मौनं देशश्च कालता । आसनं मूलबन्धश्च देहसाम्यञ्च दृक्स्थितिः ॥ प्राणसंयमनञ्चैव प्रत्याहारश्च धारणा । आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ॥ एषान्तु लक्षणं स्वस्वस्थाने ज्ञेयं मनीषिभिः ॥

त्रिपताकम् । न । रेखात्रयाङ्कितभाले ॥

त्रिपत्रः । पुं । विल्वे ॥ न । दलत्रयवति विल्वपत्रे ॥ यथा । विष्णुरुवाच । ऊर्द्धं पञ्चज्ञानिकेन्द्रिय; पत्रं वामं विधिः स्वयम् । अहं दक्षिणपत्रञ्च त्रिपत्रदलमित्यपि तेनेति बृहद्धर्मपुराणे ११ अध्यायः ॥

त्रिपत्रकः । पुं । किंशुकवृक्षे । पलाशे ॥

त्रिपत्री । स्त्री । पत्रत्रये ॥ द्विगोरिति ङीप् ॥

त्रिपथम् । न । त्रिमार्ग्याम् ॥ त्रयाणां पथां समाहारः । तद्धितार्थेति समासः । ऋक्पूरिति समासान्तः । पथः सङ्ख्याव्ययादेरिति क्लीवता ॥

त्रिपथगा । स्त्री । भागीरथ्याम् । गङ्गायाम् ॥ त्रीन् पथो गच्छति । त्रिभिः पथिभिर्गच्छति वा । गम् ० । अन्येभ्योऽपीति डः ॥ यथा । त्रिपथेन गच्छति । डः ॥ टाप् ॥ क्षितौ तारयते मर्त्यान् नागांस्तारयतेऽप्यधः । दिवि तारयते देवांस्तेन त्रिपथगा स्मृता ॥

त्रिपदा । स्त्री । ऋग्विशेषे ॥ त्रयः पादा अस्याः । सङ्ख्यासुपूर्वस्येति पादस्यान्त्यलोपः । टाबृचीति टापि भस्यात् पादः पत् ॥ हंसपदीवृक्षे ॥

त्रिपदिका । स्त्री । तिपाई इति प्रसिद्धे आधारविशेषे ॥ अष्टाधातुनिर्मिते त्रिपादयुक्ते शङ्खादिपात्राधारे ॥

त्रिपदी । स्त्री । गोधापदीलतायाम् । हंसपद्याम् ॥ हस्तिगात्रबन्धे ॥ त्रिपदी पादबन्धनमिति यादवः ॥ शङ्खादिपात्राधारे ॥ त्रयः पादा अस्याः सङ्ख्यासुपूर्वस्येति पादशब्दस्यान्त्यलोपः । पादोऽन्यतरस्यामिति ङीपि भत्वात् पादः पदिति पद्भावः ॥ पादत्रययुक्तायाम् ॥ भाषाकवितायाश्छन्दोविशेषे । यथा । पञ्चकटिकान्ता यदियमकान्ता द्वादशपरिमितमात्रा । किन्नरगीतिस्तदिति निवीतिः स्यार्द्धसमाक्षरगात्रा ॥ त्र्यपादास्तदुदाहृतः ॥ यैषा सङ्गीतकेऽनित्यं निवीतिः किन्नराख्यिका ॥ सैव स्यात् प्राकृते गाने त्रपदीति परिश्रुता ॥ इति काव्योदयः ॥

त्रिपर्णः । पुं । किंशुके ॥

त्रिपर्णा । स्त्री । वनकार्पास्याम् ॥

त्रिपर्णिका । स्त्री । कन्दविशेषे । अम्लवल्ल्याम् । कन्दालौ ॥

त्रिपर्णी । स्त्री । शालपर्ण्याम् ॥ वनकार्पास्याम् ॥ पृश्निपर्णीभेदे ॥

त्रिपात्-द् । पुं । विष्णौ ॥ ज्वरे ॥ त्रयः पादा अस्य । संख्यासुपूर्वस्येतिपादस्यान्तलोपः ॥

त्रिपादिका । स्त्री । हंसपदीलतायाम् ॥

त्रिपिबन् । पुं । वार्ध्रीणसे ॥ नद्यादौ पयः पिबतोयस्य त्रीणिजलं स्पृशन्ति कर्णौजिह्वा च । त्रिभिः पिबति । पा० । शतृ ॥

त्रिपिष्टपम् । न । स्वर्गे ॥ त्रिदशानांपिष्टपम् । पृषोदरादित्वाद्दशशब्दलोपः ॥ तृतीयं पिष्टपम् त्रिपिष्टपम् । पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न प्रयुज्यते त्रिभागवत् । मर्त्त्यपातालापेक्षया तृतीयं पिष्टपं भुवनम् ॥

त्रिपिष्टपसद् । पुं । देवतायाम् ॥ त्रिपिष्टपेदिवि सीदतिवर्त्तते । षद्लृ० । क्विप् ॥

त्रिपुटः । पुं । सतीनके । खिसारीति प्रसिद्धे कलाये ॥ त्रिपुटोमधुरस्तिक्तस्तुवरोरूक्षणो भृशम् । कफपित्तहरोरुच्योग्राहकः शीतलस्तथा ॥ किन्तुखञ्जत्वपङ्गुत्वकारी वातातिकोपनः ॥ तीरे ॥ तालके ॥ हंसभेदे ॥ गोक्षुरे ॥

त्रिपुटा । स्त्री । मल्लिकायाम् ॥ सूक्ष्मैलायाम् ॥ त्रिवृदोषधौ ॥ त्रयः पुटा यस्याः ॥ कर्णस्फोटायाम् ॥ रक्तत्रिवृति ॥ स्थूलैलायाम् ॥ देवीविशेषे ॥

त्रिपुटी । पुं । एरण्डे ॥

त्रिपुटी । स्त्री । त्रिवृतायाम् ॥ त्रयाणां पुटानां समाहारे ॥ त्रयाणां ध्यातृध्यानध्येयादिरूपाणां पुटानामाकाराणां समाहारः । द्विगोरिति ङीप् ॥

त्रिपुटीफलः । पुं । एरण्डे ॥ त्रिपुटीफले यस्य ॥

त्रिपुण्ड्रम् । न । भालस्थतिर्यग्रेखात्रयाङ्किततये ॥ ऊर्द्ध्वपुण्ड्रं द्विजः कुर्यात् क्षत्रियस्त्रिपुण्ड्रकम् । अर्द्धचन्द्रन्तु वैश्यस्य वर्त्तुलं शूद्रयोनिजः ॥ * ॥ विनाभस्मत्रिपुण्ड्रेण विनारुद्राक्षमालया । पूजितोपिमहादेवो न स्यात् तस्यफलप्रदः ॥ तस्मान्मृदापिकर्त्तव्यं ललाटे तुत्रिपुण्ड्रक मितिस्मृतिः ॥ मृत्स्नया भस्मना वापित्रिपुण्ड्रं बिन्दुसंयुतम् । ललाटेतिलकं कुर्याद्गायत्र्या वद्धकुन्तल इतिमहानिर्वाणतन्त्रम् ॥ येषांव पुर्मनुष्याणां त्रिपुण्ड्रे

वाविनाश्रितम्। श्मशानसद्दर्शनत्-श्वाचमेत्यं पुण्ड्रकृज्जनैरिति देवी-भागवतम्॥ अपि च तत्रैव नारदं प्रति नारायणवाक्यम्। त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते। धारयन्ति च ये भक्त्या धारयन्ति तमेव ते॥ तिर्यग्रेखाः प्रदृश्यन्ते ललाटे सर्वदेहिनाम्। तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकमिति॥ त्रयाणां पुण्ड्राणां समाहारः॥ तद्धितार्थेत्यादिना समासः॥

त्रिपुण्ड्रकम्। न। त्रिपुण्ड्रे॥ वक्राललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रकमिति हारावली॥ त्रिपुण्ड्रमेव। स्वार्थे कः॥

त्रिपुरः। पुं। असुरविशेषे॥ न। मयदानवविरचिते कामचारिणि पुरत्रये॥ त्रयाणां पुराणां समाहारः त्रिपुरम्। तद्धितार्थेति समासः। पात्रादित्वात् स्त्रीत्वाभावः॥

त्रिपुरदहनः। पुं। शिवे। हरे॥

त्रिपुरभैरवी। स्त्री। देवीविशेषे॥

त्रिपुरमल्लिका। स्त्री। पुष्पवृक्षविशेषे। श्लेष्मघ्नायाम्। त्रिपुरमालिकेति गौडेषु ख्यातायाम्॥

त्रिपुरमालिका। स्त्री। मोहिन्याम्। बटपत्रायाम्॥

त्रिपुरा। स्त्री। चतुर्वर्गप्रदायां परदेवतायाम्॥ ब्रह्मविष्णुमहेशाद्यैस्त्रिदशैरर्चिता पुरा। त्रिपुरेति तदा नाम कथितं दैवतैस्तव॥ अपि च। त्रिकोणं मण्डलञ्चास्यास्त्रिपुरन्तु त्रिरेखकम्। मन्त्रमप्यक्षरं प्रोक्तं तथारूपत्रयं पुनः॥ त्रिविधा कुण्डलीशक्तिस्त्रिदेवानाञ्च सृष्टये। सर्वं त्रयं त्रयं यस्मात् तस्मात्तु त्रिपुरा मतेति॥

त्रिपुरान्तकः। पुं। महेश्वरे। शूलिनि। शिवे॥ त्रयाणां सुवर्णरौप्यलौहानां मयादिनामकानां दैत्यत्रयाणां वा पुराणि तेषामन्तको नाशकः। त्र्यवयवं पुरं त्रिपुरं तस्यान्तकः॥ त्रयाणां पुराणां समाहारः। पात्रादिरिति कश्चित् तन्न। तथा सति पञ्चपात्रीतिवत् त्रिपुरीति प्रयोगाभावः स्यात्॥

त्रिपुरारिः। पुं। सदाशिवे॥

त्रिपुरी। स्त्री। चेदिपुर्याम्। त्रिपुरा इति प्रसिद्धदेशे॥

त्रिपुषा। स्त्री। कृष्णत्रिवृति॥

त्रिपुष्करम्। न। ब्रह्मकृततीर्थविशेषे। ज्येष्ठमध्यमकनिष्ठेषु त्रिषु पुष्कराभिधह्रदेषु॥ पुं। योगविशेषे॥ यथा। वाराः क्रूरा स्तिथिर्भद्रा नक्षत्रं भद्रपादकम्। आते ऽङ्गारकीयोगो

मरणेऽपि त्रिपुष्करइति ॥

त्रिपुरः । पुं । राजभेदे । प्राजापत्ये ॥

त्रिपृष्ठः । पुं । त्रयाणां लोकानामुपरिस्थिते सत्यलोके ॥

त्रिफला । स्त्री । हरीतक्यादिफलत्रिके ॥ पथ्याबिभीतधात्रीणां फलैः स्यात् त्रिफला समैः । फलत्रिकञ्च त्रिफला सा वराच प्रकीर्त्तिता ॥ त्रिफला कफपित्तघ्नी मेहकुष्ठहरी सरा । चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी ॥ त्रयाणां फलानां समाहारः । अजादित्वात् द्विगोरिति न ङीप् ॥

त्रिफली । स्त्री । त्रिफलायाम् । इति राजनिर्घण्टः ॥

त्रिवलीकम् । न । पायौ ॥

त्रिभङ्गी । स्त्री । मात्रावृत्तान्तरे ॥ यथा । प्रथमं यदि दशमं वहति विरामं तदनु निकामं वसुवसुकम् वसुविमलतुरङ्गम मतिहृदयङ्गम भूषितभुजङ्गम नृपतिलकम् । चिंशद्विकलासंविहितनिवासं सततविलासं हृदयमुदे मदमुदितभुजङ्गी मोहनरङ्गी वदति त्रिभङ्गीवृत्तमदः ॥ यथा । विविधायुधमण्डित सङ्गरपण्डित रणखण्डितपाखण्डभटे चण्डासुरखण्डिनि हरपुरमण्डिनि शम्बरखण्डनिवद्धजटे । भवसागरतारिणि दुर्गतिवारिणि मङ्गलकारिणि मयि सुचिरम् गिरिराजनिवासिनि शैलविलासिनि शम्भुविलासिनि देहि वरमिति ॥

त्रिभण्डी । स्त्री । त्रिवृतायाम् । श्वेतत्रिधारेतिख्यातौषधौ ॥ त्रीन् दोषान् भण्डते । भण्डिपरिभाषणे । कर्मण्यण् । ङीप् ॥

त्रिभद्रम् । न । सुरते ॥ इति त्रिकाण्डशेषः ॥

त्रिभुवनम् । न । स्वर्गमर्त्त्यपातालात्मके लोकत्रये । त्रिलोक्याम् ॥ त्रयाणां भुवनानां समाहारः ॥ तद्धितार्थेत्यादिना समासः ॥

त्रिमदः । पुं । मुस्ताचित्रकविडङ्गेषु ॥

त्रिमदोत्पथः । त्रि । त्रिभिर्मदैरवृत्ते ॥ विद्यामदो धनमदस्तथैवाभिजनो मदः । एते मदा मदान्धानां त एव हि सतां दमाः ॥

त्रिमधुः । पुं । ऋग्वेदैकदेशे ॥ मधुवाताऋतायत इत्यादि ऋक्त्रयवेत्तरि ॥ यथा । त्रिणाचिकेत स्त्रिमधुस्त्रिसुपर्णः षडङ्गविदिति ॥ न । मधुत्रये । मिलितसितामाक्षिकसर्पिःषु ॥ यथा । दुग्धं सिता माक्षिकञ्च त्रितयं मधुरत्रयम् ॥

त्रिमार्गगा । स्त्री । गङ्गायाम् ॥ त्रिभि

मार्गैर्गच्छतीतिविग्रहः ।

त्रिमार्गी । स्त्री । त्रिपथे ॥ त्रयाणां मार्गाणां समाहारः ॥ ङीप् ॥

त्रिमुकुटः । पुं । त्रिकूटाचले ॥

त्रिमुखः । पुं । बुद्धविशेषे ॥

त्रिमुखा । स्त्री । बुद्धदेवीविशेषे । मायादेव्याम् । वज्रवाराह्याम् ॥

त्रिमूर्त्तिः । पुं । बुद्धभेदे ॥ ब्रह्मविष्णुशिवाख्यमूर्त्तित्रयवति ॥ यथा । त्रिमूर्त्तिर्यःसर्गस्थितिविलयकर्माणितनुते । इतिगङ्गेशोपाध्यायः ॥ तिस्रो मूर्त्तयोयस्य ॥ स्त्री । देवीविशेषे ॥ तिस्रोमूर्त्तयोयस्याः । त्रयोब्रह्माद योत्रामूर्त्तयो यस्याः ॥ एकमूर्त्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये । काव्युतेश्वरतया विवर्त्तते ब्रह्मशक्ति मह मानतोस्मिताम् ॥

त्रियष्टिः । स्त्री । क्षेत्रपर्प्याम् ॥

त्रियामकम् । न । पापे ॥ इतिशब्दमाला ॥

त्रियामा । स्त्री । रात्रौ ॥ त्रयोयामा यस्याः । आद्यन्तयोरर्द्धयोश्चेष्टाकालत्वेन दिनप्रायत्वात् ॥ हरिद्रायाम् ॥ यमुनायाम् ॥ नील्याम् ॥ कृष्णत्रिवृतायाम् ॥

त्रियुगः । पुं । यज्ञपुरुषे ॥ कृतयुगेयज्ञाभावात् । कलौछन्नत्वाद्वा ॥

त्रियूहः । पुं । कपिलाश्वे ॥

त्रिरात्रम् । न । रात्रित्रये । तिसृणांरात्रीणां समाहारे ॥

त्रिरक्तम् । त्रि । विषादादिना त्रिवारोच्चारिते ॥ विषादे विस्मये हर्षे खेदे दैन्येऽवधारणे । प्रसादने सम्भ्रमेपि द्विस्त्रिरुक्तंनदुष्यति ॥

त्रिरेखः । पुं । शङ्खे ॥ त्रि । रेखात्रयविशिष्टे ॥ तिस्रोरेखायस्यसः ॥

त्रिलवः । पुं । तृतीयांशे ॥

त्रिलवणम् । न । लवणत्रये ॥ यथा । सैन्धवञ्च विडञ्चैव रुचकञ्चतृतीयकम् । मिलित्वैतत् त्रिलवणं वैद्यशास्त्रेनिरूपितम् ॥

त्रिलोकात्मा । पुं । अन्तर्यामिणि ॥ त्रयाणां लोकाना मात्मा ॥

त्रिलोकधृक् । पुं । विष्णौ ॥ त्रींल्लोकान् धारयति इति । धृञ् । क्विप्

त्रिलोकी । स्त्री । स्वर्गमर्त्त्यपातालेषु ॥ त्रयाणां लोकानां समाहारः । द्विगोरितिङीप् ॥

त्रिलोकेशः । पुं । सूर्ये ॥ सदाशिवे ॥ त्रयाणां लोकानामीशोऽधिष्ठाता ॥ त्रयोलोका स्तदाज्ञताः स्वेषुकर्मसु वर्त्तन्त इतिवा ॥

त्रिलोचनः । पुं । त्र्यम्बके । शिवे ॥ त्रीणि लोचनानि यस्यसः । त्रिषु कालेषु

लोकेषु गुणेषु वेदेषु वा लोच नं ज्ञानं यस्येति वा । त्रयो वेदाः वर्णा वा अकारोकारमकाराः लोचनानि यस्य वा ॥

त्रिलोचना । स्त्री । दुर्गायाम् ॥ बुद्ध देवी प्रभेदे ॥

त्रिलोचनाष्टमी । स्त्री । गौणचान्द्रज्ये ष्ठस्य कृष्णाष्टम्याम् ॥

त्रिलोहकम् । न । सुवर्णरजतताम्राभि धे धातुत्रये ॥

त्रिलोही । स्त्री । त्रिलोहघटितमुद्रा विशेषे ॥

त्रिवर्ग्गः । पुं । धर्म्मकामार्थेषु ॥ धर्मार्थ कामाः सममेव सेव्या यो ह्येकसक्तः सजनो जघन्यः ॥ * ॥ यथाऽऽनुकूल्यं दम्पत्यो स्त्रिवर्गस्तत्र वर्द्धते ॥ त्रिफला याम् ॥ कटुत्रिके ॥ वृद्धिस्थानक्षये ॥ क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवे दिनाम् ॥ सत्त्वरजस्तमस्सु ॥ त्रया णां वर्गः समूहः ॥ सुनीतौ ॥ इति श ब्दरत्नावली ॥

त्रिवर्गकः । पुं । गोक्षुरके ॥ न । त्रिफ लायाम् ॥ त्र्यूषणे । कटुत्रिके ॥ ब्रा ह्मणक्षत्रियविट्सु ॥

त्रिवर्षिका । स्त्री । त्रिवर्षायाङ्गवि । त्रि हायण्याम् ॥ त्रीणिवर्षाणि वयोय स्याः सा त्रिवर्षा । ततः स्वार्थे कः ॥

त्रिविक्रमः । पुं । विष्णौ ॥ बलिबन्ध नार्थं भूव्योमस्वर्गेषु त्रिषु लोकेषु गु णेषु वा त्रयो वा विक्रमाः पादन्यासा यस्य सः । त्रिरित्येव त्रयो लोकाः कीर्त्ति तामुनिसत्तमैः । क्रमते तांस्त्रयान् सर्वां स्त्रिविक्रमो जनार्द्दनः ॥ इति हरिवंशः ॥ त्रीँल्लोकान् विशेषेण क्रामति व्या प्नोति वा । क्रमु० । अच् ॥

त्रिविधः । त्रि । त्रिप्रकारे ॥ तिस्रो वि धा यस्य सः ॥

त्रिविधसर्ग्गः । पुं । त्रिधासर्गे ॥

त्रिविष्टपम् । न । स्वर्गे । सुरलोके ॥ विशन्त्यस्मिन् सुकृतिन इति विष्टप म् । विटपपिष्टपविशिपोलपा इति विशेरौणादिकः कपन् प्रत्ययः तस्य तुट् । व्रश्चेति षत्वम् । रूपे पिष्टपे ति पाठ उज्ज्वलदत्तटीकोक्तः । अ न्ये तु विष्टपेति दन्त्योष्ठादिमेव पठन्ति । युक्तञ्चैतत् । यतः भ्रस्य विष्टपमि त्यादौ तथा दर्शनात् । अमरकोषे पि विष्टपं भुवनं जगदिति प्रचुरपा ठाच्च ॥ तृतीयं विष्टपम् ॥ त्रिभुवने ॥

त्रिविष्टपसद् । पुं । देवे । सुरे ॥

त्रिबीजः । पुं । श्यामाके ॥ इति राजनि र्घण्टः ॥

त्रिवृत् । स्त्री । त्रिवृतायाम् । सुवहाया म् । श्वेतनिशोथ इति प्रसिद्धौषधौ

॥ श्वेतात्रिवृद्रोचनी स्यात् स्वादुरुष्णा समीरहृत् । रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ॥ श्वेतकृष्णप्रभेदेन द्विविधा त्रिवृदुच्यते । श्यामात्रिवृत्ततोहीनगुणा तीव्रविरेचिका ॥ मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी ॥ त्रीन् अवयवान् वृणोति । वृञ् । क्विप् तुक् ॥

त्रिवृता । स्त्री । त्रिवृदोषधौ ॥ त्रिभिरवयवैर्वृता ॥

त्रिवृत्करणम् । न । तेजोवन्नानां मिश्रीकरणे ॥ तत्प्रकारो यथा । तेजोवन्नानां त्रयाणां मध्ये एकैकं द्विधा समं विभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयं स्थूलं भागं परित्यज्यान्यदीयस्थूलभागयोरेकैकस्य भागस्य संयोजनमिति ॥

त्रिवृत्पर्णी । स्त्री । हिलमोचिकायाम् ॥

त्रिवृद्वेदः । पुं । त्रयाणाम् । ऋग्यजुःसामात्मके वेदे ॥ प्रणवे ॥ ऋचो यजूंषि सामानि तामानि विविधानि च । एष एव त्रिवृद्वेदो यो वेदैनं स वेदवित् ॥ आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता । स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥ त्रयाणामात्मना त्रिरावर्त्तते इति त्रिवृत् स चासौ वेदश्चेति कर्मधारयः ॥

त्रिवेणी । स्त्री । स्थानविशेषे ॥ सा द्विधा । युक्तवेणीमुक्तवेणीतिभेदात् । तत्र प्रयागे युक्तवेणी गङ्गया यमुनासरस्वत्योः सङ्गमात् ॥ दक्षिणप्रयागे मुक्तवेणी गङ्गया यमुनासरस्वत्योर्वियोगात् ॥ दक्षिणप्रयागस्य सीमानिर्णयो यथा । प्रद्युम्नस्य ह्रदाद्याम्ये सरस्वत्यास्तथोत्तरं । तद्दक्षिणप्रयागन्तु गङ्गातो यमुना गतेति ॥ * ॥ सगरसन्ततिसन्तरणेच्छया प्रचलितातिजवेन हिमालयात् । इयत्तु मन्दमुपैति सरस्वतीयमुनयोर्विरहादिव जाह्नवीति नदियाधिपतिश्रीशचन्द्रराजस्य सभास्थो वागीश्वरविद्यालङ्कारः ॥

त्रिवेणुः । पुं । रथमुखस्थेऽवयवविशेषे ॥

त्रिवेदः । पुं । वेदत्रयवेत्तरि ॥

त्रिवेदी । पुं । त्रिवेदश्चे ॥

त्रिवेदी । स्त्री । वेदत्रये ॥ त्रयाणां वेदानां समाहारः । द्विगोरिति ङीप् ॥ ऐहिकपारमुकसौमिकवैदिकाचये ॥

त्रिवेला । स्त्री । त्रिवृति ॥

त्रिशक्तिधृक् । पुं । भगवति ॥ त्रिशक्तिर्माया तां धरतीतिविग्रहः ॥

त्रिशङ्कुः । पुं । सूर्यवंशीयनृपविशेषे ॥ शलभे ॥ वृषदंशके । मार्जारे ॥ चातके ॥ खद्योते ॥

त्रिशङ्कुजः । पुं । हरिश्चन्द्रनृपे ॥

त्रिशङ्कुयाजी । पुं । विश्वामित्रे ॥

त्रिशरणः । पुं । बुद्धे । जिने ॥

त्रिशर्करा । स्त्री । मिलितगुडोत्थ-शर्करोपलसितामधुरेति राजनिर्घण्टः ॥

त्रिशला । स्त्री । वृत्तार्हन्मातृविशेषे । वर्द्धमानमातरि ॥

त्रिशाखपत्रः । पुं । बिल्वे । मालूरे ॥

त्रिशिखः । पुं । राक्षसान्तरे । रावणपुत्रे ॥ बिल्वे ॥ न । त्रिशूले ॥ मण्डलान्तरे ॥ किरीटे ॥ त्रि । शिखात्रयवति ॥

त्रिशिखिदला । स्त्री । मालाकन्दे ॥

त्रिशिरा४ । पुं । ज्वरे ॥ कुबेरे ॥ रावणपुत्रविशेषे ॥ खरसेनापतौ ॥ त्री शिरांसि यस्य ॥

त्रिशीर्षकम् । न । त्रिशूले ॥

त्रिशूलम् । न । अस्त्रविशेषे । त्रिशिखे ॥ त्रयाणां शूलानां समाहारः ॥

त्रिशूली । पुं । शिवे ॥ त्रि । त्रिशूलधारिणि ॥

त्रिशृङ्गः । पुं । त्रिकोणे ॥ त्रिकूटाद्रौ ॥ त्रीणि शृङ्गाण्यस्य ॥

त्रिशृङ्गी । पुं । रोहितमत्स्ये ॥

त्रिष्टुप् । स्त्री । एकादशाक्षरायां वृत्तौ ॥

त्रिसप्तः । त्रि । परदेवतायाम् । परमेश्वरे ॥ त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानन्तरं स्थितिकाले च सत्त्वो ऽव्यभिचारेण वर्त्तमानत्वात् ॥

त्रिसन्धिः । स्त्री । पुष्पविशेषे । सन्ध्याकुसुमे । फागनिया इति भाषा ॥ पूर्वापरमध्यसन्धौ ॥

त्रिसन्ध्यम् । न । प्रातापराह्णमध्याह्ने । त्रिकाले ॥ प्रातः सूर्योदयः काले । मध्याह्नकादमन्तरम् । सायंसूर्यास्तमय त्रिकालानामयङ्कमदतिनिर्वाणतन्त्रम् ॥ तिसृणां सन्ध्यानां समाहारः । आवन्तोवेतिपाक्षिकीक्लीवता ॥ पुष्पविशेषे ॥

त्रिसन्ध्या । स्त्री । जपापुष्पे ॥ देवीविशेषे ॥ अस्याः स्थानं कुरुक्षेत्रीयम् ॥

त्रिसमम् । न । समत्रये । समधरीतकीनागरगुडरूपे ॥

त्रिसरः । पुं । कृशरे ॥ इति हेमचन्द्रः ॥

त्रिसरकम् । न । त्रिवारमधुपाने ॥ त्रयाणां सरकाणां समाहारः । तद्धितार्थेत्यादिना समाहारे द्विगुः । पात्रादित्वान्नपुंसकत्वम् ॥

त्रिसवनम् । न । त्रिकाले । त्रिसन्ध्ये ॥

त्रिसामा । स्त्री । नदीविशेषे । महेन्द्राद्रेः चरन्त्यां स्रवन्त्याम् ॥

त्रिसिता । स्त्री । त्रिशर्करायाम् ॥

त्रिसौचम् । न । त्रिःकृतशौचे । त्रिव

ल्पे ॥ त्रिवारं सीतया समितम् ॥ नौ
वयोधर्म्मैक्यादित्यायत् ॥

त्रिसुगन्धि । न । त्रिजातके ॥ त्वगेला
पत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजात-
कम् ॥

त्रिसुपर्णः । पुं । बह्वृचानां वेदभागे ते
षां व्रते च ॥ तद्योगात् पुरुषे ॥

त्रिस्रोताः । स्त्री । गङ्गायाम् ॥ त्रीणि
स्रोतांसि यस्याः ॥ नद्यन्तरे ॥

त्रिहल्यम् । न । त्रिगुणाकृते । तृतीया
कृते । त्रिसीत्ये ॥ त्रिवारं हलेन कृ
ष्टम् । मतजनहलात् करणजल्पकर्षे
ष्विति यत् ॥

त्रिहायणी । स्त्री । त्रिवर्षायां गवि । त्र्य
ब्दायाम् ॥ त्रयो हायना यस्याः । दाम
हायनान्ताच्चेति ङीप् ॥ त्रिचतुर्भ्यां हा
यनस्येति णत्वम् ॥ द्रौपद्याम् ॥ यथा ।
कृते युगे वेदवती त्रेतायां जनकात्म
जा । द्वापरे द्रौपदी छाया तेन कृष्णा
त्रिहायणीति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डम् ॥

त्रुटनम् । न । विच्छेदे । टूटना इति
भाषा ॥

त्रुटिः । स्त्री । संशये ॥ लेश । स्वल्पे ॥
सूक्ष्मैलायाम् ॥ कालमाने । लवद्व
ये ॥ द्वयोर्निमेषयोः ॥ त्रुट्यते ऽने
नवा । त्रुट छेदने । इगुपधात्किदि

तीन् ॥

त्रुटितः । त्रि । छिन्ने ॥

त्रुटिवीजः । पुं । कच्व्याम् ॥ इति श-
ब्दमाला ॥

त्रुटी । स्त्री । त्रुट्यर्थमात्रे ॥ कृदिकारा
दिति ङीष् ॥

त्रेता । स्त्री । द्वितीययुगे । कृत्ययुगान
न्तरयुगे ॥ अस्य परिमाणं यथा । त्रि
चत्वारिंशल्लक्षेण विंशत्सहस्राधिके
न च । चतुर्युगं परिमितं नरमान
क्रमेण च ॥ द्विषड्लक्षपरिमितं ष-
ण्णवतिसहस्रकम् । त्रेतायुगं परिमि
तं कालविद्भिः प्रकीर्त्तितमिति ब्रह्म
वैवर्त्ते प्रकृतिखण्डम् ॥ * ॥ तद्धर्मा
यथा ॥*॥ त्रेतायुगे समायाते धर्म्मः पा
दोनतां गतः । सत्यक्षेमान्विता लो
काः केचित् केचिद्दयामयाः ॥ वि-
ष्णुध्यानरता लोका यज्ञदानपराय-
णाः । वर्णाश्रमाचाररताः सुखिनः
सुस्थचेतसः ॥ क्षत्राभूमिस्पृशः शूद्राः
सर्वे ब्राह्मणसेविनः । ब्राह्मणाश्च महा
त्मानो वेदवेदाङ्गपारगाः ॥ प्रतिग्रह
निवृत्ताश्च सत्यसन्धा जितेन्द्रियाः-
। तपोव्रतपरा नित्यं दातारो विष्णु
सेविनः ॥ कालवर्षी तडित्वांश्च स्त्रि
यः सर्वाः पतिव्रताः । वसुन्धरा च सस्या
ढ्या पुत्राश्च पितृसेविन इति पाद्मोक्ति

यायोगसारः ॥ * ॥ अथाचाराभगवतीजीवानां निष्कृतिं यथा ॥ कृते व्यतीते त्रेतायां दृष्ट्वा धर्म्मव्यतिक्रमम् । वेदोक्तकर्म्मभिर्मर्त्त्या न शक्ताः स्वेष्टसाधने ॥ बहुक्लेशकरं कर्म्म वैदिकं भूरिसाधनम् । कर्त्तुं न योग्या मनुजाश्चिन्ताव्याकुलमानसाः ॥ त्यक्तुं कर्त्तुं न चार्हन्ति सदा कातरचेतसः । वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले ॥ तदा त्वं प्रकटीकृत्य तपःस्वाध्यायदुर्बलान् । लोकानतारयः पापात् दुःखशोकामयप्रदात् ॥ त्वां विना कोऽस्ति जीवानां घोरसंसारसागरे । भर्त्ता पाता समुद्धर्त्ता पितृवत् प्रियकृत् प्रभुः ॥ इति श्रीमहानिर्वाणतन्त्रे जीवोद्धारणहेतवे जगन्मातुः सदाशिवं प्रतिवाक्यम् ॥ त्रीन् भेदानेति । पृ० ॥ त्रेतायै ॥ एकोक्त्या दक्षिणाग्निगार्हपत्याहवनीयात्मके अग्नित्रये ॥ त्राणां त्राः सदासम्भुत्वम् । त्रामिता ॥ यद्वा । त्रायन्तेऽत्राहुतयः । त्राभिरिता । त्रित्वमितेति वा । पृषोदरादिः ॥ त्रीणि इता वा । पृषोदरादित्वादेत्वम् ॥

त्रेतायः । पुं । द्यूतक्रीडासाधनीभूताक्षक्षितस्य यस्मिन्भागे त्रयोऽङ्का भवन्ति तस्मिन् ॥ त्रेतासंज्ञकोऽक्षः ॥

त्रेधा । अ । त्रिधा । त्रिप्रकारे ॥ संख्याया विधार्थे धा । एधाच्चेति धाप्रत्यये तस्य एधाजादेशः ॥

त्रैककुदम् । न । सौवीराञ्जने ॥

त्रैकाल्यम् । न । कार्यकालमतपूर्वोऽपरकाले ॥

त्रैगुणिकः । पुं । वार्द्धुषिके ॥ त्रिगुणार्थं द्रव्यं त्रिगुणम् । तत् प्रयच्छति त्रिगुणं गृहीतुमेकगुणं ददातीत्यर्थः । प्रयच्छति गर्ह्यमिति ठक् ॥

त्रैगुण्यम् । त्रि । त्रिगुणात्मके । सकामे ॥ न । त्रिषु गुणेषु ॥ त्रयो गुणा एव । ष्यञ् ॥ गुणत्रयकार्यपुण्यपापव्यामिश्रकर्म्मफलसमाहारलक्षणे संसारे ॥

त्रैगुण्यविपर्ययः । पुं । त्रिगुणान्यथात्वे ॥

त्रैगुण्यविषयः । पुं । कर्म्मकाण्डात्मके वेदे ॥ त्रयाणां गुणानां कर्म त्रैगुण्यं तत् काममूलः संसारः स एव प्रकाश्यत्वेन विषयो यस्य सः ॥

त्रैदशिकः । पुं । दैवे ॥

त्रैधम् । अ । त्रैविध्ये । त्रिधा ॥ त्रिप्रकारम् । द्वित्र्योश्च धमुञ् ॥

त्रैधर्म्मम् । न । हौत्राध्वर्यवौद्गात्रधर्म्मत्रयार्हे ज्योतिष्टोमादिके काम्यकर्म्मणि ॥

त्रैपुरः । पुं । त्रिपुरदेशे । चैद्ये । डाहले ॥ इति हेमचन्द्रः ॥

त्रैलोक्यम् । न । स्वर्गमर्त्त्यपातालात्म

के लोकत्रये ॥ त्रयाणां लोकानां समाहारः । त्रिलोकम् । तदेव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ॥

त्रैलोक्यविजया । स्त्री । भङ्गायाम् ॥ इति शब्दचन्द्रिका ॥

त्रैविद्यः । पुं । वेदत्रयवेत्तरि ॥ ऋग्वेदयजुर्वेदसामवेदलक्षणाः तिस्रो धर्माधर्मज्ञानप्रतिपत्तिहेतुत्वात् तिस्रो विद्या यस्य स त्रिविद्यः । स्वार्थे तद्धितः ॥ तिस्रो विद्या वेद । तदधीते तद्वेदेत्यण् वा ॥ याज्ञिके ॥ त्रैविद्यास्यव्रते ॥

त्रैविष्टपः । पुं । अमरे । देवे ॥ त्रिविष्टपे वसति । अण् ॥

त्रैष्टुभम् । न । छन्दोविशेषे ॥ त्रिष्टुबेव । स्वार्थेऽण् ॥

त्रोटकी । स्त्री । रागिणीविशेषे ॥

त्रोटिः । स्त्री । कट्फले ॥ चञ्च्वाम् ॥ खगान्तरे ॥ मीनविशेषे ॥ त्रोट्यते । त्रुट छेदने चु० । इन् ॥

त्रोटिहस्तः । पुं । पक्षिणि ॥ त्रोटिर्हस्तो यस्य सः ॥

त्रोटी । स्त्री । त्रोट्यर्थमात्र ॥

त्रोत्रम् । न । प्राजने । तोदने । गवादिपशुताडनदण्डे ॥ त्रायते । त्रैङ् पालने । अशित्रादिभ्य इत्रोत्रौ । इति उत्रः ॥

त्र्यक्षः । पुं । शिवे ॥ त्रीणि अक्षीणि यस्य सः ॥

त्र्यक्षरः । पुं । प्रणवे ॥ अकारादीनि त्रीण्यक्षराणि यस्मिन् ॥ घटके ॥ इ० त्रि० ॥

त्र्यङ्कटम् । न । शिक्यप्रभेदे ॥ धीमत्याम् ॥

त्र्यङ्गटः । पुं । त्र्यङ्कटे ॥ ईश्वरे ॥

त्र्यङ्गुलम् । न । प्रमाणविशेषे ॥ तिस्रोऽङ्गुल्यः प्रमाणमस्य । तद्धितार्थे इति समासः । द्विगोर्नित्यमिति द्वयसचो लुक् । तत्पुरुषस्याङ्गुलेरित्यच् ॥

त्र्यञ्जनम् । न । कालाञ्जनपुष्पाञ्जनरसाञ्जनात्मकेऽञ्जनत्रये ॥

त्र्यध्वगा । स्त्री । गङ्गायाम् ॥

त्र्यनीका । स्त्री । सेनाविशेषे ॥ त्रयाणामनीकानां समाहारः । अजादेराकृतिगणत्वात् टाप् द्विगोरिति प्राप्तो ङीप् बाध्यते ॥

त्र्यब्दा । स्त्री । त्रिहायण्याम् ॥ त्रयोऽब्दाः वयः प्रमाणमस्याः । मात्रच् । तस्य ध्वंसे इति लुक् ॥

त्र्यम्बकयोगः । पुं । तिथिवारर्क्षात्मकयोगे ॥ नन्दाभौमार्कवारे पवनयुतभिषाद्रौन्त्यचित्राग्निमूलासार्पैर्भद्रासमेता यमिनिभृगुसुते फल्गुयुग्माद्रसुक्षैः । सौम्याद्वै वैजयायाम्मृगमुखहरिभैन्द्राश्विनाभ्याभिजिद्भिर्जीवे रिक्तादितिभिर्बहुविधास्या

नुराधामघाभिः ॥ सौरेपूर्वाधनिष्ठा र्द्रकमचमर्क्षयुक्ता यदि स्यात्योगं चाहुस्त्रिपूर्णं सततशुभकरं चामता स्वं मुनीन्द्राः ॥

त्र्यम्बकः । पुं । महेश्वरे । शिवे । त्रीणि अम्बकानि नयनान्यस्य ॥ त्रयाणां लोकानाम् अम्बकः पितेति वा ॥ त्रीन् वेदान् अम्बते शब्दायते वा । अबि शब्दे । अच्प्रत्ययोपधः । कर्मण्यण् । संज्ञायामिति कः ॥ त्रिषु लोकेषु कालेषु वा अम्बः शब्दो वेदलक्षणोयस्येति वा ॥ अम्बनम् अम्बः शब्दः । त्रयोऽकारोकारमकाराः अम्बाः शब्दाः प्रतिपादकाः वाचकाश्च अस्येति वा ॥ त्रीणि पृथिव्यन्तरीक्षद्युलोकाख्यानि अम्बकानि स्थानानि यस्येति वा । लोकत्रयव्यापीति महेश्वरः ॥

त्र्यम्बकसखः । पुं । कुबेरे ॥ त्र्यम्बकस्य सखा । राजाहः सखिभ्यष्टच् ॥

त्र्यम्बका । स्त्री । त्रिलोकजनन्यामाद्यायाम् ॥ सोमसूर्यानलाक्षित्वात् त्र्यम्बकासा स्मृता बुधैः ॥

त्र्यहस्पर्शः । पुं । त्रिदिनस्पृशि । तिथित्रयस्पर्शयुक्तेऽहनि ॥

त्र्यहस्पृक् । पुं । वारत्रयेप्येकस्यांतिथौ ॥ तिथिर्वारत्रये चैका त्र्यहस्पृक्समुदाहृतम् ॥ अन्यच्च । एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्र्यहस्पृक् तदहोरात्रमुपोष्यास्तासदातिथिः ॥

त्र्यहस्पृशम् । न । त्र्यहस्पर्शे ॥ यथा । एकस्मिन् सावनेत्वह्नि तिथीनांत्रितयं यदा । तदा दिनक्षयः प्रोक्त स्तत्र साहस्रिकं फलम् ॥ अपिच । एकं दिनं यत्र तिथित्रयस्पृशत्तमाहुर्मुनयोऽवमाख्यम् । एकातिथि स्त्रीणि दिनानि यत्र स्पृशेत्तदाहुस्त्रिदिनस्पृशन्तु ॥ त्र्यहस्पृशं नामयदेतदुक्तं तत्र प्रयत्नः कृतिभिर्विधेयः । विवाहयात्राशुभपुष्टिकर्म सर्वं न कार्यं त्रिदिनस्पृशेतु ॥

त्र्यहैहिकः । पुं । दिनत्रयनिर्वाहोचितधने ब्राह्मणे ॥ ईहा चेष्टा तस्यां भवम् ऐहिकम् । त्र्यहपर्याप्तम् ऐहिकं धनं यस्य ॥

त्र्याहिकः । त्रि । तृतीयेऽह्नि भवेज्वरादौ ॥

त्र्युषणम् । न । त्रिकटुनि ॥ ओषति । उषदाहे । ल्युट् । त्रयाणाम् उषणानां समाहारः । पात्रादित्वात् स्त्रीत्वंन ॥

त्र्यूषणम् । न । त्र्युषणे । व्योषे ॥ ऊषति । ऊषदाहे । ल्युट् । त्रयाणामूषणानां समाहारः । पात्रादित्वात् स्त्रीत्वं न ॥

त्वक्क्षीरी । स्त्री वंशलोचनायाम् । स्वार्थिकोऽपि ॥ क्षीराज्जेन्यस्याः । अस्त्यस्यामिति बहुव्रीहौ व ह्वादिभ्यः कृत्प्रत्ययादिति ङीपि तकारस्य ककारादेशे पूर्वपदादिति णत्वम् ॥

त्वः । त्रि । भिन्ने । अन्यस्मिन् ॥ तनोति । तनु ९ । तनोतेरप्रत्ययः । बा हुलकात् । आगमानित्यत्वात् तुम् वै कल्पिकः । केचित्तु बाहुलकमनुव र्तयन्ति ॥

त्वक्कण्डुरः । पुं । व्रणे ॥ इ० वा० ॥

त्वक्क्षीरम् । न । वंशरोचनायाम् ॥ त्वचो वंशात् क्षीरमस्य ॥

त्वक्क्षीरी । स्त्री । वंशरोचनायाम् ॥ गौरादित्वात् ङीष् ॥

त्वक्छदः । पुं । क्षीरीशवृक्षे । क्षीर कञ्चुकी इति गौडभाषा ॥

त्वक्पञ्चकम् । न । पञ्चवल्कले ॥ न्य ग्रोधोदुम्बराश्वत्थपारिशप्लक्षपादपाः । पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ॥ केचित्तु पारिशस्था ने शिरीषं वेतसं परे । वदन्तीति शे षः ॥ त्वक्पञ्चकं हिमं ग्राहि व्रणशो थविसर्पजित् । तेषां पत्रं हिमं ग्राहि व्रणशोथविसर्पजित् ॥ चिकित्सा त्वचिस्तु तिक्तं कषायं लघु लेखनम् ॥ इति क्षीरिवृक्षपञ्चकम् ॥

त्वक्पत्रम् । न । वराङ्गके । गुडत्वचि

॥ त्वचिश पत्र मस्य ॥

त्वक्पत्री । स्त्री । कारव्याम् । हिङ्गुप त्र्याम् ॥

त्वक्पुष्पम् । न । सेहुवाँ इति प्रसिद्धे किलासरोगे ॥ रोमाञ्चे ॥

त्वक्पुष्पिका । स्त्री । किलासे ॥

त्वक्पुष्पी । स्त्री । किलासे ॥ त्रि । कि लासयुक्ते ॥

त्वक्सारः । पुं । वंशे ॥ गुडत्वचि ॥ र न्ध्रवंशे ॥ शोणकवृक्षे ॥ त्वक् त्वचिवा सारोऽस्य ॥

त्वक्सारभेदिनी । स्त्री । क्षुद्रचञ्चुवृक्षे

त्वक्सारा । स्त्री । वंशरोचनायाम् ॥

त्वक्सुगन्धः । पुं । नारङ्गे । नारङ्गी इ तिभाषा ॥

त्वक्सुगन्धा । स्त्री । एलवालुकाख्यग न्धद्रव्ये ॥

त्वक्स्वादी । स्त्री । दारुसितायाम् ॥

त्वगङ्कुरः । पुं । रोमाञ्चे ॥

त्वगक्षीरी । स्त्री । वंशरोचनायाम् ॥

त्वग्गन्धः । पुं । नारङ्गे ॥

त्वग्जम् । न । रुधिरे ॥ रोमणि ॥

त्वग्दोषः । पुं । कोठरोगे ॥

त्वग्दोषापहा । स्त्री । वाकुच्याम् ॥

त्वग्दोषारिः । पुं । हस्तिकन्दे ॥ इति- राजनिर्घण्टः ॥

त्वच् । स्त्री । वल्कले ॥ गुडत्वचि ॥ इ

त्वचीनी द्रविभागः ॥ चर्म्मणि । स्पर्शग्रहणाधिष्ठानेन्द्रियविशेषे ॥ त्वचति । त्वच संवरणे । क्विप् ॥ यद्वा । तनोति तन्यते वा । तनु० । तनोतेरनश्च वः चादिक् प्रत्ययः ॥

त्वचम् । न । त्वचि । चर्म्मणि ॥ वल्कले ॥ त्वक्पत्रे ॥ यथा । त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् । पित्तलं कफवातघ्नं कण्डूआमारुचिनाशनम् ॥ हृद्वस्तिरोगवातार्शः कृमिपीनसशुक्रहृदिति ॥ प्रशस्ता त्वगस्यास्ति । अर्श आद्यच् ॥ त्वचति । त्वच संवरणे । पुंसीति घः ॥

त्वचनम् । न । संवरणे ॥ त्वचो ग्रहणे ॥

त्वचा । स्त्री । त्वचि ॥

त्वचापत्रम् । न । त्वक्पत्रे ॥

त्वचिष्ठः त्रि । त्वचीयसि । अतिशयत्वग्विशिष्टे ॥

त्वचिसारः । पुं । वंशे ॥ रूक्षदन्तादित्वात्सप्तम्या अलुक् ॥

त्वचिसुगन्धा । स्त्री । क्षुद्रैलायाम् ॥

त्वत् । त्रि । भिन्ने । अन्यस्मिन् ॥ तनोति । तनु० । तनोतेरनश्च वः । चात् क्विप् तुक् ॥

त्वदीयः । त्रि । भवदीये ॥ तवायम् । छः । प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वदादेशः ॥

त्वद्विधः । त्रि । त्वत्सदृशे ॥ त्वमेव विधा प्रकारोऽस्य ॥

त्वम्पदलक्ष्यार्थः । पुं । अज्ञानादिव्यष्ट्युपाध्युपहिताधारभूते अनुपहित प्रत्यगानन्दतुरीयचैतन्ये ॥

त्वम्पदवाच्यः । त्रि । त्वम्पदाभिधे ॥ देहादिभिः परिच्छिन्नो जीवस्तु त्वम्पदाभिधः ॥

त्वम्पदवाच्यार्थः । त्रि । अज्ञानव्यष्टिः । एतदुपहिताल्पज्ञत्वादिविशिष्टं चैतन्यम् । एतदनुपहितचैतन्यञ्च । एतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति ॥

त्वम्पदाभिधः । पुं । त्वम्पदवाच्ये । जीवे ॥ आत्मत्वेनतया भाति यो ऽहंमत्प्रत्ययशब्दयोः । अन्तःकरणसम्भिन्नबोधः स त्वम्पदाभिधः ॥ त्वम्पद मभिधा यस्य ॥

त्वरणम् । न । त्वरायाम् ॥

त्वरा । स्त्री । वेगे । सम्भ्रमे । आवेगे ॥ त्वरणम् । ञित्वरा० । घटादयः षित इति षित्त्वात् निर्देशात् अङ् । टाप् ॥

त्वरिः । स्त्री । त्वरायाम् । संवेगे ॥

त्वरितम् । न । शीघ्रे ॥ त्वरते स्म ञि त्वरा सम्भ्रमे । गत्यर्थाकर्म्मकेति क

त्तरि क्तः । त्वय्यम् त्वरसङ्घुषास्व-
नामिति वेट् ॥ त्रि । तद्विशिष्टे । त
रस्विनि ॥ त्वरते । भीतः क्तः ॥ त्व
रासञ्जातास्येति वा । तारकादित्वा
दितच् ॥ शीघ्रार्थेऽयं क्रियाविशेषण
त्वादद्रव्ये वर्त्तमानः क्लीवे । यथा । त्व
रितं गच्छति । द्रव्यवाची तु त्रिलिङ्गः ।
यथा । त्वरितोऽश्वः । उताबलाधो
डा इति भाषा ॥

त्वरितगतिः । स्त्री । पङ्क्तिवृत्तभेदे
॥ त्वरितगतिश्च नजनगैः । यथा ।
त्वरितगतिर्व्रजयुवति स्तरणिसुताबि
पिनगता । मुररिपुणा रतिगुरुणा
परिरमिता प्रमदमितेति ॥

त्वरितोदितः । त्रि । निरस्ते । शीघ्रो
च्चारितेवचसि ॥ त्वरितम् उदितः ॥

त्वष्टः । त्रि । तष्टे । तनूकृते । छीला-
इति भाषा ॥ त्वक्ष्यते स्म । त्वक्षू तनू
करणे । क्तः ॥

त्वष्टा । पुं । देवशिल्पिनि । विश्वकर्म
णि ॥ आदित्यविशेषे ॥ तक्षणि ।
शिल्पिनि । तखा बाइति ख्याती इति च
भाषा ॥ वर्णसङ्करविशेषोऽयम् । शू
द्रागर्भे विश्वकर्मण औरसेन जातः ।
इति ब्र० वै० ब्र० खं० ॥ चित्रानक्ष
त्रदेवतायाम् ॥ त्वक्षति । त्वक्ष्यते वा
। त्वक्षू० । त्वेषति वा । त्विष० । तृन्
नेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमा-
तृपितृदुहितृ इति साधुः । त्विषेर्देव
तायामकारश्चोपधाया अनिट्त्वञ्च
सितृन् वा ॥

त्वा । अ । वितर्के ॥ विशेषे ॥

त्वाचप्रत्यक्षम् । न । स्पर्शज्ञाने । द्रव्या
देःस्पर्शद्वाराबोधे ॥ यथा । अवग्रा
नमात्र त्वक्मनःसंयोगस्य यदि का
रणत्वं तदा रासनचाक्षुषादिकाले
त्वाचप्रत्यक्षं स्यात् । इति सिद्धान्तमु
क्तावली ॥

त्वाष्टक् । त्रि । त्वक्तव्ये ॥

त्वाष्ट्रः । पुं । वृत्रासुरे । त्वष्टुरपत्ये ॥ अ
पत्येऽण् ॥

त्वाष्ट्रम् । न । चित्रानक्षत्रे ॥ त्वष्टा देव
ता अस्य । सास्य देवतेत्यण् ॥

त्वाष्ट्री । स्त्री । संज्ञानाम्न्यां सूर्यपत्न्याम्
॥ क्षुद्ररथे । रथिकायाम् ॥ चित्रान
क्षत्रे ॥

त्विट् । स्त्री । शोभायाम् । कान्ती ॥
वाचि ॥ रुचौ । प्रभायाम् ॥ जिगी
षायाम् ॥ व्यवसाये ॥ त्वेषति । त्वि
षनमनया वा । त्विषदीप्तौ । संप
दादित्वात् क्विप् ॥

त्विषा । स्त्री । त्विडर्थे ॥ भागुरिमते
न टाप् ॥

त्विषाम्पतिः । पुं । सूर्ये ॥ अलुक् ॥

त्विषिः। पुं। किरणे॥ इति हेमचन्द्रः॥

त्वे। अ। } वितर्के॥ विशेषे॥
त्वै। अ। }

त्सरुः। पुं। खड्गादिमुष्टौ। आदिशब्दात् कटितवच्छुरिकादिग्रहः। मूंठ इति भाषा॥ त्सरति। त्सर छद्मगतौ। भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः॥

त्सरुकः। त्रि। त्सरौ कुशले॥ आकर्षादिभ्यः कन्॥

थः

थः। पुं। शिलोच्चये। पर्वते॥ भयरक्षणे॥ व्याधिभेदे॥ भयचिह्ने॥ भक्षणे॥ न। रक्षणे॥ मङ्गले॥ साध्वसे॥ इति मेदिनीकरः॥ थुडेडः॥

थुत्कारः। पुं। निष्ठीवनत्यागानुकरणशब्दे॥

थूथू। अ। निष्ठीवनत्यागानुकरणशब्दे॥ यथा। थूथूकृत्यवमङ्गिरश्च मगनैरिति सूक्तिकर्णामृतम्॥

थैथै। अ। वाद्यानुकरणशब्दविशेषे॥

थोडनम्। न। संवरणे॥ थुड संवृतौ। ल्युट्॥

थौणेयः। पुं। स्थौणेये॥

दः

दः। पुं। अचले। शैले॥ दत्ते॥ खण्डने॥ न। भार्यायाम्॥ इत्येकाक्षरकोषः॥ त्रि। दातरि॥

दंशः। पुं। वनमक्षिकायाम्। डाँस इति भाषा॥ दंशति। दंश दशने। अच्॥ वर्मणि॥ मर्मणि॥ दोषे॥ खण्डने॥ भुजगक्षते॥ दंशने॥ इति हेमचन्द्रः॥

दंशकः। पुं। दंशे॥ त्रि। दंशनकर्त्तरि॥

दंशनम्। न। दंशे। दन्तेन खण्डने। काटखाना इति काटना इति च भाषा॥ कवचे। वर्मणि॥ दंश्यतेऽनेन। दंशि दंशनस्पर्शनयोः। करणेति ल्युट्॥

दंशभीरुः। पुं। स्त्री। कासरे। महिषे॥ इति त्रिकाण्डशेषः॥

दंशमूलः। पुं। शिग्रौ॥

दंशितः। त्रि। कवचाचिते। धृतसन्नाहे। वर्म्मिते॥ दष्टे॥ दंशः सञ्जातोऽस्य। ता० इतच्॥ यद्वा। दंश्यते स्म। दंशि०। क्तः॥

दंशी। मशक इतिख्याते क्षुद्रदंशे॥ दंश

ति । दंश० । अच्‌ । गौरा० ङीष्‌ ॥
दंष्ट्रा । स्त्री । दन्तविशेषे । दाढायाम्‌ । दाढ इति भाषा ॥ दन्तपङ्क्तिद्वयप्रान्ते चतस्रश्चतस्रोदन्तविशेषा दंष्ट्राः । द्विगुणीकृतादन्तावलिरिति भावप्रकाशः ॥ दश्यते ऽनयेत्यर्थे दाम्नी शसयुयुजेत्यादिनाकरणेष्ट्रन्‌ । टाप्‌ । गौरादिषु आतामघौमध्ये पाठा दनित्यापितांङीष्‌ ॥
दंष्ट्राल: । पुं । शूकरे ॥
दंष्ट्रिका । स्त्री । दाढिकायाम्‌ ॥
दंष्ट्री । पुं । घृष्टौ । शूकरे ॥ सर्पे ॥ त्रि । दंष्ट्राविशिष्टे ॥ यथा दंष्ट्रिभिः शृङ्गिभिर्वापि हता म्लेच्छैश्च तस्करैः । ये स्वाम्यर्थे हता यान्ति राजन्‌ स्वर्गं न संशयः । दश्यन्ति परानम्‌ । प्रशस्ता दंष्ट्राः सन्ति अस्य । व्री० इनिः ॥
दकम्‌ । न । वारिणि । जले ॥
दक्षः । पुं । ब्रह्मणो दक्षिणाङ्गुष्ठाज्जाते प्रजापतिविशेषे । ततएव मैथुनेन प्रजा जाताः ॥ ताम्रचूडे । कुक्कुटे ॥ मुनिविशेषे ॥ हरवृषे ॥ वृषविशेषे ॥ त्रि । चतुरे । सातत्येषु कर्मसु वोपस्थितेषु सद्यएवतत्तुत्कर्तुं च समर्थे । शिक्षिते । कुशले ॥ दक्षते । दक्षवृद्धौ शीघ्रार्थे च । अचाद्यच्‌ ॥
दक्षकन्या । स्त्री । भवान्याम्‌ । दुर्गायाम्‌ ॥ दक्षस्यप्रजापतेः कन्या ॥ ताःप्रकृताः सप्तसंख्यकाः वह्निपुराणे गणभेदनामाध्याये प्रसिद्धाः ॥
दक्षजा । स्त्री । दुर्गायाम्‌ ॥ दक्षाज्जाता । पञ्चम्यामितिडः ॥
दक्षप्रजापतिः । पुं । शिवे ॥ चन्द्रे ॥
दक्षता । स्त्री । क्षिप्रकारित्वे ॥
दक्षसावर्णिः । पुं । नवमे मनौ । आदिषु सप्तमनुषु द्वितीये ॥
दक्षसुतः । पुं । देवे ॥
दक्षा । स्त्री । भूमौ ॥
दक्षाध्वरध्वंसकः । पुं । शिवे ॥ वीरभद्रे ॥ दक्षाध्वरस्य ध्वंसकः ॥
दक्षाध्वरध्वंसकृत्‌ । पुं । हरे ॥ वीरभद्रे ॥ दक्षाध्वरध्वंसंकरोति । कृ० । क्विप्‌ । तुक्‌ ॥
दक्षाय्यः । पुं । गरुडे ॥ गृध्रे ॥ दक्षते । दक्ष० । श्रुदक्षिस्पृहिगृहिभ्य आय्यः ॥
दक्षिणः । त्रि । दक्षिणोद्भूते ॥ सरले ॥ परच्छन्दानुवर्त्तिनि । पराभिप्रायवर्त्तिनि ॥ अपसव्ये । अवामे ॥ दक्षे ॥ औदार्यवति ॥ पुं । अनुकूलनायकान्तर्गतपतिविशेषे ॥ सकलनायिकाविषयसमसहजानुरागो दक्षिण इति लक्षणात्‌ ॥ दक्षते । दक्ष०

हृद्दक्षिणाभ्यामिनन् ॥

दक्षिणकालिका । स्त्री । आद्यायांशक्तौ ॥

दक्षिणतः । अ । दिशि ॥ देशे ॥ वसत्यागतो वा । कालेवृत्तिर्नास्ति दक्षिणोत्तराभ्यामतसुजिति स्वार्थेऽतसुच् ॥

दक्षिणतारम् । अ । दक्षिणतीरे ॥

दक्षिणमार्गः । पुं । पितृयाणे । गतागतलक्षणे कर्मिणांमार्गे ॥ यथोक्तमीशोपनिषद्भाष्ये । निर्विष्टोहं दक्षिणेनमार्गेण गतागतलक्षणेनेति ॥

दक्षिणसिन्धुः । पुं । भीमतीर्थविशेषे ॥

दक्षिणस्थः । पुं । सारथौ ॥ त्रि । दक्षभागस्थिते ॥ दक्षिणे तिष्ठति । स्था० सुपीतिकः ॥

दक्षिणा । अ । दिशि ॥ देशे ॥ वसति रमणीयं वा । दक्षिणस्यांदिशि दक्षिणादिग्वा । दक्षिणादाजिति स्वार्थे आच् ॥ दक्षिणाहि इत्यर्थे ॥

दक्षिणा । स्त्री । अवाच्यांदिशि । याम्यदिशि ॥ यज्ञादिविधिदाने ॥ यज्ञपत्न्याम् ॥ यथा । दक्षिणा यज्ञपत्नी च दीक्षा सर्वत्रपूजिता । ययाविनाहिविश्वेषु सर्वंकर्महिनिष्फलमिति भागवते ९ स्कन्धे १ऽध्यायः ॥ प्रतिष्ठायाम् ॥ देवान्तरे ॥ दक्षप्रजापतेस्तनयायाम् ॥ परिक्रयद्रव्ये ॥

नायिकाविशेषे ॥ यथा । या गौरवं भयं प्रेम सद्भावं पूर्वनायके । न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैरितिश्रीधरस्वामी ॥

दक्षिणाग्निः । पुं । अन्वाहार्यपचनाख्ये यज्ञाग्निविशेषे ॥ दक्षिणाग्नेर्हि योनिविकल्पः । यतोवैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद्वानीयते ॥ दक्षिणोऽग्निः । दिक्संख्ये संज्ञायामितिसमासः ॥

दक्षिणाचलः । पुं । मलयपर्वते ॥

दक्षिणाचारः । पुं । वामेतराचारे ॥ यथा । स्वधर्मनिरतोभूत्वा पञ्चतत्त्वे न पूजयेत् । सएवदक्षिणाचारः शिवोभूत्वा शिवांयजेदित्याचारभेदतन्त्रम् ॥ यच । चतुर्मकाराःअन्त्येवपञ्चमोविजयारस इतिकश्चित् ॥

दक्षिणात् । अ । दिशि ॥ देशे ॥ काले ॥ वसत्यागतो रमणीयं वा ॥ दक्षिणस्यांदिशि दक्षिणस्याः दक्षिणा वा । उत्तराधरदक्षिणादातिः ॥

दक्षिणापथः । पुं । देशविशेषे ॥ यथा । एतेगच्छन्तिवहवःपन्थानो दक्षिणापथम् । अवन्तीमृक्षवन्तञ्चसमतिक्रम्यपर्वतमितिमहाभारते नलोपाख्यानम् ॥

दक्षिणापथजन्मा । पुं । आम्रविशेषे ॥

यथा ॥ दक्षिणापथजन्मानः सर्वे नरवरान्धकाः । गुहाः पुलिन्दाः शबराश्चुचुकामद्रपैः सह ॥ उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि । यौनकाम्बोजगान्धाराः किराता वर्वरैः सह ॥ एते पापकृतस्तात चरन्ति पृथिवीमिमाम् इति महाभारते मोक्षधर्मः ॥

दक्षिणापथदेशः । पुं । देशविशेषे ॥ यथा । तथापरे जनपदा दक्षिणापथवासिनः । पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥ सेतुका मूषिकाश्चैव कुपथा वारवासिकाः । नवराष्ट्रा माहिषकाः कलिङ्गाश्चैव सर्वशः ॥ कावेराश्च सहैषीकैराटव्याः शबरास्तथा । पुलिन्दा विन्ध्यमूषीका वैदर्भा दण्डकैः सह ॥ कुलीयाश्च शिरालाश्च रूपसास्तापसैः सह । तथा तैत्तिरकाश्चैव सर्वे कारस्करास्तथा ॥ नासिक्याश्च ये चान्ये ये चैवान्तरनर्मदाः । भानुकच्छाः समाहेयाः सहसारस्वतैस्तथा ॥ कच्छीयाश्च सुराष्ट्राश्च आनर्त्ताश्चार्बुदैः सह । इत्येते अपरान्ताश्च शृणु ये विन्ध्यवासिनः ॥ इति मत्स्यपुराणम् ॥

दक्षिणामुखः । पुं । दक्षिणदिगभिमुखे ॥ यथा । अमास्नानं गयाश्राद्धं दक्षिणामन्नभोजनम् । न जीवत्पितृकः कुर्यात् कृते च पितृहा भवेत् ॥

दक्षिणामूर्त्तिः । पुं । परशिवे ॥ प्रोच्चच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननम् । मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं ध्यायन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकम् ॥ चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तूच्छिन्नसंशयाः ॥

दक्षिणायनम् । न । देवानां रात्रौ । कर्कटेऽर्कसङ्क्रमे । श्रावणादिषट्सु मासेषु ॥ माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादितः । उत्तरायणमाद्यैस्तैस्त्रिभिः स्याद्दक्षिणायनम् ॥ याम्यायने यस्य भवेत् प्रसूतिः शठः कठोरः पिशुनस्वभावः । चतुष्पदाढ्यः कृषिमानहंयुर्वाचामशान्तो मनुजः प्रतापी ॥

दक्षिणारुः । पुं । व्याधकर्त्तृकदक्षिणाङ्गकृतव्रणे मृगे । दक्षिणेर्मणि ॥ दक्षिणे अरुरस्य ॥

दक्षिणार्हः । त्रि । दक्षिणीये ॥ दक्षिणामर्हति । अर्ह पूजायाम् । अर्हः इत्यच् ॥

दक्षिणावर्त्तः । त्रि । दक्षिणे आवर्त्तविशिष्टे ॥

दक्षिणावर्त्तकी । स्त्री । वृश्चिकाख्याम् ॥

दक्षिणाशापतिः । पुं । यमे । वैवस्वते । धर्म्मराजे ॥ दक्षिणाशायाः पतिः ॥

दक्षिणाहि । अ । दक्षिणदिशि ॥ दक्षिणदेशे ॥ दक्षिणात् । आहिचदूरे इतिस्वार्थे आहिदूरे चेदवधिमान् । वसति रमणीयं वा ॥

दक्षिणीयः । त्रि । दक्षिणार्हे ॥ दक्षिणामर्हति । कडङ्करदक्षिणाच्छ चेति छः । तस्य ईयादेशः ॥

दक्षिणेन । अ । दक्षिणदिशि ॥ दक्षिणदेशे ॥ एनबन्यतरस्यामदूरेऽपञ्चम्याः । दक्षिणेन वसति रमणीयं वा ॥

दक्षिणेर्म्मा । पुं । दक्षिणारौ । सक्षत मृगे ॥ दक्षिणे ईर्म्मं व्रणमस्य । दक्षिणेर्म्मा लुब्धयोगइति अनिजन्तःसाधुः ॥

दक्षिण्यः । त्रि । दक्षिणार्हे ॥ दक्षिणामर्हति । कडङ्करदक्षिणाच्छ चेति यत् ॥

दगार्गलम् । न । निस्तोयदेशे जलोपलब्धिज्ञाने ॥ तं निरूपयति वराहमिहिरः । तत्रादौ प्रयोजनप्रदर्शनार्थमाह । धर्म्म्यं यशस्यञ्च वदाम्यतोऽहं दगार्गलं येन जलोपलब्धिः । पुंसां यथाङ्गेषु सिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः ॥ एकेन वर्णेन रसेन चाम्भश्च्युतं नभस्तो वसुधा

विशेषात् । नानारसत्वं बहुवर्णताञ्च गतं परीक्ष्यं क्षितितुल्यमेवम् ॥ २ ॥ सिरानामानि ॥ पुरुहूतानलयमनिरृतिवरुणपवनेन्दुशङ्करा देवाः । विज्ञातव्याः क्रमशः प्राच्याद्यानां दिशांपतयः ॥ दिक्पति संज्ञाश्च सिरा नवमीमध्ये महासिरानाम्नी । एताभ्योन्याः शतशो विनिसृतानामभिः प्रथिताः ॥ पातालादूर्द्ध्वसिरा शुभा चतुर्दिक्षु संस्थितायाश्च । कोणदिगुत्थानशुभाः सिराः निमित्तान्यथोवक्ष्ये ॥ ५ ॥ * ॥ यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभि स्ततःपश्चात् । सार्द्धपुरुषे तोयं वहति सिरा पश्चिमा तत्र ॥ चिह्नमप्यर्द्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत्पीता । पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमतः ॥ ७ ॥ जम्ब्वाश्चोदग्घस्तैस्त्रिभिः सिराऽधो नरद्वये पूर्वा । मृल्लोहगन्धिका पाण्डुरा च पुरुषेत तोऽश्ममण्डूकः ॥ ८ ॥ जम्बूवृक्षस्य प्राग् वल्मीको यदि भवेत् समीपस्थः । तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ॥ अर्द्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः । मृद्भवति चात्र नीला दीर्घं कालञ्च बहुतोयम् ॥ १० ॥ पश्चादुदुम्बरस्य त्रिभिरेव करैर्नरद्वये सार्द्धे । पुरु

वेसितोऽहिरश्मात्मनोपमोऽधःसि
राम्बुजला॥ ११॥ उदगर्जुनस्यदृश्यो
वल्मीको यदि ततोऽर्जुनाद्धस्तैः ।
त्रिभिरम्बु भवति पुरुषे स्त्रिभिरर्द्धस
मन्वितैः पश्चात् ॥ श्वेतागोधार्द्धन
रे पुरुषे मृद्धूसराततःकृष्णा । पी
ता सिता ससिकता ततोजलं नि
र्दिश्देमितम् ॥ १३ ॥ वल्मीकोप
चितायां निर्गुण्ड्यां दक्षिणेन कथित
करैः । पुरुषद्वये सपादे स्वादुजलं
भवति चाशोष्यम् ॥ रोहितमत्स्यो
र्द्धनरे मृत्कपिलापाण्डुरा ततः पर
तः । सिकताः सशर्करेटाः क्रमेणप
रतो भवन्त्यम्भः ॥ १५ ॥ पूर्वेणयदि
बदर्या वल्मीकोदृश्यते जलंपश्चात्
। पुरुषैस्त्रिभिरादेश्यं श्वेतागृहगो
धिकाऽर्द्धनरे ॥ १६ ॥ सपलाशावद
रीचेद्दिश्यपरस्यां ततोजलं भवति
। पुरुषत्रये सपादे पुरुषेऽत्रचदुण्डु
भश्चिह्नम् ॥ १७॥ विल्वोदुम्बरयोगे
विहायवस्तत्त्रिभुयाम्येन । पुरुषैस्त्रि
भिरम्बुभवेत् कृष्णोर्द्धनरेचमण्डूकः
॥ १८ ॥ काकोदुम्बरिकायां वल्मी
कोदृश्यते सिरातस्मिन् । पुरुषत्रये
सपादे पश्चिमदिक्स्थावहति सा
च ॥ आपाण्डुपीतिकामृद्गौरसव-
र्णो भवतिपाषाणः । पुरुषेर्द्धं कुमु
दनिभो दृष्टिपथं मूषिको याति ॥
२० ॥ जलपरिहीनेदेशे वृक्षःका
म्पिल्यको यदादृश्यः । प्राच्यांहस्त
त्रितयेवहतिसिरा दक्षिणा प्रथमम्
॥ मृन्नीलोत्पलवर्णा कापोताद्द
श्यते ततस्तस्मिन् । हस्तेऽजगन्ध-
को मत्स्योजलमल्पञ्च सक्षारम् ॥
२२ ॥ श्योनाकतरोरपरोत्तरेसिरा
द्वौकरावतिक्रम्य । कुमुदानामसिरा
सा पुरुषत्रयवाहिनी भवति ॥ २३ ॥
आसन्नोवल्मीको दक्षिणपार्श्वेविभी
तकस्य यदि । अध्यर्द्धेभवतिसिरा पु
रुषे ज्ञेया दिशि प्राच्याम् ॥ २ ॥ त
स्यैवपश्चिमायांदिशिवल्मीको यदा
भवेद्धस्ते । तत्रोदग्भवतिसिरा चतु
र्भिरर्धाधिकैः पुरुषैः ॥ श्वेतोविश्व
म्भरकः प्रथमेपुरुषेतु कुङ्कुमाभो
ऽश्मा । अपरस्यां दिशिचसिरानश्य
तिवर्षत्रयेतीते ॥ २६ ॥ सकुशःसितए
वायां वल्मीको यत्रकोविदारस्य ।
मध्येतयोर्नरैरर्ध पञ्चमैस्तोयमक्षो
भ्यम् ॥ प्रथमेभुजगः कमलोदरस
न्निभो महीरक्ता । कुरुविन्दःपाषा
णश्चिह्नान्येतानि वाच्यानि ॥ २८ ॥
यदिभवति सप्तपर्णो वल्मीकवृत
स्तदुत्तरेतोयम् । वाच्यं पुरुषैः पञ्च
भि रत्रापि भवन्ति चिह्नानि ॥ पुरु

शार्दूलवत्तु हरितो दर्दुरो हरितालस-
न्निभाभूश्च। पाषाणोऽभ्रनिकाश: सौ-
म्या च सिरा शुभाम्बुवहा ॥ ३० ॥ सर्व-
थां छायाया मध: स्थितो दर्दुरो यदा दृ-
श्य:। तस्माद्धस्ते तोयं चतुर्भिरर्द्धाधि-
कै: पुरुषै: ॥ पुरुषेतु भवति नकुलो
नीलाभृत् पीतिकाततः श्वेता। दर्दु
रसमानरूप: पाषाणो दृश्यते तच
॥ ३२ ॥ यद्यहिनिलयो दृश्यो दक्षि
णत: संस्थित: करञ्जस्य। हस्तद्वये तु
याम्ये पुरुषत्रितये सिरा सार्द्धे ॥ उद
गन्धा स्वादुजला हरितोऽश्माधस्तत
स्तोयम्। पुरुषार्द्धे कच्छपक: प्रथमं
पूर्वा सिरोद्भिद्यते तच ॥ उत्तरत
श्च मधूका दहिनिलय: पश्चिमे तत
स्तोयम्। परिहृत्य पञ्चहस्तान् नव
चाष्टौ पौरुषान् प्रथमम् ॥ अहि
राज: पुरुषेऽधो धूम्राधात्री कुलत्थ
वर्णोऽश्मा। माहेन्द्रे भवति सिरा वह
ति सफेनं सदा तोयम् ॥ ३६। वल्मी
क: स्निग्धो दक्षिणे सकुशदूर्वश्चेत् ति
लकस्य। पुरुषै: पञ्चभिरम्भो दिशि
वारुण्यां सिरा पूर्वा ॥ ३७ ॥ सर्पावा
स: पश्चाद्वल्मीका दक्षिणे कदम्बस्य।
परतो हस्तत्रितयात् षड्भि: पुरुषैस्तु
रीयांशै: ॥ कौवेरी चात्र सिरा वह
ति जलं लोहगन्धि चाक्षोभ्यम्। कन
कनिभो मण्डूको नरमात्रे मृत्तिका पी
ता ॥ ३९ ॥ वल्मीकसंवृतो यदि
तालो वा भवति नारिकेलो वा। पश्चा
त् षड्भिर्हस्तैर्नरैश्च तुर्भि: सिरा या
म्या ॥ ४० ॥ याम्येन कपित्थस्याहि सं
श्रयश्चे दुदग्जलं वाच्यम्। सप्त परि
त्यज्य करान् खात्वा पुरुषान् कर्बुरा
पुटभिद् ॥ अश्मन्तकस्य वामे बदरी वा
दृश्यते हि निलयो वा। षड्भिरुदग
स्तु करै: सार्द्धे पुरुषत्रये तोयम् ॥
कूर्म: प्रथमे पुरुषे पाषाणो धूसर:
ससिकता मृत्। आदौ च सिरा याम्या
पूर्वोत्तरतो द्वितीया च ॥ ४३ ॥ वा
मेन हारिद्रतरो र्वल्मीकश्चेज्जलं
भवति पूर्वे। हस्तत्रितये सत्र्यंशै: पु-
म्भि: पञ्चभिर्भवति ॥ नीलो भुजगो
दृश्यो मृत् पीता मरकतोपमश्चाश्मा
। कृष्णाभू: प्रथमं वारुणी सिरा दक्षि
णेनान्या ॥ ४४ ॥ जलपरिरहिते दे
शेऽनूपजानि दृश्यन्ते निमित्तानि।
वीरणदूर्वा मृदवो यचस्तु तत्र जलं
पुरुषे ॥ भार्गी त्रिवृता दन्ती शूकर
पादी च लक्ष्मणा चैव। नवमालिका
च हस्तद्वयेऽम्बु याम्ये त्रिभि: पुरुषै:
॥ ४६ ॥ स्निग्धा: प्रलम्बशाखा वाम
न विकटद्रुमा: समीपजला:। सुषि
राजर्जरपत्रा रूक्षाश्च जलेन सन्त्यक्ता:

॥४७॥ तिलकाम्रातकवरुणकभल्लातकबिल्वतिन्दुकाङ्कोलाः। पिण्डारशिरीषकाञ्जनपरूषकावञ्जुलातिबलाः ॥ एतेयदिसुस्निग्धैर्वल्मीकैःपरिवृतास्ततस्तोयम्। हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्द्धेनपुरुषेण॥ ४९ ॥ अतृणेसतृणायस्मिन्सतृणेतृणवर्जितामहीयत्र। तस्मिन्सिरा प्रदिष्टा वक्तव्यं वाधनंवास्मिन् ॥ ५० ॥ कण्टक्यकण्टकानां व्यत्यासेम्भस्त्रिभिःकरैःपश्चात्। खात्वापुरुषत्रितयं त्रिभागयुक्तंधनंवास्यात् ॥ ५१ नदतिमहीगम्भीरं यस्मिंश्चरणाहतातत्रजलंतस्मिन्। सार्द्धैस्त्रिभिर्मनुष्यैः कौबेर्यात्तत्र सिरास्यात् ॥ ५२ ॥ वृक्षस्यैकाशाखा यदिविनताभवति पाण्डुरावास्यात्। विज्ञातव्यं शाखातले जलं त्रिपुरुषंखात्वा ॥ ५३ ॥ फलकुसुमविकारोयस्यतस्यपूर्वेसिरात्रिभिर्हस्तैः। भवति पुरुषैश्चतुर्भिः पाषाणोऽधः-क्षितिःपीता ॥ ५४ ॥ यदिकण्टकारिकाकंटकैर्विनादृश्यतेसितैः कुसुमैः। तस्यास्तलेम्बुवाच्यं त्रिभिर्नरैरर्द्धपुरुषेच॥५५॥ खर्जूरीद्विशिरस्कायत्रभवेज्जलविवर्जितेदेशे । तस्याः पश्चिमभागे निर्देश्यं त्रिपुरुषैर्वारि॥ ॥ ५६ ॥ यदिभवतिकर्णिकारःसित

दकार्गलं

कुसुमःस्यात्पलाशवृक्षोवा। सव्येनतत्रहस्तद्वयेन्बु पुरुषद्वये भवति ॥ ५७ ॥ यस्यामूष्माधात्र्यां धूमोवातत्रवारिनरयुगले। निर्देष्टव्याचसिरामहतातोयप्रवाहेण ॥ ५८ ॥ यस्मिन्क्षेत्रोद्देशेजातंसस्यं विनाशमुपयाति। स्निग्धमतिपाण्डुरं वा महासिरानरयुगेतत्र ॥ ५९ ॥ * ॥ इतिजाङ्गलानूपयोर्जलपरिज्ञानम् ॥ * ॥ अथमरुभूमौ सिराविज्ञानम् ॥ मरुदेशेभवतिसिरायथातथाऽतःपरंप्रवक्ष्यामि। ग्रीवाकरभाणामिव भूतलसंस्थाःसिरायान्ति ॥ ६० ॥ पूर्वोत्तरेणपीलोर्यदिवल्मीको जलं भवति-पश्चात्। उत्तरगमनाचसिरा विज्ञेयापञ्चभिःपुरुषैः ॥ चिह्नंदर्दुरमादौ मत्स्यकपिलातत्परं भवेद्धरिता। भवतिचपुरुषेऽधोऽश्मातस्यतलेम्भोविनिर्देश्यम् ॥ ६२ ॥ पीलोरेव प्राच्यां वल्मीकोऽतोर्द्धपञ्चमैर्हस्तैः। दिशियाम्यायां तोयं वक्तव्यं सप्तभिः पुरुषैः॥ प्रथमेपुरुषे भुजगः सितासितो हस्तमात्रमूर्त्तिश्च। दक्षिणतोवहतिसिरा सक्षारं भूमिपानीयम् ॥ ६४ ॥ उत्तरतश्च करीरस्याहिगृहंदक्षिणेजलं स्वादु। दशभिः पुरुषैर्भवपुरुषेपीतोऽश्मकः

॥ ६५ ॥ रोहीतकस्य पश्चाद्यदि वास्त्रिभिः करैर्याम्ये । द्वादशपुरुषान् खात्वा सवारा पश्चिमेन सिरा ॥ ६६ ॥ इन्द्रतरोर्वल्मीकः प्राग्दृश्यः पश्चिमे सिरा हस्ते । खात्वा चतुर्दश नरान् कपिला गोधा नरे प्रथमे ॥ ६७ ॥ यदि वा सुवर्णनाम्नस्तरोर्भवेद्वामतो भुजङ्गगृहम् । हस्तद्वये तु याम्ये पञ्चदशनरावसाने ऽम्बु ॥ क्षारं पयो ऽत्र नकुलोऽर्द्धमानवे ताम्रसन्निभश्चाश्मा । रक्ता च भवति वसुधा वहति सिरा दक्षिणातश्च ॥ ६८ ॥ बदरीरोहितवृक्षौ सम्पृक्तौ चेद्विनापि वल्मीकम् । हस्तत्रये ऽम्बु पश्चात् षोडशभिर्मानवैर्भवति ॥ सुरसं जलमादौ दक्षिणा सिरा वहति चोत्तरेणान्या । पिष्टनिभः पाषाणो मृच्छ्वेता वृश्चिकोऽर्द्धनरे ॥ ६९ ॥ सकरीरा चेद्बदरी त्रिभिः करैः पश्चिमेन तस्याम्बुः । अष्टादशभिः पुरुषैरैशानी बहुजला च सिरा ॥ ७० ॥ पीलुसमेता बदरी हस्तत्रयसम्मिते दिशि प्राच्याम् । विंशत्या पुरुषाणामशोषमम्भो ऽत्र सक्षारम् ॥ ७१ ॥ ककुभकरीरावेकत्र संयुतौ यत्र ककुभबिल्वौ वा । साङ्घ्रेऽम्बु पश्चात् नरैर्मेय पञ्चविंशत्या ॥ ७२ ॥ वल्मीकमूर्द्धनि यदा दूर्वाश्च कुशाश्च पाण्डुराः सन्ति । कूपो मध्ये देयो जलमत्र नरैकविंशत्या ॥ ७३ ॥ भूमिः कदम्बकयुता वल्मीको यत्र दृश्यते दूर्वा । हस्तद्वयेन याम्ये नरैर्जलं पञ्चविंशत्या ॥ ७४ ॥ वल्मीकत्रयमध्ये रोहीतकपादपो यदा भवति । नानावृक्षैः सहितस्त्रिभिर्जलं तत्र वक्तव्यम् ॥ हस्तचतुष्के मध्यात् षोडशभिश्चाङ्गुलैरुदग्वारि । चत्वारिंशत् पुरुषान् खात्वाश्माधः सिरा भवति ॥ ७६ ॥ ग्रन्थिप्रचुरा यस्मिन् शमी भवेदुत्तरेण वल्मीकः । पश्चात् पञ्चकरान्ते शतार्द्धसङ्ख्यैर्नरैः सलिलम् ॥ ७७ ॥ एकस्थाः पञ्च यदा वल्मीका मध्यमो भवेच्छ्वेतः । तस्मिन् सिरा प्रदिष्टा नरषष्ट्या पञ्चवर्ज्जितया ॥ ७८ ॥ सपलाशा यत्र शमी पश्चिमभागेऽम्बु मानवैः षष्ट्या । अर्द्धनरेऽहिः प्रथमं सवालुका पीतमृत् परतः ॥ ७९ ॥ वल्मीकेन परिवृतः श्वेतो रोहीतको भवेद्यस्मिन् । पूर्वेण हस्तमात्रे सप्तत्या मानवैरम्बु ॥ ८० ॥ श्वेता कण्टकबहुला यत्र शमी दक्षिणेन तत्र पयः । नरपञ्चकसंयुतया सप्तत्याहिर्नरार्द्धे च ॥ ८१ ॥ * ॥ अविशेषः ॥ मरुदेशे यच्चिह्नं ...

स्ते तैर्जलं विनिर्देश्यम् । जम्बूवेतस पूर्वे येपुरुषा स्ते मरौ द्विगुणाः ॥ ८२ ॥ जम्बूत्रिवृता मौर्वी शिशुमारी सारिवा शिवा श्यामा । वीरुधयो वाराही ज्योतिष्मती गरुडवेगा च ॥ सूकरिका माषपर्णी व्याघ्रपदा चेति यद्य हेर्निलये । वल्मीकादुत्तरतस्त्रि- भिः करैस्त्रिपुरुषे तोयम् ॥ एतदनूपे वाच्यं जाङ्गलभूमौ तु पञ्चभिः पुरुषैः । एतैरेव निमित्तै र्मरुदेशे सप्तभिः कथयेत् ॥ ८५ ॥ एकनिभा यत्र मही तृणतरुवल्मीकपरिहीना । तस्यां यत्र विकारो भवति धरित्र्यां जलं तत्र ॥ ८६ ॥ यत्र स्निग्धा निम्ना सवालुका सानुनादिनी वा स्यात् । तत्राद्ध पञ्चकैर्वारि मानवैः पञ्चभि- र्यदि वा ॥ ८७ ॥ स्निग्धात रूणां याम्ये नरैश्चतुर्भि र्जलं प्रभूतञ्च । तरुगहने अपि विकृतो यस्तस्मात् तद्वदेव वदेत् ॥ ८८ ॥ नमते यत्र धरित्री सार्द्धे पुरुषेम्बु जाङ्गलानूपे । कीटा वा यत्र विनालयेन बहवोम्बु तत्रापि ॥ ८९ ॥ उष्णा शीता च मही शीतोष्णाम्भस्त्रिभिर्नरैः सार्द्धैः । इन्द्रधनुर्म त्स्यो वा वल्मीको वा चतुर्हस्तात् ॥ ९० ॥ वल्मीकानां पङ्क्त्या यद्येकोभ्युच्छ्रितः सिरा तदधः । शुष्यति न रो

हते वा सस्यं यस्याञ्च तत्राम्भः ॥ ९१ ॥ एतज्जाङ्गलानूपे ॥ * ॥ न्यग्रोध पलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः । वटपिप्पलसमवाये तद्वद्वाच्यं सिराचोदक् ॥ ९२ ॥ * ॥ अथ कूपलक्षणम् ॥ आग्नेययदि कोणे ग्रामस्यपुरस्य वा भवेत् कूपः । नित्यं सकरोति भयं दाहञ्च समानुषं प्रायः ॥ नैर्ऋतकोणे बालक्षयञ्च वनिताभयञ्च वायव्ये । दिक्त्रयमेतत् त्यक्त्वा शेषास्तु शुभावहाः कूपाः ॥ ९४ ॥ * ॥ सारस्वतेन मुनिना दगार्गलं यत् कृतं तदवलोक्य । आर्याभिः कृतमेतद् वृत्तैरपि मानवं वक्ष्ये ॥ ९५ ॥ स्निग्धा यतः पादपगुल्मवल्ल्यो निश्छिद्रपत्रा श्च ततः सिरास्ति । पद्मक्षुरोशीरकुलाः सगुन्द्राः काशाः कुशा वा नलिका नलो वा ॥ खर्ज्जूरजम्ब्वर्जुनवेतसाः स्युः क्षीरान्विता वा द्रुमगुल्मवल्ल्यः । छत्रेभनागाः शतपत्रनीपाः स्युर्नक्तमालाश्च ससिन्धुवाराः ॥ विभीतको वा मदयन्तिका वा यत्रास्ति तस्मिन् पुरुषत्रये ऽम्भः । स्यात् पर्वतस्योपरि पर्वतोन्य स्तत्रा- स्ति मूले पुरुषत्रयेम्भः ॥ ९८ ॥ या मौञ्जीयैः काशकुशैश्च युक्ता नीला- च मृद्यत्र सशर्करा च । तस्यां प्रभूतं

मुरसमतोयं कृष्णा चरका च तथैव
मदे ॥ ९९ ॥ * ॥ अथ भूगुणाः ॥ स
शर्करा ताम्रमही कषायं क्षारं धरि
त्री कपिला करोति । आपाण्डुरायां
लवणं प्रदिष्टं मिष्टं पयो नीलवसुन्ध
रायाम् ॥ १०० ॥ शाकाश्वकर्णार्जुन
बिल्वसर्जाः श्रीपर्ण्यरिष्टाधवशिंशपा
श्च । छिद्रैश्च पर्णैर्द्रुमगुल्मवल्ल्यो रूक्षा
श्च दूरेऽम्बु निवेदयन्ति ॥ १ ॥ सूर्याग्नि
भस्मोष्ट्रखराऽनुवर्णा या निर्जला-
सा वसुधा प्रदिष्टा । रक्ताङ्कुराः क्षी
रयुताः करीरा रक्ताधरा चेज्जलम
श्मनोऽधः ॥ २ ॥ वैदूर्यमुद्गाम्बुदमेच
काभा पाकोन्मुखोदुम्बरसन्निभा वा
। भृङ्गाञ्जनाभा कपिलाथवा या ज्ञेया
शिला भूरिसमीपतोया ॥ ३ ॥ पारा
वतक्षौद्रघृतोपमा या क्षौमस्य वस्त्रस्य
च तुल्यवर्णा । या सोमवल्ल्याश्च समा
नरूपा साप्याशु तोयं कुरुतेऽक्षय-
ञ्च ॥ ४ ॥ ताम्रैः समेता पृषतैर्विचि
त्रै रापाण्डुभस्मोष्ट्रखरानुरूपा । भृङ्गो
पमाङ्गुष्ठिकपुष्पिका च सूर्याग्निवर्णा
च शिला वितोया ॥ ५ ॥ चन्द्रातप
स्फटिकमौक्तिकहेमरूपाः याश्चेन्द्र
नीलमणिहिङ्गुलकाञ्जनाभाः । सू
र्योदयांशुहरितालनिभाश्च याः शु
भास्ता शोभना मुनिवचोऽत्र वृत्तमेत

दकार्गलं

त् ॥ ६ ॥ एता ह्यभेद्याश्च शिलाः
शिवाश्च यक्षैश्च नागैश्च सदाभिजु
ष्टाः । येषाञ्च राष्ट्रेषु भवन्ति राज्ञां
तेषामवृष्टिर्न भवेत्कदाचित् ॥ ७
॥ * ॥ शिलानां विदारणार्थमाह ॥
भेद्यं यदा नैति शिला तदानीं पला
शकाष्ठैः सह तिन्दुकानाम् । प्रज्वा
लयित्वानलमग्निवर्णा सुधाम्बुसि-
क्ता प्रविदारमेति ॥ ८ ॥ तोयं शृ-
तं मोक्षकभस्मना वा यत्सप्तकृत्वः
परिषेचनं तत् ॥ कार्यं शरक्षारयुतं
शिलायाः प्रस्फोटनं वह्निवितापिता
याः ॥ ९ ॥ तक्रकाञ्जिकसुराः सकु
लत्था योजितानि बदराणि चैतत् ।
सप्तरात्रमुषितान्यभितप्तां दारयन्ति
हि शिलां परिषेकैः ॥ १० ॥ नैम्बं प
त्रं त्वक् च नालं तिलानां सापामार्गं
तिन्दुकं स्याद्गुडूची । गोमूत्रेण स्रा
वितः क्षारएषां षट्कृत्वोऽतस्ता
पितो भिद्यतेऽश्मा ॥ ११ ॥ * ॥ शस्त्र
पानम् ॥ आर्कं पयो हुडुविषाणम
षीसमेतं पारावताखुशकृता च युतः
प्रलेपः । टङ्कस्य तैलमथितस्य ततो
ऽस्य पानं पश्चाच्छितस्य न शिलासु भ
वेद्विघातः ॥ १२ ॥ क्षारं कदल्या
मथितेन युक्तं दिनोषितं पायितम
यसं यत् । सम्यक्शितं चाश्मनि नैति

भग्नं यथाम्बलो ह्येष्वपि तस्य कोष्ठग्रम् ॥ १३ ॥ * ॥ वापीलक्षणम् ॥ पाश्वी प्रागपरायता ऽम्बुसुषिरं धत्ते न याम्योत्तरा कल्लोलै रवदारणेति महता सा प्रायशः प्रेरितैः । तां चेदिच्छति सारदारुभि रपां सम्पात मावारयेत् पाषाणादिभिरेव वा प्रतिचयं क्षुस्रुद्विपाश्वादिभिः ॥ १४ ॥ ककुभवटाम्रप्लक्षकदम्बैः सनिचुलजम्बूवेतसनीपैः । कुरवकतालाशोकमधूकैः बकुलविमिश्रैश्चावृततीराम् ॥ १५ ॥ * ॥ नैर्वाहिकद्वारलक्षणम् ॥ द्वारञ्च नैर्वाहिक मेकदेशे कार्यं शिलासञ्चितवारिमार्गम् । कोशस्थितं निर्विवरं कपाटं कृत्वा ततः पांसुभिरावपेत्तम् ॥ १६ ॥ * ॥ कूपयोगमप्याह ॥ अञ्जनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः । कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः ॥ १७ ॥ * ॥ अस्य गुणानाह ॥ कलुषं कटुकं लवणं विरसं सलिलं यदि वा ऽशुभगन्धि भवेत् । तदनेन भवत्यमलं सुरसं सुसुगन्धि गुणैरपरैश्च युतम् ॥ १८ ॥ * ॥ नक्षत्राणि ॥ हस्तो मघानुराधापुष्यधनिष्ठोत्तराशिरोहिण्यः । शतभिषगित्यारम्भे कूपानां शस्यते भगणः ॥ १९ ॥ * ॥ प्रतिष्ठा

विधानम् ॥ कृत्वा वरुणस्य बलिं वटवेतसकीलकं सिरास्थाने । कुसुमैर्गन्धैर्धूपैः सम्पूज्य निधापयेत् प्रथमम् ॥ १२० ॥ इति वाराह्यां द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

दग्धः । त्रि । भस्मीकृते । प्लुष्टे । प्रुष्टे ॥ अग्निस्पृष्टे ॥ सन्तप्ते ॥ दह्यते स्म । दहभस्मीकरणे । क्तः ॥ न । कतृणे ॥

दग्धकाकः । पुं । द्रोणकाके ॥

दग्धम् । न । रव्यादिवारेषु भरण्यादिसप्तनक्षत्रेषु ॥ यथा । याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठार्यमसंज्ञज्येष्ठान्त्यं रवेर्दग्धभं स्यात् ॥ दग्धमेतद्भञ्च ॥

दग्धरथः । पुं । चित्ररथगन्धर्वे ॥

दग्धरुहः । पुं । तिलकवृक्षे ॥

दग्धरुहा । स्त्री । दग्धारुहे । भस्मरोहायाम् ॥

दग्धलग्नम् । न । शून्यलग्ने ॥ यथा । मृगसिंहौ तृतीयायां प्रथमायां तुलामृगौ । पञ्चम्यां बुधराशीशौ सप्तम्यां चापचन्द्रभे ॥ नवम्यां सिंहकीटाख्या वेकादश्यां गुरोर्गृहौ । वृषमीनौ चयोदश्यां दग्धसंज्ञाः समीरिताः ॥ दग्धलग्ने यत् कर्म कृतं सर्वं विनश्यति ॥

दग्धा । स्त्री । सूर्यास्तदिशि ॥ तिथिविशेषे ॥ यथा । द्वादश्येकादशी चैव

दशमीचद्विषष्टिका । द्वितीयासप्तमीचैवदग्धाः सूर्यादिवारतः ॥ प्रकारान्तरमपि । एकादशीचेन्दुवारे द्वादशीचार्कवासरे । षष्ठीवृहस्पतेर्वारे । तृतीयाबुधवासरे । अष्टमी शुक्रवारेच नवमीशनिवासरे ॥ पञ्चमीभौमवारेच दग्धयोगाः प्रकीर्त्तिताः ॥ मासदग्धा यथा । द्वतीयामीनधनुषो श्चतुर्थी वृषकुम्भयोः । मेषकर्कटयोः षष्ठी कन्यामिथुनकोष्टमी ॥ दशमी वृश्चिकेसिंहे द्वादशी मकरेतुले । एभिर्जातोनजीवेत यद्दिशक्रसमोभवेदितिदीपिका ॥ कुरुड इति गौडप्रसिद्धे वृक्षे । खलेरुकायाम् । कर्कशदलायाम् । दग्धरुहायाम् ॥ दहेःक्तान्तात् टाप् ॥

दग्धिका । स्त्री । दग्धभक्ते । भिस्सटायाम् । जला भात इति भाषा ॥ कुत्सिता दग्धा दग्धिका । कुत्सिते इति कन् ॥ इत्यमरः ॥

दग्धेष्टका । स्त्री । झामके । झांमा इति भाषा ॥

दण्डः । पुं । न । लगुडे । लट्ठ लठिया इति भाषा ॥ पुं । व्यूहप्रभेदे ॥ प्रकाण्डे ॥ अश्वे ॥ कोणे ॥ मन्थाने ॥ सैन्ये ॥ दाम्यते उद्धतोऽनेन । दम । अमन्तात्डः ॥ काले । घड़ी इति भाषा ॥ यथा । दशगुर्वक्षरोच्चारकालः प्राणःषडात्मकैः । तैःपलं स्यात्तत्षष्ट्या दण्डइत्यभिधीयते ॥ मानभेदे । काठा इति गौडभाषा ॥ चतुर्हस्तपरिमिते मानकाष्ठादौ ॥ चण्डांशोः पारिपार्श्विके । अर्कानुचरे ॥ दमे ॥ यमे ॥ अभिमाने ॥ ग्रहभेदे ॥ अर्थापहारादिरूपे राज्ञांचतुर्थोपाये ॥ यथा । दण्डः शास्ति प्रजाः सर्वा दण्डएवाभिरक्षति । दण्डः सुप्तेषु जागर्त्ति दण्डं धर्मं विदुर्बुधाः ॥ यत्रश्यामो लोहिताक्षो दण्डश्चरति पापहा । प्रजा स्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥ सर्वोदण्डजितोलोको दुर्लभोहिशुचिर्नरः । दण्डस्यहि भयात् सर्वं जगद्भोगायकल्पते ॥ * ॥ न्वपेणदोषजन्यग्राह्यधने ॥ उत्पथप्रवृत्तौ निग्रहहेतुर्दण्डोभगवद्विभूतिः ॥ भाषामाघे ॥ धनुर्द्वयपरिमिते मानकाष्ठादौ ॥ इक्ष्वाकुराजपुत्रे ॥ दण्डोऽस्यास्ति । अर्शआद्यच् ॥ दण्डयन्ति दण्ड्यतेऽनेनवा । दण्डदण्डनिपातने । पचाद्यच् । पुंसीतिघोवा ॥ दमनम् घा । दमुउपशमे । अमन्तात्डः ॥ राजाश्वस्यानुचरपदातिषु ॥

दण्डकः । पुं । न । चण्डवृष्टिप्रपातादिछन्दःप्रभेदे ॥ लघुलगुडे । मोठा

सोंठी छड़ी इत्यादि भाषा ॥ ह्रस्वो दण्डः । ह्रस्वे इतिकन् ॥

दण्डकन्दकः । पुं । धरणीकन्दे ॥

दण्डका । स्त्री । दण्डकारण्ये । जनस्थाने ॥

दण्डकाकः । पुं । द्रोणकाके ॥

दण्डकारण्यम् । न । रामस्य वनिवेशस्थाने । जनस्थाने ॥ दण्डकनाम्ना राज्ञा परिपालितो देशः । स च शुक्रशापादरण्यमभूत् ॥ तीर्थविशेषे ॥

दण्डढक्का । स्त्री । वाद्यविशेषे । याम घोषे । यामनाख्याम् । दमामा नगारा नौबत इत्यादिभाषा ॥

दण्डताम्री । स्त्री । ताम्रीवाद्ये ॥

दण्डधरः । पुं । काले । यमे । अन्तके ॥ दण्डस्य धरः ॥ नृपे ॥ कुम्भकारे ॥ त्रि । दण्डहस्ते ॥ दुष्टनिग्रहकर्त्तरि ॥

दण्डधारः । पुं । पृथ्वीपतौ । राज्ञि ॥ यमे । समवर्त्तिनि ॥ त्रि । दण्डहस्ते ॥ दण्डं धरति । धृञ्० । कर्मण्यण् ॥

दण्डनायकः । पुं । सेनान्याम् । चतुरङ्गबलाध्यक्षे ॥

दण्डनीतिः । स्त्री । अर्थशास्त्रे । शुक्रजीवाद्युक्तनीतिशास्त्रे ॥ दम्यतेऽनेन । दम० । अमन्ताड्डः । दण्डो नीयते बोध्यतेऽनया इति दण्डनीतिः ॥ [illegible] दण्डेन नीयतेचेदं दण्डनयलिथापुनः । दण्डनीतिरिति ख्याता त्रीँल्लोकानतिवर्त्तते ॥ विशेषोमहाभारते राजधर्मे द्रष्टव्यः ॥ दुर्गायाम् ॥ यथा । नयानयगता लोके विकल्पनिश्चयाऽमला । दण्डनाद्गमनाद्वापि दण्डनीतिरिति स्मृतेति देवीपुराणम् ॥

दण्डनीयः । त्रि । दण्ड्ये ॥

दण्डपतिः । पुं । दण्डधरे ॥ दण्डनायके ॥

दण्डपांशुलः । पुं । गर्वाटे । द्वारपाले ॥

दण्डपाणिः । पुं । भैरवविशेषे । काशीस्थे शिवगणविशेषे ॥ यमे ॥ दण्डः पाणौ यस्य सः ॥

दण्डपारुष्यम् । न । ताडनादौ । अष्टादशविवादान्तर्गतविवादविशेषे ॥ राज्ञां सप्तव्यसनान्तर्गतव्यसनविशेषे ॥

दण्डपालः । पुं । अट्ठशफरमत्स्ये । डांडिका इति गौडभाषा ॥

दण्डपालकः । पुं । शकुलमत्स्ये ॥

दण्डभृत् । पुं । यमे ॥ कुम्भकारे ॥ त्रि । दण्डधारके ॥ दण्डं बिभर्त्ति । डुभृञ्० । क्विप् ॥

दण्डमत्स्यः । पुं । दण्डारी इति प्रसिद्धे मत्स्ये ॥ दण्डमत्स्योरसोतिक्तः पित्तरक्तं कफं हरेत् । वातसाधारणः प्रोक्तः शुक्रलो वह्निवर्द्धनः ॥

दण्डमाथः । पुं । दण्डाकारेपथि ॥

दण्डयात्रा । स्त्री । दिग्विजये ॥ युद्धाय गमने ॥ संयाने ॥ वरयात्रायाम् ॥ इति मेदिनीहेमचन्द्रौ ॥ दण्डाययात्रा ॥

दण्डयामः । पुं । कीनाशे ॥ दिवसे ॥ कुम्भसम्भवे । अगस्त्यमुनौ ॥ इति मेदिनी ॥

दण्डरी । स्त्री । डङ्गरीफले इति राजनिर्घण्टः ॥

दण्डवान् । त्रि । दण्डिनि ॥ मतुप् ॥

दण्डवादी । पुं । दर्वटे । द्वारपाले ॥ त्रि । दण्डवक्तरि ॥

दण्डवालधिः । पुं । हस्तिनि । इभे ॥ दण्डइववालधिर्यस्य ॥

दण्डवासी । पुं । द्वारपाले ॥ इतित्रिकाण्डशेषः ॥ एकग्रामाधिकृतेजने । चौधरीइतिभाषा ॥ इतिजटाधरः ॥

दण्डविष्कम्भः । पुं । कुठरे । मन्थवन्धनकाष्ठे । गर्गरीमुखस्थमन्थदण्डधारककाष्ठे ॥ दण्डं विष्कभ्नाति । स्कम्भुरोधने सौत्रः । कर्मण्यण् । वेःस्कभ्नातेर्नित्यमितिषत्वम् ॥

दण्डहस्तकः । पुं । सुग्रामः ॥

दण्डव्यूहः । पुं । दण्डाकृतिव्यूहरचनाविशेषे ॥ यत्राग्रेबलाध्यक्षो मध्येराजा पश्चात् सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपेघोटकास्ततःपदातयः इत्थंकृतरचनोदीर्घःसर्वतः समविन्यासोदण्डव्यूहउच्यते । तेन यातव्यंमार्गंसर्वतोभयेसतियायात् ॥

दण्डस्थानम् । न । दमसुस्थानविशेषेषु ॥ यथा । दशस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् । त्रिषु वर्णेषु यानिस्युः रक्षतो ब्राह्मणोव्रजेत् ॥ उपस्थमुदरं जिह्वा हस्तौ पादौचपञ्चमम् । चक्षुर्नासाच कर्णौच धनं देहस्तथैवच ॥ अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः । सारापराधौचालोक्य दण्डं दण्ड्येषुपातयेदितिमनुः ॥

दण्डहस्तम् । न । तगरपुष्पे ॥

दण्डाजिनम् । न । दम्भे ॥ शाठ्ये ॥

दण्डाजिनिकः । त्रि । मायाविनि ॥

दण्डादण्डि । अ । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे ॥ अन्ये॰ दीर्घः । इच्कर्मव्यतिहारे ॥

दण्डारः । पुं । वाहने ॥ मत्तवारणे ॥ शरयन्त्रे ॥ कुम्भकारस्यचक्रे ॥

दण्डाहतम् । न । घोले । गोरसे ॥ दण्डेन मथा आहतम् विलोडितम् । कर्त्तृकरणेकृतावहुलमिति समासः ॥ त्रि । दण्डेन ताडिते ॥

दण्डिकः । पुं । दण्डिनि ॥ दण्डोस्यास्ति । अतइनिठनाविति ठन् ॥ दण्डधारके

। कुड़िया इतिभाषा ॥ डानिकणा- माच इतिगौड़भाषाप्रसिद्धे मत्स्ये ॥

दण्डिका । स्त्री । हारविशेषे ॥

दण्डितः । त्रि । राज्ञादापिते । कृतदण्डे ॥ दण्डः सञ्जातोऽस्य । तारकादित्वादितच् ॥

दण्डी । पुं । यमे ॥ द्वाःस्थे । द्वारपाले ॥ मञ्जुघोषे ॥ रवेः पार्श्वगविशेषे ॥ जिनविशेषे ॥ दमनकवृक्षे ॥ चतुर्थाश्रमिणि ॥ कविविशेषे ॥ यथा । जाते जगति वाल्मीके कविरित्यभिधीयते । कवी इति ततो व्यासे कवयस्त्वयि दण्डिनीति कालिदासः ॥ त्रि । दण्डयुक्ते ॥ दण्डोऽस्याऽस्ति । अत इनिठनावितीनिः ॥

दण्डिनी । स्त्री । दण्डवत्याम् ॥ ऋन्नेभ्यो ङीप् ॥

दण्डिमा । पुं । दण्डत्वे ॥ दण्डस्य भावः । इमनिच् ॥

दण्डोत्पलम् । न । डानिपोला इति डानकुनि इति च गौड़भाषाप्रसिद्धे वृक्षविशेषे ॥ तत्तु पीतरक्तश्वेतपुष्पभेदात् त्रिविधम् । पीतस्य पर्यायाः । गोवन्दनी । गन्धवल्ली । सहदेवी । सहा । इति ॥ रक्तस्य पर्यायः । विश्वदेवा । इति ॥ श्वेतस्य । दण्डोत्पलेतिरत्नमाला ॥

दण्डोत्पला । स्त्री । श्वेतपुष्पे दण्डोत्पले ॥

दण्ड्यः । त्रि । दण्डनीये । दण्डार्हे ॥ दण्डमर्हति । दण्डादिभ्यो यत् ॥

दत् । पुं । दन्ते ॥ दतौ । दतः ॥ इ० श० चं ॥

दत्तः । पुं । दत्तात्रेये ॥ अग्निसिंहनन्दनेन्द्रपविशेषे ॥ वैश्योपपदे ॥ यथा । शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः । भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेदिति स्मृतिः ॥ दत्तिमे पुत्रे ॥ त्रि । कृतदाने । विसृष्टे । विश्राणिते ॥ अर्पिते ॥ न । शरणागतरक्षणादौ ॥ यथा । शरणागतसन्त्राणं भूतानाञ्चाप्यहिंसनम् । बहिर्वेदिच यद्दानं दत्तमित्यभिधीयते ॥ डुदाञ् । क्तः । दोदद्घोः ॥

दत्तकः । पुं । द्वादशपुत्रान्तर्गतपुत्रविशेषे । दत्तिमे ॥ यथा । दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेदिति याज्ञवल्क्यः ॥

दत्तात्मा । पुं । पुत्रविशेषे ॥ यथा । दत्तात्मा तु स्वयं दत्त इति कात्यायनः । अस्यार्थः । दत्तात्मा तु पुत्रो यो माता पितृविहीनः ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्त उपनीत इति ॥

दत्तात्रेयः । पुं । विष्णोरंशेऽत्रिपुत्रे यो

गीश्वरे परमावधूते ॥ विष्णुना आ
त्मसदृशमपश्यता ऽऽत्मैवात्मवेदत्तः
। दत्तश्चासावात्रेयश्च ॥

दत्तानपकर्म्म । न । दत्ताप्रदानिके ॥

दत्ताप्रदानिकम् । न । अष्टादशविवाद
पदान्तर्गतविवादपदविशेषे ॥ यथा
नारदः । दत्त्वाद्रव्यमसम्यग्यः पु
नराहर्त्तुमिच्छति । दत्ताप्रदानिकं
नामव्यवहारपदंहितदिति ॥ असम्य
क्‌विहितमार्गेण । दत्तस्य पुनराह-
रणं यस्मिन् विवादपदे तत् ॥

दत्तिः । स्त्री । प्रतिपादने । दाने ॥

दत्तेयः । पुं । इन्द्रे ॥ इतित्रिकाण्डशेषः ॥

दत्रिमः । पुं । पुत्रविशेषे । दत्तके ॥ मा
ता पिता वा दद्यातां यमद्भिः पुत्रमा
पदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो
दत्रिमः सुतः ॥

ददत् । त्रि । प्रयच्छति ॥ ददाति । डु
दाञ्० । लटः शत्रादेशः । शपः श्लुः
। श्लाविति द्वित्वम् । अभ्यासस्य ह्रस्वः
। श्नाभ्यस्तयोरित्यालोपः । स्वाद्यु-
त्पत्तिः । उगित्त्वात् प्राप्तोनुम् अभ्य
स्तत्वान्नभवति ॥

ददनम् । न । प्रतिपादने । दाने ।

दद्रुः । पुं । न । दाद इतिप्रसिद्धे रो
गे । दद्रूम् ॥ तल्लक्षणं यथा ।
सकण्डुरागपिडकं दद्रुमण्डलमुन्नत-

मिति ॥ तच्चिकित्सा यथा । कुष्ठकृमि
घ्नदद्रुघ्ननिशासैन्धवसर्षपाः । अम्लपि
ष्टाः प्रलेपोऽयं दद्रुकुष्ठनिषूदन इति
॥ अपिच । दूर्वाभयासैन्धवचक्रमर्द
कुठेरकाः काञ्जिकतक्रपिष्टाः । त्रि-
भिः प्रलेपैरपिबद्धमूलं दद्रुञ्चकुष्ठ-
ञ्चविनाशमेतीति ॥ कच्छपे ॥

दद्रुकः । पुं । दद्रुरोगे ॥

दद्रुघ्नः । पुं । चक्रमर्द्दके । चकवंड इति
कसौंदी इति च भाषा । दद्रुं हन्ति ।
हन० । हन्तेरऽमनुष्यकर्त्तृकेचे
ति टक् । अत्पूर्वस्येतिनियमाभावाण्ण
त्वम् ॥

दद्रुघ्नपत्रम् । न । पमाटशाके । पवाँड
काशाक इति चकवंडकीभाजी इति
च भाषा ॥ दद्रुघ्नपत्रं दोषघ्नमम्लं वात
कफापहम् । कण्डूकासकृमिश्वासद
द्रुकुष्ठप्रणुल्लघु ॥

दद्रुणः । त्रि । दद्रुरोगिणि ॥ दद्रुरस्याऽ
स्ति । पा०नः । शाकीपलालीदद्र्वां ह्र
स्वत्वञ्च ॥

दद्रुनाशिनी । स्त्री । तैलिनीकीटे ॥

दद्रुरोगी । त्रि । दद्रुणे ॥

दद्रूः । पुं । त्वग्रोगविशेषे । कुष्ठप्रभेदे ॥
दरिद्रयतेऽनेनाक्रम् । दरिद्राद्दुर्ग
तौ । दरिद्रातेर्यालोपश्चेत्यूः । रिस्य
आचेतिसमस्तोवर्णीयो ॥

दधानः । त्रि । बिभ्राणे । धारयति ॥ दधातेः कर्त्तरि शानच् ॥

दधि । न । क्षीरोत्तरावस्थापन्ने दहि इति प्रसिद्धे गोरसे । क्षीरजे । मङ्गल्ये । त्रिरले । पयस्ये ॥ अस्य गुणाः । दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु । पाकेऽम्लं ग्राहि पित्तास्रशोथमेदःकफप्रदम् ॥ मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे । अतीसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ॥ तद्भेदाः पञ्च सम्प्रोक्ता लक्षणैस्तन् वदाम्यहम् । आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम् ॥ अम्लं चतुर्थं मत्यम्लं पञ्चमं दधि पञ्चधा । मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत् ॥ मन्दं स्यात् सृष्टविण्मूत्रं दोषत्रयविदाहकृत् । यत् सम्यग्घनतां यातं व्यक्तं स्वादुरसं भवेत् ॥ अव्यक्ताम्लरसं तत्तु स्वादुविज्ञै रुदाहृतम् । स्वादु स्यादत्यभिष्यन्दि वृष्यं मेदःकफावहम् ॥ वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् । स्वाद्वम्लं सान्द्र मधुरं कषायानुरसं भवेत् ॥ स्वाद्वम्लगुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥ यत्तिरोहितमाधुर्यं व्यक्ताम्लत्वं तदम्लकम् । अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥ तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् । अत्यम्लं दीपनं रक्तपित्तदुष्टिकरं परम् ॥ * ॥ गव्यं दधि विशेषेण स्वादु बल्यं रुचिप्रदम् । पवित्रं दीपनं स्निग्धं पुष्टिकृत् पवनापहम् ॥ उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥ * ॥ माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् । स्वादुपाकमभिष्यन्दि वृष्यं गुर्वस्रदूषकम् ॥ * ॥ आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् । शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम् ॥ * ॥ पक्वदुग्धभवं हृद्यं दधि स्निग्धं गुणोत्तरम् । पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम् ॥ * ॥ अथ निःसारदुग्धस्य दध्नो ह्येते गुणाः स्मृताः । असारं दधि संग्राहि शीतलं वातलं लघु । विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ * ॥ गालितं दधि सुस्निग्धं वातघ्नं कफकृद्गुरु । बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत् ॥ * ॥ सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित् । सगुडं वातनुद्वृष्यं बृंहणं तर्पणं गुरु ॥ * ॥ न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् । नामुद्गयूषं नाक्षौद्रं नोष्णं नामलकैर्विना ॥ * ॥ शस्यते दधि नो रात्रौ शस्तञ्चाम्बुघृतान्वितम् ।

रक्तपित्तकफोत्थेषु विकारेषु तु तच्च न ॥ * ॥ हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते । शरद्ग्रीष्मवसन्तेषु प्रायश स्तद्विगर्हितम् ॥ * ॥ ज्वरासृक्पित्तवीसर्पकुष्ठपाण्डामय भ्रमान् । प्राप्नुयात् कामलाञ्चोग्रां विधिं हित्वा दधिप्रियः ॥ श्रीवासे ॥ सर्ज्जे ॥ वासे ॥ त्रि । धारके ॥ इति मुग्धबोधम् ॥

दधिकूर्च्चिका । स्त्री । दध्नासहपक्वदुग्धे ॥ दध्नासह पयःपक्वं यत् तत्स्याद् दधिकूर्च्चिके त्युक्तः ॥ अर्द्धोदकोष्ण दुग्धे दध्यम्लसंयोगात् जातेतिके चित् ॥ उष्णदुग्धे दध्यम्लसंयोगात् जाते त्यन्ये । छाना छेना इति राजाराधाकान्तः ॥

दधिचारः । पुं । मन्थानदण्डे । वैशाखे । तक्राटे । करधर्षणे । रयी इति भाषा ॥

दधिजम् । न । नवनीते ॥

दधित्थः । पुं । कपित्थे ॥ दधिवर्णोद्रव स्तिष्ठत्यस्मिन् । स्था० । सुपिस्थ इति कः । पृषोदरादिः ॥

दधित्थाख्यः । पुं । सरलद्रवे । लोवान् इति भाषा ॥ इति रत्नमाला ॥

दधिधेनुः । स्त्री । दानार्थं दध्यादिनिर्मितायां धेनौ ॥

दधिपुष्पिका । स्त्री । अपराजितायाम् ॥

दधिपुष्पी । स्त्री । कोकशिम्ब्याम् ॥

दधिपूपः । पुं । अपूपप्रभेदे ॥ शालिपिष्टं युतं दध्ना मर्द्दयित्वा घृते पचेत् । वेष्टयेत् पक्वखण्डेन सुदत्तं दधिपूपकम् ॥ दधिपूपो गुरु र्वृष्यो दंहणो निलपित्तहा । स्रोतोभिजनन श्चैव विशेषाद्रुचिकारकः ॥

दधिफलः । पुं । कपित्थवृक्षे ॥ दधिफलेऽस्य ॥

दधिमण्डः । पुं । मस्तुनि ॥

दधिमण्डोदः । पुं । दधिसमुद्रे ॥

दधिमुखः । पुं । रामायणप्रसिद्धे वानरविशेषे । सुग्रीवस्य श्वशुरे ॥

दधिशोणः । पुं । वानरे ॥

दधिसक्तवः । पुं । करम्भे ॥ दधिसक्तुशब्दो नित्यं बहुवचनान्तः ॥ दध्नाउपसिक्ताः सक्तवः । अन्नेनव्यञ्जनमिति समासः ॥

दधिसारम् । न । नवनीते ॥

दधिस्नेहः । पुं । दधिसरे । दध्युत्तरगे ॥

दधिस्वेदः । पुं । घोले ॥

दधीचः । पुं । दधीचिमुनौ ॥ इतिशब्दभेदप्रकाशः ॥

दधीचतीर्थम् । न । तीर्थविशेषे ॥

दधीचास्थि । न । वज्रे ॥ हीरके ॥

दधीचिः । पुं । मुनिविशेषे । अथर्वमुनेरौरसात् कर्दमकन्यायां शान्तिनाम्न्यां जाते ॥ वृत्रासुरवधाय देवैरऽस्यास्था वज्रं निर्मितम् ॥

दधीच्यस्थि । न । हीरके ॥ वज्रे ॥

दधृक् । त्रि । धृष्टे ॥ धृष्णोति । ञिधृषा प्रागल्भ्ये । अस्मात् ऋत्विगादिना क्विन् द्वित्वमन्तोदात्तत्वञ्च निपात्यते । कुत्वात् पूर्वं जश्त्वेनडः गः कः ॥

दध्नः । पुं । यमे ॥ इतिशब्दरत्नावली ॥

दध्यङ् । पुं । आथर्वणे मुनिविशेषे ॥

दध्याकरः । पुं । दधिसमुद्रे ॥

दध्याली । स्त्री । श्रावण्यायाम् ॥ सुदर्शनायाम् । सुदर्शनगुलञ्चइतिगौड भाषा ॥

दध्युत्तरम् । न । कट्वरे । दधिस्नेहे ॥

दध्युत्तरगम् । न । दधिस्नेहे ॥

दध्युदः । पुं । दधिसमुद्रे ॥ दधिउदकं यस्य । उत्तरपदस्य चेत्युदकस्योदादेशः ॥

दनुः । पुं । दनुवंशजत्वात् कबन्धाख्ये असुरे ॥

दनुः । स्त्री । दानवमातरि । दक्षकन्यायाम् । कश्यपपत्न्याम् ॥

दनुजः । पुं । असुरे । दैत्ये ॥ दनौ दनोर्वा जातः । सप्तम्यांजनेर्डः । पञ्चम्यामजातौ ॥

दनुजदलिनी । स्त्री । दुर्गायाम् ॥

दनुजद्विट् । पुं । देवे ॥

दनुसूनुः । पुं । असुरे ॥ दनोःसूनुः ॥

दन्तः । पुं । अद्रिकटके ॥ कुञ्जे ॥ सानुनि ॥ चर्वणसाधनास्थनि । दशने । रदने । रदे । द्विजे ॥ द्वात्रिंशत्सङ्ख्यायाम् ॥ पञ्चमाश्वप्रभेदे (१८८) ॥ दाम्यति । दमु० । अन्तर्भावितण्यर्थात् बाहुलकात्तन् । हसिमृग्रिण्विति वा तन् ॥

दन्तकः । पुं । नागदन्ते । खूंटी इति भाषा ॥ गिरेः प्रदेशात् तिर्यग्बहिर्निर्गते पाषाणे ॥ दन्तेषु प्रसिते ॥ स्वाङ्गेभ्यः प्रसिते इतिकन् ॥ दन्ते ॥ स्वार्थेकन् ॥

दन्तकर्षणः । पुं । जम्बीरे ॥

दन्तकाष्ठम् । न । विकङ्कतवृक्षे ॥ दन्तधावनार्थकाष्ठे ॥ यथा । दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् । सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥ ॥ तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् । क्षीरिणो वृक्षगुल्माद्या भक्षये दन्तधावनम् ॥ इतिमहाभारतम् । परिमाणं माह विष्णुः । कनिष्ठाग्रसमं स्थूलं सुकूर्चं द्वादशाङ्गुलम् । प्रातर्भुक्त्वा च यतवाक् भक्षये

दन्तधावनम् ॥ विशेषमाह मरीचिः। द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्। अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥ चतुरङ्गुलमानेन नारीणां विधिरुच्यते। अन्तरप्रभवानाञ्च षडङ्गुलमुदाहृतमिति ॥ अथास्य लक्षणम्। तत्प्रयोजनप्रदर्शनम्। वल्लीलतागुल्मतरुप्रभेदैः स्युर्दन्तकाष्ठानि सहस्रशोयैः। फलानिवाच्यान्यथ तत् प्रसङ्गो मा भूदतो वच्म्यथकामिकानि ॥ १ ॥ परिभाषार्थमाह। अज्ञातपूर्वाणि न दन्तकाष्ठान्यज्ञातपर्णैश्च समन्वितानि। नयुग्मपर्वाणि न पाटितानि नचोर्द्ध्वशुष्काणि विना त्वचा च ॥ २ ॥ प्रविभागेन फलानि ॥ वैकङ्कतश्रीफलकाश्मरीषु ब्राह्मीद्युतिः चे मतरौ सुदाराः। वृद्धिर्वटे र्के प्रचुरञ्च तेजः पुत्रामधूके सगुणाः प्रियत्वम् ॥ लक्ष्मीः शिरीषेच तथाकरञ्जेप्लक्षेऽर्थसिद्धिः समभीप्सिता स्यात्। मान्यत्व माप्नोति जनस्य याभ्यां प्राधान्य मश्वत्थतरौ वदन्ति ॥ आरोग्य मायु र्वदरीवृहत्यो रैश्वर्यवृद्धिः खदिरे सविल्वे। द्रव्याणि चेष्टान्यतिमुक्तकेस्युः प्राप्नोति तान्येव पुनःकदम्बे ॥ नीपे ऽर्थाप्तिः करवीरेऽन्नलब्धि भाण्डीरे स्याद्दन्नमेवं प्रभूतम्। शम्यांशत्रून् सोपहन्त्यर्जुनेन श्यामायाञ्च द्विषता मेव नाशः ॥ साले ऽश्वकर्णेच वदन्तिगौरवं सभद्रदारावपिचाटरूषके। वाल्लभ्यमायाति जनस्य सर्वतः प्रियङ्ग्वपामार्गसजम्बुदाडिमैः ॥ * ॥ अथविधानम् ॥ उदङ्मुखः प्राङ्मुखएववा ऽब्दं कामं यथेष्टं हृदये निवेश्य। अद्यादनिन्द्यं च सुखोपविष्टः प्रक्षाल्यजह्याच्च शुचौ प्रदेशे ॥ ८ ॥ * ॥ त्यक्तस्य लक्षणम्। अभिमुखपतितं प्रशान्तदिक्स्थं शुभमतिशोभन मूर्द्ध्वसंस्थितं यत् ॥ अशुभकर मतोन्यथा प्रदिष्टं स्थितपतितञ्च करोतिमिष्टमन्नम् ॥ इति ॥

दन्तकाष्ठकम्। न। आहुल्यवृक्षे ॥

दन्तच्छदः। पुं। रदनच्छदे। उत्तराधरोष्ठमात्रे ॥ दन्ताश्छाद्यन्ते ऽनेन। छदसंवरणे। चु०। पुंसीतिघः। छादेर्घेइति ह्रस्वः ॥

दन्तच्छदोपमा। स्त्री। विम्बयाम् ॥

दन्तधावनः। पुं। खदिरद्रुमे ॥ दन्तान् धावति। धावुगतिशुद्ध्योः। ल्युट् ॥ गुच्छकरञ्जे ॥ वकुले ॥ न। दन्तशुद्धौ ॥ तस्यविधिः। प्रातर्भुक्ताच यत्नं कषायकटुतिक्तकम्। भक्षयेद् दन्तप

षनं दन्तमांसान्यबाधयन् ॥ * ॥ दन्तानूर्द्ध्वमधोघृष्ट्वा प्रातः सिन्धोच्चलोचने । तोयपूर्णमुखः स्नेनदृष्टि राशु प्रसीदति ॥ * ॥ अर्द्दिती कर्णशूलीच दन्तरोगी नवज्वरी । शोषी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्जयेत् ॥ * ॥ उपवासदिने विप्र पितृश्राद्धदिने तथा । नचतत् फलमाप्नोति दन्तधावनकृन्नरः ॥ प्रभातेमार्ज्जयेद् दन्तान् वाससा रसनां तथा । कुर्यात् द्वादशविप्रेन्द्र कवलानि जलैर्बुधः ॥ उपवासे पितृश्राद्धे विधिरनेन जैमिने । दन्तधावनकृन्मर्त्यः सम्पूर्णं लभतेफलमिति ॥ * ॥ मृत्युः स्याद् दक्षिणास्येन पश्चिमास्येनचामयः । पूर्वास्ये नोत्तरास्येन सम्पदो दन्तधावनादिति विशेषः ॥ अपिच । मध्यमानामिकाभ्याञ्च वृद्धाङ्गुष्ठेन चद्विजः । दन्तानांधावनं कुर्यात् तर्जन्यानकदाचन ॥ नित्यक्रियाफलंप्रेप्सुस्त्वरया दन्तधावनम् । प्रभाते कुरुते प्रातः सूर्योदयविवर्जिते । सूर्योदये द्विजश्रेष्ठयः कुर्याद् दन्तधावनम् । नित्यक्रियाफलं तस्य सर्वमेव विनश्यति ॥ यःस्नानसमये कुर्यात् जैमिने दन्तधावनम् । निराशाःपितरोयान्ति तस्यदेवाःसुरर्षयः ॥ दन्तस्य धावनंकुर्याद् योमध्याह्नापराह्णयोः । तस्यपुष्पं न गृह्णन्ति देवताः पितरोजलम् ॥ स्नानकाले पुष्करिण्यां यः कुर्याद्दन्तधावनम् । तावत्स्वेयः सचण्डालो यावद्गङ्गा न पश्यति ॥ भगवत्युदिते सूर्ये यःकुर्याद् दन्तधावनम् । तद्दन्तकाष्ठं पितरोभुक्त्वा गच्छन्तिदुःखिनः ॥ इति पाद्मे क्रियायोगसारः ॥

दन्तपत्रम् । न । कुण्डले ॥

दन्तपत्रकम् । न । कुन्दपुष्पे ॥

दन्तपर्य्यायः । पुं । पद्ममात्रप्रभेदे (।ऽऽ)॥

दन्तपुप्पुटकः । पुं । दन्तरोगविशेषे ॥ अस्यनिदानं यथा । दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान् । दन्तपुप्पुटको नाम स व्याधिः कफरक्तज इति ॥

दन्तपुष्पम् । न । कतकफले ॥ कुन्दे ॥

दन्तफलम् । न । कतके ॥ पुं । कपित्थे ॥

दन्तफला । स्त्री । पिप्पल्याम् ॥

दन्तभागः । पुं । हस्त्यग्रभागे । गजस्य मुखतः स्कन्धपर्य्यन्तेऽग्रभागे ॥ दन्तस्यभागः । दन्तसम्बन्धीभागोवा । श्याकपार्थिवादिः ॥

दन्तमलम् । न । मुष्टिकायाम् । दन्तमलच्छेदे ॥

दन्तमूलम् । न । दन्तार्बुदाभिधेरोगे ॥

दन्तमूलिका । स्त्री । दन्तीवृक्षे ॥

दन्तरोगः । पुं । रदनामये ॥

दन्तरोगी । त्रि । रदनामयविशिष्टे ॥ फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम् । तथा तिकठिनं भक्ष्यं दन्तरोगीविवर्जयेत् ॥

दन्तवक्त्रः । पुं । भारतादिप्रसिद्धे नृपविशेषे ॥

दन्तवस्त्रम् । न । ओष्ठे ॥

दन्तवासः । न । ओष्ठे । अधरोष्ठयोः ॥

दन्तबीजकः । पुं । दाडिमे ॥

दन्तवेष्टः । पुं । दन्तरोगविशेषे ॥ यथा । स्रवन्ति पूयरुधिरं चलादन्ता भवन्तिच । दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥

दन्तशठः । पुं । जम्बीरे ॥ कपित्थे ॥ कर्म्मरङ्गके ॥ नागरङ्गे ॥ शठति । शठ कैतवेच । चात् हिंसासंक्लेशनयोः । पचाद्यच् ॥ अम्लरसे ॥ दन्तानां शठ इवापकारित्वात् ॥

दन्तशठा । स्त्री । चाङ्गेर्याम् ॥ क्षुद्राम्लिकायाम् ॥ दन्तानां शठेवापकारित्वात् ॥

दन्तशर्क्करा । स्त्री । कफवायुशोषितदन्तमलके ॥ यथा । मलो दन्तगतो यस्तु कफमारुतशोषितः । शर्क्करेव खरस्पर्शा सा ज्ञेया दन्तशर्क्करा ॥

दन्तशाणम् । न । मिस्सकाये । मिस्सी इति भाषाप्रसिद्धे दन्तघर्षणचूर्णे ॥ इति त्रिकाण्डशेषः ॥

दन्तशिरा । स्त्री । माढ्याम् ॥

दन्तशूलः । पुं । रदनवेदनायाम् ॥ अस्यौषधं यथा । त्रिफलानिम्बवृन्ताकं कटुकारग्वधैः शृतम् । पाययेन्मधुनामिश्रं दन्तशूलोपशान्तये ॥

दन्तशोफः । पुं । दन्तार्बुदे ॥

दन्तहर्षः । पुं । दन्तरोगविशेषे ॥ यथा । शीतरूक्षप्रवाताम्लस्पर्शाना सहा द्विजाः । पित्तमारुतकोपेन दन्तहर्षः समासतः ॥

दन्तहर्षकः । पुं । जम्बीरे । इतिजटाधरः ॥

दन्तहर्षणः । पुं । जम्बीरे ॥ इ० त्रि० ॥

दन्ताघातः । पुं । निम्बूके ॥ रतिक्रीडायां दशनाघाते ॥ तत्स्थानानि यथा । स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः ॥ इतिकामशास्त्रम् ॥

दन्तायुधः । पुं । शूकरे ॥ दन्ता आयुधो यस्य ॥

दन्तार्बुदः । पुं । न । दन्तरोगप्रभेदे । दन्तशोफे । द्विजव्रणे ॥

दन्तालिका । स्त्री । वल्गायाम् । लगाम

इतिभाषा ॥

दन्तावलः । पुं । हस्तिनि । गजे ॥ अतिशयितौ दन्तावस्य । दन्तशिखात् संज्ञायामिति वलच् । वले इतिदीर्घः ॥

दन्तिका । स्त्री । दन्त्योषधौ । मुकूलके ॥ दाम्यति दाम्यते वा । दमुउपशमे । हसिमृग्रिण्वाऽमिदमीत्यादिना तन् । स्वार्थे कन् ॥

दन्तिजा । स्त्री । दन्तिकायाम् ॥

दन्ती । पुं । दन्तावले ॥ अतिशयितौ दन्तावस्य । इनिः ॥

दन्तिनी । स्त्री । दन्तीवृक्षे ॥

दन्तिमदः । पुं । हस्तिमदे ॥

दन्तिमूलिका । स्त्री । दन्त्योषधौ ॥

दन्ती । स्त्री । उदूम्बरपर्णीमोषधौ । प्रत्यक्पर्णीम् ॥ दाम्यति दाम्यते वा । दमु० । तन् । गौ० ङीष् ॥ लघुदीर्घ प्रभेदेन प्रोक्तं दन्तीद्वयं बुधैः । दन्तीद्वयं सरं पाके रसेच कटु दीपनम् ॥ गुदाङ्कुराश्मशूलास्रकण्डुकुष्ठविदाहनुत् । तीक्ष्णोष्णांहन्ति पित्तास्रकफशोथोदरकृमीन् ॥

दन्तीबीजम् । न । जयपाले ॥

दन्तुरः । त्रि । उन्नतरदे ॥ उन्नतादन्ताः सन्त्यस्य । दन्तउन्नत उरच् ॥ उन्नतनते । विषमे ॥ कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशःसुखी । कदाचित् तुन्दिलोदुःखीकदाचिच्च-ञ्चलासतीति सामुद्रकम् ॥ स्त्री । दन्तुरा ॥

दन्तुरच्छदः । पुं । वीजपूरे ॥

दन्तोलूखलिकः । पुं । } तापसे । वानप्रस्थविशेषे ॥
दन्तोलूखली । पुं । }
योश्रीह्यादीन् दन्तैः खण्डयित्वा भक्षयति सः ॥

दन्त्यः । त्रि । दन्तोद्भवेवर्णविशेषे ॥ दन्तेषुभवः । शरीरावयवाच्चेति यत् ॥ दन्तहिते ॥ दन्तेभ्योहितः । शरीरावयवाद्यत् ॥

दन्दशूकः । पुं । राक्षसे ॥ सरीसृपे । फणिनि ॥ गर्हितं दशति । लुपसदेति यङ् । यजजपेत्यूकः । जपजभदहेत्यभ्यासस्यनुक् ॥ नरकविशेषे ॥

दन्द्रम्यमाणः । त्रि । अत्यर्थं कुटिला-मनेकरूपांगतिमिच्छति ॥

दभ्रम् । न । अल्पे ॥ दभ्यते । दम्भुद-म्भने । स्फायितञ्चीति रक् ॥ पुं । समुद्रे ॥

दम् । अ । कलत्रे । पत्न्याम् ॥

दमः । पुं । दमथे ॥ वाह्येन्द्रियनैश्चल्ये । वाह्येन्द्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यो निवर्त्तने । बहिरिन्द्रियाणामुच्छृङ्खलव्यापारनिरोधे । वाह्येन्द्रि

यसंयमे ॥ निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ऋतुकालाद्यतिरिक्तकाले मैथुनाद्यभावे ॥ उपशमे । विकारहेतुविषयसन्निधानेपि अनसो ऽविक्रियत्वे ॥ कुत्सितात् कर्मणो विप्र यच्च चित्तनिवारणम् । स कीर्त्तितो दमः प्राज्ञैः समस्ततत्त्वदर्शिभिः ॥ दण्डे ॥ दण्डकार्य्ये ॥ कर्दमे ॥ दमने ॥ दमनम् । दमु उपशमे । भावे घञ् । नोदात्तोपदेशेति वृद्ध्यभावः ॥

दमकः । त्रि । शासके । दमनकर्त्तरि ॥ दाम्यति । दमु० । ण्वुल् । नोदात्तोपदेशस्येति न वृद्धिः ॥

दमघोषः । पुं । चन्द्रवंशीयक्षत्रियविशेषे । शिशुपालपितरि ॥

दमघोषसुतः । पुं । शिशुपाले ॥

दमथः । पुं । दण्डे ॥ दमे । तपः क्लेशसहे ॥ दमनम् । दमु० । शमादिभ्यो ऽथच् ॥ दाम्यति वा । वाहुलकादथप्रत्ययः ॥

दमथुः । पुं । दण्डे ॥ दमे ॥

दमनम् । न । दण्डे ॥ यथा । अत्युच्छ्रितस्य दमनमुचितञ्च श्रुतौ श्रुतम् ॥ पुं । दोना इति प्रसिद्धे पुष्पे । पुष्पचामरे ॥ दमनस्तुवरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः । ग्रहणी विषकुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥ वीरे ॥ कुन्दवृक्षे ॥ दाम्यति । दमु० । नं० ल्युः ॥

दमनकः । पुं । दमने । गन्धोत्कटे । दोना इति प्रसिद्धे पुष्पवृक्षे ॥ दमन एव । स्वा०कः ॥ न । वर्णवृत्तान्तरे ॥ यथा । द्विगुणनगण मिह वितनु हि । दमनकमिति गदति शुचि हि ॥ यथा । सरभसमिह दृशमुपनय । सुमुखि मदनरुजमयनयेति ॥ त्रिष्टुप् छन्दोभेदेपि ॥ यथा । द्विजवरगणयुग मममलं तदनु च कमयकरतलम् । फणिपतिवरपरिगदितं दमनकमिदमतिललितम् ॥ यथा । प्रणमत मधुरिपुचरणं भवजलनिधिपरितरणम् । अभिनवकिशलयरुचिरं सुरपतिसकलभयहरम ॥

दमनी । स्त्री । अग्निदमनीवृक्षे ॥

दमयन्ती । स्त्री । नलनृपतेर्भार्यायाम् । विदर्भदेशीयभीमराजकन्यायाम् । भैम्याम् ॥ दमयन्तीनलाभ्याञ्च नमस्कारं करोम्यहम् । अविवादो भवत्त्वत्र कलिदोषप्रशान्तिदः ॥ मद्रमल्लिकायाम् ॥

दमितः । त्रि । दान्ते ॥ कृतदमने वृषादौ । भारादिसहे ॥ दम्यते स्म । दमु० । क्तः । वादान्तेत्यादिना पक्ष

साधुः ॥

दमी । त्रि । दमविशिष्टे ॥

दमुनाः । पुं । चित्रभानौ । अग्नौ ॥ दाम्यति । दमु० । अन्तर्भावितण्यर्थाद्दमेरुनसिः । दमुनसौ दमुनसः इत्यादि ॥ शुक्राचार्ये ॥

दमूनाः । पुं । विभावसौ । वह्नौ । पावके ॥ दाम्यति । दमु० दमेरुनसिः । अन्येषामपिदृश्यतइति पचेदीर्घः । जुष्टोदमुनाः । दमूनसंगृहपतिं वरेण्यम् । दृशपायाम्तु छान्दसत्वाद्दीर्घः पठ्यते । तन्मते ह्रस्वोवाहुलकाद्बोध्यः ॥

दम्पती । पुं । सहोक्त्या जायापत्योः । जम्पत्योः ॥ जायाचपतिश्च । राजदन्तादिगणेपाठाज्जायायाः दम्भावो-वा निपात्यते । यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ॥

दम्भः । पुं । कैतवे ॥ धर्मध्वजित्वे । धार्मिकतयात्मनः ख्यापने । अधार्म्मिकत्वेपि धार्मिकत्वख्यापने । कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छायाम् ॥ लोकवञ्चनाय विहितकर्मानुष्ठाने ॥ दम्भ्यतेऽनेन । दम्भु दम्भने । घञ् ॥

दम्भनम् । न । दम्भे ॥

दम्भित्वम् । न । लाभपूजाख्यात्यर्थंस्वधर्मप्रकटीकरणे ॥

दम्भोलिः । पुं । वज्रे ॥ दम्भुरोधने । अमुन् । दम्भसि रोधने अलिःसमर्थः । भलभूषणपर्याप्तिवारणेषु । इन् दम्भोति खेदयति । दम्भु० । औणादिकश्चोलिर्वा ॥

दम्यः । पुं । प्राप्तदमावस्थेवत्से । वत्सतरे ॥ अनडुहि ॥ त्रि । दमनीये । शास्ये ॥ दमनार्हः । दमुशमने । अर्हेकृत्यतृचश्चेत्यर्थे पोरदुपधादिति यत् ॥

दयः । पुं । करुणायाम् । दयायाम् ॥ इति शब्दरत्नावली ॥

दयमानः । त्रि । दयाकर्त्तरि ॥ दयते । दय० । लटःशानच् मुक् ॥

दया । स्त्री । कृपायाम् । दुःखितेषु भूतेष्वनुकम्पायाम् । परदुःखासहने ॥ लक्षणं यथा । यत्नादपिपरक्लेशं हर्त्तुं या हृदिजायते । इच्छा भूमिसुरश्रेष्ठ सा दया परिकीर्त्तितेति ॥ आत्मवत् सर्वभूतेषु यो हिताय शुभायच । वर्त्तते सततं हृष्टः क्रियाह्येषादयास्मृता ॥ प्राणा यथात्मनोभीष्टा भूतानामपि ते तथा । आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ॥ इयंमोहपत्नी । यथा । मोहपत्नी दया साध्वी पूजिताच जगत्प्रिया । सर्वेलो

काश्चसर्वेष निष्फलाश्चययाविना ॥ यज्ञमोहोस्तितत्रदयायाः सत्वाहया मोहपत्नीति देवीभागवते ९ स्कन्धे १ ऽध्याय: ॥ अहिंसापरमोधर्मो ।व प्राणानाञ्चसंशय: । दया सर्वेत्र कर्त्तव्या ब्राह्मणेन विजानता ॥ यस्मादन्यत्र विप्रेन्द्र न हिंसायाज्ञिकीमतेति देवीभागवतम् ॥ यस्मादन्यत्र दयाकर्त्तव्या यज्ञेतु हिंसैवकर्त्तव्या न सा याज्ञिकी हिंसा हिंसाभवति । अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य- इति श्रुतेः॥ या वेदविहिता हिंसानियतास्मिंश्चराचरे। अहिंसामेव तां विद्याद्वेदाद् धर्मोहि निर्बभाविति मनुस्मृतेश्च॥ दृणंवाप्यविधानेन च्छेदयेन्नकदाचनेतिकुल्लार्णवोक्तेश्च॥ रसान्तरे॥ दयते रक्षत्यनया। दय दानगतिहिंसारक्षणेषु । भिदाद्य- ङ् ॥ टाप्॥

दयाकूर्च्चः । पुं । बुद्धे ॥ इति हेमचन्द्रः॥

दयालुः । त्रि । स्तरते । कारुणिके । दयायुक्ते । परदुःखप्रहाणपरे ॥ अ- हो वकीयं स्तनकालकूटं जिघांसया ऽपायि यदप्यसाध्वी। लेभेगतिं धात्युचितां ततोन्यंकंवा दयालुं शरणं व्रजेम ॥ दयते । दय० । स्पृहिगृही त्यालुच्॥ दयालोरसमर्थस्यदुःखा यैवदयालुता ॥

दयालुकः । त्रि । सदये ॥

दयावान् । त्रि । परदुःखहरणेच्छौ ॥

दयितः । पुं । पत्यौ ॥ त्रि । प्रिये ॥ दय्यतेस्म । दय० । क्तः ॥

दयिता । स्त्री ।भर्य्यायाम् ॥ प्रियायाम् ॥ रामस्य दयिता भार्य्यानित्यं प्राण समाहिता ॥ टाप् ॥

दर । अ । मनागर्थे । ईषदर्थे॥ यथा। दरदलितनीलोत्पलरुचेति ॥

दरः । पुं । न । साध्वसे । भये । डर इति भाषा ॥ गर्त्ते । गढा इतिभाषा ॥ शङ्खे ॥ यथा । स उच्चकाशे धवलोदरो दरो प्युरुक्रमस्याधरशोणशोणिमेति ॥ दीर्य्यन्त्यस्मात् । दॄ भये । ऋदोरप् ॥ दरणम् दीर्य्यतेवा । दॄभये । दॄविदारणे वा । अप् । ग्र- हवृदृन्श्चिगमश्चेत्यप् वा ॥

दरकः । त्रि । भीरौ । दरपोक इति भाषा ॥ दॄ० । कृञादिभ्यो वुन् ॥

दरकण्टिका । स्त्री । शतावर्य्याम् ॥

दरणिः । पुं । कूलभङ्गे । कूलखण्डे ॥

दरत्-द् । स्त्री । प्रपाते ॥ भये ॥ पर्वते ॥ म्लेच्छजातौ ॥ हृदये ॥ कूले । तीरे ॥ दरणम् दीर्य्यते वा । दॄ० । दृणातेर्भसोऽदिः ॥

दरदः । पुं । देशविशेषे ॥ भये ॥ स्वे

च्छजातिविशेषे । दरदेशोद्भवे-
आदौ क्षत्रिये पुनर्विलुप्तक्रियालोपा
द्विजा शूद्रतामापन्ने दस्युपदवाच्ये
॥ त्रि । भयप्रदे ॥ पुं । न । हिङ्गुले
॥ दरदस्त्रिविधः प्रोक्तश्चर्मारः शुक
तुण्डकः । हंसपादस्तृतीयः स्याद्गु
णवानुत्तरोत्तरः ॥ चर्मारः शुक्लवर्णः
स्यात् सपीतः शुकतुण्डकः । जपाकु
सुमसङ्काशो हंसपादो महोत्तमः ॥
तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रा
मयघ्नं कफपित्तहारि । हृल्लासकुष्ठ
ज्वरकामलांश्च प्लीहामवातौ च गरं
निहन्ति ॥ ऊर्द्ध्वपातनयुक्त्या तु डम
रुयन्त्रपाचितम् । हिङ्गुलं तस्य सूत
न्तु शुद्धमेव न शोधयेत् ॥
दरवरः । पुं । भगवतः श्रीकृष्णस्य श
ङ्खे ॥ दरेषु वरः ॥
दरिः । स्त्री । दर्य्याम् ॥
दरितः । त्रि । भीते । डरा इति भाषा
॥ दरः सञ्जातोऽस्य । ता० इतच् ॥
दरिद्रः । दीने । निःस्वे । निर्धने ॥ अ
नुपोष्य त्रिरात्राणि तीर्थान्यनभिग
म्य च । अदत्त्वा काञ्चनं धेनूश्च दरिद्रो
जायते नरः ॥ दरिद्राति । दरिद्रा दु
र्गतौ । पचाद्यच् ॥ दरिद्रोऽयस्वसन्तु
ष्टः कृपणो यो ऽजितेन्द्रियः ॥
दरिद्रितः । त्रि । दुर्गते । दारिद्र्ययुक्ते

॥ दरिद्रातेः कर्त्तरि क्तः ॥
दरी । स्त्री । कन्दरायाम् । कृत्रिमगृ
हाकारे गिरिविवरे ॥ दृणाति । दॄ
विदारणे । पचादौ दरडिति पाठा
त् टिड्ढेति ङीप् ॥
दर्द्दरः । पुं । पर्वते ॥ त्रि । ईषद्भग्नभा
जने ॥
दर्द्दराम्रः । पुं । मीनाम्रीणे । साम्रमी
नव्यञ्जने ॥ इति शब्दमाला ॥
दर्द्दरीकम् । न । वाद्यप्रभेदे ॥ दीर्य्यते
। दॄ० पर्करीकादयश्चेतीकन् धातो
र्द्वित्वमभ्यासस्य रुक् च ॥
दर्द्दुरः । पुं । तोयदे ॥ भेके ॥ वाद्यभा
ण्डविशेषे ॥ अद्रिविशेषे ॥ मृत्पा
त्रविशेषे ॥ न । ग्रामजाले ॥ इ० मे० ॥
दृणाति शब्दैः कर्णौ । दॄ० मकुर दर्द्दु
रावितिनिपातितः ॥
दर्द्दुरा । स्त्री । चण्डिकायाम् । उमा
याम् ॥ दृणात्यसुरान् । दॄ० । म-
कुरदर्द्दुरावित्युरच् धातोर्द्वित्वमभ्या
सस्य रुक् टिलोपश्च । टाप् ॥
दर्द्दूः । स्त्री । कुष्ठप्रभेदे । दद्रुरोगे ॥
दरिद्र्यते ऽनयाङ्गम् । दरिद्रा० । द
रिद्रातेर्य्यालोपश्चेत्यूः । रश्च द्रुश्च आ
श्च यो । तेषां लोपः । अन्यथा धे ऽ
न्यसंदेशश्चेति द्वितीयरेफलोपः ॥
दर्द्दुः । पुं । दद्रुरोगे ॥ दरिद्र्यते । दरि

द्रा० । मृगव्यादयश्चेति कुः ॥

दद्रुघ्नः । पुं । चक्रमर्द्दे ॥ दद्रुं हन्ति । ह न० । हन्ते रमनुष्ये तिटक् ॥

दद्रुणः । त्रि । दद्रुरोगिणि ॥ दद्रूरस्यास्ति । शाकीपलालीदद्र्वां ह्रस्वत्वञ्चेति पामादिषु पाठान्नः ॥

दद्रुरोगी । त्रि । दद्रुणे ॥ दद्रूश्चासौ रोगश्च । इकोह्रस्वोङ्य इति ह्रस्वः । दद्रुरोगोऽस्यास्ति । द्वन्द्वोपतापेतीनिः ॥

दद्रूः । पुं । दद्री ॥ दरिद्राति । दरिद्रा० । दरिद्रातेर्यालोपश्चेति इकाराकारलोपः ऊप्रत्ययश्च ॥

दद्रूणः । त्रि । दद्रुणे ॥

दद्रूरोगी । त्रि । दद्रूरोगिणि ॥

दर्प्पः । पुं । कस्तूर्य्याम् । मृगमदे ॥ अहङ्कृतौ । गर्वे ॥ परावधीरणारूपो गुर्वाद्युपायातिक्रमकारणश्चित्तदोषविशेषो दर्प्पः ॥ अहङ्कारस्य सर्वेषां पापबीजमङ्कुरम् । ब्रह्मादिषु च सर्वेषां दर्पपर्यन्तमुन्नतिः ॥ धर्माद्यतिक्रमकारणे । हर्षजन्यमदे ॥ हृष्टो दृप्यति दृप्तो धर्ममतिक्रामति ॥ धर्म्मध्वजित्वेन दम्भ एव दर्प्पः । दर्प्पति । दृप उत्क्लेशे । पचाद्यच् ॥

दर्प्पकः । पुं । कामदेवे । पञ्चशरे ॥ दर्पयति । दृप हर्षमोहनयोः । ण्वु

ल् ॥ त्रि । अहङ्कारकारके ॥

दर्प्पणः । पुं । मुकुरे । आदर्शे । रूपदर्शनाधारे ॥ दर्पयति । दृपण्यन्तः । दृपसन्दीपने । चु०वा । नं० ल्युः ॥ न । अक्षिणि ॥ पर्वतविशेषे ॥ नदीविशेषे ॥ यथा । ततः पूर्वं महाराज दर्प्पणो नामपर्वतः । कुबेरो यत्र वसति धनपालैः समं सदेति ॥ यस्मिन्नास्ते मध्यभागे रोहिणो रोहिता कृतिः । यस्मिं ल्लौहादिकं स्पृष्टं स्वर्णतां याति तत्क्षणात् ॥ तस्मात्तदूरं स्रवति दर्पणोनामवै नदः । हिमाद्रिप्रभवो-नित्यं लौहित्यसदृशः फले ॥ समुत्पन्नं हि लौहित्यं सर्व्वैर्देवगणैर्हरिः । सर्वतीर्थोदकैः सम्यक् स्नापयामास तं सुतम् ॥ तस्य स्नानसमुद्भूतः पापदर्पस्य पाटनः । तेनायं दर्पणो नाम पुरा देवगणैः कृतः ॥ तस्मिन् स्नात्वा नदवरे योऽर्चयेद् दर्पणाचले । कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः ॥ स याति ब्रह्मसदनमिह भूतिशतैर्वृतः इति कालिकापुराणे ८१ अध्यायः ॥

दर्प्पारम्भः । पुं । अहङ्कारारम्भे । संटस्फटौ ॥ इति जटाधरः ॥

दर्भः । पुं । कुशे ॥ काशादिषट्सु ॥ यथा । काशाः कुशा वल्वजाश्च तथाऽन्ये तीक्ष्णरोमशाः । मौञ्जाश्च शाद्व

लास्त्वेव षड्दर्भाः परिकीर्त्तिताः ॥ दृभ्यते । दृभीग्रन्थे । घञ् ॥ यद्वा । दृणाति । दृ० । दृदलिभ्यांभः ॥

दर्भटः । पुं । न । निभृतगृहे ॥ इति त्रिकाण्डशेषः ॥

दर्भपत्रः । पुं । काशे ॥ इतिराजनि० ॥

दर्भमूली । स्त्री । ओषधीभेदे ॥ पाककर्णेतिङीष् ॥

दर्भाह्वयः । पुं । मुञ्जे ॥ इति राज० ॥

दर्वः । पुं । राक्षसे ॥ दृणाति सर्वान् । दृ० । शृगृशृदृभ्योवः ॥ ॥

दर्वटः । पुं । दण्डवादिनि ॥

दर्विः । स्त्री । खजाकायाम् । दर्व्याम् ॥ दृणाति । दृ० । वृदृभ्यांविन् ॥ उक्तमुक्तदर्विहोमिन इतिविवौ ॥

दर्विकः । पुं । दर्व्याम् । व्यञ्जनादिदारके । कौंचा इतिभाषा ॥

दर्विका । स्त्री । दर्व्याम् । खजाकायाम् ॥ गोजिह्वायाम् । दार्विकायाम् ॥

दर्विहोमः । पुं । अप्रकृतिविकृतिहोमे ॥ योनकस्यचित्प्रकृतित्वेन विकृतित्वेन वा वर्त्तते स दर्विहोम इतिव्याख्यातारः ॥

दर्व्वी । स्त्री । कंब्याम् । खजाकायाम् । कर्छी इतिभाषा ॥ दृणाति । दृ० । वृदृभ्यांविन् । कृदिकारादक्तिनइति ङीष् ॥

दर्व्वीकरः । पुं । उरगे । दीर्घपृष्ठे । सर्पे ॥ रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः । ज्ञेया दर्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥ दर्व्याकारः फणएवकरो यस्य प्रहारसाधनत्वात् । दर्वीं फणां करोति । कृञोहेत्विति टः ॥

दर्व्वीसङ्क्रमणम् । न । तीर्थविशेषे ॥

दर्शः । पुं । अमावस्यायाम् । सूर्येन्दुसङ्गमे ॥ अवलोकने । दर्शने ॥ अमावास्यायागे ॥ दर्शे अमावास्यायां क्रियमाणत्वात् उपचाराद्दर्शशब्देनोच्यते । सयागत्रयात्मकः । यथा । आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागाख्यो ऽमावास्यायां सचयावज्जीवं कर्त्तव्यः कौण्डपायिकर्त्तव्यो मासमाध्यश्चेति ॥ दृश्यते शास्त्रेण । पुंसिसंज्ञायांघः ॥

दर्शकः । त्रि । द्वारपाले । प्रतीहारे ॥ दर्शयितरि ॥ प्रवीणे । निपुणे ॥ पश्यति । दृशिर्० । ण्वुल् ॥

दर्शतः । पुं । सोमे ॥ सूर्ये ॥ पश्यति । दृशिर्० । भृमदृशियजीत्यादिना ऽतच् ॥

दर्शनम् । न । नयने ॥ स्वप्ने ॥ बुद्धौ ॥ धर्मे ॥ उपलब्धौ ॥ शास्त्रे ॥ दर्पणे ईक्षणे ॥ षट्दर्शनेषु । वैशेषिकन्या

दलम् | दलाम

यमीमांसासाङ्ख्यपातञ्जलवेदान्त
रूपेषु ॥ एतानि तत्त्वज्ञानार्थं वेदा
न्विचार्य कणादगोतमजैमिनिक
पिलपतञ्जलिवेदव्यासाख्यै र्मुनिदृ
न्दैः कृतानि ॥ अथाह कुलार्णवेश्री
सदाशिवः । षड्दर्शनानि मेङ्गानि पा
दौ कुक्षिःकरौशिरः । तेषुभेदन्तु
यः कुर्यान्मदङ्गं छेदयेत्तुसः ॥ एता
न्येव कुलस्यापिषडङ्गानि भवन्तिहि ।
तस्माद्वेदात्मकं कौलं मद्दंकौलात्म
कःप्रिये इति ॥ देव्याःपूजायामुक्ता
नि षड्दर्शनानि यथा । शैववैष्णवसौ
रगाणेशवैश्ववनास्तिकमतप्रतिपाद
कानिषड्दर्शनानीति ॥ इज्यायाम् ॥
स्वर्ग्ये ॥ अनुसन्धाने ॥ ज्ञानैकस्वरूपे
॥ रूपे ॥ दृश्यतेऽनेन अस्मिन् वा ।
दृशिर्० । करणे अधिकरणे वा ल्युट् ॥

दर्शनीयः । त्रि । मनोज्ञे ॥ दर्शन-
योग्ये ॥

दर्शयामिनी । स्त्री । तमिस्रायाम् ॥

दर्शयिता । पुं । द्वारपाले । प्रतीहारे
॥ त्रि । दर्शके ॥

दर्शविपत्-द् । पुं । चन्द्रे ॥ इतिहारावली ॥

दर्शितः । त्रि । आविष्कृते । प्रकाशिते ।
दर्शनङ्कारिते ॥

दलम् । न । उत्सेधे ॥ खण्डे ॥ शस्त्री
छदे ॥ अपद्रव्ये ॥ पत्रे । पर्णे ॥ तमा
लपत्रे ॥ पत्रे ॥ अर्द्धे ॥ पुं । खण्डने ॥
उत्सेधवद्वस्तुनि ॥ दलति । दलयति
दारयो । पचाद्यच् ॥

दलकोषः । पुं । माघ्ये । कुन्दपुष्पवृक्षे ॥

दलत् । त्रि । विकसिते ॥

दलनिर्मोकः । पुं । भूर्जपत्रवृक्षे ॥

दलनी । स्त्री । लोष्टे । ढीम इतिहेल
इतिच भाषाप्रसिद्धे ॥ त्रि । भेदक
र्त्तरि ॥

दलपः । पुं । स्वर्णे ॥ शस्त्रे ॥ प्रहरणे
॥ दलति दल्यते ऽनेनवा । दल० ।
उषिकुटिदलिकचिखजिभ्यः कपन् ॥

दलपतिः । पुं । दलाध्यक्षे ॥

दलपुष्पा । स्त्री । केतक्याम् ॥

दलसारिणी । स्त्री । केमुके ॥

दलस्नुचिः । पुं । कण्टके ॥

दलस्नसा । स्त्री । पत्रशिरायाम् । आ-
म्याम् ॥

दलाढकः । पुं । अरण्यतिले । स्वयंजा
ततिले ॥ पृश्निग्राम् ॥ गैरिके ॥ फे
ने ॥ स्तनके ॥ नागकेशरे ॥ मरुव
के ॥ कुन्दे ॥ करिकर्णे ॥ शिरीषे ॥
वात्यायाम् ॥

दलाढ्यः । पुं । पङ्ककर्वटे । हूंवस्य इति
दलदल इतिच भाषा ॥ इतिचिका
यडशेषः ॥

दलामलम् । न । मदनकारण्ये ॥ दम

नवृक्षे ॥ मदनवृक्षे ॥

दवाक्षम् । न । चुक्रे ॥

दलिः । पुं । स्त्री । लोष्टे । ढीमिति ढे
ल इतिच भाषा ॥ स्त्री । दलितेश
मीधान्ये । दालिइति दारिइतिच-
भाषा ॥

दलिकम् । न । काष्ठे । दली इति पर्व
तीयभाषा ॥ इतिहेमचन्द्रः ॥

दलितः । त्रि । प्रफुल्ले ॥ खण्डिते ॥ य
था । दलितकुचभराङ्गमङ्गपालिं र
चय ममाङ्कमुपेत्य पीवरोरु इति॥

दलेगन्धः । पुं । सप्तपर्णवृक्षे ॥

दल्भः । पुं । ऋषिविशेषे ॥ चक्रे ॥ प्र
तारणायाम् ॥ पापे ॥ दलति । दल०
। दृदलिभ्यांभः ॥

दल्मिः । पुं । इन्द्रे ॥ वज्रे ॥ दलति ।
दल० । बाहुलकान्मिः ॥

दल्मिमान् । पुं । इन्द्रे ॥ दल्मिरस्त्यस्य
। मतुप् । यवादित्वान्नवत्वम् ॥

दवः । पुं । वनानले ॥ वने ॥ उपतापे
॥ दवति । दुगतौ । पचाद्यच् ॥

दवथुः । पुं । परितापे ॥ नेत्रादिदाहे
॥ दवनं दूयते ऽनेनवा । टुदुउपता
पे । ट्वितो ऽथुच् ॥

दवाग्निः । पुं । दावानले ॥

दविष्ठः । त्रि । अतिदूरे । सुदूरे ॥ इद
मेषा मतिशयेन दूरम् । इष्ठन् । स्थू
लदूरेतिसाधुः ॥

दवीयान् । त्रि । दविष्ठे ॥ इदमनयोर
तिशयेनदूरम् । ईयसुन् । स्थूलदूर
युवह्रस्वेत्यादिना साधुः ॥

दशाः । पुंभूम्नि । वस्त्रान्ते । वसनाञ्चले
॥ दशानाभौ प्रयोजये दितिस्मृतिः
॥ अधोंशुकस्येत्यर्थः ॥ दश्यते ।
दंश० । भि० अङ् ॥

दशकः । पुं । दशति ॥ दशपरिमाण
मस्य । सङ्ख्याया इतिकन् ॥

दशकण्ठः । पुं । रावणे ॥ दश कण्ठाः य
-स्य सः ॥

दशकण्ठजित् । पुं । श्रीरामचन्द्रे ॥ द
शकण्ठं जयति । जि० । क्विप् तुक् ॥

दशकन्धरः । पुं । रावणे ॥ दश कन्धराः
ग्रीवाः अस्य ॥

दशग्रीवः । पुं । रावणे ॥ दश ग्रीवा य
स्यसः ॥ गरुडपुराणे सप्ताशीत्यध्या
योक्ते एकादशमन्वन्तरीयवृषनाम
केन्द्रशत्रुविशेषे ॥

दशत् । पुं । दशके । वर्गे ॥ दशपरिमा
ण मस्य । पञ्चदशतौ वर्गेवेति नि
पातनादिति प्रत्ययः ॥

दशतिः । स्त्री । शते ॥ इतिमहाभारते
दानधर्मः ॥

दशधा । अ । दशप्रकारे ॥ सङ्ख्याया
विधार्थेधा ॥

दश । चि । सङ्ख्याविशेषे । द्विगुणितपञ्चसु ॥ ततसङ्ख्या विशिष्टे ॥ दशन्ति दश्यन्ते वा । दंश दशने । बाहुलकात् कनिन् ॥

दशनः । पुं । शिखरे ॥ दन्ते ॥ न । कवचे ॥ दंष्ट्राव्यापारे ॥ दश्यते ऽनेन । दंश० । करणेति ल्युट् । दंशदशेतिनिर्द्देशात् क्वचिदकित्यपिनलोपः ॥ यद्वा । कर्त्तरि ल्युट् ॥

दशनवासः । न । ओष्ठे । उत्तराधरोष्ठमात्रे ॥ दशनानां वाससीइव आवरकत्वात् ॥

दशनाङ्कः । पुं । दन्तक्षते ॥

दशनाख्या । स्त्री । चुक्रिकायाम् । चाङ्गेर्याम् ॥

दशनोच्छिष्टः । पुं । निःश्वासे ॥ अधरे ॥ चुम्बने ॥ चि । दन्तच्युते ॥

दशपारमिताध्वरः । पुं । बुद्धे ॥

दशपुरम् । न । कुटन्नटे । कैवर्त्तीमुस्तके ॥ मालवदेशैकखण्डे ॥ पुरविशेषे ॥ दशपिपर्त्ति । पृपालनपूरणयोः । मू०कः । उत्वम् ॥ दशपुरोऽस्यवा । ऋक्पूरित्यः समासान्तः ॥

दशपूरम् । न । धानेये । कैवर्त्तीमुस्तके ॥ दशपूरयति । पूरपूर्त्तौ । कर्मण्यण् ॥

दशबलः । पुं । बुद्धमुनौ ॥ दशबलान्यस्य । यदाहुः । दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानिच । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै ॥

दशभुजा । स्त्री । दुर्गायाम् ॥ यथा । इतिवृत्तं पुराकल्पे मनोः स्वायम्भुवेन्तरे । प्रादुर्भूता दशभुजादेवी देवहिताय वै ॥ इतिकालिकापुराणम् ॥

दशभूमिगः । पुं । बुद्धे ॥

दशभूमीशः । पुं । बुद्धे ॥

दशमः । चि । दशानाम् पूरणे । दस वां इतिभाषा ॥ तस्यपूरणेडट् । नान्तादसङ्ख्यादेर्मट् ॥

दशमी । चि । वर्षीयसि । अतिवृद्धे ॥ नवतेरूर्द्ध्वं दशमी ऽवस्थाविशेषो ऽस्यास्ति । वयसि पूरणादितीनिः ॥

दशमी । स्त्री । नवत्यधिकावस्थायाम् ॥ शताब्दानां दशधाविभागे कृते दशम्यवस्था नवत्यधिका भवति ॥ तिथिविशेषे ॥ साचन्द्रस्य दशमकलाक्रियारूपा तदुपलक्षितकालपरावा ॥ तत्रजातस्य फलम् । यथा । विद्याविनोदी धनपुत्रयुक्तः प्रलम्बकण्ठो मदनाधिकश्रीः । उदारचित्तः सुमना दयालुः प्रसूतिकाले दशमी यदि स्यादिति ॥ ङीप् ॥

दशमीस्थः । चि । नष्टवीर्य्ये । चीणरागे ॥ गतासने ॥ नवत्यधिकवयसि

। स्थविरे ॥ स्मृतिहीने ॥ कामव
शात्मरणावस्थां प्राप्ते कामिनि ॥ न
यनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽ
थसङ्कल्पः । निद्राछेदस्तनुता विष
यनिवृत्तिः त्रपानाशः । उन्मादो
मूर्च्छा मृतिरित्येताः स्मरदशा दशैव
स्युः ॥ दशम्यां कामावस्थायां तिष्ठति
। ष्ठा^१ । सुपिस्थ इति कः ॥

दशमुखः । पुं । रावणे ॥ दशमुखान्यस्य ॥
लिङ्गात्मनि ॥ दश इन्द्रियाणि मुखा
नि भोगद्वाराणि यस्य सः ॥

दशमुखान्तकः । पुं । रामे ॥ दशमुख
स्यान्तकः ॥

दशमूत्रकम् । न । हस्तिमहिषोष्ट्रगवा
जमेषाश्वगर्द्दभमानुषमानुषीणांमू-
त्रे ॥ इति राजनिर्घण्टः ॥ दशानांमू
त्राणां समाहारः ॥

दशमूलम् । न । पाचनविशेषे । पञ्चमू
लद्वये ॥ यथा । विल्वश्योनाकगम्भा
रीपाटलागणिकारिकाः । शालप
र्णी पृश्निपर्णी दृहती द्वयगोक्षुरम् ॥
उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदा
हृतम् ॥ दशमूलं त्रिदोषघ्नं श्वास
कासशिरोरुजः । तन्द्राशोथज्वराना
हपार्श्वपीडारुचीर्हरेत् ॥ वातपित्त
हरं वृष्यं कनीयः पञ्चमूलकम् ॥ उ
भयं दशमूलन्तु सन्निपातज्वरापहम् ।

कासेश्वासे च तन्द्रायां पार्श्वशूले प्रश
स्यते ॥ पिप्पलीचूर्णसंयुक्तं कण्ठह
दुग्रहनाशनमिति ॥

दशयोगभङ्गः । पुं । संस्कारकर्मणि न
क्षत्रवेधविशेषे । खर्जूरवेधे ॥

दशरथः । पुं । रामतात्रे ॥

दशरथप्रभवः । पुं । रामे ॥ रामादि
षु ॥ दशरथःप्रभवोयस्ययेषांवा ॥

दशरूपभृत् । पुं । विष्णौ ॥

दशवदनः । पुं । रावणे ॥ दशवदनानि
यस्य सः ॥

दशवाजी । पुं । चन्द्रे ॥ दश वाजिनो
रथे यस्य सः ॥

दशशतलोचनः । पुं । इन्द्रे ॥ दशशता
नि सङ्ख्यायेषु तानिलोचनानि
यस्य ॥

दशहरा । स्त्री । गङ्गाजन्मदिने ॥ यथा
। ज्येष्ठेमासि क्षितिसुतदिने शुक्लप
क्षे दशम्यां हस्ते शैलान्निरगमदियं
जाह्नवी मर्त्त्यलोकम् । पापान्यस्यां
हरतिच तिथौ सा दशेत्याहुरार्य्याः
पुण्यंदद्यादपिशतगुणं वाजिमेधायुत
स्येतिशङ्खः ॥ अपिच । अदत्ता
नामुपादानं हिंसाचैवाविधानतः ।
परदारोपसेवाच कायिकं त्रिविधं
स्मृतम् ॥ पारुष्यमनृतं चैवपैशुन्य
ञ्चापिसर्वशः । असम्बद्धप्रलापश्च

ङ्मयं स्याच्चतुर्विधम् ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् । वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ एतानि दशपापानि हर त्वं नमजाह्नवि । दशपापहरा यस्मात्तस्माद्दशहरा स्मृता ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ । दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते इति स्कन्दपुराणे काशीखण्डः ॥ अत्र कुजबुधयोः कल्पभेदेन व्यवस्था ज्ञेया ॥ सेतुबन्धरामेश्वरयोः प्रतिष्ठादिने ॥ यथोक्तं स्कान्दे सेतुमाहात्म्ये ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥ दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम् । रामो वै स्थापयामास शिवलिङ्गमनुत्तममिति । अतोऽस्यां तु विशेषेण पूजा कार्या हितार्थिभिः ॥ * ॥ अथ संकल्पउक्तः स्नानाथ गारुडे २१५ अध्याये । यथा । अश्वहस्ते तु नक्षत्रे दशम्यां ज्येष्ठके सिते । दशपापहरायाश्च अहन्तादानकल्मषम् ॥ विरुद्धाचरणं हिंसा परदारोपसेवनम् । पारुष्यानृतपैशुन्यमसम्बद्धञ्च भाषणम् ॥ परद्रव्याभिध्यानञ्च मनसानिष्टचिन्तनम् ।

एतद्दशाघघाताय गङ्गास्नानं करोम्यहमिति ॥

दशा । स्त्री । अवस्थायाम् ॥ दीपवर्त्त्याम् ॥ चेतसि ॥ दशति । दंशदशने । मूं क्तः । पचाद्यच्, जपजभदहदशेति निर्देशाद्किन्त्यपि नलोपः ॥ यद्वा । दश्यते गुरौश्चेत्यङ् ॥ कलौ नृणां यथोक्तायुषः सूर्याद्यष्टग्रहभोग्याष्टभागविशेषे ॥ इति दैवज्ञाः ॥ शरीरस्थदशदशा यथा । गर्भवासः १ । जन्म २ । बाल्यम् ३ । कौमारम् ४ । पौगण्डम् ५ । यौवनम् ६ । स्थाविर्यम् ७ । जरा ८ । प्राणरोधः ९ । नाशः १० इति ॥ * ॥ कामजदशदशा यथा । चक्षूराग स्तदनु मनसः सङ्गतिर्भावनाच व्यावृत्तिः स्यात् तदनु विषयग्रामतश्चेतसोपि । निद्राच्छेदस्तदनु तनुता निस्त्रपत्वं ततोनून्मादो मूर्च्छा तदनु मरणं स्युर्दशाः प्रक्रमेणेति ॥

दशाकर्षः । पुं । प्रदीपे ॥

दशाकर्षी । पुं । प्रदीपे ॥

दशाङ्गधूपः । पुं । त्रिदोषघ्ने अवग्रहपिशाचकादिनाशके धूपविशेषे ॥ यथा । वासयेद्वा दशाङ्गेन त्रिदोषघ्नेन चार्कंकम् । नश्यन्ति यस्य धूपेन अवग्रहपिशाचकाः ॥ पञ्चांशागन्धपाषाण

त् तावन्मात्रिकगुग्गुलुः । चतुरंशञ्च-
न्दनञ्च जटामांसीच तावती ॥ त्रि-
भागःसर्ज्जकःसार स्तावदेवहिराव
कम् । उशीरन्तु द्विभागंस्यात् घृतभृ
ष्टं नखं समम् ॥ कर्पूरो मृगनाभि-
श्च एकभागौप्रकीर्त्तितौ । एकोदशाङ्ग
धूपस्तु सर्व्वस्यापि मनोहरेदिति ॥ पु
ष्पदानोत्तरं देवायदीयमाने धूमवि
शेषे ॥ यथा । मधुमुस्तं घृतं गन्धोगु
ग्गुल्वगुरुशैलजम् । सरलं सिह्ल
सिद्धार्थं दशाङ्गोधूपउच्यतइति ॥
अन्यच्च । कर्पूरं कुष्ठमगुरु गुग्गुलु
मंलयोद्भवम् । केशरं वालकं पत्रंत्व
क् जातीकोषमुत्तमम् ॥ सर्व्वमेतद्
दशयुतं दशाङ्गोधूपईरित इति ॥
दशाङ्गुलम् । न । खर्ब्बूजे ॥ त्रि । दशा
ङ्गुलमिते ॥
दशाननः । पुं । रावणे ॥
दशानिकः । पुं । दन्तीवृक्षे ॥
दशानीकिनी । स्त्री । सेनाविशेषे ॥
दशापवित्रम् । न । वासःखण्डे ॥
दशारुहा । स्त्री । कैवर्त्तिकायाम् ॥
दशार्णः । पुं । देशविशेषे ॥ सविन्ध्य
स्यपूर्वदक्षिणस्यां दिशि वर्त्तते ॥ इ
तिराधाकान्तः ॥
दशार्णा । स्त्री । नदीविशेषे ॥
दशार्हः । पुं । कृष्णे । बुद्धे ॥ वसुदेवे ॥

दशार्हाः । पुंभूम्नि । दशार्हदेशजे ॥
दशावतारः । पुं । विष्णौ ॥ दशअवता
रायस्य सः । तेयथा । शेते स चित्तश
यने मम मीनकूर्मकोलोऽमनवृह
रिवामनजामदग्न्यः । योऽभूदभूव
भरताग्रजकृष्णबुद्धः कल्की सताञ्चभ
विता प्रहरिष्यतेऽरीनिति बोपदेवः ॥
दशाश्वः । पुं । चन्द्रे ॥ दशअश्वारथे य
स्य सः । रथस्त्रिचक्रःसोमस्य कुन्दाभा
स्तत्र वाजिनः । वामदक्षिणतोयुक्ता-
दश तेन चरत्यसौ ॥
दशाश्वमेधिकः । पुं । तीर्थविशेषे ॥
दशास्थितिः । स्त्री । अवस्थायाम् ॥
दशास्यः । पुं । दशानने ॥ दश आस्या
नि यस्य सः ॥
दशास्यजित् । पुं । श्रीरामचन्द्रे ॥ द
शास्यं जयति । जि॰ क्विप् तुक् ॥
दशाहः । पुं । दशदिनसमुदाये ॥ द-
शानामह्नां समाहारः । तद्धितार्थेति
समासः । समाहारस्यैकत्वादेकवच
नम् । राजाहःसखिभ्यष्टच् । रात्रा
ह्नाहाःपुंसि ॥
दशेन्धनः । पुं । प्रदीपे ॥ दशाइन्धनं
यस्य ॥
दशेरः । पुं । हिंस्रे ॥ दशति । दंश॰ ।
पशि कठिकुठिगडिगुडि दंशिभ्यएरक्
। अनिदितांहलीति नलोपः ॥

दशेरकः । पुं । मरुदेशे ॥ पुं भूम्नि । तद्देशस्थे ॥ इति हेमचन्द्रः ॥

दशेरकः । पुं । मरुदेशे ॥ पुं भूम्नि । तद्देशस्थे ॥ इतिभूरिप्रयोगः ॥

दशैकादशिकः । पुं । वार्द्धुषिके ॥ एकादशार्थत्वादेकादश वस्तुतोदश ये दत्ता एकादश भविष्यन्ति ते दशैकादशाः । निपातनात् समासान्तोऽकारः । दशैकादशान् प्रयच्छति । कुसीददशैकादशात् ष्ठन्ष्ठचौ वा इति ष्ठच् ॥ स्त्री । ङीपि दशैकादशिकी ॥

दष्टः । त्रि । दंशिते । दंशयुक्ते ॥ दंशेः क्तः ॥

दस्मः । पुं । यजमाने ॥ चौरे ॥ हुताशने ॥ खले ॥ दस्यति । दसु उपक्षये । इषियुधीन्धि दसिश्याधूसूभ्यो मक् ॥ दर्शनीये ॥

दस्युः । पुं । मलिम्लुचे । चौरे ॥ रिपौ ॥ महासाहसिके ॥ दस्यति । दसु० । यजिमनिशुन्धिदसिजनिभ्यो युच् । वा० अनादेशाभावः । अनुनासिकयोरित्युक्तत्वाद्वा नानादेशः ॥ पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा जवनाः शकाः । पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥ मुखबाहूरुपज्जानां या लोके जातयो बहिः । म्लेच्छवाचश्चार्य्यवाचः सर्वे ते दस्यवः स्मृताः ॥ ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना याः पौण्ड्रकाश्चौड्रद्रविडाद्युक्ता जातयो बाह्या जाताः म्लेच्छभाषायुक्ताः आर्य्यभाषोपेता या ते दस्यवः सर्वे स्मृता इत्यर्थः ॥

दस्रः । पुं । खरे ॥ अश्विनीसुते ॥

दस्रौ । पुं । द्विवचनान्तः । नासत्ययोः । अश्विनीसुतयोः । स्वर्वैद्ययोः ॥ दस्यतः क्षिपतो रोगान् । दसु० । स्फायितञ्चीतिरक् ॥

दस्रदेवता । स्त्री । अश्विनीनक्षत्रे ॥ दस्रौ देवते यस्याः ॥

दस्रसूः । स्त्री । सूर्य्ययोषिति । संज्ञायाम् ॥

दहनः । पुं । चित्रके ॥ भल्लातके ॥ अग्नौ ॥ कपोते ॥ चतुष्कलप्रभेदे (ऽ।) ॥ न । दाहे । भस्मीकरणे ॥ त्रि । दुष्टचेष्टिते ॥ दहति दह्यते वा । दह भस्मीकरणे । ल्युः ल्युट् वा ॥

दहनकेतनः । पुं । धूमे ॥ दहनः केतनं यस्य ॥

दहनप्रिया । स्त्री । स्वाहायाम् ॥ दहनस्याग्नेः प्रिया ॥

दहनागुरु । न । दाहागुरुणि ॥

दहनारातिः । पुं । जले ॥

दहनीयः । त्रि । दहनार्हे । दाह्ये ॥

दहनोपमः । पुं । } सूर्यकान्तमणौ ॥
दहनोपलः । पुं । }

दहनोल्का । स्त्री । अग्निकुक्कुटे ॥

दहरः । पुं । मूषिकायाम् ॥ स्वल्पे । सूक्ष्मे ॥ भ्रातरि ॥ बालके ॥ हृदयाकाशे ॥ ब्रह्मणि ॥

दहराकाशः । पुं । चिदाकाशे ॥ ईश्वरे ॥ दहरश्चासावाकाशश्च ॥

दह्रः । पुं । दावानले ॥ वह्नौ ॥ दहति । दह० । स्फायितञ्चीति रक् ॥ हृदयाकाशे ॥ जठरे ॥

दा । स्त्री । शोधने ॥ दाने ॥ छेदे ॥ उपतापे ॥ रक्षायाम् ॥ दानम् । डुदाञ्० । सम्पदादित्वात् क्विप् ॥

दाकः । पुं । यजमाने ॥ दातरि ॥ ददाति । डुदाञ्० । कृदाधारेतिकः ॥

दाक्षः । त्रि । दक्षसम्बन्धिनि ॥ दक्षस्यायम् । अण् ॥

दाक्षायणयज्ञः । पुं । आहृत्यायुक्ते दर्शपूर्णमासात्मके यज्ञे ॥ दक्षस्येमे दाक्षाः । तेषामयनमावृत्तिरिति तन्निर्वचनम् ॥

दाक्षायणी । स्त्री । अपर्णायाम् । उमायाम् । सत्याम् ॥ अश्विन्यादिसप्तविंशतिभेषु ॥ रोहिण्याम् ॥ दन्तीवृक्षे ॥ मानवे दक्षकल्पपीठाधिष्ठात्रिदेव्याम् ॥ दक्षस्यापत्यम् । बाला मघेयस्येति वृद्धसंज्ञायाम् उदीचां वृद्धादगोत्रादिति फिञ् । गौरादित्वान् ङीष् ॥

दाक्षायणीपतिः । पुं । एणतिलके । चन्द्रे ॥ शिवे ॥ दाक्षायण्याः पतिः ॥

दाक्षायणीरमणः । पुं । चन्द्रे ॥

दाक्षाय्यः । पुं । गृध्रे ॥ दक्षते । दक्षदृष्टौ शीघ्रार्थे च । श्रुदक्षिस्पृहिगृहिभ्य आय्यः । दक्षाय्यस्यायम् । तस्येदमित्यण् ॥

दाक्षिः । पुं । दक्षस्यापत्ये ॥ अतइञ् ॥

दाक्षिणम् । न । दक्षिणानां समूहे ॥ भिक्षादिभ्योऽण् ॥

दाक्षिणात्यः । पुं । नारिकेले ॥ त्रि । दक्षिणदिग्भवे ॥ दक्षिणाभवः । दक्षिणापश्चात्पुरसस्त्यक् ॥

दाक्षिणिकः । पुं । बन्धविशेषे ॥ सचेष्टापूर्त्तेन भवति । पुरुषतत्त्वानभिज्ञोहि इष्टापूर्त्तकारी कामोपहतमना बध्यते ॥

दाक्षिण्यम् । न । आनुकूल्ये ॥ त्रि । दक्षिणार्हे ॥

दाक्षी । स्त्री । पाणिनिमुनेर्मातरि ॥ दक्षस्यगोत्रापत्यं स्त्री । अतइञ् । इतोमनुष्यजातेरिति ङीष् ॥

दाक्षीपुत्रः । पुं । पाणिनिमुनौ ॥ दाक्ष्याःपुत्रः ॥

दाक्षेयः । पुं । पाणिनिमुनौ ॥ दाक्ष्या अपत्यम् । स्त्रीभ्योढक् ॥

दाक्ष्यम् । न । कौशले । दक्षतायाम् ॥ सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तौ ॥ दक्षस्य कर्म भावो वा । ष्यञ् ॥

दाघः । पुं । दाहे ॥ दह्यतेऽनेन । दह भस्मीकरणे । हलश्चेतिघञ् । न्यंक्वादित्वात् कुत्वम् ॥

दाडकः । पुं । दन्ते ॥ इति शब्दार्थकल्पतरुः ॥

दाडिमः । त्रि । एलायाम् ॥ पुं । करके । वृत्तफले । शुकवल्लभे ॥ समौ करकदाडिमावित्यमरः ॥ तत्फलं त्रिविधं स्वादु स्वादम्लं केवलाम्लकम् । तत्र स्वादु त्रिदोषघ्नं तृट्दाहज्वरनाशनम् ॥ हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलंलघु । कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ॥ स्वादम्लं दीपनं रुच्यंकिञ्चित् पित्तकरंलघु । अम्लन्तु पित्तजनकमुष्णं वातकफापहमिति भावप्रकाशः ॥ * ॥ तापहारि मधुरं लघुपथ्यमिति राजनिर्घण्टः ॥ दलनं दालः । दलविशरणे । घञ् । दालेन निर्वृत्तः । भावप्रत्ययान्तादिमप् । डलयो रेकत्वम् ॥

दाडिमपुष्पः । पुं । रोहितकद्रुमे ॥ दाडिमस्य पुष्पमिव पुष्पमस्य ॥ न । करकपुष्पे ॥

दाडिमपुष्पकः । पुं । रोहितकवृक्षे ॥ दाडिमइव पुष्पाणि यस्य ॥

दाडिमप्रियः । पुं । शुकखगे ॥

दाडिमभक्षणः । पुं । कीरे ॥

दाडिमादिचूर्णम् । न । चूर्णविशेषे । द्विपलेदाडिमादष्टौ खण्डात् व्योषं पलत्रयम् । त्रिसुगन्धिपलञ्चैकं चूर्णमेकत्रकारयेत् ॥ तच्चूर्णमाषयाभुक्तमरोचकहरं परम् । दीपनंपाचनञ्चात् पीनसज्वरकासजित् ॥

दाडिमी । स्त्री । दाडिमे ॥

दाडिमीरसः । पुं । व्यञ्जनोपस्करान्तरे ॥ दाडिमं घृतसन्तप्ते तत्रपात्रे विनिःक्षिपेत् । ततःपक्वः पटेपूत इति स्याद्दाडिमीरसः ॥

दाडिमीसारः । पुं । दाडिमे ॥ इति राजनिर्घण्टः ॥

दाडिम्बः । पुं । दाडिमे ॥ इतित्रिकाण्डशेषः ॥

दाढा । स्त्री । दंष्ट्रायाम् ॥ अभिलाषायाम् ॥ समूहे ॥ इतिशब्दार्थकल्पतरुः ॥

दाढिका । स्त्री । दंष्ट्रिकायाम् ॥

दाण्डपाता । स्त्री । तिथिविशेषे ॥ दण्डपातोऽस्यां वर्त्तते । घञः साऽस्यां क्रि

चेतिञ्‌ ॥

दाण्डमाथिकः । त्रि । दण्डमाथं धावति । माथोत्तरपदेतिठक् ॥

दाण्डा । स्त्री । क्रीडाविशेषे । पटा इतिभाषा ॥ दण्डः प्रहरणमस्यां क्रीडायाम् । तदस्यां प्रहरणमितिणः ॥

दाण्डाजिनिकः । पुं । मायाजीविनि । सदम्भे ॥ दण्डाजिनेन दम्भेनार्थान्न्विच्छति । अयःशूलदण्डाजिनाभ्यामितिठञ् ॥

दाण्डिनायनः । पुं । दण्डिनोगोत्रापत्ये ॥ नडा° फक् । दाण्डिनायनहास्तिनायनेत्यादिना टिलोपाभावः ॥

दातः । त्रि । लूने । छिन्ने ॥ दायते स्म । दाप्लवने । क्तः ॥ शुद्धे ॥ दायति । दैप्शोधने । कर्त्तरि क्तः ॥

दाता । त्रि । दानशीले । मुचिरे । दानकर्त्तरि ॥ ददाति । डुदाञ्° । तृच् ॥

दात्यूहः । पुं । कालकण्ठके खगे ॥ चातके ॥ जलकाके ॥ मेघे ॥ दाति । दाप्° । क्तिन् । दातिं मारणं ऊहते । ऊह० । अण् ॥ यद्वा । दित्यौहोयम् । अण् । देविकाशिंशपेत्यात्वे वाहऊठि शकंध्वादिः ॥

दात्यौहः । पुं । दात्यूहे ॥ दित्यौहोऽयम् । अण् । देविकाशिंशपेत्यादि

माम्ते सम्प्रसारणम् । वृद्धिः ॥

दात्रम् । न । छेदनशस्त्रे । लवित्रे ॥ दायतेऽनेन । दाप्० । दाम्नीत्यादिना ष्ट्रन् ॥ दादिभ्यश्छन्दसीतित्वन्या ॥

दात्री । स्त्री । दानशीलायाम् ॥ तृजन्तात् ङीप् ॥

दात्वः । पुं । दातरि ॥ ददाति । डुदाञ्० । अनिदेत्यादिना ददातेस्त्वन् ॥

दादः । पुं । दाने ॥ दद्यते । दददाने । कर्मणि घञ् ॥

दाधिकम् । त्रि । दधिसंस्कृतद्रव्ये ॥ दधिसंस्कृतम् । दध्नष्ठक् ॥ दध्ना संस्कृतं वा । प्राग्वहतीयष्ठक् । दध्नाचरति । चरतीतिठक् । दध्ना संसृष्टं वा । संसृष्टेठक् । दध्नोपसिक्तं वा । व्यञ्जनैरुपसिक्त इतिठक् ॥

दानम् । न । गजमदे ॥ पालने । रक्षणे ॥ छेदे ॥ शुद्धौ ॥ विश्राणने । त्यागे । परस्वत्वापत्तिपर्यन्तं स्वत्वत्यागे । देशेकालेश्रद्धया यथाशक्त्यान्यायार्जितार्थानां सत्पात्रे समर्पणे । स्वस्वत्वास्पदानामन्नादीनां यथाशक्ति शास्त्रोक्तसंविभागे । असङ्कोचेनवित्तेषु स्वस्वत्वपरित्यागेन परस्वत्वापादने । सम्प्रदानस्वत्वापादकद्रव्यत्यागे ॥ * ॥ अर्थानामुदिते पात्रेश्रद्धया प्रतिपादनम् । दानमित्यभिनिर्दिष्टं व्याख्या

मंतस्य वक्ष्यते ॥ दाता प्रतिग्रहीता च
श्रद्धा देयञ्च धर्मयुक् । देशकालौ च
दानानामङ्गान्येतानि षड्विदुः ॥ म
नसा पात्रमुद्दिश्य भूमौ तोयं विनिः
क्षिपेत् । विद्यते सागरस्यान्तो दान
स्यान्तो न विद्यते ॥ परोक्षे कल्पितं
दानं पात्राभावे कथं भवेत् । गोत्र
जेभ्यस्तथा दद्यात् तदभावेऽस्य ब-
न्धुषु ॥ यदा तु न सकुल्यः स्याच्च-
सम्बन्धिबान्धवाः । दद्यात् स्वजाति
शिष्येभ्यस्तदभावेऽप्सु निःक्षिपेत् ॥
स्नात्वा शुद्धे समे देशे गोमयेनोपले-
पिते । वसित्वा वसनं शुद्धं दानं दद्या
त् सदक्षिणम् ॥ दानं चतुर्विधं प्रोक्त
मृषिभिर्धर्मकोविदैः । नित्यं नैमि
त्तिकं काम्यं विमलं दानमीरितम् ॥
अहन्यहनि यत्किञ्चिद् दीयतेऽ
नुपकारिणे । अनुद्दिश्य फलं तस्मा
त् ब्राह्मणाय तु नित्यकम् ॥ यत्तु पा
पोपशान्त्यै च दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठि
तम् ॥ अपत्यविजयैश्वर्यस्वर्गार्थं य
त् प्रदीयते । दानं तत् काम्यमाख्या
तमृषिभिर्धर्मचिन्तकैः ॥ ईश्वरप्रीण
नार्थाय ब्रह्मवित्सु प्रदीयते । चेत-
सा सत्त्वयुक्तेन दानं तद्विमलं स्मृत
म् ॥ * ॥ गत्वा यद्दीयते दानं भ

क्त्या पात्रे विधानतः । तदनन्तफलं वि
द्धि मत्स्या चिन्तयेन्नृप ॥ * ॥ तच्च सा
त्त्विकादि भेदात् त्रिविधम् । यथा ।
दातव्यमिति यद्दानं दीयतेऽनुप
कारिणे । देशे काले च पात्रे च तद्दा
नं सात्त्विकं स्मृतम् ॥ यत्तु प्रत्युप
कारार्थं फलमुद्दिश्य वा पुनः । दीयते
च परिक्लिष्टं तद्दानं राजसं स्मृतम्
॥ अदेशकाले यद्दानमपात्रेभ्यश्च दी
यते । असत्कृतमवज्ञातं तत्ता
मसमुदाहृतम् ॥ * ॥ यदेवंविधम
मेदमितिविशेषं जानानः परस्वत्वाप
त्तये स्वामी त्यजति परश्च विशेषेणे
दं ममेति स्वत्वं प्रत्येतीति व्यवहारे
॥ * ॥ अस्य विधिर्यथा । स्नानसन्ध्याच
मनानि कृत्वा नारायणनवग्रहगुरून्
सम्पूज्य देयद्रव्यं वामहस्तेन धृत्वा
दक्षिणहस्तेन त्रिरभ्यर्च्य तद्द्रव्याधि
पतिदेवतां सम्प्रदानञ्चार्चयित्वा स
ङ्कल्प्य कुशतिलजलत्यागपूर्वकं दद्या
दिति ॥ विवेकज्ञानशुद्धौ ॥ दैप् शो
धने इत्यस्मात् दातोर्दानपदं व्युत्पद्यते
। यदाह पतञ्जलिः । विवेकख्यातिरवि
प्लवा दुःखत्रयस्य हानोपाय इति । अवि-
प्लवा शुद्धिः । सा च सवासनसंशयविपर्या
सानां परिहारेण विवेकसाक्षात्कारस्य
स्वच्छप्रवाहेऽवस्थानम् । सा च न वि

नादरनैरन्तर्यदीर्घकालसेवितोभ्या सपरिपाकाद्भवतीति । दानेनविवेकख्यात्युपकार्यङ्गेन सोपिसङ्गृहीत: । सेयं पञ्चमीसिद्धि: सदामुदितमित्युच्यते । दानञ्च सिद्धिहेतु: । धनादिदानेनाराधितोज्ञानी ज्ञानं प्रयच्छति ॥ इति अनेन । दोअवखण्डने । ल्युट् ॥ डुदाञो भावे दीयते इति कर्मणि वा ल्युट् ॥ स्वधनस्यपरेभ्य: प्रतिपादने राज्ञामुपायविशेषे । उपप्रदाने ॥

दानकम् । न । कुत्सितदाने ॥ दानकुत्सितेइतियावादिषुपाठात्कन् ॥

दानकर्म । न । दानक्रियायाम् ॥

दानतोयम् । न । मदोदके ॥

दानधर्म: । पुं । दानस्यफले ॥

दानपति: । पुं । सदाप्रदे । सततदातरि ॥ अक्रूरे ॥

दानपात्रम् । न । विद्यादियुक्ते ॥ विद्यायुक्तो धर्मशील: प्रशान्त: क्षान्तो दान्त: सत्यवादी कृतज्ञ: । वृत्तिग्लानो गोहितो गोशरण्यो दाता यज्वा ब्राह्मण: पात्रमाहु: ॥ दानस्यपात्रम् ॥

दानव: । पुं । असुरे । दनुजे । दक्षकन्याया दनो गर्भे कश्यपाज्जाते ॥ दनोरपत्यम् । तस्यापत्यमित्यण् ॥

दानवज्य: । पुं । वैश्ये ॥ इति पुराणम् ॥

दानवारि: । पुं । सुरे । देवतायाम् ॥ दानवाना मरि: । दानवो ऽरिर्यस्य वा ॥

दानशील: । त्रि । वदान्ये । दातरि ॥

दानशौण्ड: । त्रि । वदान्ये । बहुप्रदे ॥ दानेशौण्ड: । सप्तमीशौण्डैरिति समास: ॥

दानायोग्य: । त्रि । अपात्रे ॥ अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । नैषां प्रतिग्रहो देयो न शिलातारयेच्छिलाम ॥

दानीय: । त्रि । सम्प्रदाने । दानपात्रे ॥ दीयतेऽस्मै । डुदाञ्० । कृत्यल्युटोवहुलमिति सम्प्रदानेऽनीयर् ॥

दानु: । त्रि । दातरि ॥ विक्रान्ते ॥ ददाति । डुदाञ्० । दाभाभ्यांनु: ॥

दान्त: । त्रि । तप:क्लेशसहे । जितेन्द्रिये । बहिरिन्द्रियनिग्रहकर्त्तरि ॥ दाम्यतिस्म । दमेर्गत्यर्थेतिक्त: । यस्यविभाषेतिनेट् । अनुनासिकस्येतिदीर्घ: ॥ दमिते । शिक्षितवृषे ॥ दान्तोयं वलीवर्द: युगाशकटवाहनयोग्य:कृतइतिगम्यते इतिभामती ॥ दम्यतेस्म । दमुउपशमे । णिजन्त: । क्त: । वादान्तशान्तितिसाधु: ॥ पुं । दमनकवृक्षे ॥

दान्ति: । स्त्री । तप:क्लेशसहिष्णुतायाम्

। दमथे । दमे ॥ दमनम् । दमु० त्रियांक्तिन् । अनुनासिकस्येति दीर्घः ॥

दापित: । त्रि । साधिते ॥ दापयते स्म यमन्ताद्दाञः क्तः ॥ दण्डिते ॥

दाप्य: । त्रि । दापनीये ॥

दाम । न । स्त्री । दोहनकाले पशुपादबन्धनरज्जौ । सन्दाने ॥ यति । दोअवखण्डने । दीयते वा । दीङ्क्षये । मनिन् ॥ मालायाम् ॥ रज्जौ ॥

दामनपर्व । न । दमनभञ्जनतिथौ । चैत्रशुक्लचतुर्दश्याम् ॥

दामनी । स्त्री । तस्याम् । पशुबन्धनरज्ज्वाम् ॥ दामैव । प्र० अण् । अन्नितिप्रकृतिभाव: । टिड्ढेतिङीप् ॥

दामलिप्तम् । न । तमोलुकइति प्रसिद्धे तमोलिप्तदेशे ॥

दामा । स्त्री । दामनि ॥ दोअवखण्डने । दीङ्क्षये वा । मनिन् । मन इति नङीप् । दामानौ दामान: इत्यादि । डाबुभाभ्यामन्यतरस्याम् इति डापि तु । दामा दामे दामा: इत्यादि बोध्यम् ॥

दामाञ्चनम् । न । अश्वादे: पादबन्धनरज्जौ । पिछाडी इतिभाषा ॥ इति हेमचन्द्र: ॥

दामाञ्चलम् । न । एकपफाङ्घ्रिबन्धे । दामाञ्चने ॥ दामाञ्चं पादपाशे इति वैजयन्ती ॥

दामिनी । स्त्री । विद्युति ॥ दामविद्ये ऽस्या: । संज्ञायां मन्माभ्यामिनीनि: ॥

दामोदर: । पुं । श्रीकृष्णे ॥ बाल्येचापल्यनिषेधाय यशोदया दामोदरे बद्धत्वात् दाम उदरे यस्येति समन्यस्य वैयधिकरण्येपि समास: । सप्तमीविशेषणे बहुव्रीहाविति लिङ्गात् ॥ तथैमध्यगतं बद्धं दाम्ना गाढं तथोदरे । ततश्च दामोदरतां स ययौ दामबन्धनात् ॥ दामानि लोकनामानि तानि यस्योदरान्तरे । तेन दामोदरो देव: श्रीधरस्त्वं रमाश्रित इतिव्यास: ॥ दमादिसाधनेन उदारा उत्कृष्टा या गति धूमादिमार्गरूपेणया ऽर्चिरादिस्तयागम्यते इति वा ॥ दमाद्दामोदरं विदुरिति भारतोक्ते: ॥ भूतार्कदिशेषे ॥ नदविशेषे ॥

दाम्भिक: । त्रि । छद्मनाधर्मकारिणि । वैडालव्रतिकादौ ॥ दम्भयुक्ते । धर्मध्वजिनि ॥ पुं । बकपक्षिणि ॥ दम्भेनचरति । ठक् ॥

दाय: । पुं । सोल्लुण्ठभाषणे ॥ विभक्तव्यपितृद्रव्ये ॥ दाने ॥ हरणे । यौतुकादिधने । कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च । यद्द्रव्यं दीयते तद्दिति भरत: ॥ याव

तत्सम्बन्धिधने ॥ क्षये ॥ स्थाने ॥ खण्डने ॥ ददाति । डुदाञ्० । श्याद्व्यधेति णः । आतोयुक् ॥ यद्वा । दीयतेऽसौ । दोङ् क्षये । । अकर्त्तरिचेति चकारस्य संज्ञाव्यभिचारार्थत्वात् घञ् ॥

दायकः । त्रि । दातरि ॥ ददाति । डुदाञ्० । ण्वुल् । आतोयुक् ॥

दायबन्धुः । पुं । भ्रातरि ॥

दायभागः । पुं । दायविभागे । सम्बन्धिमात्रेण सम्बन्धिधनस्य विभागे । पूर्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दस्तस्य विभागे ॥ एकदेशगतस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतयाऽव्यवस्थितस्य गुटिकापातादिना व्यञ्जने ॥ अथवा विशेषेण भजनं स्वत्वज्ञापनं वा । यत्तु चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्त्वाविशेषवहनदोहनफलेन स्वत्वं व्यज्यते ॥ विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते । दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥ दायस्य भागः ॥

दायविभागः । पुं । दायभागे ॥ श्रीसदाशिव उवाच ॥ भूयस्ते कथयाम्यद्य व्यवहारानुसारतः । यान्यथ

न् प्रविद्वन् राजा स्वच्छन्दं पालयेत् प्रजाः ॥ नियमेन विना राज्ञो मानवा धनलोलुपाः । मिथस्ते विवदिष्यन्ति गुरुस्वजनबन्धुभिः ॥ व्यतिक्रान्तिनदा देविस्वार्थिनो विसृष्टतवे । पापाश्रयाभविष्यन्ति हिंसया चजिघांसया ॥ अतस्तेषां हितार्थाय नियमो धर्मसम्मतः । नियोज्यते यमाश्रित्य न भ्रश्येयुः शुभाचराः ॥ दण्डयेत् पापिनो राजा यथा पापापनुत्तये । तथैव विभजेद्दायान् नृणां सम्बन्धभेदतः ॥ सम्बन्धो द्विविधो ज्ञेयो विवाहाज्जन्मतस्तथा । तत्रौद्वाहिकसम्बन्धाद्दपरो बलवत्तरः ॥ दाये तूर्द्ध्वतनाज्ज्यायान् सम्बन्धोऽधस्तनः शिवे । अधऊर्द्ध्वक्रमादत्र पुत्रान् मुख्यतरः स्मृतः ॥ तत्रापि सन्निकर्षेण सम्बन्धी दायमर्हति । अनेन विधिना धीरा विभजेयुः क्रमाद्धनम् ॥ मृतस्य पुत्रपौत्रेषु कन्यासु पितरि स्थिते । भार्य्यायामपि दायार्हः पुत्र एव न चापरः ॥ बहवस्तनया यत्र सर्वे तत्र समांशिनः । ज्येष्ठे राज्याधिकारित्वं तत्तु वंशानुसारतः ॥ ऋणं यत्पैतृकं तत्र शोधयेत् पैतृकैर्धनैः ॥ तस्मिन् स्थिते विभागार्हं न भवेत् पैतृकं वसु ॥ विभज्य वहिरङ्गस्थीयु विभर्यपैतृकं नराः । तेभ्यस्तु नमां ऋण्यपितृर्थं दापयेयुः ॥ तेजस्कृत

पापेननिरयंयान्तिमानवाः। कन्येना
पितथावद्धः स्वयमेवनचापरः॥ साधा
रणंधनंयच्चस्थावरंस्थावरेतरत्। अंशि
नःप्राप्नुमर्हन्तिस्वंस्वमंशंविभागतः॥
अंशिनांसम्मतावेवविभागःपरिसिद्ध्य
ति। तेषामसम्मतौराजासमदृष्ट्यां
शमाचरेत्॥ स्थावरस्यचरस्यापिवि
भागानर्हवस्तुनः। मूल्यं वा तदुपस्व
त्वं मंशिनां विभजेन्नृपः॥ विभक्तेपि
धनेयस्तुस्वीयांशंप्रतिपादयेत्। पु-
नर्विभज्यतद्द्रव्यम प्राप्तांशायदाप-
येत्॥ कृतेविभागेद्रव्याणां मंशिनां
सम्मतौ शिवे। पुनर्विवादयं दण्डया
स्योभवतिभूभृतः॥ स्थितेप्रतस्यपौत्रे
चभार्य्यायांचपितर्य्यपि। पौत्रएवध
नार्हः स्याद्धनाज्जन्मगौरवात्॥
अपुत्रस्यास्थितेतातेसोदरेच पिताम-
हे। जन्मनःसन्निकर्षेण पितैवास्यध
नंहरेत्॥ विद्यमानासुकन्यासुस-
न्निकृष्टास्वपिप्रिये। मृतस्यपौत्रोध
नभाक् यतोमुख्यतरःपुमान्॥ धनं
मृतेन पुत्रेणपौत्रं यातिपितामहात्
। अतोपगीयतेलोकैः पुत्ररूपःस्वयं
पिता॥ औरसादिकेपिसम्बन्धे प्राप्तौ
भार्य्यावरीयसी। अपुत्रस्यहरेद्दृक्-
थं भर्त्तुर्द्दातुंचारिणी॥ पतिपुत्र
विहीनातुसंप्राप्य स्वामिनोधनं। नै

यदातुं नविक्रेतुं समर्थास्वधनं विना
॥ पितृभिःश्वशुरैर्वापिदत्तं यद्धर्मसम्म
तं। स्वकृत्योपार्जितं यच्चस्त्रीधनंतत्
प्रकीर्त्तितं॥ तस्यांमृतायां रिक्थं त
त्पुनःस्वामिपदं व्रजेत्। तदासन्त
तेरिक्थमधऊर्द्ध्वक्रमाद्धरेत्॥ मृते
पत्यौस्वधर्मेण पतिबन्धुवशेस्थिता।
तदभावेपितृबन्धोर्निष्ठंती दायमर्ह
ति॥ शंकितव्यभिचारापिनपत्युर्दा
यभागिनी। लभतेजीवनंमात्रंभर्त्तु
र्विभवधारिणः॥ वहुव्यश्चेद्वनिता-
स्तस्यस्वर्यातुधर्मतत्पराः। भजेरन्स्वा
मिनोवित्तं समांशेनशुचिस्मिते॥ प
त्युर्धनंचरायाश्चमृतौभर्त्तृसुतास्थि-
तौ। पुनःस्वामिपदं गत्वाधनं दुहि
तरं व्रजेत्॥ एवंस्थितायां कन्याया
रिक्थं पुत्रवधूगतं। तन्मृतेस्वामिनं
प्राप्य श्वशुरात्तत्सुतामियात्॥ तथा
पितामहेसर्वेवित्तं मातृगतं शिवे।
तस्यांमृतायां पुत्रेणभर्त्राश्वशुरगम्भ-
वेत्॥ मृतयोर्द्वगतं वित्तं यथा प्रा
प्नोति तत् पिता। जनन्यपितथाप्नो
ति पतिहीना भवेद्यदि॥ मतःस-
त्यांजनन्यांतु विमातापिधनं हरेत्।
मृतेजनन्यास्तं प्राप्यपिमागच्छेद्विमा
तरं॥ अधजनानांविरक्तानांदारिक
थंनयात्मजः। येनैवाधनंप्राप्तते

नैवोर्द्ध्वं तद्दायं भजेत् ॥ अतःस्थितौपि
तृव्यस्यधनं स्वसृगतं चसत् । पत्यौ
स्थिते ऽनपत्यायामृतौपितृव्यमाश्र-
येत् ॥ ऊर्द्ध्वंवित्तमधः प्राप्यपुमांस-
मवलम्बते । अतःसत्यांसोदरायांवै
मात्रेयोधनं हरेत् ॥ स्थितायां सोद
रायांचविमातुः पुत्रसंततौ । वैमात्रे
यगतं वित्तं वैमात्रेयान्वयोभजेत् ॥
मृतश्चसोदरोभ्राता वैमात्रेयस्तथा ।
शिवे । धनं पितृगतत्वेन विभजेतां
समांशिनौ ॥ कन्यायां जीवितायांच
तदपत्यं नदायभाक् । यच्चयत्राधितं
वित्तंतन्मृतावपरं भजेत् ॥ विभजेयु
र्दुहितरः पुत्राभावेपितुर्वसु । उढाश्च
यं त्यो ऽनूढाश्चपितु साधारणैर्धनैः ।
असंतत्यामृतायाश्च स्त्रीधनं स्वामिनं
भजेत् । अन्यत्तुद्रविणं यस्मादागत-
तत्पदमाश्रयेत् ॥ प्रेतस्त्रयनैश्ना
रीविदध्या दात्मपोषणं । पुत्रयन्तु
तदुप स्वत्वेनैशक्ता दानविक्रये ॥ पि
तामहस्नुषायाश्च सत्यांतातविभातरि
। पितामहगतंरिक्थंतत्पुत्रेणास्नुषां
व्रजेत् ॥ पितामहपितृव्येचतथाभ्रा
तरिजीवति । अधोभवानामुख्यत्वा
त् भ्रातैवधनभाग्भवेत् ॥ पितृव्यात्
संनिकर्षेचतुल्यौ भ्रातृपितामहौ ।
धर्मंपितृपदंगत्वा प्रयातुभ्रातरं भजे

त् ॥ स्थितेप्यपत्येदुहितुः प्रेतस्यपि
तरिस्थिते । दुहित्रपत्यंधनभाक् धनं
यस्मादधोमुखं ॥ स्वः प्रयातुःस्थिते-
ता तेतथामातरिकालिके । पुंसोमु-
ख्यतरत्वेनधनहारीभवेत् पिता ॥
स्थितः स्वपितृसापिण्डोवर्त्तमानेपि
मातुले । प्रेतस्यधनहारीस्यात् पितुः
सम्बन्धगौरवात् ॥ अधस्तादगमना-
भावेधनमूर्द्धभवंगतं । तत्रापिपुंसांमु
ख्यत्वादितं पितृकुलंशिवे ॥ अतोत्र
सन्निकृष्टोपिमातुलोनामुयाद्धनं । अ
जीवत् पितृकःपौत्रः पितृव्यैःसहपा
र्वति ॥ पितामहस्यद्रविणात् स्वपितु
र्दायमर्हति । भ्रातृहीनातथापौत्री
पितृव्यैः समभागिनी ॥ पितामह-
धनंसौम्याहरेच्चेन्मृतमातृका । सत्यां
पौत्र्याः पितामह्यांपौत्र्याः पितृस्व
सर्य्यपि ॥ वित्तेपितृगतेदेविपौत्री-
तत्राधिकारिणी । अधोगामिषु वित्ते
षु पुमान् ज्यायानधस्तनः ॥ ऊर्द्धगा-
मिधनेश्रेष्ठः पुमानूर्द्धाङ्गवोभवेत् ॥
अतःस्नुषायां पौत्र्याश्चसत्यांदुहित
रिप्रिये । प्रेतस्यविभवंहर्त्तुं नैवशक्तो
तितत्पिता ॥ यदापितृकुलेनस्या-
न्मृतस्यधनभाजनं । पूर्वोक्तविधिनारि
क्थंमातामहकुलंभजेत् ॥ मातामह
गतंवित्तंमातुलैस्तत्सुतादिभिः । अ

धनार्हकमेवैवपुमांसंस्त्रियमाश्रयेत्
॥ ज्ञात्यन्वयेविद्यमानेपित्रोः सापि
तद्धनेस्थिते । मृतस्यैवैतनयेयोरपि
तद्दायभाग्भवेत् ॥ शैवीपत्नीचेत्
पुत्राभावेऽर्धधनभागिनः । ग्रासमा-
च्छादनंभर्त्रे स्वःप्रयातुर्यथाधनं ॥ शैवो
द्वाहं प्रकुर्वन्ती शैवभर्त्तैवपालयेत् ।
सौम्याश्चेनाधिकारोस्याः पित्रादीनां
धनेप्रिये ॥ अतःसत्कुलजांकन्यांशै
वेनवाहयन् पिता । क्रोधाद्वालोभतो
वापिसभवेल्लोकगर्हितः ॥ शैवीसद्
न्वयाभावेसोदकोब्रह्मदोन्वपः । हरे
युः अमतोवित्तंमृतस्यधिवशासनात्
॥ पिण्डदात्सप्तपुरुषाः सपिण्डाः क
थिताः प्रिये । सोदकाद्यमताः स्यु
स्ततःकेवलगोत्रजाः ॥ विभक्तंद्रविणं
यश्चसंसृष्टंस्वेच्छयातुचेत् । अविभ
क्तविधानेनभजेरंस्तद्धनं पुनः॥ अविभ
क्तविभक्तेवायस्ययाद्दृग्विभागिता । मृ
तेपितस्यदायादास्ताद्दृग्विभवभागि-
नः॥ येयस्यधनहर्त्तारोभवेयुर्जीवना
वधि । दद्युःपिण्डंतएवास्यशैवभार्य्या
सुतंविना॥ इतिश्रीमहानिर्वाणतन्त्रे
द्वादशोल्लासे सनातनव्यवहारकथ-
नम् ॥

दायादः । पुं । सपिण्डे ॥ तनये । सुते
॥ दायमत्ति । अदभक्षणे । कर्मण्यण् ॥ यद्वा । आदत्ते । उदात्त० । आ
तोनुपसर्गे इति कः । दायस्यादः ।
स्वामीश्वराधिपतिदायादसाक्षिप्रति-
भूप्रसूतैश्चेतिसूत्रएवनिपातनात्सो
पसर्गादप्यादन्तात् कः ॥

दायितः । त्रि । दण्डिते । साधिते ॥
दयतेर्ण्यन्तात् कर्त्तरि क्तः ॥

दाराः । पुंभूम्नि । भार्य्यायाम् ॥ दारय
न्ति भ्रातॄन् । दॄ० णिजन्तः । दारजा
रौकर्त्तरिणिलुक् चेतिघञ् ॥

दारकः । पुं । बालके । पुत्रे ॥ ग्रामशू
करे ॥ त्रि । भेदके ॥ दारयति । दॄ०
ण्वुल् ॥

दारकर्म्म । न । विवाहे ॥

दारणम् । न । विदारणे ॥ कतके ॥
दार्य्यतेऽनेन । दॄ० । णयन्तात् ल्युट् ॥

दारदः । पुं । विषभेदे ॥ पारदे ॥
हिङ्गुले ॥ समुद्रे ॥ दरदि देशविशे
षेभवः । अण् ॥

दारवल्लिभुक् । पुं । बकपक्षिणि ॥

दारा । स्त्री । भार्य्यायाम् ॥ इतिभरतः ॥

दारिः । स्त्री । विदारके ॥

दारिका । स्त्री । बालिकायाम् ॥

दारितः । त्रि । भिन्ने । भेदिते । कृत
दारणे ॥ दार्य्यतेस्म । दॄ० । णयन्ता
त् क्तः ॥

दारिद्र्यम् । न । दरिद्रत्वे । निर्द्धनत्वे

॥ भावे ञ्चम् ॥

दारी। स्त्री। क्षुद्ररोगविशेषे। विपादिकायाम्। बिवाई इति भाषा॥ परिक्रमणशीलस्य वायुरत्यर्थरूक्षवे:। पादयो:कुरुतेदारींसरुजांतलसंश्रिताम्॥ अस्याश्चिकित्साभावप्रकाशेद्रष्टव्या॥

दारु। न। पित्तले॥ काष्ठे॥ देवदारौ॥ त्रि। शिल्पिनि॥ दातरि॥ दारके॥ दीर्यते। दृ॰। दृसनिजनीति ञुण्॥ यद्वा। ददाति। डुदाञ्॰। यति। दो॰। दयते वा। देङ्रक्षणे। तच्छीलादि:। दाधेट्सिशदसदो रुरितिरुर्वा॥

दारुकः। पुं। श्रीकृष्णसारथौ॥ न। देवदारुणि॥

दारुकदली। स्त्री। वनकदल्याम्॥

दारुका। स्त्री। पुत्रिकायाम्। कुरंच्याम्। शालभंज्याम्। कठपूतली इति भाषा॥

दारुगन्धा। स्त्री। चीडानामगन्धद्रव्ये॥

दारुगर्भा। स्त्री। दारुकायाम्॥

दारुचीनी। स्त्री। स्वनामप्रसिद्धद्रव्ये॥

दारुचीर्णकम्। न। गुडत्वचि॥

दारुजः। पुं। मर्दले॥ त्रि। दारुजाते॥

दारुणः। पुं। चित्रके॥ रौद्ररसे। भयानकरसे॥ न। तीव्रसंभ्रमकमनचनेषु॥ त्रि। भयावहे। दुःसहे। भीषणे। भयहेतौ॥ दारयति चित्तम्। दृभये। कृदृदारिभ्यउनन्॥

दारुणकम्। न। रूषीतिख्याते मस्तकस्थे रोगे॥ तल्लक्षणं यथा। दारुणा कण्डुरा रूक्षा केशभूमौ प्रजायते। कफवातप्रकोपेण विद्याद्दारुणकन्तु तत्॥ दारुणाकर्कशा॥

दारुणा। स्त्री। राशिविशेषे॥॥ यथा। तृतीयाऽश्वयसंज्ञाया दारुणा सा प्रकीर्त्तितेति॥ नर्मदक्षेदतीर्वाधिष्ठात्र्यादेव्याम्॥

दारुनिशा। स्त्री। दारुहरिद्रायाम्॥

दारुपत्री। स्त्री। हिङ्गुपत्र्याम्॥

दारुपीता। स्त्री। दारुहरिद्रायाम्॥

दारुपुत्रिका। स्त्री। दारुकायाम्॥

दारुमुख्याह्वया। स्त्री। } गोधायाम्।
दारुमुख्याह्वा। स्त्री। } निहाकायाम्॥

दारुमूषा। स्त्री। दारुमूसीतिप्रसिद्धौषधौ॥

दारुसारम्। न। चन्दने॥ दारुणां दारुषु वा सारं श्रेष्ठम्॥

दारुसिता। स्त्री। त्वक्स्वाद्याम्। दरुचीनीतिख्यातायाम्॥ उक्तादारुसिता स्वाद्वी तिक्ताचानिलपित्तहृत्। सुरभि: शुक्रला बल्या मुखशोषतृषा

षका ॥

दारुमुखी । स्त्री । दारुपुत्रिकायाम् ॥

दारुहरिद्रा । स्त्री । पचम्पचायाम् । पर्ज्जन्याम् । कस्तल इतिपर्वतीयभाषाप्रसिद्धायाम् ॥ दारुचासौ हरिद्रा च ॥

दारुहस्तक: । पुं । दर्वीम् । डोई इति भाषा ॥ हस्तस्य प्रतिकृति: । इवेप्रतिकृताविति कन् । दारुणो हस्तक: ॥

दार्ढ्यम् । न । दृढतायाम् ॥ भावे ष्यञ् ॥

दार्त्तेय: । त्रि । दृतिस्थे ॥ दृतौ भवम् । दृतिकुक्षीतिढञ् ॥

दार्दुरम् । न । दक्षिणावर्त्तशङ्खे ॥ दर्दुरधर्मे ॥

दार्दुरिक: । पुं । कुलाले ॥ दर्दुरो मृत्पात्रविशेष: । तंकरोति । शब्द-दर्दुरं करोतीति ठक् ॥

दार्वटम् । न । मन्त्रवेश्मनि । चिन्तागृहे ॥

दार्वण्ड: । पुं । मयूरे ॥

दार्वाघाट: । पुं । काष्ठकुट्टखगे । शतपत्रके । खुटकावढ्या इति भाषा ॥ दारुआहन्तीति विग्रहे दारावाहनो ऽणन्तस्य चट: संज्ञायामिति दारुशब्दे उपपदे आङ् पूर्वाद्धन्तेरण् प्रत्यय: टश्चान्त्यादेश: ॥

दार्वाघात: । पुं । दार्वाघाटे । श० च० ॥

दार्विका । स्त्री । दारुहरिद्राक्वाथतुल्ये । क्वाथोद्भवतुत्थे ॥ गोजिह्वौषधौ ॥ दारयति । दृ० । उत्वादित्वात्साधु: । दार्वी दारुहरिद्रा तद्विकारोपि दार्वी अभेदोपचारात् । स्वार्थे कन् ॥

दार्विपत्रिका । स्त्री । गोजिह्वायाम् ॥

दार्वी । स्त्री । देवदारुणि ॥ हरिद्रायाम् ॥ गोजिह्विकौषधौ ॥ दारुहरिद्रायाम् ॥ दार्वी निशामुखा किन्तु नेत्रकर्णास्यरोगनुत् ॥ दीर्य्यते । दृ० । दृसनिजनीतिणुक् । वोतइति गौरादित्वाद् वाङीष् ॥

दार्वीक्वाथोद्भवम् । न । रसाञ्जने ॥

दार्षद: । त्रि । दृषत्पिष्टे चूर्णादौ ॥ दृषदो भवार्थेपि शेषप्रत्यय: ॥

दाल: । पुं । कोद्रवे ॥ न । मधुविशेषे ॥ संस्नुत्य पतितं पुष्पात् यत्तु पत्रोपरिस्थितम् । मधुराम्लकषायञ्च तद्दालं मधुकीर्त्तितम् ॥ दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् । कषायानुरसं रूक्षं रुच्यं छर्दिप्रमेहजित् ॥ अधिकं मधुरं स्निग्धं वृंहणं गुरुभारिकम् ॥ लघुपाके । गुरुभारिकं तुचितम् ॥ इन्द्रनीलच्छाकारसूक्ष्ममक्षिकोत्पन्नं वृक्षकोटरान्तरभवं मक्षिकाराजनिर्घण्ट: ॥

दालन: । पुं । दन्तरोगविशेषे ॥ दन्तम्

जनतानाथः पञ्चभेया यथेरिताः। दीर्घमाक्षिविरुजा यस्य दन्तेषु जायते। दालनो नाम स व्याधिः सदागतिनिमित्तजः॥ १२॥

दालवः। पुं। स्थावरविषभेदे॥

दाला। स्त्री। महाकाले। किम्पाके॥

दालिः। स्त्री। दलितशमीधान्ये। दाल इति भाषा॥

दालिका। स्त्री। महाकाललतायाम्। किम्पाके॥

दालिमः। पुं। दाडिमे॥ इतिभरतः॥

दाली। स्त्री। दलिते शमीधान्ये। दाल इतिभाषा॥ देवदालीलतायाम्॥

दाल्भ्यः। पुं। मुनिविशेषे॥ चैकितायने॥ वकाख्यर्षौ॥ दल्भ्यस्य गोत्रापत्यम्। गर्गादिभ्यो यञ्॥

दाल्मी। पुं। इन्द्रे॥ इति त्रिकाण्डशेषः॥

दावः। पुं। वनानले॥ वने॥ उपतापे॥ दुनोति। टुदु उपतापे। दुन्योरनुपसर्गे इति णः॥

दावाग्निः। पुं। वनवह्नौ। दावे॥ दावस्य वनस्याग्निः॥

दावानलः। पुं। दवाग्नौ॥

दाविकः। त्रि। देविकानद्युद्भवे॥ देविकायां भवः। तत्रभवइत्यण्। देविकाशिंशपेत्यचामादेरात्त्वम्। स्त्रियां टिड्ढेतिङीपि दाविकी॥

दाशः। पुं। धीवरे॥ दशति मत्स्यान्। दंशदशने। दंशेष्टनीनाम चाच। दंशेश्व॥ यद्वा। दाश्यते मूल्यमस्मै। दाशृदाने। घञ्॥

दाशतयी। स्त्री। वह्वृचां संहितायाम्॥ दशमण्डलानि अवयवा यस्याः। सङ्ख्याया अवयवे तयप्। ङीप्॥

दाशपुरम्। न। कैवर्त्तीमुस्तके। दशपुरे। मोथा इति भाषा॥ दाशान् कैवर्त्तान् पिपर्त्ति। पृपालनपूरणयोः। मूं॰कः। उदोष्ठ्यपूर्वस्येत्युत्वम्॥

दाशपूरम्। न। दाशपुरे॥

दाशफली। स्त्री। ओषधिविशेषे॥ पाककर्णेतिङीष्॥

दाशरथः। पुं। श्रीरामचन्द्रे॥ दशरथस्यायम्। तस्येदमितिसम्बन्धाऽर्थेऽण्। सम्बन्धश्च पितापुत्रत्वरूपः॥ पुरा शरत्सूर्यमरीचिसन्निभान् नवाग्रपुंखान्सुदृढान्नृपात्मजः। सृजस्व मे घोरान् विशिखान् वधायते प्रदीयतां दाशरथाय मैथिली॥

दाशरथिः। पुं। श्रीरामे॥ दशरथस्यापत्यम्। अतइञ्॥

दाशार्हः। पुं। विष्णौ॥ यादवे॥ दाश्यते इति दाशो दानम्। तदर्हतीति। अर्हपूजायाम्। अच्॥ दशार्ह

लोहकत्वाद्वा । दशार्ह एववा । स्वार्थिकःप्रत्ययः ॥ चि । दशार्हदेशजे॥

दाशी । स्त्री । धीवर्य्याम् ॥

दाशेयी । स्त्री । व्यासमातरि ॥ दाशस्यापत्यं स्त्री । चुद्राभ्योवेतिढगभावे द्व्यच इति ढक् । ङीप् ॥

दाशेरकः । पुं । मालवदेशे ॥ इ०त्रि० ॥

दाश्वः । त्रि । दातरि ॥

दाश्वान् । त्रि । दत्तवति ॥ दाश्वान् साह्वान्मीढ्वांश्चेतिनिपातितः ॥

दासः । पुं । ज्ञातात्मनि ॥ शूद्रे ॥ धीवरे ॥ दानपात्रे ॥ शूद्रनामोपपदे ॥ सेवके । भृत्ये ॥ सचपञ्चदशविधो नारदेनोक्तो यथा । गृहजातस्तथाक्रीतोलब्धो दायादुपागतः । अन्नाकालभृत स्तद्वदाहितः स्वामिना चयः ॥ मोचितो महतश्चार्णाद्युद्धे प्राप्तः पणेजितः । तवाहमित्युपगतः प्रव्रज्यावसितःकृतः ॥ भक्तदासश्चविज्ञेय स्तथैववडवाकृतः । विक्रेताचात्मनः शास्त्रेदासाःपञ्चदशस्मृताः ॥ अस्यार्थः । गृहजातः दास्यामुत्पन्नः । दायादुपागतः क्रमागतः । अन्नाकालभृतः दुर्भिक्षपोषितः । स्वामिनाश्राहितः बन्धकीकृतः । मोचितः ऋणदानेनाङ्गीकृतदास्यः । तवाहमित्युपगतःकश्चाप्यदासःसन् स्वयं-दासत्वेन दत्तरूपः । प्रव्रज्याऽवसितः सन्न्यासभ्रष्टः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दासइतिकृतसमयः । भक्तदासः सुभिक्षेपि भक्तार्थमङ्गीकृतदास्यः । वडवाकृतः वडवा दासीतल्लोभादङ्गीकृतदास्यःइति ॥ ध्वजाहृतो भक्तदासोगृहजः क्रीतदत्त्रिमौ । पैत्रिकोदण्डदासश्चसप्तैते दासयोनयः ॥ * ॥ विप्रस्यकिङ्करोभूपो वैश्यो भूपस्य भूमिप । सर्वेषां किङ्कराःशूद्रा ब्राह्मणस्य विशेषतः ॥ दसति । दंस दशने । दंसयति दंस्यतेवा । दसिदीसौ । दंसेष्टटनौनआच ॥

दासकः । पुं । सामान्यदासे ॥ दासे ॥ दासएव । स्वा० कः ॥

दासकर्म्म । न । दासस्यकृत्ये ॥ कर्म्मापिद्विविधं ज्ञेय मशुभं शुभमेवच । अशुभं दासकर्म्मोक्तं शुभं कर्मकृतां स्मृतम् ॥ गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् । गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥ अशुभं कर्मविज्ञेयं शुभमन्यदतः परम् ॥

दासनन्दिनी । स्त्री । व्यासमातरि । सत्यवत्याम् ॥

दासपुरम् । न । कैवर्त्तीमुस्तके ॥ दासान् शूद्रान् पिपर्त्ति । पृ० । मू०

कः। उदोष्ठ्यपूर्व्वस्येत्युत्वम् ॥

दासपूरम्। न। दासपुरे॥ दासान् पूरयति। पूरपूर्त्तौ। कर्म्मण्यण्॥

दासिका। स्त्री। पीतजिण्ट्याम्॥ भुजिष्यायाम्॥ वेश्याम्॥ दास्येव। स्वार्थे कः। केण इति ह्रस्वः॥

दासी। स्त्री। चेट्याम्। भुजिष्यायाम्॥ वाणायाम्। जिण्ट्याम्॥ काकजङ्घायाम्॥ नीलाम्लाने॥ नीलजिण्ट्याम्॥ पीतजिण्ट्याम्॥ वेश्याम्॥ शूद्रायाम्॥ कैवर्त्तभार्य्यायाम्॥ दस्यते। दसुउपक्षये। कर्म्मणि घञ्। गौ०ङीष्॥

दासीफली। स्त्री। ओषधिविशेषे॥ पाककर्णेतिङीष्॥

दासीसभम्। न। दासीनांसभायाम्॥ दासीनां सभा। अशालाचेतिन पुंसकत्वम्॥

दासेयः। पुं। धीवरे॥ भृत्ये। दासीतनये॥ दास्या अपत्यम्। क्षुद्राभ्योवेति ढगभावपक्षे स्त्रीभ्यइतिढक्॥

दासेयी। स्त्री। सत्यवत्याम्। व्यासजनन्याम्॥ ङीप्॥

दासेरः। पुं। क्रमेलके। उष्ट्रे॥ धीवरे॥ त्रि। चेटे। दासीपुत्त्रे॥ दास्या अपत्यम्। क्षुद्राभ्योवेति ढक्॥

दासेरकः। पुं। दासेरार्थेषु॥ स्वार्थेकम्॥

दास्यम्। न। दासत्वे। दासभावे॥ दासस्यभावः। ष्यञ्॥

दास्यमानः। त्रि। भविष्यद्दानसम्बन्धिवस्तुनि॥

दास्रम्। न। अश्विनीनक्षत्रे॥ दस्रयोरिदम्। तस्येद मित्यण्॥

दास्रभम्। न। अश्विनीनक्षत्रे॥ दास्रक्षतत् भञ्च॥

दाहः। पुं। दहने। भस्मीकरणे॥ गात्रसन्तापे॥ दहनम्। दहभस्मीकरणे। घञ्॥

दाहकः। पुं। चित्रके॥ रक्तचित्रके॥ त्रि। दाहकर्त्तरि॥ दह०। ण्वुल्॥

दाहज्वरः। पुं। देहज्वालायुक्तोज्वररोगे॥ यथा। पीतं हरिद्रकम्, यत्तु मयुषितजलेनवै। साद्धं विनाशयेद्दाहज्वरञ्च परमेश्वरेतिगारुडे १९३ अध्यायः॥

दाहनम्। न। भस्मीकरणाय प्रेरणे। दाहकरावना इतिभाषा॥ दहधातोर्णिच् ल्युट्॥

दाहसरः। पुं। श्मशाने॥

दाहहरणम्। न। वीरणमूले॥ त्रि। दाहघ्ने॥

दाहागरुः। पुं। गन्धविशेषे॥ यथा। देवदारुं गुग्गुलुंसालसारांजनद्रुमाः

। प्रियादीनाञ्च योऽग्ध्वा गृह्यते दा
ह्यैारसः । सदासाकर्षितोगन्धः स्मृ
तीयः परिकीर्त्तितइति ॥

दाहागुरु । न । सुगन्धिद्रव्यविशेषे । दा
हकाष्ठे । तैलागुरुणि ॥

दाहिका । स्त्री । तेजसोभार्यायाम् ॥
पश्यप्रभाम् ॥

दाही । त्रि । दाहके ॥

दिक्कः । पुं । करभे ॥ विंशतिवर्षकेगजे ॥

दिक्करः । पुं । यूनि ॥

दिक्करवासिनी । स्त्री । कामरूपदेशप्र
सिद्धनद्याम् ॥ देवीविशेषे ॥ दिक्क
रस्त्वरुणः प्रोक्त स्तथाशम्भुश्च दिक्क
रः । तस्मिन्नध्युषितादेवी तस्माद्दि
क्करवासिनीति ॥

दिक्करिका । स्त्री । नाटकशैलस्य पश्चि
मभागाब्धिः सृतायां नद्याम् ॥

दिक्करी । स्त्री । युवत्याम् ॥

दिक्पतिः । पुं । दिगधीश्वरे ॥ यथा ।
सूर्यः शुक्रः क्षमापुत्रः सैंहिकेयः श
निः शशी । सौम्यस्त्रिदशमन्त्रीच-
प्राच्यादिदिगधीश्वराः ॥ * ॥ इन्द्रोव
ह्निः पितृपतिर्नैरृतोवरुणोमरुत् ।
कुवेरईशःपतयः पूर्वादीनांदिशांक्र
मात् ॥ * ॥ मेषसिंहधनुः प्राच्यां द
क्षिणस्यान्तुतत्परे । प्रतीच्यांतत्परे
ज्ञेयाः उदीच्याञ्चततः परे ॥ दिशः

पतिः ॥

दिक्पालः । पुं । पूर्वादिदशदिक्पतौ ॥
यथा । इन्द्रोवह्निःपितृपतिर्नैरृतोवरु
णोमरुत् । कुवेरईशोब्रह्माचानन्तो
दिक्पालसंज्ञकाः ॥

दिक्शूलम् । न । दिग्विशेषगमनेनिषि
द्धवारे ॥ यथा । शुक्रादित्यदिनेनवा
रुणदिशं नचेकुजेचोत्तरां मन्देन्दो
श्चदिनेनशाक्रककुभंयाम्यांगुरौनव्रजे
त् । शूलानीति विलङ्घ्ययान्तिमनु
जा येऽत्रलाभाशयाभ्रष्टाशाः पुनरा
यतन्ति यदिते शक्रेणतुल्या अपि ॥

दिगन्तः । पुं । शालीयस्थानकर्मसंस्कृत
समाधिष्ठितमध्यदेशादतिरिक्ते देशे
॥ दिशामन्तः ॥

दिगम्बरः । पुं । शङ्करे ॥ तमसि ॥ क्ष
पणे । आत्मनोमध्यमपरिमाणवादि
निवौद्धविशेषे ॥ यथा । दिगम्बरोम
ध्यमत्वमाहु रापादमस्तकम् । चै
तन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ॥
अस्य भाषा प्राकृतावान्तरभेदभिन्ना
मागधी । अस्यस्वरूपन्तु । गलन्मल
पङ्केन पिच्छिलवीभत्सदुष्प्रेक्ष्यदे
हच्छवि रुल्लुञ्चितचिकुरो मुक्तवस
नो वेशदुर्दर्शनः शिखिशिखण्डपि-
च्छिकाहस्त इति । अस्यशिष्याःश्राव
काः ॥ त्रि । नग्ने । विवसने ॥ दिगे

वाम्बरमस्य ॥

दिगम्बरी । स्त्री । कालिकायाम् ॥ दिगेवाम्बरमस्याः ॥

दिगीश्वरः । पुं । दिगधीश्वरे ॥ यथा । दिगीश्वरा भास्करशुक्र भौमाराहुशनिचन्द्रज्ञसुरार्चिताः स्युरिति ॥ दिशः ईश्वरः ॥

दिग्गजः । पुं । दिग्हस्तिनि ॥ ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ दिक्षु स्थिताः गजाः दिग्गजाः ॥

दिग्दर्शनम् । न । दिक्साधनयन्त्रे । कम्पासइतीङ्ग्रभाषा ॥ दिशां दर्शनं ज्ञानं येन ॥

दिग्दाहः । पुं । उत्पातविशेषे ॥ यथा शास्त्रलक्षणं वराहाचार्यः । तद्वर्णभेदेन तस्यफलम् । दाहोदिशां राजभयायपीतो देशस्यनाशायहुताशवर्णः । यश्चारुणःस्यादपसव्यवायुः सस्यस्य नाशञ्चकरोतिदृष्टः ॥ योतीवदीप्त्याकुरुते प्रकाशं छायामभिव्यञ्जयतेर्कवत्यः । राज्ञोमहद्वेदयते भयं स शस्त्रप्रकोपं क्षतजानुरूपः ॥ सर्वेषुदिक्षुफलम् । प्राक् क्षत्रियाणां सनरेश्वराणां प्राग्दक्षिणे शिल्पकुमारपीडा । याम्ये सहोग्रैः पुरुषैस्तु

वैश्या दूताः पुनर्भूप्रमदाश्चकोणे ॥ पश्चात् तुशूद्राः कृषिजीविनश्च चौरास्तुरङ्गैः सहवायुदिक्स्थः । पीडां व्रजन्त्युत्तरतश्चविप्राः पाखण्डिनोवाणिजकाश्चशार्व्याम् ॥ * ॥ शुभलक्षणम् । नभः प्रसन्नंविमलानि भानि प्रदक्षिणं वातिसदागतिश्च । दिशाश्चदाहः कनकावदातो हिताय लोकस्यसपार्थिवस्येति ॥

दिग्द्वारलग्नम् । न । पूर्वादिदिक्षुचिरावृत्त्यामेषादिराशिषु ॥

दिग्धः । पुं । लिप्तके । विषाक्तवाणे ॥ अग्नौ ॥ प्रवृद्धे ॥ स्नेहे ॥ प्रबन्धे ॥ त्रि । लिप्ते । लीपा इति भाषा ॥ दिह्यतेस्म । दिहउपचये । क्तः ॥

दिग्वासाः । पुं । शिवे ॥ त्रि । नग्ने । दिगम्बरे ॥ दिगेववासोऽस्य ॥

दिग्विजयः । पुं । विद्यया युद्धेन वा दिशांविजये ॥ यथा । शङ्करदिग्विजयः पाण्डवदिग्विजयइति ॥

दिङ्कः । पुं । उत्कुणडिम्भे ॥ इति शब्दार्थकल्पतरुः ॥

दिङ्मात्रम् । न । एकदेशे ॥

दिण्डिभाण्डम् । न । डिण्डिभाण्डाख्ये वादित्र विशेषे ॥ पटहमृदङ्गकरटाः समेतायत्रवाद्यन्ते तत् डिण्डिभाण्डमित्युच्यते ॥

दितः । त्रि । छिन्ने ॥ दीयते स्म । दो अवखण्डने । क्तः । द्यतिस्यतीतीत्वम् ॥

दितिः । स्त्री । दैत्यजनन्याम् ॥ खण्डने ॥ दो अवखण्डने । क्तिच्क्तौ च संज्ञायामिति क्तिच् । द्यतिस्यतीतीत्वम् ॥

दितिजः । पुं । दैत्ये ॥ दितेर्जातः । जनी० । डः ॥

दितिसुतः । पुं । दैतेये ॥ दितेः सुतः ॥

दिती । स्त्री । दैतेयमातरि ॥ कृदिकारादिति ङीष् ॥

दित्सा । स्त्री । दातुमिच्छायाम् ॥ डुदाञ्० । सनिमीमेत्यादिना इसादेशः । अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः । अप्रत्ययात् इत्यकारप्रत्ययः ॥

दिदृक्षमाणः । त्रि । द्रष्टुमिच्छति ॥ दृशेः सन्नन्तात् लटः शानच् ॥

दिदृक्षा । स्त्री । द्रष्टुमिच्छायाम् ॥ दृशेः सन्नन्तादप्रत्यये टाप् ॥

दिदृक्षुः । त्रि । द्रष्टुमिच्छति ॥ सनाशंसभिक्ष उः ॥

दिद्युत् । त्रि । द्योतनशीले ॥ द्योतते तच्छीलः । द्युत दीप्तौ । द्युतिगमिजुहोतीनां द्वे चेति क्विप् ॥

दिधिषाय्यः । पुं । मन्त्रे ॥ दधाति धान्यादिम् धीयते वा । डुधाञ्० । दिधिषाय्य इति धाय्यः धातोर्द्वित्वमित्वं षुक् च निपात्यते ॥ धारोपितनय्यौ । मित्रवरुणयो दिधिषाय्यः ॥

दिधिषुः । पुं । द्विरूढास्वामिनि । पुनर्भूपतौ ॥ दिधिषूमात्मन इच्छति । सुप आत्मनः क्यच् क्विप् । बाहुलकाद्ध्रस्वः ॥ स्त्री । द्विरूढायाम् ॥

दिधिषूः । स्त्री । द्विरूढायाम् । पुनर्भ्वाम् ॥ दधाति पापम् धिष्यते वा । डुधाञ्० धिष शब्दे वा । अन्दूदृम्भू इति साधुः ॥ यद्वा । दिधिं धैर्यं स्यति । षो० । प्राग्वत् ॥ मनुस्तु । ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषुः स्मृतेत्याह ॥ पुं । पुनर्भूपतौ ॥

दिधिषूपतिः । पुं । द्विरूढायाः पत्यौ ॥ भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः । धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥

दिनम् । न । सूर्यकिरणावच्छिन्ने काले । अहनि । घस्रे । वासरे ॥ तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पितृमाने गौणचान्द्रमासात्मकम् । देवासुरमाने वत्सरात्मकम् । ब्रह्ममाने दिव्यद्विसहस्रयुगात्मकम् ॥ * ॥ मनुष्यमाने ब्रह्मणो दिनस्य सङ्ख्या । ८६४००००००० । इति

पुराणम् ॥ * ॥ तदेव मनुष्याणां सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्विधम्। यथा। सावनम् उदयात् षष्टिदण्डः सावनस्तुगुणां मान्यास्तदैर्नं भवेत्। १। उदयादोदयाद्भानोर्भौमसावनवासराः। २। तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः। ३। आयुर्दाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकमिति। ४। जीमूतवाहनमते तु सूर्य्यकिरणावच्छिन्नचतुर्थ्यामात्मकम् ॥ * ॥ अथ विशेषे ॥ यथा। अद्येगोप तिपुरम्बकर्विधञ्जिप्सगास्तथा। निशासंज्ञाः स्मृतास्त्वेते शेषास्त्वन्योदिनात्मका इति ज्योतिस्तत्त्वम् ॥ दीयते क्षीणं भवति। दीङ्क्षये। दिवा-दिः। इण्षिञ्जिदीङिति नक्। यास्तु लकाद्ह्रस्वः ॥ षि। खण्डने ॥ द्यति। दो। द्यतेरितीनच्। यत्पय षिदिनमिति तैत्तिरीये खण्डनमित्यर्थात् ॥

दिनकरः। पुं। सूर्य्ये॥ करोति। कृञ्० । अच्। दिनस्यकरः ॥

दिनकरात्मजा। स्त्री। यमुनायाम् ॥

दिनकेशरः। पुं। अन्धकारे ॥ इतिशब्दरत्नावली ॥

दिनक्षयः। पुं। दिनपाते ॥ एकस्मिन् सावनेत्वह्नि तिथीनां त्रितयं यदा।

तदादिनक्षयःप्रोक्त अवमसादृशिकं फलम् ॥

दिनज्योतिः। न। आतपे॥ इ० रानि०॥

दिनपतिः। पुं। सूर्य्ये॥ दिनस्यपतिः॥ मष्टमात्राष्टतीयप्रभेदे (।ऽ।ऽ)॥

दिनपातः। पुं। दिनक्षये ॥

दिनपिण्डः। पुं। अहर्गणे ॥

दिनप्रणीः। पुं। सूर्य्ये ॥

दिनबलः। पुं। पञ्चमषष्ठसप्तमाष्टमैकादशद्वादशराशिषु ॥

दिनमणिः। पुं। सूर्य्ये॥ दिनस्यमणिरिव ॥

दिनमुखम्। न। प्रभाते ॥

दिनमूर्द्धा। पुं। उदयाचले ॥

दिनयौवनम्। न। मध्याह्ने ॥

दिनांशः। पुं। प्राह्णमध्याह्नापराह्णसायाह्नाः ॥

दिनादिः। पुं। प्रभाते ॥

दिनान्तः। पुं। सायं। दिवावसाने ॥

दिनान्तकः। पुं। अन्धकारे॥ दिनस्य अन्तकः ॥

दिनावसानम्। न। सायङ्काले॥ दिनस्यावसानोऽस्मिन् ॥

दिनिका। स्त्री। दिनभृतौ। एकदिवसकृतकर्ममूल्ये ॥ इतिशब्दमाला ॥

दिनेशः। पुं। अर्कगणे ॥

दिलीपः। पुं। नृपविशेषे। रघोः

पितरि ॥

दिवोदासः । पुं । दिलीपे ॥ इ० चि ॥

दिवौकसम् । न । गोमयच्छत्रिकायाम् । शिलीन्ध्रके ॥

द्यौः । स्त्री । स्वर्गे ॥ आकाशे ॥ दीव्यन्त्यस्याम् । दिवु० । वा० दिवेर्डिविः । द्यौःदिवौ दिवः । द्युभ्याम् ॥

दिवम् । न । स्वर्गे ॥ आकाशे ॥ वने ॥ दीव्यन्त्यस्मिन् । दिवु० । इगुपधे ति कः ॥

दिवसः । पुं । न । दिने ॥ सावनादि प्रभेदेन दिवसोपि चतुर्विधः । ना क्षीषष्टितमस्तच सावनो दिवसः स्मृ तः ॥ त्रिंशांशभागार्कराशेर्दिवसः- सौर उच्यते । चान्द्रस्तुतिथ्यवच्छिन्नो भावधिस्वभमूःस्मृतः ॥ दीव्यन्त्यत्र । दिवु० । दिवःकिदित्यसच् ॥

दिवसकरः । पुं । सूर्ये ॥

दिवसमुखम् । न । प्रभाते ॥

दिवस्पतिः । पुं । वासवे । इन्द्रे ॥ दिवः पतिः । तत्पुरुषे कृतीत्यत्र बहुलग्र हणादलुक्यपि अलुक् इति मुकुटः । तन्न । पातेर्डतिरित्युणादिसूत्रस्य तत्त्वात् । वस्तुतस्तु । षष्ठ्याः पतिपु त्रेतिसत्वविधानसामर्थ्याल्लोकवेद- सत्याख्येनालुगुक्तावतः । वस्तादि ब्राह्मणः । प्रजाप्रभृत्याः पतिपुत्रेति स

स्वमितिमुकुटेनोक्तं.तन्न । तच छन्दो धिकारात् ॥

दिवस्पृथिव्यौ । स्त्री । द्यावापृथिव्योः ॥ द्यौश्चपृथिवीच । दिवसश्च पृथिव्या- मितिदिवो दिवसादेशः ॥ दिवच- नान्तः ॥

दिवा । अ । दिवसे ॥ दीव्यन्त्यत्र । दिवु० । काप्रत्ययः ॥

दिवाकरः । पुं । भास्करे । सूर्ये ॥ अर्क वृक्षे ॥ दिवादिनं करोति । दिवावि भेतिटः ॥ काके ॥ पुष्पविशेषे ॥ इ तिशब्दचन्द्रिका ॥

दिवाकीर्त्तिः । पुं । नापिते ॥ रात्रौक्षु रकर्मनिषेधत् । दिवाकीर्त्तिरस्य ॥ चण्डालेषु ॥ तिदिवासामिनि । चण्डाले ॥ दिवाच रेयुः कार्यार्थं चिह्निता राजशासने रत्ति चण्डालेषु निदर्शनात् ॥ उलूके ॥ इतिशब्दचन्द्रः ॥

दिवाटनः । पुं । काके ॥

दिवातनः । त्रि । दिनभवे ॥

दिवान्धः । पुं । पेचकादौ ॥ यथा । दि वान्धः प्राणिनः केचिद्रात्रावन्धास्त- थापरे । केचिद्दिवा तथारात्रौ प्राणि नस्तुल्यदृष्टय इतिदेवीमाहात्म्यम् ॥

दिवान्धकी । स्त्री । छुच्छुन्दर्याम् ॥

दिवान्धा । स्त्री । चक्षुःपक्षिणि ॥

दिवाभीतः । पुं । कुम्भिले । चौरे ॥

उलूके ॥ कुमुदाकरे ॥

दिवाभीतिः । पुं । पेचके ॥ दिवा दिवसे भीतिर्भयं यस्य ॥

दिवामणिः । पुं । सूर्य्ये ॥ दिवा दिवसस्य मणिरिव ॥

दिवामध्यम् । न । दिनार्द्धे । मध्याह्ने ॥

दिवाशयः । त्रि । दिनेशयनकर्त्तरि ॥ दिवा शेते स्वपितीति । शीङो ऽधिकरणे शेतेरित्यच् ॥

दिवास्वापः । पुं । दिननिद्रायाम् ॥ दिवास्वापं न कुर्वीत यतोऽसौ स्यात् कफावहः । ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिध्यते ॥ उचितो हि दिवास्वापो नित्यं येषां शरीरिणाम् । वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा ॥ * ॥ येषामुचितस्तानाह । व्यायामाध्यव्यवायवाहनरताक्रान्तामती सारिणः शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान् । क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धान् रसाजीर्णिनो रात्रौ जागरितान् नरान् निरशनान् कामं दिवास्वापयेदिति ॥

दिवास्वापा । स्त्री । दिवान्धायाम् ॥

दिविः । पुं । चाषखगे ॥

दिविजः । त्रि । स्वर्गोद्भवे ॥

दिविषत् । पुं । देवे ॥ दिवि स्वर्गे सी-

दतिवर्त्तते । सदसूद्धिशसयोगन्त्यव-सादनेषु । सत्सूद्विषेति क्विप् । हृद्युभ्याञ्चेतिङे रलुक् । सुषामादित्वात् षत्वम् ॥

दिविष्ठः । त्रि । स्वर्गस्थे ॥

दिवी । स्त्री । उपजिह्विकाकीटे ॥

दिवेदिवे । अ । अहन्यहनि ॥

दिवौकाः । पुं । दिवौकसि ॥ द्यौरोको यस्येतिविग्रहः ॥

दिवोदासः । पुं । चन्द्रवंशीयभीमरथनृपात्मजः पुत्रे । काशिराजे ॥ दिवः स्वर्गस्थैन तात्स्याद्देवाः । तेषाम् दिवः स्वर्गस्य वा दासः । दिवसशब्दात्सप्तिषष्ठ्या अलुक् ॥

दिवोद्भवा । स्त्री । एलायाम् ॥ त्रि । दिविजाते ॥

दिवौकः पुष्करिणी । स्त्री । तीर्थविशेषे ॥

दिवौकाः । पुं । देवे ॥ द्यौः दिवि वा ओको यस्य । पृ० ॥ यद्वा । दिवमोकोयस्येत्यदन्तेन विग्रहः ॥ चातके ॥

दिव्यम् । न । लवङ्गे ॥ हरिचन्दने ॥ शपथे ॥ तद्भेदाः यथा । घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् । षष्ठञ्च तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकम् ॥ अष्टमं फालमित्युक्तं नवमं धर्म्मसम्भूतम् । दिव्यान्येतानि सर्वाणि

निर्दिष्टानि स्वयम्भुवा ॥ गङ्गाजलस्प र्शपूर्वकशपथे तत्रमिथ्याकथने दोषो यथा । गङ्गातोयमुपस्पृश्यमिथ्यां यदिवदेज्जनः । सयातिकालसूत्रं च यावदैब्रह्मणोवय इतिब्रह्मवैवर्त्तपुराणम् ॥ पानीयप्रभेदे ॥ यथा । दिव्यंचतुर्विधंप्रोक्तंधाराजं करकाभवम् । तौषारञ्चतथाहैमंतेषुधारं गुणाधिकमिति ॥ पुं । गुग्गुलौ ॥ यवे ॥ आगमोक्ते भावविशेषे यथा । दिव्यस्तु देवतामाप्राय: शुद्धान्तःकरण: सदा । द्वन्द्वातीतो वीतराग: सर्वभूतसम:-क्षमीति ॥ नायकविशेषे ॥ त्रि । चोत मात्मके मनुष्येरम्ये सर्वप्रपञ्चातीते अत्यद्भुते अप्राकृते ॥ दिविशोभनात्मन्यादिव्येभव: । दिविपरमेव्योम्निस्व स्वरूपेवाभव: । अप्रागपा गुदक्प्रतीचोयत् ॥ मनोज्ञे ॥ दिविभवे ॥

दिव्यकुण्डम् । न । कामरूपे शोभकाद्रिपूर्वभागस्थे पुष्करिणी विशेषे ॥

दिव्यगन्धः । पुं । गन्धके ॥ न । लवङ्गे ॥

दिव्यगन्धा । स्त्री । स्थूलैलायाम् ॥ महाचञ्चुशाके ॥

दिव्यगायन: । पुं । गन्धर्व्वे । स्वर्गगायके ॥

दिव्यचक्षु: । पुं । सुगन्धस्यप्रभेदे ॥ मर्कटे ॥ त्रि । अन्धे ॥ सुलोचने ॥

न । मायात्मके नेत्रे ॥

दिव्यतेजा: । स्त्री । ब्राह्म्याम् ॥

दिव्यदृष्टि: । स्त्री । निमेषशून्यायां दृष्टौ ॥ दिव्याचासौ दृष्टिश्च ॥

दिव्यदोहदम् । न । मनोराज्यस्यसिद्धये देवेभ्योदीयमाने द्रव्ये । उपयाचिते ॥ यद्दीयतेतु देवेभ्योमनोराज्यस्यसिद्धये । उपयाचितकं दिव्यदोहदंतद्विदुर्बुधाइतिहारावली ॥

दिव्यपञ्चामृतम् । न । मिलितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्करारूपे ॥ इतिराजनिर्घण्ट: ॥

दिव्यपुष्प: । पुं । करवीरे ॥

दिव्यपुष्पा । स्त्री । महाद्रोणायाम् ॥

दिव्यपुष्पिका । स्त्री । लोहितवर्णार्कवृक्षे ॥

दिव्ययमुना । स्त्री । कामरूपे ब्रह्मनिकायानद्या: पूर्वभागस्थे नदीविशेषे ॥

दिव्यरत्नम् । न । चिन्तामणौ ॥

दिव्यरथ: । पुं । देवविमाने । व्योमयाने ॥

दिव्यरस: । पुं । पारदे ॥

दिव्यलता । स्त्री । मूर्वालतायाम् ॥

दिव्यवस्त्र: । पुं । सूर्यशोभायाम् ॥ न । शुभांशुके ॥ दिविभववस्त्रे ॥ त्रि । सुन्दरवस्त्रवति ॥

दिव्यसार: । पुं । शालवृक्षे ॥

दिव्यस्त्री । स्त्री । अप्सरः प्रभृतौ ॥

दिव्या । स्त्री । आमलक्याम् । धात्र्याम् ॥ वन्ध्याकर्कोटक्याम् ॥ शतावर्याम् ॥ महामेदायाम् ॥ ब्राह्म्याम् ॥ स्थूलजीरके ॥ श्वेतदूर्वायाम् ॥ हरीतक्याम् ॥ पुरायाम् । गन्धवत्याम् ॥

दिव्यादिव्या । स्त्री । उपदेवीविशेषे ॥

दिव्योदकम् । न । आकाशजले । खवारिणि ॥

दिव्योपपादुकः । त्रि । अमरे । निर्जरे ॥ मातृपित्रादिदृष्टकारणनिरपेक्षा अदृष्टसत्कृतेभ्योजाता ये देवास्ते दिव्योपपादुका उच्यन्ते ॥ दिविभवः । द्युप्रागपागिति यत् । उपपद्यते । पदगतौ । लषपतपदेत्युकञ् । दिव्यश्चासावुपपादुकश्च ॥

दिव्यौघः । पुं । गुरुविशेषे ॥

दिव्यौषधिः । स्त्री । मनःशिलायाम् ॥

दिक्-श् । स्त्री । ककुभि । आशायाम् । काष्ठायाम् । प्राच्यादिव्यवहारहेतौ । कृत्वैकमवधिं तस्मादिदं पूर्वञ्च पश्चिमम् । इति देशोनिदिश्येत यया सादिगिति स्मृतेतिव्युत्पत्तेः कार्यमात्रनिमित्तकारणे ॥ साचैकानित्याविभ्वी चेतिन्यायमतम् ॥ सा दशधा । यथा । पूर्वा अग्नेयी दक्षिणाच

नैर्ऋती पश्चिमा तथा । वायवी चोत्तरै शानी ऊर्द्धा चाधोदिशोदशेतिवराहपुराणम् ॥ दिशत्यवकाशम् । दिशअतिसर्जने । ऋत्विगित्यादिना निपातनात् क्विन् ॥ दिश्यतेऽसौवा । दिशेःकर्मणिक्विन् ॥ हस्त्यन्तविशेषे ॥ दिग्दष्टे वर्त्तुलाकारे इति वैजयन्ती ॥

दिशा । स्त्री । दिशि ॥ भागुरिमतेन टाप् ॥ अस्याअङ्गारिण्यादि संज्ञा चोक्ता । यथा । अङ्गारिणी दिगरविविप्रयुक्ता यस्यांरवि स्तिष्ठतिसा प्रदीप्ता । प्रधूमिता यास्यतियांदिनेशः शेषाः प्रशस्ताःशुभदाश्चताःस्युः ॥

दिश्यम् । त्रि । दिग्भवेवस्तुनि ॥ दिशिभवम् । दिगादिभ्योयत् ॥ दिगन्तरादानीते ॥

दिष्टः । पुं । काले ॥ दारुहरिद्रायाम् ॥ न । भाग्ये । दैवे । भागधेये ॥ त्रि । आदिष्टे । उपदिष्टे ॥ दिशति । दिशअतिसर्जने । क्तिच्क्तौच संज्ञायामितिक्तः ॥ दत्ते ॥

दिष्टान्तः । पुं । मरणे ॥ दिष्टस्यदैवस्यान्तः ॥

दिष्टिः । स्त्री । मुदि । हर्षे ॥ माने ॥ परिमाणे ॥ दिशति । दिश० । क्तिच् क्तौचेतिक्तिच् ॥

दिष्ट्या । अ । हर्षे ॥ मङ्गले ॥ भाग्येनेत्यर्थे ॥ देशनम् । दिश० । सं० क्विप् । दिशं ख्यायति वा । ख्यै चख्यै शब्दसकथनयोः । क्विप् । ष्टुत्वम् । [illegible] पूर्वकत्वाज्जश्त्वं न ॥ यद्वा । दिशति । अघ्न्यादिभ्यश्चेति यक् ॥

दिष्णुः । त्रि । दातरि ॥

दीक्षणीया । स्त्री । इष्टिभेदे । सौमिक्याम् ॥

दीक्षा । स्त्री । नियमे ॥ य० । एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्निति ॥ गुरुमुखात् स्वेष्टदेवस्य मन्त्रग्रहे ॥ क्रियावर्णकलास्पर्शवाग्दृश्यानस संज्ञकाः । दीक्षा मोक्षप्रदा देवि सप्तधा परिकीर्त्तिताः ॥ दीक्षा च द्विविधा प्रोक्ता वाह्याभ्यन्तरभेदतः । क्रियादीक्षा भवेद्वाह्या वेधाख्याभ्यन्तरी भवेत् ॥ दिव्यभावप्रदानाच्च क्षालनात् किल्विषस्य च । दीक्षेति कथिता सद्भि र्भवबन्धविमोचनी ॥ दीयते सकलं देवि गुरवे प्राणसंयुतम् । धनं तथ सुवर्णादिपट्टवस्त्रसमुच्चयम् ॥ क्षयं प्राप्नोति सद्भावान्नानापापसमुच्चयः । तस्माद्दीक्षेति नामास्याः सर्वशास्त्रेषु सुव्रते ॥ दीयते विमलं ज्ञानं क्षीयते कर्मवासना । तेन दीक्षेति सा प्रोक्ता मुनिभिर्धर्मकोविदैः ॥ क्रियाविशेषे ॥ दीक्षा च तृतीयं जन्म ब्राह्मणादेः । यथाह मनुः । मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने । तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनादिति ॥

दीक्षागुरुः । पुं । मन्त्राद्युपदेशकर्त्तरि । देशिके ॥

दीक्षान्तः । पुं । अवभृथे ॥ प्रधानयागदीक्षा तस्या अन्तः समापको योऽपरो यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्रधानयागस्य पूरणार्थं प्रतिष्ठार्थं क्रियते सोऽवभृथो दीक्षान्तोऽप्युच्यते ॥

दीक्षितः । त्रि । संजातदीक्षे । स्वीकृतदीक्षे ॥ य० । अदीक्षितो हि मरणे रौरवं नरकं व्रजेत् । तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकादिति ॥ अपिच । अदीक्षितस्य मरणं रौरवाय प्रकल्पते । न पूजाद्यधिकारोऽस्ति विनादीक्षां वरानने इति ॥ दीक्षणीयेष्टिकृति ॥ सोमपानाध्वरान्विते । सोमपानवतियागे आदेष्टरि ॥ दीक्षते स्म । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । गत्यर्थेति क्तः ॥ यद्वा । दीक्षा संजाताऽस्य । ता० इतच् ॥ अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भोभवत्पूर्वकं त्वेनमभि भाषेत धर्मविद्-

क्षितः ॥ काम्पिल्लनगरस्थयज्ञदत्तनामकेविप्रे ॥ सचकाशीखण्डे प्रसिद्धः ॥

दीक्षिता। पुं। सोमयागाख्ये ॥ दीक्षते तच्छीलः। दीक्ष०। तृन्। सूद दीपदीक्षयश्चेतियुजन ॥

दीक्षितायनी। स्त्री। काम्पिल्लनगरस्थदीक्षितनामकविप्रस्यपत्न्याम् ॥

दीदिविः। पुं। धिषणे। वृहस्पतौ॥ पुं। न। अन्ने॥ दीव्यत्यनेन। दिवु०। दिवोदेदीर्घश्चाभ्यासस्येत्यौणादिकःक्विन्। क्वित्त्वाद्गुणाभावः। गोपामृतस्यदीदिविमितिमन्त्रेतु द्योतमानमित्यर्थः ॥

दीधितिः। स्त्री। किरणे॥ दीधीतेदीप्यते। दीधीङ्दीप्तिदेवनयोः। क्तिच्। नितुचेतीण्निषेधस्तुन। अग्रहादीनामितिवार्त्तिकात्। यीवर्णयोरितीकारलोपः ॥

दीनः। त्रि। दुर्गते। दरिद्रे ॥ भीते॥ शोच्ये ॥ दीयतेस्म। दीङ्क्षये। गत्यर्थेतिक्तः। स्वादयओदितः। ओदितश्चेतिनत्वम् ॥ यद्वा। इगुपधज्ञाप्रीकिरःक इति कः ... जिदीङ्क्तिनक् ॥ न। तगरपुष्पे ॥ इतिराजनिर्घण्टः ॥

दीननाथः। त्रि। दरिद्रजनभर्त्तरि ॥

दीना। स्त्री। मूषिकायाम्। मूसी इ-

तिभाषा ॥

दीनारः। पुं। स्वर्णभूषणे ॥ मुद्रायाम्। व्यावहारिकरूपके। रूप्या इति भाषा॥ निष्कपरिमाणे ॥ सुवर्णकर्षद्वये ॥ सम्यग् व्यवहारार्थं मानवस्तुनि ॥ द्वात्रिंशद्रत्तिकापरिमिते काञ्चने ॥ दीयते। दीङ्०। दीङोनुट् चेत्यारन् ॥

दीपः। पुं। वर्त्तिस्थज्वलदग्निशिखायाम्। प्रदीपे। कज्जलध्वजे। गृहमणौ ॥ घृततैलमदीपार्थे स्नेहान्यान्विवर्जयेत् ॥ इति वह्निपुराणम् ॥ दीपनिर्वापणात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः। अचिरेणैव काले नवंशनाशो भवेद्ध्रुवम् ॥ नैवनिर्वापयेद्दीपं देवार्थमुपकल्पितम्। दीपहर्त्ता भवेदन्धःकाणोनिर्वापकोभवेत् ॥ इतिकालिकापुराणम् ॥ कोषजं रोमजं वस्त्रं वर्त्तिकार्थं नचाददेत्। नमिश्रीकृत्य दद्यात्तु दीपेस्नेहान्घृतादिकान् ॥ कृत्वामिश्रीकृतं स्नेहं तामिस्रं नरकंव्रजेत्। वसामज्जास्थिनिर्यासैःस्नेहैःप्राण्यङ्गसम्भवैः। प्रदीपं नैवकुर्यात्तु कृत्वा पङ्केविषीदतीतिका० पु० ॥ दीप्यतेऽनेनवा। दीपोदीप्तौ। इगुपधत्वात्कः। घञ्वा। अच् ॥

दीपकः। पुं। दीपे। केशाग्रे। दीपा इति दीवा इति च भाषा ॥ खगशिखगे बाज इति सिक्रा इति च भाषा ॥ यमान्याम् ॥ लोचमस्तके ॥ मात्रावृत्तभेदे। य०। तुरगैकमुपधाय सुनरेन्द्र मवधाय। इष्टदीपक मवेहि लघुमन्तमवधेहि ॥ यथा। चणमात्रमति वल्गु जगदेतदति फल्गु। धनलोभमपहाय भजपद्मनयनाय ॥ रागविशेषे ॥ न। कुङ्कुमे ॥ इति शब्दरत्नावली ॥ अलङ्कारे ॥ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् । सैवक्रियासु बह्वीषु कारकस्येति दीपकम् ॥ प्राकरणिकाना मर्थात् उपमानोपमेयानां धर्मः क्रियादिरेकवारमेवयदुपादीयते तदेकस्थैव समस्तवाक्यदीपनाद्दीपकम् ॥ यथा। किवणाणं धणं णाआणं फणमणी केसराइं सीहाणम्। कुलवालिआणं थणा कुत्तो घिप्पन्ति अमुआणम् ॥ कृपणानांधनं नागानां फणामणिः केसराणिसिंहानाम् । कुलपालिकानांस्तनाः कुतः स्पृश्यन्ते अमृतानामिति संस्कृतम् ॥ अमृतानामिति सकलषष्ठ्यन्तविशेषणम् । अत्रवर्ण्यत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेन प्रकृतानामन्येषांचकुतः

स्पृश्यन्त इतिसकृद्धर्मोपादानाद्दीपकालङ्कारः ॥ ६५ ॥ कारकस्यच बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम्। यथा। स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्। अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणायावधूः शयने॥ स्विद्यति स्वेदंभजते। कूणति सङ्कोचमालम्बते। वेल्लतिपरिवृत्त्यशेते। विचलतिविशेषतश्चञ्चलाभवति। निमिषति निद्राव्याजेन नेत्रेमुद्रयति। अन्तर्नन्दति हृष्यति नवोढात्वेन बाह्यतोहर्षाप्रकाशनात्। अतएवचुम्बितुमिच्छति नतु चुम्बतीत्यनेकासुक्रियासु वधूरूपकर्त्तृकारकस्यसकृद्वृत्तिरित्यर्थः ॥ अपिच। वदन्तिवर्ण्यावर्ण्यानां धर्मैक्यंदीपकंबुधाः। मदेनभातिकलभः प्रतापेनमहीपतिः ॥ दीपयति। दीपीदीप्तौ। णयन्तः। ण्वुल् ॥ त्रि। दीपेकुशले ॥ आ० कन् ॥ दीप्तिकारके। भासके ॥

दीपकूपी। स्त्री। दीपवर्त्त्याम्। तैलमाल्याम्। पलीता इतिवत्ती इतिं च भाषा ॥

दीपखोरी। स्त्री। दीपकूप्याम् ॥ इति शब्दमाला ॥

दीपध्वजः। पुं। कज्जले ॥ इतिजटा

धरः ॥

दीपनः । पुं । कासमर्द्दे ॥ पलाण्डौ ॥ मयूरशिखायाम् ॥ शालिञ्चशाके ॥ न । तगरमूले ॥ कुङ्कुमे ॥ त्रि । दीपयितरि ॥

दीपनी । स्त्री । पाठायाम् ॥ मेथिकायाम् ॥ यवान्याम् ॥

दीपनीयः । पुं । यवान्याम् ॥ औषधवर्गविशेषे ॥ यथा । पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् । दीपनीयः स्मृतो वर्गः कफानिलगदापहः इति चक्रदत्तः ॥ त्रि । दीपनयोग्ये ॥

दीपपुष्पः । पुं । चम्पकवृक्षे ॥

दीपमाला । स्त्री । दीपशृङ्खलायाम् । दीपाल्याम् ॥ दीपानां माला ॥

दीपमालिका । स्त्री । दीपान्वितायाममावास्यायाम् । दीपाल्याम् । यच्च रात्रौ ॥ दीपमालेव । स्वार्थे कः । इत्यमरः ॥

दीपलक्षणम् । न । प्रज्वलितदीपस्य शुभाशुभफलाय तत्स्वरूपनिरूपणं ॥ तत्राशुभफलम् । वामावर्त्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्त्तिः क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्त्यन्वितोऽपि । दीपः पापं कथयति फलं शब्दवान् वेपनश्च व्याकीर्णार्च्चिर्विशलभमरुद्यश्च नाशं प्रयाति ॥ १ ॥ शुभम् । दीपः संहतमूर्त्तिरायततनुर्निर्वेपनो दीप्तिमान् निःशब्दो रुचिरः प्रदक्षिणगतिर्वैदूर्य्यहेमद्युतिः । लक्ष्मीं क्षिप्रमभिव्यनक्ति सुचिरं यश्चोद्यतं दीप्यते शेषं लक्षणमग्निलक्षणसमं योज्यं यथायुक्तितः ॥ इति वाराह्याम् ८१ ॥

दीपवती । स्त्री । कामाख्यायां नदीविशेषे ॥ यथा । एषा वह्निमवज्ज्ञाता छिन्दती दीपवत् तमः । तेन देवमनुष्येषु नदी दीपवती स्मृतेति कालिकापुराणम् ॥

दीपवृक्षः । पुं । दीपाधारे । दीपतरौ । दीवट इति भाषा ॥ यथा । दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्यैश्च भैरव । वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन ॥ सर्वसहा वसुमती सहते न त्विदं द्वयम् । अकार्य्यपादघातञ्च दीपतापं तथैव च । तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा ॥ दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरवेति ॥

दीपवृक्षकः । पुं । दीपवृक्षे ॥

दीपशिखा । स्त्री । प्रदीपज्वालायाम् ॥

दीपशृङ्खला । स्त्री । दीपमालिकायाम् ॥

दीपाग्निः । पुं । अर्कनिष्कासनाय वह्नि

विशेषे ॥ यथा । दाभ्यां तस्य चतुर्थां भ्यां योगि दीपाग्निरुच्यते । तस्यका हस्येत्यर्थः ॥

दीपान्विता । स्त्री । दीपाल्याम् ॥ सा च मुख्यचान्द्रेणाश्विनस्य । गौणचान्द्रेण कार्त्तिकस्यामावास्या । यथा । येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि । तस्यां देया ह्यचे हृत्तं पितृणांवैमहालये ॥ तत्कर्माणि यथा । प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् । दीपवृक्षा स्तथाकार्या भक्त्यादेवगृहेष्वपि ॥ चतुष्पथे श्मशानेषु नदीपर्व्वतसानुषु । वृक्षमलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥ वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः । दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥ ब्राह्मणान् भोजयित्वादौ विभाज्यच बुभुक्षितान् । अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥ स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृतकैःसहेति ॥ पद्मपुराणसुखरात्रिकाम् ॥

दीपाली । स्त्री । दीपान्वितायाममायाम् । यचराची । दिवाली इति भाषा ॥ दीपमालायाम् ॥

दीपिका । स्त्री । प्रकाशिकायाम् ॥ ग्रन्थविशेषे ॥ हिल्लोलरागस्य रागिण्याम् ॥ प्रदोषकाले गृहसम्प्रविष्टा, प्रदीपहस्ता ऽक्षणगात्रवस्त्रा । सीमन्तसिन्दूरविराजमाना सुरक्तमाल्याकितदीपिकेयमिति ध्यानम् ॥ गानकालःसायाह्नः ॥

दीपितः । त्रि । प्रकाशिते ॥ उज्ज्वलिते । निखारा इति भाषा ॥ मण्डिते ॥

दीपिता । त्रि । दीप्तिकर्त्तरि ॥

दीपोत्सवः । पुं । दीपान्वितायाम मायाम् ॥

दीप्तः । पुं । निम्बूके ॥ सिंहे ॥ न । स्वर्णे ॥ हिङ्गुनि ॥ त्रि । ज्वलिते ॥ दग्धे ॥ निर्भासिते ॥ दीप्तिमति ॥ दीप्यतेस्म । दीपीदीप्तौ । क्तः । श्वीदितोनिष्ठायामितिनेट् ॥

दीप्तकम् । न । स्वर्णे ।

दीप्तजिह्वा । स्त्री । उल्कामुख्याम् ॥ दीप्ता ज्वलन्ती जिह्वा यस्याः । शिवानां वाशितेन जिह्वाज्वलतीति प्रसिद्धिः ॥

दीप्तपिङ्गलः । पुं । सिंहे ॥

दीप्तरसः । पुं । किञ्चुलुके ॥

दीप्तलोचनः । पुं । विडाले ॥

दीप्तलोहम् । न । कांस्ये ॥

दीप्ता । स्त्री । लाङ्गलिकायाम् । अग्निशिखौषधौ ॥ ज्योतिष्मत्याम् ॥ सातलायाम् ॥

दीप्ताक्षः । पुं । मार्ज्जारे ॥

दीप्ताग्निः । पुं । अगस्त्यमुनौ ॥ त्रि । तीक्ष्णजठरानलयुक्ते ॥

दीप्ताङ्गः । पुं । मयूरे ॥

दीप्तिः । स्त्री । प्रभायाम् । रुचि । त्विषि ॥ प्रभाप्रसरे ॥ दीप्यतेऽनया । दीपी॰ क्तिन्वावादिभ्यः ॥ वाचके गत्यतीव्रतायाम् ॥ स्त्रियाः अयत्नज-गुणे ॥ कान्तिरेव वयोभोगदेशकाल-गुणादिभिः । उद्दीपितातिविस्तारं प्राप्ताचेद्दीप्तिरुच्यते ॥ लाक्षायाम ॥ कांस्ये ॥

दीप्तिकः । पुं । दुग्धपाषाणवृक्षे ॥

दीप्तोपलः । पुं । सूर्यकान्तमणौ ॥

दीप्यः । पुं । यमान्यम् ॥ लोचमस्तके ॥ जीरके ॥ न । शुभ्रजीरे ॥ दीपनम् । दीपी॰ भावे घञ् ॥ दीपेसाधुर्वा । तत्रसाधुरितियत् ॥ त्रि । दीपीये ॥ दीपायहितम् । अपूपादिभ्यात् पक्षेयत् ॥

दीप्यकः । पुं । अलङ्कारे ॥ यमान्याम् ॥ लोचमस्तके ॥ न । अजमोदायाम् ॥ यवान्याम् ॥ वर्हिचूडायाम् । बड़जटेति गौडभाषा ॥

दीप्यमानः । त्रि । प्रकाशमाने ॥

दीप्या । स्त्री । यवान्याम् ॥

दीप्रः । त्रि । दीप्तिमति ॥

दीयमानः । त्रि । वर्त्तमानदानतन्त्र

न्धिवत्सुनि ॥

दीर्घः । पुं । शतायालवृत्ते ॥ हृत्कटे ॥ रामशरे ॥ उष्ट्रे ॥ द्विमात्रवर्णे । गुरुवर्णे ॥ त्रि । आयते ॥ दृणाति । दृविदारणे । बाहुलकाद्घञ् ॥

दीर्घकणा । स्त्री । गौरजीरके ॥

दीर्घकण्टकः । पुं । वर्वुरे ॥

दीर्घकण्ठः । पुं । वके ॥

दीर्घकन्दकम् । न । मूलके ॥

दीर्घकन्दिका । स्त्री । मुषल्याम् ॥

दीर्घकन्धरः । पुं । वकपक्षिणि ॥

दीर्घकाण्डः । पुं । गुण्डतृणे । त्रिकोणके ॥

दीर्घकाण्डा । स्त्री । तिक्ताङ्गायाम् ॥

दीर्घकीलः । पुं । } अङ्कोठवृक्षे । नि

दीर्घकीलकः । पुं । } कोचके ॥

दीर्घकूरकम् । न । आन्ध्रदेशोद्भवेशालिविशेषे । राजान्ने । धान्यश्रेष्ठे ॥

दीर्घकेशः । पुं । भल्लूके ॥ त्रि । आयतकचे ॥

दीर्घकोशा । स्त्री । दुर्नामायाम् ॥ दीर्घःकोशोयस्याः ॥

दीर्घकोशिका । स्त्री । दुर्नामायाम् । जिनुक इति गौडभाषा प्रसिद्धे जलजन्तुविशेषे । सीपीइतिदेशभाषा ॥ दीर्घःकोशोयस्याः । जातेरितिङीष् । संज्ञायां कन् । केण इति ह्रस्वः ॥

दीर्घकोषा । स्त्री ।
दीर्घकोषिका । स्त्री । } दीर्घकोशिकायाम् ॥ प्रक्रियापूर्ववत् ॥

दीर्घगतिः । पुं । उष्ट्रे ॥ इ०रानि० ॥

दीर्घग्रन्थिः । पुं । गजपिप्पल्याम् ॥

दीर्घग्रीवः । पुं । उष्ट्रे ॥ दीर्घा ग्रीवा यस्य सः ॥ नीलक्रौञ्चे । अतिजागरे ॥

दीर्घघाटिकः । पुं । उष्ट्रे ॥ इतिशब्दमाला ॥

दीर्घच्छदः । पुं । इक्षौ ॥ दीर्घाश्छदा यस्य सः ॥

दीर्घजङ्गलः । पुं । भङ्गानमत्स्ये ॥

दीर्घजङ्घः । पुं । बके ॥ उष्ट्रे ॥ त्रि । दीर्घप्रसृताङ्घ्रि ॥

दीर्घजिह्वः । पुं । सर्पे ॥

दीर्घतरुः । पुं । ताले ॥

दीर्घतिमिषा । स्त्री । कर्कट्याम् ॥

दीर्घतुण्डा । स्त्री । छुच्छुन्दर्याम् ॥

दीर्घतृणः । पुं । पल्लिवाहे ॥

दीर्घदण्डः । पुं । एरण्डवृक्षे ॥ शुक्लैरण्डे ॥

दीर्घदण्डी । स्त्री । गोरक्ष्याम् ॥

दीर्घदर्शी । पुं । पण्डिते । विदुषि ॥ गृध्रे ॥ भल्लूके ॥ त्रि । दूरदर्शके ॥ आगामिकार्यज्ञे ॥ दीर्घं दीर्घादा पश्यति । दृशिर्० । ग्रह्यादित्वात् णिनिः । सुपीति वा ॥

दीर्घदृष्टिः । पुं । दीर्घदर्शिनि ॥ दूरावलोकनाय यन्त्रविशेषे । दूरवीक्षणे ॥ दीर्घा दृष्टिर्यस्य येन वा ॥

दीर्घद्रुः । पुं । तालवृक्षे ॥

दीर्घद्रुमः । पुं । शाल्मलिवृक्षे ॥

दीर्घनादः । पुं शङ्खे ॥

दीर्घनालः । पुं । यावनाले ॥ वृत्तगुण्डे ॥ न । दीर्घरोहिषके ॥

दीर्घनिद्रा । स्त्री । मरणे ॥ अनया निद्रया राजन् दीर्घनिद्राभविष्यति ॥

दीर्घपक्षः । पुं । कलिङ्गे । धूम्याटखगे ॥

दीर्घपटोलिका । स्त्री । धुंदुल इति गौडभाषाप्रसिद्धे लताफलविशेषे ॥

दीर्घपत्रः । पुं । जलजमधूलके ॥ रसोनभेदे । राजपलाण्डौ ॥ विष्णुकन्दे ॥ हरिदर्भे ॥ कुन्दरे ॥ ताले ॥ कुपीलौ ॥

दीर्घपत्रकः । पुं । एरण्डे ॥ रक्तलशुने ॥ विज्जले ॥ वेतसे ॥ करवीरवृक्षे ॥ जलजमधूके ॥ लशुने ॥ दीर्घाणि पत्राणि यस्य सः । स्वार्थेकः ॥

दीर्घपत्रा । स्त्री । अल्पजम्बूवृक्षे ॥ शालपर्ण्याम् ॥ चक्रच्याम् । चंचूशाके ॥ चित्रपर्णिकायाम् ॥ केतक्याम् ॥ गन्धपत्रायाम् ॥ डोडीक्षुपे ॥ दीर्घाणि पत्राणि यस्याः ॥

दीर्घपत्रिका । स्त्री । घृतकुमार्याम् ॥

शालपर्ण्याम् ॥ श्वेतवचायाम् ॥

दीर्घपर्वी । स्त्री । पलाशीलतायाम् ॥ महाचञ्चुशाके ॥

दीर्घपर्णी । स्त्री । पृश्निपर्ण्याम् ॥

दीर्घपल्लवः । पुं । शणवृक्षे ॥ न । आयतच्छदे ॥ त्रि । दीर्घच्छदवति ॥

दीर्घपात् । पुं । कङ्कपक्षिणि ॥

दीर्घपादः । पुं । कङ्कपक्षिणि ॥ दीर्घौ पादौ यस्य ॥

दीर्घपादपः । पुं । ताले ॥ पूगे ॥

दीर्घपृष्ठः । पुं । सर्पे ॥ दीर्घं पृष्ठमस्य ॥

दीर्घफलः । पुं । आरग्वधे ॥ दीर्घाणि फलान्यस्य ॥

दीर्घफलकः । पुं । अगस्त्यवृक्षे ॥

दीर्घफला । स्त्री । कपिलद्राक्षायाम् ॥ जतुकायाम् ॥

दीर्घमारुतः । पुं । हस्तिनि ॥ दीर्घो मारुतो वायुर्यस्य ॥

दीर्घमूलः । पुं । मोरटलतायाम् ॥ बिल्वान्तरवृक्षे ॥ न । लामज्जके ॥

दीर्घमूलकम् । न । मूलके ।

दीर्घमूला । स्त्री । शालपर्ण्याम् ॥ श्यामलतायाम ॥ दीर्घं मूलं यस्याः ॥

दीर्घमूर्वी । स्त्री । दुरालभयाम् ॥

दीर्घरदः । पुं । शूकरे ॥ दीर्घौ रदौ यस्य ॥ त्रि । आयतदन्ते ॥

दीर्घरसनः । पुं । सर्पे ॥ दीर्घा रसना जिह्वा यस्य ॥

दीर्घरागा । स्त्री । हरिद्रायाम् ॥

दीर्घरात्रम् । न । चिरकाले ॥

दीर्घरोमा । पुं । भल्लूके ॥

दीर्घरोहिषकम् । न । कतृणविशेषे । इक्षुकाण्डे ॥

दीर्घवंशः । पुं । नले ॥ आयते कुले । तृणध्वजेच ॥

दीर्घवक्त्रः । पुं । हस्तिनि ॥

दीर्घवल्ली । स्त्री । पलाश्याम् ॥ पातालगरुडीलतायाम् ॥ महेन्द्रवारुण्याम् ॥ आयतायां लतायाम् ॥

दीर्घवाला । स्त्री । चमर्याम् ॥

दीर्घवृन्तः । पुं । श्योनाकद्रुमे ॥ दीर्घं वृन्तमस्य ॥

दीर्घवृन्तकः । पुं । श्योनाकप्रभेदे ॥

दीर्घवृन्ता । स्त्री । इन्द्रचिर्भिट्याम् ॥

दीर्घवृन्तिका । स्त्री । एलापर्ण्याम् ॥

दीर्घशरः । पुं । यावनाले ॥

दीर्घशाखः । पुं । शणवृक्षे ॥ शालवृक्षे ॥

दीर्घशाखिका । स्त्री । नीलाम्लीक्षुपे ॥

दीर्घशिम्बिकः । पुं । चवे ॥ इति राजनिर्घण्टः ॥

दीर्घशूकः । पुं । शालेर्भेदान्तरे ॥

दीर्घशूककम् । न । राजान्ने ॥

दीर्घसत्रम् । न । यज्ञविशेषे ॥ तीर्थविशेषे ॥

दीर्घसुरतः । पुं । कुक्कुरे । शुनि ॥ दीर्घसुरतंमैथुनमस्य ॥

दीर्घसूत्रः । त्रि । चिरक्रिये । दीर्घकालेन क्रियानुष्ठातरि ॥ दीर्घसूत्रं व्यवसायस्य ॥ अदीर्घसूत्रश्च भवेत् सर्वकर्मसु पार्थिवः । दीर्घसूत्रस्य नृपतेः कर्महानि ध्रुवं भवेत् ॥ रागे द्वेषेच कामेच द्रोहे पापेच कर्मणि । अप्रियेचैवकर्त्तव्ये दीर्घसूत्रः प्रशस्यते इतिमत्स्यपुराणम् ॥ न । विस्तृततन्तौ ॥

दीर्घसूत्री । त्रि । दीर्घसूत्रे । निरन्तरमङ्कःसहस्रकवलितान्तःकरणत्वेनातिमन्थरप्रवृत्तौ । यद्यत्कर्त्तव्यं तन्मासेनापि करोति नवेत्येवंशीले ॥

दीर्घसोमः । पुं । सोमयागविशेषे ॥

दीर्घस्कन्धः । पुं । तालवृक्षे ॥

दीर्घा । स्त्री । पृश्निपर्ण्याम् ॥ दीर्घप्रमाणाय स्त्रियि ॥

दीर्घाध्वगः । पुं । लेखहारे । धाउडिया० इति गौडभाषा ॥ उष्ट्रे ॥

दीर्घायुधः । पुं । कुन्ताख्ये ॥ दीर्घमायुधमस्य ॥ शूकरे ॥ दीर्घमायुधोऽस्य ॥

दीर्घायुष्यः । पुं । श्वेतमन्दारके ॥

दीर्घायुः । पुं । शाल्मलिद्रुमे ॥ वायसे ॥ जीवकवृक्षे ॥ मार्कण्डेयमुनौ ॥ त्रि । आयुष्मति । चिरजीविनि ॥ दीर्घमायुर्यस्य ॥

दीर्घार्कः । पुं । श्वेतमन्दारे ॥

दीर्घिका । स्त्री । वाप्याम् । अधिकायतायांचतुरस्रायां वाप्याम् ॥ त्रिशतधनुः परिमिते जलाशये इतिगौडाः ॥ दीर्घैव । संज्ञायांकन् ॥

दीर्घिमा । पुं । दीर्घत्वे ॥ दीर्घस्यभावः । इमनिच् ॥

दीर्घोरः । पुं । ऋक्ष्याम् ॥ इ० रानि० ॥

दीर्णः । त्रि । विदारिते ॥ भीते ॥

दीविः । पुं । किकीदिवौ ॥

दुःकूलः । पुं । चोरनामगन्धद्रव्ये ॥

दुःखम् । न । संसारे ॥ मनोधर्मविशेषे ॥ न्यायमते आत्मगुणभेदे ॥ तत् अधर्मजन्यं सचेतसां प्रतिकूलमिति भा० प० ॥ पीडायाम् । बाधायाम् । कष्टे । सर्वेषांप्रतिकूलवेदनीये ॥ बाधनालक्षणं दुःखम् । २१ ॥ बाधनापीडा तदेव लक्षणंस्वरूपं यस्य । तथाचानुभवसिद्धदुःखत्वजातिरेवलक्षणं शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् । सुखेचदुःखानुषङ्गात् दुःखव्यवहारो गौण इति । दसूतोऽसत्स्वरूपेचिरसुखाजवे परिणामे बाधनालक्षणे ॥ तद्दुःखंत्रिविध

म् । आध्यात्मिकं शारीरं मानसञ्च व्याधिश्शात् कामादिवशाच्च भवति । आधिभौतिकं व्याघ्रादिजनितम् ॥ आधिदैविकंग्रहपीडादिजनितम् ॥ * ॥ अधर्मसाधारणकारणके प्रतिकूलवेदनीये ॥ निरुपाधिद्वेषविषयीभूताचित्तवृत्तिरधर्मासाधारणकारणिकादुःखम् ॥ इष्टवियोगानिष्टसंयोगजे अध्यात्मादिनिमित्ते ॥ तात्कालिक्यां पीडायाम् ॥ रजसि ॥ न दुःखंपञ्चभिःसह ॥ दुष्टानिखान्यस्मिन् ॥ यद्वा । दुर्निन्दितं खनति । खनु० । अन्ये॰ डः ॥ यद्वा । दुःखयति । सुखदुःखतत् क्रियायाम् । चु० । पचाद्य् ॥ दुःखंचित्तस्यराजसः परिणामोबाधनालक्षणः यद्वाधात् प्राणिनस्तदपघाताय प्रवर्त्तन्ते ॥

दुःखग्रामः । पुं । संसारे ॥

दुःखत्रयम् । न । आध्यात्मिकाधिभौतिकाधिदैविकस्वरूपे ॥ तत्राध्यात्मिकं द्विविधम् । शारीरं मानसञ्च । शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम् । मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषदर्शननिमित्तम् । सर्वञ्चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम् । बाह्योपायसाध्यं दुःखंद्वेधा । आधिभौतिकम् आधिदैविकञ्च । तत्राधिभौतिकम् मानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तम् । आधिदैविकम् यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम् ॥ प्रत्यात्मवेदनीयोरजःपरिणामभेदो दुःखम् । दुःखानांत्रयम् ॥

दुःखत्रयाभिघातः । पुं । दुःखत्रयसम्बन्धे ॥ दुःखत्रयं प्रत्यात्मवेदनीयंरजःपरिणामभेदो नशक्यते प्रत्याख्यातुम् । तदनेनदुःखत्रयेण अन्तःकरणवर्त्तिना प्रतिकूलतयाचेतनाशक्तेरभिसम्बन्धोऽभिघातः ॥

दुःखदिरः । पुं । दुष्खदिरे । मदासारे ॥

दुःखदोह्या । स्त्री । दुर्दोहगव्याम् । करटायाम् ॥ दुःखेनदुह्यते । दुह० । ऋहलोर्ण्यत् ॥

दुःखावसानम् । न । दुरन्ते ॥

दुःखितः । त्रि । दुःखिनि ॥ संसारिणि ॥ दुःखमूलं हि संसारः स यस्यास्ति सदुःखितः । तस्यत्यागःकृतोयेनससुखीनापरःप्रिये इति कुलार्णवतन्त्रम् ॥ ईर्षादियुक्ते । यथोक्तं महाभारते । ईर्ष्युर्घृणीत्वसन्तुष्टःक्रोधनोनित्यशङ्कितः । परभाग्योपजीवीचषडेते नित्यदुःखिताइति ॥ * ॥

त्यक्त्वात्म सुखभोगेच्छां सर्वसत्त्वसुखैषिणः । भवन्तिपरदुःखेन साधवोनित्यदुःखिताः इतिवह्निपुराणम् ॥ दुःखं सञ्जातमस्य । ता० इतच् ॥

दुःखी । चि । दुःखान्विते । अध्यात्मादिदुःखवति ॥ दुःखमस्त्यस्य । सुखादिभ्यश्चेतीनिः ॥ उपाधिजनितोयोयं चिदाभासोवभासते । दुःखाद्यनुभव स्तत्रश्रौते कार्यविनिश्चितः ॥ दुःखीयदि भवेदात्मा कः साक्षी दुःखिनोभवेत् । दुःखिनः साक्षिता नैव साक्षिणो दुःखिता तथा ॥ न र्तेस्याद्विक्रियां दुःखी साक्षिता का विकारिणः । धीविक्रियासहस्राणां साक्ष्यतोह मविक्रियः ॥ शरीरेन्द्रियसङ्घात आत्मत्वेनाभिमानिनीम् । चिदाभासयुतां बुद्धिं विशिषन्ति सुखादयः ॥

दुःशकुनम् । न । अशुभसूचके निमित्ते ॥ यथा । वन्ध्याचर्मतुषास्थिसर्पलवणाङ्गारेन्धनक्लीबविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः ॥ नग्नाभ्यक्तविमुक्तकेशपतितव्यङ्गक्षुधार्त्ता असृक् स्त्रीपुष्पं शरटस्वगेहदहनं मार्जारयुद्धं क्षुतम् ॥ काषायी गुडतक्रपङ्कविधवाः कुब्जाः कुटुम्बेकलि र्वस्त्रादेःस्खलनं तुषापस्मरं कृष्णानिधान्यानिच । कार्पासं वमनञ्च गर्दभरवो दक्षेऽतिरुट् गर्भिणी मुण्डार्द्राम्बरदुर्वचोन्धवधिरोदक्यानदृष्टाःशुभाः ॥ कृष्णाम्बराकृष्णविलेपनाढ्या कृष्णस्रजं मूर्द्धनि धारयन्ती । दृष्टाप्रकोपायदिकृष्णवर्णा नारी नरै स्तद्विपदोभवन्तीति ॥

दुःशासनः । पुं । दुर्योधनात्मजे भारतप्रसिद्धे क्षत्रिये ॥ दुःखेनशास्यते । शासु० । भाषायां शासियुधीतियुच् ॥

दुःशीलः । चि । दुष्टस्वभावे ॥ दुष्टंशीलं यस्यसः ॥

दुःषमम् । अ । गर्ह्ये । निःषममित्यर्थे ॥ दुष्टं समम् । तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावत्वम् . सुविनिर्दुर्भ्य इति षत्वम् ॥

दुःसमम् । अ । असमञ्जसे ॥

दुःसहः । चि । असह्ये ॥

दुःसहा । स्त्री । नागदमन्याम् ॥

दुःसाक्षी । चि । कूटसाक्षिणि ॥

दुःसाधी । पुं । दौःसाधिके । द्वारपाले ॥

दुःसाध्यः । चि । दुःखनिष्पाद्ये ॥ दुःखेनसाध्यतेनिष्पाद्यते । साध० । ण्यत् ॥

दुःस्थः । चि । दुर्गते ॥ मूर्खे ॥ दुःखेन तिष्ठति । सुपिस्थ इतिकः ॥ लुब्धे ॥

दुःस्थितः । चि । अनवस्थिते ॥ ष्ठा० । क्तः । द्यतिस्यतीतीत्त्वम् ॥

दुःस्पर्शः । पुं । धमासा इतिजवासा इति च प्रसिद्धे धन्वयासे । दुरालभायाम् ॥ लताकरञ्जे ॥ त्रि । खरस्पर्शे ॥ दुःखेन स्पृश्यते । स्पृश स्पर्शने । ईषद्दुरिति खल् ॥

दुःस्पर्शा । स्त्री । कण्टकार्याम् ॥ आकाशवल्ल्याम् ॥ कपिकच्छाम् ॥ दुरालभायाम् ॥ टाप् ॥

दुःस्फोटः । पुं । शस्त्रप्रभेदे ॥ इति हे० ॥

दुकूलम् । न । सूक्ष्मवाससि । श्लक्ष्णवस्त्रे ॥ क्षौमाम्बरे ॥ दुष्टं कूलति । कूल आवरणे । इगुपधेति कः । पृ० ॥ यद्वा । दवति । दु गतौ । पिच्छा० ऊलच् । धातोः कुक् ॥

दुगूलम् । न । दुकूले ॥ इति हेमचन्द्रः ॥

दुग्धम् । त्रि । प्रपूरिते ॥ कृतदोहे ॥ न । क्षीरे । पीयूषे । ऊधस्ये । स्तन्ये । पयसि । अमृते । बालजीवने ॥ विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः । तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥ दुह्यते स्म । दुह प्रपूरणे । क्तः ॥ दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम् । सद्यः शुक्रकरं शीतं सात्म्यं सर्वशरीरिणाम् ॥ जीवनं बृंहणं बल्यं मेध्यं वाजीकरं परम् । वयःस्थापकमायुष्यं सन्धिकारि रसायनम् ॥ विरेकवान्तिवस्तीनां तुल्यमोजोविवर्द्धनम् । जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ॥ ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये । शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे ॥ रक्तपित्तेऽतिसारे च योनिरोगे श्रमे क्लमे । गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ॥ बालवृद्धक्षतक्षीणाः क्षुद्व्यवायकृशाश्च ये । तेभ्यः सदातिशयितं हितमेतदुदाहृतम् ॥ * ॥ धारोष्णं गोःपयो बल्यं लघु शीतं सुधासमम् । दीपनञ्च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत् ॥ धारोष्णं शस्यते गव्यं धाराशीतन्तु माहिषम् । शृतोष्णमाविकं पथ्यं शृतशीतमजापयः ॥ आमं क्षीरमभिष्यन्दि गुरु श्लेष्मामवर्द्धनम् । ज्ञेयं सर्वमपथ्यं तद्गव्यमाहिषवर्जितम् ॥ नारीक्षीरन्त्वाममेव हितं न तु शृतं हितम् । शृतोष्णं कफवातघ्नं शृतशीतन्तु पित्तनुत् ॥ * ॥ अर्द्धोदकं क्षीरशेषमामाल्लघुतरं पयः ॥ * ॥ जलेन रहितं दुग्धमतिपक्वं यथायथा । तथातथा गुरु स्निग्धं वृष्यं बलविवर्द्धनम् ॥ * ॥ पेयूषञ्च किलाटश्च क्षीरशाकं तथैव च । तक्रपिण्ड इमे हृष्या बृंहणा बलवर्द्धनाः ॥ गुरवः श्लेष्मला हृद्या वातपित्तविना

दुग्धम्

शनाः। दीप्ताग्नीनां विनिद्राणां व्य
वायेष्वतिपूजिताः॥ *॥ मुखशोष
तृषादाहरक्तपित्तज्वरप्रणुत्। लघ्वं
शकरोरुच्योमेरटःस्यात्सितायुतः॥
खण्डेन सहितं दुग्धं कफकृत् पव
नापहम्। सितासितोपलायुक्तं शु
क्रलं कृमिलापहम्॥ सगुडं मूत्रकृ
च्छ्रघ्नं पित्तश्लेष्मकरं स्मृतम्॥ *॥
रात्रौ चन्द्रगुणाधिक्या व्यायामाकर
णात्तथा। प्राभातिकं पयः प्रायः-
प्रादोषा गुरु शीतलम्॥ दिवाकर
करातापा व्यायामकरणात् पयः।
प्राभातिकात्तु प्रादोषं लघु वातक
फापहम्॥ *॥ वृष्यं बृंहण मग्नि
दीप्तिजनकं पूर्वाह्णकाले पयो मध्या
ह्नेतु बलावहं कफहरं पित्तापहं दी
पनम्। बाले वृद्धिकरं क्षये क्षयहरं
वृद्धेषु रेतोवहं रात्रौ क्षीर मनेक-
दोषशमनं पथ्यं सदाचक्षुषोः॥ *
॥ वदन्ति पथ्यं निशि केवलं पयोभो
ज्यं न तेनेच्छसहौदनादिकम्। भवे
दजीर्णं न सपीतशर्वरी क्षीरस्य पी
तस्य न शेष मुत्सृजेत्॥ *॥ विदा
हीन्यन्नपानानि दिवाभुक्तानिहि य
त्नरः। तद्विदाहप्रशान्त्यर्थं रात्रौ क्षी
रं सदापिबेत्॥ *॥ दीप्तानले कृ
शे पुंसि बाले वृद्धे पयःप्रिये। मतं

दुग्धम्

हिततमं दुग्धं सद्यःशुक्रकरं यतः॥
*॥ मथितदुग्धस्य तु। क्षीरं गव्यम
थाजं वा कोष्णं दण्डाहतं भवेत्। ल
घु वृष्यं ज्वरहरं वातपित्तकफापह
म्॥ *॥ दुग्धफेनगुणाः। गोदुग्ध
प्रभवं किंवा छागीदुग्धसमुद्भवम्। भ
वेत्फेनं त्रिदोषघ्नं रोचनं बलवर्द्ध
नम्॥ वह्निवृद्धिकरं पथ्यं सद्यस्तृप्ति
करं लघु। अतिसारेऽग्निमान्द्ये च
ज्वरेजीर्णे प्रशस्यते॥ *॥ विवर्णं वि
रसं चाम्लं दुर्गन्धं ग्रथितंपयः। वर्ज
येदम्ललवणयुक्तं कुष्ठादिकृद्यतः॥ शर
काम्लफलपिण्याककुलत्थलवणामि-
षैः। करीरदधिमाषैश्च प्रायः क्षी-
रं विरुध्यते॥ *॥ कैयाविकं पथ्यत
मं शृतोष्णं क्षीरं त्वजानां शृतशीत
माहुः। दोषाम्नशीतं माहिषीपय
स्यं गव्यन्तु धारोष्णमिदं प्रशस्तम्॥
*॥ वृष्यं बृंहण मग्निवर्द्धनकरं पू-
र्वाह्णपीतं पयो मध्याह्ने बलदाय
कं रतिकरं कृच्छ्रस्य विच्छेदनम्।
बाल्ये वह्निकरं ततो बलकरं वीर्यप्रदं
वार्द्धके रात्रौ क्षीरमनेकदोषशम
नं सेव्यं ततः सर्वदा॥ *॥ क्षीरं मु
हूर्त्तं चितयोषितं यदतस्तमेतद्विकृ-
तिं प्रयाति। यस्मात्तु दोषं कुरुते-
तदूर्ध्वं विषोपमं स्याद्दुषितं दशाना

म् ॥ * ॥ जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् । तदेव तरुणे पीतं विषवद्धन्ति मानुषम् ॥ * ॥ चतुर्थभागं सलिलं निधाय यत्नाद्यदावर्त्तितमुत्तमं तत् । सर्वामयघ्नं बलपुष्टिकारि वीर्यप्रदं क्षीरमतिप्रशस्तम् ॥ * ॥ गव्यं पूर्वाह्णकाले स्यादपराह्णे तु माहिषम् । क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्वदा ॥ * ॥ क्षीरं न भुञ्जीत कदाप्यतप्तं तप्तञ्च नैव लवणेन सार्द्धम् । पिष्टान्नसन्धानकमाषमुद्गकोषातकीकन्दफलादिकैश्च ॥ * ॥ मत्स्यमांसगुडमुद्गमूलकैः कुष्ठमावहति सेवितं पयः । शाकजाम्बवरसादिसेवितं मारयत्यबुधमाशु सर्पवत् ॥ * ॥ स्निग्धं शीतं गुरु क्षीरं सर्वकालं न सेवयेत् । दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च ॥ * ॥ नित्यं तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः । पुष्यन्ति धातवः सर्वे बलपुष्टिविवर्द्धनम् ॥ क्षीरं गवाजकादे मधुरं क्षारं नवप्रसूतानाम् । रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते ॥ * ॥ मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम् । लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम् ॥ गुणहीनं निस्सारं क्षीरं प्रथमप्रसूतानाम् । मध्यवयसां रसायनमुक्तमिदं दुर्बलानां वृद्धानाम् ॥ तासां मासत्रयादूर्द्धं गुर्विणीनाञ्च यत् पयः । तद्बाष्कलयणं क्षीरं मधुरं पित्तशोषकृत् ॥ * ॥ दुग्धाग्रं शीतलं स्वादु वृष्यं वर्णकरं गुरु । वातपित्तापहं रुच्यं बृंहणं बलवर्द्धनम् ॥ एवं भिषग्वराः प्राहुस्तद्यथार्थं न संशयः ॥

दुग्धकन्दगणः । पुं । अश्वगन्धादिषु ॥ अश्वगन्धा च मुसली विदारी च शतावरी । क्षीरवाराहिका चेति दुग्धकन्दगणस्त्वयम् ॥

दुग्धकूपिका । स्त्री । पक्वान्नविशेषे ॥ यथा । तण्डुलचूर्णविमिश्रितनष्टक्षीरेण सान्द्रपिष्टेन । दृढकूपिकां विदध्यात् ताञ्च पचेत् सर्पिषा सम्यक् ॥ अथ तां कोरितमध्यां घनपयसा पूर्णगर्भाञ्च । शष्कमुद्रितवदनां तप्तघृतेन पक्ववदनाञ्च ॥ अतिपाण्डुखण्डपाके स्नपयेत् कर्पूरवासिते कुशलः ॥ अथ दुग्धकूपिका सा बल्या पित्तानिलापहा दृष्टा । शीता वृष्या गुर्वी शुक्रकरी तर्पणी रुच्या । विदधाति कायपुष्टिं दृष्टिं दूरप्रसारिणीं सुचिरम् ॥

दुग्धतालीयम् । न । दुग्धाग्रे ॥ क्षीर

फेने ॥ दुग्धाग्रे ॥

दुग्धपाचनम् । न । वज्रके । दुग्धपाकपात्रे ॥ इतिहारावली ॥

दुग्धपाषाणः । पुं । दुग्धपाषाणके ॥

दुग्धपाषाणकः । पुं । शिरगोला इति गौडभाषा प्रसिद्धे वृ॰ विशेषे । क्षीर्याम् । गोमेदसन्निभे । वज्राभे ॥

दुग्धपुच्छी । स्त्री । दुग्धपेया इतिगौडभाषाप्रसिद्धे वृ॰ विशेषे । सेवकालौ । नसङ्कर्याम् ॥ इतिशब्दचन्द्रिका ॥

दुग्धफेनः । पुं । सशर्करदुग्धफेने । क्षीरडिण्डीरे । शार्करे ॥ इतिराजनि॰ ॥

दुग्धफेनकः । पुं । दुग्धफेने ॥

दुग्धफेनी । स्त्री । क्षुद्रक्षुपविशेषे । पयः फेन्याम् । गोजापर्ण्याम् ॥

दुग्धाब्धितनया । स्त्री । लक्ष्म्याम् ॥

दुग्धाश्मा । पुं । दुग्धपाषाणे ॥

दुग्धिका । स्त्री । क्षीराव्याम् । स्वादुपर्ण्याम् । दुद्धी इति ख्यातायाम् ॥ दुग्धमस्त्यस्याः । अतइनिठनाविति ठन् ॥ दुग्धिकोष्णा गुरू रूक्षा वातला पुत्रदायिनी । स्वादुक्षीरा कटुस्तिक्ता सृष्टमूत्रमला पटुः ॥ स्वाद्वी विष्टम्भिनी वृष्या कफकुष्ठकृमिप्रणुत् ॥ गन्धिका इति गौडभाषाप्रसिद्धायामुत्तमफलिन्याम् । युग्मफलायाम् ॥

दुग्धिनिका । स्त्री । रक्तापामार्गे ॥

दुग्धी । स्त्री । दुग्धिकायाम् । क्षीराव्याम् । दुद्धी इति भाषा ॥ दुग्धपाषाणे ॥

दुच्छकः । पुं । गन्धकुव्याम् । मुरामांसगन्धद्रव्ये ॥ विहारायवकाशके ॥

दुडिः । स्त्री । कच्छप्याम् ॥ इतिमुकुटः ॥

दुण्डुकः । त्रि । दुष्टचित्ते ॥

दुण्डुभः । पुं । डुण्डुभसर्पे ॥

दुतः । त्रि । पीडिते ॥ टुदु उपतापे । स्वादिः । कर्मणि क्तः ॥

दुद्रुमः । पुं । हरित्पलाशे पलाण्डौ । लतार्के ॥ दुष्टो द्रुमः ॥

दुधुक्षन् । त्रि । दोग्धुमिच्छति ॥ दुहेः सन्नन्ताल्लटःशत्रादेशः । घत्वधत्वे ॥

दुन्दमः । पुं । दुन्दुभौ ॥ इतिशब्दरत्नावली ॥

दुन्दुः । पुं । वसुदेवे ॥ दुन्दुभिवाद्ये ॥

दुन्दुभिः । पुं । वरुणे ॥ दैत्यभेदे ॥ हढक्कायाम् । भेर्याम् । आनके ॥ वर्त्तुलश्चर्मवद्धेकानने दुन्दुभिरुच्यते । इतिकेचित् ॥ दुन्दु इतिशब्देनोभति । उभपूरणे । इगुपधात्किदितीन् । शकन्ध्वादिः ॥ यद्वा । दुन्दु इति हलन्तस्यैवानुकरणम् ॥ यद्वा । दामु भतिशब्देन । उभ॰ । सर्वधातुभ्य इन् । पृ॰ ॥ रक्षोभेदे ॥ विषे ॥ षट्

पञ्चाशत्तमे वत्सरे ॥ सुभिक्षं जायते लोकः सर्व्वोपद्रववर्जितः । प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥ स्त्री । अक्षे । पाशके ॥ अक्ष-बिन्दुचिकद्वये ॥ अर्द्धबिन्दुत्रिकद्वन्द्वे ॥ बिन्दुन्वितचतुष्पार्श्वस्वर्णशृङ्गादिमयद्यूतोपकरणे पाशटी इतिगौड-भाषा प्रसिद्धे इतिकेचित् ॥

दुन्दुमारः । पुं । धुन्धुमारे ॥

दुम्बकः । पुं । मेदःपुच्छे एडके । दुम्बा इति ख्याते मेषविशेषे ॥

दुर् । अ । निषेधे ॥ दुष्टे ॥ निन्दायाम् । अवक्षेपणे ॥ दुःखे ॥

दुरक्षः । पुं । कपटपाशके ॥

दुरतिक्रमः । त्रि । दुरत्यये ॥ दुःखेन अतिक्रमोयस्य ॥

दुरत्ययः । त्रि । दुरतिक्रमे । दुर्गमनीये ॥ दुस्तरे ॥ दुःखेनअत्ययोयस्य ।

दुरदृष्टम् । न । दुर्भाग्ये ॥

दुरधिगमः । त्रि । दुर्ग्रहे । दुःखेनाधिगन्तुमशक्ये ॥ दुष्प्रापे ॥ दुर्ज्ञेये ॥ दुःखेनाधिगमोऽस्य ॥

दुरध्ययः । त्रि । दुष्प्रापे ॥ इणगताविन्यस्मात् कृच्छ्रार्थेखल् ॥ अध्येतुमशक्ये ॥ इङ् अध्ययने । अस्मात् खलि दुरध्ययइत्येवरूपम् ॥

दुरध्वः । पुं । कुपथे । निन्द्यवर्त्मनि ॥ दुष्टोऽध्वा । प्रादयोगताद्यर्थे इति समासः । उपसर्गादध्वनइत्यच् ॥

दुरन्तः । त्रि । मृगयादिव्यसनेषु । दुःखावसानेषु ॥ तेच आदौ सुखयन्ति अन्ते दुःखानि कुर्व्वन्ति । दुर्लभोऽन्तो यस्य वा । नहिव्यसनीततो निवर्त्तयितुंशक्यते ॥

दुरन्तभावः । त्रि । गभीराभिप्राये ॥

दुरभिग्रहः । पुं । अपामार्गे ॥ त्रि । दुःखग्राह्ये ॥

दुरभिग्रहा । स्त्री । कपिकच्छाम् ॥ दुरालभायाम् ॥

दुराकः । पुं । म्लेच्छभेदे ॥

दुराग्रहः । पुं । युक्तिरहितेऽभिनिवेशे ॥ त्रि । तद्वति ॥

दुराचारः । पुं । विरुद्धाचरणे ॥ त्रि । निन्दिताचारवति ॥ दुर्दुष्टः शास्त्रावि-षिद्धः आचारोयस्य ॥ दुराचाराद्दुर्विचेष्टाद्दुष्प्रज्ञाः प्रियसाहसाः । असन्तस्त्विति विख्याताः सन्तस्त्वाचारलक्षणाः इतिमहाभारतम् ॥

दुरात्मा त्रि । दुष्टचित्ते ॥

दुराधर्षः । पुं । गौरसर्षपे ॥ त्रि । अधर्षणीये ॥ दुष्प्रापे ॥ दैत्यादिभिर्धर्षयितुमशक्यायां परदेवतायाम् ॥ दुःखेन आईषदपि धर्षयितुमशक्यः । धृषप्रसहने । आङ्पूर्वादस्मादीष-

दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल्विति कर्मणि खल् ॥

दुराधर्षा । स्त्री । कुटुम्बिनीवृक्षे ॥

दुरानमः । त्रि । आनमयितुमशक्ये ॥ नमेर्ण्यन्तात् खल् ॥

दुरापः । त्रि । दुर्लभे ॥

दुरारुहः । पुं । विल्वे ॥ नारिकेले ॥

दुरारुहा । स्त्री । खर्ज्जूर्य्याम् ॥

दुरारोहः । पुं । शरटे ॥ त्रि । दुःखेना रोहणीये ॥

दुरारोहा । स्त्री । शाल्मलिद्रुमे ॥ श्रीवल्ल्याम् ॥ खर्ज्जूर्याम् ॥ दुष्टो दुःखेन वा आरोहो यस्याः ॥

दुरालभा । स्त्री । यवासप्रभेदे । दुस्पर्शायाम् ॥ यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ॥ त्रि । दुःखेन स्पर्शार्हे ॥ दुःखेन आलभ्यते । डुलभष० । ईषद्दुःसुष्विति खल् । आगमशासनस्यानित्यत्वान्नुम् ॥

दुरालम्भा । स्त्री । दुरालभायाम् ॥ दुःखेन आलभ्यते । डुलभष० । ईषद्दुःसुष्विति खल् । नुम् ॥

दुरालापः । त्रि । गालिप्रदे ॥ पुं । दुष्टभाषणे ॥

दुराशयः । त्रि । दुष्टाभिप्राये ॥

दुरासम् । त्रि । आसितुमशक्ये ॥ आरोरकर्मकात् ईषद्दुरित्यादिना खल् ।

तयोरेवकृत्यक्तखलर्था इति नियमात् ॥

दुरासदः । त्रि । दुष्प्रापे । दुःखेनासादनीये । दुष्टजने ॥ दुर्द्धर्षे ॥

दुरितम् । न । पापे ॥ यथा । नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति ॥ इणोभावे क्तः । दुष्टमितं गमनमनेन ॥

दुरितदमनी । स्त्री । पापनाशिन्याम् ॥ शम्याम् ॥ दुर्गायाम् ॥

दुरिष्टकृत् । पुं । अभिचारकर्त्तरि ॥ यथा । देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः । सयाति कृमिभक्षे वै कृमीशे च दुरिष्टकृदिति विष्णुपुराणम् ॥

दुरीशः । त्रि । दुष्टप्रभौ ॥

दुरीषणा । स्त्री । शापे ॥ इति शब्दार्थकल्पतरुः ॥

दुरुक्तम् । न । शापे ॥

दुरुच्छेदः । त्रि । दुर्वारे ॥

दुरुत्तरः । त्रि । दुस्तरे ॥

दुरुदाहरः । त्रि । दुर्वचे ॥ हरतेः खल् ॥

दुरुधरा । स्त्री । हित्वार्कं सुनफाऽनफादुरुधराख्यान्यो भयस्थैर्ग्रहैः शीतांशोरित्युक्तयोगविशेषे ॥ एतदेवस्पष्टीकृतं कल्याणवर्मणा । रविवर्ज्जं द्वादशगैरनफा चन्द्राद्द्वितीयगैः सुनफा । उभयस्थितैर्दुरुधराके

मद्रुमसंचितोतोन्य इति ॥

दुरुपसदः । त्रि । दुःसहे ॥

दुरूहः । त्रि । दुर्विज्ञेये ॥

दुरोणः । पुं । कलशे ॥ यज्ञगृहे ॥

दुरोदरः । पुं । द्यूतकारे ॥ पणे ॥ अक्षे ॥ न । द्यूतभेदे । पाशकक्रीडायाम् ॥ दुष्ट मासमन्तात् उदरमस्य ॥ दुष्ट मुदरमस्य वा । पृ० ॥

दुर्गः । पुं । असुरभेदे ॥ यंहत्वाचण्डिकायास्तु दुर्गानामवभूवह ॥ गुग्गुलौ ॥ न । गिर्यादिभि र्दुर्गमे पुरे । कोट्टे । गढइति कोटइतिच भाषाप्रसिद्धे राज्ञां वासस्थाने ॥ तत्षड्विधं यथा । धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेववा । नृदुर्गं गिरिदुर्गञ्च समाश्रित्य वसेत् पुरम् । इत्युक्तेः ॥ एषां हिवाहुगुण्येन गिरिदुर्गं विशिष्यते ॥ तत्र । त्रीण्याद्यान्याश्रिता स्त्वेषां मृगगर्त्ताश्रयाप्चराः । त्रीण्युत्तराणिक्रमशः प्लवङ्गमनरामराः ॥ यथा दुर्गाश्रयानेतान् नोपहिंसन्ति शत्रवः । तथारयो न हिंसन्ति नृपंदुर्गसमाश्रितम् ॥ एकः शतंयोधयतिप्राकारस्थोधनुर्द्धरः । शतंदशसहस्राणितस्माद्दुर्गं विधीयते ॥ तत् स्यादायुधसम्पन्नं धनधान्येन वाहनैः । ब्राह्मणैः शिल्पिभि र्यन्त्रै र्यवसेनोदकेन च ॥ तस्यमध्ये सुपर्याप्तं कारयेद्गृहमात्मनः । गुप्तंसर्वर्त्तुकं शुभ्रं जलवृक्षसमन्वितमितिमनुः ॥ अपिच । दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम् । शतघ्नीयन्त्रमुख्यैश्चशतशश्चसमावृतम् ॥ गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम् । सपताकं गजारूढो येन राजाविशेत् पुरमितिमात्स्ये ॥ १९१ अध्यायः ॥ अस्यावश्यकत्वं शुभाशुभञ्चोक्तं कालिकापुराणे ८५ अध्याये राजनीतिविशेषे ॥ त्रि । दुर्गमे । दुर्गमप्रदेशे । उच्छ्रिते । दुःसम्पाद्ये । कोटादौ । प्राकारे ॥ दुस्तरे ॥ कामक्रोधादिसंसार दुःखसाधने ॥ दुःखेनगच्छत्यत्रेतिविग्रहे सुदुरोरधिकरणइति दुरुपपदात्गमेर्डः प्रत्ययः ॥ दुःखाद्गम्यते वा ॥ दुःखेनगम्यतेप्राप्यते । अन्यत्रापिदृश्यतइतिडः ॥

दुर्गकारकः । त्रि । दुर्गकर्त्तरि ॥ न । वृक्षविशेषे ॥

दुर्गतः । त्रि । दरिद्रे ॥ दुर्गच्छतिस्म । गम्लृ० । गत्यर्थेतिक्तः ॥

दुर्गतिः । स्त्री । नरके ॥ नैःस्वे । दारिद्र्ये ॥ दुष्टागतिः ॥

दुर्गतिनाशिनी । स्त्री । दुर्गादेव्याम् ॥

दुर्गन्धः । पुं । पूतिगन्धे । दुष्टगन्धे ॥ प

लाण्डौ ॥ न । सौवर्चल लवणे ॥ दुष्टो गन्धः ॥

दुर्गन्धी । त्रि । दुर्गन्धयुक्ते ॥

दुर्गपुष्पी । स्त्री । गौडभाषायां कांश मुष्टा इति ख्याते वृक्षविशेषे । मानस्याम् । केशधारिण्याम् ॥

दुर्गमः । त्रि । दुर्गे ॥ दुःखेन गम्यते प्राप्यते । गम्लृ० । ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥ दुर्गमनीयस्थानादौ ॥ यथा । दुर्गमः पन्थाः ॥ पुं । हिरण्याक्षान्वये जाते रुरोः पुत्रे महादैत्ये ॥

दुर्गलङ्घनः । पुं । उष्ट्रे ॥ दुर्गं दुःसम्पाद्यं लङ्घनं यस्य ॥ त्रि । दुःखेन लङ्घनीये ॥

दुर्गसञ्चरः । पुं । सङ्क्रमे । दुर्गदेश प्रवेशक्रियायाम् ॥ सञ्चरणम् । चर० । पुंसीतिघः । दुर्गस्य सञ्चरः ॥

दुर्गा । स्त्री । ओषधिविशेषे । नील्याम् ॥ अपराजितायाम् ॥ दृषमापायाम् ॥ श्यामायाम् । पोतकीखगे ॥ अमरेशमहापीठदेवतायाम् ॥ उमायाम् । कात्यायन्याम् । गौर्याम् । काल्याम् । हैमवत्याम् । शिवायाम् ॥ दुःखेन गम्यते ज्ञायते ऽस्याम् । सुदुरोरधिकरणे इति डे टाप् ॥ दुःखेनगीयते स्तूयते । गै शब्दे । आतश्चोपसर्गे इत्यङ् । टाप् वा ॥ यद्वा । दुर्गं गिरिं वनं वा वासत्वेनास्या अस्तीत्यर्श आद्यच् । टाप् ॥ दुर्गनामासुरवधाद्वा । यथा । तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् । दुर्गादेवीति विख्यातं तन्मे नाम भविष्यतीति ॥ अपिचास्या नामनिरुक्तिः । दुर्गो दैत्ये महाविघ्ने भवबन्धे कुकर्मणि । शोके दुःखे च नरके यमदण्डे च जन्मनि ॥ महाभये ऽतिरोगे चाप्याशब्दो हन्तृवाचकः । एतान् हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता ॥ * ॥ अपिच । दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः । उकारो विघ्ननाशस्य वाचको वेदसम्मतः ॥ रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः । भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः ॥ स्मृत्युक्तिश्रवणाद्यस्या एते नश्यन्ति निश्चितम् । ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता ॥ दुर्गेति दैत्यवचनो प्याकारो नाशवाचकः । दुर्गं नाशयति या नित्यं सा दुर्गा प्रकीर्त्तिता ॥ विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः । तं ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्त्तिता ॥ * ॥ अस्याः स्थानं कृष्णावेणीतुङ्गभद्रयोर्मध्यभागे सह्याद्रेरीषत्प्राच्यां प्रसिद्ध

म् । अयमवतारोऽस्मिन् कल्पेऽद्यापि न जातः । श्वेतवाराहकल्पात् प्राक्तनकल्पेषु मन्वन्तरयुगभेदेन जातएव । ततस्तत्तत्कुलदेवतात्वेनार्च्चनमधुनातनानामपि सङ्गच्छते इति गुप्तवत्यां भास्करराव: ॥ * ॥ सर्व्वस्वरूपिणी शक्तिः सा दुर्गेति च पठ्यते । यथा मुण्डमालायाम् । भूतानि दुर्गा भुवनानि दुर्गा नराः स्त्रियश्चापि सुरासुरादिकम् । यद्यद्धि दृश्यं खलु सैव दुर्गा दुर्गास्वरूपादपरं न किञ्चिदिति ॥

दुर्गाध्यक्षः । पुं । दुर्गस्य रक्षके ॥ तल्लक्षणं यथा । अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः । दुर्गाध्यक्षः स्मृतो राजन् सन्नयुक्तः सर्व्वकर्म्मसु ॥ इति मत्स्यपुराणम् ॥

दुर्गानवमी । स्त्री । आश्विनशुक्लनवम्याम् । महानवम्याम् ॥ कार्त्तिकशुक्लनवम्याम् ॥ सा चेतायुगाद्या । तत्र जगद्धात्रीपूजाकर्त्तव्येति वङ्गाः ॥ कार्त्तिकेऽमलपक्षे तु नवम्यां च विशेषतः । प्रगल्भाञ्च जगद्धात्रीं पूजयेद्दीपमालयेति योगिनीतन्त्रम् ॥

दुर्गास्मरणम् । न । दुर्गाजगदिदं सर्व्वं दुर्गा सर्व्वस्य कारणम् । अहञ्च दुर्गेत्येवं यत् तद्दुर्गास्मरणं विदुः ॥

दुर्गाह्वः । पुं । भूमिजगुग्गुलौ ॥

दुर्ग्रहः । त्रि । दुरासदे ॥ दुर्द्धर्षे ॥ दुःखेन ग्रहोऽस्य ॥

दुर्ग्रहा । स्त्री । अपामार्गे ॥

दुर्घटः । त्रि । दुःसम्पाद्ये ॥

दुर्घोषः । पुं । भल्लूके ॥ निन्दितरवे ॥ त्रि । तद्वति ॥

दुर्ज्जनः । त्रि । खले ॥ दुष्टो जनः । कुगतीति समासः ॥ दुर्जनः परिहर्त्तव्यो विद्यया भूषितोऽपि सः । मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

दुर्ज्जयः । पुं । असुरविशेषे ॥ कार्त्तवीर्य्येन्वयवंशोद्भवानन्तपुत्रे ॥ त्रि । दुर्जेये ॥ दुःखेन जीयते । जि जये । खल् ॥

दुर्ज्जरः । त्रि । दुःखेन जीर्य्यति ॥ जृष्° । अच् ॥

दुर्ज्जरा । स्त्री । ज्योतिष्मतीलतायाम् ॥

दुर्ज्जातम् । न । व्यसने ॥ यथा । दुर्जातबन्धुः आपद्बन्धुरिति तदर्थः ॥ त्रि । असम्यग्जाते ॥ असमञ्जसे ॥

दुर्द्दर्शः । पुं । कादम्बेयविशेषे ॥ दुःखेन दर्शनमस्य । दुःखेन दृश्यते इति वा ॥ त्रि । दुर्विज्ञेये ॥ द्रष्टुमशक्ये ॥ दुःखेन द्रष्टुं योग्ये ॥

दुर्द्दान्तः । पुं । कलहे ॥ वत्सतरे ॥ त्रि । अशान्ते ॥ दुःखेन दान्तः ॥

दुर्द्दिनम् । न । मेघच्छन्नेऽह्नि ॥ दिवानिशि च वर्षणे ॥ मेघान्धकारे ॥ मे

घान्धकारितेऽक्षीतिराचेरप्युपलक्षणम्। तेनराचावपितया दुर्द्दिनं कविनेरितम् ॥ * ॥ घनान्धकारे वृष्टौ च दुर्द्दिनं कथयेद्विदुरिति साम्बः ॥ दुर्द्दिनं जलदध्वान्ते इतिरत्नकोषः ॥ द्यतितमः इतिदिनम्। दो अवखण्डने। द्यतेरिति इनच्। दुष्टंदिनं दुर्द्दिनम्। दुष्टत्वञ्चतमोनाशकस्य रूपहीनत्वात्। लक्षणयातु कालातिरिक्तेपिदुर्द्दिनपदप्रयोगः ॥ यदच्युतकथालापरसपीयूषवर्जितम्। तद्दिनं दुर्द्दिनं मन्ये मेघाच्छन्नं नदुर्द्दिनम् ॥

दुर्द्दुरूढः। पुं। नास्तिके॥ दुरुतत्त्वेपे। दुःपूर्व्वः। औणादिकः कूटप्रत्ययः। बहुलमन्यत्रापीतिणिलुक्। रलयोरेकत्वस्मरणात् ॥ पल्लाण्डौ॥

दुर्द्रिता। स्त्री। लताविशेषे ॥

दुर्द्दुरः। पुं। नरकान्तरे ॥ ऋषभौषधौ ॥ पारदे ॥ भल्लातके ॥ महिषासुरस्यसेनापतिविशेषे ॥ श्रीधरी ॥ पृथिव्यादीनि धारकाणि अन्यैर्द्धारयितुमशक्यानि धारयन्स्वयन्नकेनचिद्धारयितुंशक्यते इति दुःखेनमुमुक्षुभिर्हृदयेधार्यते वेतिनिरुक्तेः ॥ त्रि। दुर्द्धर्षे॥ दुःखधार्ये॥ दुःखेनभ्रियते दुःखपपदाद्धरतेः खल् ॥

दुर्द्धर्षः। त्रि। अप्रधृष्ये। तिरस्कर्त्तुमशक्ये॥ अप्रक्षोभ्ये ॥

दुर्द्धर्षा। स्त्री। कन्थारीवृक्षे ॥ नागदमन्याम् ॥ त्रि। दुःखधर्षणीये ॥

दुर्द्रुमः। पुं। हरित्पलाण्डौ। रत्नार्कः। हरिद्वर्णपलाशे पलाण्डौ ॥ दुष्टाद्रुमः ॥

दुर्धावः। त्रि। दुर्बोधे ॥

दुर्नामकम्। न। अर्शसि। गुदरोगे ॥ दुष्टंनामास्य पापरोगत्वात्। चुम्बादित्वात्कप्रत्ययः ॥ दुर्नामकत्वम् ॥

दुर्नाम। न। अर्शोरोगे ॥ दुष्टंनामास्य पापरोगत्वात् ॥ दुर्नामत्वम् ॥

दुर्नामा। स्त्री। दीर्घकोशिकायाम् ॥ दुर्निन्दितं नामास्याः। डाबुभाभ्यामिति डाप् ॥

दुर्नामारिः। पुं। शूरणे ॥

दुर्नाम्नी। स्त्री। दुर्नामायाम् ॥ अनउपधेति पाक्षिकोङीप् ॥ दु० नया ॥

दुर्निक्षितः। त्रि। सम्भ्रमादुत्क्षिप्ते ॥

दुर्नष्पयतरम्। त्रि। दुःखतरमिसरणे ॥

दुर्ब्बलः। पुं। कनाङ्गुमेढ्रमयो ॥ त्रि। बलशून्ये। अमांसे ॥ दुष्टंबलमस्य ॥

दुर्ब्बला। स्त्री। अम्बुशिरीषिकायाम् ॥

दुर्बोधः। त्रि। दुर्ज्ञेये॥ बोद्धुमशक्ये॥

दुःखेनबुध्यते । बुध० । ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल् ॥

दुर्भगः । त्रि । अनिष्टे ॥

दुर्भगा । स्त्री । निरक्तायाम् ॥ पतिस्नेहरहितायाम् ॥ दुष्टोभगो भाग्यं यस्याः ॥

दुर्भाग्यम् । न । दुरदृष्टे ॥

दुर्भिक्षम् । न । भिक्षाया अप्राप्तिकाले । अकाल इति काल इतिच भाषा प्रसिद्धे समयविशेषे ॥ यद्देशे यत्काले तद्देशतत्कालयोग्यसस्यादिकं न जायते तज्जातद्देशे याच्यमानद्रव्याभावात् दुर्भिक्षं जातमितिव्यवह्रियते ॥ अत्र चाणक्येन मुनिना नवकृत्त्य उक्ताः । तथाहि । शकटः शाकिनी गावो जालमस्यन्दनं वनम् । अनूपं पर्वतोराजा दुर्भिक्षे नवऋत्तय इति ॥ अस्यार्थः शाकिनीशब्देद्रष्टव्यः ॥ भिक्षाया अभाव इत्यर्थे ऽव्ययीभावः ॥ द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । दातान्नस्य तु दुर्भिक्षे सुभिक्षे वस्त्रहेमदः ॥ दुर्भिक्षमत्यंस्मरणं चिराय ॥

दुर्म्मतिः । त्रि । विवेकप्रतिबन्धकपापेन मलिनमतौ ॥ दुष्टामतिर्यस्य ॥ वत्सरविशेषे । यथा । दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते । अब्दे द्वे मध्यमाहृष्टिर्दुर्मतौ समुपस्थिते ॥ ५५ ॥

दुर्म्मदः । त्रि । अतिमत्ते ॥

दुर्म्मनाउ । त्रि । अन्तर्मनसि । विमनसि । चिन्तादिव्याकुलचित्ते ॥ क्रियास्वस्थिरे ॥ दुःस्थितं मनोऽस्य ॥ स्त्री । शतावर्याम् ॥

दुर्म्मरः । पुं । दुर्मृतौ ॥ मरणंमरः । दुष्टोमरः ॥

दुर्म्मरा । स्त्री । श्वेतदूर्वायाम् ॥ कृष्णदूर्वायाम् ॥

दुर्म्मर्षणः । त्रि । मर्षितुमशक्ये ॥ दुःखेनमृष्यते । मृष० । भाषायांशासियुधीतियुच् ॥

दुर्म्मिलका । स्त्री । मात्रावृत्तप्रभेदे ॥ यथा । द्वात्रिंशन्मात्रं फणिपतिजल्पितसकलविभूषणवृत्तवरम् दशवसुभुवनैर्यति रत्नप्रभवतिकविकुलहृदयानन्दकरम् । यदष्टचतुष्कलगणनिर्मितपदमितिदुर्मिलकानामवरम् नरपतिवरतोषणवन्दिविभूषणभुवनविदितसन्तापहरम् ॥ यथा । यमुनाजलकेलिविलोलविलोचनगोपीजनहृतवसनवरम् तटजातविशालतमालतरुणतरुदुर्गमशाखारोहपरम् । निजभुजमदमत्तभोजपतिमानससम्भृतदम्भविनाशकरम् कारक-

मत्तमयूरमनुषितकमलं नमलीला मानुषवेषधरम् ॥

दुर्म्मिला । स्त्री । दुर्मिलकावृत्ते ॥

दुर्म्मुखः । पुं । कपिविशेषे ॥ नागः, दे ॥ वाजिनि ॥ गणेशमूर्त्त्यन्तरे ॥ महिषासुरस्यसेनापतिविशेषे ॥ उत्तरद्वारेनवसगृहे ॥ वत्सरविशेषे ॥ नृपधान्ययोर्द्देविसर्व्वसस्यमहार्घता । व्यवहाराश्चनश्यन्तिदुर्मुखेदुर्मुखाःप्रजाः ॥ त्रि । मुखरे । अवद्दमुखे । अप्रियवादिनि ॥ दुर्न्निन्दितंमुखमस्य ॥

दुर्म्मेधाः । त्रि । मन्दमतौ । विवेकासमर्थे ॥ दुष्टामेधावस्यसः । नित्यमसिच प्रजामेधयोः ॥

दुर्म्मोहः । पुं । काकतुण्ड्याम् ॥

दुर्म्मोहा । स्त्री । कौराडोडी इतिभाषा प्रसिद्धे वृत्ते । काकादन्याम् ॥

दुर्य्योधनः । पुं । धृतराष्ट्रतनये । कौरव्यभूपतौ । सुयोधने ॥ दुःखेनयुध्यते । युध० । भाषायांशासियुधीतियुच् ॥

दुर्ल्लतिका । स्त्री । छन्दोभेदे ॥ यथा । वसुभिश्च रसै रथदिग्भि रुदीरितसद्यतिका विहिताहि यदा सगणाष्टकभूषितसच्चरणा जितदुर्नयदुर्ल्लतिकेतितदा । फणभृत्कुलमङ्गलनामकनागवरप्रथिता सुकृतांसुखदा यशान्तधराधिपगौडकुलोज्ज्वलता मवधेहिहृदेहरदा ॥

दुर्ल्लभः । पुं । कच्छुरे ॥ द्राविडके । कर्चूरे ॥ त्रि । दुष्प्रापे ॥ यथा । दुर्लभं त्रयमेवैतत् देवानुग्रहहेतुकम् । मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रय इति विवेकचूडामणिः ॥ अतिप्रशस्ते ॥ प्रिये ॥ दुर्लभं प्राकृतं वाक्यं दुर्लभःक्षेमकृत्सुतः । दुर्लभासदृशीभार्या दुर्लभःस्वजनःप्रियः ॥ दुःखेनलभ्यते । लभ० । ईषद्दुस्सुष्विति खल् ॥

दुर्ल्लभा । स्त्री । भक्तौ ॥ जन्मान्तरसहस्रेषु तपोध्यानसमाधिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ इति व्यासवचनम् ॥ दुरालभायाम् ॥ श्वेतकण्टकार्य्याम् ॥

दुर्व्वचः । त्रि । वक्तुमशक्ये । दुःखकथ्ये ॥

दुर्व्वचः । न । मन्दवाक्ये ॥ असह्यं दुर्वचो ध्यातेर्मेघान्तरितरौद्रवत् ॥

दुर्व्वर्णम् । न । रजते । रूप्ये ॥ सुवर्णापेक्षया दुष्टोवर्णोस्य ॥ एलवालुके । ऐलेये ॥ त्रि । असद्वर्णे ॥

दुर्व्वर्णकम् । न । रजते ॥ इतिहेमचन्द्रः ॥

दुर्व्वाक् । स्त्री । दुष्टायांवाचि ॥ त्रि । कद्वदे ॥ दुष्टावागस्य ॥

दुर्वाच्यम् । त्रि । अवक्तव्ये ॥

दुर्वादः । पुं । दुरुक्तौ । निन्दितवाक्ये ॥ दुष्टोवादः ॥ स्तुतिपूर्वकदुर्वाक्ये ॥

दुर्वासाः । पुं । अत्रितनये शङ्करांशाज्जाते मुनिविशेषे । कुमारणौ ॥ त्रि । कुत्सितवस्त्रयुक्ते ॥

दुर्विज्ञेयः । त्रि । दुर्दर्शे ॥ दुःखेनविज्ञेये ॥

दुर्विधः । त्रि । दरिद्रे ॥ दुष्टा विधाप्रकारः समृद्धिर्वास्य ॥ खले ॥ मूर्खे । वाणिजे ॥

दुर्विनीतः । पुं । शूकले । अशिक्षिताश्वे ॥ त्रि । अविनीते ॥

दुर्विभाव्यः । त्रि । अवितर्क्ये ॥

दुर्वृत्तः । त्रि । दुर्जने । दुष्टे । ऐन्द्रजालिककितवादौ ॥ दुष्टंवृत्तमस्य ॥

दुर्वृत्तिः । त्रि । दुष्टेकर्मणिवर्त्तमाने ॥ दुष्टेकर्मणिवृत्तिः दुष्टावावृत्तिर्यस्य ॥

दुर्हृत्-द् । त्रि । वैरिणि । शत्रौ ॥ दुष्टंहृदयमस्य । सुहृद्दुर्हृदौमित्रामित्रयोरितिनिपातनात् हृदयस्यहृद्भावः ॥

दुर्हृदयः । त्रि । दुष्टान्तःकरणे ॥

दुलिः । पुं । मुनिविशेषे ॥ स्त्री । कच्छप्याम् ॥ दोलति । दुलउत्क्षेपे । इगुपधात्किदितिइन् ॥

दुली । स्त्री । कमठ्याम् ॥ कृदिकारादक्तिनइतिङीष् ॥

दुश्चरः । पुं । भल्लूके ॥ शम्बूके ॥ त्रि । दुश्चरे ॥

दुश्चरितम् । न । श्रुतिस्मृत्यविहिते पापकर्मणि ॥ दुष्टंचरितम् ॥

दुश्चर्मा । पुं । अच्छन्नमेढ्रमणौ । चिनमके ॥ कोठरोगे ॥ दुष्टंचर्मास्य ॥

दुश्चिक्यम् । न । लग्नात् तृतीयभवने । सहजे ॥

दुश्च्यवनः । पुं । इन्द्रे ॥ दुःखेन दुष्टं दुष्टेषु वा च्यवनंपतनमस्य ॥ च्यवनमनिर्नैकदाजितत्वात् दुःसहः च्यवनो येति वा ॥

दुष्करम् । न । दुःखेनकरणे ॥ आकाशे ॥ त्रि । दुःखेनक्रियमाणे ॥ कर्त्तुमशक्ये ॥ अपियत् सुकरंकर्म्म तदप्येकेनदुष्करम् ॥ दुःक्रियते । ईषद्दुःसुष्विति खल् ॥

दुष्कर्म्म । न । पापे ॥

दुष्कुलम् । न । दुष्टकुले ॥ त्रि । दुष्टकुलजे ॥

दुष्कुलीनः । पुं । चोराख्यगन्धद्रव्ये ॥ त्रि । दौष्कुलेये ॥ दुष्कुलस्याऽपत्यम् । दुष्कुलाड्ढगितिपक्षे खः ॥

दुष्कृतम् । न । पापे ॥ तत् तत्कर्त्तुं मरणानन्तरं तेनसहगच्छतीत्युक्तं वह्निपुराणे । गृहाद्यर्था निवर्त्तन्ते

श्मशानादपिवान्धवाः। सुकृतं दुष्कृतं लोके गच्छन्त मनु गच्छति ॥ तस्माद् वित्तं समासाद्य दैवाद् वा पौरुषा दथ। दद्यात् सम्यग् द्विजातिभ्यः कीर्त्तनानिच कारयेदिति॥ दुष्टंकृतं करणमनेन। इदुदुपधस्यचाप्रत्ययस्येतिषः॥ त्रि। तद्वति॥

दुष्कृतात्मा। त्रि। पापहृदये। पापवुद्धौ॥

दुष्कृती। त्रि। पापकारिणि। पापेन सहनित्ययोगिनि। वेदमार्गविरोधिनि॥ दुष्कृतमस्यास्त्यस्मिन्वा। इनिः॥

दुष्क्रीतः। त्रि। महार्घे॥ यथा। क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतमितिनारदः॥

दुष्खम्। न। दुःखे॥

दुष्खदिरः। पुं। खदिरभेदे। महासारे। गोरटे। क्षुद्रखदिरे॥

दुष्टम्। न। कुष्ठौषधौ॥ त्रि। अधमे॥ दुर्वले॥ वञ्चके॥ दोषयुक्ते॥ यथा। दुष्टः शब्दः स्वरतोवर्णतोवेतिभाष्यम्॥

दुष्टकालः। पुं। केत्वाद्युत्पातदर्शने॥ गुरुशुक्रास्तादौ॥

दुष्टचारिणी। स्त्री। स्वैरिण्याम्॥

दुष्टयोगः। पुं। व्यतीपातादौ॥

दुष्टवृषः। पुं। गलौ॥ शक्तोप्यधुर्वहो योऽक्षिवृषोगलिरुदाहृतः॥

दुष्टा। स्त्री। दुःशीलायाम्। पुंश्चल्याम्॥ दुष्टाभार्या शठंमित्रं भृत्याश्चोत्तरदायकाः। ससर्पेचगृहेवासो मृत्युरेवनसंशयः॥ दुर्वचनायाम्॥

दुष्टाश्वः। पुं। अदान्ताश्वे॥

दुष्ठु। अ। निकृष्टे। निन्दायाम्॥ दुःस्थानम्। छा०। अपदुःसुषुस्थइति कुः। सु० षत्वम्॥

दुष्ठुः। त्रि। अविनीते॥

दुष्पत्रः। पुं। चोराभिधगन्धद्रव्ये॥ चण्डाद्रुमे॥ दुष्टानिपत्राण्यस्य॥

दुष्पूरः। त्रि। पूरयितुमशक्ये॥

दुष्प्रधर्षणी। स्त्री। वार्त्ताक्याम्। वनभण्टा इतिभाषा॥ दुःखेनप्रधृष्यते। ञिधृषाप्रागल्भ्ये। कर्मणिल्युट्॥

दुष्प्रधर्षा। स्त्री। दुरालभायाम्॥ खर्ज्जूर्याम्॥

दुष्प्रधर्षिणी। स्त्री। वार्त्ताकौ॥ कण्टकार्याम्॥ वृहत्याम्॥ पुनःपुनर्दुःखेनप्रधृष्यते। ञिधृषा०। आभीक्ष्ण्येणिनिः॥

दुष्प्रवृत्तिः। स्त्री। दुर्वार्त्तायाम्॥

दुष्प्रवेशा। स्त्री। कन्थारीवृक्षे॥

दुष्यन्तः। पुं। चन्द्रवंशीयनृपतिविशेषे। शकुन्तलापतौ। भरतपितरि॥

दुः । अ । दुःखे ॥ कोपे ॥ दुःखभावने ॥ दोषे ॥

दुस्तरः । त्रि । दुःखेनतर्त्तुंशक्ये । तरितुमशक्ये ॥ ईषद्दुः सुष्वितिखल् ॥

दुस्तर्कः । पुं । शुष्कतर्के ॥ दुस्तर्कात् सुविरम्यताम् ॥

दुस्थः । त्रि । दुर्गते ॥ मूर्खे ॥ दुःखेन तिष्ठति ॥ धा० । सुपिस्थइतिकः ॥

दुस्पर्शः । त्रि । दुःस्पर्शे ॥

दुस्पर्शा । स्त्री । दुःस्पर्शायाम् ॥

दुहितुः पतिः । पुं । जामातरि ॥ विभाषा स्वसृपत्योरितिवा ऽलुक् ॥

दुहिता । स्त्री । सुतायाम् । कन्यायाम् ॥ दोग्धि । दुहप्रपूरणे । नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृचेति दुहेस्तृच् इट् गुणाभावश्च निपातितः ॥ दुहतिवा । दुह भस्मीकरणे । तथा साधुः । स्वस्रादित्वान्न ङीप् ॥

दूतः । पुं । सन्देशहरे । वार्त्ताहरे ॥ दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥ अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् । वपुष्मान् वीतभी र्वाग्मी दूतो राज्ञः प्रशस्यते ॥ अमात्ये दण्डआयत्तो दण्डे वैनयिकी क्रिया । नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्ययौ ॥ दूत एव हि सन्धत्ते भिनत्त्येवच संहतान् । दूतस्तत् कुरुते कर्मभिद्यन्ते येनवा नवा ॥ सविद्यात् दस्यकृत्येषु निगूढेङ्गितचेष्टितैः । आकारमिङ्गितं चेष्टां भृत्येषुचचिकीर्षितम् ॥ बुद्ध्वाच सर्वं तत्त्वेन परराजचिकीर्षितम् । तथा प्रयत्नमातिष्ठेद् यथात्मानं नपीडयेदिति मनुः ॥ अस्यलक्षणं यथा । यथोक्तवादीदूतः स्याद्देशभाषाविशारदः । सक्तःक्लेशसहो वाग्मी देशकालविभागवित् । विज्ञातदेशकालश्च दूतः स्यात् समहीचितः ॥ वक्ता नयस्य यः काले स दूतो नृपते र्भवेदितिमत्स्य पु० ॥ मेधावी वाक्पटुः प्राज्ञः परचित्तो पलक्षकः । धीरो यथोक्तवादीच एषदूतोभिधीयते इतिचाणक्यम् ॥ अस्यावध्यत्वं यथा । वैरूप्यमङ्गेषु कशानिपातो मौण्ड्यं तथालक्ष्मणसन्निवेशः । एतान्नवधानर्हतिक्ष्चवादी शास्त्रेषुदूतस्यवधोनदृष्टइति ॥ दवति । दुगतौ । दुतनि स्यादीर्घश्चेतिक्तः ॥ यद्वा । दूयतेऽस्म । दूङ्परितापे । गत्यर्थेतिक्तः ॥ दुनोतिवा । टुदुउपतापे । पूर्ववत् ॥

दूतघ्नी । स्त्री । कदम्बपुष्प्याम् ॥

दूतागारम्। न। पत्नगृहे। डाक इति पोष्ट इतिचेतरभाषा॥

दूतिः। स्त्री। दूतिकायाम्॥ दूयते। दूङ्॰। क्तिच्॥

दूतिका। स्त्री। सञ्चारिकायाम्॥

दूती। स्त्री। स्त्रीपुंसोःसन्देशप्रापिकायाम्। सञ्चारिकायाम्॥ गै॰ङीष्॥

दूतीका। स्त्री। सञ्चारिकायाम्॥

दूत्यम्। न। दूतस्वभावे॥ दूतभावे॥ दूतकर्मणि॥ दूतस्यभावःकर्मवा। दूतवणिग्भ्याञ्चेतियः॥

दूनः। त्रि। अध्वादिनाश्रान्ते॥ दूयते स्म। दुगतैा क्तः। दुग्वोर्दीर्घश्चेति नत्वम्॥ अकर्मकत्वात् कर्त्तरि-वाक्तः॥ सन्तप्ते॥ पित्तेनदूने रसने सितापि तिक्तायते हंसकुलावतंसेतिनैषधम्॥

दूरः। त्रि। विप्रकृष्टे॥ महदन्तरेणावर्त्तमाने॥ अगोचरे॥ दुःखेनेयते प्राप्यते। दुरीणोलोपश्चेतिसाधुः॥

दूरदर्शनः। पुं। गृध्रे॥

दूरदर्शी। पुं। पण्डिते दूरं दूराद्वा पश्यति। दृशिर्॰। गृ॰ णिनिः। सुपीतिवा॥ गृध्रे॥ त्रि। दीर्घदर्शके॥

दूरदृक्। पुं। पण्डिते॥ गृध्रे॥ त्रि। दीर्घदर्शके॥ दूरावलोकनार्थयन्त्रविशेषे। दूरवीक्षणे। दूरवीनइति-भाषा॥ दूरे दृक् दर्शनंयेन॥

दूरमूलः। पुं। मुञ्जतृणे॥

दूरवर्त्ती। त्रि। महदन्तरेण वर्त्तनशीले॥ यथा। किन्नया दूरवर्त्तिन्या श्रिया राक्षसपुङ्गव। अरयोयां नपश्यन्तिबन्धुभिर्या न भुज्यतइतिरामायणे विभीषणंप्रतिरामवाक्यम्॥

दूरवीक्षणम्। न। दूरवीन इतिप्रसिद्धे दूरदृशि यन्त्रे॥

दूरवेधी। पुं। दूरापातिनि। दूरनिक्षेप्यास्त्रे॥

दूरभिन्नः। त्रि। अत्यन्तविलक्षणे॥

दूरस्थः। त्रि। विप्रकृष्टस्थिते॥ योजनलक्षकोद्यन्तरिते॥ दूरेतिष्ठति। ष्ठा॰। सुपिस्थ इति कः॥

दूरापाती। पुं। दूरवेधिनि॥

दूरेत्यः। त्रि। दूरेआगतादैा॥ पथिके॥ दूरादेत्यः॥

दूरेरितेक्षणः। त्रि। केकरे॥

दूर्श्यम्। न। अश्याम्॥ विष्ठायाम्॥

दूर्वा। स्त्री। शतपर्विकायाम्। नीलदूर्वायाम्। तिक्तपर्वायाम्॥ श्वेतदूर्वायाम्। गोलोम्याम्॥ नीलश्वेतविभेदेनदूर्वेद्वेसमुदाहृते॥ रक्तपित्तकफद्भूत्वग्दोषनाशिनीयमिति राजवल्लभः॥ दूर्वति दूर्व्यतेवा। दुर्वी हिंसायाम्। अच् घञ्वा। उपधाया

नेतिदीर्घः ॥

दूर्वाकाण्डम् । न । दूर्वाणां समूहे ॥ दूर्वादिभ्यः काण्डः ॥

दूर्वाष्टमी । स्त्री । भाद्रशुक्लाष्टम्याम् ॥

दूलिका । स्त्री । } दूली । स्त्री । } नील्याम् ॥

दूषकः । त्रि । पांसने । दोषोत्पादके ॥ पुं । शालेर्जात्यन्तरे ॥ दूषयति । दुष० । णयन्तः । ण्वुल् । दोषो णावित्यूत्वम् ॥

दूषणः । पुं । राक्षसविशेषे । रावणभ्रातृखरसेनापतौ ॥ न । दोषे ॥ दूषयति । दुषवैकृत्ये । नं० ल्युः ॥

दूषणारिः । पुं । श्रीरामे ॥

दूषिः । स्त्री । दूषिकायाम् ॥ दूषयति । दुष० । णयन्तः । दोषो णावित्यूत्वम् । अचइः ॥

दूषिका । स्त्री । तूलिकायाम् ॥ लोचनमले । पिच्चोडके । गीड इति भाषा ॥ दूषयति । दुष० । णयन्तः । ऊत्वम् । ण्वुल् ॥ यद्वा । दूषयते रचइ रिति इप्रत्ययः । ऊत्वम् । स्वार्थे कन् ॥

दूषितः । त्रि । अभिशस्ते । चारिते । वाच्ये । प्राप्तदोषे ॥

दूषिता । स्त्री । दोषप्राप्तायां कन्यायाम् । सस्वेदायाम् ॥

दूषी । स्त्री । नेत्रमले ॥ कृदिकारादक्तिन इति ङीष् ॥

दूषीका । स्त्री । दूषिकायाम् ॥ दूषयति । दुष० । णयन्तः । ऊत्वम् । कषिदूषिभ्यामीकन् ॥ स्वार्थे कन्वा ॥

दूषीविषम् । न । औषधादिभिरवीर्यीकृते विषे । आदिना दावाग्निवायुरौद्रशोषिते विषे ॥ जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा । स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैतीति माधवः ॥

दूष्यम् । न । वस्त्रे ॥ वस्त्रगृहे ॥ पूये ॥ त्रि । दूषणीये ॥ यथा । दूष्यं वचो मम पुनर्निपुणं विभाव्य भावावबोधविहितो न दुनोति दोष इति ॥ दूष्यते । दुष० । णयन्ताद्यचो यत् । दोषो णावित्यूत्वम् । दूषयितुमर्हो वा । अर्हे कृत्यतृचश्च ॥

दूष्या । स्त्री । कक्षायाम् । वरत्रायाम् । गजमध्यबन्धनरज्ज्वाम् ॥ दूष्यतेऽनया । दुष । यत् । टाप् ॥

दृकम् । न । छिद्रे ॥ इति संक्षिप्तसारोणादिवृत्तिः ॥

दृकाणः । पुं । द्रेक्काणे ॥

दृक्कर्णः । पुं । सर्पे ॥ दृशौ कर्णावस्य ॥

दृक्काणः । पुं । द्रेक्काणे । लग्नविभागे ॥

दृक्प्रसादा । स्त्री । कुलत्थायाम् ॥ कुलत्थाञ्जने ॥

दृक्प्रिया । स्त्री । शोभायाम् ॥

दृक्श्रुतिः । पुं । सर्पे ॥

दृक्स्थितिः । स्त्री । दृष्टेःस्थैर्य्ये ॥ दृशः स्थितिः ॥ दृष्टिंज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् । सादृष्टिः परमोदारा न नासाग्रविलोकिनी ॥ दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत् । दृष्टिस्तत्रैव कर्त्तव्या न नासाग्रविलोकिनी स्याचार्य्याः ॥

दृगध्यक्षः । पुं । सूर्य्ये ॥

दृग्गोलः । पुं । खगोलान्तर्गते गोलविशेषे ॥

दृग्भूः । स्त्री । सर्पे ॥ वज्रे ॥ भास्करे ॥

दृग्विषः । पुं । नागे ॥

दृढम् । न । लौहे ॥ अतिशये । नितान्ते ॥ क्रियाविशेषणत्वेऽस्यक्लीवत्त्वंद्रव्यविशेषणेतुवाच्यलिङ्गता ॥ पुं । रूपकप्रभेदे ॥ यथा । दृढाख्यः स्यात्लघुद्वन्द्वं तालेच हंसलीलके । चतुर्दशाक्षरैर्युक्तः शृङ्गारे परिकीर्त्तितइति सङ्गीतदामोदरः ॥ त्रि । स्थूले ॥ प्रगाढे । अप्रशिथिले ॥ वलवति । शक्ते ॥ कठिने ॥ दृहति दृंहतिस्मवा । दृहदृंहिवृद्धौ । क्तप्रत्यये । दृढः स्थूलबलयोरिति क्तस्य डभावः त स्यढत्वम् हस्यलोपः इदितोनलोपश्चनिपात्यते ॥

दृढकण्टकः । पुं । क्षुद्रफलकवृक्षे । धौला आँकडा इतिगौडभाषा ॥

दृढकाण्डः । पुं । वंशवृक्षे ॥ न । दीर्घरोहिषके ॥

दृढकाण्डा । स्त्री । पातालगरुडीलतायाम् ॥

दृढकारी । त्रि । प्रारब्धकर्मसम्पादयितरि ॥

दृढक्षुरा । स्त्री । वल्वजायाम् ॥

दृढगात्रिका । स्त्री । मत्स्यण्ड्याम् ॥

दृढग्रन्थिः । पुं । वंशे ॥

दृढच्छदम् । न । दीर्घरोहिषके ॥

दृढतरुः । पुं । धववृक्षे ॥

दृढतृणः । पुं । मुञ्जतृणे ॥

दृढतृणा । स्त्री । वल्वजायाम् ॥

दृढत्वक् । पुं । यावनालशरे ॥

दृढदंशकः । न । हांगर इति प्रसिद्धे यादसि ॥

दृढनिश्चयः । त्रि । स्थिरप्रज्ञे ॥ दृढः कुतार्किकैरभिभवितुमशक्यतयास्थिरो निश्चयोऽहमस्म्यकर्त्ताभोक्तृसंचिदानन्दाद्वितीयं ब्रह्मेत्यध्यवसाय शीले संसारादुपरतेमुनौ ॥

दृढनीरः । पुं । नारिकेलवृक्षे ॥

दृढपत्रः । पुं । वंशे ॥

दृढपत्री । स्त्री । वल्वजायाम् ॥

दृढपादा । स्त्री । यवतिक्तायाम् ॥

दृढपादी । स्त्री । भूम्यामल्याम् ॥

दृढप्ररोहः । पुं । प्लक्षवृक्षे ॥

दृढफलः । पुं । नारिकेरे ॥ दृढानि फलानि यस्य सः ॥

दृढबन्धिनी । स्त्री । श्यामालतायाम् ॥

दृढभूमिः । त्रि । विषयसुखवासनया चालयितुमशक्ये ॥

दृढमुष्टिः । पुं । खड्गादौ ॥ त्रि । कृपणे ॥ दृढामुष्टिर्यस्य ॥

दृढमूलः । पुं । मुञ्जतृणे ॥ मन्थानकतृणे ॥ नारिकेले ॥

दृढरङ्गा । स्त्री । स्फट्याम् ॥

दृढलता । स्त्री । पातालगरुड्याम् ॥

दृढलोमा । पुं । शूकरे ॥ त्रि । कठिनलोमयुक्ते ॥ दृढानि लोमानि यस्य ॥

दृढवल्कलः । पुं । पूगे ॥ लकुचे ॥

दृढवल्का । स्त्री । अम्बष्ठायाम् ॥

दृढबीजः । पुं । चक्रमर्द्दे ॥ बदरे ॥ बर्वुरे ॥

दृढव्रतः । त्रि । अचाल्यसङ्कल्पे । फलपर्य्यन्तं प्रारब्धव्रतापरित्यागशीले ॥ सर्वथाभगवानेव भजनीयः सचैवंरूपएवेतिप्रमाणजनिताऽप्रामाण्यशङ्काशून्यविज्ञाने ॥ दृढानि प्रतिपक्षैश्चालयितुमशक्यानि अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहादीनि व्रतानि नियमा यस्य सतथा । शमदमादिसाधनसम्पन्न इतियावत् ॥

दृढसन्धिः । त्रि । संहते । निश्छिद्रे ॥ दृढःसन्धिःसन्धानमस्य ॥

दृढसूत्रिका । स्त्री । मूर्वायाम् ॥

दृढस्कन्धः । पुं । क्षीरिकावृक्षे ॥

दृढाङ्गम् । न । हीरके ॥

दृता । स्त्री । जीरके ॥

दृतिः । पुं । चर्मपुटे । चर्मनिर्मितोदकादिपात्रे ॥ मत्स्ये ॥ दृणाति । दृ विदारणे । दृणातेर्ह्रस्वश्चेति तिः ॥ शरीरावयवविशेषे ॥ उदकनोदनचर्मयन्त्रे ॥

दृतिधारकः । पुं । आकन्दाता इतिगौडभाषाप्रसिद्धे वृक्षे ॥

दृतिहरिः । पुं । पशौ ॥ दृतिंहरतीति विग्रहे दृत्युपपदाद्धरतेःपशौकर्त्तरि इन्प्रत्ययः ॥

दृन् । अ । दृढार्थे ॥ हिंसायाम् ॥

दृन्भूः । स्त्री । सर्पे ॥ चक्रसर्पे ॥ पुं । वज्रे ॥ अग्न्यभूपतौ ॥ तक्षसर्पजातौ ॥ कपौ ॥ सन्दर्भकर्त्तरि ॥ कथके ॥ सूर्ये ॥ दृभति । दृभीग्रन्थे । अन्दूदृन्भूजम्बितिकूप्रत्यये निपातनान्नुम् अनुस्वाराभावोपि । हूहूवद्रूपाणि ॥ दृढयत्वउपपदेभुवःकूप्रत्ययःउप

पदस्य दृगादेशो निपातनादिति माधवः ॥ यद्वा । दृगिति नाम्नः अव्ययं दृढार्थकमुपपदम् । वर्णाभूवद्रूपमस्ये-त्याहुः ॥

दृप्तः । त्रि । उद्धते । गर्विते ॥ दृप्यते । दृप हर्षविमोहनयोः । अस्मात् अत्यर्थाकर्मकेभ्य आदिना कर्त्तरि क्तः ॥

दृप्रः । त्रि । बलवति ॥ दृप्यति । दृप० । स्फायितञ्चीतिरः ॥

दृब्धः । त्रि । ग्रथिते ॥ दृभ्यते स्म । दृभी ग्रन्थे । क्तः ॥

दृब्धिः । स्त्री । गुम्फे ॥

दृक् । स्त्री । दर्शने ॥ नेत्रे ॥ येनेयं हि रूपं व्याप्यते दृश्यविशादम् ॥ बुद्धौ ॥ ज्ञाने ॥ रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक् तु मानसम् । दृश्याधीदृत्तयः साक्षी दृगेव न तु दृश्यते ॥ त्रि० वी चके ॥ अध्यक्षे ॥ ज्ञातरि ॥ पश्यति दृशिर् प्रेक्षणे । क्विप् ॥ यद्वा । दृश्यते दर्शनमनयावा । सं० क्विप् । क्विन् प्रत्ययस्येति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम् । त्यदादिषु दृशः क्विनो विधानात् ॥ द्यङ्के ॥

शत् । स्त्री । दृषदि ॥

दृशद्वती । स्त्री । दृषद्वत्याम् ॥

दृशा । स्त्री । चक्षुषि ॥

दृशाकाङ्क्ष्यम् । न । पद्मे ॥

दृशानः । पुं । विरोचने । सूर्ये ॥ आचार्ये ॥ लोकपाले ॥ न । ज्योतिषि ॥ पश्यति । दृशिर् ० । युधिबुधिदृशः किच्चेत्यानच् ॥

दृशिः । स्त्री । चक्षुषि ॥ दर्शने ॥ गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम् ॥

दृशिस्वरूपः । त्रि । चैतन्यघने ॥

दृशी । स्त्री । नेत्रे ॥

दृशोपमम् । न । सिताम्भोजे ॥

दृश्यम् । न । अनात्मस्वरूपे । ममेदं श्रोत्रं ममेदं मन इत्यादिममतास्पदत्वेनात्मन उपसर्जनभूते स्थूलदेहादौ ॥ दृष्टिदृश्यव्याप्यं दृश्यमिति प्रसिद्धम् ॥ त्रि । द्रष्टव्ये । दर्शनीये ॥ द्रष्टुं योग्यम् । दृशेर्ऋहलोर्ण्यत् ॥ ऋदुपधाच्चाकॢपिचृतेरिति क्यप् वा ॥

दृषत्सारम् । न । मुण्डायसे ॥

दृषद् । स्त्री । निष्पेषणशिलापट्टे । शिल् इति भाषा ॥ पाषाणे । प्रस्तरे ॥ दृणात्यनेन । दृ विदारणे । दृणातेः पुग्घ्रस्वश्चेत्यदिः ॥

दृषद्वती । स्त्री । नदीविशेषे ॥ दृषदः सन्त्यस्याम् । मतुप् । झयइति मस्य वः ॥ कात्यायन्याम् ॥

दृष्टम् । न । महीभुजां स्वपरचक्रोत्थभये ॥ स्वराष्ट्राच्चौराटविकादेर्भयम् । परराष्ट्राद्दाहविलोपादेर्भयम् ॥ प्रति

विषयाध्यवसाये ॥ त्रि । साक्षात्कृते । प्रत्यक्षे । अक्षिगोचरे । ईक्षिते ॥ अग्निश्चित् कपिला सती राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत नित्यशः ॥ दृश्यते स्म । दृशिर् ० क्तः ॥ ज्ञाते ॥ दर्शने ॥

दृष्टपृष्ठः । त्रि । पलायमाने ॥

दृष्टप्रत्ययः । त्रि । दृढविश्वासे ॥

दृष्टरजाः । स्त्री । मध्यमायाम् । प्रथमं प्राप्तरजस्कायां नार्याम् ॥ दृष्टं रजो यस्याः ॥ प्रौढायाम् ॥

दृष्टान्तः । पुं । मरणे ॥ शास्त्रे ॥ उदाहरणे ॥ प्रतिपाद्यप्रतिपादकयोर्यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ तथाच गौतमसूत्रम् । लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति ॥ लौकिकोऽप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः प्रतिपाद्य इति फलितोऽर्थः । परीक्षकः शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः प्रतिपादक इति फलितोऽर्थः ॥ तथाच प्रतिपाद्यप्रतिपादकयोरिति पर्यवसन्नम् । बहुवचनं कथाबहुत्वमभिप्रेत्य बुद्धेः साध्यसाधनोभयविषयिण्याः सद्भावविषयिण्या वा साम्यमविरोधो यस्मिन्नर्थे सोऽर्थो दृष्टान्तः । वादिप्रतिवादिनोः साध्यसाधनोभयप्रकारकतद्भावद्वयप्रकारकान्यतरनिश्चयविषयो दृष्टान्त इति पर्यवसितोऽर्थः ॥ * ॥ अलङ्कारविशेषे । दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥ एतेषां साधारणधर्मादीनां दृष्टोऽन्तो निश्चयो यत्र स दृष्टान्तः । त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् । आलोके हि हिमांशोर्विकसति कुमुदं कुमुद्वत्याः ॥ एष साधर्म्येण । वैधर्म्येण तु । तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः । भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांशवः ॥ * ॥ उपमाने ॥ दृष्टः अन्तो निश्चयो य । दृष्ट अन्तः सादृश्यबलेन प्रकृतार्थनिर्णयो येन वा ॥

दृष्टिः । स्त्री । बुद्धौ ॥ लोचने ॥ दर्शने ॥ ज्ञाने ॥ अन्तःकरणवृत्तौ ॥ चक्षुर्जन्यमनोवृत्तिश्चिद्युक्ता रूपभासिका । दृष्टिरित्युच्यते द्रष्टा दृष्टेः कर्त्तेति लौकिकैः ॥ दर्शनम् । दृशिर् ० । क्तिन् । दृश्यतेऽनया वा करणे क्तिच् ॥ * ॥ अथ ग्रहाणां दृष्टिकथनं यथा । तृतीये दशमे चैव पाददृष्टिरुदाहृता । अर्द्धदृष्टिस्तु नवमे पञ्चमे च प्रकीर्त्तिता ॥ चतुर्थे चाष्टमे चैव पादोना परिकीर्त्तिता । सप्तमे

परिपूर्णाच फलमेवं प्रकल्प्यते ॥ द्वितीयदशमावार्किः पश्यन् पूर्णफलप्रदः । त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः ॥ सुतमदननवान्त्ये पूर्णदृष्टिः सुरारे र्युगलदशमराशौ दृष्टिपादत्रयार्कः । सहजरिपुचतुर्थेष्वऽष्टमेचार्द्धदृष्टिः स्थितिभवनमुपान्त्यं नैवदृश्यंचिराङ्घ्रेः ॥ स्वस्थानं च द्वितीयञ्च षष्ठमेकादशं तथा । द्वादशाख्यं नपश्यन्ति शेषंपश्यन्तिते ग्रहाः ॥

दृष्टिकृत् । न । } स्थलपद्मे ॥
दृष्टिकृतम् । न । }

दृष्टिगुणः । पुं । बाणादेर्लक्ष्ये ॥

दृष्टिबन्धुः । पुं । खद्योते ॥ खाञ्जने ॥

दृष्टियोनिः । पुं । ईर्ष्यके ॥

दृष्टिविक्षेपः । पुं । कटाक्षे ॥

दृष्टिविषः । पुं । सर्पविशेषे ॥

दृष्ट्वा । अ । विलोक्येत्यर्थे ॥

दृंहितः । त्रि । वृद्धिम्प्राप्ते ॥

देदीप्यमानः । त्रि । जाज्वल्यमाने । अतिशयदीप्तिविशिष्टे । यःपुनःपुनरतिशयेनवा दीप्यते तत्र ॥

देयम् । त्रि । दातव्ये ॥ दातुंयोग्यम् । डुदाञ्० । अचोयत् । ईद्यतिगुणः ॥ न । धनविशेषे ॥ यथा । अपराबाधमक्लेशं प्रयत्नेनार्जितं धनम् । स्वल्पं वा बहुलंवापि देयमित्यभिधीयते ॥ अपराबाधम् परपीडारहितम् । अक्लेशं पापक्लेशाजनकम् ॥

देवः । पुं । वसुवदादौ । ब्रह्मविष्णुशिवसूर्याग्निगणपतिदुर्गादौ । सुरे । अमरे ॥ एतेषांवर्णायथा । आदित्याः क्षत्रियास्तेषां विशश्चमरुतस्तथा । अश्विनौचस्मृतौशूद्रौ तपस्युग्रेसमास्थितौ ॥ स्मृतास्त्वाङ्गिरसादेवा ब्राह्मणाइति निश्चयः इति ॥ स्वानातिशयशालिनिद्योतनात्मके आत्मनि ॥ दीव्यति क्रीडति सर्गादिभिःविजिगीषते असुरादीन् व्यवहरति सर्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः सर्वत्रगच्छतिवा तस्माद्देवः ॥ दीव्यतेः पचाद्यच् ॥ दीव्यते स्तूयते इतिदिवेः कर्मणिघञ्वा ॥ दीव्यते क्रीडतेयस्माद्रोचते द्योततेदिवि । तस्माद्देवइतिप्रोक्तः स्तूयते सर्वदैवतैः ॥ मेघे ॥ राज्ञि ॥ नाट्योक्त्याभूपाले ॥ पारदे ॥ वज्रटीके ॥ देवदारुणि ॥ न । इन्द्रिये ॥ त्रि । पूज्ये ॥ दीप्तिमति ॥

देवकः । पुं । यदुवंशीये नृपविशेषे । श्रीकृष्णस्य मातामहे ॥ दीव्यति । ण्वुल् ॥

देवकर्दमः । पुं । सुगन्धिद्रव्यविशेषे ॥

सलज्जश्रीखण्डागुरुकर्पूरकुङ्कुममि-
श्रितैर्भवति ॥ इति रागनिर्घण्टः ॥

देवकल्पः । त्रि । देवतुल्ये ॥ ईषदूनो देवः । ईषदसमाप्ताविति कल्पप् ॥

देवकात्मजा । स्त्री । देवक्याम् ॥

देवकार्य्यम् । न । देवानुद्दिश्य क्रियमाणे ॥

देवकाष्ठम् । न । देवदारुणि ॥

देवकिरी । स्त्री । मेघरागस्य भार्य्यायाम् ॥ यथा । ललिता मालती गौरी नाटी देवकिरी तथा । मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥ अस्याः स्वरूपं यथा । भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा । ख्याता देवकिरी होषा करार्पित सखीकरा ॥

देवकी । स्त्री । वसुदेवभार्य्यायाम् । श्रीकृष्णमातरि ॥ मथुरायां यादवेष्वन्यतमा ॥ देवकानाचष्टे इति णिज् न्तादचः । ततो ङीष् ॥ यद्वा । देवकस्यापत्यम् । इत्यण् । संज्ञापूर्वकत्वात् वृद्ध्यभावः । इतो मनुष्यजाते रिति ङीष् ॥ यद्वा । देवकशब्दस्य तदपत्ये लक्षणया वृत्तौ पुंयोगादिति ङीष् । नचैतत्र दाम्पत्यलक्षण एव पुंयोगः किन्तु अन्य जनकत्वादपीति हरदत्तादयः । अतएव प्राक् केकयी तो भरतस्ततो ऽभूदिति भट्टिः । एवं रेवतीरमणोपि ॥

देवकीनन्दनः । पुं । श्रीकृष्णे ॥ देवक्यानन्दनः पुत्रः ॥

देवकीसूनुः । पुं । श्रीकृष्णे ॥ देवक्याः सूनुः ॥

देवकुरुम्बा । स्त्री । महाद्रोणायाम् ॥

देवकुलम् । न । प्रासादे । देवल इति भाषा प्रसिद्धे आयतने ॥

देवकुल्या । स्त्री । सरिति ॥

देवकुसुमम् । न । लवङ्गे ॥ देवानांकुसुमम् ॥ कुसुमेषु देवइवसा । राज० ॥ देवयोग्यं कुसुमं वा । शा० ॥

देवकूटम् । न । तीर्थविशेषे ॥

देवखातः । पुं । न । अकृत्रिमजलाशये ॥ देवेनखातः ॥ देवद्वारस्थजलाशये । देवसम्बन्धिस्थे न प्रसिद्धे सरसि ॥ स्त्री । न । गुहायाम् ॥

देवखातकम् । न । अखाते देवखाते ॥ देवे न खातम् । स्वा० कः ॥

देवखातविलम् । न । गुहायाम् ॥

देवगन्धा । स्त्री । महामेदायाम् ॥

देवगर्भा । स्त्री । कङ्कालपीठाधिष्ठात्र्यां देवतायाम् ॥

देवगान्धारी । स्त्री । श्रीरागस्य भार्य्यायाम् ॥ यथा । गान्धारी देवगान्धारी मालवश्रीश्च सारवी । रामकीर्य्यपि रागिण्यः श्रीरागस्यप्रिया इमे ॥ अस्या ध्यानसमयःशिशिरर्त्तौ तृतीयप्रहरा

वधिरात्र्यर्द्धपर्य्यन्तमिति गानविदः ॥

देवगायनः । पुं । गन्धर्व्वे ॥

देवगिरिः । पुं । भारतवर्षस्य शैलविशेषे ॥

देवगिरी । स्त्री । रागिणीविशेषे ॥ सा च सोमेश्वरमते वसन्तरागस्यभार्य्या वसन्तर्त्तौचसदा गेया । भरतमते हिन्दोलरागपुत्रस्य नागध्वने भार्य्या ॥ सङ्गीतदर्पणमतेतु नटकल्याणभार्य्या ॥ अस्याः स्वरूपं यथा । अत्यभिरामतनुः उत्तुङ्गपीनस्तनी हारकण्ठभूषणा स्त्रीपङ्क्तिमध्यस्था मत्तचकोरनयना सुभङ्ग्यङ्गीच । अस्या गानसमयो हेमन्ते दिवाचतुर्थप्रहरावधिरात्र्यर्द्धपर्य्यन्तम् ॥

देवगुरुः । पुं । सुराचार्य्ये ॥ देवानांगुरुः ॥

देवगुह्यम् । न । मरणे ॥ तद्धि प्राणिनां वैराग्यानुदयाय देवैर्गोप्यते ॥

देवगृहम् । न । देवालये ॥ सूर्य्यचन्द्रादीनां ज्योतिर्मण्डलेषु ॥

देवचिकित्सकौ । पुं । अश्विनीकुमारयोः ॥ इति हलायुधः ॥

देवच्छन्दः । पुं । शतयष्टिहारे ॥ देवैश्छन्द्यते । छदि० । घञ् ॥

देवजग्धम् । न । देवजग्धके ॥

देवजग्धकम् । न । कत्तृणे ॥ देवैरद्यतेस्म । अद० । क्तः । अदोजग्धिर्ल्यप्ति किति ॥

देवजनविद्या । स्त्री । गन्धयुक्तिनृत्यगीतवाद्यशिल्पादिविधानेषु ॥

देवटः । त्रि । शिल्पिनि ॥ दीव्यति । दिवु० । शकादिभ्योऽटन् ॥

देवट्टी । स्त्री । गङ्गाचिल्ल्याम् ॥

देवतरुः । पुं । मन्दारादिवृक्षेषु ॥ पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसिवा हरिचन्दनम् ॥ देवानां तरुः ॥ चैत्यवृक्षे ॥

देवता । स्त्री । अमरे । सुरे ॥ देवएव । स्वार्थे तल् ॥ विष्ण्वादिप्रतिमायाम् ॥ त्यज्यमानद्रव्ये उद्देश्यविशेषे ॥ ॥ मन्त्रस्तुत्यायाम् ॥ तस्याः सङ्ख्या यथा । सदारा विबुधाः सर्वे स्वानां स्वानां गणैःसह । त्रैलोक्ये तत्त्रयस्त्रिंशत्कोटिसंख्या यथाभवेति पाद्मोत्तरखण्डम् ॥

देवताडः । पुं । सैंहिकेये । राहौ ॥ जीमूते । खरायाम् । देताडा इति गौडभाषा प्रसिद्धे वृक्षे ॥ अग्नौ ॥ देव मिन्द्रियं ताडयति । तड आघाते । कर्मण्यण् ॥

देवताडकः । पुं । देवताडे ॥ स्वार्थे कः ॥

देवताधिपः । पुं । इन्द्रे ॥

देवत्वम् । न । देवभूये । देवसायुज्ये ॥

देवस्यभावः कर्मवा । तस्यभावस्त्व-
तलौ ॥

देवदण्डा । स्त्री । नागवल्लायाम् ॥

देवदत्तः । पुं । अर्जुनस्य शङ्खे ॥ बुद्धानु
जे ॥ जृम्भणकरे वायुविशेषे ॥ विजृ
म्भणे देवदत्तः शुद्धस्फटिकसन्निभः
॥ देवाएनं देयासुः । क्तिच्क्तौचसं
ज्ञायामिति आशिषिक्तः । दोदद्-
घोरिति दथादेशः ॥ त्रि । सुरार्पि
ते ॥ देवायदत्तः ॥ ग्रामविशेषे ॥

देवदत्ताग्रजः । पुं । बुद्धे । शाक्यमुनौ॥

देवदानी । स्त्री । हस्तिघोषायाम् ॥

देवदारु । न । स्वनाम्नाप्रसिद्धे वृक्षवि-
शेषे । भद्रदारुणि । पूतिकाष्ठे ॥ देव
स्यदारु ॥ देवदारु लघु स्निग्धं तिक्तो
ष्णं कटुपाकिच । विबन्धाध्मानशोथा
मतन्द्राहिक्काज्वरास्रजित् ॥ प्रमेह
पीनसश्लेष्मश्वासकण्डुसमीरनुत् ॥
पुं । यथा । अमुंपुरः पश्यसि देवदारु
मितिरघुः ॥

देवदालिका । स्त्री । महाकाले ॥

देवदाली । स्त्री । लताविशेषे । जीमू
तके । कर्कटफलायाम् । घघरबेल
इतिसोनैया इतिच भाषा ॥ देवदा
ली रसेतिक्ता कफार्शः शोफपाण्डु
ताः । नाशयेद्वामनी तिक्ता क्षय
हिक्का कृमिज्वरान् ॥ देवदालीफलं
तिक्तं कृमिश्लेष्मविनाशनम् । स्रंसनं
गुल्मशूलघ्न मर्शोघ्नं वातजित् परम्
॥ * ॥ देवदालीदलं तक्रे स्वेदितं
खण्डितं भृशम् । वेसवारयुते साज्ये
भर्जितं हिङ्गुना दृढम् ॥ पीतापरा
खरस्पर्शा विषघ्नीगरनाशिनी ॥ कृष्ण
परा देवदाली ॥

देवदासी । स्त्री । वनबीजपूरे ॥ वेश्या
याम् ॥

देवदीपः । पुं । लोचने ॥

देवदुन्दुभिः । पुं । गन्धपर्णासे । सरक्त
तुलस्याम् ॥ देवानां दुन्दुभिवाद्ये ॥

देवदूती । स्त्री । अप्सरायाम् । वन
बीजपूरके ॥

देवदेवः । पुं । शिवे । महेश्वरे ॥ ब्रह्म
णि ॥ देवानां देवेषुवादेवः ॥

देवदेवाधिपः । पुं । नैमिषेशम्भौ ॥

देवद्रोणी । स्त्री । देवयात्रायाम् ॥

देवद्र्यङ् । त्रि । देवपूजके ॥ देवान् अ
ञ्चति । अञ्चु० । ऋत्विगादिना क्विन्
। विष्विग्देवयोरित्यद्र्यादेशः ॥

देवधनम् । न । देवस्वे ॥

देवधान्यम् । न । कूर्णाह्वये । योनले
। बीजपुष्पिकायाम् । जुन्हरी इति
जुवार इतिच भाषा ॥

देवधूपः । पुं । गुग्गुलौ ॥ राले ॥

देवनः । पुं । पाशके ॥ दीव्यतेऽनेन-

। दिवु० । भावकरणादौल्युट् ॥ न । व्यवहारे ॥ जिगीषायाम् ॥ क्रीडायाम् ॥ क्रीडोद्याने ॥ पद्मे ॥ दीप्तौ ॥

देवनदी । स्त्री । गङ्गायाम् ॥ यमुनायाम् ॥

देवनन्दी । पुं । शक्रद्वारपाले ॥

देवनलः । पुं । नलोत्तमे । महानले ॥

देवना । स्त्री । क्रीडायाम् ॥ सेवायाम् ॥

देवनालः । पुं । स्थूलदण्डे । देवनले ॥

देवनिर्म्मिता । स्त्री । गुडूच्याम् ॥

देवपतिः । पुं । इन्द्रे ॥

देवपत्नी । स्त्री । मध्वालुके ॥ देवनार्याम् ॥

देवपथः । पुं । सुराध्वनि । छायापथे । सोमधारायाम् ॥ देवैरर्च्चिरादिभिर्गमयितृत्वेनाधिकृतै रुपलक्षितःपन्था देवपथउच्यते ॥ देवानांपन्थाः । ऋक्पूरित्यः ॥ न । तीर्थविशेषे ॥

देवपरः । त्रि । मूर्खे ॥ यज्ञविष्ये ॥ देवःपरःउत्कृष्टोस्य ॥

देवपर्णम् । न । सुरपर्णे ॥

देवपुत्रिका । स्त्री । पृक्कायाम् ॥

देवपुत्री । स्त्री । देवकन्यायाम् ॥ पृक्कायाम् ॥

देवपूः । स्त्री । अमरावत्याम् ॥

देवपुरी । स्त्री । अमरावत्याम् ॥ देवानांपुरी ॥

देवपुरोधाः । पुं । बृहस्पतौ ॥

देवप्रश्नः । पुं । उपश्रुतौ । ग्रहनक्षत्रादिघटितजिज्ञासायाम् ॥

देवप्रियः । पुं । पीतभृङ्गराजे ॥ बकपुष्पे ॥

देवबला । स्त्री । त्रायमाणायाम् ॥ सहदेव्याम् ॥

देववल्लभः । पुं । पुन्नागवृक्षे ॥

देवब्रह्मा । पुं । नारदमुनौ ॥

देवब्राह्मणः । पुं । देवपूजकेब्राह्मणे ॥ शा०मध्यमपदलोपः ॥

देवभवनम् । न । बोधिद्रुमे । अश्वत्थे ॥ नाके । स्वर्गे ॥ देवानां भवनम् ॥

देवभूः । पुं । देवे ॥ स्वर्गे ॥

देवभूतिः । स्त्री । मन्दाकिन्याम् ॥ सुरैश्वर्ये ॥

देवभूयम् । न । देवत्वे । देवसायुज्ये ॥ देवस्य भावः । भुवोभावइतिक्यप् ॥

देवमणिः । पुं । भर्गे । हरे । शिवे ॥ अश्वस्यकण्ठावर्त्ते । अश्वरोमावर्त्ते ॥ आवर्त्तोरोमजोदेवमणिस्त्वेषनिगद्यते ॥ विष्णुवक्षोमणौ । कौस्तुभे ॥ महामेदायाम् ॥

देवमाता । स्त्री । अदित्याम् ॥ देवानांमाता ॥

देवमातृकः । पुं । दृष्ट्यम्बुसम्पन्नव्रीह्यादिपालिते देशे ॥ देवो माताऽस्य

। नचृतश्चेतिकप् ॥

देवमानकः । पुं । कौस्तुभमणौ ॥

देवमासः । पुं । गर्भाष्टमे । गर्भस्याष्टमे मासि ॥ मनुष्यमानेनत्रिंशद्वर्षात्मके देवानांमासे ॥

देवयजनम् । न । यज्ञभूमौ ॥ कुरुक्षेत्रे ॥ देवा ईज्यन्ते यस्मिन् ॥

देवयजिः । पुं । देवपूजके । मुनौ ॥

देवयज्ञः । पुं । होमे । देवोद्देश्यकयागे ॥

देवयाजी । त्रि । कामनापुरस्सरं देवान् यजमाने । यःफलकामनयादेवान्यजते सः ॥ देवयाजिभ्यआत्मयाजीश्रेयान् ॥

देवयात्रा । स्त्री । देवद्रोण्याम् । देवगमने ॥ देवोत्सवादौ ॥

देवयानः । पुं । न । विद्यावतोमार्गविशेषे । तद्यइत्थंविदुरितिविद्या तया प्रतिपत्तव्योपंथा ॥ न । देवरथे । देवविमाने ॥

देवयानी । स्त्री । शुक्राचार्यस्यपुत्र्याम् । ययातेर्नृपस्यपत्न्याम् ॥

देवयुः । त्रि । धार्मिके ॥ लोकयात्रिके ॥ पुं । देवे ॥ देवान् याति । याप्रापणे । म०कुः ॥

देवयोनिः । पुं । विद्याधरादिषु ॥ तेच दश । यथा । विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमीदेवयोनयः ॥ देवोयोनिः उत्पत्तिस्थानंयस्यसः इत्यं शब्दस्यार्थः ॥

देवरः । पुं । देवरि । पतिभ्रातरि ॥ दीव्यते । देवृदेवने । अर्त्तिकमिभ्रमीत्यरश्चित् ॥ पत्युःकनिष्ठभ्रातरि इतिस्वामी । ज्येष्ठस्तुश्वशुरएवेतिसुभूत्यादयः ॥ पतिश्वशुरताज्येष्ठे पतिदेवरतानुजे । इतरेषुतुपांचाल्यात्रितयं त्रितयं मतम् ॥

देवरथः । पुं । पुष्पकादौदेवानांविमाने ॥

देवराजः । पुं । इन्द्रे । मरुत्वति ॥ देवानांराजा । राजाहःसखिभ्यष्टच् ॥

देवरातः । पुं । परीक्षिति । अभिमन्युसुते नृपतिलके ॥

देवर्षिः । पुं । नारदादिषु ॥ देवाएवसन्तो ये मन्त्रदर्शित्वेन ऋषित्वं प्राप्तास्तेदेवर्षयउच्यन्ते ॥ सप्तगोदावरतीर्थदेवे ॥

देवलः । पुं । मुन्यन्तरे । व्यासशिष्येधौम्यर्षेर्ज्येष्ठभ्रातरि ॥ देवरे ॥ देवाजीवे ॥ धार्मिके ॥ सुरर्षौ ॥ दीव्यति । दिवु० । वृषा०कलः ॥ देवान् जीविकार्थंलाति आदत्ते । लाआदाने । आतोनुपेतिकः ॥

देवलकः। पुं। वर्त्तनार्थत्वेनप्रतिमापरिचारके। पुजारी इतिभाषा॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेनचजीवन्तो वर्ज्याः स्युः हव्यकव्ययोः॥ देवकोषोपजीवी चनाम्नादेवलकोभवेत्॥ स्वा०कः॥

देवलता। स्त्री। नवमल्लिकायाम्॥

देवलाङ्गुलिका। स्त्री। वृश्चिकाल्याम्॥

देवलोकः। पुं। स्वर्गे॥ भूर्लोकोऽथभुवर्लोकः स्वर्लोकोथ महर्जनः। तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्त्तिता इतिमत्स्यपुराणम्॥

देववक्त्रम्। न। वह्नौ॥ देवानांवक्त्रम्॥

देववर्द्धकिः। पुं। विश्वकर्मणि॥

देववल्लभः। पुं। पुन्नागे। गुर्जरदेशे सन्देशरा इतिप्रसिद्धे॥ देवानांवल्लभः॥

देववित्। त्रि। देवताकाण्डीये॥ सचेत्थंकल्पयति। अग्नीन्द्रादयोदेवास्तत्तत्फलदातारो नेश्वर स्तथेति। एतच्चकल्पनामात्रम्। अस्मदादिप्रयत्नमपेक्ष्य फलदातृत्वे तेषां भृत्येभ्यो विशेषाभावप्रसङ्गात्। स्वातन्त्र्येणोपकारकत्वे तदाराधनवैयर्थ्यात्। तद्भक्तानामपि विप्रतिपत्तिदर्शनात् तत् प्रसादस्याकिञ्चित्करत्वात्॥

देवविद्या। स्त्री। निरुक्ते॥

देववृक्षः। पुं। सप्तपर्णे॥ मन्दारादिदेवतरौ॥ गुग्गुलौ॥ देवानां वृक्षः॥

देवव्रतः। पुं। भीष्मपितामहे॥ भीष्मो हि पितरि शन्तनौ मृते स्वस्य राज्याधिकारसत्त्वेपि पितरं शन्तनुं प्रतिनाहं राज्यं विवाहं वा करिष्यामि त्वं सत्यवतीं वृणु इतिसत्यवतीविवाहसमये प्रतिज्ञातत्वाच्चित्राङ्गदं सत्यवतीज्येष्ठपुत्रमेव राज्येस्थापयामास। तादृशसत्यरूपस्य देवानां व्रतस्य परिपालनाद्देवव्रतनामा भवत् इति पुराणप्रसिद्धेः॥ देवानां व्रते॥

देवशेखरः। पुं। दमनके॥

देवश्रुतः। पुं। ईश्वरे॥ शास्त्रे॥ नारदे॥

देवश्रेणी। स्त्री। मूर्वायाम्॥

देवसखः। पुं। पर्वतान्तरे॥

देवसभा। स्त्री। सुधर्मायाम्॥ सद्दभान्यस्याम्। सभाराजेतिनिपातनाड्। देवानां सभा आस्थानगृहम्॥

देवसभ्यः। त्रि। क्रीडासंसक्ते। सभिके॥

देवसर्षपः। पुं। वृक्षविशेषे। अस्याश्चे। रक्तमूलके। सूक्ष्मदले॥ इ०रानि०॥

देवसहा। स्त्री। दण्डोत्पलौषधौ॥ भिक्षासूत्रे॥

देवसात्। अ। देवाधीने॥ देवदेये॥

देवसायुज्यम् । न । देवभूये । देवत्वे ॥ युनक्ति । युजिर्० । इगुपधेतिकः । युजेनसह । तेनसहेति बहुव्रीहिः । वोपसर्जनस्येतिसहस्यसः ॥ यद्वा । योजनंयुक् । सं० क्विप् । सहयुजा सयुक् । सयुजस्य सयुजोवा भावः । ब्रा० ष्यञ् । देवस्य सायुज्यम् ॥

देवसृष्टा । स्त्री । मद्ये ॥ इतिहेमचन्द्रः ॥ देवेन सृष्टा ॥

देवसेना । स्त्री । मातृकाविशेषे । इन्द्रस्य सुतायाम् । षष्ठ्याम् । स्कन्दस्य पत्न्याम् ॥ षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ॥ देवतानां सेनायाम् ॥

देवसेनापतिः । पुं । स्कन्दे ॥

देवस्वम् । न । यज्ञशीलानां धने ॥ यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः ॥ प्रतिमादिदेवतार्थमुत्सृष्टधने ॥ देवानां स्वम् । ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्चहरेत्तुयः । कन्यां ददातिशुल्केन सप्रेतो जायते ध्रुव इतिमहाभारते पञ्चप्रेतोपाख्यानम् ॥

देवहूः । पुं । वामकर्णे । पितृहूर्दक्षिणः कर्ण उत्तरोदेवहूः स्मृतः ॥

देवहूतिः । स्त्री । स्वायम्भुवमनोःकन्यायाम् ॥ यथा । आकूतिः प्रथमाकन्या द्वितीयादेवहूतिका । तृतीयाचप्रसूतिर्हिविख्यातालोकपाविनी ॥

देवह्रदः । पुं । तीर्थविशेषे ॥

देवा । स्त्री । चारव्यामोषधौ ॥ अशनपर्य्याम् ॥

देवागारिकः । त्रि । देवागारे नियुक्ते ॥ अगारान्ताट्ठन् ॥

देवाजीवः । त्रि । देवले । प्रतिमापरिचारके । पुजारीब्राह्मन् इति भाषा ॥ देवआजीवो ऽस्य ॥

देवाजीवी । त्रि । देवले ॥ देवैराजीवितुंशीलमस्य । सुप्यजातौणिनि- स्ताच्छील्ये ॥

देवाटः । पुं । हरिहरक्षेत्रे ॥ देवानामटनाच्चैवदेवाट इतिसंज्ञितम् ॥

देवात्मा । पुं । अश्वत्थवृक्षे ॥

देवानांप्रियः । पुं । छागे ॥ त्रि । मूर्खे ॥ मूर्खाहि देवानां प्रीतिंजनयन्ति देवपशुत्वात् ॥ षष्ठ्या अलुक् ॥

देवापिः । पुं । असुरविशेषे ॥ देवानाप्नोति । आप्लृ० । फलेग्रहिरात्मम्भरिश्चेतिचकारादिन् ॥ प्रतीपराजस्यपुत्रे ॥ समुमेरुसमीपे कलापग्रामे योगीभूत्वा आस्ते । सकलौ नुसं च न्द्रवंशं पुनः सत्ययुगे भावयिष्यति ॥

देवाभीष्टा । स्त्री । ताम्बूल्याम् ॥

देवायतनम् । न । देवालये ॥ न देवायतनं गच्छेत् कदाचिद्वा ऽप्रदक्षिणम्

म् । नपीतवेष्टा वस्त्राणि नदेवायत नेष्वपीतिकूर्मपुराणम् ॥

देवायुधम् । न । शक्रधनुषि ॥ देवानामस्त्रे ॥

देवारातिः । पुं । दैत्ये ॥

देवार्य्यः । पुं । वर्द्धमानाख्ये ऽर्हद्भेदे ॥

देवार्हम् । न । सुपर्ण्यां ॥ त्रि । देवयोग्ये ॥

देवार्हा । स्त्री । सहदेवीलतायाम् ॥

देवालयः । पुं । देवगृहे ॥ देवस्यालयः ॥ स्वर्गे ॥ देवानामालयः ॥

देवाला । स्त्री । रागिणीविशेषे ॥

देवावासः । पुं । अश्वत्थवृक्षे ॥

देवाश्वः । पुं । इन्द्रस्याश्वे । उच्चैःश्रवसि ॥

देविका । स्त्री । सरिद्भेदे ॥ दीव्यति । दिवु० । ण्वुल् ॥ अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् । एतावद्देविकामाहुर्देवर्षिपरिषेवितामितिपाद्मे भूमिखण्डम् ॥ धुस्तूरे ॥

देविलः । त्रि । धार्म्मिके ॥ अनुकम्पितो देवदत्तः । घनिलचौचेतीलच् ॥

देवी । स्त्री । कृताभिषेकायाम् । महिष्याम् ॥ नटोक्त्याभिषिक्तराजपत्न्याम् ॥ पृक्कायाम् ॥ मूर्वायाम् ॥ आदित्यभक्तायाम् ॥ लिङ्गिन्याम् ॥ वन्ध्याकर्कोटक्याम् ॥ शालिपर्ण्याम् ॥ महाद्रोणाम् ॥ पाठायाम् ॥ नागरमुस्तायाम् ॥ मगेर्वारौ ॥ हरीतक्याम् ॥ अतस्याम् ॥ श्यामानामपक्षिजातौ ॥ दुर्गायाम् । पार्वत्याम् ॥ देव्याः पादोदकमाहात्म्यमुक्तं देवीभागवते । सकृत्कृत्वा महापूजां देवीपादजलं पिबन् । नजातुजननीगर्भं गच्छेदिति विनिश्चयःइति । दीव्यति यद्वा । देवयति सर्वान् ॥ प्रवृत्तिनिवृत्त्युपदेशेन यथाधिकारं व्यवहारयति । दिवु० । पचादौ देवडितिनिपातनात् ङीप् ॥ सामान्यतोदेवपत्न्याम् ॥ ब्राह्मणस्त्रीनामोपपदे ॥ देव्यन्ताः क्षत्त्रियोमताः ॥ देव्यन्ताः क्षत्त्रियः सर्वा दास्यन्ताः शूद्रयोनयः ॥

देवीकोटः । पुं । बाणपुरे ॥

देवीभक्तः । त्रि । शाक्ते ॥ यथा । अपराधं परं कृत्वा देवीभक्तश्च योजनः । सुखं लभेत यद्यपि भवेत् चान्यस्त्र वःस्वर्गमिति भागवतम् ॥

देवः । पुं । देवरे ॥ दीव्यति । दिवु० । दिवेर्ऋः । देवरौ देवः इत्यादिदिपिवत् ॥

देवेज्यः । पुं । बृहस्पतौ ॥ देवानामीज्यः ॥

देवेशः । पुं । भीसदाशिवे ॥ देवानामिन्द्रादीनामीशोनियन्ता ॥ विष्णौ ॥

देवेशी । स्त्री । दुर्गायाम् ॥

देवेष्टः । पुं । गुग्गुलौ ॥ महामेदायाम्

। चि । देववाञ्छिते ॥

देवेष्टा । स्त्री । वनवीजपूरके ॥

देवोद्यानम् । न । सुपर्वणां क्रीडाकाननेषु ॥ तानिच नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमितिचत्वारि देवोद्यानानि भवन्ति ॥ देवोद्यानानि वैभ्राजं मिश्रकं सिध्रकावणम् । चैत्ररथश्चेति त्रिकाण्डशेषः ॥

देश: । पुं । भूगोलभागविशेषे । कुरुपञ्चालादिविषये । जनपदे । नीवृति ॥ स्थानमात्रे । सचिविधः । जाङ्गलोऽनूपः साधारणश्चेति । एतन्मध्येपि देवेशि देशभेदाह्यनेकशः । कोटिशःसन्तिदेवेशि एते मुख्याःप्रकीर्त्तिताः ॥ एतन्मध्येषट्पञ्चाशन् मध्ये । एतेमध्यप्राच्यादिदेशाद्रत्यर्थः ॥ दिशति । दिश० । पचाद्यच् ॥

देशक: । चि । शास्तरि ॥ इतिहेमचन्द्रः ॥

देशकारी । स्त्री । रागिणीविशेषे ॥

देशपरिच्छिन्नः । त्रि । मूर्त्तत्वेन सर्वदेशावर्त्तिनि ॥

देशरूपम् । न । उचिते । समञ्जसे ॥ दिशअतिसर्जने । घञ् । देशोरूपमस्य । दिश्यमानस्योचितस्यरूपम् ॥ यद्वा देशनम् । घञ् । प्रशस्तं देशनं वा । प्रशंसायां रूपप् ॥

देशाखी । स्त्री । रागिणीविशेषे ॥

देशान्तरम् । न । सुमेरुलङ्कयो र्मध्यरेखास्वरूपदेशस्वदेशयो रन्तरयोजने ॥ देशान्तरपरिभाषायां वृद्धमनुः । प्राचोगवत्रिभिश्चान्ते गिरिर्वाव्यवधायकः । महानद्यन्तरं यत्र तद्देशान्तरमुच्यते ॥ देशनामनदीभेदान्निकटोपि भवेद्यदि । तत्तुदेशान्तरं प्रोक्तंस्वयमेवस्वयम्भुवा ॥ दशरात्रेण या वार्त्ता यत्रनश्रूयते ऽथवेति वृहस्पतिः ॥ देशान्तरं वदन्त्येके षष्टियोजनमायतम् । चत्वारिंशद्वदन्त्येके त्रिंशदेकेतथैवचेति ॥

देशिक: । पुं । मूलमन्त्रप्रदे श्रीगुरौ ॥ यथा । शरणं नहि मम जननी न पिता न सुता न सोदरा नान्ये । परमं शरण मिदमेव चरणं मम मूर्द्ध्नि देशिकन्यस्त मित्याचार्यार्या ॥ चि । पथिके ॥ देश्ये ॥

देशित: । चि । उपदिष्टे ॥

देशी । पुं । गानप्रकारे । क्वचिद्देशविशेषे गीयमाने ॥

देशिनी । स्त्री । तर्जन्याम् ॥

देशी । स्त्री । रागिणीविशेषे ॥

देश्यम् । न । पूर्वपक्षे ॥ त्रि । देशार्हे ॥

देष्णु: । चि । दातरि ॥ दुर्दमे ॥ ददाति । उदाम्० । गादाभ्यामिष्णुच् ॥

देह: । पुं । न । काये । शरीरे ॥

सच स्थूलसूक्ष्मकारणभेदात् त्रिविधो भवति ॥ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ । देहे चेत् प्रीतिमान् मूढो भविता नरकेऽपि सः ॥ स्मृते ॥ दिह्यते । दिह० । घञ् ॥ न्यायमते पृथिव्यादेहं योनिजमयोनिजञ्च । योनिजं जरायुजमण्डजञ्च । अयोनिजं स्वेदजोद्भिदादिकम् । नारकिणां शरीरमप्ययोनिजम् । जलीयं देहमयोनिजं वरुणलोके प्रसिद्धम् । तैजसं देहमयोनिजं सूर्यलोके प्रसिद्धम् । वायोर्देहमयोनिजं तदेव पिशाचादीनामिति सिद्धान्तमुक्तावली ॥

देहकः । पुं । देहे ॥ स्वार्थे संज्ञायां वा कन् ॥

देहकोषः । पुं । पक्षे । पङ्खा इति भाषा ॥ इ० श० चं० ॥

देहक्षयः । पुं । कायनाशे ॥ रोगे ॥ देहस्य क्षयः येन वा ॥

देहदः । पुं । पारदे ॥

देहदुर्गन्धता । स्त्री । शरीरदौर्गन्ध्ये ॥ तन्नाशकौषधं यथा । अर्जुनस्य तु पुष्पाणि जम्बुपत्रयुतानि च । सलोध्राणि च तल्लेपो देहदुर्गन्धतां हरेदिति गारुडे १९४ अध्यायः ॥

देहद्वयम् । न । स्थूलसूक्ष्मलक्षणे ॥ देहयोर्द्वयम् ॥

देहधारकम् । न । अस्थि ॥

देहधिः । पुं । पक्षे । पङ्खा इति भाषा ॥

देहभृक् । पुं । वायौ ॥

देहनाथः । पुं । प्राणे ॥

देहभृत् । पुं । जीवे ॥ मनुष्योऽहं ब्राह्मणोऽहं गृहस्थोऽहमित्याद्यभिमानेनाबाधितेन देहं कर्माधिकारहेतुवर्णाश्रमादिरूपं कर्त्तृत्वभोक्तृत्वाद्याश्रयं स्थूलसूक्ष्मशरीरेन्द्रियसङ्घातं बिभर्त्ति अनाद्यविद्यावासनावशात् व्यवहारयोग्यत्वेन कल्पितमसत्यमपि सत्यतया स्वभिन्नमपि स्वाभिन्नतया पश्यन् धारयति पोषयति चेति देहभृत् । डुभृञ्० । क्विप् तुक् ॥ विवेकज्ञानशून्ये अविद्यावति कर्त्तृत्वाभिमानिनि ॥ स त्रिविधः । रागादिदोषप्राबल्यात् काम्यनिषिद्धादियथेष्टकर्मानुष्ठायी मोक्षशास्त्रानधिकार्य्येकः १ । अपरस्तु यः प्राकृतः सुकृतवशात् किञ्चित्प्रक्षीणरागादिदोषः सर्वाणि कर्माणि त्यक्तुमशक्नुवन् निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमित्तिकानि च कर्माणि फलाभिसन्धित्यागेन सत्त्वशुद्ध्यर्थमनुतिष्ठन् गौणसन्न्यासी मोक्षशास्त्राधिकारी द्वितीयः २ । ततो नित्यनैमित्ति

ककर्मानुष्ठानेनाप्तः करणशुद्ध्यासमुपजातविविदिषः श्रवणादिना वेदनं मोक्षसाधनं सम्पिपादयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पति विविदिषासन्न्यासि समाख्यस्तृतीयः ३ ॥

देहयात्रा । स्त्री । यमपुरीगमने । मरणे ॥ भोजने ॥ देहस्य यात्रा ॥

देहला । स्त्री । मद्ये ॥ इतिशब्दचन्द्रिका ॥

देहलिः । स्त्री । देहल्याम् ॥

देहलिकाश्रमम् । न । अम्बादेव्यधिष्ठिते पिठविशेषे ॥

देहली । स्त्री । गृहावग्रहण्याम् । द्वारपिण्ड्याम् । देहल इतिभाषा ॥ देहनम् । दिह० । भावे घञ् । देहं लाति । ला० । आतानुपेतिकः । गौ० ङीष् ॥

देहसाम्यम् । न । अङ्गसमत्वे ॥ अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते । नोचेन्नैव समानत्वं मृजुत्वं शुष्कवृक्षवत् ॥

देहसारः । पुं । मज्जनि ॥

देहातीतः । पुं । घटादिवद्देहद्रष्टृत्वेन देहविलक्षणे आत्मनि ॥

देहात्मवादी । त्रि । चार्वाके ॥ तस्येदं मतम् । शरीरमेवात्मा प्रज्वलितगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहमित्यनुभवाच्चेति ॥ देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताः । इति भाष्यम् ॥

देहाध्यासः । पुं । मनुष्योऽहं कृष्णोऽहं गौरोऽहमित्यादिबुद्धौ ॥ देहे अध्यासः ॥

देहिका । स्त्री । कीटविशेषे । उपादिके । उपजिह्विकायाम् ॥

देही । त्रि । देहवति । शरीरिणि । देहतादात्म्याध्यासापन्ने जीवे ॥ देहाः सर्वे भूतभविष्यद्वर्त्तमाना जगन्मण्डलवर्त्तिनोऽस्य सन्तीति तया । एकस्यैव विभुत्वेन सर्वदेहयोगित्वाल्लिङ्गदेहोपाधिरात्मा देहीत्युच्यते ॥ देहभिन्नात्मदर्शिनि ॥ सच प्रवासीव परगेहे तत् पूजापरिभवादिभिरप्रहृष्यन्नविषीदन्नहङ्कारममकारशून्यस्तिष्ठति । अज्ञो हि देहतादात्म्याभिमानाद् देह एव न तु देही सच देहाधिकरणमेवात्मनोऽधिकरणं मन्यमानो गृहे भूमा वासनेवाहमासे इति मन्यते न तु देहमास इति ॥ * ॥ न्यायमते अस्य गुणा यथा । बुद्ध्यादिषट् कं संख्यादि पञ्चकं भावना तथा । धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ॥ अयमिन्द्रियाद्यधिष्ठाता पुण्यपापाश्रयः । ज्ञानसुखादियोगतो मान-

सप्रत्यक्षविषयः । प्रादेशादौ प्रवृत्त्यादिना ऽनुमेयः । अहमित्याकारप्रत्ययाश्रयः । मनोमात्रस्य गोचरः । विभुः परममहत्त्ववान् । इति भाषापरिच्छेदः ॥

दैत्यम् । न । दीक्षायाम्भवे मौञ्ज्यादिकर्मणि ॥

दैतेयः । पुं । असुरे । दैत्ये ॥ दित्या अपत्यम् इत्यर्थे ङीषन्तात् स्त्रीभ्यो ढक् ॥

दैत्यः । पुं । असुरे ॥ दितेरपत्यमित्यर्थे दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥

दैत्यगुरुः । पुं । उशनसि । शुक्रे ॥ दैत्यानां गुरुः ॥

दैत्यदेवः । पुं । वरुणे ॥ वायौ ॥

दैत्यनिसूदनः । पुं । विष्णौ ॥

दैत्यपुरोधाः । पुं । } शुक्रे ॥
दैत्यपुरोहितः । पुं । }

दैत्यमाता । स्त्री । दितौ ॥

दैत्यमेदजः । पुं । गुग्गुलौ ॥ इ॰ रानि॰ ॥

दैत्यमेदजा । स्त्री । भूमौ ॥

दैत्ययुगम् । न । असुराणांयुगे ॥ तद्देवपरिमाणेन द्वादशसहस्रवर्षाणि । मनुष्यमानेन चतुर्युगसङ्ख्यम् ॥ इतिशब्दार्थकल्पतरुः ॥

दैत्या । स्त्री । मुरायाम् ॥ चण्डौषधौ ॥ मद्ये ॥ दैत्यभार्य्यायाम् ॥ दितेरियम् । यमन्ताट्टाप् ॥

दैत्यारिः । पुं । देवमात्रे ॥ विष्णौ ॥ दैत्यानामरिः ॥

दैत्याहोरात्रः । पुं । मानवानां वर्षे ॥ इतिशब्दार्थकल्पतरुः ॥

दैनन्दिनम् । त्रि । दिनेदिने भवे ॥

दैनिकी । स्त्री । दिनभृतौ । एकदिनकर्ममूल्ये ॥ इतिशब्दमाला ॥

दैन्यम् । न । दीनत्वे ॥ कार्पण्ये ॥

दैर्घ्यम् । न । आयामे । दीर्घत्वे ॥ दीर्घस्य भावः । ष्यञ् ॥

दैवम् । न । भागधेये । भाग्ये । फलाभिमुखे कर्मणि । पूर्वजन्मार्जितसदसत्कर्मविपाके ॥ प्रागजन्मनि कृतं कर्मशुभंवा यदिवा ऽशुभम् । दैवशब्देन निर्द्दिष्ट मिहजन्मनितद्बुधैः ॥ दैवं पुरुषकारश्च द्वेवेशसदृशावुभौ । उपायस्तुविधातव्यो दैवात् फलति सर्वथा ॥ अत्रोक्तं ब्रह्मवैवर्त्ते गणेशखण्डे । दैवाधीनं जगत् सर्वंजन्मकर्म्म शुभाशुभम् । संयोगाश्च वियोगाश्च नचदैवात् परंबलम् ॥ कृष्णायत्तञ्चतद् दैवं सदैवात् परतस्ततः । भजन्ति सततं सन्तः परमात्मानमीश्वरम् ॥ दैवं वर्द्धयितुं शक्तः क्षयंकर्त्तुं स्वलीलया । नदैववद्ध स्तद्भक्त-

श्वाविशाग्रीव निर्गुण इति ॥ अस्य गतिर्विलक्षणोक्ता यथा। तृणं वज्रायते नूनं वज्रञ्चैव तृणायते। बलवान् बलहीनः स्याद्दैवस्य गतिरीदृशीति॥ दैवतीर्थे। दक्षहस्ताङ्गुलीनामग्रे॥ दैवताज्ञाने॥ दैवश्राद्धे॥ अनुग्राहकदैवताज्ञाने। उपास्ये॥ उत्पातविज्ञाने॥ देवादागतम्। ततआगतइत्यण्॥ देवानामिदम्। तस्येदमित्यण्॥ देवो देवताऽस्य। साऽस्यदेवतेत्यण्। देवाद्यञञाविति अञ्वा॥ पुं। विवाहविशेषे॥ यथा। यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते। अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते॥ यज्ञे ज्योतिष्टोमादौ। दैवस्यैवायम्। नतु दैवदैवतात्वं विवाहस्य सम्भवति॥ वृद्धभेदे॥ दैवसर्गे। त्रिविधभूतादिसर्गे॥ त्रि। होमादौ दैवकर्मणि॥ प्रमीतौ पितरौ यस्य देहस्तस्याऽशुचिर्भवेत्। नापि दैवं न वापित्र्यं यावत्पूर्णो न वत्सरः॥ दिविभवे॥

दैवकी। स्त्री। देवक्याम्॥

दैवकीनन्दनः। पुं। देवकीनन्दने॥

दैवकोविदा। स्त्री। दैवज्ञायाम्॥ त्रि। दैवपण्डिते॥

दैवज्ञः। पुं। गणके। ज्योतिर्विदि। पूर्वजन्मार्जितसदसत्कर्मविपाकज्ञे॥ दैवं जानाति। ज्ञा०। आतोनुपेति कः॥ शाखालोहादिव्यापारी रसादिविक्रयी च यः। स याति नागवेष्टञ्च नागैर्वेष्टित एव च॥ वसेत्स्वलोममानाब्दं तथैव नागदंशितः। ततो भवेत्स गणको वैद्यश्च सप्तजन्मसु॥ गोपश्च कर्मकारश्च रङ्गकारस्ततः शुचिरिति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

दैवज्ञा। स्त्री। विप्रश्निकायाम्। लक्षणादिना जनानां शुभाशुभं जानन्त्याम्॥ दैवं शुभाशुभं जानाति। ज्ञा०। कः। टाप्॥ दैवज्ञभार्यायाम्॥

दैवतः। पुं। न। सुरे॥ प्रतिमायाम्। देवशब्दात्स्वा०तल्। ततः स्वा०प्र० अण्॥ न। देवतानां समूहे॥ त्रि। देवतासम्बन्धिनि॥

दैवतन्त्रः। त्रि। ईश्वराधीने॥ दैवं तन्त्रं प्रधानं यस्य॥

दैवदीपः। पुं। लोचने॥

दैवपरः। त्रि। दैवसारे। यद्भविष्ये। कर्मठोक इति भाषा॥ दैवं परं श्रेष्ठं यस्य॥

दैवप्रश्नः। पुं। उपश्रुतौ। आकाशवाण्याम्॥ दिविभवो दैवः। स चासौ प्रश्नश्च॥ नक्तं निर्गत्य यत्किञ्चिच्छु

भाशुभकरं वचः । श्रूयतेतद्विदुर्धी-
रा दैवप्रश्नमुपश्रुतिम् ॥

दैवयज्ञः । पुं । दर्शपूर्णमासज्योतिष्टो
मादिरूपे कर्मयोगिभिरनुष्ठेये यौ
गयज्ञे ॥ इष्टाख्यश्रौतकर्मणि ॥ अ-
ग्नौहोमे ॥

दैवयुगम् । न । देवानांयुगे ॥ तच्चदे
वमानेन द्वादशसहस्रवर्षम् ॥ मनु-
ष्यपरिमाणेन चतुर्युगमानम् ॥

दैवलकः । पुं । भूतसेवके । भौते ॥ इ
तिहारावली ॥ त्रि । देवलसम्ब-
न्धिनि ॥

दैवलेखकः । पुं । मौहूर्त्ते । गणके ॥

दैववर्जितः । त्रि । हतभाग्ये ॥

दैववाणी । स्त्री । चित्तोक्तौ । दैवप्र
श्ने ॥ गीर्वाणवाग्वाणाम् । संस्कृतवा-
क्ये ॥ संस्कृतंनामदैवीवागन्वाख्या
तामहर्षिभिरितिदण्डी ॥

दैववित्तम् । न । देवतास्थाने ॥

दैवसर्गः । पुं । पिशाचभूतादिसर्गेष्वेक-
स्मिन् ॥ सचब्राह्मादिभेदादष्टविध
स्त्रिविधासर्गेद्रष्टव्यः ॥

दैवसिकम् । त्रि । दिवसभवे ॥

दैवाकरिः । पुं । शनौ ॥ यमे ॥ स्त्री ।
यमुनायाम् ॥

दैवागारिकः । त्रि । देवागारेनियुक्ते ॥
तत्रनियुक्तइतिठक् । अगारान्ताट्ठन्

तु स्वा० अत ॥

दैवात् । अ । हठादित्यर्थे ॥

दैवाहोरात्रः । पुं । देवानामेकस्मिन्
दिने । मानवानां संवत्सरे ॥ उत्तरा
यणंहिदेवानांदिनंभवति दक्षिणाय
नं रात्रिः ॥ दैवश्चासावहोरात्रश्च ॥

दैविकम् । न । दैवश्राद्धे ॥ देवानुद्दि-
श्य यच्छ्राद्धं तत्तुदैविकमुच्यते । ह
विष्येण विशिष्टेन सप्तम्यादिषु यत्न
तः ॥ त्रि । दैवादागते । विधिहेतौ
॥ यत्तुसम्यगुपक्रान्तं कार्यमेति विप
र्ययम् । पुंसांतत्रानुपायेभ्यो दैवा-
न्तरितपौरुषः ॥ देवसम्बन्धिनि ॥

दैवी । स्त्री । सात्त्विक्यांप्रकृतौ ॥ देव-
सम्बन्धिन्याम् ॥ चिकित्साविशेषे ॥
आसुरी मानुषी दैवीचिकित्साचि
विधामतेति वैद्योक्तिः ॥

दैवोदासिः । पुं । दिवोदासात्मजे । प्र
तर्दने ॥ दिवोदासस्यापत्यम् । अ-
तइञ् ॥

दैव्यम् । न । दैवे । भाग्ये ॥ देवाना-
मिदमिति प्राग्दीव्यतीयेष्वर्थेषु दे
वाद्यञञाविति यञ् ॥

दैशिकः । त्रि । देशसम्बन्धिनि ॥ स-
म्बन्धविशेषे ॥ देशनिष्ठविशेषणता
याम् ॥

दैष्टिकः । त्रि । भाग्याधीनजाते ॥ का

लेन जाते ॥ दैवप्रमाणके । दैवप
रे ॥ दिष्टंभागधेय मितिमति र्यस्य
। अस्तिनास्तिदिष्टंमतिरिति ठक् ।
नालम्बते दैष्टिकतां न निषीदति
पौरुषे ॥

दैहिकः । त्रि । देहसम्बन्धिनि ॥

दोःशिखरम् । न । स्कन्धे ॥

दोःसहस्रभृत् । पुं । कार्त्तवीर्यार्जुने ॥
वाणासुरे ॥

दोग्धा । पुं । अर्थोपजीविकवौ ॥ गो-
पाले ॥ वत्से ॥ त्रि । दोहनकर्त्तरि ॥

दोग्धी । स्त्री । गवि ॥

दोधः । पुं । गोवत्से ॥

दोधकः । पुं । दोधकवृत्ते ॥

दोधकवृत्तम् । न । त्रिष्टुप्छन्दःप्रभेदे ॥
यथा । भचितयं यदिकर्णसमेतं पन्न
गराजसुभाषितमेतत् । पण्डितम-
ण्डलिकाहृतचित्तं भामिनिभावय-
दोधकवृत्तम् ॥ यथा । फुल्लकदम्बल
सदनमालो निर्हल दिन्द्रमणीरुचि
जालः । एषउपैतिघनाघनकालःपा
न्थवधूजनदर्शितकालः ॥

दोधूयमानः । त्रि । पुनःपुनरतिशयेन
वाकम्पविशिष्टे ॥ प्रलयेपिदोधूय-
मानाःपरमाणव स्तिष्ठन्तीतिशिरो-
मणिः ॥

दोरः । पुं । डोर इति भाषाप्रसिद्धा

थांरज्जौ ॥

दोरकः । पुं । वीणातन्तुबन्धनरज्जौ ॥

दोर्गडुः । पुं । कुण्ठितहस्ते । बाहु-
कुण्ठे ॥

दोर्ग्रहः । त्रि । अचामे । बलवति ॥ भुज
स्यग्रहणे ॥ भुजस्य व्यथायाम्

दोर्दण्डः । पुं । बाहुरूपदण्डे ॥

दोर्म्मध्यम् । न । बाहुमध्यभागे । वा
जु० इति भाषा ॥

दोर्म्मूलम् । न । कक्षे । भुजकोटरे ।
काख० इति भाषा ॥

दोलः । पुं । दोलने ॥ श्रीकृष्णस्योत्
सवविशेषे । झूला इतिभाषा ॥ दुल
उत्क्षेपे । भावे घञ् ॥

दोलनम् । न । आन्दोलने । कम्पने ॥

दोला । स्त्री । नील्याम् ॥ प्रेङ्खायाम् ।
डौली इतिभाषा ॥ उद्यानादिषु-
क्रीडार्थे काष्ठादिरचिते हिन्दोले ।
हिंडोला इतिभाषा ॥ यन्त्रविशेषे
। स्वेदने ॥ दोलति दोलयति दो-
ल्यते वा । दुल० । अच् घञ्वा ॥

दोलायमानः । त्रि । दोलनविशिष्टे ॥
यथा । दोलायमानं गोविन्दं मञ्चस्थं
मधुसूदनम् । रथस्थं वामनं दृष्ट्वा
पुनर्जन्म न विद्यते इत्युत्कलख-
ण्डः ॥

दोलायुद्धम् । न । अनियतजयपराजये ॥

दोलिका । स्त्री । हिन्दोलायाम् । हिंडोला इतिभाषा ॥ दोलैव । स्वार्थे कन् ॥

दोलिकाचक्रम् । न । दोलारोहणमुहूर्त्तोपयोगिनक्षत्रविचारार्थचक्रे ॥ यथा । दोलारोहे ऽर्कभात् पञ्चशरपञ्चेषुसप्तभैः । नैरुज्यंमरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः ॥

दोलित: । त्रि । आन्दोलिते । कम्पिते ॥

दोली । त्रि । दोलनवति ॥ दोलोदोलनमस्त्यस्यास्मिन्वा । इनिः ॥

दोली । स्त्री । दोलायाम् । डोली इति भाषा ॥

दोलोत्सव: । पुं । चैत्रशुक्लतृतीयायां कर्त्तव्यत्वेनोक्ते उत्सवविशेषे ॥ अस्यविधिस्तुदेवीपुराणादौ द्रष्टव्यः ॥

दो: । पुं । भुजे । प्रकोष्ठे ॥ दाम्यत्यनेन । दम॰ । दमेर्डोसिः । षत्वस्यासिद्धत्वात् रुत्वविसर्गौसिद्धौ ॥

दोष: । पुं । दूषणे ॥ एकोहिदोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ पापे ॥ आचमनं विना भक्षणेदोषाभावो यथा । मधुपर्केच सोमेच ताम्बूलस्यच भक्षणे । फलमूलेचेक्षुदण्डेन दोषं प्राहवैमनुः ॥ अदातावंशदोषेण कर्मदोषाद्दरिद्रता । उन्मादोमातृदोषेण पितृदोषेण मूर्खता ॥ वातपित्तकफेषु ॥ वायुः पित्तं कफश्चेति त्रयोदोषाः समासतः । विकृताविकृतादेहंघ्नन्ति ते वर्द्धयन्तिच ॥ तेव्यापिनोपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः ॥ धातवश्चमलाश्चापिदुष्यन्त्येभिर्यतस्ततः । वातपित्तकफाएते त्रयोदोषा इतिस्मृताः ॥ ऋतुभेदेन विहारादिनाचैषां चयप्रकोपशमना नियता । ग्रीष्मेसञ्चीयतेवायुः प्रावृट्काले प्रकुप्यति । प्रायेणोपशमंयाति स्वयमेवसमीरणः ॥ शरत्कालेव सन्तेच पित्तं प्रावृड्तौ कफः । चयकोपशमान् दोषा विहाराहारसेवनैः ॥ समानैर्यान्त्यकालेपि विपरीतैर्विपर्यय इति ॥ वातपित्तश्लेष्ममलमूत्रादिपरिपूर्णत्वेन कायजुगुप्सितत्वे ॥ काव्यगुणेतरस्मिन् ॥ सचरसाद्यपकर्षकः । यथा । मुख्यार्थहतिर्दोषो रसश्चमुख्यस्तदाश्रयाद्वाच्यः ॥ दोषं लक्षयति ॥ प्रवर्त्तना लक्षणादोषाः ॥ १८ ॥ दोषाइतिबहुवचनं रागद्वेषमोहात्मकत्वस्य त्रयत्वापनाय । प्रवर्त्तनाप्रवृत्तिजनकत्वम् तदेवलक्षणं येषाम् । यद्यपीदं शरीरादृष्टेश्वरेच्छादावतिव्याप्तं तथापि लौकिकप्रत्यक्षविषयकत्वेसतीतिविशेषणीयम् । योगादिमोच

रत्नमालायामप्यमायमुत्वेसतीति विशेषयन्ति ॥ दुष्यति अनेनवा । दुषवैकृत्ये । अच् अकर्त्तरिचकारके इत्यनेनकरणेवा घञ् ॥

दोषग्राही । चि । पुरोभागिनि । खले ॥ विसृज्य सूर्पवद्दोषान् गुणान् गृह्णन्ति साधवः । दोषग्राही गुणत्यागी चालनीवद्धि दुर्जनः ॥ दोषंगृह्णाति । ग्रह० । णिनिः ॥

दोषज्ञः । त्रि । विपश्चिति । पण्डिते ॥ चिकित्सके ॥ दोषविषयकज्ञानयुक्ते ॥ दोषंजानाति । ज्ञा० । आतइतिकः ॥

दोषत्रयम् । न । वातपित्तकफेषु ॥

दोषवान् । त्रि । दुष्टे ॥

दोषा । अ । रात्रौ ॥ रात्रिमुखे ॥ दुष्यत्यत्र । दुष० । वाहुलकात् आप्रत्ययः ॥

दोषा । स्त्री । रात्रौ ॥ भुजे ॥ दाम्यत्यनेन । दम० । दमेर्डोसिः । भागुरिमतेनटाप् ॥

दोषाकरः । पुं । चन्द्रे ॥ त्रि । दोषाणामाकरे ॥

दोषाक्लेशी । स्त्री । वनवर्बुरिकायाम् ॥ इतिराजनिर्घण्टः ॥

दोषातनः । त्रि । रात्रिभवे ॥ सायञ्चिरमितिट्युः ॥

दोषातिलकः । पुं । प्रदीपे ॥

दोषास्यः । पुं । प्रदीपे ॥

दोषिकः । पुं । रोगे ॥

दोषी । त्रि । अपराधिनि । दोषयुक्ते ॥

दोषैकदृक् । चि । पुरोभागिनि । खले ॥ दोष एवैकस्मिन् नतुगुणे दृक् ज्ञानमस्य ॥

दोस्थः । पुं । क्रीडायाम् ॥ क्रीडके ॥ सेवायाम् ॥ सेवके ॥ त्रि । दोःस्थिते ॥

दोहः । पुं । दोहनपात्रे ॥ दुग्धे ॥ दुह्यते ॥ दुहप्रपूरणे । कर्मणिघञ् ॥

दोहजम् । न । दुग्धे ॥

दोहडिका । स्त्री । भाषावृत्ते पज्झटिकाप्रभेदे ॥ भाषात्रयोदशकंयदि पूर्वं लघुकपरिविरामि । पठपुनरेकादशं दोहडिकाद्विगुणेन ॥ प्राकृतेप्रचारः । यथा । राईदोहडिपठनसुनि हँसिओकाह्णगोआल । वृन्दावनघनकुञ्ज चलिओकमलरसाल ॥ अस्यार्थः । हेमातः दोहडिकापाठंश्रुत्वाकृष्णोगोपालो हसित्वा कमपिरसालं चलितः कुत्र वृन्दावनघनकुञ्जे वृन्दावनस्य निविडनिकुञ्जे । माइइतिकचित्पाठ स्तन्मतेन राधिकाया दोहडिकापाठं श्रुत्वा ॥ गुरुलघुव्यत्ययेनवहुविधाभवति ॥

दोहदः । पुं । न । गर्भे ॥ गर्भिण्याः

भिलाषे। स्वास्थसायाम्॥ गर्भिण्यास्त स्पृहिच्छायां विशेषेण प्रयुज्यते। दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्॥ देशे सम्पूजितं तस्यै हिताय हितलक्षणम्। अत्राविघाते गर्भस्य विकृतिच्युतिरेव च॥ चिह्ने। गर्भलक्षणे॥ न। स्पृहायाम्॥ दोहमाकर्षं ददाति। डुदाञ्॰। आतोनुपे-सिकः॥

दोहदलक्षणम्। न। वयःसन्धौ॥ गर्भे॥

दोहदवती। स्त्री। अभ्यादिद्रव्यविशेषाभिलाषवत्यां गर्भवत्याम्। अस्याख्यानम्॥ यथाह गर्भिण्याः कर्त्तव्याकर्त्तव्यमुक्तं मत्स्यपुराणे। दित्यां गर्भमथाधत्त कश्यपः प्राहतां पुनः। त्वया यत्नो विधातव्योऽस्मिन् गर्भे वरानने॥ संवत्सरशतं त्वेकमस्मिन्नेव तपोवने। सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि॥ न स्थातव्यं न गन्तव्यं वृक्षमूलेषु सर्वदा। नोपस्करेषूपविशेन्मुषलोलूखलादिषु॥ जलञ्च नावगाहेत शून्यागारञ्च वर्जयेत्। वल्मीकेषु न तिष्ठेत न चोद्विग्नमना भवेत्॥ विलिखेन्न नखैर्भूमिं नाङ्गारेण न भस्मना। न शयालुः सदा तिष्ठेद् व्यायामञ्च विवर्जयेत्॥ न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत्। वर्जयेत् कलहं लोके गात्रभङ्गञ्च वर्जयेत्॥ न मुक्तकेशा तिष्ठेत नाशुचिः स्यात् कदाचन। न शयीतोत्तरशिरा न चापरशिराः क्वचित्॥ न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती। नामङ्गल्यां वदेद्वाचं न च हास्याधिका भवेत्॥ कुर्य्याच्च गुरुशुश्रूषां नित्यं मङ्गलतत्परा। सर्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत्॥ कृतरक्षा सुभूषा च वास्तुपूजनतत्परा। तिष्ठेत् प्रसन्नवदना भर्त्तुः प्रियहिते रता॥ दानशीला तृतीयायां पार्वण्यां नक्तमाचरेत्। इतिवृत्ता भवेन्नारी विशेषेण तु गर्भिणी॥ यस्तु तस्यां भवेत् पुत्त्रः स्थिरायुर्बुद्धिसंयुतः। अन्यथा गर्भपतनमवाप्नोति न संशयः॥ तस्मात् त्वमनया हत्त्या गर्भेऽस्मिन् यत्नमाचरेति॥ दोहदो गर्भिण्यभिलाषोऽस्त्यस्याः। मतुप्। ङीप्॥

दोहदान्विता। स्त्री। दोहदवत्याम्॥

दोहदिनी। स्त्री। दोहदवत्याम्॥ ताञ्च द्विहृदयां नारीमाहुर्दोहदिनीं बुधाः॥ दोहदोऽस्त्यस्याः। अत इनिः। ङीप्॥

दोहनम्। न। स्तनाद्दुग्धनिस्सारणे॥

दोहनी। स्त्री। दोहनपात्रे। पायीम्॥

दोहलः। पुं। दोहदे॥ इतिशब्दार्थ-कल्पतरुः॥

दोहलवती। स्त्री। दोहदवत्याम्॥

दोहली। स्त्री। अशोकवृक्षे॥

दोहा। स्त्री। मात्रावृत्तविशेषे॥ षट् कलतुरगौ चिकलमपि विषमपदे विनिधेहि। समपादान्ते चैककलमिति दोहामवधेहि॥ यथा। चरणसरोरुहमस्तु हृदि मदवने तव नाम। चतुषिरूपं यावदमु रमय मनो मम रामेति॥

दोहपनयः। पुं। दुग्धे॥

दोहीयान्। त्रि। अतिशयदोहके॥

दोह्यम्। त्रि। दोहनीये। दुग्धे॥

दौःसाधिकः। पुं। द्वारपाले॥

दौकूलः। पुं। दुकूलावृतेरथे॥ ॥ दुकूलेन परिवृतोरथः। परिवृतोरथ इत्यण्॥

दौत्यम्। न। दूतभावे॥ दूतकर्मणि॥ दूतस्य भावः कर्म वा। दात्यञ्।

दौरात्म्यम्। न। दुरात्मनो भावे॥ दुरात्मनः कर्मणि॥ दुर्निन्दित आत्मा यत्नः धृतिः बुद्धिः स्वभावः शरीरं वा यस्य सदुरात्मा। तस्य भावः कर्म वा। ष्यञ्॥

दौर्ग्यम्। न। दुर्गवृत्तिधर्मे। दुर्गसम्बन्धिनि॥ दुर्गस्यभावः। ष्यञ्॥ दुर्गस्येदम्॥

दौर्जन्यम्। न। दुर्जनत्वे। अनार्यतायाम्॥

दौर्बल्यम्। न। दुर्बलत्वे॥ भावे ष्यञ्॥

दौर्भागिनेयः। पुं। दुर्भगापुत्रे॥ दुर्भगाया अपत्यम्। कल्या॰ ढक् इनङादेशश्च। हृद्भगेत्युभयपदवृद्धिः॥ स्त्रियांङीपि दौर्भागिनेयी॥

दौर्भाग्यम्। न। दुर्भगत्वे॥ दुर्भगस्य दुर्भगायाश्च भावः। ष्यञ्। हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः॥ भुक्ता पितृगृहेनारी भुङ्क्ते स्वामिगृहे यदि। दौर्भाग्यंजायते तस्याः शपन्तिकुलदेवता इतिज्योतिस्तत्त्वम्॥

दौर्मनस्यम्। न। दुःखनिबन्धनचित्तावसादे। इच्छाविघातादिबलवद्दुःखानुभवजनिते चित्तस्य तामसपरिणामविशेषे। क्षोभापरपर्याये स्तब्धीभावे॥ सतुद्वेषाख्यविपर्ययहेतुत्वात् कषायत्वाच्च लयवत् समाधेर्विरोधीत्युच्यते॥ दुर्मनसो भावः। ष्यञ्॥ बाह्याभ्यन्तरैः कारणैर्मनसो दौस्थ्ये॥

दौर्वसमम्। न। उपपुराणान्तरे॥

दौर्वीणम्। न। मृष्टपर्णे॥ दूर्वारसे॥

दौर्हृदम्। न। इच्छायाम्। लालसा

द्याम् । दोहदे ॥ दुर्जनत्वे॥ दुर्हृदः कर्मभावोवा । यु० अण् ॥

दौलेयः । पुं । कच्छपे॥ दुल्याअपत्यम् । इतश्चानिञ इति ढक् ॥

दौवारिकः । पुं । द्वाःस्थे । वेत्रधरे ॥ द्वारेनियुक्तः। तत्रनियुक्त इतिटक् ॥

दौवारिकी । स्त्री । प्रतीहार्य्यम् ॥ ङीप् ॥

दौष्कुलेयः । त्रि । दुष्कुलीने ॥ दुष्कुलस्यापत्यम् । दुष्कुलाड्ढक् ॥

दौष्ठवम् । न । दुष्टुभावे ॥ उद०३.ञ् ॥

दौष्यन्तिः । पुं । भरतनृपे॥ दुष्यन्तस्यापत्यम् । अतइञ् ॥

दौहित्रः । पुं । कुतुपे । दुहितुः सुते॥ दुहितुरपत्यम् । अनृष्यानन्तर्ये विदादिभ्योञ् ॥ न । त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतप स्तिलाः । दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिथा: ॥ कपिलायाघृतञ्चैव दौहित्रमितिचोच्यते॥ इतिमार्कण्डेयपु०॥ पौत्रदौहित्रयो र्लोके विशेषो नास्ति कश्चन । तयोर्हि मातापितरौ सम्भूतौतस्यदेहत: इति दायभाग:॥ दौहित्रोपि ह्यमुत्रैनं सन्तारयति पौत्रवदितिमनुः ॥

द्य । अ । हिंसायाम् ॥ प्रातिलोम्ये ॥ पादपूरणे ॥

द्यावाक्षमे । स्त्री । द्वि० । भूदिवौ । स्वर्गपृथिव्योः ॥ द्यौश्च क्षमाच । दिवो द्यावा ॥

द्यावापृथिवीयम् । न । द्यावापृथिव्योर्हविरादौ ॥ द्यावापृथिव्यौ देवते अस्य। द्यावापृथिवी च्यादिनाछः ॥

द्यावापृथिव्यम् । न । द्यावापृथिव्योर्हविरादौ ॥ द्यावापृथिव्यौ देवते अस्य । द्यावापृथिवीच्यत्र चायत् ॥

द्यावापृथिव्यौ । स्त्री । द्वि०। स्वर्गपृथिव्योः ॥ द्यौश्चपृथिवीच । दिवसश्च पृथिव्यामितिचाद्दिवोद्यावा ॥

द्यावाभूमी। स्त्री । द्वि०। द्यावापृथिव्योः॥ द्यौश्चभूमिश्च । दिवोद्यावेति देवताद्वन्द्वे द्यावादेशः ॥

द्युः । पुं । अग्नौ ॥ न । अह्नि ॥ गगने॥ स्वर्गे ॥ अव्युत्पन्नप्रातिपदिकोयम्॥

द्युगः । पुं । पक्षिणि ॥ इतिराजनिघंटः॥

द्युगणः । पुं । अहर्गणे ॥

द्युत् । पुं । किरणे ॥ द्युत० । क्विप् ॥

द्युतिः । स्त्री । रश्मौ ॥ शोभायाम् ॥ प्रकाशे ॥ प्रभायाम् ॥ द्युतिरङ्गनाकान्तिरित्याचार्याः ॥ द्योतते ऽनया द्युतदीप्तौ । इगुपधादितीन् ॥

द्युतिकरः । पुं । ध्रुवे ॥ त्रि । शोभाकरे॥

द्युतितम् । त्रि । दीप्तिविशिष्टे । द्योतिते ॥

द्युतिमान् । त्रि । प्रशस्तकान्तिमति ॥
द्युती । स्त्री । शोभायाम् ॥ कृदिकारादिति ङीष् ॥
द्युनम् । न । लग्नात्सप्तमराशौ ॥
द्युनिशम् । न । अहोरात्रे ॥ भवति किं द्युनिशं द्युनिवासिनाम् ॥
द्युनिवासी । पु । देवे ॥
द्युपतिः । पुं । आनौ । हंसे ॥
द्युभ्वाद्यायतनम् । न । दिवोभुवश्चाश्रये ब्रह्मणि ॥
द्युमणिः । पुं । हंसे । सूर्ये ॥ दिवो मणिरिव ॥ अर्कवृक्षे ॥ मारितेताम्रे ॥
द्युमयी । स्त्री । सूर्ययोषायाम् । विश्वकर्मणःपुत्र्याम् ॥
द्युम्नम् । न । वित्ते । धने ॥ बले ॥ दिवंमनति । म्नाअभ्यासे । आतोनुपेतिकः ॥
द्युवा । पुं । मित्रे । सूर्ये ॥ द्यौति । द्यु-अभिगमने । कनिन् युवृषितक्षिराजीत्यादिना कनिन् ॥
द्युहन्दः । पु । अहर्गणे ॥
द्युषत् । पुं । देवे ॥ दिविसीदतीति वर्त्तते । षद्लृ० । सत्सूद्विषेति क्विप् । तत्पुरुषे कृतिबहुलमिति सप्तम्या अलुक् । सुषामादित्वात्षत्वम् ॥
द्युसत् । पुं । देवे ॥ दिविसीदति । सत्सूद्विषेति क्विप् । पूर्वपदादिति षत्वन्तु न भवति । छन्दसीत्यनुवृत्तेः । तथाचमाघः । मतस्युयेवद्युसदां न्यधीयतेति ॥
द्यूतः । पु । न । अक्षादिक्रीडायाम् । कैतवे । अप्राणिकरणकक्रीडायाम् ॥ अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते । जुआ इति भाषा ॥ द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत् । तस्माद् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥*॥ परवञ्चनात्मकर्म्मणां सम्बन्धिद्यूतमक्षदेवनादिलक्षणं सर्वस्वापहरणकरं भगवतो विभूतिः ॥ देवनम् । दिवु० । भावे क्तः ॥
द्यूतकरः । त्रि । जुआरी इति भाषाप्रसिद्धे । द्यूतकर्त्तरि । दुरोदरे धूर्त्ते । कितवे ॥
द्यूतकारः । त्रि । द्यूतकारयितरि । सभिके ॥ द्यूतंकारयति । डुकृञ्० । कर्मण्यण् ॥
द्यूतकारकः । त्रि । द्यूतकारे ॥ स्वार्थेकः ॥ कारयति । कृ० । ण्वुल् । द्यूतस्य कारको वा ॥
द्यूतकृत् । त्रि । अक्षधूर्त्ते । द्यूतकरे ॥ ॥ द्यूतंकरोति । डुकृञ्० । क्विप् । तुक् ॥
द्यूतपूर्णिमा । स्त्री । कोजागरपूर्णिमा-

याम् ॥

द्यूतपौर्णमी । स्त्री । कोजागरतिथौ ॥ इति भूरिप्रयोगः ॥

द्यूतप्रतिपत् । स्त्री । कार्त्तिकशुक्लप्रतिपदि । कौमुद्याम् ॥ तथ्यथं कार्त्तिके तस्य शुक्ला या प्रतिपत्तिथिः । विष्णोर्दत्ता मही तत्र कौमुदी सा स्मृता बुधैः ॥ कुशब्देन मही ज्ञेया मुदा हर्षे च वै द्विज । धातुज्ञैः सर्वशब्दज्ञैः सा च वै कौमुदी स्मृता ॥ इति प॰ पु॰ ॥ अत्र बलेर्दैत्यस्य पूजादिकं कार्य्यम् । इत्युक्तं वामनपुराणे ॥ शङ्करस्य पुरा द्यूतं ससर्ज सुमनोहरम् । कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते ॥ जितश्च शङ्करस्तत्र जयं लेभे च पार्वती । अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोषिता ॥ तस्माद्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः । तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ॥ पराजयो विरुद्धस्य लब्धनाशकरो भवेत् । इति ॥

द्यूतबीजम् । न । वराटके । कपर्द्दके ॥ द्यूतस्य कारणे ॥

द्यूतवृत्तिः । त्रि । सभिके ॥

द्यूनम् । न । लग्नात् सप्तमराशौ ॥ यथा । धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम् । द्युं द्यूनं तथास्ताख्यं षट्-

कोणं रिपुमन्दिरम् ॥ त्रि । क्षीणे ॥ अदेवीत् । दिव॰ । क्तः । दिवोविजिगीषायामिति तस्य नः । यस्य विभाषेति नेट् । च्छ्वोरित्यूठ् ॥

द्योः । स्त्री । त्रिदशालये । स्वर्गे ॥ त्रिदशवर्त्मनि । आकाशे ॥ द्योतन्ते देवा अस्याम् । द्युत दीप्तौ । बाहुलकात् डोः ॥ द्योर्गोवत् ॥

द्योतः । पुं । प्रकाशे । आतपे ॥ द्योतनम् । द्युतेर्घञ् ॥

द्योतनम् । न । दर्शने ॥ पुं । दीपे ॥ द्युतेर्ल्युट् ॥

द्योतितः । त्रि । दीप्ते ॥

द्योभूमिः । पुं । खगे । पक्षिणि ॥ द्योर्भूमिरस्य ॥

द्योषद् । पुं । देवे ॥

द्योत्रम् । न । ज्योतिषि ॥ दीव्यन्त्यस्मिन् । दिवु । दिवेर्द्युश्चेति ष्ट्रन् उरादेशो वृद्धिश्च ॥

द्रगडः । पुं । प्रतिपत्तूर्य्ये । दगड इति गौडभाषा प्रसिद्धे वाद्ये ॥ इ॰ त्रि॰ ॥

द्रङ्क्षणम् । न । तोलके । कोल्ते । वटके । कर्षार्द्धे ॥ इति वैद्यकपरिभाषा ॥

द्रङ्गः । पुं । पुर्य्यामिति हेमचन्द्रः ॥

द्रढिमा । पुं । दृढतायाम् ॥ दृढस्य भावः । पृथ्वादिभ्य इमनिज्वा । रऋतो

हलादेर्लघोः । टेर्लोपः ॥

द्रढिष्ठः । त्रि । द्रढीयसि ॥ अयमनयोरेषां वा अतिशयेन दृढः । इष्ठन् ॥

द्रढीयः । त्रि । दृढतरे ॥

द्रप्सम् । न । घनेतरदधिनि । द्रप्स्ये ॥ दृप्यन्त्यनेन । दृपहर्षादौ । अनुदात्तस्येत्यम् । बाहुलकात्सः ॥

द्रप्स्यम् । न । द्रप्से ॥ तृप्यन्त्यनेन । तृप प्रीणने । अघ्न्यादयश्चेति निपातितः ॥

द्रम्मः । पुं । पणानां षोडशके ॥ वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणश्चतस्रः । ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः ॥

द्रवः । पुं । प्रद्रावे । पलायने ॥ नर्मणि ॥ रसे ॥ गतौ ॥ आसवे ॥ वेगे ॥ द्रवणम् । द्रुगतौ । ऋदोरप् ॥ त्रि । द्रववति ॥ आपोद्रवाः । सर्वाणि द्रवाणि तूद्रद्युखेन जुहोतीत्यादि प्रयोगात् ॥

द्रवजः । पुं । गुडे ॥ त्रि । द्रवजातवस्तुमात्रे ॥

द्रवणम् । न । अनुतापे ॥ क्षरणे ॥ गमने ॥ द्रु० । ल्युट् ॥

द्रवत्वम् । न । द्रवतायाम् । आद्यस्यन्दनासमवायिकारणे । तत्तु पृथिवीजलतेजोवृत्ति । तद्द्विविधम् । सांसिद्धिकनैमित्तिकभेदात् । तत्र सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् तेजसि सुवर्णादौ च ॥ तदुक्तम् । सांसिद्धिकं द्रवत्वं स्यात् नैमित्तिकमुदाहृतम् । सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः ॥ परमाणौ जलेनित्यमन्यतोऽनित्यमुच्यते । नैमित्तिकं वह्नियोगात् तपनीयघृतादिषु ॥ द्रवत्वंस्यन्दनेहेतु र्निमित्तं सङ्ग्रहेतु तत् । इतिभाषापरिच्छेदः ॥

द्रवत्पत्री । स्त्री । शिम्बडीहक्षे ॥

द्रवद्रव्यम् । न । दुग्धदध्याज्यतक्रासवजलक्षौद्रतैलमूत्रादिदेहतोयेषु ॥

द्रवन्ती । स्त्री । नद्याम् ॥ मूषिकपर्ण्याम् । शतमूलिकायाम् ॥ द्रवति । द्रु० । लटःशतृ । उगितश्चेति ङीप् ॥ शिखरिणी प्रभेदे ॥ यथा । शुभ्रशर्करया युक्तं निर्नीरं द्विगुणं दधि । शाणामुद्वलनं देय मेतन्मानं बुधैः स्मृतम् ॥ दध्यम्बुरहितं पात्रे खण्डदुग्धेन गालितम् । कर्पूरमरिचोन्मिश्रं द्रवन्तीपरिकीर्त्तिता ॥ द्रवन्तीमधुरा वृष्यावल्यापुष्टिकरीहिमा । वातपित्तहराच्यर्थं किञ्चित्कफकराहिसा ॥

द्रवमूर्त्तिः । त्रि । द्रवद् द्रव्यकाठिन्ये ॥

द्रवस्य मूर्त्तिः ॥

द्रवरसा । स्त्री । लाक्षायाम् ॥

द्रवाधारः । पुं । चुलुके ॥ द्रवद्रव्यरक्षापात्रे ॥

द्रविडः । पुं । देशविशेषे ॥ जल्लाख्यसङ्करजातौ ॥ द्रविडदेशोद्भवे आदौ क्षत्रिये पश्चाद्विहितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥

द्रविडी । स्त्री । रागिणीविशेषे ॥

द्रविणम् । न । वित्ते ॥ काञ्चने ॥ पराक्रमे । बले ॥

द्रविणनाशनः । पुं । शोभाञ्जने ॥

द्रविणोदाः । पुं । अग्नौ ॥ यथोक्तम् । द्रविणं बलमित्युक्तं धनञ्च द्रविणं ततः । ददातितद्भवानेव द्रविणोदास्ततो भवेति वराहपुराणम् ॥ सान्तः ॥

द्रवीकरणम् । न । अद्रवस्य द्रवकरणे । गलानमा इति भाषा ॥

द्रव्यम् । न । पित्तले ॥ वित्ते ॥ विलेपने ॥ भेषजे ॥ भव्ये ॥ जतुनि ॥ विनये ॥ मद्ये ॥ लिङ्गसङ्ख्यान्विते ॥ गुणानामाश्रये ॥ द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ । ऋतेघृतगुडक्षौद्रधान्यकृष्णाविडङ्गत इति वैद्यकपरिभाषा ॥ समवायिकारणं द्रव्यमितितार्किकैर्लक्षितं । पृथिव्या-

दौ ॥ तानि च पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥ * ॥ रसो गुणस्तथावीर्यं विपाकः शक्तिरेव च पञ्चानांयः समाहारस्तद्द्रव्यमिति कीर्त्यते ॥ इति भिषग्वराः । पुनः पञ्चविधम् । अत्यन्तकठिनकठिनार्द्रवृत्तसद्रवद्रव्यभेदात् ॥ * ॥ द्रव्याणां गुणवत्तावधिः । गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधम् । मासद्वयात् तथाचूर्णं लभते हीनवीर्यताम् ॥ हीनत्वं गुटिका लेहौ लभते वत्सरात् परम् । हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकास्तथा ॥ घृततैलाद्या इति योग विशेषणम् । चतुर्मासाधिकाः संवत्सरादुपरि चत्वारो मासा अधिका येषु ते ॥ घृतमब्दात् परं पक्वं हीनवीर्यत्वमाप्नुयात् । तैलं पक्व मपक्वं वा चिरस्थायिगुणाधिकम् ॥ तदपिषोडशमासाभ्यन्तरे पक्वतैलं गुणाधिकं वोद्धव्यम् । ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात् परम् । ओषध्यो धान्यादयः । लघुपाकाः शीघ्रपाकाः । निर्वीर्याः स्युर्गुणैर्युक्ता आसवा धातवो रसाः ॥ त्रि । द्रोर्विकारे ॥ द्रोरिदम् । द्रोर्विकारोवा । द्रव्यञ्च भव्ये इति साधु ॥ द्रुरिववा । द्रोर्विकारे द्रो

प्येति यथा ॥

द्रव्यकः । त्रि । द्रव्यं हरति वहति आवहति वा । वस्नद्रव्याभ्यांठन् कनावित्यार्हीयः कन् ॥

द्रव्यकल्कः । पुं । वैद्यशास्त्रप्रसिद्धेषु कल्कादिपञ्चसु ॥ द्रव्यकल्कः पञ्चधा-स्यात् कल्कं चूर्णं रस स्तथा । तैलमर्कः क्रमाज्ज्ञेयं यथोत्तरगुणं प्रिये॥

द्रव्यनिश्चयः । पुं । द्रव्याणां मेषाद्यधिपतिज्ञानेन शुभाशुभनिश्चये ॥ तत्राह । वेदागमप्रदर्शनार्थमाह । ये येषां द्रव्याणा मधिपतयो राशयः समुद्दिष्टाः । मुनिभिः शुभाशुभार्थं नानागमतः प्रवक्ष्यामि ॥ १ ॥ वस्त्राविककुतपानां मसूरगोधूमरालकयवानाम् । स्थलसम्भवौषधीनां कनकस्य च कीर्त्तितो मेषः ॥ २ ॥ गविवस्त्रकुसुमगोधूमशालियवमहिषसुरभितनयाः स्युः । मिथुनेऽपिधान्यशारदवल्लीशालूककार्पासाः ॥ ३ ॥ कर्कटिणि कोद्रवकदलीदूर्वाफलकन्दपत्रचोचानि । सिंहे तुषधान्यरसाः सिंहादीनांत्वचः सगुडाः ॥ ४ ॥ षष्ठे ऽतसीकलायाः कुलत्थगोधूममुद्गनिष्पावाः सप्तमराशौ माषायवगोधूमाः ससर्षपाश्चैव ॥ ५ ॥ अष्टमराशाविक्षुःसैक्यं लोहान्यजाविकञ्चापि । नवमेतु तुरगलवणाम्बराणतिलधान्यमूलानि ॥ ६ ॥ मकरे तरुगुल्माद्यं सैक्येक्षुसुवर्णकृष्णलोहानि । कुम्भे सलिलजफलकुसुमरत्नचित्राणि रूपाणि ॥ ७॥ मीने कपालसम्भवरत्नान्यम्बुद्भवानि वज्राणि । स्नेहाश्च नैकरूपा व्याख्याता मत्स्यजातञ्च ॥ ८ ॥ एतेषां द्रव्याणां शुभाशुभज्ञानार्थमाह । राशेश्चतुर्दशार्थायसप्तनवपञ्चमस्थितो ४ । १० ।२। ११ । ७ । ९ । ५ । जीवः । शुक्रात्षड्दश पञ्चाष्टमेषु २ । ११ । १० । ५ । ८ । शशिजश्च वृद्धिकरः ॥ ९ ॥ षट्सप्तमगो ६ । ७ । हानिं वृद्धिं शुक्रः करोति शेषेषु । उपचयसंस्थाः ३ । ६ । ११ । १० । क्रूराः शुभदाः शेषेषु १ । २ । ४ । ५ । ७ । ८ । ९ । १२ । हानिकराः ॥ १० ॥ * ॥ अत्रैवविशेषमाह । राशेर्यस्य क्रूराः पीडास्थानेषु संस्थिता बलिनः १ तत्तोक्तद्रव्याणां महार्घता दुर्लभत्वञ्च ॥ ॥ ११ ॥ इष्टस्थाने सौम्याबलिनो येषां भवन्ति राशीनाम् । तद्द्रव्याणां वृद्धिः सामर्घ्यं वल्लभत्वञ्च ॥ १२ ॥ गोचरपीडायामपि राशिर्बलिभिः शुभग्रहैर्दृष्टः । पीडां न करोति तथा क्रूरैरेवं विपर्यासः ॥ इति वारा

ध्याम् ३९ ऽध्यायः॥

द्रव्यमययज्ञः। पुं। ज्ञानविहीनेयज्ञे॥ द्रव्यमयः द्रव्योपलक्षितो ज्ञानशून्यो योयज्ञः ससंसारफलः॥

द्रव्ययज्ञः। त्रि। पूर्त्तदत्ताख्यस्मार्त्तकर्मपरे॥ द्रव्यत्यागएव यथाशास्त्रंयज्ञोयस्य॥

द्रष्टव्यः। त्रि। दृश्ये। दर्शनार्हे॥

द्रष्टा। त्रि। विचारकुशले॥ साक्षिचेतने॥ चेतनोहिद्रष्टा भवति नाचेतनः॥ दृष्टेःकर्त्तरि। दृष्टिमति। कात्मनि॥ चक्षुर्जन्यमनोवृत्ति विषयुक्ताह्रूपभासिका। दृष्टिरित्युच्यते-द्रष्टादृष्टेः कर्त्तृतलौकिकैः॥ पश्यति। दृशिर्॰। तृन्॥

द्रष्टृता। स्त्री। शब्दादिविषयप्रकाशतायाम्॥ भावे तल्॥

द्राक्। अ। द्रुते। शीघ्रे। झटित्यर्थे॥ ॥ द्राति। द्राकुत्सायांगतौ। वा॰कः।

द्राक्षा। स्त्री। मृद्वीकायाम्। गोस्तन्याम्। मनक्कादाख इतिभाषा॥ द्राक्षामाचे॥ द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहिणी गुरुः। स्वादुपाकरसा स्वर्या तुवरा सृष्टमूत्रविट्॥ कोष्ठमारुतकृद्वृष्या कफपुष्टिरुचिप्रदा। हन्ति तृष्णाज्वरश्वासवातवातास्रकामलान्॥ कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान्। आमा साऽल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत्॥ वृष्या स्याद् गोस्तनीद्राक्षा गुर्वीच कफपित्तनुत्। अबीजान्यास्वल्पतरा गोस्तनीसदृशी गुणैः॥ द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तकृत। द्राक्षापर्वतजा यादृक् तादृशी करमर्द्दिकेतिभावप्रकाशः॥ द्राक्षायाःफलम्। हरीतक्यादिभ्यश्चेतिविकारावयवप्रत्ययस्यलुप्॥ यद्वा। द्राङ्क्ष्यते। द्राक्षिकाङ्क्षायाम्। कर्मणि घञ्। आगमशासनमनित्यम्॥ यद्वा। गुरोश्चहलइत्यप्रत्ययः। यवादिगणपाठान्नलोपः। अतएव द्राक्षामान् इत्यमतोर्वत्वंन भवति। अयवादिभ्यइत्युक्तेः॥

द्राक्षासवः। पुं। माधव्याम्॥ यथा। पीत्वा द्राक्षासवं मिष्टं शूलमादायसत्वामिति॥

द्राघिमा। पुं। दीर्घत्वे। दैर्घ्ये॥ दीर्घस्यभावः। पृथ्॰ इमनिच्। प्रियस्थिरेत्यादिनादीर्घस्यद्राघ्यादेशः

द्राघिष्ठः। त्रि। दीर्घतमे। अतिदीर्घे॥ अतिशयेन दीर्घः। इष्ठन्। प्रियस्थिरेतिसाधुः॥

द्राघीयान्। त्रि। दीर्घतरे॥ अयमनयोरतिशयेन दीर्घः। ईयसुन्। प्रि

यस्थिरेति साधुः ॥

द्राणः । त्रि । सुप्ते ॥ पलायिते ॥ द्रातेः कर्त्तरि क्तः ॥

द्रापः । पुं । पङ्के ॥ आकाशे ॥ कपर्द्दिनि ॥ मूर्खे ॥ इति शब्दार्थकल्पतरुः ॥

द्रामिलः । पुं । चाणक्यमुनौ ॥ इति हेमचन्द्रः ॥

द्रावः । पुं । गमने ॥ स्रवणे ॥ अनुतापे ॥ द्रवणम् । द्रु गतौ । घञ् ॥

द्रावकः । पुं । ग्रावप्रभेदे । चन्द्रकान्तमणौ ॥ विदग्धे ॥ घोषके ॥ विटे । षिङ्गे ॥ रसभेदे ॥ न । सिक्थके ॥ श्लीहरोगस्यौषधे ॥ त्रि । हृदयग्राहिणि ॥ द्रवकारके ॥

द्रावककन्दः । पुं । तैलकन्दे ॥

द्रावकरम् । न । श्वेतटङ्कणे ॥

द्रावणम् । न । कतकफले । निर्मली इति भाषा ॥ विद्रावणे ॥ पुं । कामवाणविशेषे ॥

द्राविका । स्त्री । लालायाम् । लाल इति भाषा ॥

द्राविडः । पुं । द्रविडदेशजे ॥ संख्यान्तरे ॥ वेधमुख्ये । कर्चूरे ॥ स्वनाम्ना प्रसिद्धे देशे ॥ द्राविडाः पञ्च । ते यथा । कर्णाटाश्चैव तैलङ्गा गुर्जरा राष्ट्रवासिनः । आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः इति स्कन्दपुराणम् ॥ त्रि । तद्देशजाते ॥ द्रविडे जातः । अण् ॥

द्राविडकः । पुं । द्राविडार्थे ॥ वेधमुख्यके । जिञ्चांचषष्ठी इति गौड भाषा । कचूर इति भाषा ॥ न । विड्लवणे ॥ स्वार्थे कन् ॥

द्राविडभूतिकः । पुं । वेधमुख्ये । काल्पके । कचूर इति प्रसिद्धे ॥

द्राविडी । स्त्री । सूक्ष्मैलायाम् ॥ द्रविडे जाता । अण् । ङीप् ॥

द्रावितः । त्रि । द्रवीकृते ॥

द्राव्यः । त्रि । अवश्यङ्गमनीये चरणीये अनुतपनीये ॥

द्रिमीतीर्थम् । न । भीमेतीर्थप्रभेदे ॥

द्रुः । पुं । पादपे । वृक्षे ॥ द्रवत्यूर्द्ध्वम् । द्रु गतौ । मित० डुः ॥ वा० कुर्या ॥ स्त्री । गतौ ॥ शाखायाम् ॥

द्रुकिलिमम् । न । देवदारुवृक्षे ॥ किलति । किलश्वैत्यक्रीडनयोः । वाहुलकात् किमच् । द्रुश्चासौ किलिमश्च ॥

द्रुघणः । पुं । मुद्गरे ॥ लौहमुद्गरे । हृचधारादीनां मुद्गराकारे लौहमयास्त्रप्रभेदे ॥ द्रुहिणे । ब्रह्मणि ॥ परशवधे ॥ भूमिचम्पके ॥ द्रुः संसारवृक्षो वा हन्यतेऽनेन । करणेऽयोविद्रुष्विति हन्तेः करणेऽप् घनादेश-

श्च। पूर्वपदादिति णत्वम् ॥

द्रुणः। पुं। वृश्चिके॥ भृङ्गे॥ त्रि। पिशुने॥ न। चापे॥ कृपाणे॥ द्रुणति। द्रुण हिंसागतिकौटिल्येषु। इगुपधेतिकः॥

द्रुणसः। त्रि। दीर्घनासिकायुक्त॥

द्रुणहः। पुं। खड्गपिधाने॥ इतिहारावली॥

द्रुणा। स्त्री। ज्यायाम्॥ इतिहेमचन्द्रः॥

द्रुणिः। स्त्री। कूर्म्याम्॥ जलद्रोण्याम्॥ द्रुणति। द्रुण०। इगुपधात् किदितीन्॥

द्रुणी। स्त्री। अम्बुद्रोण्याम्॥ कच्छप्याम्॥ कर्णजलौकायाम्॥ द्रुणेरिन्नन्तात् कृदिकारादक्तिन इति ङीष्॥ इगुपधेतिके जातेरितिङीष् गौरादित्वाद्वा॥

द्रुतः। पुं। द्रुमे॥ न। शीघ्रे। नृत्यविषयकशीघ्रगमने॥ नृत्यगीतवाद्येषु द्रवन्ति शीघ्रं गच्छन्ति समुदायमतिप्रदर्शनार्थं कर्त्तर्यकर्त्तरि वा ऽ तत् द्रुतम्। अधिकरणे क्तः॥ शीघ्रलये॥ त्रि। शीघ्रे॥ विलीने। जातद्रवीभावेघृतसुवर्णादौ॥ विद्राणे॥ पलायिते॥ द्रवतिस्म। द्रु० गत्यर्थेतिकर्त्तरि क्तः॥ द्रूयतेस्मवा। कर्मणि क्तः॥ शीघ्रार्थे क्रियाविशेषणत्वात् कस

त्वे वर्त्तमानं क्लीवम्। द्रव्येतु विलिङ्गम्॥

द्रुतविलिम्बतम्। न। जगती छन्दोभेदे॥ द्रुतविलम्बित माह नभौभरौ। यथा। तरणिजापुलिने नववल्लवीपरिषदा सह केलिकुतूहलात्। द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे॥ सुन्दरीत्यप्यस्यैवसंज्ञा॥

द्रुनखः। पुं। कण्टके॥ द्रोर्वृक्षस्यनखः॥

द्रुपदः। पुं। चन्द्रवंशीये नृपविशेषे। शिखण्डिधृष्टद्युम्नद्रौपदीनांजनके। पञ्चालदेशाधिपतौ॥

द्रुपदपुत्रः। पुं। धृष्टद्युम्ने॥ शिखण्डिनि॥

द्रुपदपुत्री। स्त्री। द्रौपद्याम्॥

द्रुमः। पुं। महीरुहे। वृक्षे॥ पारिजाते॥ कुबेरे॥ द्रुर्वृक्षःसो ऽस्यास्ति जनकतया। यद्वा। समुदायेहृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायात् द्रुःशाखा सास्यास्ति। द्युद्रुभ्यांमः॥

द्रुमनखः। पुं। कण्टके॥ द्रुमस्य नखइव॥

द्रुमरः। पुं। कण्टके॥

द्रुमव्याधिः। पुं। लाक्षायाम्॥

द्रुमशीर्षम्। न। कुट्टिमप्रभेदे॥ कपिशीर्षं द्रुमशीर्षं तथा चाखेटशीर्षकम्। इतिकुट्टिमभेदाः स्युः शाब्दिकैःसमुदाहृताः इति शब्दरत्नाव

स्त्री ॥ वृक्षाग्रे ॥

द्रुमश्रेष्ठः । पुं । तालवृक्षे ॥

द्रुमामयः । पुं । लाक्षायाम् ॥

द्रुमारिः । पुं । गजे । हस्तिनि ॥

द्रुमाश्रयः । पुं । सरटे ॥ त्रि । वृक्षाश्रितमात्र ॥

द्रुमिणी । स्त्री । द्रुमाणां समूहे ॥ खलादिभ्यइनिर्वक्तव्यः ॥

द्रुमेश्वरः । पुं । चन्द्रमसि ॥ इतिहरिवंशः ॥ तालतरौ ॥ इतिशब्दार्थकल्पतरुः ॥

द्रुमोत्पलः । पुं । कर्णिकारे । कठचम्पा इतिभाषा ॥ द्रुमे उत्पलं तदाकारं पुष्पमस्य ॥

द्रुवयम् । न । पाय्ये । पीतवे । मानार्थे परिमाणे ॥ द्रोर्विकारभूतं प्रस्थादिपरिमाणम् । मानेवयः ॥

द्रुसल्लकः । पुं । पियाले ॥

द्रुसः । पुं । पुत्रे ॥ इति शब्दार्थकल्पतरुः ॥

द्रुहणः । पुं । ब्रह्मणि । सुरज्येष्ठे ॥ इति द्विरूपकोषः ॥

द्रुहिणः । पुं । स्रष्टरि । प्रजापतौ । ब्रह्मणि ॥ कामक्रोधादिभ्योदुष्टेभ्यो वा द्रुह्यति । द्रुहजिघांसायाम् । बहुलमन्यत्रापीति इनन् । बाहुलका द्गुणाभावः ॥

द्रुही । स्त्री । दुहितरि ॥ इतिशब्दार्थकल्पतरुः ॥

द्रूः । पुं । हिरण्ये । स्वर्णे ॥ द्रवति । द्रुगतौ । क्विब्वचीति क्विब्दीर्घौ ॥

द्रूघणः । पुं । द्रुघणे ॥ इतिद्विरूपकोशः ॥

द्रूणः । पुं । द्रुणे ॥ इतिशब्दार्थकल्पतरुः ॥

द्रेक्कः । पुं । द्रेक्काणे ॥

द्रेक्काणः । पुं । लग्नत्रिभागे ॥

द्रेक्काणाधिपः । पुं । लग्नत्रिभागाधीशे ॥ स्वपञ्चनवमानां ये राशीनामधिपा ग्रहाः । ते द्रेक्काणाधिपा राशौ द्रेक्काणा स्त्रय एव हि ॥

द्रोणः । पुं । द्रोणाचार्ये । पार्थगुरौ । पुराणप्रसिद्धे धनुर्विद्यासम्प्रदायप्रवर्त्तकाचार्यविशेषे ॥ दग्धकाके ॥ वृश्चिके ॥ पर्वतविशेषे ॥ चतुःशतधनुष्परिमिते जलाशये ॥ मेघनायकविशेषे ॥ यथा । चियुते शाकवर्षेतु चतुर्भिःशेषितःक्रमात् । आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम् ॥ आवर्त्तो निर्जलोमेघः संवर्त्तश्चबहूदकः । पुष्करोदुष्करजलो द्रोणःसस्यप्रपूरकः ॥ श्वेतवर्णक्षुद्रपुष्पवृक्षविशेषे । घलघसिया इति हलकसिया इतिचगौडभाषा ॥ पुं । न । आढकपरिमाणे ॥ आढकाप चतुष्ट

ये । आढकचतुष्टये ॥ ३२ सेर इति लौकिकमाने । घटे । कलसे । उन्माने । इति वै० प० ॥ खार्याः षोडशांशे ॥ द्रोणस्तु खार्याः खलु षोडशांशः । इति ली० ॥ अष्टाढको भवेद्द्रोण इति केचित् ॥ द्विशतं द्रोण इति कुल्लूकभट्टः ॥ द्रुणाति । द्रुण० । पचाद्यच् ॥ द्रवति । द्रु० । कृहृभूसिद्रुपन्यनिस्वपिभ्यो निदिति नः ॥

द्रोणकाकः । पुं । दण्डकाके । कृष्णकाके ॥ द्रोणाख्यः काकः ॥

द्रोणक्षीरा । स्त्री । द्रोणदुघायां गवि ॥ द्रोणपरिमितं क्षीरमस्याः ॥

द्रोणगन्धिका । स्त्री । रास्नायाम् ॥

द्रोणघा । स्त्री । द्रोणक्षीरायाम् ॥

द्रोणदुग्धा । स्त्री । }
द्रोणदुग्धिका । स्त्री । } द्रोणक्षीरायाम् ॥

द्रोणदुघा । स्त्री । द्रोणमितदुग्धायां गवि । द्रोणक्षीरायाम् ॥ द्रोणं दोग्धि । दुह० । दुहः कप् घश्चेति कप् घश्चान्तादेशः ॥

द्रोणपर्णी । स्त्री । भूमिकन्दल्याम् ॥

द्रोणपुष्पी । स्त्री । गुमा इति ख्याते क्षुपे । कुम्भयोनौ । खर्वपत्रायाम् ॥ द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् । सक्षारलवणा स्वादुपाका कट्वी च भेदिनी ॥ कफामकामलाशोथतमकश्वासजन्तुजित् ॥ घलघसिया इति गौडेषु प्रसिद्धे गोशीर्षकक्षुपे ॥ कफार्शः कामलाकृमिशोथमाशिश्वमिन्त्यस्याः गुणाः ॥

द्रोणपुष्पीदलम् । न । गुमाख्यशाके ॥ द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तकृत् । भेदनं कामलाशोथमेहज्वरहरं कटु ॥

द्रोणमाना । स्त्री । द्रोणदुघायाम् ॥

द्रोणमुखम् । न । चतुःशतग्राममध्ये-मनोहरग्रामे ॥ इति हारावली ॥

द्रोणा । स्त्री । द्रोणपुष्पिकायाम् ॥

द्रोणाचार्य्यः । पुं । भारद्वाजे । कीर्त्तिभाजि । अश्वत्थाम्नः पितरि । कृपीपतौ । पाण्डवानामस्त्रशिक्षागुरौ ॥ द्रोणश्चासावाचार्य्यश्च ॥

द्रोणिः । स्त्री । द्रोण्याम् ॥ द्रवति । द्रु गतौ । वह्निश्रिश्रुयुद्रुग्लाहात्वरिभ्यो-निदिति निः ॥

द्रोणिका । स्त्री । नीलीवृक्षे ॥

द्रोणी । स्त्री । देशविशेषे ॥ शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः ॥ काष्ठाम्बुवाहिन्याम् । काष्ठादिकृतच्छिन्नायनौकाकृत्यम्बुसेचन्याम् ॥ गवादन्याम् ॥ नौकाप्रभेदे ॥ शैलविशेषे ॥ नीलीवृक्षे ॥ नदीविशेषे ॥ शैलयोः सन्धौ ॥ इन्द्रचिर्भिट्याम्-

॥ द्रोणीलवणे ॥ त्रिकूटपरिमाणे । गोण्याम् । १२८ सेर इति भाषा । इति वै प० ॥ काष्ठरचितेस्नानपात्रे ॥ यथा । ह्रीवेरपद्मकोशीरचन्दनाम्बुजवारिणा । सम्पूर्णामवगाहेतद्रोणीं दाहार्दितोनरः इति ॥ निम्नत्वयाम्बादृश्यते: कुटिकारादित्वीङीष् । गौरादित्वाद्वा ॥

द्रोणीदल: । पुं । केतकीपुष्पे ॥

द्रोणीमुखम् । न । द्रोणमुखे ॥ इतिभूरिप्रयोग: ॥

द्रोणीलवणम् । न । उपकर्णाटदेशप्रसिद्धे लवणविशेषे । त्रिकूटलवणे । वार्द्धिभवे ॥

द्रोमिण: । पुं । चाणक्ये मुनौ । अंशुले ॥

द्रोह: । पुं । जिघांसायाम् । अनिष्टचिन्तने । अपक्रियायाम् ॥ देवद्रोहाद्गुरोर्द्रोह: कोटिकोटिगुणाधिक: इति कूर्मपुराणम् ॥ परजिघांसया शस्त्रग्रहणादौ ॥ छद्मवधे ॥ हिंसातु द्रोहजन्या परेतु हिंसामेवद्रोहंमन्यन्ते ॥

द्रोहचिन्तनम् । न । परानिष्टविभावने । व्यापादे ॥ द्रोहस्यचिन्तनम् । ल्युट् चेति भावे ल्युट् ॥

द्रोहाट: । पुं । गाथाप्रभेदे ॥ मृगलुब्धके ॥ वैडालव्रतिके ॥ इतिमेदिनी ॥

द्रोही । त्रि । द्रोहके । परानिष्टचिन्तके ॥

द्रौणायन: । पुं । अश्वत्थाम्नि ॥ द्रोणस्यापत्यम् । फक् । द्रोणपर्वतेतिसूत्रे अनादिरिहद्रोणइत्युक्ते भारतप्रसिद्धेऽनन्तरापत्येऽश्वत्थाम्नि द्रौणायन इति प्रयोगस्तूपचाराद्बोध्य: ॥

द्रौणि: । पुं । अश्वत्थाम्नि ॥ द्रोणस्यापत्यम् । अतइञ् ॥ एकोनत्रिंशत्तसम्प्राप्ते द्रौणि र्व्यासो भविष्यति ॥

द्रौणिक: । पुं । कटाहे ॥ द्रोणं स्वस्मिन् समावेशयतीत्यर्थात् ॥ त्रि । द्रोणवापक्षेत्रे । द्रोणपरिमितव्रीह्यादिवापयोग्यक्षेत्रे ॥ द्रोणस्यवाप: । तस्यवापइतिठञ् ॥ त्रि । द्रोणम् पचति । सम्भवत्यवहरति पचति इतिठञ् ॥ द्रोणेनक्रीते ॥ निष्कादित्वाट्ठक् ॥

द्रौपदी । स्त्री । कृष्णायाम् । नित्ययौवनायाम् । पाञ्चाल्याम् । याज्ञसेन्याम् । पाण्डवानां स्त्रियाम् ॥ अस्या: पञ्चस्वामित्वे हेतुर्ब्रह्मवैवर्त्ते यथा । राजा ददौ फाल्गुनाय कन्यायाश्च स्वयंवरे । पप्रच्छ मातरं वीरो वस्तु प्राप्तंमयाधुना ॥ तमुवाच स्वयं माता गृहाण भ्रातृभि: सह । शम्भोर्वरेणपूर्वञ्च परत्रमातु राज्ञया ॥ द्रौपद्या: स्वामिनस्तेनहेतुना पञ्चपा-

पडवा इति ॥ द्रुपदस्यापत्यं स्त्री । अ
ण् । ङीप् ॥

द्रौपदेयः । पुं । प्रतिविन्ध्यादिपञ्चसु
द्रौपदीतनयेषु ॥ द्रौपद्याः अपत्यम्
पुमान् । स्त्री भ्योढक् ॥

द्वन्द्वः । पुं । रोगविशेषे ॥ उभयपदार्थ
प्रधाने समासे । अव्ययीभावतत्पु
रुषबहुव्रीहिसमासभेदानामुभयप-
दार्थसाम्याभावेनापकृष्टत्वात् द्वन्द्व
समासो भगवद्विभूतिः ॥ स द्विधा । इ
तरेतरयोगसमाहारभेदात् ॥ पर
स्परविरुद्धे सम्मानावमानादौ । शी
तोष्णादौ ॥ यथा क्षुत्पिपासे शोक
मोहौ । रागद्वेषौ तथैव च । कामक्रो
धप्रभृतयो द्वन्द्वशब्देन वर्णिता इति ॥
न । रहस्ये ॥ कलहे । आहवे ॥ मि
थुने । युग्मे ॥ द्वौ द्वौ सहाभिव्यक्तौ
इति द्वन्द्वम् । द्वन्द्वं रहस्यमर्यादाव
चनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्य
क्तिष्विति द्विशब्दस्य द्विर्वचनं पूर्वप
दस्याम् भावो ऽत्वञ्चोत्तरपदस्य न
पुंसकत्वञ्च निपात्यते एष्वर्थेषु । चा
र्थे द्वन्द्व इति निर्देशात् पुंस्यपि ॥ दुर्गे ॥
यथा । राज्ञो बलं नहि बलं द्वन्द्वमेव-
बलं बलम् । अप्यल्पबलवान् राजा-
स्थिरो द्वन्द्वबलाद्भवेदिति ॥

द्वन्द्वगदः । पुं । रागद्वेषादिरूपे द्वन्द्वरोगे ॥ यथा । अहं हरिः सर्वमिदं जनार्द
नो नान्यं ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा
द्वन्द्वगदा भवन्तीति विष्णुपुराणम् ॥

द्वन्द्वचरः । पुं । } चक्रवाके ॥ द्वन्द्वं च
द्वन्द्वचारी । पुं । } रति । चर० । प-
चाद्यच् ॥ ताच्छील्ये णिनिः ॥

द्वन्द्वजः । पुं । द्विदोषजरोगे ॥ अस्य पू
र्वरूपम् । रूपै रन्यतराभ्यान्तु संसृ-
ष्टे द्वन्द्वजं विदुरिति । अन्यतराभ्यां
शृम्भानेपदाहाभ्यां शृम्भाश्वाहचिभ्यां
नेपदाहाश्वाहचिभ्यां वा संसृष्टे रूपैः
श्रमादिभि द्वन्द्वजं पूर्वरूपं विदुर्जा-
नीयुः ॥

द्वन्द्वयुक्तिः । पुं । दुर्गविचारग्रन्थे ॥ स
यथा । राज्ञो बलं नहि बलं द्वन्द्व
मेव बलं बलम् । अप्यल्पबलवान्
राजा स्थिरो द्वन्द्वबलाद् भवेत् ॥ त-
थाच । एकः शतं योधयति प्राकार
स्थो धनुर्द्धरः । शतं दशसहस्राणि
तस्माद् दुर्गं विशिष्यते ॥ अकृत्रिमं
कृत्रिमञ्च तत् पुन द्विविधं भवेत् ।
यद् दैवसूचितं द्वन्द्वं गिरिनद्यादिसं
श्रितम् ॥ अकृत्रिम मिदं चेयं दुर्ल
ङ्घ्य मरिभूभुजाम् । प्राकारपरि
खाराग्र्यसंश्रयं यद् भवेदिह । कृ-
त्रिमं नाम विज्ञेयं सङ्ख्यासङ्ख्य

न्तु वैरिणाम्॥ तत्राकृत्रिमद्वन्द्वयुक्तिर्यथा। अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः। सजलाश्रयसम्भारभोज्यद्रव्यसमाश्रयः॥ सुखनिःसरणो द्वन्द्वः पर्वताख्यो महीभुजाम्। नद्यो गभीरविस्तीर्णा श्चतुर्दिक्षु व्यवस्थिताः॥ तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते। यदन्यत्र चिरकालीनं दुर्लङ्घ्यविपिनादिकम्॥ तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते। वनद्वन्द्वमिति ख्यातं यथा पूर्वं महत्तरम्॥ * ॥ कृत्रिमद्वन्द्वयुक्तिर्यथा। यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः। तस्य मध्ये महीपालः कृत्रिमं द्वन्द्व मारभेत्॥ गजैरलङ्घ्या विस्तीर्णा गम्भीराःपूर्णवारयः। द्वन्द्वत्वेन समादिष्टाः परिखा बहुयादसः॥ विशालशालं सुघनं बहुकण्टकिसङ्कटम्। द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्॥ अधोधो वध्यमानोपि कन्दराल्पजलस्रवम्। द्वन्द्वत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥ सर्वतः परिखां कृत्वा निरन्ध्रोपरिकन्दरम्। तज्जलप्लुतदेशत्वात् जलद्वन्द्वं तदुच्यते॥ एषामभावे निम्नस्य भूप्रदेशस्य दन्धनात्। वर्षासु

प्लवते वारि जलद्वन्द्वं ततो भवेत्॥ एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्। आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि॥ अन्यत्र कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्वसेत्। रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥ गजाश्वनाथस्ते वैरी जलद्वन्द्वं तदाचरेत्। गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद् विविधो रिपुः॥ सर्वो हि त्रिविधो युद्धः समासादुपदिश्यते। प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च॥ राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्। गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥ * ॥ अथ सामान्यतो गुणाः। तथा हि नीतिशास्त्रम्। सप्रवेशापसरणं द्वन्द्वमुत्तममुच्यते। अन्यत्र वन्दिशालेव न तादृग् बद्धमाश्रयेत्॥ धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च। मनुष्यद्वन्द्वसंसर्गं वनद्वन्द्वञ्च तानि षट्॥ * ॥ अन्ये तु। न द्वन्द्वं द्वन्द्वमित्याहुर्या दृग्द्वन्द्वं प्रकीर्त्तितम्। योद्धृशून्यं हि यद् द्वन्द्वं मृतकायसमं हि तत्॥ * ॥ अथान्यत्रापि। यावत् प्रमाणं नगरं हि राज्ञां ततो भवेदुत्तममध्यमाभ्याम्। त्रिंशत्तदर्द्धाष्टगुणोत्तरेण निदेशजानां धरि

णीपतीनाम् ॥ गर्गस्तु । यद्वन्द्वयुद्धि विधं द्वन्द्वं प्रोच्यते धरणीभुजाम् । ताभ्यामेवातिरिच्येत मन्त्रद्वन्द्वं विशेषतः ॥ अन्येषु दैवाद् भिन्नेषु मन्त्रद्वन्द्वाज् जयेन् नृपः । मन्त्रद्वन्द्वे हि भिन्ने हि नचान्यत् कार्यकारकम् ॥ भोजस्तु । यदैव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत् । सप्रवेशापसरणं तद् द्वन्द्वमुत्तमं विदुरिति ॥

द्वन्द्वातीतः । त्रि । द्वन्द्वैरक्षुभितचित्ते ॥ द्वन्द्वानि क्षुत्पिपासाशीतोष्णवर्षादीनि अतीतो ऽतिक्रान्तः । समाधिदशायां तेषामस्फुरणात् व्युत्थानदशायां स्फुरणेपि परमानन्दाद्वितीयाकर्तृभोक्तात्मप्रत्ययेन बाधात् तैर्द्वन्द्वैरुपहन्यमानोप्यक्षुभितचित्त उच्यते ॥

द्वन्द्वाभयः । पुं । अग्निभयादिजातगृहप्रवेशे ॥ अग्निकृतदाहेन महादिवसप्लावनेन अनवरतवृष्टिपातेन् वा क्रुद्धेन राज्ञा पातितत्वेनवा येन गृहनाश स्तद्गृहं यदापुनः सम्पाद्य-तस्मिन् यः प्रवेशः सद्वन्द्वाभय इत्युच्यते । अन्वर्थसंज्ञेयम् । शीतोष्णरूपद्वन्द्वात् पुनरुत्थापनेन यद्भयं तत् द्वन्द्वाभयं विद्यतेयस्मिन्निति मत्वर्थीयः प्रत्ययः ॥

द्वयम् । न । द्वितये । युग्मे ॥ द्वावयवावयस्य । सङ्ख्याया अवयवेतयप् । द्वित्रिभ्यांतयस्यायज्वा ॥

द्वयाग्निः । पुं । पाठिद्रुमे । चित्रके । चीता इतिभाषा ॥

द्वयातिगः । त्रि । रजस्तमोविहीने । विरजस्तमसि । सत्त्वगुणयुक्ते ॥ द्वयमतिगच्छति । गम्लृ० । डम्ये० डः ॥

द्वाःस्थः । पुं । प्रतीहारे ॥ नन्दीश्वरे ॥ द्वारितिष्ठति । ष्ठा० । सुपीतिकः ॥

द्वाःस्थितः । त्रि । दर्शके । द्वारपाले ॥ द्वारितिष्ठतिस्म । ष्ठा० । गत्यर्थाकर्मकेति क्तः ॥

द्वाःस्थितदर्शकः । पुं । } द्वारपाले ।
द्वाःस्थितदर्शी । पुं । } प्रतीहारे ॥

द्वाचत्वारिंशत् । स्त्री । द्विचत्वारिंशति । बेयालीस इतिभाषा ॥

द्वात्रिंशत् । स्त्री । सङ्ख्याविशेषे । बत्तीस इतिभाषा ॥ तत्सङ्ख्येये ॥ द्वौचत्रिंशच्च । द्व्यधिकाः त्रिंशद्वा । द्व्यष्टनः सङ्ख्यायामित्यात्वम् ॥

द्वात्रिंशदक्षरी । स्त्री । ग्रन्थे ॥ द्वात्रिंशकाक्षरभेषः ॥ विद्याविशेषे ॥

द्वात्रिंशल्लक्षणोपेतः । पुं । महापुरुषे ॥ तल्लक्षणानियथा । रागः सप्तसु हल्लपट्स्वपिषिशोरङ्गेष्वसंतुङ्गता त्रिस्तारस्त्रिषु खर्वता त्रिषु तथागम्भीर

ता चचिषु। दैर्घ्यं पञ्चसु किन्तु पञ्चसु सक्ष्मे सम्प्रेक्ष्यते सूक्ष्मता द्वात्रिंशद्वर लक्षणः कथमसौ गोपेषु सम्भाव्यते इति श्रीहरिभक्तिरसामृतसिन्धुः ॥ सप्तसु नेषान्तपादकरतलतालुअधरोष्ठजिह्वानखेषु। षट्सु वक्षःस्कन्धनखनासिकाकटिमुखेषु। त्रिषु कटिललाटवक्षःसु। केचित्कटिस्थाने शिरः पठन्ति। त्रिषु ग्रीवाजङ्घामेहनेषु। पुनस्त्रिषु नाभिस्वरसत्त्वेषु। पञ्चसु नासाभुजनेत्रहनुजानुषु। पुनः पञ्चसु त्वक्केशरोमदन्ताङ्गुलिपर्वसु॥ द्वात्रिंशद्वराणि तत्तल्लक्षणेभ्योऽन्येभ्यो पि श्रेष्ठानि लक्षणानि यस्य सः गोपेषु कथमिति भगवदवतारादिष्वप्येतादृशत्वाश्रवणादितिभावः। इति श्रीमद्व्रजेश्वरं प्रति कस्यचित् सवयसो गोपस्याश्चर्यसूचकं वचनम् ॥

द्वादशः। त्रि। द्वादशानां पूरणे ॥ तस्य पूरणे डट् ॥

द्वादश। त्रि। सङ्ख्याप्रभेदे ॥ सङ्ख्येये ॥ द्वौ च दश च। द्व्यधिका दशेति वा। द्व्यष्टनः सङ्ख्यायाम्त्वम् ॥

द्वादशकरः। पुं। षडानने। कार्त्तिकेये॥ वृहस्पतौ ॥ द्वादशकरा अस्य॥

द्वादशपत्रकम्। न। वामनपुराणोक्ते देवस्य योगविशेषे ॥

द्वादशलोचनः। पुं। कार्त्तिकेये ॥ द्वादशलोचनान्यस्य ॥

द्वादशांशः। पुं। लग्नद्वादशांशे ॥ मेषादीनान्तु राशीनां स्वराशे र्द्वादशांशकाः। यथा। मेषे प्रथमद्वादशांशैकांशो मेषस्य। द्वितीयो वृषस्य। तृतीयो मिथुनस्य। तथा कर्कसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीनानां क्रमादेकैकांशा ज्ञेयाः॥ वृषादिष्वप्येवं स्वराशिमारभ्य द्वादशांशा ज्ञेयाः ॥

द्वादशांशाधिपः। पुं। राशीना मधिपा येच द्वादशांशाधिपास्तु ते॥ ये मेषादीना मधिपा स्तएव द्वादशांशाधिपा ज्ञेयाः ॥

द्वादशांशुः। पुं। वृहस्पतौ ॥

द्वादशाक्षः। पुं। स्कन्दे॥ बुद्धमुनौ ॥ इति हेमचन्द्रः ॥

द्वादशाख्यः। पुं। बुद्धे ॥ इति त्रिकाण्डशेषः ॥

द्वादशाङ्गः। पुं। धूपविशेषे ॥ यथा। गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरुकुङ्कुमम्। जातीकोषञ्च कर्पूरं जटामांसीञ्च वालकम् ॥ त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तित इति ॥

द्वादशाङ्गुलः। पुं। वितस्तौ ॥ द्वादश-अङ्गुलयः प्रमाणमस्य। तद्धितार्थे द्विगुः। द्विगोर्नित्यमिति मात्रचो लु

क् । तत्पुरुषस्याङ्गुलेरित्यच् ॥

द्वादशात्मा । पुं । दिवाकरे ॥ द्वादशआत्मानो मूर्त्तयो यस्य ॥ अर्कवृक्षे ॥

द्वादशायुः । पुं । कुक्कुरे ॥

द्वादशार्च्चिः । पुं । वृहस्पतौ ॥

द्वादशी । स्त्री । तिथिविशेषे ॥ सा च न्द्रस्य द्वादशकलाक्रियारूपा । सा च विष्णोस्तिथिः ॥ मार्गशीर्षशुक्लद्वादशी मत्स्यद्वादशी । पौषी कूर्म द्वादशी । माघी वराहद्वा° । फाल्गुनी नृसिंहद्वा° । चैत्री वामन द्वा० । वैशाखी जामदग्न्यद्वा° । ज्यैष्ठी राम द्वा° । आषाढी कृष्णद्वा° । श्रावणी वुद्धद्वादशी । भाद्री कल्किद्वा° । आश्विनी पद्मनाभद्वा० । कार्त्तिकीनारायणद्वादशी ॥ एतासांनाम धरणी व्रतम् ॥ इतिवाराह पुराणम् ॥ द्वादशीजातस्य फलम् । वहुप्रजः सर्व जनानुरागी भूपालमान्य स्त्वतिथि प्रियः स्यात् । चेद्द्वादशी यस्य जनस्य सूतौ प्रवासहीनो व्यवहारदक्षः ॥

द्वापरः । पुं । संशये । सन्देहे ॥ त्रेतायुगानन्तरयुगे ॥ भाद्रकृष्णत्रयोदश्यांगुरुवारे ऽस्योत्पत्तिः ॥ अस्यपरिमाणं यथा । अष्टौ शतसहस्राणि वर्षाणां द्वापरं युगमिति ॥ तद्धर्मा मत्स्यपुराणादौ द्रष्टव्याः ॥ ततोपि द्वापरे प्राप्ते मृत्युक्तसुकृतोज्झिते । धर्मार्द्धलोपे मनुजे आधिव्याधिसमाकुले ॥ संहिताद्युपदेशेन त्वयैवोद्धारिता नराइति श्रीमहानिर्वाणतन्त्रे प्रथमोल्लासः ॥ तत्रतारकब्रह्म नाम । हरे मुरारे मधुकैटभारे गोपालगोविन्द मुकुन्द सौरे । यज्ञेश नारायण कृष्ण विष्णो निराश्रयं मां जगदीशरक्षेति ॥ द्वौपरौ प्रकारौ यस्याच्च वा । सर्व नाम सङ्ख्ययोरिति द्विशब्द स्य पूर्वनिपातः । पृ° आत्वम् ॥ द्वाभ्यां परोवा ॥ द्वापराये ॥

द्वापराघः । पुं । द्यूतक्रीडासाधनीभूतास्य यत्रभागे द्वावङ्कौ भवतस्तस्मिन्भागे ॥ द्वापरनामको ऽयः ॥

द्वामुष्यायणः । पुं । औद्दालकौ । गौतमे ॥

द्वाः । स्त्री । निर्गमने । प्रतीहारे ॥ उपाये ॥ यथा ज्ञानद्वारा भवेन्मुक्तिरिति ॥ द्वारयति । दृवरणे । णिजन्तः । विच् ॥ यद्वा । द्वार्यते । सं. क्विप् ॥

द्वारम् । न । अभ्युपाये ॥ निर्गमने ॥ यथा । गृहिणां शुभदं द्वारं प्राकारस्य गृहस्यच । न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ॥ मुखे ॥ वाह्येन्द्रियै रुपनीतं विषयं समनोहङ्कारा वुद्धिर्यस्मात् तद्विषयमवगा

हते ऽध्यवस्यति तस्माद् वाह्यानी न्द्रियाणि द्वाराणि भवन्ति । द्वारयति । दृ । अच् । द्वार्य्यसेवा ॥

द्वारकः । पुं । द्वारकापुर्य्याम् ॥ इतिशब्दरत्नावली ॥ रवेःपार्श्वेणाम्बरे ॥

द्वारकण्टकः । पुं । कपाटे ॥

द्वारका । स्त्री । द्वारवत्याम् । अब्धि नगर्य्याम् ॥ सर्व्वतीर्थपराश्रेष्ठा द्वारका बहुपुण्यदा । यस्याः प्रवेशमात्रेण नराणां जन्मखण्डनम् ॥ दानञ्च द्वारकायाञ्च श्राद्धञ्चदेवपूजनम् । चतुर्गुणञ्चतीर्थानां गङ्गादीनाञ्चभूमिपेति ब्र० वै० पु० ॥

द्वारकेशः । पुं । श्रीकृष्णे ॥ द्वारकाया ईशः ॥

द्वारताली । स्त्री । द्वारयन्त्रे ॥

द्वारदातुः । पुं । वरदातै । भूमीसहस्रे ॥ इति भावप्रकाशः ॥

द्वारदुर्गक्रिया । स्त्री । कीलखननजलौघवनादिभिर्दुर्गमत्त्वकरणे ॥

द्वारपः । त्रि । प्रतीहारे । द्वास्थे ॥ द्वारंपाति । पा० । आत इति कः ॥

द्वारपालः । पुं । द्वाररक्षके । प्रतीहारे ॥ द्वारं पालयति । पालरक्षणे । कर्मण्यण् ॥

द्वारपालकः । पुं । दौवारिके । द्वारपे ॥ स्वार्थे कन् ॥

द्वारपिण्डी । स्त्री । देहल्याम् ॥

द्वारयन्त्रम् । न । द्वारताल्याम् । ताल के । ताला इति भाषा ॥ द्वारस्य द्वारेवा यन्त्रम् ॥

द्वारवती । स्त्री । अब्धिपुर्य्याम् । द्वारकायाम् ॥ सान्तःकरणायां वुद्धौ ॥ नकेवलं वाह्यानीन्द्रियाण्यपेक्ष्य प्रधानं वुद्धिः अपितु ये अपि अहङ्कारमनसी द्वारे ते अप्यपेक्ष्य वुद्धिः प्रधानम् ॥

द्वारवलिभुक् । पुं । वके ॥

द्वारस्थः । पुं । वेत्रिणि । दौवारिके ॥ द्वारेतिष्ठति । ष्ठा० । कः ॥

द्वारावती । स्त्री । वनमालिन्याम् । द्वारिकायाम् ॥ अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरीद्वारावतीचैव सप्तैतामोक्षदायिकाः ॥ एतास्तुपृथिवीमध्ये न गण्यन्ते कदाचन । पुरीद्वारावती विष्णोः पाञ्चजन्योपरिस्थिता ॥ मुक्तिदा एताः सर्वाश्च एकत्र गणिताः सुरैः । यानि यानिच क्षेत्राणि काशीप्राप्तिकराणि षण्डिति भूतशुद्धितन्त्रम् ॥

द्वारि । न । प्रधाने । प्रकृतौ ॥ सान्तःकरणा वुद्धिः सर्वं विषय मवगाहते यस्मात् । तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषा णीति साङ्ख्याः ॥

द्विगुः | द्विजः

द्वारिका । स्त्री । द्वारावत्याम् ॥ इ०श्रम्०॥

द्वारी । त्रि । द्वारपाले ॥ द्वारमस्त्यस्य । इनिः ॥

द्वात्रिंशतिः । स्त्री । अधिकविंशतौ ॥

द्वासप्तति: । स्त्री । द्विसप्ततौ ॥ अधिकासप्तति: ॥

द्वास्थः । त्रि । प्रतीहारे ॥ द्वारितिष्ठति । ष्ठा० । सुपीतिकः । खर्परेशरि वा विसर्गलोपोवक्तव्यः ॥

द्वास्थितः । त्रि । द्वारपाले ॥ द्वारितिष्ठति । ष्ठा० । गत्यर्थाकर्मकेति क्तः । पाक्षिको विसर्गलोपः ॥

द्वास्थितदर्शकः । त्रि । दौवारिके ॥

द्वि । त्रि । दो इति भाषाप्रसिद्धायां सङ्ख्यायाम् ॥ सङ्ख्येये ॥ यथा । द्वौविप्रौ ॥

द्विकः । पुं । काके ॥ कोके ॥ द्वौ कौ वर्णविशेषौ यस्यनाम्नीत्यर्थः ॥ द्वितीयके ॥ द्वितीयेनरूपेण ग्रहणं ग्रन्थस्य । तावतिथं ग्रहणमितिलुग्वेति कन् पूरणप्रत्ययस्यच वा लुक् । ग्रन्थएवप्रयोगः ॥ न । द्वये ॥

द्विककारः । पुं । वायसे । काके ॥ द्वौककारौ नाम्नियस्य ॥

द्विककुत् । पुं । उष्ट्रे ॥ इति हेमचन्द्रः ॥

द्विगुः । पुं । सङ्ख्यापूर्वे तत्पुरुषावान्तरसमासविशेषे ॥ सचत्रिविधः । तद्धितार्थः समाहारः उत्तरपदपरश्चेतिभेदात् । तद्धितार्थोपित्रिविधः । । तद्धितप्रत्ययमात्रस्यश्रजादेर्वैसादेर्वार्थे विषये इत्येकः । अपत्याद्यर्थप्रत्ययादिकं त्यक्त्वा अजादेस्तद्धितस्यार्थे वाच्ये इत्यपरः । तद्धितार्थविषयो यथा । द्वयोर्मात्रोरपत्यं द्वैमातुरः । पञ्चानां नापितानामपत्यम् पाञ्चनापितिः ॥ तद्धितार्थवाच्योयथा । पञ्चभिर्गोभिःक्रीतः पञ्चगुः ॥ समाहारो यथा । त्रयाणां स्त्रीणांसमाहारः त्रिसत्वम् । समाहारे अदन्तानां स्त्रीत्वं पात्रादेस्तुक्लीवत्वम् ॥ उत्तरपदपरो यथा । पञ्चगावोधनं यस्यस पञ्चगवधन इत्यादिः ॥ इति मुग्धबोधटीकायां दुर्गादासः ॥

द्विगुणः । त्रि । द्वाभ्यां पूरणे । अक्षद्वयाभ्यांघाते ॥ द्वौगुणौ आहत्तोयस्यसः ॥

द्विगुणाकृतम् । त्रि । द्विःकृष्टक्षेत्रे । वारद्वयकृष्टक्षेत्रे ॥ द्विगुणं कृतम् । सङ्ख्यायाश्च गुणान्ताया इतिडाच् ॥

द्विगुणितः । त्रि । द्विरावृत्तकृते ॥

द्विजः । पुं । ब्राह्मणे ॥ क्षत्रिये ॥ वैश्ये ॥ जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेनच । एभिर्युक्तोहि य स्तिष्ठे न्नित्यं स द्विजउच्यते ॥ नजाति र्नंकुलं राजन् नस्वाध्यायः श्रुतंनच । का

रथानि द्विजस्तस्य हन्त मेवतु कारणम् ॥ इतिवह्नि पुराणे वशिष्ठ वाक्यम् ॥ दन्ते ॥ अण्डजे ॥ द्विर्जायते । जनी° । अन्येष्वपीतिडः ॥ तुम्बुरुवृक्षे ॥

द्विजकुत्सितः । पुं । श्लेष्मान्तके ॥ द्विजैः कुत्सितः ॥

द्विजदासः । पुं । शूद्रे ॥ त्रि । द्विजानां दासे ॥

द्विजदेवः । पुं । ब्राह्मणे ॥ द्विजेषु देव इव ॥ ऋषौ ॥ इति श्रीधरस्वामी ॥

द्विजन्मा । पुं । विप्रे ॥ दशने ॥ द्वेजन्मनी अस्य ॥ ब्राह्मणादित्रये ॥ खगे ॥

द्विजपतिः । पुं । चन्द्रे ॥ द्विजानांपतिः ॥

द्विजप्रपा । स्त्री । पक्षिणां जलपानार्थं विहितकूपाद्यन्तिकखाते । तस्मिन् । आलवाले ॥ द्विजानां प्रपा ॥

द्विजप्रिया । स्त्री । सोमलतायाम् ॥ त्रि । द्विजस्यप्रियवस्तुनि ॥

द्विजबन्धुः । पुं । त्रैवर्णिकाधमे ॥ द्विजा बन्धवोऽस्य सः ॥

द्विजब्रुवः । पुं । जातिमात्रोपजीविनि ब्राह्मणे । ब्राह्मणब्रुवे ॥

द्विजराजः । पुं । चन्द्रे ॥ अनन्ते ॥ गरुडे ॥ द्विजानांराजा । राजाहः सखिभ्यष्टच् ॥ कर्पूरे ॥

द्विजलिङ्गी । पुं । क्षत्रिये ॥ त्रि । विप्रचिह्नधारिणि ॥

द्विजवरः । पुं । द्विजोत्तमे ॥ द्विजेषु द्विजानां वा मध्ये वरः ॥ चतुष्कसस्य प्रथमे (।।।।) पर्याये ॥

द्विजवर्यः । पुं । विप्रश्रेष्ठे ॥

द्विजव्रणः । पुं । दन्तार्बुदे ॥

द्विजशप्तः । पुं । राजमाषे । बरबटी इतिगौडभाषा प्रसिद्धे ॥ त्रि । द्विजैः शप्ते ॥

द्विजसेवकः । पुं । शूद्रे ॥ त्रि । द्विजानां सेवाकर्त्तरि ॥

द्विजा । स्त्री । भार्ग्याम् ॥ हरेणौ । रेणुकानामगन्धद्रव्ये ॥ टाप् ॥

द्विजाङ्गी । स्त्री । कटुकायाम् ॥

द्विजातिः । पुं । विप्रे ॥ वेदाध्ययनादितुल्यधर्मत्वाद् ब्राह्मणादित्रिके ॥ ब्राह्मणः क्षत्रियो वैश्य स्त्रयोवर्णाद्विजातयः । चतुर्थएकजातिस्तुशूद्रो नास्तितु पञ्चम इतिमनुः ॥ शूद्रादिजातिभिर्जातो न धर्मभोगमर्हतीतिस्मृतिः ॥ द्वे जाती जन्मनी यस्य सः ॥ मातुरग्रेधिजननं द्वितीयं मौञ्जिबन्धने इत्युक्तेः ॥ पक्षिसर्पाद्यण्डजेषु ॥

द्विजायनी । स्त्री । यज्ञोपवीते ॥ इति शब्दरत्नावली ॥

द्विजालयः । पुं । कोटरे ॥ द्विजानां गृहे ॥

द्विजावलिः । स्त्री । दन्तपङ्क्तौ ॥

द्विजिह्वः । पुं । सर्पे ॥ त्रि । खले ॥ द्वे जिह्वे यस्य सः ॥ चौरे ॥

द्विजोत्तमः । पुं । ब्राह्मणे ॥

द्विट्सेवी । त्रि । शत्रुसेविनि ॥

द्वितयम् । न । युग्मे । द्वये ॥ द्वाववयवौ अस्य । सङ्ख्याया अवयवेतयप् ॥

द्वितयी । स्त्री । युग्मायाम् ॥ टिड्ढे- ङीप्

द्वितीयः । त्रि । द्वयोः पूरणे । द्विपूरके ॥ द्वयोः पूरणः । द्वेस्तीयः ॥ द्वितीयेभागे ॥ पूरणाद्भागेतीयादन् ॥ पुं । पुत्रे ॥

द्वितीयकः । पुं । ज्वरविशेषे ॥ द्वितीयेऽहनि भवः । कालप्रयोजनाद्रोग इतिकन् ॥ द्विके ॥ द्वितीयेनरूपेण ग्रहणम् । तावतिथं ग्रहणमितिलुग्वेतिकन् ॥

द्वितीया । स्त्री । तिथिप्रभेदे । चन्द्रमसोद्वितीयकलाक्रियारूपायाम् ॥ सा अश्विनीकुमारयोर्जन्मतिथिः ॥ अत्रजातस्य फलम् । निखिलगुणगभीरो दानशीलो दयालुः स्वकुलकुमुदचन्द्रः स्वच्छचित्तोतिशूरः । निजभुजबलगर्वाच्छादितारातिवर्गो भवतिविपुलकीर्त्तिर्योद्वितीयाप्रसूतः ॥ अनध्यायद्वितीया यथा । प्रेकोचैत्रा द्वितीयास्ताः प्रेतपक्षेगतेतदा । याच कोजागरेजाते चैत्रावल्याःपरे पिया ॥ चातुर्मास्येसमाप्तेच द्वितीया या भवेत्तिथिः । परास्वेतास्वनध्यायःपुराणैःपरिकीर्त्तितः ॥ पक्षयोर्माघमासस्यद्वितीयांपरिवर्जयेदिति ॥ सहधर्मिण्याम् । पत्न्याम् ॥ अमश्चौट् शस् इतित्रिके ॥ टाप् ॥

द्वितीयाकृतम् । त्रि । द्विगुणाकृते । वारद्वयकृष्टे क्षेत्रे ॥ द्वितीयं कृतम् । कृञोद्वितीयेतिडाच् ॥

द्वितीयाभा । स्त्री । दारुहरिद्रायाम् ॥

द्विदन् । त्रि । दन्तद्वययुक्तेऽपादौ ॥ द्वौदन्तावस्य । वयसिदन्तस्यदतृ ॥

द्विदाम्नी । स्त्री । रज्जुद्वययुक्तायांगवि ॥

द्विदेहः । पुं । श्रीगणेशे । विनायके ॥ द्वाभ्यांदेहोऽस्य ॥

द्विदैवः । पुं । विशाखानक्षत्रे ॥

द्विद्वादशम् । न । योगविशेषे ॥ कन्याया द्वादशेभर्त्ता भर्त्तुः कन्या द्वितीयगा । द्विद्वादशं विजानीयाद्वर्जितं त्रिदशैरपि ॥

द्विधा । अ । द्विप्रकारे ॥

द्विधागतिः । पुं । कुम्भीरे ॥ त्रि । द्विप्रकारगतिविशिष्टे ॥

द्विधातुः । पुं । गजानने । हेरम्बे ॥ न । धातुद्वये ॥

द्विधात्मकम् । न । जातीकोषे । जाय फल इतिभाषा ॥

द्विधालेख्यः । पुं । हिन्तालवृक्षे ॥ त्रि । द्विप्रकारलेखनीये ॥

द्विनग्नकः । पुं । दुश्चर्मणि ॥

द्विपः । पुं । इभे । हस्तिनि ॥ द्वाभ्यां मुखशुण्डाभ्यां पिबति । पा° । सुपी-तियोगविभागात्कः ॥ नागकेशरे ॥

द्विपग्राहः । पुं । हस्तिबन्धके ॥

द्विपथम् । न । चारुपथे । पथद्वये ॥ द्वयोः पथोः समाहारः । तद्धितार्थेति समासः । ऋक्पूरितिसमासान्तोऽच् ॥

द्विपदः । पुं । मनुजे ॥ देवे ॥ पक्षिणि ॥ राक्षसे ॥ यथा । द्विपदेपिचतुर्भेदा स्त्वदेवपक्षिराक्षसाः ॥ द्विपदाख्ये ॥

द्विपदराशिः । पुं । द्विपदाख्ये ॥

द्विपदा । स्त्री । ऋग्विशेषे ॥ द्वौपादा वस्याः । सङ्ख्यासुपूर्वस्येति पादस्यान्त्यलोपः । टाबृचीतिटापि पादःपत् ॥

द्विपदाख्यः । पुं । द्विपदराशौ ॥ मिथुन तुलाघटकन्या द्विपदाख्या धनुषःपूर्व भागश्च ॥

द्विपदी । स्त्री । मात्रावृत्तान्तरे ॥ आदौ षड्कलसङ्गतमेतत् तदनु पञ्च चतुष्कलम् । गुर्वन्तं द्विपदी भवतीह-विंशत्यष्टकलंदलम् ॥ यथा । यथा

मपिमयिविनिधेहिविलासिनि मधुकरमदविमोचने । विषमायुधविषमायुधशासनविकले सुमुखिलोचने ॥ द्वौपादावस्याः । सङ्ख्यासुपूर्वस्येतिपादशब्दस्यान्त्यलोपः । पादोऽन्यतरस्यामितिङीपिभत्वात् पादःपत् ॥

द्विपमदः । पुं । हस्तिमदे ॥

द्विपरार्द्धावसानम् । न । परान्तकाले ॥ द्वितीयस्यपरार्द्धस्य अवसानम् ॥

द्विपर्णी । स्त्री । वनकोल्याम् ॥ शालपर्णीपृश्निपर्ण्योः ॥ त्रि । पर्णद्वययुक्ते ॥

द्विपात् । त्रि । पादद्वययुक्ते ॥ द्वौपादौ यस्य ॥

द्विपाद्यम् । न । द्विगुणदण्डे ॥ द्वौपादौ परिमाणमस्य । पणपादमाषशताद्यत् । इह पादः पदितिन । यस्येतिलोपस्यस्थानिवत्त्वात् । पद्यतदर्थे इत्यपि न । प्राण्यङ्गार्थस्यैवतत्प्रवृत्तात् ॥

द्विपायी । पुं । हस्तिनि । गजे ॥

द्विपुटः । पुं । सुगन्धिश्वेतपुष्पे । दूडा इति पर्वतीय भाषा प्रसिद्धे ॥

द्विपृष्ठः । पुं । राजप्रभेदे । ब्रह्मसम्भवे ॥

द्विमातृकः । पुं । गणेशे ॥

द्विमुखः । पुं । राजसर्पे ॥ त्रि । मुखद्वय युक्ते ॥ द्वौमुखौयस्य ॥

द्विमुखा । स्त्री । कर्कर्याम् । गडुआ गाडूजारी वधनी इत्यादि भाषा ॥

अलोकायाम् ॥ द्वौ मुखौ यस्याः ॥

द्विमुखाहिः । पुं । सर्पभुजि । राजसर्पे ॥ द्विमुखश्चासावहिश्च ॥

द्विमुखोरगः । पुं । राजसर्पे ॥

द्विमूर्द्धः । त्रि । मस्तकद्वययुक्ते असुरविशेषे ॥ द्वौ मूर्द्धानौ यस्य । द्वित्रिभ्यांष मूर्द्धः इति षः ॥

द्विमूर्द्धा । पुं । असुरविशेषे ॥

द्विरः । पुं । भ्रमरे ॥ द्वौ रौ नाम्नि यस्य ॥

द्विरदः । पुं । गजे । हस्तिनि ॥ द्वौ रदौ यस्य ॥ स्त्रियांटापि द्विरदा ॥

द्विरदान्तकः । पुं । सिंहे ॥

द्विरशनम् । न । वारद्वयभोजने ॥ मुनिभि र्द्विरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां नित्यम् । अहनि च तम स्विन्यां सार्द्धप्रहरयामान्तः इति तिथ्यादितत्त्वम् ॥

द्विरसनः । पुं । सर्पे ॥ द्वे रसने यस्य सः ॥

द्विरागमनम् । न । वधूप्रवेशानन्तरं पराबृत्त्या पितृगृहप्राप्ताया वध्वाः पुनर्भर्त्तृगृहप्रवेशे ॥ तदुक्तम् । वृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति । पुनरागमनं वध्वा स्तद्विरागमनं विदुरिति ॥

द्विरापः । पुं । हस्तिनि ॥ इतिशब्दमाला ॥

द्विराषाढः । पुं । मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वये ॥ स चाषाढमलमासे भवति । यथा । मिथुनस्थो यदाभानुरमावास्याद्वयं स्पृशेत् । द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥ अपिच । माधवादिषु षट्केषु मासि दर्शद्वयं यदा । द्विराषाढः स विज्ञेयः शेते तुश्रावणेऽच्युत इति मलमासतत्त्वम् ॥

द्विरुक्तः । त्रि । विषादादिना द्विवारमुच्चारिते ॥ विषादे विस्मये हर्षे खेदे दैन्येऽवधारणे । प्रसादने सम्भ्रमेऽपि द्विस्त्रिरुक्तं न दुष्यतीति ॥

द्विरुक्तिः । स्त्री । द्विवारकथने ॥

द्विरूढा । स्त्री । पुनर्भ्वाम् । द्विवारविवाहितायाम् ॥

द्विरूपः । पुं । कोषविशेषे ॥ द्वे रूपे यस्मिन्सः ॥ त्रि । रूपद्वयविशिष्टे ॥

द्विरेफः । पुं । भ्रमरे ॥ त्रि । वर्वरे ॥ द्वौ रेफौ नाम्नि यस्य ॥

द्विवचनम् । न । येनपदेन द्वावर्थावुच्येते तस्मिन् ॥ द्वयोरर्थयोर्वचनम् । वचेः करणेल्युट् । कर्मणिषष्ठ्या समासः ॥

द्विवर्षा । स्त्री । द्विहायन्याम् ॥ द्वेवर्षे वयः प्रमाणमस्याः । आर्हीयष्ठक् । अध्यर्द्धेतिलुक् ॥

द्विवर्षिका । स्त्री । द्विवर्षायाङ्गवि ॥

द्वेवर्षे वयो यस्याः सा द्विवर्षा । द्वि वर्षैव । स्वार्थकः । प्रत्ययस्थादितीत्वम् ॥

द्विवार्षिकः । त्रि । द्विवर्षभवे ॥

द्विवाहिका । स्त्री । दोलायाम् ॥

द्विविदः । पुं । वानरविशेषे ॥ यो बलरामेण हतः ॥ समुद्रस्योत्तरेतीरे द्विविदोनाम वानरः । ऐकाह्निकज्वरं हन्ति तस्य नामानुकीर्त्तनात् ॥

द्विवेशरा । स्त्री । लघुरथे । लघ्व्याम् ॥

द्विशफः । पुं । द्विखुरेपशौ ॥ यथा । गौरजोमहिषः कृष्णः शूकरोगवयोरुरुः । द्विशफाः पशवश्चेमे अविरुष्ट्रश्चसप्तमः ॥ इति श्रीभागवतम् ॥

द्विशः । अ । द्वयोर्द्वयोः ॥ द्वौ द्वौददातीतिद्विशः । संख्यैकवचनाच्चवीप्सायामितिशस् ॥

द्विट् । पुं । शत्रौ ॥ त्रि । द्वेष्टरि ॥ द्वेष्टि । द्विष अप्रीतौ । क्विप् ॥

द्विषन् । त्रि । शत्रौ ॥ द्वेष्टि । द्विष० । द्विषोऽमित्रे इति शतृ ॥

द्विषन्तपः । त्रि । शत्रुतापने ॥ द्विषन्तं तापयति । तप० । णयन्तः । द्विषत्परयोस्तापेरितिखच् । खचिह्रस्वः । मुम् ॥

द्विष्टः । त्रि । द्वेषविषये ॥

द्विष्ठः । त्रि । उभयस्थे ॥ संयोगस्तुद्विष्ठतयेति जगदीशः ॥ द्वयोस्तिष्ठति । ष्ठा० । कः ॥

द्विः । त्रि । क्रियाद्वयगणने ॥ यथा । द्विः शरंनाभिसन्धत्ते द्विःस्थापयति नाश्रितान् । द्विर्ददातिनचार्थिभ्यो रामो द्विर्नाभिभाषत इति ॥ द्विवारमित्यर्थे द्वित्रिचतुर्भ्यः सुच् ॥

द्विसप्ततिः । स्त्री । द्व्यधिकसप्तत्याम् ॥

द्विसहस्राक्षः । पुं । अनन्ते । नागराजे ॥

द्विसीत्यम् । त्रि । द्विगुणाकृते । द्विवार कृष्टक्षेत्रे ॥ द्विवारं सीतया समितम् । नौवयोधर्मेत्यादिनायत् ॥

द्विस्विन्नान्नम् । न । सिद्धतण्डुले । उश्नाचाउर इतिभाषा ॥ द्विः स्विन्नमन्नं पृथुकं गुडंदेशविशेषके । नात्यन्तशस्तं विप्राणां भक्षणेचनिवेदने ॥ अभक्ष्यं तद्व्रतीनाञ्च विधवाब्रह्मचारिणाम् । ताम्बूलञ्चयथा ब्रह्मन् तथैते वस्तुनी ध्रुवमिति ब्र० वै० ब्रह्मखण्डम् ॥

द्विहा । पुं । गजे । हस्तिनि ॥ नान्तः ॥ इतिशब्दरत्नावली ॥

द्विहल्यम् । त्रि । द्विसीत्ये । द्विगुणाकृते ॥ द्विवारं हलेन कृष्टम् । मतजनहलादितियत् ॥

द्विहायनी । स्त्री । द्विवर्षायाङ्गवि ॥ द्वौहायनौ यस्याः । दामहायनान्ता

श्चेति ङीप् ॥

द्विहृदया । स्त्री । दोहदिन्याम् ॥ स्वहृदयेन गर्भहृदयेनच द्विहृदया गर्भिणी भवति ॥

द्वीन्द्रियग्राह्यः । पुं । इन्द्रियद्वयग्रहणीये गुणे ॥ सत्तु सङ्ख्यादिसप्तद्रवत्वस्नेहरूपः । यथा । सङ्ख्यादि रपरत्वान्तो द्रवत्वं स्नेह एवच । एतेतु द्वीन्द्रियग्राह्या अथस्पर्शान्तशब्दकाः ॥ इति भाषापरिच्छेदः ॥ द्वीन्द्रियग्राह्याः ॥ चाक्षुषप्रत्यक्षत्वाचप्रत्यक्षयो विषया इत्यर्थः ॥

द्वीपः । पुं । न । जलमध्यस्थस्थले । अन्तरीपे ॥ पुराणादिप्रसिद्धेषु सप्तसु ॥ तेचयथा । जम्बूशाककुशक्रौञ्चशाल्मगोमेदपुष्कराः । लक्षादिद्विगुणा द्वीपाः क्षाराद्यब्धिभिरावृताः ॥ द्विर्गता आपोऽत्र । ऋक्पूरित्यः समासान्तः । द्व्यन्तरुपसर्गेभ्योपईत् इत्यपईत् ॥ भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः ॥ शाकं ततः शाल्मलं मत्र कौशं क्रौञ्चञ्च गोमेदकपुष्करेच । द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति ॥ इति सिद्धान्तशिरोमणिः ॥

द्वीपकर्पूरजः । पुं । चीनकर्पूरे ॥

द्वीपखर्ज्जूरम् । न । } महापारेवते ॥
द्वीपजम् । न । }

द्वीपवान् । पुं । नदे ॥ अब्धौ ॥ द्वीपमस्त्यस्य । मतुप् ॥

द्वीपवती । स्त्री । भूमौ ॥ नद्याम् ॥ द्वीपमस्त्यस्याम् । मतुप् । ङीप् ॥

द्वीपशत्रुः । पुं । शतावर्याम् ॥

द्वीपान्तरवचा । स्त्री । चोपचीनी इति भाषा प्रसिद्धे द्रव्ये ॥

द्वीपिका । स्त्री । शतावर्याम् ॥

द्वीपी । पुं । व्याघ्रे । वघेरा इतिभाषा ॥ चित्रके । चीता इति भाषा द्वौवर्णावीयते । ईङ् गतौ । वा० पः । द्वीपं चर्मास्त्यऽस्य । अतइनिठनावितीनिः ॥

द्वीपिनखः । पुं । व्याघ्रनखे ॥

द्वीपिशत्रुः । पुं । शतमूल्याम् ॥

द्वीशः । पुं । विशाखानक्षत्रे ॥ द्वौ इन्द्राग्नी ईशौयस्य सः ॥

द्वेधा । अ । द्विप्रकारे ॥ सङ्ख्याया विधार्थे धा । एधाच्चेतितस्य एधाजादेशः ॥ द्वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषुच । तासु तेष्वऽप्यऽनासक्तः साक्षाद्भर्गो नराकृतिः ॥

द्वेषः । पुं । शत्रुतायाम् । द्वेषणे । वैरे । विरोधे । दुःखसाधने विद्यमाने

किमपि दुःखं मे माभूदितिविपर्य्ययविशेषे तामिस्रे ॥ सचाष्टादशविधस्तामिस्रो द्रष्टव्यः ॥ दुःखमनुशेतेऽस्मिन्निति वृत्तिविशेष स्तमोनुगतरजःपरिणामः । ईदृशं सर्वं सर्वदा मे माभूदिति । तच्च शत्रुव्याघ्रादिषु सत्सु न निवारयितुं शक्यम् । नच सर्वे ते दुःखहेतवो हन्तुं शक्यन्ते अतः सद्वेषः सदा हृदयं दहति । यदा तु स्वस्येव परेषां सर्वेषामपि दुःखं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैर्य्यादिद्वेषनिवृत्तौ चित्तम्प्रसीदति । यद्यसौ पुण्यपुरुषेषु मुदितां भावयेत् तदा तद्वासनाभावात् स्वयमेवाप्रमत्तोऽशुक्लाकृष्णे पुण्ये प्रवर्त्तते । तथा पापपुरुषेषूपेक्षां भावयन् स्वयमपि तद्वासनाभावात् पापान्निवर्त्तते । ततश्च पुण्याकरणपापकरणनिमित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदति । एवं सुखिषु मैत्रीं भावयतो न केवलं रागो निवर्त्तते किन्त्वसूयेर्ष्यादयोऽपि निवर्त्तन्ते । तथा दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यदा निवर्त्तते तदा दुःखिप्रतियोगिकत्त्व सुखित्वप्रयुक्त दर्पोऽपि निवर्त्तते ॥ एवं दोषान्तरनिवृत्तिरप्यूहनीया ॥

दुःखे तत्साधने च इदं मे माभूदिति-स्पृहाविरोधिनी चित्तवृत्तिः क्रोध इति ईर्ष्येति चोच्यते द्वेषणम् । द्विष० । घञ् ॥ * ॥ द्वेषश्चात्मनो विशेषगुण इति सि० मु० ॥ द्वेषवशवर्त्तित्वनिषेधो यथा । इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ।इति भगवद्गीता ॥ अस्य कारणं द्विष्टसाधनताज्ञानम् । इति भाषा प० ॥

द्वेषणः । त्रि । शत्रौ ॥ द्वेषशीलः । क्रुधमण्डार्थेभ्यश्चेति युच् ॥ न । द्वेषे ॥

द्वेषपक्षः । पुं । क्रोधेर्ष्यासूयाशोकामर्षाभिमानेषु ॥ द्वेषस्य पक्षः ॥

द्वेषी । त्रि । वैरिणि । शत्रौ ॥ द्वेष्टि तच्छीलः । द्विष० । सम्पृचेति घिनुण् ॥

द्वेष्टा । त्रि । विद्वेषकर्त्तरि ॥

द्वेष्यः । त्रि । द्वेषविषये । द्वेषकर्मणि स्वकृतापकारमपेक्ष्य अपकारकर्त्तरि ॥ अक्षिगते ॥ द्वेष्टुमर्हः ॥ यत् ॥

द्वै । अ । वितर्के ॥

द्वैगुणिकः । त्रि । वार्द्धुषौ । वृद्ध्याजीवे ॥ द्विगुणार्थं द्रव्यं द्विगुणम् । तत्प्रयच्छति द्विगुणं ग्रहीतुमेक गुणं ददाति । प्रयच्छतिगर्ह्यमिति ठक् ॥

द्वैतम्। न। युगले। द्वये। द्वैधीभावे॥ द्विधा इतं द्वीतम्। तस्य भावः। युवादित्वादण् स्वार्थे वा॥ द्वैताद्वैतयोः प्रमाणभूतवेदप्रतिपाद्यत्वात् कस्य सत्यत्वं कस्यासत्यत्वमित्याऽकाङ्क्षायामाहुराचार्याः॥ अद्वैतमेव सत्यं तस्मिन् द्वैतं न सत्यमध्यस्तम्। रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम्॥ आरोपितं यद्विद्यादद्वैतं वस्त्ववस्तुनि द्वैते। युक्तं नैव तदा स्यात् सत्ये ध्यासो भवत्यसत्यानाम्॥ यद्वारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्यचिदभावः। आरोपणं न शून्ये तस्माद्द्वैतसत्यता ग्राह्या॥ प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम्। द्वैतं न प्रतिपाद्यं तस्य स्वयमेवलोकसिद्धत्वादिति॥ प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थत इति॥

द्वैतवनम्। न। शोकमोहादिरहिते तपोवने॥ द्वे इते गते यस्मात् तद्द्वीतम्। द्वीतमेव द्वैतम्। तच्च तद्वनञ्च॥

द्वैतवादी। त्रि। जीवेश्वरयोर्भेदवादिनि। ईश्वरातिरिक्तजीववक्तरि॥ तन्मतं यथा। परमात्मनो जीवात्मा पृथक्। तन्मध्ये केषाञ्चिन्मते प्रकृतिरतिरिक्ता केषाञ्चिन्मते प्रकृतिरदृष्टमात्रे पर्यवसिता एवं जीवश्च पृथक्। अत्र प्रमाणम्। जन्मकर्ममरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैवेति सांख्यार्या॥ अस्यार्थः। पुरुषबहुत्वं सिद्धम्। कस्मात्। जन्ममरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धो जन्म न तु पुरुषस्य परिणामस्तस्यापरिणामित्वात्। तेषामेव च देहादीनामुपात्तानां परित्यागो मरणम् न त्वात्मनोऽपि नाशस्तस्य कूटस्थनित्यत्वात्। करणानि बुद्ध्यादीनि त्रयोदश। तेषां जन्ममरणकरणानाम् प्रतिनियमोऽव्यवस्था। सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते। तदा खल्वेकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे वा म्रियेरन्। अन्धादौ चैकस्मिन् सर्व एवान्धाः एकस्मिन् विचित्रे सर्व एव विचित्राः स्युरित्यव्यवस्था प्रतिक्षेत्रं पुरुषभेदे तु भवति व्यवस्था। न चैकस्यापि पुरुषस्य देहोपधानभेदाद् व्यवस्थेति युक्तम्। पाणिस्तनाद्युपधानभेदेनापि जन्ममरणादिव्यवस्थासम्भवात्।

नहिपाणौ कृत्ते जाते वा स्तनादौमध्यवयवे युवतिर्जाता मृता वा भवतीति। इतश्च प्रतिनियमं पुरुषभेद इत्याह। अयुगपत् प्रवृत्तेश्चेति। प्रवृत्तिश्च प्रयत्नलक्षणा यद्यप्यन्तः करणवर्त्तिनी तथापि पुरुष उपचर्यते। तथाच तस्मिन्नेकशरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत। ततश्च सर्वाण्येव शरीराणि युगपच्चालयेत्। नानात्वे तु नायं दोष इति। इतश्च पुरुषभेद इत्याह। त्रैगुण्यविपर्ययाच्चैवेति। एवकारो भिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः। सिद्धमेव नासिद्धम्। त्रयो गुणास्त्रैगुण्यम्। तस्य विपर्ययोऽन्यथात्वम्। केचित् खलु सत्त्वनिकायाः सत्त्वबहुलाः यथोर्द्ध्वस्रोतसः। केचिद् रजोबहुलाः यथा मनुष्याः। केचित् तमोबहुलाः यथा तिर्य्यग्योनयः। सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभावस्तेषु तेषु सत्त्वनिकायेषु न भवेत् यद्येकः पुरुषः स्यात्। भेदे त्वयमदोष इति॥*॥ तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्चेति गोतममतम्॥ इह ब्रह्मणो जीवेतरत्वप्रतिपादनात् तयोरद्वैतं नाभिमतम्॥ नेतरो

ऽनुपपत्तेः।१।१।१६। भेदव्यपदेशाच्च।१।१।१७। मुक्तोपसृप्यव्यपदेशात्।१।३।२। आकाशोऽर्थान्तरत्वादिव्यपदेशात्।१।३।४१। भोगमात्रसाम्यलिङ्गाच्च।४।४।२१। इति सूत्रे मोक्षे पितयोर्द्वैतनिरूपणाच्च। इति गोविन्दभाष्यमतम्॥ यतो द्वैतमते युक्तिरेव प्रमाणं युक्त्यायत् फलति तदेव सर्वाध्यात्मविद्याप्रतिपादकश्रुतीनां तात्पर्यमिति रामानुजमतञ्च॥*॥ सूत्रार्थस्तु। इतर ईश्वरादन्यः संसारी जीवो नानन्दमयः। कस्मात् स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्चेति विजगदर्थकत्वानुपपत्तेः सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते॥*॥ रसं ह्येवायं लब्ध्वानन्दी भवतीति श्रुतौ प्राप्यप्रापकत्वभेदोक्तेर्न जीवस्यानन्दमयः॥*॥ अथमर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति मुक्तानामुपसृप्यत्वस्य प्राप्यत्वस्योक्तेः॥*॥ आकाशो वै नाम नामरूपयोर्निर्वहिते त्यादौ भूताकाश इति चेन्न। ते यदन्तरा तद्ब्रह्मेत्यत्र। ते नामरूपे यदन्तरा यतो भिन्ने इति नामाद्यन्तःपातिगगनरूपाद्भिन्नत्वेन। आह्निमा ब्रह्मत्वेनाकाशस्य व्यपदे

णात् ॥ * ॥ एत मानन्दमय मात्मा न मनुविश्य नजायते न म्रियते न ह्रसते न वर्द्धते यथाकामं चरति यथा कामं पिबति यथाकामं रमते इति भोगमात्रेणेश्वरसाम्यलिङ्गाच्च जीवस्य जगत्कृतिः। चकारादस्रुतत्वात् जगद्व्यापारार्थोपास्त्यभावादिति ॥ * ॥ विकल्पोविनिवर्त्तेत कल्पितोयदिकेनचित्। उपदेशादयं वादोज्ञाते द्वैतं न विद्यते इत्यागमविदः ॥

द्वैती। त्रि। भेदवादिनि ॥ कपिलकाणादबुद्धार्हतादिदृष्ट्यनुसारिणि ॥ यथा। स्वसिद्धान्तव्यवस्थासुद्वैतिनोनिश्चिता दृढम्। परस्परं विरुद्ध्यन्ते तैरयं नविरुध्यत इति ॥ व्यवस्थासु स्वसिद्धान्तरचनासु। निश्चिताः एवमेवैषपरमार्थो नान्यथेति तत्र तत्रनिरूढाः। स्वसिद्धान्तदर्शननिमित्तमेवान्योन्यं विरुध्यन्ते तैरस्मदीयो वैदिकः सर्वात्मन्यत्त्वादात्मैकत्वदर्शनपक्षो नविरुध्यते यथा स्वहस्तपादादिभिः ॥ अद्वैतं परमार्थोहिद्वैतं तद्भेदउच्यते। तेषामुभयथाद्वैतं तेनायंन विरुध्यते ॥ द्वैतंनानात्वं तस्याद्वैतस्यभेदः कार्यम् ॥

द्वैतीयीकः। त्रि। द्वितीये ॥ तीयादीकक् स्वार्थे वा वाच्यः ॥

द्वैधम्। अ। द्विप्रकारे ॥ द्विव्द्योश्च धमुञ् ॥ सैन्यद्विधास्थितौ ॥ एकेनसन्धि रपरेण विग्रह इत्येवं द्विप्रकारौ द्वैधम् ॥ विवादे ॥ धमुञन्तात् स्वार्थेड दर्शनम् ॥ पक्षिद्वैधानितृणानि ॥

द्वैधीभावः। पुं। द्वैधे। नीतिवेदिनां राज्ञांगुणविशेषे ॥ बलिनो द्विषतोर्मध्ये वाचात्मानं समर्पयन्। द्वैधीभावेन वर्त्तेत काकाक्षिवदलक्षितइतिनीतिः ॥

द्वैपः। पुं। द्वीपचर्माच्छन्नेरथे। वैयाघ्रे ॥ द्वीपिनोविकारः। प्राणिरजतादिभ्योऽञ्। द्वैपेनचर्मणापरिवृतोरथः। द्वैपवैयाघ्रादञ् ॥ न। व्याघ्रचर्मणि ॥ द्वीपिनोविकारः। प्राणिरजतादिभ्योञ् ॥ त्रि। द्वीपिसम्बन्धिनि ॥ व्याघ्रचर्मसम्बन्धिनि ॥ द्वीपसम्बन्धिनि ॥ अण् ॥

द्वैपदिकः। पुं। द्विपदामधीते वेदवेत्त्यर्थे ॥ उ॰ ठक् ॥

द्वैपायनः। पुं। व्यासे ॥ द्वीप मयनं स्थानं जन्मभूमिर्यस्य सद्वीपायनः। स एव। प्र॰ अण् ॥ द्वीपेन्यस्तस्तयांबालस्तस्माद्द्वैपायनोभवदिति पुराणम्। तयासत्यवत्या ॥

द्वैप्यः। त्रि। द्वीपवासिनि। समुद्रसमीपवर्त्तिद्वीपे भवे ॥ द्वीपादनुसमुद्रंयञ्

॥ त्रिवर्गादैप्या ॥ हतमितिभाषा परिच्छेदः ॥

द्वैमातुरः । पुं । गणाधिपे । विघ्नराजे ॥ द्वयोर्मात्रोरपत्यम् । मातुरुत्संख्येत्यणि उत्वंरपरत्वञ्च । दुर्गाचामुण्डाभ्यां पालितत्वात् । गजमुखतयाहस्तिन्याअप्यपत्यत्वात् ॥ गङ्गाया अपत्यत्वाद्वा ॥ जरासन्धे ॥ त्रि । द्विमातृजे ॥

द्वैमातृकः । पुं । नदीवृष्टिजलोद्भूतधान्यभृतेदेशे ॥

द्वैषणीया । स्त्री । नागवल्ली प्रभेदे ॥

द्व्यङ्गः । पुं । द्विस्वभावराशौ ॥

द्व्यङ्गुलम् । त्रि । अङ्गुलिद्वयपरिमिते ॥ द्वे अङ्गुली परिमाणमस्य ॥ न । अङ्गुलिद्वयमात्रे ॥ द्वयोरङ्गुल्योः समाहारः ॥

द्व्यञ्जलः । त्रि । अञ्जलिद्वयपरिमिते ॥ द्वावञ्जली परिमाणमस्य ॥ न । अञ्जलिद्वयमात्रे ॥ द्वयोरञ्जल्योः समाहारः ॥

द्व्यणुकम् । न । परमाणुद्वयसंयोगादुत्पन्ने । परमाणु समवेतद्रव्ये । परमाणुद्वयात्मके ॥ तच्च प्रत्यक्षादिविषयम् । यथा । विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः ॥ तस्य परिमाणम नित्यम् । यथा । अनित्ये द्व्यणुकादौ तु सङ्ख्याजन्यमुदा

द्व्यन्यः । त्रि । द्वाभ्यामन्यस्मिन् ॥ द्वेअन्येयस्यवा ॥ न । द्वयोरन्ययोः समाहारे ॥

द्व्यर्थः । त्रि । अर्थद्वययुक्ते शब्दादौ ॥

द्व्यष्टम् । न । ताम्रे । शुल्बे ॥ द्वेद्वेमहत्ये अस्मुतेऽस्य । अशू० । गत्यर्थेति क्तः ॥

द्व्यहः । पुं । अहर्द्वये ॥ द्वेअहनीसमाहृते । राजाहःसखिभ्यष्टच् । रात्राह्नाहाःपुंसि ॥

द्व्यात्मकः । पुं । मिथुनकन्याधनुर्मीन० राशिषु ॥ यथा । चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमीक्रमशःप्रदिष्टाः । इति ॥

द्व्यामुष्यायणः । पुं । तवममचायमिति परिभाषया धर्मतःपरिगृह्णीते ॥ अमुष्यप्रसिद्धस्यापत्यमामुष्यायणः । द्वयोरामुष्यायणः ॥ उभयोरप्यसौपिण्डदाताभवति । यतःसुतोजायतेयेनचायं धर्मतोगृह्यते तयोः । उभयोरप्यसौरिक्थी पिण्डदाताचधर्मतः । इति स्मृतेः ॥

द्व्याह्निकः । त्रि । दिनद्वयभवे ॥ द्व्यहे भवः ॥

ध:

ध: । पुं । धकारे ॥ धर्म्मे ॥ कुबेरे ॥ ब्रह्मणि ॥ न । वस्तुनि । धने ॥

धटः । पुं । दिव्यतुलायाम् । तुलापरीक्षायाम् ॥ तुलायाम् । तराजू इति भाषा ॥ तुलाराशौ ॥

धटकः । पुं । चतुर्द्दशशङ्कपरिमाणे । द्विचत्वारिंशद्रक्तिकासु ॥

धटपरीक्षा । स्त्री । तुलापरीक्षायाम् ॥

धटी । स्त्री । वाससश्चीरे । धज्जीइतिभाषा ॥ कौपीने ॥

धटीदानम् । न । गर्भाधानानन्तरस्त्रीसम्प्रदानकचीरवस्त्रदाने ॥ यथा । मूलश्रवणहस्तेषु पुष्यादित्युत्तरासु च । मृगे पौष्णे धटी देया सौम्यवारे शुभे तिथाविति ज्योतिः सारसंग्रहः ॥

धत्तूरः । पुं । उन्मत्ते । धुस्तूरे ॥ धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्ठनुत् । कषायो मधुरस्तिक्तो यूकालिक्षाविनाशनः ॥ उष्णो गुरुर्व्रणश्लेष्मकण्डूकृमिविषापहः ॥ * ॥ धयति धातून् । धेट्० । वा० उरच् । पृषोदरादित्वात् साधुः ॥

धनम् । न । गोधने ॥ वित्ते । स्वापतेये । ऋक्थे । अर्थे । द्रविणे ॥ यदेतद् द्रविणं नाम प्राणा एते बहिश्चराः । स तस्य हरते प्राणान् यो यस्य हरते धनम् ॥ इति कूर्मपुराणम् ॥ श्रीभागवते तु । राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितमिति ॥ दानं भोगस्तथा नाशो धनस्य गतिरीदृशी । दानभोगौ कृतौ नाथ नाशः पापात्मनां किलेति देवी भागवतम् ॥ धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते । नाधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चनेति च ॥ तत् त्रिविधमुक्तं गारुडे २१० अध्याये । यथा । धनन्तु त्रिविधं ज्ञेयं शुक्लं शबलमेव च । कृष्णञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक् ॥*॥ क्रमायातं प्रीतिदायं प्राप्तञ्च सह भार्यया । अविशेषेण सर्व्वेषां वर्णानां त्रिविधं धनम् ॥*॥ वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम् । याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः ॥ त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् । युद्धार्थलब्धं कारजं दण्ड्याच्च व्यवहारतः ॥ वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम् ॥ कृषिगोरक्षवाणिज्यं शूद्रस्यैभ्यस्त्वनुग्रहात् ॥ कुसीदकृषिवाणिज्यं प्रकुर्व्वीत स्वयंकृतम् । आपत्काले स्वयं कु-

वं नैनसा युज्यते हिजइति ॥ धनति । धनधान्ये । पचावच् ॥ क्षेत्रार्थे ॥ धनिष्ठा नक्षत्रे ॥

धनकेलिः । पुं । कुवेरे । राजराजे ॥

धनच्छूः । स्त्री । पक्षिविशेषे । करेट व्याघ्राम् ॥ इ०चि० ॥

धनञ्जयः । पुं । अर्जुने । युधिष्ठिरराजसूयार्थं दिग्विजये सर्वान् राज्ञोजित्वा धनमाहृतइति महाप्रभावे पाण्डवानां मध्येभगवद्विभूतौ ॥ वह्नौ ॥ धनमिच्छेहुताशनात् ॥ नागप्रभेदे ॥ अयञ्च जलाशयाधिपतिः ॥ पेशस्करे देहवर्त्तिवायौ ॥ नजहाति मृतञ्चापि सर्वव्यापीधनञ्जयः ॥ ककुभतरौ ॥ चित्रकवृक्षे ॥ प्रलेहप्रभेदे ॥ यथा । मांसकूष्माण्डकदली मूलकेरादि साधयेत् । प्रलेहविधिना चायं प्रलेहोयं धनञ्जयः ॥ धनञ्जयति । जिजये । अस्मात् । संज्ञायां भृतृवृजिधारिसहितपिदमः इतिखच् । अरुर्द्विषदितिमुम् ॥

धनदः । पुं । कुवेरे ॥ धनं दयते । देङ्पालने । आतद्गति कः ॥ हिज्जलवृक्षे ॥ त्रि । धनदातरि ॥ धनं ददाति । डुदाञ् । आतइतिकः ॥

धनदा । स्त्री । देवीविशेषे ॥ टाप् ॥

धनदाक्षी । स्त्री । लताकरञ्जे ॥

धनदानुचरः । पुं । यक्षे ॥ धनदस्यानुचरः ॥

धनदानुजः । पुं । दशास्ये । रावणे ॥ धनदस्य अनुजः ॥

धनदायी । पुं । अग्नौ ॥ आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥ त्रि । रिक्थप्रदे ॥

धनन्ददा । स्त्री । जिनशक्तिविशेषे ॥

धनपतिः । पुं । कुवेरे । त्र्यम्बकसखे ॥ धनस्य धनानां वा पतिः ॥ त्रि । धनान्विते ॥

धनपिशाचिका । स्त्री । }
धनपिशाची । स्त्री । } धनाशायाम् । तृष्णायाम् । धनलोभे ॥

धनप्रिया । स्त्री । काकजंबाम् ॥

धनमानमदान्वितः । त्रि । धननिमित्तो योमान आत्मनि पूज्यत्वाध्यासः तन्निमित्तोयोमदः परस्मिन् गुर्वादावप्यपूज्यत्वाभिमानस्ताभ्यामन्विते ॥

धनलोलुपः । त्रि । धनविषये अतिलुब्धे ॥ यथा । यदा सुम्लेच्छजातीया राजानोधनलोलुपाः । भविष्यन्ति महाप्राज्ञ तदैवप्रबलः कलिरिति श्री महानिर्वाणतन्त्रम् ॥

धनवान् । त्रि । धनिनि । धनविशिष्टे ॥ धनमस्त्यस्यास्मिन् वा । तदस्यास्तीति

मतुप् ॥ धिग्जन्मेता विद्या धिक्पिक
धिता धिक्सुजनता वयोरूपं चाधिक्
धिक्पित्वयशो निर्धनवताम् । अपि
जीयादेक: सकलगुणी हीनोपि धनवा
न् वहिर्दोषेयस्य तु गुणवसमा:सन्ति
गुणिन इति विवेकिन: खेदोक्ति: ॥
धनवती । स्त्री । धनिष्ठानक्षत्रे ॥ ङीप् ॥
धनस्थक: । पुं । गोक्षुरे ॥ इतिशब्दच
न्द्रिका ॥
धनस्वामी । त्रि । उत्तमर्णे ॥
धनहरी । स्त्री । चण्डाहृमे । चोरना-
मगन्धद्रव्ये । गणहासके ॥ त्रि । धन
हारिणि ॥ धनं हरति । हृञ् । हर
तेरनुद्यमनेऽच् । गौ० ङीष् ॥
धनहारी । त्रि । धनहारके ॥
धनागारम् । न । भाण्डागारे ॥
धनाढ्य: । त्रि । धनसंयुक्ते ॥ धनेनाढ्य: ॥
धनाधिकृत: । त्रि । धनाध्यक्षे । खजा
नची इति भाषा ॥
धनाधिप: । पुं । कुवेरे । गुह्यकेश्वरे ।
धनदे ॥ धनानामधिप: ॥
धनाधिपति: । पुं । कुबेरे ॥ धनानाम
धिपति: ॥
धनाध्यक्ष: । पुं । कुवेरे । धनदे ॥ धना
ऽधिकृते । खजानची इति भाषा ॥
अस्यलक्षणं यथा । लोकवस्ताजिना-
दीनां रत्नानाञ्च विधानवित् । वि-

ज्ञाता फल्गुसाराणां धनाध्यक्ष: शु
चि: सदा ॥ निपुणश्चाप्रमत्तश्च
धनाध्यक्ष: प्रकीर्त्तित: ॥ आयद्वारे
षु सर्वेषु धनाध्यक्षसमानरा: । व्य
यद्वारेषु चतथा कर्त्तव्या: पृथिवीक्षि
ता ॥ इति मत्स्यपुराणम् ॥
धनाशा । स्त्री । धनलोभे ॥ जीर्यन्ति जी
र्यत: केशा दन्ता जीर्यन्ति जीर्यत: ।
जीविताशा धनाशाच जीर्यतोपि न
जीर्यति ॥
धनाश्री: । स्त्री । रागिणी विशेषे ॥
धनिक: । पुं । धन्याके ॥ अस्मिन्नर्थेक्लीव
मिति राजनिर्घण्ट: । पुल्लिङ्ग इति
मेदिनी ॥ धवे ॥ त्रि । साधौ ॥ धनि
नि ॥ धनमस्यास्ति । अतइनिठनावि
तिठन् ॥
धनिका । स्त्री । साधुनार्य्याम् ॥ वध्वाम्
॥ युवत्याम् ॥ प्रियङ्गुवृक्षे ॥
धनी । त्रि । आढ्ये ॥ बहुधनमस्यास्ति
। अतइनिठनावितीनि: ॥
धनिष्ठा । स्त्री । श्रविष्ठायाम् । त्रयोविंश
तितमेनक्षत्रे ॥ अतिशयेनधनवती ।
इष्ठन् । विन्मतोर्लुगिति मतुपोर्लु
क् ॥ अथजातस्यफलम् । आचारज्ञा
तादरचारुशीलो धनाधिशाली बल
वान् दयालु: । यस्यप्रसूतौच भवेद्ध
निष्ठा महत् प्रतिष्ठा सहितो नर:

स्यात् ॥

धनीका । स्त्री । युवत्याम् ॥

धनीयकम् । न । धान्याके ॥

धनुः । पुं । पियालद्रौ ॥ राशिभेदे ॥ शरासने ॥ हस्तचतुष्टयमाने ॥ दधाति । धारयति । धमति वा । धन० । भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उरिति उः ॥

धनुःपटः । पुं । पियालतरौ ॥ धनुषइव पटो विस्तारोऽस्य ॥

धनुःशाखा । स्त्री । मूर्वायाम् ॥

धनुःश्रेणी । स्त्री । मूर्वायाम् ॥ महेन्द्रवारुण्याम् ॥

धनुरधिपः । पुं । वृहस्पतौ ॥ धनुषः अधिपः ॥

धनुर्गुणः । पुं । ज्यायाम् । मौर्व्याम् ॥ धनुषोगुणः ॥

धनुर्गुणा । स्त्री । मूर्वायाम् ॥

धनुर्द्रुमः । पुं । वंशे ॥

धनुर्द्धरः । त्रि । धनुष्मति । धन्विनि ॥ धरति । धृञ्० । अच् । धनुषोधरः ॥

धनुर्द्धारी । त्रि । धनुर्द्धरे । निषङ्गिणि । धान्विनि ॥ तल्लक्षणं यथा । गुरुस्वत्वयुक्तस्य गजाश्वरथकोविदः । धनुर्द्धारी भवेद्राजा सर्वकर्म्मसहः शुचिरिति मत्स्यपुराणम् ॥

धनुर्भृत् । पुं । धनुर्द्धरे । धानुष्के ॥

धनुर्मध्यम् । न । वालके ॥ धनुषोमध्यम् ॥

धनुर्म्माला । स्त्री । मूर्वायाम् ॥

धनुर्य्यासः । पुं । यवासे ॥

धनुर्ल्लता । स्त्री । सोमवल्ल्याम् ॥

धनुर्वृक्षः । पुं । धन्वनवृक्षे ॥ भल्लातके ॥ वंशे ॥ अश्वत्थे ॥

धनुर्वेदः । पुं । अस्त्रास्त्रप्रयोगोपसंहारप्रतिपादके मन्त्रसहिते पादचतुष्टयात्मके यजुर्वेदस्योपवेदे ॥

धनुष्करः । पुं । धानुष्के ॥ धनुःकरेऽस्य ॥ यद्वा । धनुःकरोति । दिवाविभेतिटः ॥

धनुष्पटः । पुं । पियालवृक्षे ॥ धनुषइव पटो विस्तारोऽस्य ॥

धनुष्मान् । पुं । धानुष्के । धनुर्द्धारिणि ॥ धनुरस्यास्ति । मतुप् । तसौमत्वर्थे इति भत्वम् ॥

धनुष् । पुं । पियाले ॥ पुं । न । राशिविशेषे । तौषिके ॥ एतद्राशिजातफलं यथा । बहुकलाकुशलः प्रज्ञो महान् विमलताकलितः सरलोक्तिभाक् । अश्वधरोऽपि धनुर्द्धरगो नरो धनकरो नकरोति धनव्ययम् ॥ तज्जन्मजातफलम् । धनुर्लग्ने समुत्पन्नो नीतिमान् धनवान् सुखी । कुलमध्ये प्रधानश्च प्राज्ञः सर्वस्यपोषकः ॥

शरासने । कोदण्डे । कार्मुके ॥ अस्य लक्षणं यथा । धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं शार्ङ्गं तथैव च । कोदण्डं वंशदृढता तयोर्गुणा उदाहृताः ॥ सुखसम्पत्तिकरणं सममुष्ट्यायतं धनुः । विपदो मुष्टिवैषम्ये तदङ्गभङ्गमावहेत् ॥ इति युक्तिकल्पतरुः ॥ * ॥ धनुषा कार्यमेतासद्वार्त्तामामभिरक्षणम् ॥ * ॥ हस्तचतुष्टयपरिमाणे । काठा । इति गौडभाषा ॥ यथा । चतुर्विंशाङ्गुलो हस्तस्तच्चतुष्कं धनुः स्मृतम् ॥ त्रि । धनुर्द्धरे ॥ इधन्ति धारयति । धन० । उसिः प्रत्ययः ॥ यद्वा । धनति । धनशब्दे । ऋर्त्तिपृवपियजितनिधनितपिभ्यो निदित्युसिः ॥

धनूः । पुं । धनुषि ॥ नवमराशौ ॥ इधन्ति । धन्यते वा । धन० । कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ॥

धनेश्वरः । पुं । कुबेरे ॥ धनानामीश्वरः ॥

धन्यधन्यम् । न । अपाटवे ॥

धन्यः । पुं । अश्वकर्णवृक्षे ॥ त्रि । श्लाघ्ये ॥ स्वनामा पुरुषो धन्यः पितृनामा च मध्यमः । अधमो मातृनामा च मातामाधमाधमः ॥ कृतार्थे ॥ पुण्यवति । सुकृतिनि ॥ वार्हस्पत्यौशनसादावर्थशास्त्रे ॥ धनाय हिते ॥ धनचालिनि ॥ धनंलब्धा । धनगर्भं ला-

भेतियत् ॥ धनस्य निमित्तं संयोग उत्पातोवा । गोद्व्यचइत्यादिनायत् ॥ धनं प्रयोजनमस्य वा ॥

धन्यव्रतम् । न । धनजनके व्रतविशेषे ॥

धन्या । स्त्री । आमलक्याम् ॥ धात्र्याम् । उपमातरि । धाय इति भाषा ॥ धन्याके ॥ पिण्डारकवनदेव्याम् ॥ टाप् ॥

धन्याकम् । न । छत्रायाम् । कुस्तुम्बुरुणि । वितुन्नके । धनिआ इति भाषा ॥ शिलायां साधु सम्पिष्टं धन्याकं वस्त्रगालितम् । शर्करोदकसम्मिश्रं कर्पूरादि सुसंस्कृतम् । नवीने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥ धन्यते भक्षार्थिभिः । धनशब्दे । पिनाकसाधु ॥

धन्यासरस्वती । स्त्री । तीर्थविशेषे ॥

धन्वम् । न । चापे ॥ इत्यमरटीकायां भरतः ॥

धन्वङ्गः । पुं । धामिन् इति भाषाप्रसिद्धे धनुर्वृक्षे । गोत्रवृक्षे ॥ धन्वङ्गः कफपितास्रकासहृत् तुवरो लघुः । बृंहणो बलकृद्रूक्षः सन्धिकृद्व्रणरोषणः ॥ इति भावप्रकाशः ॥

धन्वदुर्गम् । न । मरुवेष्टिते चतुर्दिशं पञ्चयोजनमनुदके ॥

धन्वा । पुं । अल्पोदकदेशे ॥ मरुदेशे ॥ न । चापे ॥ स्थले ॥ धन्वतेऽस्मा-

त् । धन्वि: सौत्रोगत्यर्थ: । कनिन्युवृषीति कनिन् । धन्वति । अन्तर्भावितण्यर्थो वा ॥

धन्वन: । पुं । धामनि इति भाषा प्रसिद्धे धनुर्वृक्षे । रक्तकुसुमे । महाबले ॥

धन्वन्तरि: । पुं । देववैद्यविशेषे । नारायणांशे ॥ नारायणांशो भगवान् स्वयं धन्वन्तरि र्महान् । पुरा समुद्रमथने समुत्तस्थौ महोदधे: ॥ सर्ववेदेषु निष्णातो मन्त्रतन्त्रविशारद: । शिष्योहि वैनतेयस्य शङ्करस्योपशिष्यक: ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥ काशिराजे । दिवोदासे ॥ यथा । अहंहि धन्वन्तरि रादिदेवो जराह जामृत्युहरो ऽमराणाम् । शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोस्मिगां भूयइहोपदेष्टुम् ॥ धन्वं शल्यशास्त्रम् तस्यान्तंपारमियर्त्ति गच्छति । ऋगतौ । अच् ॥ विक्रमादित्यसभास्थे वैद्यान्तरे ॥

धन्वन्तरिग्रस्ता । स्त्री । कटुक्याम् ॥

धन्वयवास: । पुं । दुरालभायाम् । धमासं । जौरजवासा इति भाषा ॥ धन्वनोमरुभूमेर्यवास: । तत्रोत्पन्नत्वात् ॥

धन्वयवासक: । पुं । दुरालभायाम् ॥

धन्वयास: । पुं । दुरालभायाम् । यवासे । जवासा इतिभाषा ॥ धन्वनोयास: मरुभवत्वात् ॥

धन्वी । पुं । अर्जुने । पार्थे ॥ ककुभद्रुमे ॥ दुरालभायाम् ॥ बकुले ॥ त्रि । छेके । विदग्धे ॥ चापिनि । धनुर्द्धरे ॥ लोलार्ककेशवौ कोटी गङ्गाज्या नगरं धनु: । कालि र्लक्ष्य: शरो धर्म्म: शिवो धन्वी पुनातुमाम् ॥ धनुश्चापो ऽस्यास्ति । व्रीह्यादित्वादिनि: ॥

धन्विस्थानम् । न । प्रत्यालीढादिषु ॥ वैसवं समपादञ्च वैशाखं मण्डलं तथा । प्रत्यालीढ मथालीढं स्थानान्येतानि धन्विनाम् ॥ धन्विनां युद्धकाले स्थानम् ॥

धम: । त्रि । अग्निसंयोगकर्त्तरि ॥ शब्दकर्त्तरि ॥ धमते: पचाद्यच् ॥

धमक: । पुं । कर्मकारे ॥ धमति । ध्मा शब्दाग्निसंयोगयो: । ध्मोधमश्चेति क्वुन् ॥

धमन: । पुं । नले । नडे । नरकट इति नरसल इति च प्रसिद्धे तृणे ॥ त्रि । भस्त्राध्मापके ॥ क्रूरे ॥ धमति धम्यते वा । धमध्वाने सौत्र: । बहुलमिति युच् ॥

धमनि: । स्त्री । धमन्याम् ॥ धम्यते । धमि: सौत्रो ध्वाने । अर्त्तिस्तृ धृधम्यम्यश्यवितृभ्यो ऽनिरित्यनि: प्रत्यय: ॥

धमनी । स्त्री । शिरायाम् । नाड्याम् ॥

कन्धरायाम् ॥ वृद्धविलासिन्याम् ॥ हरिद्रायाम् ॥ धम्यते । धमिः सौत्रः । अनिप्रत्ययः । ततः कृदिकारादक्तिन इति ङीष् ॥ नलिकायाम् ॥ पृश्निपर्ण्याम् ॥

धम्मिल्लः । पुं । संयतकचेषु । बद्धकुन्तलेषु । खोपा इति गौड भाषा ॥ सचकुसुमगर्भो मौक्तिकपद्मरागलतिकादिना बहिः संयतो बद्धः केशकलाप इति भरतः । जूडा इति भाषा ॥ धमति । धमध्माने सौत्रः । क्विप् । मिलति । मिलसङ्गमे । अच् । धम् चासौ मिलश्च । मोनो धातोरिति सौत्रेषु न भवति । पृषोदरादिः ॥

धरः । पुं । गिरौ । पर्वते ॥ कार्पासतूले ॥ कूर्मराजे ॥ वसुविशेषे ॥ धरति । धृञ्० । पचाद्यच् ॥

धरणः । पुं । अद्रिपतौ ॥ लोके ॥ स्तने ॥ धान्ये ॥ दिवाकरे ॥ सेतौ ॥ न । चतुर्विंशतिरक्तिकारूपे मानभेदे । वस्ले ॥ दशपलमाने । पलं सुवर्णाश्चत्वारः पलानि धरणं दशेति मनुः ॥ पलदशमांशे । इति वैद्यकम् ॥ धारणे ॥ षोडशरूप्यमाषकैः परिमिते । पुराणे ॥

धरणिः । स्त्री । भूमौ ॥ धरति । धृञ्० । ध्रियते विश्वमनया । धृङ् अवस्थाने वा । अर्त्तिसृधृधमीत्यनिः ॥

धरणिधरः । पुं । विष्णौ ॥ धरण्याः धरः ॥ नगे ॥

धरणिस्थः । त्रि । भूतलचारिणि ॥ धरण्यां तिष्ठति । स्था० । कः ॥

धरणी । स्त्री । भुवि ॥ धरणीपतितं तोयं चातकानां रुजाकरम् ॥ शाल्मलिद्रुमे ॥ धरति विश्वम् । धृञ्० । अर्त्तिसृभिस्त्यादिना ऽनिः । कृदिकारादिति ङीष् ॥ नाड्याम् ॥ कन्दविशेषे । कन्दालौ । वनकन्दे ॥

धरणीकन्दः । पुं । धरणीनाममूलविशेषे ॥

धरणीकीलकः । पुं । नगे । पर्वते ॥

धरणीधरः । पुं । विष्णौ ॥ पर्वते ॥ कच्छपे ॥ शेषदिग्गजादिरूपेण धरणीं धत्ते । धृञ्० । अच् ॥ धरण्या धरो वा ॥

धरणीपुरम् । न । चतुरस्रमण्डले ॥ पुं । अब्धौ ॥ धरण्याः पुरम् । धरणी पुरं यस्य ॥

धरणीपूरः । पुं । सिन्धौ । समुद्रे ॥

धरणीप्लवः । पुं । समुद्रे ॥ धरणी प्लवो ऽस्मिन् ॥

धरणीश्वरः । पुं । ईश्वरे । शिवे ॥ धरण्या ईश्वरः ॥ नृपे ॥

धरणीसुतः । पुं । भौमे ॥ धरण्याः-

सुतः ॥

धरणीसुता । स्त्री । सीतायाम् । जानक्याम् ॥ धरण्याःसुता ॥

धरसंस्थः । त्रि । पर्व्वताकारे । गिरिसदृशे ॥ धरइव संस्था साहश्यं यस्य ॥

धरा । स्त्री । भुवि । पृथिव्याम् ॥ गर्भाशये । जरायौ ॥ मेदसि ॥ नाड्याम् ॥ महादानविशेषे ॥ धरतिविश्वम् । धृञ्० । धराः शैलाः सन्त्यस्यांवा । यद्वा । ध्रियते । धृङ्० । अच् ॥ तीर्थविशेषे ॥ यत्स्नानात् शोकनाशो भवति ॥

धराकदम्बः । पुं । धाराकदम्बवृक्षे । प्रावृष्ये । भृङ्गवल्लभे ॥

धराकदम्बकः । पुं । धराकदम्बे ॥

धरात्मजः । पुं । भौमे । मङ्गलग्रहे ॥ धरायाः आत्मजः ॥

धराधरः । पुं । वराहरूपे विष्णौ ॥ अंशैरशेषैः शेषाख्यैरशेषां धरां धारयति तथा ॥ धरायाधरः ॥ पर्व्वते ॥

धरामरः । पुं । भूमिदेवे । ब्राह्मणे ॥ यथा । धरामरेन्द्रपाणिषु प्रधातुमीहसे धरांयदित्वमादरात् सदाप्रदेहि ततफलप्रदाम् । पयस्विनीं स्वलङ्कृतांसुवंशभुक्तिमुक्तिदां यदात दाभवेच्छ्रुमानेमेदकंनिमेषहल्मिति वीरवचः ॥

धरित्री । स्त्री । भूमौ ॥ धरतिविश्वम् । धृञ्० । अमि० इत्रः । गौ० ङीष् ॥

धरिमा । पुं । रूपे ॥ तुलायाम् ॥ यथा । तथा धरिममेयानां शतादभ्यधिके वधः ॥ ध्रियते । धृञ्० । हृभृधृसृस्तृशृभ्यइमनिच् ॥

धरिममेयः । त्रि । तुलापरिच्छेद्ये ॥

धर्त्तव्यः । त्रि । धारणीये ॥

धर्त्तम् । न । आलये । गृहे ॥ धरतिध्रियते वा । धृञ्० । गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ॥

धर्म्मः । पुं । न । शास्त्रविहितकर्म्मानुष्ठानजन्येऽपूर्व्वेपूर्व्वमीमांसा प्रसिद्धे भाविफलाधारभूते पुण्ये । श्रेयसि । सुकृते । वृषे ॥ यथा । श्रुतिस्मृतिभ्यामुदितं यत् स धर्म्मः प्रकीर्त्तित इति देवीभागवतम् ॥ सचवर्णाश्रमादिधर्म्मरूपः । युयोक्तंभविष्यपुराणे । वर्णधर्म्मःस्मृतस्त्वेकआश्रमाणामतःपरम् । वर्णाश्रमस्तृतीयस्तुगौणोनैमित्तिकस्तथेति ॥ तत्रवर्णधर्म्मोनित्यंमद्यं ब्राह्मणोवर्ज्जयेदित्यादिः । आश्रमधर्म्मोऽग्नीन्धनभैक्ष्यब्रह्मचर्य्यादिः । वर्णाश्रमधर्म्मः पालाशोदण्डो ब्राह्मणस्येत्येवमादिः । गुणधर्म्मः शास्त्रीयाभिषेकादिगुणयुक्तस्यराज्ञः प्रजापालनादिः । निमित्तधर्म्मो विहि

ताकरणप्रतिषिद्धसेवननिमित्तंप्रायश्चित्तम् ॥ * ॥ साधारणधर्म्मोऽपि । यथाहिंसादिः । न हिंस्यात् सर्व्वभूतानीत्याचाण्डालं साधारणो धर्म्मः ॥ * ॥ मनुस्तु । विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः । हृदयेनाभ्यनुज्ञातो यो धर्म्मस्तं निबोधतेत्याह । अस्य व्याख्यायां कुल्लूकभट्टप्रणीताः श्लोकाः । यथा । वेदविद्भिर्ज्ञात इति प्रयुञ्जानो विशेषणम् । वेदादेरपरिज्ञातो धर्म्म इत्युक्तवान् मनुः ॥ हृदयेनाभिमुख्येन ज्ञातद्रूप्यपि निर्द्दिशन् । श्रेयःसाधनमित्याह तच्चाभिमुख्यं मनः ॥ वेदप्रमाणकः श्रेयःसाधनं धर्म्म इत्यतः । मनूक्तमेवमुनयः प्रणिन्युर्धर्म्मलक्षणमिति ॥ अदृष्टार्थे । चोदनालक्षणे । वेदोक्तेऽभ्युदयनिःश्रेयसहेतौ ॥ तत्र यागदानाद्यनुष्ठानजनितो धर्म्मोऽभ्युदयहेतुः । अष्टाङ्गयोगानुष्ठानजनितस्तु निःश्रेयसहेतुर्भवति ॥ वेदविहिते प्राणिनामभ्युदयनिःश्रेयससाधने प्रवृत्तिनिवृत्तिलक्षणे ॥ वर्णाश्रमतद्धारव्यङ्ग्ये ॥ विहितक्रियया साध्यो धर्म्मः पुंसां गुणो मतः । प्रतिषिद्धक्रियासाध्यः सगुणोऽधर्म्म उच्यते ॥ धर्म्मस्याचरणं कार्यं पुरुषेण विजानता ।

सञ्जित्येन्द्रियवर्गं वैयथनमरकं व्रजेत् ॥ मानुष्यं दुर्लभं प्राप्तः खण्डेऽस्मिन् भारते शुभे । आहारादिसुखं नूनं भवेत् सर्व्वासु योनिषु ॥ प्राप्य तं मानुषं देहं कर्त्तव्यं धर्म्मसाधनम् । स्वर्गमोक्षप्रदं नृणां दुर्लभं चान्ययोनिषु ॥ इति श्रीदेवीभागवते ३ स्कन्धे २५ ऽध्यायः ॥ धर्म्मस्य चत्वारः पादा यथा । धर्म्मस्य प्रथमः पादः सत्यमेतत्कृते वचः । द्वितीयस्तु तथा शौचं दयापादस्तृतीयकः ॥ दानपादश्चतुर्थश्च पुराणा वदन्ति वै इति ॥ चतुष्पात् सकलो धर्म्म इति मनुः । तत्रापि सत्यं च तपः खञ्जं दयापि च । सत्यपादे कृते लोपे धर्म्मलोपः प्रजायत इत्यागमः ॥ * ॥ आत्मनि ॥ कल्पितस्य सर्व्वस्य स्वस्मिन् धारणात् ॥ जीवे ॥ देहस्य धारणात् ॥ आचारे ॥ स्वभावे ॥ उपमायाम् ॥ क्रतौ ॥ अहिंसायाम् ॥ उपनिषदि ॥ न्याये ॥ षण्मात्रस्यैकादशप्रभेदे (ऽ॥॥) ॥ पुं । धनुषि ॥ यमे ॥ सोमपे ॥ सत्सङ्गे ॥ अर्हति ॥ ब्रह्मणो दक्षिणस्तनाज्जाते देवताविशेषे ॥ न्यूनदेशवृत्तौ ॥ * ॥ न । दानादौ ॥ धर्म्मं शनैः सञ्चिनुयाद्वल्मीकमिव पुत्तिका । परलोकसहायार्थं भास्वन्तं खशरीरिणाम् ॥ धर्म्मे

मति भवतु वः सततोत्थितानां स
ह्येक एव परलोकगतस्य बन्धुः । अ
र्थाः स्त्रियश्च निपुणैरपि सेव्यमाना
नैवात्मभाव मपियान्ति नच स्थिरत्व
म् ॥ स्वभावसमस्थाने ॥ धरति विश्वम्
ध्रियते वा धारयति वा । धृञ् । अर्त्ति
स्तुसुहुसृधृक्षि क्षुभायावापदियक्षि
नीभ्यो मन्निति मन् ॥

धर्म्मकर्म्म । न । धर्म्मकार्य्ये । शुभादृष्टप्र
तिपादकक्रियायाम् ॥ वेदप्रणिहितं
धर्म्मकर्म्म तन्मङ्गलं परमिति ब्रह्मवै
वर्त्त पुराणम् ॥

धर्म्मकथादरिद्रः । त्रि । भारते कलिजन्म
नि मानवे ॥ इति हेमाद्रिः ॥

धर्म्मकायः । पुं । बुद्धे ॥ इति त्रिकाण्डशे
षः ॥ धर्म्माय कायो यस्य ॥

धर्म्मकीलः । पुं । राजशासने ॥ इ० त्रि० ॥

धर्म्मकीलकः । पुं । ब्रह्मशासने ॥ इति श
ब्दरत्नावली ॥

धर्म्मकेतुः । पुं । बुद्धे ॥

धर्म्मक्षेत्रम् । न । धर्म्मभूमौ । धर्म्मस्य पू
र्व्वे मविद्यमानस्योत्पत्तौ विद्यमान-
स्य च वृद्धे र्निमित्ते ॥ धर्म्मस्य क्षेत्रम् ॥
कुरुक्षेत्रे ॥ यथा । ब्रह्मवेदिः कुरुक्षे
त्रं पञ्च रामह्रदान्तरम् । धर्म्मक्षेत्रं कु
रुक्षेत्रं द्वादशयोजनावधि ॥ * ॥ अ
पिच । तरन्तुकारन्तुकयो र्यदन्तरं ।
रामह्रदानाञ्च मचक्रुकस्य च । एत
त् कुरुक्षेत्र समन्तपञ्चकं प्रजापते रु
त्तरवेदिरुच्यते ॥ त्रि । धर्म्माधारे ॥

धर्म्मगुप् । त्रि । धर्म्मरक्षके ॥ धर्म्मं गोपा
यति । गुप० । क्विप् ॥

धर्म्मघटः । पुं । वैशाखे प्रत्यहदा
तव्ये सुगन्धोदकपूर्णकलसे ॥

धर्म्मचक्रः । पुं । बुद्धे ॥

धर्म्मचक्रभृत् । पुं । जिने ॥ इति ध० ॥

धर्म्मचारिणी । स्त्री । भार्य्यायाम् ॥

धर्म्मचिन्तनम् । न । धर्म्मचिन्तायाम् । पु
ण्यभावनायाम् ॥

धर्म्मचिन्ता । स्त्री । उपाधौ । धर्म्मचिन्त
ने ॥ धर्म्मस्य चिन्ता ॥

धर्म्मजीवनः । पुं । ब्राह्मणविशेषे । या-
जनप्रतिग्रहादिना परस्य धर्म्ममुत्पा
द्य यो ब्राह्मणो जीवति तस्मिन् ॥

धर्म्मज्ञः । त्रि । धर्म्मज्ञानविशिष्टे ॥

धर्म्मणः । पुं । वृक्षभेदे । धामिनिया
इति गौडभाषाप्रसिद्धे ॥ सर्पप्रभेदे ।
ढेमना इति गौडभाषा ॥

धर्म्मतीर्थम् । न । तीर्थविशेषे ॥

धर्म्मत्वम् । न । वृत्तिमत्त्वे । आधेयत्त्व
इति यावत् ॥ यथा । गगनादे र्वृत्ति
मत्त्वलक्षणधर्म्मत्वाभावादिति जग
दीशः ॥

धर्म्मदानम् । न । प्रयोजनमनपेक्ष्यके

वर्णधर्मवुद्ध्यापात्रेभ्यो दाने ॥ यथा
ह देवलः । पात्रेभ्यो दीयते नित्य-
मनपेक्ष्य प्रयोजनम् । केवलं धर्म-
वुद्ध्यायत् धर्मदानं प्रचक्षत इति ॥
धर्म्मदुघा । स्त्री । हविर्द्दोग्ध्र्याम् ॥ धर्मा
न् दोग्धीतिविग्रहे दुहेःकप् घश्चा
ऽन्तादेशः ॥
धर्म्मद्रवा । स्त्री । } गङ्गायाम् । सिद्ध
धर्म्मद्रवी । स्त्री । } सिन्धौ ॥ यथा ।
विष्णुपादार्घसम्भूते गङ्गे त्रिपथगामि
नि । धर्मद्रवीतिविख्याते पापंमेहर
जाह्नवीति ॥
धर्म्मधातुः । पुं । खसमे । बुद्धे ॥
धर्म्मध्वजी । त्रि । जीविकार्थं जटादि-
धारिणि । लिङ्गवृत्तौ ॥ यो वहुज-
नसमक्षं धर्ममाचरति स्वतः परत
श्चलोके ख्यापयति तस्य धर्मो ध्वजं
चिह्नमिवेति धर्मध्वजी । धर्मस्यध्व
जश्चिह्नम् । धर्मोध्वजइववा ॥ धर्मध्व
जोऽस्यास्ति । अतइनिः ॥
धर्म्मनैपुण्यकामः । त्रि । गृहीतवेदा-
ध्ययननियमजन्यादृष्टेच्छौ ॥
धर्म्मपत्तनम् । न । मरिचे ॥ धर्मपत्तने
जातम् । तत्रजातइत्यण् । संज्ञापूर्वक
त्वान्नवृद्धिः ॥ आवन्त्याम् । धर्मपुर्याम् ॥
धर्म्मपत्नी । स्त्री । प्रथमोढायां सवर्णा
याम् ॥ कीर्त्तौ ॥ श्रियि ॥ वाचि ॥

स्मृतौ ॥ मेधायाम् ॥ धृतौ ॥ क्षमा
याम् ॥ नारीणां मध्ये कीर्त्त्याद्याः
सप्तधर्मपत्न्यो भगवद्विभूतयः । या
सामाभासमात्रसम्बन्धेनापि जनः-
सर्वलोकादरणीयो भवति तासां
सर्वस्त्रीपूज्यत्वमतिप्रसिद्धमेव ॥
धर्म्मपत्रम् । न । यज्ञोदुम्बरे ॥ धर्मार्थे
पत्रे ॥
धर्म्मपालः । पुं । वर्णाश्रमधर्मपालके
॥ धर्मम् पालयति । पाल० । कर्म
ण्यण् ॥
धर्म्मपुत्रः । पुं । युधिष्ठिरेन्नृपे । अजात
शत्रौ ॥ धर्मस्यपुत्रः ॥ नरनारायण
योर्ऋष्योः ॥ धर्मतःकृतेपुत्रे । धरम
बेटा इति भाषा ॥
धर्म्मप्रधानः । पुं । धार्म्मिके ॥ धर्मःप्रधा
नोयस्य ॥
धर्म्मभाणकः । पुं । भारतादिपाठके ॥
धर्म्ममूलम् । न । अद्रोहादिषु ॥ यथा
अद्रोहश्चाप्यलोभश्च दमोभूतदया
तपः । ब्रह्मचर्यं ततः सत्यमनुक्रो
शःक्षमाधृतिः । सनातनस्यधर्मस्यमू
लमेतद्दुरासदमिति मत० पु० ॥
धर्म्ममेघः । पुं । असम्प्रज्ञातसमाधौ ॥
सर्वतो विरक्तस्य समाधिफलमपि-
सुख मनपेक्ष्यमाणस्य योगिनोदृढ
भूमिः सन् धर्ममेघइत्युच्यते । उ

क्षाच । प्रसङ्ख्यानेप्यकुसीदस्य सर्वथाविवेकख्यातेर्धर्ममेघःसमाधिस्ततः क्लेशकर्मनिवृत्तिरिति ॥

धर्म्मयुक्तः । त्रि । नित्यनैमित्तिकस्वधर्मानुष्ठायिनि ॥

धर्म्मयुक् । त्रि । धार्मिके । धर्मयुक्ते ॥

धर्म्मयूपः । पुं । श्रीहरौ ॥ यूपे पशुवत् भगवत्समाराधनात्मका धर्मास्तत्रैव ध्यन्तेऽतो धर्माणांयूपः ॥ यथायूपः पशूनांनियोजनस्थान मेवं विष्णुःस्वसमाराधनात्मकानां धर्माणां स्थानमित्यर्थः ॥

धर्म्मराजः । पुं । यमे ॥ बुद्धे ॥ युधिष्ठिरनृपे ॥ धर्मेणराजते । राजृ० । पचाद्यच् ॥ धर्मस्यराजा वा । राजाहःसखिभ्यष्टच् ॥ धर्मश्चासौराजाचेति वा ॥

धर्म्मराजपरीक्षा । स्त्री । धर्म्माधर्मपरीक्षणे ॥ यथाह बृहस्पतिः । पत्रद्वये लेखनीयौ धर्म्माधर्मौ सितासितौ । जीवदानादिकैर्मन्त्रैर्गायत्र्याद्यैश्च सामभिः ॥ आमन्त्र्यपूजयेद्गन्धैः कुसुमैश्चसितासितैः । अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः ॥ समौकृत्वा नवेकुम्भे स्थाप्यौचानुपलक्षितौ । ततःकुम्भात् पिण्डमेकं गृह्णीयादविलम्बितः ॥ धर्मेगृहीतेशुद्धःस्यात् सम्पूज्यःपरीक्षकैरिति ॥

जीवदानमन्त्रादिकं शारदायां द्रष्टव्यम् ॥

धर्म्मलक्षणम् । न । धर्मस्वरूपे ॥ धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्य मक्रोधो दशकं धर्मलक्षणम् ॥ इति मनुः ॥ अपि च । पात्रेदानं मतिःकृष्णे मातापित्रोश्चपूजनम् । श्रद्धा बलि र्गवांग्रासः षड्विधं धर्मलक्षणम् ॥

धर्म्मवाणिजिकः । पुं । पुण्यकर्म्मफलकामिनि ॥

धर्म्मवान् । त्रि । पुण्यवति । धर्मविशिष्टे ॥ धर्मोस्त्यस्यास्मिन् वा । मतुप् ॥

धर्म्मवर्गः । पुं । चतुर्वर्गे ॥ धर्मघटितो वर्गः ॥

धर्म्मवासरः । पुं । पूर्णिमायाम् ॥

धर्म्मवाहनः । पुं । श्रीसदाशिवे ॥ धर्मोवाहनमस्य ॥ न । धर्मस्ययाने ॥

धर्म्मवित् । त्रि । धर्मज्ञे ॥

धर्म्मविप्लवः । पुं । धर्म्मव्यतिक्रमे । अधर्मे ॥

धर्म्मवैतंसिकः । पुं । पापकर्मणा धनमासाद्यात्मनो धार्म्मिकत्वख्यापनाय दानकर्त्तरि ॥

धर्म्मव्याधः । पुं । पापपुरुषविशेषे ॥

धर्म्मशास्त्रम् । न । मन्वाद्युक्तस्मृतौ । धर्मसंहितायाम् ॥ धर्मप्रतिपादकं शास्त्रम् ॥ धर्मशास्त्रप्रयोजका यथा

। मन्वत्रिविष्णुहारीतयाज्ञवल्क्योश नोऽङ्गिराः । यमापस्तम्बसंवर्त्ताःकात्यायनवृहस्पती ॥ पराशरव्यासशङ्खलिखिता दक्षगौतमौ । शातातपो वशिष्ठश्च धर्मशास्त्र प्रयोजकाः इतियाज्ञवल्क्यः ॥ उशनश्शब्दपर्य्यन्तो द्वन्द्वैकवद्भावः । नेयं परिसङ्ख्या किन्तु प्रदर्शनार्थमेतत् । अतोबौधायनादेरपि धर्मशास्त्रत्वमविरुद्धम् । एतेषां प्रत्येकं प्रामाण्येपि साकाङ्क्षाणां नाकाङ्क्षापरिपूरणं मन्यतः क्रियते । विरोधेतु विकल्पः ॥

धर्म्मशीलः । त्रि । धर्मयुक्ते । धार्मिके ॥ धर्मःशीलमस्य ॥

धर्म्मशुद्धिः । स्त्री । अधर्मान्निष्कृष्यनिर्द्धारणे ॥

धर्म्मसंस्थापनम् । न । वेदमार्गपरिरक्षणे ॥ धर्मस्य सम्यक् अधर्मनिवारणेन स्थापनम् ॥

धर्म्मसंहिता । स्त्री । मन्वाद्युक्तस्मृतौ ॥ धर्मबोधार्थं रचिता । सम्पूर्व्वोद्दधातेःकर्मणिक्ते दधातेर्हिः ॥

धर्म्मसम्मूढचेताः । त्रि । धर्मे विषये-निर्णायकप्रमाणादर्शनात् संशयैर्व्याप्तचित्ते ॥ धर्मे सम्मूढं चेतोऽस्य ॥

धर्म्मसावर्णिः । पुं । एकादशेमनौ ॥

धर्म्मसुतः । पुं । युधिष्ठिरे ॥ धर्मस्यसुतः ॥

धर्म्मसूः । पुं । कलिङ्गे । धूम्याटपक्षिणि ॥

धर्म्मस्थः । पुं । प्राड्विवाके ॥ धर्मे तिष्ठति । ष्ठा० । कः ॥

धर्म्मस्थानम् । न । लग्नान्नवमभवने ॥

धर्म्माङ्गम् । न । ब्रह्मचर्यादिदशसु ॥ यथा । ब्रह्मचर्येणसत्येनतपसाच प्रवर्त्तते । दानेन नियमेनापि क्षमा शौचेनवल्लभ ॥ अहिंसयासुशान्त्या च अस्तेयेनापिवर्त्तते । एतैर्दशभिरङ्गैस्तुधर्ममेवप्रसूचयेदिति पा० भू० ॥

धर्म्मात्मजः । पुं । युधिष्ठिरे ॥

धर्म्मात्मा । पुं । धर्मस्वभावे । धर्मानुगतचित्ते ॥ धर्मआत्मायस्य ॥ मुनिविशेषे ॥

धर्म्माधर्म्मपरीक्षणम् । न । मिताक्षरोक्तपरीक्षाविशेषे ॥

धर्म्माधर्म्मवित् । पुं । मीमांसके ॥ धर्माऽधर्मौ विधिनिषेधचोदनागम्यौपरमार्थाविति मीमांसकस्यकल्पनामात्रम् । देशकालादिषु धर्मा ऽधर्मयोर्विप्रतिपत्तिदर्शनात् ॥

धर्म्माधिकरणः । पुं । धर्माध्यक्षे ॥ तल्लक्षणं यथा । समःशत्रौचमित्रेच सर्वशास्त्रविशारदः । विप्रमुख्यःकुलीनश्च धर्माधिकरणो भवेत् ॥ इतिमत्० पु० ॥ न । राज्ञोविचारस्थाने ॥ यथा । धर्मशास्त्रानुसारेण अर्थशास्त्र

निरूपणम् । यथाधिक्रियते स्थाने धर्माधिकरणं स्मृतम् ॥ इति वी° मि° ॥ पुरुषान्तरतत्त्वज्ञाः प्रांशव स्त्वाप्रलोलुपाः । धर्माधिकरणे कार्या अनाह्वानकरानराः ॥ इति मत्स्य पु° ॥

धर्म्माधिकरणी । पुं । धर्माधिकरणवि शिष्टे । धर्माध्यक्षे । प्राड्विवाके ॥

धर्म्माध्यक्षः । पुं । धर्माधिकरणि ॥ कुलशीलगुणोपेतः सर्वकर्मपरायणः । प्रवीणः प्रेषणाध्यक्षो धर्माध्यक्षो विधीयते ॥ परमेश्वरे ॥ धर्मपदस्य सफ्लाधर्माधर्मप्रतिपादकम् । तथाच धर्माधर्मौ फलदानाय अध्यक्षावस्येति तौ अध्यक्षयतीतिवा ॥

धर्म्माभासः । पुं । श्रुतिस्मृतीतरशास्त्रोक्ते सुकृते ॥ यथा । श्रुतिस्मृतिभ्यामुदितं यत् स धर्मः प्रकीर्त्तितः । अन्यशास्त्रेषु यः प्रोक्तो धर्माभासःसउच्यत इति देवीगीता ॥

धर्म्मारण्यम् । न । पुण्यवनविशेषे ॥ तीर्थविशेषे ॥

धर्म्मासनम् । न । राज्ञोधर्मदर्शनार्थमासने । विचारासने । व्यवहारासने ॥

धर्म्मास्तिकायः । पुं । पुद्गलास्तिकायादन्यस्मिन्नभ्युदयहेतौ ॥

धर्म्मिणी । स्त्री । रेणुकायाम् ॥

धर्म्मी । त्रि । पुण्ययुते । धर्मवति ॥ धर्मो विद्यतेऽस्य । इनिः ॥ अधिकरणे प्रवृत्तौ ॥ धर्मा यागादिरूपाः श्रौताः स्मार्त्तास्तान्त्रिकाश्च भगवत्समाराधनरूपाःग्राह्यत्वेनत्याज्यत्वेनचसन्त्यस्येतिधर्मी । इनिः ॥ धर्म्मेषु सर्वमभ्रान्तं प्रकारेण विपर्ययः ॥

धर्म्मिष्ठः । त्रि । धार्मिके ॥

धर्मोत्तरः । त्रि । धर्मप्रधाने ॥

धर्म्मोपदेशकः । पुं । श्रीगुरौ ॥

धर्म्यम् । त्रि । धर्मयुक्ते ॥ धर्मादनपेतम् । धर्मपथ्यर्थन्यायादनपेत इति यत् ॥ धर्मेणप्राप्ये ॥ नौवयोधर्मेत्यादिनायत् ॥

धर्म्यविवाहः । पुं । ब्राह्मदैवार्षगान्धर्वप्राजापत्यरूपे विवाहविशेषे ॥

धर्षः । पुं । प्रागल्भ्ये ॥ अमर्षे ॥ शक्तिबन्धने ॥ संहतौ ॥ हिंसायाम् ॥ धर्षणम् । धृषेर्भावे घञ् ॥

धर्षकः । त्रि । अभिभवकर्त्तरि ॥ नटे ॥

धर्षकारिणी । स्त्री । दूषितायां कन्यायाम् ॥

धर्षणम् । न । परिभवे ॥ रते ॥ धृषे ल्युट् ॥ धर्षशब्दार्थे ॥

धर्षणी । स्त्री । अभिसारिकायाम् । असत्याम् ॥ धर्षति । निधृषा° । ल्युट् । ङीप् ॥

धर्षणीयः । त्रि । अभिभवनीये । धृष्ये ॥

धर्षिणी । स्त्री । पुंश्चल्याम् ॥

धर्षितम् । न । रतौ । मैथुने ॥ इति त्रिकाण्डशेषः ॥ त्रि । कृतधर्षणे । परिभूते । तिरस्कृते ॥ धृषेःक्तः । इड्भावः ॥

धर्षिता । स्त्री । असत्याम् ॥ तिरस्कृतायाम् ॥

धलखण्डः । पुं । हठकण्टकवृक्षे । धलआँकडा इतिगौड भाषा ॥

धलखण्डकः । पुं । धलखण्डे ॥

धवः । पुं । नरे ॥ धूर्त्ते ॥ पत्यौ ॥ स्वनामख्यातवृक्षे । मधुरत्वचे । पीतफले । गौरे । शुक्लवृक्षे ॥ अस्य गुणाः । धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहः । मधुरस्तुवरस्तस्य फलञ्च मधुरं मनागिति भावप्रकाशः ॥ धवति धुवति धुनोति धुनाति वा । धूञ् ० धुञ्कम्पने धूविधूनने वा । पचाद्यच् ॥ यद्वा । धूयते । ऋदोरप् ॥

धवलः । पुं । वृषश्रेष्ठे । महोक्षे ॥ चीनकर्पूरे ॥ धववृक्षे ॥ रागविशेषे ॥ वीरवृक्षे ॥ पाण्डुप्रभेदखगे । धौला इति भाषा ॥ धवलः पाण्डु वहिष्ठो रक्तपित्तहरो हिमः । रसे पाके च मधुरः सङ्ग्राही वातशान्तिकृत् ॥ न । श्वेतमरिचे ॥ छन्दोभेदे ॥ यथा । द्विजवरगणयुगलमगणनगणयुगमकलं विमलतरलयमपि च कलयसकलजनसुखम् । फणिपतिवरभणितमममलधवलमिह हितं विमलकविसुहृदिव वलितमिति भुविविदितम् ॥ यथा ॥ उपगतइह सुरभिसमयइतिसुमुखि त्वरे निधुवनमधिपिब सह मधुजलिहपमपदे । कमलनयनमनुसरसखि नवरभसपरं प्रियतमगृहगमनमुचितमनुचितमपरम् ॥ त्रि । शुक्ले । सितवर्णान्विते ॥ सुन्दरे ॥ धावु ० । वाहुलकात् कलः धातोर्ह्रस्वश्च ॥

धवलपक्षः । पुं । हंसे ॥ शुक्लपक्षे ॥

धवलपाटली । स्त्री । सितपाटलिकायाम् ॥

धवलमृत्तिका । स्त्री । खटिकायाम् ॥

धवलयावनालः । पुं । यावनालविशेषे । तारतण्डुले । पाण्डुरे ॥

धवला । स्त्री । शुक्लवर्णायाङ्गवि ॥ धवलवर्णयोगात् अनुदात्तत्वाभावान्न ङीष् ॥

धवलार्कः । पुं । प्रतापसे ॥ धवलश्चासावर्कश्च ॥

धवली । स्त्री । धवलवर्णायाङ्गवि । धवलायाम् ॥ गौरादित्वात् ङीष् ॥

धातुः

धवलोत्पलम् । न । कुमुदे ॥

धवाणकः । पुं । समीरणे । वायौ ॥ धुनाति । धूञ् । आणकोलू धूशिङ्घि धाञ्भ्यः ॥

धवित्रम् । न । यज्ञज्वलनज्वालनव्यजने । अग्नेः सन्धुक्षणाय मृगत्वचा रचिते व्यजने ॥ धूयते ऽनेन । धूञ् । अर्त्तिलू धूसू इति इत्रः ॥

धाः । पुं । ब्रह्मणि ॥ धारके ॥ वृहस्पतौ ॥

धाकः । पुं । वृषे ॥ भोजने । आहारे ॥ आधारे ॥ दधाति । डुधाञ् । कृदाधारार्चिकलिभ्यः कः । इति कः ॥

धाटी । स्त्री । अभ्यवस्कन्दे । प्रपाते । शत्रोः सम्मुखगमने ॥

धाणकः । पुं । दीनारभागे । स्वर्णभूषाभागे ॥ दधाति । डुधाञ् । आणकोलू धूशिङ्घिधाञ्भ्यः ॥

धातकी । स्त्री । मद्यपुष्पायाम् । धातृपुष्प्याम् । धाइ इति प्रसिद्धे गुल्मे ॥ धातकी कटुका शीता मदकृत् तुवरा लघुः । तृष्णातीसारपित्तास्रविषकृमिविसर्पजित् ॥ अस्याः पुष्पाणि ग्राह्याणि ॥ धातुं करोति । तत्करोतीति णिच् । टिलोपः । कुन् । पिप्पल्यादित्वान् ङीष् ॥

धातुः । पुं । इन्द्रियेषु ॥ शब्दयोनौ । श्लेषस्पर्शादौ ॥ शब्दार्थनिर्णयार्थमुक्तं यथा । क्रियावाचित्व माख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः । प्रयोगतो ऽन्ये मन्तव्या अनेकार्था हि धातवइति ॥ सकर्म्मकाकर्म्मकभेदेन धातवो द्विविधाः । तथाहि । सत्ताजीवनदर्पभीतिशयनक्रीडानिवासक्षयाव्यक्तध्याननभोगतिस्थितिजरालज्जाप्रमादोदये । मोहखेटनवेगयुद्धदहनख्यातिक्षरोन्मादके शुद्धिस्वेदपलायनभ्रमणकेशान्तौ शुतौ मज्जने ॥ हृतौ जागरणोपवक्रगमनोत्साहेम्लतौ संशयेम्लानौ मन्दगतौ चन्द्रपतने चेष्टाक्रुधौ रोदने । वृद्धौ हावकृतौ च सिद्धिविरतौ हर्षोपवेशे बले कम्पोद्वेगनिमेषभङ्गयतनाद्ये धातवो ऽकर्म्मकाः ॥ दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातवः । वाचकाभावमात्रस्य यतस्तस्मादकर्म्मकाः ॥ कौटिल्यादिषु चार्थेषु प्रोक्ता ये ते तु धातवः । तद्भावे ऽकर्म्मकाः स्युस्तद्वत् कुर्य्युः सकर्म्मका इति ॥*॥ आकाशादिमहाभूतेषु ॥ शब्दाद्याकाशादिगुणेषु ॥ रसादिषु । रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः इत्युक्तेषु ॥ गैरिकमनःशिलाद्यश्मविकारे ॥ श्लेष्मादौ ॥ तेषां तत्रापि विद्वद्भिर्गदिता देहधारणात् । अत्रावश्रुतः । विसर्गादानविक्षे-

पैःसोमसूर्यानिला यथा। धारयन्ति जगद्देहंकफपित्तानिलास्तथेति॥ अस्थि॥ स्वर्णादौ॥ सुवर्णरूप्यताम्राणिहरितालंमनःशिला। गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः। गन्धकोऽभ्रकमित्याद्या धातवोगिरिसम्भवाः॥ * ॥ नवधातवोयथा। हेमताराऽरनागाश्च ताम्ररङ्गे च तीक्ष्णकम्। कांस्यकं कान्तलोहश्च धातवो नव कीर्त्तिताः॥ * ॥ अष्टधातवोयथा। हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च। रङ्गमायसरैत्यञ्च धातवोष्टौप्रकीर्त्तिता इतिदानसागरः॥ अपिच। सुवर्णं रजतं ताम्रं लोहं कुप्यञ्च पारदम्। वङ्गञ्च सीसकञ्चेवरत्यष्टौदेवसम्भवा इतिवैद्यकम्॥ * ॥ सप्तधातवो यथा। स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यसदमेवच। सीसं लोहञ्च सप्तैते धातवो गिरिसम्भवाः इतिभावप्रकाशः॥ * ॥ वलीपलितखालित्यकार्श्यावल्यजरामयान्। निरार्यदेहंदधतिन्तृणांतद्धातवोमताः॥ * ॥ सप्तोपधातवो यथा। माक्षिकंतुत्थिकाभ्रेचनीलाञ्जनशिलाऽलकाः। रसकश्चेतिविज्ञेयाएतेसप्तोपधातवः॥ * ॥ शरीरस्थसप्तधातुभवसप्तोपधातवो यथा। स्तन्यं रजश्च नारीणां कालेभवति गच्छति। शुद्धमांसभवः स्नेहो यः सा सङ्कीर्त्यतेवसा। स्वेदोदन्तास्तथाकेशा स्तथैवोजश्चसप्तमम्। इतिधातुभवाज्ञेयाएतेसप्तोपधातवः॥ इतिसुखबोधः॥ * ॥ लोकेषु॥ वसुनि॥ धीयते सर्वैर्निःक्षिप्यते सुस्यादावस्मिन्निति व्युत्पत्त्या आत्मनि॥ दधाति शोभां धीयते वा। डुधाञ्०। सितनिगमिमसीतितुन्॥ शरीरदूषणाद्दोषा मलिनी करणान्मलाः। धारणाद्धातव स्तेषु वातपित्तकफास्त्रयः॥ * ॥ हरितालं हरेर्वीर्यंलक्ष्मीवीर्यं मनःशिला। पारदं शिववीर्यंस्याद्गन्धकं पार्वतीरजः॥

धातुकाशीशम्। न। } द्रव्यविशेषे।
धातुकासीसम्। न। } कासीसे॥

धातुघ्नम्। न। काञ्जिके॥

धातुद्रावकम्। न। टङ्कणे॥

धातुनाशनम्। न। काञ्जिके॥

धातुपः। पुं। शरीरस्थप्रथमधातौ। रसइतिख्याते॥

धातुपुष्पिका। स्त्री। धातुपुष्प्याम्। धाइफूल इतिभाषा॥

धातुपुष्पी। स्त्री। धातुपुष्पिकायाम्। धातक्याम्॥

धातुभृत्। पुं। पर्वते॥ त्रि। धातुपो

षके ॥

धातुमाक्षिकम्। न। माक्षिके। पीतके ॥

धातुमारिणी। स्त्री। सर्जिकायाम् ॥

धातुराजकम्। न। रेतसि ॥

धातुवल्लभम्। न। टङ्कणे ॥

धातुवादी। पुं। कारन्धमिनि। धातुवादरते ॥

धातुवैरी। पुं। गन्धके ॥ इति शब्द° ॥

धातुशेखरम्। न। कासीसे ॥

धातूपलः। पुं। कठिनिकायाम् ॥

धाता। पुं। अब्जयोनौ। ब्रह्मणि ॥ उपादानत्वात् सर्वस्य कर्म्मफलजातस्य विचित्रतया प्राणिभ्यो विभक्तरि। पोषयितरि। कर्मफलविधातृणां मध्ये विश्वतोमुखो धाता सर्वकर्मफलदाते श्वरविभूतिः ॥ धातुर्गतिर्विचित्राच दुर्ज्ञेया भुवनत्रये ॥ विष्णौ। श्रीपतौ ॥ अनन्तादिरूपेण विश्वं दधाति धारयति। दधाते स्तृच् ॥ भृगुमुनेः पुत्रे ॥ दशमेवत्सरे ॥ यथा। निष्पत्तिः सर्वशस्यानां मध्याधातरि कीर्त्तिता। इक्षुक्षीरगुडादीनां प्रवलत्वं वरानने ॥ षण्मासस्याष्टमेभेदे (॥।ऽ।) ॥ त्रि। पालके ॥ धारणपोषणसामर्थ्ययुक्ते ॥ धारके ॥ दधाति। डुधाञ्° । तृच् ॥

धातृपुत्रः। पुं। सनत्कुमारे ॥ ब्रह्मणः सुतमात्रे ॥

धातृपुष्पिका। स्त्री। धातक्याम् ॥ धातृपुष्पमस्याः। शैषिकः कप् ॥

धातृपुष्पी। स्त्री। धातक्याम् ॥ धातृपुष्पमस्याः। पाक्षिकः कवभावः ॥

धात्रिका। स्त्री। आमलक्याम् ॥

धात्री। स्त्री। जनन्याम्। मातरि ॥ आमलक्याम् ॥ वसुमत्याम्। भुवि ॥ उपमातरि ॥ धीयते। धेट्° । धः कर्मणिष्ट्रन् ॥ दधातिवा। डुधाञ्° । सर्वधातुभ्यः ष्ट्रन्। षित्वान् ङीष् ॥

धात्रीपत्रम्। न। आमलकीदले ॥ तालीशपत्रे ॥

धात्रीपुत्रः। पुं। नटे ॥ उपमातुः सुते ॥ धात्र्याः पुत्रः ॥

धात्रीफलम्। न। आमलकीफले। आंवला इतिभाषा ॥ धात्र्याः फलम् ॥ हरीतकीसमं धात्रीफलं किन्तु विशेषतः। रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम् ॥ हन्ति वातं तदम्लत्वात् पित्तं माधुर्यशैत्यतः। कफं रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित् ॥ अङ्गारपाकमृदुयत्नसुपाचितानि सन्धर्थ्यहिङ्गुमरिचादिसमन्वितानि। तस्मिन् घृते पुनरपि प्रतिभर्जितानि धात्रीफलानि जनयन्ति हिजाठरा-

त्रिम् ॥

धाचेयिका । स्त्री । धात्र्याम् । धाय इति भाषा ॥ यथा । पठेद्धाचेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुख इति ॥

धाचेयी । स्त्री । धाचेयिकायाम् ॥

धानम् । न । पोषणे ॥ निधाने ॥ धीयते ऽस्मिन् । ल्युट् ॥

धानकम् । न । धन्याके ॥

धाना । स्त्री । । बहुरी इतिभाषाप्रसिद्धे भृष्टयवे॥धन्याके ॥ अभिनवोद्भिन्ने । अङ्कुरे ॥ चूर्णसक्तुषु ॥ धानाः । स्त्री । धाना भृष्टयवे स्त्रिय इतिबहुवचननिर्देशात् बहुवचनान्तोपि ॥ यथास्तुनिस्तुषाभृष्टाः स्मृताधाना इतिस्त्रियाम् । धानाः स्यु र्दुर्जरा रूचास्तृट्प्रदा गुरवस्तथा ॥ तथामेदःकफच्छर्दिनाशिन्यः सम्प्रकीर्त्तिताः ॥ दधाति दधति वा । डुधाञ्० । धापृवस्यज्यतिभ्योनः । टाप् ॥

धानाकाः । स्त्री । धानासु ॥ नित्यंबहुवचनान्तोयमितशब्दरत्नावली ॥

धानाचूर्णम् । न । भृष्टयवचूर्णे । सक्तुषु ॥

धानी । स्त्री । पीलुवृक्षे ॥ आधारे ॥ यथा । राजधानीततः साभूत् सर्वयादवभूभुजामिति ॥ धीयते ऽस्याम् ॥ करणे ऽधिकरणयोश्चेतिल्युट् । ङीप् ॥

धानुष्कः । त्रि । धनुर्द्धरे । धन्विनि ॥ धनुः प्रहरणमस्य । तदस्यप्रहरणमिति ठक् । इसुसुक्तान्तात्कः ॥ यद्वा । धनुषाजीवति । वेत० ठञ् ॥ तस्मात् तृतीयभवने ॥

धानुष्का । स्त्री । अपामार्गे ॥

धानुष्यः । पुं । वंशे ॥ इति राजनि० ॥

धानेयम् । न । } धन्याके । धनिआ-

धानेयकम् । न । } इति भाषा ॥

धान्या । स्त्री । एलायाम् । पृथ्वीकायाम् । एलाबची इति भाषा इतिशब्दचन्द्रिका ॥

धान्यम् । न । धन्याके ॥ परिपेले ॥ चतुस्तिलपरिमाणे ॥ पूर्वद्वारगृहे ॥ व्रीहिसामान्ये नीवारादौ ॥ धान इति भाषाप्रसिद्धे सतुषतण्डुलादौ । भोगार्हे । अन्ने ॥ धान्यं त्रिविधम् आशुषष्टिकशालिभेदात् । तत्रप्रावृट्कालभवमाशुः । ग्रीष्मजं षष्टिकः । हेमन्तोद्भवं शालिः ॥ * ॥ धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम् । तत्तुवर्षोषितं पथ्यं यतो लघुतरं हितम् ॥ वर्षोषितंसर्वधान्यं गौरवं परिमुञ्चति । न तु त्यजति वीर्यंस्वं क्रमान्मुञ्चत्यतः परम् ॥ एतेषु यवगोधूमतिलमाषा नवा हिताः । पुराणा

विरसा रूक्षा न तथागुणकारिणः ॥ पुराणावर्षद्वयादुपरिस्थिताः । यवादयो नवा स्वस्थानप्रतिष्ठिताः । पथ्याशिनान्तु पुराणाहिताः । पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुगिति शसन्ते वाग्भटेनोक्तत्वात् ॥ धाने पोषणे साधु । तत्रसाधुरिति यत् ॥ यद्वा । दधाति । डुधाञ्० । दधाते र्यन् नुट्चेति यन्नुटौ ॥

धान्यकम् । न । धान्याके ॥ इ०रानि०॥

धान्यकोष्ठकम् । न । धान्यरक्षार्थेगृहे । गोला इतिभाषा ॥

धान्यचमसः । पुं । चिपिटके ॥

धान्यत्वक् । स्त्री । तुषे ॥ धान्यस्यत्वक् ॥

धान्यधेनुः । स्त्री । दानार्थं धान्यनिर्मितधेनौ ॥

धान्यपञ्चकम् । न । शालिधान्यादिपञ्चसु ॥ यथा । शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् । शिम्बिधान्यं क्षुद्रधान्यमित्युक्तंधान्यपञ्चकम् ॥ शालयोरक्तशाल्याद्या व्रीहयः षष्टिकादयः । यवादिकं शूकधान्यंमुद्गाद्यंशिम्बिधान्यकम् ॥ कङ्ग्वादिक्षुद्रधान्यं स्यात्तृणधान्यञ्चतत्स्मृतमिति ॥ अतीसारेपाचनविशेषे ॥ यथा । धान्यवालकविल्वाब्दनागरैः पाचितंजलम् । आमशूलविबन्धघ्नंपाचनंनित्यसेवितमितिभावमिश्रः ॥

धान्यमायः । पुं । धान्यविक्रयिणि ॥

धान्यराजः । पुं । यवे ॥

धान्यवर्द्धनम् । न । वार्द्धुष्ये । धान्यवृद्धौ ॥

धान्यवीजम् । न । धन्याके ॥

धान्यवीरः । पुं । माषे ॥

धान्यवृद्धिः । स्त्री । धान्यवर्द्धने । मह्यमेतावद्धान्यंदेहि ततोमासानन्तरं वर्षानन्तरंवा सपादं सार्द्धं द्विगुणंवा दास्यामीत्येवरूपायां वृद्धौ ॥

धान्यशीर्षकम् । न । धान्यमञ्जर्याम् ॥

धान्याकम् । न । धन्याके । कुस्तुम्बुरुणि ॥ धान्याकं तुवरं स्निग्ध मवृष्यं मूत्रलं लघु । तिक्तं कटूष्णवीर्यञ्च दीपनं पाचनं स्मृतम् ॥ ज्वरघ्नं रोचनं ग्राहि स्वादुपाके त्रिदोषनुत् । तृष्णादाहवमिश्वासकासामार्शः कृमिप्रणुत् ॥ आर्द्रन्तुतद्गुणं स्वादुविशेषात्पित्तनाशनम् ॥ धान्य मकति । अककुटिलायाङ्गतौ । अण् ॥

धान्याग्रम् । न । व्रीहिमञ्जर्याम् ॥

धान्याचलः । पुं । दानार्थंधान्यनिर्मितेपर्वते ॥

धान्याभ्रम् । न । अभ्रकमारणोपयोगिवस्तुनि ॥ पादांशशालिसंयुक्त मभ्रं बद्धाथ कम्बले । त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः ॥ क

स्त्रवाद्गालितं सूक्ष्मं वालुकारहितं तच्चयत् । तद्धान्याभ्रमितिप्रोक्तम मभ्रमारणसिद्धये इतिभावप्रकाशः ॥

धान्याम्लम् । न । काञ्जिके ॥ धान्याम्लं शालिचूर्णाच्छकोद्रवादिकृतं भवेत् । धान्याम्लं धान्ययोनित्वात् प्रीणनं लघुदीपनम् । अरुचौ वातरोगेषु सर्वेष्वास्थापनेहितम् ॥ धान्येष्वभिषुतमम्लम् । शाकपार्थिवादि ॥

धान्यारिः । पुं । मूषिके ॥

धान्योत्तमः । पुं । शालिधान्ये ॥

धामकः । पुं । माषकपरिमाणे ॥ इति वैद्यकपरिभाषा ॥

धाम । न । देहे ॥ गृहे ॥ रश्मौ ॥ स्थाने । आश्रये ॥ जन्मनि ॥ प्रभावे ॥ त्विषि ॥ ज्योतिषि । स्वयम्प्रकाशे । स्वस्वरूपे ॥ दधाति धीयते वा । डुधाञ् ० । मनिन् ॥

धामनिधिः । पुं । सूर्ये ॥ धाम्नांनिधिः ॥

धामनी । स्त्री । धमन्याम् ॥

धामवान् । त्रि । तेजस्विनि ॥

धामार्गवः । पुं । अपामार्गे ॥ घोषके । तोरञ्जी इतिप्रसिद्धे शाके ॥ नेनुवाख्ये । पीतघोषाख्येपि ॥ धाम्नोर्गः । धामार्गं वाति । वा० । आतोनुपेति कः ॥ यद्वा । धामऋच्छति । ऋ० । अन्ये०विच् । धामार्चावौगौश्च ।

गोरतद्धितलुकीति टच् ॥

धायः । त्रि । धारणकर्त्तरि ॥

धायाः । त्रि । धारणकर्त्तरि ॥ पोषणकर्त्तरि ॥ यथाविश्वस्य धायाइति ॥

धाय्यः । पुं । पुरोहिते ॥

धाय्या । स्त्री । वह्निप्रज्वालनार्थायामृचि । सामिधेन्याम् ॥ धीयते पुष्यतेऽग्निरनया धीयतेऽनया समिदितिवा । पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीष्विति धाञोण्यत् युगागमश्च ॥

धारः । पुं । जलधरासारवर्षणे ॥ ग्रावान्तरे ॥ ऋणे ॥ प्रान्ते ॥ गम्भीरे ॥

धारम् । न । दिव्यपानीयप्रभेदे ॥ धाराभिः पतितं तोयं गृहीतं स्फीतवाससा । शिलायां वसुधायांवा धौतायां पतितञ्चयत् ॥ सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते । भाजने मृन्मयेवापि स्थापितं धारमुच्यते ॥ धारं नीरं त्रिदोषघ्नमनिर्देश्यरसं लघु । सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥ पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् । तृष्णां हरति तत्पथ्यं विशेषात् प्राइषिस्मृतम् ॥ * ॥ धाराजलञ्चद्विविधं गाङ्गसामुद्रभेदतः ॥ यदाश्वा दाश्विनेमासि सूर्यः स्वातीविशाखयोः

। तद्वाम्बु जलदैर्मुक्तं गाङ्गमुक्तं म
नीषिभिः ॥ अन्यदाश्वयुगर्भोघादिन
क्षत्रेषु यदाम्बुदैः । अभिवृष्टमिदं
तोयं सामुद्रमितिसंज्ञितम् ॥ * ॥
गाङ्गं जलं स्वादु सुशीतलञ्च रुचि
प्रदं पित्तकफापहञ्च । निर्दोषमिष्टं
लघु तच्च नित्यं गुणाधिकं व्योमनिग
दीतमाहुः ॥ सामुद्रसलिलं शीतं-
कफवातकरं गुरु । चित्रायां माश्वि-
ने तच्च गुणाढ्यं गाङ्गवद्भवेत् ॥ पति
तं भुवि तत्तोयं गाङ्गं सामुद्रमेववा ।
स्वस्वाश्रयवशाद् गच्छेदन्यदन्यद्रसा
दिकम् ॥ इतिराजनिर्घण्टः ॥

धारकः । पुं । कलसे ॥ त्रि । धारणक-
र्त्तरि ॥

धारणः । पुं । सम्प्रते ॥ नीरे ॥ स्वर्लो
के ॥ परमेष्ठिनि ॥ धृतौ ॥ न । वि
धारणे । धरणा इति भाषा ॥ धारयति
। धृञ्० । नन्द्यादित्वाल्युः ॥

धारणा । स्त्री । योगाङ्गे ॥ देशबन्धश्चि
त्तस्य धारणा ॥ १ ॥ देशे नाभिचक्र
नासाग्रादौ चित्तस्य बन्धो विषयान्त
रपरिहारेण यत्स्थिरीकरणं साचि
त्तस्य धारणेत्युच्यते । अयमर्थः । मै
त्र्यादिचित्तपरिकर्मवासितान्तःकर-
णेन यमनियमवता जितासनेन-
परिहृतप्राणविक्षेपेण प्रत्याहृतेन्द्रि
यग्रामेण निर्बाधे प्रदेशे ऋजुकाये
न जितद्वन्द्वेन योगिना नासाग्रादौ-
सम्प्रज्ञातस्य समाधेरभ्यासाय चेतसः
स्थिरीकरणं कर्त्तव्यमिति ॥ * ॥ य
मादिगुणसंयुक्ते मनसः स्थिति रात्म
नि । धारणा प्रोच्यते सद्भिर्योगशा
स्त्रविशारदैः ॥ तस्मात् समस्तशक्ती
नामाधारे तत्र चेतसः । कुर्वीतसं-
स्थितिं सातु विज्ञेया शुद्धधारणेति
वि० पु० ॥ ध्येयेचित्तस्यस्थिरबन्धने
॥ अद्वितीयवस्तुन्यन्तरिन्द्रियवृत्तिधा
रणं ॥ यत्र यत्र मनोयाति ब्रह्मणस्त
त्र दर्शनात् । मनसो धारणञ्चैव धा
रणा सा परामता ॥ मर्यादायाम् ।
संस्थायाम् । न्याय्यपथस्थितौ ॥ बुद्धौ
॥ निश्चये ॥ धारयति धर्म्मम् । धृञ्
। न० ल्युः ॥ युच्वा ॥

धारणी । स्त्री । नाडिकायाम् ॥ बुद्धो
क्तमन्त्रविशेषे ॥ श्रेण्याम् । पङ्क्तौ ॥

धारणीयः । त्रि । धार्य्ये । धारयितुंशक्य
॥ धृञो ऽनीयर् ॥

धारणीया । स्त्री । धरणीकन्दे ॥

धारयित्री । स्त्री । धरित्र्याम् ॥ त्रि । धा
रयितरि ॥

धारा । स्त्री । सैन्याग्रिमस्कन्धे ॥ घटा
दिच्छिद्रे ॥ सन्ततौ ॥ द्रवद्रव्यस्य प्र
पाते ॥ खड्गादेर्निशितमुखे ॥ इति

मे० ॥ उत्कर्षे ॥ इतिहेमचन्द्रः॥ यशसि ॥ अतिवृष्टौ ॥ समूहे ॥ घनासारवर्षणे ॥ सदृशे ॥ इतिविश्वः ॥ पुरीविशेषे ॥ तुरङ्गगति-‌‌भ्वके-॥ अश्वानान्तुगति धारा विभिन्ना सा च पञ्चधा । आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ धौरितंवल्गितं धाराप्लुतमुत्तेजितंक्रमात् । उत्तेरितञ्चेति पञ्चशिक्षयेत् तुरगं गतीः ॥ उत्तेरितोतिवेगाव्यो नशृणोति न पश्यति । धौरितंगतिमात्रे यत्त्वोजितं वल्गितंपुरः ॥ अग्रकायः समुल्लासाकुञ्चिताख्यंनतत्पिकम् । उत्तेजितं मध्यवेगं योजनंस्त्वथवल्गाया ॥ पूर्वापरोन्नमनतः क्रमादुत्तारणं प्लुतम् ॥ अश्वशास्त्रेतु संज्ञान्तरेणोक्ताः । गतिः पुलाचतुष्का चतद्वन्मध्यजवापरा । पूर्णवेगातथाचान्या पञ्च धाराः प्रकीर्त्तिताः ॥ एकैका त्रिविधा धारा हयशिक्षाविधौमता । लघ्वी मध्या तथादीर्घाश्चाश्वेता योजयेत् क्रमादिति ॥ धार्यन्ते अश्वा अत्रा ऽनयावा । धृञ्० । शयन्तः । भि०कङ् । ऋदृशोङोतितिगुणोनिपातनाद्दीर्घोवा॥

धाराकदम्बः । पुं । केलिकदम्ब इति गौडभाषा प्रसिद्धे कदम्बविशेषे । प्रावृषेण्ये । मेघाभे ॥

धाराङ्कुरः । पुं । नाशीरे ॥ शीकरे ॥ घनोपले ॥ इति मेदिनी ॥

धाराङ्गः । पुं । असौ । खड्गे ॥ तीर्थे ॥ इति हेमचन्द्रः ॥

धाराटः । पुं । चातके ॥ अश्वे ॥ मेघे ॥ मत्तमातङ्गे । मत्तगजे ॥ इति-शब्दरत्नावली ॥

धाराधरः । पुं । जलधरे । मेघे ॥ धाराणां धरः ॥ खड्गे ॥

धारापूपः । पुं । अपूपविशेषे ॥ घृतमिश्रा कनिक्या या दुग्धेनालोडितातुसा । धाराख्या पूपकं स्वाज्ये पक्वं खण्डेन योजयेत् ॥ आपूपकं सुमधुरं वृष्यं पित्तहरंपरम् । सुस्निग्धं-रोचनं हृद्यमत्यर्थं वातनाशनम् ॥

धाराफलः । पुं । मदनवृक्षे ॥

धारावनिः । पुं । वायौ ॥ इतित्रिकाण्डशेषः ॥

धाराविषः । पुं । खड्गे ॥ इतित्रिकाण्डशेषः ॥

धारासम्पातः । पुं । आसारे । महावृष्टौ ॥ धाराणां सम्पातः सम्भूयपतनम् । पतेर्भावे घञ् ॥

धारास्नुही । स्त्री । त्रिधारस्नुह्याम् ॥

धारिणी । स्त्री । धरायाम् ॥ शाल्मलिद्रुमे ॥

धारितः । त्रि । धृते ॥

धारी । पुं । पीलुवृक्षे ॥ त्रि । धारविशिष्टे ॥

धाहः । त्रि । पानकर्त्तरि ॥ धयति तच्छीलः । धेट्० । दाधेट् सिशदस-दोहः ॥

धारेश्वरी । स्त्री । देवीविशेषे ॥

धारोष्णम् । न । दोहनेनोष्णधारया सद्यः पतिते दुग्धे ॥ धारोष्णन्त्वमृतं पयोभ्रमहरं निद्राकरं कान्तिदं वृष्यं वृंहणमग्निवर्द्धनमतिस्वादुत्रिदोषापहमितिराज निर्घण्टः ॥

धार्त्तः । त्रि । धूर्त्ते । शूतकृति ॥ धावनम् । धाव्० । सं० क्विप् । बाहुलकात् वलोपः । धा धावने आर्त्तिः । धार्त्तिरस्यास्ति । ज्यो० अच् ॥ यद्वा । धा धावनेन आर्त्तः ॥

धार्त्तराष्ट्रः । पुं । असितास्यचरणसितच्छदे हंसविशेषे । कृष्णास्यचरणौ कपलक्षितहंसे । गेडिहाँस इतिगौडभाषा ॥ सर्पविशेषे । अहौ ॥ कौरवे । धृतराष्ट्रापत्येषु दुर्योधनादिषु ॥ धृतराष्ट्रसम्बन्धिभीष्मद्रोणादौ ॥ धृतराष्ट्रे भवः । तत्रभव इत्यण् । तस्येदमितिवा ॥

धार्त्तराष्ट्रपदी । स्त्री । हंसपद्याम् ॥

धार्त्ता । पुं । धारके । धारणाकर्त्तरि ॥ आगमजस्यानित्यत्वात् आर्द्धधातुक स्येड्वलादेरितिनेडागमः ॥

धार्म्मिकः । त्रि । देवयौ । धर्मशीले ॥ धर्मयुक्ते ॥ धर्ममधीते वेदवा । धर्मञ्चरतिवा । उ०ठक् । चरति रिह आसेवायाम् नत्वनुष्ठानमात्रे । तेन दैवप्रमादुर्मेष्वप्रवृत्तोऽपिदुर्वृत्तो धार्मिक इतिनोच्यते ॥

धार्य्यः । त्रि । धारणीये ॥

धार्ष्ट्यम् । न । सामर्थ्ये ॥ प्रागल्भ्ये ॥ धृष्टस्य कर्म भावोवा । ष्यञ् ॥

धावकः । पुं । रजके ॥ स्मृतौ तु भिन्नौ ते ॥ त्रि । धावनकर्त्तरि । शीघ्रगामिनि । धाउडिया इतिभाषा ॥ धावति । धाव्० । ण्वुल् ॥

धावन् । त्रि । द्रुतंगच्छति ॥ धाव्० । शतृ ॥

धावनम् । न । गमने ॥ शुद्धौ ॥ धावुगतिशुद्ध्योः । ल्युट् ॥

धावनिः । स्त्री । पृश्निपर्ण्याम् ॥ धावति । धावुगतिशुद्ध्योः । बाहुलकादनिः ॥ कण्टकार्याम् ॥

धावनिका । स्त्री । कण्टकारिकायाम् ॥

धावनी । स्त्री । पृश्निपर्ण्याम् ॥ कण्टकार्याम् ॥ कृदिकारादिति ङीष् ॥ धातक्याम् ॥

धावितः । त्रि । गते ॥ मार्जिते ॥ धोया इतिभाषा ॥

धिक् । अ । अपकारशब्दैर्भयोत्पादने । निर्भर्त्सने ॥ निन्दायाम् ॥ यथा । धिक् भस्मरहितंभालं धिक्ग्राममशिवालयम् । धिगनीशार्चनंजन्म धिग्विद्यामशिवाश्रयामिति ॥ धक्कयति । धक्कनाशने । बाहुलकाट्डिकप्रत्ययः । दधातेर्वा ॥

धिक्कारः । पुं । निकारे । तिरस्कारे ॥ धिक्करणम् । कृञ् । घञ् ॥

धिक्कृतः । त्रि । अपध्वस्ते ॥ निन्दिते ॥ धिगितिकृतः । धिगकारिवा । क्तः ॥

धिक्क्रिया । स्त्री । निन्दायाम् ॥ इति हेमचन्द्रः ॥

धिग्वणः । पुं । शूद्रेण वैश्यायामुत्पन्ना आयोगवी तस्यांब्राह्मणादुत्पन्नेसङ्कीर्णजातिविशेषे ॥ तस्यचर्मकार्यम् ॥

धिशाम्पतिः । पुं । मञ्जुघोषे । पूर्वजिनविशेषे ॥ इतित्रि० । आत्मनि ॥

धिषणः । पुं । त्रिदशाचार्ये । वृहस्पतौ ॥ प्रशस्ता धिषणा अस्य ॥ धृष्णोति । ञिधृषा० । धृषेर्डिष् चसंज्ञायामिति क्युर्वा ॥

धिषणा स्त्री । वुद्धौ । मनीषायाम् ॥ धृष्णुवन्त्यनया । ञिधृषा० । क्युः । टाप् ॥

धिष्ण्यः । पुं । अग्निविशेषे ॥ शुक्रे० ॥ न । स्थाने ॥ अग्निसामान्ये ॥ सद्मनि ॥ शक्तौ ॥ ऋक्षे । उडुनि ॥ धिष्यते धृष्णोति वा । धिषशब्दे ञिधृषा०वा । सानसिवर्णसिपर्णसीति साधु । धृषेर्ऋकारस्येकारोरपरत्वाभावोण्यप्रत्ययश्चतेनैव निपातनात् ॥

धीः । स्त्री । प्रज्ञायाम् । मतौ ॥ शास्त्रादितत्त्वज्ञाने ॥ ज्ञानभेदे ॥ ध्यायन्त्यनया । ध्यै० । ध्यायतेःसम्प्रसारणञ्चेतिक्विप् । हलश्चेतिदीर्घः ॥

धीगुणः । पुं । शुश्रूषाद्यष्टसु ॥ तेयथा । शुश्रूषा श्रवणञ्चैव ग्रहणं धारणंतथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणा इति ॥ धियोगुणाः ॥

धीतः । त्रि । पीते । पीया इतिभाषा ॥

धीतिः । स्त्री । पिपासायाम् ॥ इतिहेमचन्द्रः ॥

धीदा । स्त्री । कन्यायाम् ॥ वुद्धौ । मनीषायाम् ॥ धियं ददाति । डुदाञ्० । कः । टाप् ॥

धीन्द्रियम् । न । ज्ञानेन्द्रियेषु । मनआदिषु समस्तेषु व्यस्तेषुच ॥ मनःकर्णौ तथानेत्रे रसनाचत्वचासह । नासिकेचेतिषड्तानि धीन्द्रियाणिप्रचक्षते ॥ धीसाधकमिन्द्रियम् ॥

धीमान् । पुं । वृहस्पतौ ॥ त्रि । पण्डि

ते ॥ धीर्विद्यते यस्य । मतुप् ॥ ऊहापोहकुशले ॥

धीमती । स्त्री । वुद्धिमत्याम् । प्रशस्तवुद्धियुक्तायाम् ॥ धीरस्त्यस्याः । मतुप् । उगित्त्वान्ङीप् ॥

धीरः । पुं । ऋषभौषधे ॥ वलिराजे ॥ धियमीरयतीतिव्युत्पत्त्या चिदाभासद्वारा धीतादात्म्याध्यासेन धीप्रेरके । धीसाक्षिणि ॥ न । कुङ्कुमे ॥ त्रि । धैर्यान्विते ॥ स्वैरे ॥ पण्डिते ॥ मन्दे ॥ विनीते ॥ वलयुते ॥ विवेकिनि ॥ धियंराति । रा० । आतोनुपेतिकः ॥ धियमीरयति । ईर० । अण् ॥ दधाति धीयते वा । डुधाञ० । सुसूधागृधिभ्यःक्रन् । घुमास्थेतीत्त्वम् ॥ दधात्यापत्सु चित्तमिति वा ॥ स्त्रीसन्निकर्षात् धीरोपि विक्रियां भजते खलु ॥ * ॥ विकारहेतावपि विक्रियन्ते येषां न चेतांसित एव धीराः ॥ * ॥ गतस्वार्थमिमंलोकं विमुक्तो मुक्तवन्धनः । अविज्ञातगतिर्जन्यात् सर्वैधीर उदाहृतः ॥ धीरोद्य र्थं वद्धचोवूते ॥

धीरत्वम् । न । धीरतायाम् ॥ यथा । प्रागल्भ्यौदार्यमाधुर्यशोभा धीरत्वकान्तयः । दीप्तिश्चायत्नजाभावहावहेलाःस्त्रियोङ्गजाः ॥ इति हेमचन्द्रः ॥

धीरपणी । स्त्री । धरणीकन्दे ॥

धीरस्कन्धः । पुं । महिषे ॥ इति हेमचन्द्रः ॥

धीराः । पुं । ज्ञानदेगुरौ ॥ धियंराति ददाति । रा० । क्विप्चेतिक्विप् ॥

धीरा । स्त्री । नायिकाप्रभेदे ॥ पण्डितायाम् ॥ काकोल्याम् ॥ महाज्योतिष्मत्याम् ॥ स्थिरायांचित्तोन्नतौ ॥ श्रवणतुल्यायाम् ॥

धीराधीरा । स्त्री । नायिकाप्रभेदे ॥

धीलटिः । स्त्री । दुहितायाम् ॥ इति हारावली ॥

धीवा । पुं । कर्मकरि । धीवरे ॥ ध्यायति । ध्यैचिन्तायाम् । ध्याप्योः सम्प्रसारणञ्चेतिक्वनिप् ॥

धीवरः । पुं । दासजातौ । कैवर्त्ते ॥ दधातिमत्स्यान् । डुधाञ० । छित्वरच्छत्वरधीवरेत्यादिनाष्वरजन्तोनिनिपातितः ॥

धीवरी । स्त्री । धीवरभार्यायाम् ॥ धीवरशब्दात्स्त्रियांषित्त्वान्ङीष् । दधातेःक्वनिपि वनोरचेति ङीब्रौवा ॥

धीव्याप्यता । स्त्री । वृत्तिव्याप्यत्वे ॥

धीशक्तिः । स्त्री । निष्क्रमे । वुद्धिसामर्थ्ये । शुश्रूषाद्यष्टविधधीगुणेषु ॥ धियःशक्तिः ॥

धीसखः । पुं । अमात्ये । मन्त्रिणि ॥ इ

तिहेमचन्द्रः ॥ धियःसखा । टच् ॥
धीसचिवः । पुं । धीसखे ॥ इत्यमरः ॥ धिया धियां वा सचिवः सहायः । धी प्रधानःसचिवो वा ॥
धुः । स्त्री । कम्पने ॥ इत्येकाक्षरकोषः ॥
धुतः । त्रि । त्यक्ते ॥ कम्पिते । विधूते ॥ धुयतेस्म । धुञ्कम्पने । क्तः ॥
धुनानः । त्रि । कम्पयति ॥ धुनोतेः कर्त्तरि शानच् ॥
धुनिः । स्त्री । नदीमात्रे ॥
धुनी । स्त्री । नदीमात्रे ॥ धुनोति वेतसादीन् । धुञ्० । क्विप् । पृषोदरादित्वात् नक् । नान्तत्वात् ङीप् ॥
धुनीनाथः । पुं । समुद्रे ॥ धुनीनां-सरितांनाथः ॥
धुन्धुमारः । पुं । शक्रगोपे ॥ गृहधूमे ॥ पद्दालिके ॥ कुवलयाश्वे । राज्ञो वृहदश्वस्यपुत्रे ॥
धुन्धुरी । स्त्री । वाद्यप्रभेदे ॥
धूः । स्त्री । भारे ॥ चिन्तायाम् ॥ रथाद्यग्रभागे । यानमुखे ॥ धूर्वति । धुर्वीहिंसायाम् । भ्राजभासेति क्विप् । र्वोरितिदीर्घः ॥
धुरन्धरः । पुं । धवद्रुमे ॥ त्रि । धुर्वहे । धुर्ये । भारवोढरि वृषादैा ॥ धुरंधारयति । संज्ञायां भृतॄवृजिधारीति खच् । इति स्वामी ॥ वाचंयमपुरन्द
रैाचेति चकारस्यानुक्तसमुच्चयार्थत्वात्सः इति नव्याः । खचि ह्रस्वः । अरुर्द्विषदितिमुम् ॥
धुरा । स्त्री । भारे ॥
धुरीणः । त्रि । श्रेष्ठे ॥ धुर्ये । धैारेये ॥ धुरंवहति । खः सर्वधुरादित्यत्र ख इतियोगविभागात्खः ॥
धुरीयः । पुं । अनडुहि ॥ इतिरानि० ॥
धुर्य्यः । त्रि । श्रेष्ठे ॥ भारवोढरि । धैारेये ॥ कार्यनिर्वाहके ॥ धुरं वहति । धुरोयड्ढकाविति यत् ॥ पुं । अनडुहि ॥ ऋषभौषधै ॥
धुर्वहः । त्रि । भारवोढरि वृषे । धुर्ये ॥ वहतीति वहः । अच् । धुरोवहः ॥
धुवका । स्त्री । ध्रुवकायाम् । धुया इति गैाड भाषा ॥ धूञ्० । कः । ततोच्चा तादैाकः । क्षिपकादित्वान्नेत्त्वम् ॥
धुवनः । पुं । वह्नौ ॥ धुनोति धुनाति वा । धुञ्० धूञ्० वा । भूसूधूभ्रस्जिभ्यश्छन्दसीतिक्युन् ॥
धुवित्रम् । न । वह्नेः सन्धुक्षणाय मृगत्वचारचिते याज्ञिकानां व्यजने ॥ धुवित्रंतालवृन्तं स्यादुत्क्षेपव्यजनंचतत् ॥ धूयते ऽनेन । धूविधूनने । अर्त्तिलूधूसू इति इत्रः । कुटादित्वेन ङित्वाद्गुणाभावादुवङ् ॥
धुस्तुरः । पुं । धुस्तूरे ॥

धुस्तूरः। पुं। धतूरा इतिप्रसिद्धे क्षुपे। उन्मत्ते। काहलापुष्पे। धूस्तूरे॥

धूः। स्त्री। धूनने॥ इति मेदिनी॥

धूकः। पुं। पवने। वायौ॥ धुनोति धुनातिवा। धुञ्० धूञ् वा। अभियुधूनोभ्योदीर्घश्चेतिकन्॥

धूतः। त्रि। त्यक्ते॥ कम्पिते॥ भर्त्सिते॥ तर्कि ते॥ धूयतेस्म। धूविधूनने। धूञ्० वा। क्तः॥

धूनकः। पुं। यक्षधूपे। राले। वङ्गिवल्लभे॥ इति त्रिकाण्डशेषः॥

धूननम्। न। कम्पने। कंपाना इति-भाषा॥ धूञोण्यन्ताल्ल्युट्। धूञ् प्रीञोर्नुग्वक्तव्य इतिनुक्॥

धूपः। पुं। गुग्गुल्वादि गन्धद्रव्यविशेषोत्थधूमे तद्वर्त्तिकायाञ्च। गन्धपिशाचिकायाम्॥ सचषडङ्गदशाङ्गादिभेदभिन्नो ऽनेकप्रकारः॥ विषघ्नधूपो यथा। सक्तुः सर्ज्जरसोपेतः सर्षपा एलवालुकैः। सुवर्णातस्करतरोः कुसुमैर्जुनस्यतु॥ धूपोवासगृहे हन्ति विषंस्थावरजङ्गमम्। नतत्रकीटा न विषं न दर्दुरसरीसृपाः॥ नकृत्या कर्मणाञ्चात्रधूपोयं यत्रदह्यते॥ *॥ सर्पनिर्मोचनधूपोयथा। कापोतास्थिभुजङ्गस्य तथा निर्मोचनं भवेत्। सर्पनिर्मोचनोधूपः प्रशस्तः सततं गृहे॥ इति मत्० पु०॥ अष्टाङ्ग धूपोयथा। गुग्गुल्वगुरुकं तेजपत्रं मलयसम्भवम्। कर्पूरं वालकं कुष्ठं नूतनं कुङ्कुमं तथा॥ अष्टाङ्गः कथितोधूपो गोविन्दप्रीतिदोमत इति॥ *॥ पञ्चाङ्गोयथा। चन्दनं-कुङ्कुमं नूतंकर्पूरोगुग्गुलो ऽगुरु। धूपोयं घृतसंयुक्तः पञ्चाङ्गः समुदाहृत इति॥ *॥ अदत्त्वागन्धमाल्यानि यो मे धूपं प्रयच्छति। कुणपोजायते भूमे यातुधानो न संशयइति भूमिं प्रतिवराहवाक्यम्॥ *॥ रोगनाशकोधूपोयथा। कूर्ममत्स्याखुमहिषगोशृगालाश्ववानराः। विडालवर्हि-काकाश्च वराहोलूककुक्कुटाः॥ हंस एषाञ्च विशमं मांसंवारोमशोणितम्। धूपं दद्याज्ज्वरार्त्ताय उन्मत्तेभ्यस्च शान्तये॥ एतान्यौषधजातानि धूपितानि महेश्वर। निघ्नन्तिरोगजातानि वृक्षमिन्द्राशनिर्यथेतिगारुडे १९९ अध्यायः॥

धूपनः। पुं। शालवृक्षस्य निर्यासे। शालवेष्टे। सर्जरसे। राल इतिभा॥ न। धूपे॥

धूपवृक्षः। पुं। सरलद्रुमे॥

धूपागुरु। न। दाहागुरुणि॥

धूपाङ्गः। पुं। श्रीवेष्टे। सरलरसे॥

धूपायितः । त्रि । अश्वादिनाक्रान्ते । सन्तप्ते ॥ दत्तधूपगृहादौ ॥ धूप्यते स्म । धूपसन्तापे । आयादय इतिवाआयः । क्तः । अकर्मकत्वात् कर्त्तरि-वा क्तः ॥

धूपार्हम् । न । कृष्णागुरुणि ॥ त्रि । धूपयोग्ये ॥

धूपितः । त्रि । दत्तधूपे ॥ सन्तापिते । अट्वादिनाक्रान्ते ॥ धूप्यते स्म । धूप० । क्तः । इट् । अकर्मकत्वात् कर्त्तरि वा क्तः ॥

धूमः । पुं । आर्द्रेन्धनप्रभवे । मेघाञ्जनयोर्जनके । अग्निध्वजे । भस्मे । धूंवाँ इतिभाषा ॥ सहजमलिनवक्रभावभाजां भवति भवः प्रभवात्मनाशहेतुः । जलधरपदवीमवाप्य धूमो ज्वलनविनाशमनु प्रयाति नाशमिति श्रीकृष्णमिश्रः ॥ धुनोते । धूञ्० । इषियुधीतिमक् ॥

धूमकेतनः । पुं । केतुग्रहे ॥ हुताशे ॥

धूमकेतुः । पुं । उत्पातविशेषे ॥ वह्नौ ॥ ग्रहप्रभेदे ॥ धूमः केतुश्चिह्नमस्य ॥

धूमगन्धकम् । न । रोहिषतृणे ॥

धूमजाङ्गजम् । न । वज्रक्षारे ॥

धूमध्वजः । पुं । अग्नौ ॥

धूमप्रभा । स्त्री । धूमान्धकारनरके ॥

धूममहिषी । स्त्री । कुज्झटिकायाम् ॥

धूमयोनिः । पुं । मेघे ॥ धूमो योनिरस्य । उक्तञ्चाभ्राणां धूमकार्यत्वं पौराणिकैः । यत्तु धूमोद्भवं त्वभ्रं द्विजानाञ्च हितं सदा । दावाग्निधूमसम्भूतमभ्रं वनहितं स्मृतम् ॥ मृतधूमोद्भवं त्वभ्रमशुभाय भविष्यति । अभिचाराग्नि धूमोत्थं भूतनाशाय वै द्विजाः ॥ इति ॥ मुस्तके ॥

धूमलः । पुं । कृष्णलोहितवर्णे ॥ त्रि । तद्विशिष्टे ॥ धूमं लाति । ला० । कः ॥

धूमसी । स्त्री । धुवाँस इतिप्रसिद्धे माषाणां चूर्णे ॥ यथा । माषाणां दालय तोये स्थापिता त्यक्तकञ्चुकाः । आतपे शोषिता यन्त्रे पिष्टा सा धूमसी स्मृता ॥ इतिभावप्रकाशः ॥

धूमाग्निः । पुं । अर्कनिष्कासनोपयोगिन्यग्निविशेषे ॥ विज्वालो यो धूमशिखो धूमाग्निः स उदाहृतः ॥

धूमाभः । त्रि । धूम्रवर्णे ॥

धूमावती । स्त्री । दशमहाविद्यान्तर्गतविद्याविशेषे ॥ तीर्थविशेषे ॥

धूमिका । स्त्री । कुज्झटिकायाम् ॥

धूमितः । त्रि । सञ्जातधूमे ॥

धूमोत्थम् । न । वज्रक्षारे ॥

धूमोर्णा । स्त्री । यमपत्न्याम् ॥ इति त्रिकाण्डशेषः ॥

धूमोर्णापतिः । पुं । यमे ॥ इतिहारा

वल्ली ॥

धूम्या । स्त्री । धूमसमूहे ॥ धूमानां समूहः । पाशादिभ्यो यः ॥

धूम्याटः । पुं । पक्षिविशेषे । कलिङ्गे । भृङ्गे । फिङ्गा इति गौडभाषा ॥ धूम्या इव अटति । अट० । अच् ॥

धूम्रः । पुं । कृष्णरक्तमिश्रितवर्णे । धूमले । खरलोमनिभेवर्णे ॥ तुरुष्के । सिह्लके ॥ त्रि । तद्वति ॥ धूमं राति । रा० । कः । पृषोदरादिः ॥

धूम्रकः । पुं । उष्ट्रे ॥

धूम्रकेशः । पुं । असुरविशेषे

धूम्रधीः । त्रि । मलिनबुद्धौ ॥ धूम्राधीर्यस्य ॥

धूम्रपत्रा । स्त्री । क्षुपविशेषे । धूम्राह्वायाम् । स्वयम्भुवायाम् ॥

धूम्रमूलिका । स्त्री । शूलीतृणे ॥

धूम्रलोचनः । पुं । शुम्भासुरस्यसेनापतौ ॥ कपोते ॥

धूम्रवर्णः । पुं । तुरुष्के । सिह्लके ॥ श्यामरक्तमिश्रितवर्णे । धूमले ॥ त्रि । तद्वर्णविशिष्टे ॥

धूम्रवर्णा । स्त्री । वह्नेर्जिह्वाविशेषे ॥ धूम्रोवर्णोऽस्याः ॥

धूम्रा । स्त्री । शशाण्डुल्याम् ॥

धूम्रिका । स्त्री । शिंशपावृक्षे ॥

धूर्ज्जटिः । पुं । शिवे । गङ्गाधरे ॥ धूर्भारभूता जटिर्यस्य ॥ यद्वा । जटति । जट० । सर्वधातुभ्य इतीन् । धूर्गङ्गा जटिष्वस्येति ॥ धुरस्त्रैलोक्यचिन्तायाः जटिः सङ्घातोऽचवा ॥

धूर्त्तः । पुं । धूस्तूरे । उन्मत्ते ॥ चोरके ॥ न । खण्डलवणे ॥ लौहकिट्टे ॥ त्रि । विटे ॥ वञ्चके । मायिनि ॥ यथा । स्वर्णकारः स्वर्णवणिक् कायस्थश्च द्विजेश्वर । नरेषुमध्येते धूर्त्ताः कृपाहीना महीतले ॥ हृदयं क्षुरधाराभं तेषाञ्च नास्तिसादरम् । शतेषु सज्जनः कोपिकायस्थो नेतरौ चतौ ॥ सुबुद्धिः शिवयुक्तश्च शास्त्रज्ञो धर्ममानसः । न विश्वसेत् तेषु तात स्वात्मकल्याणहेतवे ॥ इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म ८५ ऽध्यायः ॥ धूर्त्तकृति ॥ धूर्वति । धुर्वी० । हसिमृग्रिण्यिति तन् । राल्लोपः । हलिचेति दीर्घः ॥ धूर्व्यते स्म । कर्मणि क्तो वा ॥ धूर्वति । मतिबुद्धिपूजार्थेभ्यश्चेति चकारात् कर्त्तरि वाक्तः ॥ यद्वा । धूर्वनम् । भावे क्तः ॥ तदस्यास्तीत्यर्श आद्यच्वा ॥

धूर्त्तकः । पुं । धूर्त्ते ॥ शृगाले ॥

धूर्त्तकृत् । पुं । धूस्तूरे ॥

धूर्त्तजन्तुः । पुं । मानुषे ॥ इति शब्दचन्द्रिका ॥

धूर्त्तमानुषा । स्त्री । रास्नायाम् ॥ इ० शब्दं ॥

धूर्व्वहः । त्रि । धुरन्धरे । भारवोढरि ॥

धूर्व्वी । स्त्री । रथाग्रभागे । यानमुखे ॥

धूलकम् । न । विषे ॥ इतिशब्दचन्द्रिका ॥

धूलिः । स्त्री । रजसि । रेणौ । पांशौ । धूल इतिभाषा ॥ धुवति धूयते वा । धूविधूनने । वाहुलकात्लिः ॥ धवनम् । धूञ् । सं० क्विप् । धुवा लीयते । इकक्रुष्यादिभ्यः ॥ संख्याविशेषे ॥

धूलिका । स्त्री । कुज्झटिकायाम् ॥

धूलिकेदारः । पुं । चेचे । वप्रे ॥ इतित्रिकाण्डशेषः ॥

धूलिगुच्छः । पुं । } फल्गुचूर्णे ।
धूलिगुच्छकः । पुं । } पटवासके ॥
इतित्रिकाण्डशेषः ॥

धूलिध्वजः । पुं । पवने ॥ इतित्रिकाण्डशेषः ॥

धूलिपुष्पिका । स्त्री । केतक्याम् ॥

धूली । स्त्री । धूलौ । पांशौ ॥ ङीप् ॥

धूलीकदम्बः । पुं । तिनिशे ॥ नीपे ॥ वरुणपादपे ॥

धूलीपटलः । पुं । उड्डीयमानधूलीसमूहे ॥

धूसरः । पुं । गर्दभे । खरे ॥ उष्ट्रे ॥ कपोते ॥ तैलकारे ॥ ईषत्पाण्डुरवर्णे । शुक्लपीतमिश्रितवर्णे ॥ कृष्णश्वेतवर्णे ॥ त्रि । तद्वर्णविशिष्टे ॥ धुनाति । धूञ् । कृधूमदिभ्यः किदितिसरः ॥

धूसरच्छदा । स्त्री । श्वेतवुक्षायाम् ॥

धूसरपत्रिका । स्त्री । हस्तिशुण्डीक्षुपे ॥

धूसरा । स्त्री । पाण्डुफलीवृक्षे ॥

धूसरी । स्त्री । किन्नरीभेदे ॥

धूस्तुरः । पुं । धूस्तूरे । कितवे । धतूरा इतिभाषा ॥ धूसयति । धूसकान्तिकरणे । क्विप् । ततो स्तिः । तुर त्वरणे । इगुपधज्ञाप्रीकिरः कः । धूश्वासौतुरश्च ॥

धूस्तूरः । पुं । उन्मत्तवृक्षे । धत्तूरे । काञ्चनाह्वये ॥ धूसयति । धूस० । क्विप् । तूर्यति । तूरीगतित्वरणहिंसयोः । इगुपधत्वात्कः । धूश्चासौतूरश्च ॥
धूस्तूर धूर्त्त तरुणेन्दुनिवासयोग्यस्थाने पिशाचपतिना विनिवेशितोसि । किंकैरवाणि विकसन्ति तमः प्रयाति किं वार्द्धि रुल्लसति किं दृषदः स्रवन्ति ॥

धृतः । त्रि । गृहीते । कृतधारणे । धरा इतिभाषा ॥ अवलम्बिते । धृञ्० । क्तः ॥

धृतकः । त्रि । भरणाद्यायत्तजीवने ॥

धृतराष्ट्रः । पुं । सुराज्ञि ॥ नागभेदे ॥ दुर्योधनस्य पितरि ॥ पक्षिविशेषे ॥ धृतःराष्ट्रोयेन ॥

धृतराष्ट्री । स्त्री । हंसपत्न्याम् ॥

धृतात्मा । पुं । नारायणे ॥ एकरूपेण जन्मादिषड्भावविकाररहिततया धृतः आत्मा येन । यद्वा । धृङ् अवस्थाने । गत्यर्थाकर्मकेत्यादिना कर्त्तरि क्तः । धृतः एकरूपेणावस्थितः आत्मा स्वरूपमस्येति ॥ त्रि । परमात्मनिनिश्चितचित्ते ॥ यथा । किं दुःसहन्तु साधूनां विदुषांकिमपेक्षितम् । किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मनामिति ॥

धृतिः । पुं । अध्वरे । इष्टौ ॥ स्त्री । तुष्टौ । सन्तोषे ॥ योगविशेषे ॥ तद्योगजातफलं यथा । धृतियोगसमुत्पन्नः प्राज्ञःसन्तुष्टमानसः । वावदूकः सभायाञ्चसुशीलो विनयान्वित इति ॥ सुखे ॥ धारणायाम् ॥ धैर्य्ये । अखिन्नतायाम् । अवसादेपिशरीरेन्द्रियसङ्घाते स्तम्भनशक्तौ ॥ अवसन्नानां देहेन्द्रियाणा मवष्टम्भहेतुभूतप्रयत्ने । देहेन्द्रियेषु अवसाद प्राप्तेषु तदुत्तम्भके प्रयत्नविशेषे । येनोत्तम्भितानि करणानि शरीरञ्च नावसीदन्ति ॥ साच कपिलपत्नी । यथा । धृतिः कपिलपत्नीच सर्व्वैः सर्व्वत्र पूजिता । सर्व्वं लोकाश्रधैर्य्याश्च जगत्सुचयया विनेति देवी भागवतम् ॥ चान्द्रस्य भार्य्यामपि ॥ चान्द्रमसस्तो भार्य्यास्तु द्विर्मेधाधृतिस्तथेति देवी भागवतम् ॥ उच्छृङ्खलप्रवृत्तिकारणेन चापल्यप्राप्तौ तन्निवर्त्तनशक्तौ ॥ * ॥ सत्त्वादिगुणभेदाद्धृतिस्त्रिविधा । यथा । धृत्यायया धारयते मनः प्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ यया तु धर्म्मकामार्थान् धृत्या धारयतेर्जुन । प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसीति ॥ महत्त्यामपि विपदि देहेन्द्रियसङ्घातस्यानवसादे ॥ अष्टादशाक्षरायां वृत्तौ ॥ अष्टादशाङ्के ॥ धारणम् । धृञ्० क्तिन् ॥ पाञ्चभौतिके मनसि धृत्यं शोभमे गुणः ॥

धृतिमत् । न । सुपार्श्वाख्यविष्कम्भशैलमूले उद्याने ॥ त्रि । सुखदुःखयोरेकरूपे ॥ धृति रस्यास्ति । मतुप् ॥

धृत्वा । पुं । धर्म्मे ॥ विष्णौ ॥ ध्रियन्ते स्मिन् भूतानि । धृङ् अवस्थाने । धा ति वा । धृञ्० । शीङ्क्रुशीत्यादिना क्विप् । तुक् ॥ अन्तरीक्षे ॥ विप्रे ॥ समुद्रे ॥ मेधाविनि ॥

धृत्वरी । स्त्री । भुवि ॥

धृषुः । त्रि । दक्षे ॥ प्रगल्भे ॥ पुं । सङ्घाते ॥ धृष्णोति । ञिधृषा० । पृभि दि

ञ्यधिगृधिधृषिभ्य इतिकुः ॥

धृष्टः । त्रि । वियाते । निर्लज्जे ॥ प्रगल्भे ॥ निर्दये ॥ नायकप्रभेदे ॥ अस्य लक्षणम् । कृताङ्गोनिर्भयोधृष्ट इत्यस्य लक्षणम् । भूयोनिःशङ्कः कृतदोषोपि भूयोनिवारितोपि भूयःप्रश्रयपरायणो धृष्ट इतिच ॥ धृष्णोतिस्म । ञिधृषा° । गत्यर्थेतिक्तः । धृषिशसीतीड भावः ॥

धृष्टद्युम्नः । पुं । द्रुपदपुत्रे । पाण्डवानां सेनापतौ ॥ धृष्टंद्युम्नंबलमस्य ॥

धृष्टा । स्त्री । असत्याम् । वन्ध्यकायाम् ॥

धृष्णक् । त्रि । धृष्टे । वियाते ॥ धृष्णोति । धृषेश्चेतिनजिङ् ॥

धृष्णिः । पुं । किरणे ॥ धृष्णोति । ञिधृषा प्रागल्भ्ये । बाहुलकात् निमत्ययोगुणाभावश्च ॥

धृष्णुः । पुं । कश्चिकायाम् ॥ त्रि । धृष्टे ॥ धृष्णोति । ञिधृषा° । त्रसिगृधिधृषिक्षिपेःक्नुः ॥

धेनः । पुं । समुद्रे ॥ नदे ॥ धयन्तियम् । धेट् पाने । धेटइच्चेतिनन् धातोरिदादेशः ॥

धेना । स्त्री । नद्याम् ॥ भारतीप्रभेदे ॥

धेनिका । स्त्री । }
धेनी । स्त्री । } धन्याके ॥

धेनुः । स्त्री । गोमात्रे ॥ गवां जातीस्तु वक्ष्यामिशृणुष्वैकमना द्विज । प्रथमा गौरकपिला द्वितीया गौरपिङ्गला । तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला ॥ पञ्चमी शुक्लपिङ्गाक्षी षष्ठीतु शुक्लपिङ्गला । सप्तमी चित्रपिङ्गाक्षी अष्टमी बभ्रुरोहिणी ॥ नवमी श्वेतपिङ्गाक्षी दशमीश्वेतपिङ्गला । तादृशास्त्वप्यनड्वाहः कपिलास्तु प्रकीर्त्तिता इति वृहद्धर्मपुराणे उत्तरखण्डे १५ अध्यायः ॥ नवप्रसूतायां माहेय्याम् । नवसूतिकायाम् ॥ धयतिसुताम् । धीयते वा । धेट्° । धेटइच्चेतिनुः ॥ दानीया दशधेनवो यथा । यास्तु पापविनाशिन्यः पठ्यन्ते दशधेनवः । तासां स्वरूपं वक्ष्यामिनामानिच धनाधिप ॥ प्रथमा गुडधेनुः स्यात् घृतधेनुस्तथापिवा । तिलधेनुस्तृतीयाच चतुर्थीजलसंज्ञिका ॥ क्षीरधेनुश्चविख्यातामधुधेनुस्तथापिवा । सप्तमीशर्कराधेनुर्दधिधेनुरथाष्टमी ॥ रसधेनुश्चनवमी दशमी स्यात्स्वरूपतः ॥ कुम्भाःस्युर्द्रवधेनूनामितरासान्तु राशयः । सुवर्णधेनुमप्यत्रकेचिदिच्छन्तिमानवाः ॥

धेनुकः । पुं । असुरविशेषे ॥ धेनुरिव । इवेप्रतिकृतौ वितिकन् ॥ रतिबन्धविशेषे । तल्लक्षणं यथा । न्यस्त

स्तयुगला निजेपदे योपिदेतिकटि स्फुटवल्लभा । अग्रतो यदि शनै रधोमुखी धेनुकं तृषवदुन्नतेप्रिये ॥ अपरञ्च । सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः । लघुलिङ्गं चालयेद्योवन्धोयं धेनुकः स्मृतः ॥ इति रतिमञ्जरी ॥

धेनुकसूदनः । पुं । श्रीकृष्णे ॥ धेनुकं सूदयति । सूद० । ल्युः ॥

धेनुका । स्त्री । करिण्याम् । हस्तिन्याम् ॥ धेनौ । गवि ॥ धेनुरिव । इवेतिकन् । धेनुरेव । स्वार्थे कन्वा ॥

धेनुकारिः । पुं । श्रीकृष्णे ॥ धेनुकस्य अरिः ॥

धेनुकासुरसूदनः । पुं । श्रीकृष्णे ॥

धेनुदुग्धम् । न । गोचीरे ॥ चिर्भटे ॥

धेनुदुग्धकरः । पुं । गर्ज्जरे ॥

धेनुष्या । स्त्री । बन्धकेस्थितायां सौरभेय्याम् ॥ संज्ञायां धेनुष्येति धेनुशब्दस्य षुगागमोयत् प्रत्ययश्च स्वार्थे निपात्यते संज्ञायाम् । ऋणप्रत्यर्पणाय याधेनु र्दोहनार्थं मुत्तमर्णाय दीयते तस्याःसंज्ञेयम् ॥

धेयः । त्रि । विधेये । प्रयोज्ये ॥

धैनुकम् । न । स्त्रीणा करणे ॥ धेनूनां संहतौ ॥ अचित्तहस्तिधेनोष्ठगिति-धेनुशब्दात् समूहार्थेठक् । इसुसुक्तान्तात्कः ॥

धैर्य्यम् । न । धृतौ । धीरतायाम् ॥ स्थिरा चित्तोन्नति र्यातु तद्धैर्यमिति संज्ञितमितिभूपालकोषः ॥ अप्रमादे । अव्याकुलत्वे ॥ विघ्नाद्युपस्थितात्रपि प्रारब्धापरित्यागहेतावन्तःकरणवृत्तिविशेषे ॥ निर्विकारचित्तत्वे ॥ मनसोनिर्विकारत्वं धैर्यं सत्स्वपि हेतुषु । इतिरसिकाः ॥ धीरस्य कर्मभावोवा । ष्यञ् ॥

धैवतः । पुं । तन्त्रीकण्ठोत्थितस्वरविशेषे ॥ सप्तस्वरान्तर्गतषष्ठस्वरे ॥ अश्वस्तुधैवतं रौति ॥ गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्धगःपुनः । धावन्निव च यो याति कण्ठदेशं सधैवतः ॥ धीमतामयंधैवतः । पृ० ॥

धैवत्यम् । न । धीवरोभावे ॥ ष्यञ् । दाण्डिनायनेतिनिपातनात्तकारादेशः ॥

धोडः । पुं । डुण्डुभे । राजिले । धोडासाँप इतिगौडभाषा ॥

धोरणम् । न । हस्त्यश्वरथदोलादौ वाहनमात्रे ॥ धोरति अनेन वा । धोरयति वा । धोरृगतिचातुर्य्ये । ल्युः ल्युट्वा ॥ अश्वस्यप्रथमगतौ । धोरिते ॥

धोरणिः । स्त्री । परम्परायाम् ॥

धोरितम् । न । अश्वप्रथमगतौ । धोरणे । धौरितके ॥ धोरितं गतिमाश्वं यद्योजितं वल्गितं पुरः । अग्रकायः समुल्लासाकुञ्चिताख्यं नतत्रिकम् ॥ धोरणम् । धोर्द॰ । भावे क्तः ॥

धोरितकम् । न । अश्वगतिभेदे । धौरितके ॥ स्वार्थे कन् ॥

धौतः । त्रि । मार्जिते । मृष्टे । निर्णिक्ते । प्रक्षालिते । धोया इतिभाषा ॥ धाव्यतेस्म । धाव्॰ । क्तः ॥ उत्तेजिते ॥ शुभ्रे ॥ ईषद्धौतं स्त्रियाधौतं यद्धौतं रजकेनच । अधौतं तद्विजानीयादितिकर्मलोचनः ॥ न । रूप्ये ॥

धौतकटः । पुं । स्योने । प्रसेवके । सूत्रनिर्मितभाण्डे । धोकडा इतिगौडभाषा ॥

धौतकोषजम् । न । पत्रोर्णे ॥

धौतकौशेयम् । न । पत्रोर्णे । मुकुटा इतिभाषाप्रसिद्धे वस्त्रे ॥ धौतञ्चतत् कौशेयञ्च ॥

धौतशिलम् । न । स्फाटिके । शालिपिष्टे ॥

धौम्यः । पुं । देवलस्यर्षेः कनिष्ठभ्रातरि । पाण्डवानांपुरोहिते ॥

धौम्रः । पुं । धूम्रवर्णे ॥ न । धूम्रत्वे ॥ वास्तुस्थानभेदे ॥

धौरः । पुं । धवदृक्षे ॥ इ॰भा॰प्र॰ ॥

धौरितम् । न । धौरितके ॥ धोरणम् । धोर्द॰ । भावे क्तः । इट् । प्रज्ञादित्वादण् ॥

धौरितकम् । न । तुरङ्गगतिचातुर्ये ॥ धौरितमेव । स्वार्थे कन् ॥

धौरेयः । त्रि । भारवाहे । धुर्य्यवृषे ॥ धुरंवहति । धुरोयड्ढकाविति ढक् ॥ पुं । अनडुहि ॥

धौर्य्यम् । न । धोरिते । अश्वस्यप्रथमगतौ ॥

ध्माकारः । पुं । लोहकारके ॥ इतिहलायुधः ॥

ध्मातः । त्रि । सन्धुक्षिते । धमाया इतिभाषा ॥ श्वासभूयिष्ठतयादीर्घवल्लक्ष्यतेयोवर्णः सध्मातइत्युच्यते ॥

ध्मापनम् । न । इन्धने ॥

ध्मापितः । त्रि । इन्धिते ॥

ध्यातः । त्रि । ध्यानविषयीकृते । चिन्तिते ॥ ध्यैचिन्तायाम् । क्तः । नध्याख्येति न तस्य नत्वम् ॥

ध्यानम् । न । चिन्तने ॥ अद्वितीयवस्तुनि विच्छिद्यविच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहे ॥ शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययसन्तान एकाग्रतेतियमाहुरितिभाष्यम् ॥ ध्येयप्रत्ययैकतानतायाम् ॥ एकत्रधृतचित्तस्य भगव

दाकारवृत्तिप्रवाहोत्तरोत्तराऽन्याकारप्रत्ययाव्यवहिते निदिध्यासनसंज्ञे ॥ चित्तस्यात्माकारप्रत्ययावृत्तौ ॥ ब्रह्मैवास्मीतिसद्वृत्त्यानिरालम्बतयास्थितिः । ध्यानशब्देनविख्यातापरमानन्ददायिनी ॥ परमात्मचिन्तने ॥ धारणानियतस्य चित्तस्य विनेचपश्चवक्त्राद्याकारविषयायां चिन्तायाम् ॥ चिन्तातद्विषयाध्यानमित्युक्तेः ॥ तत्रप्रत्ययैकतानताध्यानम् ॥ तत्रतस्मिन् देशे यत्र चित्तंधृतं तत्रप्रत्ययस्यज्ञानस्यैकतानता विसदृशपरिणामपरिहारेण यदेवधारणायामवलम्बनीकृतं तदालम्बनतयैवनिरन्तरमुत्पत्तिः सा ध्यानमुच्यते ॥ ध्यानपदार्थमुक्तंतन्त्रे। यथा । ध्यै चिन्तायांस्मृतोधातुश्चिन्तातत्त्वेन निश्चला । एतद्ध्यानमिहप्रोक्तंसगुणं निर्गुणंद्विधा ॥ सगुणंमन्त्रभेदेननिर्गुणंकेवलंमतमिति ॥ अपिच । ध्यानंतुद्विविधं प्रोक्तंसरूपारूपभेदतः। अरूपंतवयद्ध्यानमवाङ्मनसगोचरम् ॥ अव्यक्तंसर्वतोव्याप्तमिदमित्थंविवर्जितम् । अगम्यंयोगिभिर्गम्यंकृच्छ्रैर्बहुसमाधिभिः॥ मनसोधारणार्थाय शीघ्रंस्वाभीष्टसिद्धये। सूक्ष्मध्यानप्रबोधायस्थूलध्यानंवदामिते ॥ अरूपायाः कालिकायाःकालमातुर्महाद्युतेः । गुणक्रियानुसारेण क्रियतेरूपकल्पने । तिश्रीमहानिर्वाणतन्त्रेपञ्चमोल्लासः ॥ ध्यायते यत् । ध्यै० । वाहुलकात्कर्मणिल्युट् ॥

ध्याननिष्ठः । त्रि । ध्यायिनि ॥

ध्यानयोगः । पुं । ध्यानरूपयोगे ॥ यथा । विविक्तसेवीलघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः इतिश्रीभगवद्गीता ॥ ध्यानयोगश्चपरशक्तिसाक्षात्कारहेतुःश्वेताश्वतरशाखायामुक्तः । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिंस्वगुणैर्निगूढामिति ॥

ध्यामम् । न । दमनकवृक्षे ॥ गन्धतृणे ॥ त्रि । श्यामले । दग्धसमानवर्णे ॥ ध्यायते पशुभिः । ध्यै० । वाहुलकान्मक् ॥

ध्यामकम् । न । रोहिषतृणे ॥

ध्यामा । पुं । परिणामे ॥ न । चिन्तायाम् ॥ तेजसि ॥ ध्यायति । ध्यै० । नामन्सीमन्निति साधुः ॥

ध्यायी । पुं । योगिनि ॥

ध्येयः । त्रि । उपास्ये । चिन्तनीये । ध्यातव्ये ॥ ध्येयं सदापरिभवघ्न मभीष्टदोहं तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् । भृत्यार्तिहं प्रणतपाल

भवाब्धिपोतं वन्देमहापुरुष ते चरणारविन्दम् ॥

ध्राजिः । स्त्री । वातसंहतौ ॥

ध्राडिः । पुं । पुष्पचये ॥

ध्रुवः । पुं । शङ्कौ ॥ हरे ॥ विष्णौ ॥ वटे ॥ उत्तानपादजे । प्रसिद्धेनक्षत्रविशेषे ॥ वसुभेदे ॥ योगविशेषे ॥ तज्जातस्य फलम् । नरीनर्त्ति वाणी सदा वक्त्रपद्मे चरीकर्त्ति काव्यं वरीभर्त्ति वन्धून् । ध्रुवाख्ये प्रसूतिर्ध्रुवा तस्य कीर्त्तिर्दिगन्ते नितान्तं भवेच्चारुमूर्त्तिरिति ॥ * ॥ नासाग्रे ॥ स्थाणौ ॥ ध्रुवके ॥ शरारिपक्षिणि ॥ न । निश्चिते ॥ तर्के ॥ खे । आकाशे ॥ षण्मात्रस्यैकादशभेदे (ISIII) ॥ त्रि । सन्तते ॥ शाश्वते ॥ अपरिणामिनित्ये ॥ स्थिरे ॥ निश्चिते ॥ यो ध्रुवाणि परित्यज्य अध्रुवाणिचसेवते । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेवच ॥ पुं । ऊर्द्धमुखगृहे ॥ न । उत्तराचयरोहिणीनक्षत्रेषु ॥ ध्रुवति स्थिरो भवति । ध्रुगतिस्थैर्ययोः । अच् । कु० ङित्त्वम् । उवङ् ॥ ध्रुवति । ध्रुवस्थैर्ये । इगुपधेतिकोवा ॥ गाने ॥ यदाह । ध्रुवाभिनाव्यस्यप्रथमेप्रांशाइति ॥ पुं । आवर्त्ते । आवर्त्तसाम्याद्रोमसंस्थाने ॥ तदुक्तम् । आवर्त्तसाम्याद्वावर्त्तो रोमसंस्थानं मङ्गिनामिति ॥ तेचदशयथा । द्वा वुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः । एकोभाले द्वयपानेच दशावर्त्ताध्रुवाः स्मृताइति ॥

ध्रुवकः । पुं । स्थाणौ ॥ गीताङ्गविशेषे ॥ सचोक्तः सङ्गीतदामोदरे । उत्तमःषट्पदःप्रोक्तोमध्यमः पञ्चमःस्मृतः । कनिष्ठश्च चतुर्भिःस्याद्ध्रुवकोयं मयोदितः ॥ उक्तंद्विखण्डमुद्ग्राहे द्विखण्डं ध्रुवके मतम् । ततोद्विखण्डमाभोगेतालमानरसैःसह ॥ आभोगेकविनामस्यात्तथानायकनामच । उद्ग्राहं प्रथमं गीत्वाध्रुवंगायेत्ततः परम् ॥ ततोऽन्तराध्रुवस्तस्मादाभोगध्रुवकौततः । उद्ग्राहःप्रथमःपादः कथितःपूर्वसूरिभिः ॥ गीत्वापूर्वपदंन्यासोयत्र स ध्रुवको मतः । यत्रैव कविनामस्यात्सआभोगइतीरितः ॥ ध्रुवकादिषुसर्वेषुभवेदेवं विधःक्रमः । सतुषोडशविधोयथा । जयन्तःशेखरोत्साहौमधुरोनिर्मलस्तथा । कुन्तलःकमलश्चैव सानन्दश्चन्द्रशेखरः ॥ सुखदःकुमुदोजायीकन्दर्पो जयमङ्गलः । तिलकोललितश्चेतिध्रुवकाःषोडशस्मृताः ॥ एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः । खण्डैर्ध्रुवाःषोडश-

सुःषड्विंशच्चचराविधिः ॥ दिगुणैर क्षरैरेव पदमेकमिहेष्यते । उद्ग्रा हध्रुवकाभोगैरित्थंषट्पदनिर्णयः ॥ पञ्चपादेतु ध्रुवकेपदेनैकेनतद्ध्रुवः । चतुष्पादेतुध्रुवकेपृथङ्नास्त्येवतद् ध्रुवइति ॥

ध्रुवका । स्त्री । आस्थायाम् ॥ ध्रुवकाया म् ॥ ध्रुवति । ध्रुव० । इगुपधज्ञेति कः । ततोऽज्ञातार्थेकः । क्षिपकादि त्वात् नेत्वम् ॥

ध्रुवा । स्त्री । मूर्वायाम् ॥ आस्याम् । श रारिपक्षिणि ॥ शालपर्ण्याम् ॥ ध्रु वा इतिगौडभाषाप्रसिद्धे स्रुग्भेदे । वटपत्राकृतियज्ञपात्रे । जुह्वाम् ॥ वैकङ्कतीध्रुवेत्यापस्तम्बः ॥ ध्रुवति । ध्रुव० । इगुपधेतिकः । ध्रु० । अचि कुटादित्वात् ङित्वम् । उवङ् ॥ साध्व्याम् ॥ गीतभेदे ॥

ध्रौव्यम् । न । स्थैर्य्ये ॥

ध्वंसः । पुं । विनाशे । जन्याभावत्वे ॥ जगद्योनाशप्रसंहारे ॥

ध्वंसनम् । न । अधःपतने ॥ गमने ॥ ध्वंसे ॥

ध्वंसितः । त्रि । खण्डिते ॥

ध्वंसी । पुं । गिरिजपीलौ ॥ त्रि । ध्वंस विशिष्टे ॥

ध्वंसी । स्त्री । त्रसरेणुपरिमाणे ॥ यथा । जालान्तरगते सूर्यकरे ध्वंसीविलो क्यते । त्रसरेणुस्तुविज्ञेयस्त्रिंशताप रमाणुभिरितिवैद्यकपरिभाषा ॥

ध्वजः । पुं । शौण्डिके ॥ गर्वे । दर्पे ॥ पुं । न । पताकायाम् ॥ खट्वाङ्गे ॥ मे ढ़े ॥ चिह्ने ॥ पूर्वदिग्गतगृहे ॥ ध्वज ति । ध्वजगतौ । अन्तर्भावितण्यर्थो वा । पचाद्यच् ॥ वहुपटविरचिता पताका ध्वजः ॥ तत्रविशेषःश्रीमत्स्य निर्वाणतन्त्रेयथा । पताकाध्वजदाने न देवप्रीतिःशतं समाः । ध्वजदण्ड स्तुकर्त्तव्योद्वात्रिंशद्धस्तसम्मितः ॥ सु दृढ़श्छिद्ररहितः सवलःशुभदर्शनः । वेष्टितोरक्तवस्त्रेणकोटौचक्रसमन्वि तः ॥ पताकातत्रसंयोज्यातत्तद्वाहन चिह्निता । प्रशस्तमृत्स्नाद्यत्नाग्रादि वस्त्रविनिर्मिता । शोभमानाध्वजा ग्रेयापताकासाप्रकीर्त्तितेति ॥ * ॥ से नाचिह्नंस्थितीशानां दण्डोध्वजइति स्मृतः । सपताकोनिष्पताकः सचयो द्विविधोवुधैरित्यादिविशेषोयुक्तिक ल्पतरौमत्स्यादिपुराणेषुचद्रष्टव्यः ॥

ध्वजद्रुमः । पुं । तालवृक्षे ॥ माडवृक्षे ॥

ध्वजप्रहरणः । पुं । वायौ ॥

ध्वजभङ्गः । पुं । क्लीवत्वजनकेरोगवि शेषे ॥

ध्वजवान् । त्रि । केतनयुक्ते । सपताके ॥

ध्वजाहृतः । पुं । सङ्ग्रामे स्वामिसकाशाज्जिते दासविशेषे ॥ न । अविभाज्यधनविशेषे ॥ सङ्ग्रामादाहृतं यत्तु विजित्य द्विषताङ्कुलम् । स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते ॥

ध्वजी । पुं । पृथिवीधरे ॥ रथे ॥ ब्राह्मणे ॥ भुजङ्गमे ॥ तुरङ्गे ॥ मद्यविक्रयजीविनि । शौण्डिके ॥ मयूरे ॥

ध्वजिनी । स्त्री । सेनायाम् ॥ ध्वजाःसन्त्यस्याम् । अतइनिठनाविति इनिः ॥

ध्वजिनीपतिः । पुं । सेनापतौ ॥

ध्वजोत्थानम् । न । इन्द्रमहोत्सवे । भाद्रशुक्लद्वादश्यां विधीयमाने शक्रोत्सवे ॥

ध्वनः । पुं । शब्दे ॥ इतिद्विरूपकोषः ॥

ध्वनमोदी । पुं । षट्पदे । भ्रमरे ॥

ध्वनिः । पुं । शब्दमात्रे ॥ ध्वननम् । ध्वनशब्दे । खनिकष्यज्यसीति इः ॥ कोयं ध्वनिर्नाम योदूरादाकर्णयतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेष्वासञ्जयतीति शारीरकभाष्यम् ॥ स्त्री । शङ्कुकर्णस्यानुस्यायां देव्याम् ॥

ध्वनिग्रहः । पुं । कर्णे । श्रोत्रे ॥ ध्वनिं गृह्णाति । ग्रह० । विभाषा ग्रहइति पक्षे ऽप् ॥

ध्वनितः । त्रि । शब्दिते । कृतस्वनमृदङ्गादौ । स्वनिते ॥ स्तनिते ॥ ध्वन्यतेस्म । ध्वन० । क्तः ॥

ध्वनिनाला । स्त्री । वीणायाम् ॥ वेणौ ॥ काहलायाम् । काहलीति हिमवत्प्रान्तप्रसिद्धे धत्तूरपुष्पसदृशे वाद्यविशेषे ॥

ध्वनिविकारः । पुं । काक्काम् । शोकभयादिना शब्दविकृतौ ॥

ध्वस्तः । त्रि । स्रस्त । गलिते । च्युते ॥ ध्वस्यतेस्म । ध्वंसु अवस्रंसने । क्तः । गत्यर्थाकर्मकेति कर्त्तरिक्तोवा ॥

ध्वाङ्क्षः । पुं । काके ॥ मत्स्यात्खगे । बके ॥ तक्षके ॥ भिक्षुके । अर्थिनि ॥ गृहे ॥ ध्वाङ्क्षति । ध्वाक्षिघोरवासितेच । चात् काङ्क्षायाम् । पचाद्यच् ॥

ध्वाङ्क्षजङ्घा । स्त्री । काकजङ्घायाम् ॥

ध्वाङ्क्षजम्बुः । स्त्री । काकजम्ब्वाम् ॥

ध्वाङ्क्षतुण्डी । स्त्री । काकनासायाम् ॥

ध्वाङ्क्षदन्ती । स्त्री । } काकतुण्ड्याम् ॥
ध्वाङ्क्षनखी । स्त्री । }

ध्वाङ्क्षनाम्नी । स्त्री । काकोदुम्बरिकायाम् ॥

ध्वाङ्क्षनाशिनी । स्त्री । हवुषायाम् ॥

ध्वाङ्क्षनासा । स्त्री । } काकनासा-
ध्वाङ्क्षनासिका । स्त्री । }

याम् ॥

ध्वाङ्क्षपुष्टः । पुं । कोकिले ॥

ध्वाङ्क्षमाची । स्त्री । काकमाच्याम् ॥

ध्वाङ्क्षवल्ली । स्त्री । काकनासायाम् ॥

ध्वाङ्क्षादनी । स्त्री । काकतुण्ड्याम् ॥

ध्वाङ्क्षारातिः । पुं । पेचके । उलूके ॥

ध्वाङ्क्षी । स्त्री । कक्कोलिकायाम् ॥ रवेःसङ्क्रान्तिविशेषे ॥ लघाबिन्दुवारेभवेद्ध्वाङ्क्षनाम्नी तदाक्षयत्तसौख्यं लभेद्देववैश्यः ॥

ध्वाङ्क्षोली । स्त्री । काकोल्याम् ॥

ध्वान । पुं । शब्दे ॥ ध्वननम् । ध्वन० । भावेघञ् ॥

ध्वान्तम् । न । अन्धकारे ॥ ध्वन्यते । ध्वन० । क्तः । क्षुब्धस्वान्तेतिनिपातितम् ॥ नरकविशेषे ॥

ध्वान्तवित्तः । पुं । खद्योते ॥

ध्वान्तशत्रुः । पुं । ध्वान्तशात्रवे ॥

ध्वान्तशात्रवः । पुं । अर्के ॥ चन्द्रे ॥ वह्नौ ॥ श्योनाकवृक्षे ॥ ध्वान्तस्यशात्रवः ॥

ध्वान्तारातिः । पुं । सूर्य ॥ चन्द्रे ॥ वह्नौ ॥

ध्वान्तोन्मेष । पुं । खद्योते ॥ ध्वान्ते उन्मेषोऽस्य ॥

नः

—:•:—

न । अ । निषेधे ॥ यथा । न मिथ्याभाषणं कुर्यान्न परानिष्टचिन्तनम् । परस्त्रीगमनञ्चैव ब्रह्मचारी विवर्जयेदिति ॥ उपमायाम् ॥ नह्यति । णहबन्धने । डप्रत्ययः ॥

नः । पुं । सुगते ॥ बन्धे ॥ हिरण्डे ॥ प्रस्तुते ॥ रत्ने ॥ नकारे ॥

नंशुकः । त्रि । नाशके ॥ नश्यन्त्यल्पेन वायुना । णश अदर्शने । पचिनशोर्णुकन् कनुमौचेतिसाधुः ॥

नंष्टा । त्रि । नाशाश्रये ॥

नःक्षुद्रः । पुं । क्षुद्रनासिके ॥

नकिम् । अ । }
नकिर् । अ । } वर्ज्जने ॥
नकीम् । अ । }

नकुटम् । न । नासिकायाम् ॥

नकुलः । पुं । चतुर्थे पाण्डुसुते ॥ बभ्रौ । सर्पहारि । सूचिवदने ॥ शिवे ॥ त्रि । निष्कुले ॥ नास्तिकुलमस्य । नभ्राण्नपादितिनञ् प्रकृत्या ॥

नकुलाढ्या । स्त्री । गन्धनाकुल्याम् ॥

नकुली । स्त्री । कुक्कुट्याम् ॥ मांस्याम् ॥ शङ्खिन्याम् ॥ कुङ्कुमे ॥ नकुलभार्यायाम् ॥

नकुलीशः । पुं । कालीपीठस्थभैरवे ॥

नकुलेश्वरी । स्त्री । देवीविशेषे ॥

नकुलेष्टा । स्त्री । रास्नायाम् ॥ नकुलाना मिष्टा ॥ नाई इति प्रसिद्धे रास्ना

भेदे ॥

नक्तम् । न । निशि । रात्रौ ॥ तच्चगायानक्तव्रतेपि । यथा । उपवासात्प्ररंभैक्षं भिक्षापरमयाचितम् । अयाचितात् परंनक्तं तस्मान्नक्तेनवर्त्तयेत् ॥ देवैस्तुभुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा । पराह्णेपितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः ॥ सर्ववेलामतिक्रम्य नक्तभुक्तमभोजनम् । वामाचारोमहादेवो नक्तेनैवाद्गुरेन्वरम् ॥ इतिदेवी पु० ॥ अस्यलक्षणायुक्तं मात्स्ये । दिवसस्याष्टमे भागेमन्दीभूतेदिवाकरे । नक्तं तत्त्व विजानीयान्नक्तं निशि भोजनम् ॥ नक्षत्रदर्शनान्नक्तं गृहस्थेतु विधीयते । यतेर्दिनाष्टमे भागे रात्रौ तस्यनिषेधनमिति ॥

नक्तकः । पुं । लक्तके । कर्पटे । लत्ता इतिभाषा ॥ नजते । ओनजी व्रीडे । बाहुलकात् तन् । स्वार्थे कन् । नक्तं कं सुखमस्माद्वा । पृ० मलोपः ॥

नक्तचारी । पुं । उलूके । पेचके ॥ विडाले ॥ त्रि । रात्रिचरमात्रे ॥

नक्तञ्चरः । पुं । राक्षसे ॥ चौरे ॥ पेचके ॥ दृषदंशादौ ॥ नक्तं चरति । चर० । चरेष्टः ॥ गुग्गुलौ ॥

नक्तन्दिवम् । अ । अहोरात्रे ॥ नक्तञ्च दिवाच । अचतुरेत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वेनिपातनादच् समासान्तः ॥

नक्तम् । अ । निशि । रजन्याम् ॥ नजते । ओनजीव्रीडे । तन् प्रत्ययः ॥

नक्तमालः । पुं । करञ्जवृक्षे ॥ नक्तंमालो धारणमस्य । नक्तं मा अलति वा । अल० । पचाद्यच् ॥

नक्तमुखा । स्त्री । रात्रौ ॥ इतिहलायुधः ॥

नक्तव्रतम् । न । दिवाभोजनाभावविशिष्टे रात्रिभोजने ॥ भविष्यभोजनंमानं सत्यं माहारलाघवम् । अग्निकार्यं मधःशय्यां नक्तभोजीषडाचरेत् ॥ इति भविष्यपुराणम् ॥ नक्तं निशायां कुर्वीत गृहस्थोविधिसंयुतः । यतिश्चविधवाचैव कुर्यात् तत् सदिवाकरम् ॥ सदिवाकरन्तु तत् प्रोक्तमन्तिमेघटिकाद्वये । निशानक्तन्तु विज्ञेयं यामार्द्धे प्रथमे सदा ॥ मार्कण्डेयः । एकभक्तेन नक्तेन तथैवायाचितेनच । उपवासेन दानेन नैवाद्वादशिको भवेदिति ॥

नक्ता । स्त्री । कलिकार्याम् ॥

नक्तान्धः । त्रि । राज्यन्धे ॥

नक्तान्ध्यम् । न । रात्र्यन्धतायाम् ॥

नक्रः । पुं । कुम्भीरे । नाँका इति तंदुआ इतिच भाषाप्रसिद्धेजलजन्तौ ॥ न ।

अग्रदारुणि। ज़ाणकाठ इतिगौड भाषा ॥ नासायाम् ॥ नक्रामतिदूरस्थलम् । क्रमु। अन्यत्रापीतिडः । नभ्राडितिनलोपेन ॥

नक्रराट् । पुं । } ग्राहे । जलाटके । गाह इतिभाषा प्रसिद्धे यादोविशेषे ॥
नक्रराजः । पुं । }

नक्रा । स्त्री । नासिकायाम् ॥

नक्षत्रम् । न । कृत्तिकादितारकासु । भे ॥ अत्रलिङ्गज्ञानंयथा । हस्तास्वाती श्रवणा क्लीबे मृगशिरा नपुंसिस्यात् । पुंसिपुनर्वसु पुष्यौ मूलन्त्वस्त्री स्त्रियांशेषाः ॥ शेषाः तारा इतिसम्बन्धः ॥ मुक्तायाम् ॥ नक्षदते छिनत्ति । क्षदेतिसौत्रोधातुर्हिंसार्थ आत्मनेपदी । ष्ट्रन् । नभ्राणनपादितिनलोपेन ॥ यद्वा । णक्षगतौ । नक्षति । क्रमिनक्षियजीत्य ऽत्रन् ॥ नक्षणोति वा । क्षण हिंसायाम् । ष्ट्रन् । बाहुलकान्नलोपः॥ क्षीयतेः क्षरतेर्वाक्षमिति निपात्यते । नक्षत्रमिति वा । नलोपाभावः पूर्ववत् ॥

नक्षत्रकान्तिविस्तारः । पुं । धवलयावनाले ॥ इतिराजनिर्घण्टः ॥

नक्षत्रचक्रम् । न । मन्त्रग्रहणोक्तषट्चक्रान्तर्गतचक्रे ॥

नक्षत्रनेमिः । पुं । ध्रुवे ॥ चन्द्रे ॥ विष्णौ ॥ स्त्री । रेवत्याम् ॥ इति मेदिनी ॥

नक्षत्रपः । पुं । उडुपे । चन्द्रे ॥

नक्षत्रपदयोगः । पुं । यात्रायोगान्तरे ॥ यथा । मेषगे भास्करे षष्ठे लाभगे स्वोच्चगे यमे । नक्षत्रपदयोगोयं शत्रुमेधानिलो रणे ॥

नक्षत्रपुरुषः । पुं । चैत्रमासस्यसिताष्टम्यां यदा मूलगतः शशी । भगवन्तं सह लक्ष्म्या पूजयेच्च विधानत इत्यादिना वामनपुराणोक्ते व्रतविशेषे ॥

नक्षत्रमाला । स्त्री । सप्तविंशतिमौक्तिकैर्निर्मिते एकावलीहारे ॥ नक्षत्राणांमालेव ॥ नक्षत्रश्रेण्याम् ॥

नक्षत्रविद्या । स्त्री । ज्योतिषे ॥

नक्षत्रशूलः । पुं । ज्येष्ठापूर्वाभाद्रपदारोहिण्युत्तरफाल्गुनी । पूर्वादिषु क्रमाच्छूला यात्रायां मरणप्रदाः ॥

नक्षत्रसूचकः । पुं । निन्दिते ज्योतिर्विदि ॥ यथा । अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते । सपङ्क्तिदूषकः पापोज्ञेयो नक्षत्रसूचकः ॥ अपिच । तिथ्युत्पत्तिं नजानन्ति ग्रहाणां नैवसाधनम् । परवाक्येन वर्त्तन्ते तेवै नक्षत्र सूचकाः ॥

नक्षत्रसूची । पुं । नक्षत्रसूचके ॥ ग्रहेगन्धोद्भवा पृष्ठएव नक्षत्राण्यभिन्या

दीनि शुभाशुभसूचकानि सूचयतीति तथा ॥

नखचेशः । पुं । चन्द्रे ॥ नखषाणामीशः ॥ कर्पूरे ॥

नखः । पुं । न । पुनर्भवे । कररुहे ॥ पुं । खण्डे ॥ इतिहेमचन्द्रः ॥ न । व्याघ्रनखाख्येगन्धद्रव्ये । शुक्तौ । कोलदले ॥ द्विधा शङ्खनखाख्याऽन्याशुक्त्याख्यावदरीछदा इतिरत्नमाला ॥ नखद्वयंग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् । वर्णशुक्रकरंवर्ण्यंस्वादुव्रणविषापहम् ॥ अलक्ष्मीमुखदौगन्ध्यहृत्पाकरसयोःकटुः ॥ नखनति खन्यते वा । खनुअवदारणे । अन्ये॰डः ॥ नखमस्येति वा । नभ्राडितिसाधुः ॥ यद्वा । नह्यति । णह बन्धने । नहेर्हलोपश्चेति खः ॥ स्वल्पपत्रस्त्वसौ शुक्ति र्नखरी वदरच्छदा । महांस्त्वसौ शङ्खनखः शङ्खाख्यो गन्धसारणः ॥

नखकुट्टः । पुं । नापिते ॥ इतित्रिकाण्डशेषः ॥

नखनिकृन्तनम् । न । नखच्छेदनार्थंनापितशस्त्रविशेषे । नहेर्नी इतिभाषा ॥

नखनिष्पावः । पुं । निष्पावीभेदे । शुक्षिफलायाम् । ग्राम्यायाम् ॥

नखपर्णी । स्त्री । वृश्चिकाक्षुपे ॥

नखपुष्पी । स्त्री । पृक्कायाम् ॥

नखमुचम् । न । धनुषि ॥

नखम्पचा । स्त्री । यवाग्वाम् ॥ नखम्पचतीतिविग्रहे मितनखेचेति नखकर्म्मोपपदात्पचेःकर्त्तरि खश् । अरुर्द्विषदितिमुम् । पचिश्चात्रतापवाची ॥

नखरः । पुं । नखे । करकण्टके । कररुहे ॥ नखंराति । रा॰ । कः ॥

नखरञ्जनी । स्त्री । ओषधिविशेषे ॥ तस्याःफले ॥ हरीतक्यादिभ्यश्चेतिफलप्रत्ययस्यलुप् ॥ नखच्छेदनास्त्रविशेषे । नहेर्नी इतिभाषा ॥ यथा । अनन्तचरणोपान्तधारिणी मलहारिणी । पुनर्भवच्छेदकरीगङ्गेव नखरञ्जनीति ॥

नखरायुधः । पुं । कुक्कुटे ॥ व्याघ्रे ॥ सिंहे ॥

नखराह्वः । पुं । करवारवृक्षे ॥ इति राजनिर्घण्टः ॥

नखरी । स्त्री । नख्याम् ॥ क्षुद्रनख्याम् ॥

नखविष्किरः । पुं । पक्षिविशेषेषु ॥ नखै र्विकीर्य्य ये भक्षयन्ति । ते च श्येनादयः ॥

नखवृक्षः । पुं । नीलवृक्षे ॥

नखशङ्खः । पुं । शम्बूके । क्षुद्रशङ्खे ॥

नखाघातः । पुं । रतिक्रीडायांस्त्रीणामवि

शेषेषु नखपाते ॥ स्थानानियथा । नखाघात: प्रदातव्यो यथास्थानानि कर्मसु । पार्श्वयो स्तनयोश्चैव ऊरौ चैव नितम्बके ॥ कक्षस्थलेषक र्णान्तेकपालेषाहुमूलके । ग्रीवायां कण्ठदेशेच नखाघातंसमाचरेत् ॥ तथा सर्वशरीरेषु नखं दद्याच्छनै: शनैरितिकामशास्त्रम् ॥

नखाङ्क: । पुं । न । व्याघ्रनख्याम् ॥

नखायुध: । पुं । व्याघ्रे ॥ सिंहे ॥ कुक्कुरे ॥

नखालि: । पुं । क्षुद्रशङ्खे ॥ नखपङ्क्तौ ॥

नखालु: । पुं । नीलवृक्षे ॥

नखाशी । पुं । पेचके ॥ त्रि । नखभक्षके ॥

नखी । पुं । सिंहे ॥ विदारणक्षमनखयुक्तपशुमात्रे ॥

नखी । स्त्री । नखनामगन्धद्रव्ये । शुक्तौ ॥ बह्वादित्वात् ङीष् ॥

नग: । पुं । पर्वते ॥ वृक्षे ॥ नगच्छति । गम्लृ० । अन्येभ्योपीति अन्येष्वपीति वा ड: । नगोप्राणिष्वितिनञ्वा प्रकृत्या ॥

तीर्थविशेष ॥ भास्करे ॥ पवनाशने ॥

नगज: । त्रि । पर्वतजातवस्तुमात्रे ॥

नगजा । स्त्री । क्षुद्रपाषाणभेदायाम् ॥

नगण: । पुं । त्रिलघो (।।।) ॥

नगणा । स्त्री । पारावतपद्याम् । नयाफट्की इतिगौडभाषाप्रसिद्धलतायाम् । मालकाँगणीतिभाषा ॥

नगतीर्थम् । न । पुण्यक्षेत्रविशेषे ॥ नगस्य नगानां वा तीर्थम् ॥

नगनन्दिनी । स्त्री । पार्वत्याम् ॥

नगपति: । पुं । हिमालये । गिरीन्द्रे ॥ नगानाम् पति: ॥

नगभिद्-त् । पुं । पाषाणभेदने ॥ इन्द्रे ॥

नगभू: । पुं । क्षुद्रपाषाणभेदायाम् ॥ त्रि । पर्वतजाते ॥

नगरम् । न । राजस्थितिस्थाने । पुरि । पत्तने ॥ यत्राष्टशतग्रामीयव्यवहारस्थानं मध्यवर्त्तितन्नगरम् । पण्यक्रियादिनिपुणै श्चातुर्वर्ण्यजनै र्युतम् । अनेकजातिसम्बन्धं नैकशिल्पिसमाकुलम् । सर्वदैवतसम्बन्धंनगरन्त्वभिधीयते ॥ नगा: वृक्षा: पर्वता वा सन्त्यस्मिन् । नगपांशुपाण्डुभ्यश्चेति र: । पक्षेक्लीवत्त्वम् ॥ नगा इवप्रासादादय: सन्तियत्रवा ॥

नगरघात: । पुं । हस्तिविशेषे ॥ नगरं हन्ति । हन० । कृत्यल्युटोबहुलमिति अण् ॥

नगरन्ध्रकर: । पुं । क्रौञ्चदारणे ॥ रन्ध्रं करोतीतिरन्ध्रकरोरन्ध्रहेतु: । कृञो हेतुताच्छील्यानुलोम्येष्विति कृञष्ट

प्रत्ययः । नगस्य रन्ध्रकरः ॥

नगरसम्भवम् । न । सिद्धपीठान्तरे ॥

नगरी । स्त्री । पुर्य्याम् । नगरे ॥ जाति लक्षणोङीष् ॥

नगरीबकः । पुं । काके ॥ इतित्रिकाण्डशेषः ॥

नगरोत्था । स्त्री । नागरमुस्तायाम् । नागरमोथा इतिभाषा ॥

नगरौषधिः । स्त्री । कदल्याम् ॥

नगस्वरूपिणी । स्त्री । प्रमाणिकाछन्दे ॥

नगाटनः । पुं । वानरे ॥ नगेष्वटनंयस्य ॥

नगाधिपः । पुं । हिमालये ॥ नगाना मधिपः ॥ सुमेरौ ॥

नगाधिराजः । पुं । हिमालये ॥

नगानिका । स्त्री । चतुरक्षराछन्दःप्रभेदे ॥ यथा । द्वितूर्य्यके गुरु र्यदा । नगानिका भवेत्तदा ॥ यथा । विलोकये कदा चणम् । हरिं सरोरुहे क्षणमिति ॥

नगाश्रयः । पुं । हस्तिकन्दे । हस्तिपचे ॥ त्रि । नगवासिनि ॥

नगौकाः । पुं । शरभे ॥ पक्षिणि ॥ पञ्चास्ये ॥ काके ॥ नगे वृक्षेऽगे वा ओक आश्रयो यस्य ॥

नग्नः । पुं । वन्दिनि ॥ क्षपणे । निर्ग्रन्थे । अदन्ते ॥ त्रि । विवाससि । दिगम्बरे ॥ नग्नः काषायवस्त्रः स्यान्नग्नः कौपीनकावृतः । इतिकार्ष्णाजिनिः ॥ नजतेस्म । ओलजीब्रीडे । अकर्म्मकत्वात्कर्त्तरिक्तः । ओदितश्चेतिनत्वम् ॥ द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च । एकवासाअवासाश्च नग्नः पञ्चविधः स्मृतः ॥ पारिभाषिकनग्नो यथा । येषां कुले नवेदोऽस्ति न शास्त्रं नैव च व्रतम् । ते नग्नाः कीर्त्तिताः सद्भि स्तेषामन्नं विगर्हितम् ॥ इतिमार्कण्डेयपुराणम् ॥ ऋग्यजुः सामसंज्ञेयं त्रयी वर्णावृतिर्द्विज । एतामुज्झति यो मोहात् सनग्नः पातकीस्मृतः ॥ त्रयी समस्तवर्णानां द्विज संवरणं यतः । नग्नो भवत्युज्झितायामतस्तस्यामसंशयम् ॥ यस्तु सन्त्यज्य गार्हस्थ्यं वानप्रस्थो न जायते । परिव्राडपि नैवेय सनग्नः पापकृन्नरः ॥ इतिविष्णुपुराणम् ॥

नग्नकः । पुं । नग्ने ॥ नग्नएव । स्वार्थेकन् ॥

नग्नजित् । पुं । नाग्नजित्याः पितरि नृपतिविशेषे ॥

नग्नहूः । पुं । नानाद्रव्यकृते सुरावीजे । किण्वे ॥ ह्वानम् हूयते वा । ह्वेञ् ॥ । सं० क्विप् । नग्नस्यहूः ॥

नग्ना । स्त्री । नग्नयोषिति । विवस्त्रायां नार्य्याम् । कोटव्याम् ॥ नग्नां स्त्रियं

नीक्षेत पुरुषं वाकदाचन । नचमूत्रं पुरीषं वा नवै संस्पृष्टमैथुनमिति कूर्मपुराणम् ॥

नग्नाटः । पुं । दिगम्बरे ॥

नग्नाटकः । पुं । दिगम्बरयोगिनि ॥

नग्निका । स्त्री । अनागतार्त्तवायाम् । अप्राप्तरजस्कायाम् ॥ विवस्त्रायाम् ॥ नजतेस्म । ओनजी० । गत्यर्थेति क्तः । ओदितश्चेतिनः । स्वार्थेकन् ॥

नचेत् । अ । निषेधे ॥

नञ् । अ । नञभावे निषेधेच स्वरूपार्थे व्यतिक्रमे । ईषदर्थेच साहश्ये तद्विरुद्धतदन्ययोः ॥ इतिमेदिनी ॥ अपिच । तत् साहश्य मभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥ साहश्ये यथा । अब्राह्मणः ॥ अभावे । यथा । अपापम् ॥ अन्यत्त्वे यथा । अघटःपटः ॥ अल्पत्त्वे यथा । अनुदरा कन्या ॥ अप्राशस्त्ये यथा । अकेशी ॥ विरोधेयथा । असुरः ॥ अकारो न लोपोनञितिविशेषणार्थः ॥ द्वौनञौ प्रकृतमर्थं गमयतः । यथा । नाविष्णुः कीर्त्तयेद्विष्णुं नाविष्णुर्विष्णुमर्च्चयेत् । नाविष्णुः संस्मरे द्विष्णुंनाविष्णुर्विष्णु मामुयादिति महाभारतम् ॥

नटः । पुं । शैलूषे । कृशाश्विनि । नव

रसाभिनयचतुरे नर्त्तकविशेषे । आयाजीविनि ॥ वर्णसङ्करजातिविशेषे यथा । शौण्डिक्यां शौण्डिका ज्जातो नटो वरुड एवचेति पराशरपद्धतिः ॥ व्रात्यायांक्षत्रियाज्जात इति मनुः ॥ अशोकवृक्षे ॥ श्योनाक वृक्षे ॥ नले । किष्कुपर्वणि ॥ गोदन्तहरिताले ॥ व्रात्यात् क्षत्रियात् सवर्णाया मुत्पन्न आत्मजरे । जल्ले ॥ नटति । नटनृत्तौ । पचाद्यच् ॥ यद्वा । नमति । णम० । अनिदेश्याहिंनानमेर्डटः । । डित्त्वाट्टिलोपः ॥

नटनम् । न । नर्त्तने । नाट्ये । अवस्कन्दने ॥ नट अवस्कन्दने । ल्युट् ॥ भावरत्ने ॥

नटनारायणः । पुं । रागविशेषे ॥

नटभूषणम् । न । } हरिताले ॥
नटमण्डनम् । न । }

नटवरः । पुं । नटश्रेष्ठे ॥

नटसञ्ज्ञकः । पुं । गोदन्तहरिताले ॥ नटे ॥

नटान्तिका । स्त्री । लज्जायाम् ॥ इति हारावली ॥

नटी । स्त्री । नल्यौषधौ ॥ वेश्यायाम् ॥ नटयोषायाम् ॥ गौरादित्वात् ङीष् ॥

नटेश्वरः । पुं । शिवे ॥ इतिहेमचन्द्रः ॥

नट्या । स्त्री । नटसमूहे ॥ पाशा०यः ॥

नडः । पुं । नलतृणे । पोटगले ॥ नडति । नडगहने । अच् ॥

नडकीयः । त्रि । नड्वले ॥ नडाः सन्त्यस्मिन् । नडादीनां कुक् चेतिछः ॥

नडप्रायः । त्रि । नडबहुलदेशे । नड्वति ॥

नडसंहतिः । स्त्री । नड्यायाम् ॥ नडानां संहतिः ॥

नडहः । त्रि । कान्ते । लज्जिते ॥ इति भूरिप्रयोगः ॥

नडहा । स्त्री । विलासिन्याम् ॥

नड्या । स्त्री । नडसंहतौ ॥ नडानां समूहः । पाशादिभ्यो यः ॥

नड्वान् । त्रि । नडप्रायदेशे ॥ नडाः प्रायाश्च । कुमुदनडवेतसेभ्योड्मतुप् । जय इति मादुपधाया इति वा वत्वम् ॥

नड्वलः । त्रि । नडप्रायदेशे ॥ नडाः सन्त्यस्मिन् । नडशादाड्ड्वलच् ॥

नड्वाभूः । स्त्री । गृहविशेषे । कुट्टिमे ॥ इति भूरिप्रयोगः ॥

नतः । पुं । जन्मनाडिकाविशेषे ॥ न । तगरपादाम् । तगरमूले ॥ त्रि । कुटिले ॥ नम्रे ॥ नमति स्म । क्तः ॥

नतद्रुमः । पुं । लताशाले ॥ इतिरत्न० ॥

नतनासिकः । त्रि । चिपिटनासे । अवटीटे ॥ नता नम्रा नासिका ऽस्य ॥

नताङ्गी । स्त्री । नार्याम् ॥ इतिराजनि० ॥

नतिः । स्त्री । नमस्कारे ॥ नमने ॥ क्तिन् ॥ अथ सप्त प्रकाराया नतेर्लक्षणानि । त्रिकोणमथषट्कोणमर्द्धचन्द्रं प्रदक्षिणम् । दण्डमष्टाङ्गमुग्रञ्च सप्तधा नतिलक्षणम् ॥ ऐशानीञ्च कौवेरीदिक् कामाख्या प्रपूजने । प्रशस्ता स्थण्डिलादौ च सर्वमूर्तेषु सर्वतः ॥ त्रिकोणादिव्यवस्थाञ्च यदि पूर्वमुखो यजेत् । पश्चिमाच्छाम्भवीं गत्वा व्यवस्थां निर्दिशेत् तदा ॥ यदोत्तरामुखः कुर्यात् साधको देवपूजनम् । तदा याम्यात्तु वायव्यां गत्वा कुर्यात्तु संस्थितिम् ॥ दक्षिणाद्वायवीं गत्वा दिशं तस्मात्तु शाम्भवीम् । ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत् ॥ त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः ॥ १ ॥ दक्षिणाद्वायवीं गत्वा वायव्याच्छाम्भवीं ततः । ततोऽपि दक्षिणां गत्वा तां त्यक्त्वाग्नौ प्रविश्य च ॥ अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम् । उत्तराच्च तथाग्नेयीं भ्रमणं द्वित्रिकोणवत् ॥ षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः ॥ २ ॥ दक्षिणाद् वायवीं गत्वा तस्माद्वायाच्च दक्षिणाम् । गत्वा यो ऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः ॥ ३ ॥ सकृत् प्रदक्षिणां कृत्वा

वर्त्तुलाकृतिसाधकः । नमस्कारः क थ्यतेसौ प्रदक्षिण इति द्विजैः ॥ ४ ॥ त्यक्ता स्व मानस्थानं पश्चाद्गत्या नमस्कृतिः । प्रदक्षिणं विनायातु नि पत्यभुविदण्डवत् ॥ दण्डइत्युच्यते देवैःसर्वदेवौघमोददः ॥ ५ ॥ पूर्व वद् दण्डवद् भूमौनिपत्यहृदयेनतु । चिबुकेनमुखेनाथनासयाल्लिकेनच ॥ ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात् । तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः ॥ ६ ॥ प्रदक्षिणत्रयं कृत्वासाधको वर्त्तुलाकृतिः । ब्रह्मरन्ध्रेण संस्पर्शःक्षितेर्यः स्यान्नमस्कृतौ ॥ सउग्र इतिदेवौघै रुच्यते विष्णुतुष्टिदः ॥ ७ ॥ नदानां सागरो यादृग् द्विपदां ब्राह्मणो यथा । नदीनां जाह्नवी यादृग् देवानामिव चक्रधृक् ॥ नमस्कारेषु सर्वेषु तथैवोग्रः प्रशस्यते । त्रिकोणाद्यैर्नमस्कारैः कृतैरेवतु भक्तितः । चतुर्वर्गं स भेदभक्तानचिरादेवसाधकः ॥ नमस्कारोमहायत्नः प्रीतिदः सर्वदासदा । सर्वेषामपिदेवानामन्येषामपि भैरव ॥ योसावुग्रोनमस्कारःप्रीतिदःसततं हरेः । महामायाप्रीतिकरःसनमस्कारयोत्तमः ॥ इतिकालीपुराणम् ॥

नदः । पुं । पुनर्वहे । भिद्य । शोणसिन्धुभैरवदामोदरब्रह्मपुत्रादौ ॥ अब्धौ ॥ मिनदे ॥ नदति । णद० । पचाद्यच् ॥

नदनुः । पुं । मेघे ॥ सिंहे ॥ नदति । णदअव्यक्तेशब्दे । अनुङ्नदेश्चेति अनुङ् ॥

नदी । स्त्री । सरिति । तरङ्गिण्याम् । तटिन्याम् ॥ अस्यालक्षणम् । धनुःसहस्राण्यष्टौच गतिर्यासांनविद्यते । न ता नदीशब्दवहा गर्त्ता स्ताः परिकीर्त्तिताः इति ॥ सर्वा गुर्वी-प्राङ्मुखी वाहिनीस्या लघ्वी पश्चाद्वाहिनी निश्चयेन । देशेदेशे तद्गुणा सा विशेषा ह्येवाधत्ते गौरवंलाघवञ्च ॥ प्रायो मृदुवहा गुर्वी लघ्व्यः शीघ्रवहाः स्मृताः । नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः ॥ हिमवत्प्रभवायाश्च जलं तास्वमृतोपमम् । विन्ध्यात् प्राचीप्राच्यवाची प्रतीची याचोदीची स्यान्नदी सा क्रमेण । वातारोपं श्लेष्मपित्तार्त्तिलोपं पित्तोद्रेकं पथ्यपाकञ्चधत्ते ॥ पारिपात्रभवा याश्च विन्ध्याख्यप्रभवाश्च याः । शिरोहृद्रोगकुष्ठानां ता हेतुःश्लीपदस्यचेतिराजनिर्घण्टः ॥ पचादिषु नदट् इतिटित्त्वनिपातनात्-

टिड्ढेतिङीप् ॥ नदीनाञ्चविशेषोयः सवराह्ने निरूपितः । तथामत्स्यपुराणादौ द्रष्टव्योवेत्तुमिच्छुभिः ॥

नदीकदम्बः । पुं । महाश्रावणिकायाम् । मुण्ड्याम् ॥ न । नदीसमूहे ॥

नदीकान्तः । पुं । समुद्रे ॥ नद्यःकान्ता यस्य ॥ इज्जले । निचुलद्रुमे ॥ सिन्धुवारके ॥

नदीकान्ता । स्त्री । जंबाम् ॥ काकजङ्घौषधौ ॥ लतायाम् ॥

नदीकूलम् । न । सरित्तटे ॥ नद्याःकूलम् ॥

नदीकूलप्रियः । पुं । अम्बुवेतसे ॥ नदीकूलं प्रियं यस्य ॥

नदीजः । पुं । अर्जुनवृक्षे ॥ यावनालशरे ॥ हिज्जलवृक्षे ॥ न । स्रोतोञ्जने ॥ त्रि । नद्यां जाते ॥

नदीजा । स्त्री । अग्निमन्थवृक्षे ॥

नदीतरस्थलम् । न । } घट्टे ॥ नदी
नदीतरस्थानम् । न । } भिन्नस्थाने ॥

नदीनः । पुं । वरुणे ॥ समुद्रे ॥ नदीना मिनःस्वामी ॥

नदीनिष्पावः । पुं । धान्यप्रभेदे । कटुनिष्पावे । कर्बुरे ॥

नदीमातृकः । त्रि । नद्यम्बुसम्पन्नव्रीहिपालितदेशे ॥ नदी माताऽस्य । नद्यृतश्चेतिकप् ॥

नदीवङ्कः । पुं । वङ्कुरे । बाँकइतिभाषा ॥ इतिशब्दमाला ॥

नदीवटः । पुं । वटीवृक्षे ॥

नदीष्णः । त्रि । नदीस्नानकुशले ॥ नद्यांस्नाति । ष्णाशौचे । सुपीतिकः निनदीभ्यामितिषत्वम् ॥ नदीशे ॥ इतिपुरुषोत्तमः ॥

नदीसरः । न । इन्द्रक्रीडासरोवरे ॥

नदीसर्ज्जः । पुं । वीरतरौ । अर्जुनवृक्षे ॥

नदेयी । स्त्री । नादेय्याम् । भूमिजंबाम् ॥

नद्धः । त्रि । बद्धे ॥ उद्धृत्ते ॥ नह्यते । णहबन्धने । कर्मणि क्तः । नहोधइतिधत्वम् ॥

नद्ध्री । स्त्री । चर्म्ममयरज्जौ । वरत्रायाम् ॥ नह्यतेऽनया । णह० । दाम्नीतिष्ट्रन् ॥

नद्याम्रः । पुं । समष्ठिलावृक्षे ॥

नद्यावर्त्तकः । पुं । यात्रायोगान्तरे । नन्द्यावर्त्तके ॥ यथा । स्वराशिगेबुधे लग्ने सिते वा सुरवन्दिते । नद्यावर्त्तकयोगोयं यातुरिष्टार्थसिद्धिदः ॥ अन्योपि । भूसुते स्वोच्चगे लाभे मृगकुम्भगते यमे । नद्यावर्त्तकयोगोयं रणेशत्रुतृणानलः ॥

ननन्दा । स्त्री । नन्दिन्याम् । स्वभर्त्तृभगिन्याम् । ननंद इतिभाषा ॥ नन

न्दति कृतायामपिसेवायां न तुष्यति । न नन्दयति भ्रातृजायामिति वा । नञिचनन्देरिति ऋन् ॥

ननान्दा । स्त्री । ननन्दायाम् ॥ न नन्दति न तुष्यति । ननन्दयति भ्रातृजायामिति वा । टुनदि० । नञिचनन्देरिति ऋन् वृद्धिश्चेतिकेचित् ॥

ननु । अ । विनिग्रहे ॥ अनुप्रश्ने ॥ परकृतौ ॥ अधिकारे ॥ संभ्रमे ॥ आमन्त्रणे ॥ अनुनये ॥ प्रश्ने ॥ अनुज्ञायाम् ॥ अवधारणे ॥ दुष्टोक्तौ ॥ सम्यग्वादे ॥ स्तुतौ ॥ वाक्यारम्भे ॥ आक्षेपे ॥ प्रत्युक्तौ ॥ उत्प्रेक्षाऽलङ्कारव्यञ्जके ॥ यथा । मन्ये शङ्के ध्रुवं नूनं किंवा प्रायो नु वेद्मिच । न नु ना नहि जानामि उतप्रेक्षाव्यञ्जकानिचेतिकाव्यचन्द्रिका ॥ न नुदति । नुद० । मित०डुः ॥

ननुच । अ । विरोधोक्तौ ॥ ननुच च चेतिनिपातद्वयस्य समाहारद्वन्द्वः ॥ प्रश्ने ॥

नन्दः । पुं । गोपविशेषे । श्रीकृष्णस्य पितरि ॥ नृपविशेषे । महानन्दिसुते । क्षत्रियवंशान्ते ॥ आनन्दे ॥ निधिप्रभेदे ॥ प्रान्दच्चित्रद्वारगृहे ॥ वेणुविशेषे ॥ यथा । महानन्दस्तथानन्दोविजयोयजयस्तथा । चत्वारउत्तमावंशामातङ्गमुनिसम्मताः ॥ दृशाङ्गुलोमहानन्दोनन्दएकादशाङ्गुलः । कृतितसङ्गीतदामोदरः ॥ त्रि । सर्वाभिरुपपत्तिभिःसमृद्धे ॥ नन्दति इति नन्दः । टुनदि० । पचाद्यच् ॥

नन्दकः । पुं । हरेःखड्गे ॥ भेके ॥ त्रि । हर्षके ॥ कुलपालके ॥ नन्दयति देवान् । टुनदि० । ण्वुल् ॥ नन्दताम् । आशिषिचेति वुन्वा ॥

नन्दकिः । स्त्री । पिप्पल्याम् ॥

नन्दकी । पुं । विष्णौ ॥ विद्यामयो नन्दकाख्योऽसिरस्य । अतइनिठना-वितीनिः ॥

नन्दगोपिता । स्त्री । रास्नायाम् ॥

नन्दथुः । पुं । आनन्दे । सुखे ॥ टुनदि० । द्वितोऽथुच् ॥

नन्दनः । पुं । सुते ॥ भेके ॥ कामाख्यायां पर्वतविशेषे ॥ षड्विंशतितमेवत्सरे । सुभिक्षं क्षेम मारोग्यं शस्यं भवति शोभनम् । बहुक्षीरा स्तथा गावो नन्दनं नन्दने प्रिये ॥ न । इन्द्रस्योद्याने । गन्धमादनमूले गन्धर्वसुरसिद्धाप्सरोरहितोद्याने ॥ धृतिसंज्ञकच्छन्दःप्रभेदे ॥ यथा । नजभजरैस्तु रेफसहितैः शिवै र्हयै र्नन्दनम् । यथा । तरणिसुतातरङ्गपवनैः सलिलसमान्दोलितम् मधुरिपुपादपङ्कजर

अंशुपूतपृथ्वीतलम्। सुरहरार्चित चेष्टितकलाकलापसंस्मारकं चिन्तितजनानन्दनं व्रज सखे सुखाय वृन्दावनम् ॥ त्रि। हर्षके ॥ आनन्दकारके ॥ नन्दयति। टुनदि०। नं०ल्युः॥

नन्दनजम्। न। हरिचन्दने ॥

नन्दनन्दनः। पुं। श्रीकृष्णे ॥ नन्दस्य नन्दनः ॥

नन्दनन्दिनी। स्त्री। दुर्गायाम् ॥

नन्दनमाला। स्त्री। श्रीकृष्णप्रीतिकृन्मालिकाविशेषे ॥

नन्दना। स्त्री। दुहितरि ॥ इतिजटाधरः ॥

नन्दन्तः। पुं। पुत्रे ॥ नन्द्यात्। टुनदि०। दृषिनन्दिजीविप्राणिभ्यःषिदाशिषीति झच् ॥

नन्दपालः। पुं। वरुणे ॥

नन्दपुत्री। स्त्री। पार्वत्याम् ॥ इतित्रिकाण्डशेषः ॥

नन्दयन्तः। त्रि। अर्भके ॥ नन्दयति। टुनदि०। तॄभूवहिवसिभासीध्याहिनाजच्षित् ॥

नन्दा। स्त्री। गौर्याम् ॥ नन्दते सुरलोकेषु नन्दने वसते ऽथवा। हिमाचले महापुण्ये नन्दादेवी ततःस्मृता ॥ संस्थाप्य नन्दिता यस्मात् तस्मान्नन्दा तु साऽभवत्। इतिवनामकारणम्। संस्थाप्य ब्रह्मादिभिर्हिमगिराविति शेषः ॥ अलिञ्जरे। नान्दीरतिभाषा ॥ सम्पदि ॥ तिथिविशेषे॥ यथा। प्रतिपदेकादशी षष्ठी नन्दा ज्ञेयामनीषिभिः ॥ अर्कसङ्क्रमविशेषे। स्थिरे जीववारे तु नन्देति संज्ञा तदा विप्रवर्गः सुखी मासमेकम् ॥ ननन्दरि ॥ तीर्थविशेषे ॥

नन्दात्मजः। पुं। श्रीकृष्णे॥ नन्दस्य आत्मजः ॥

नन्दात्मजा। स्त्री। दुर्गायाम् ॥

नन्दिः। पुं। नन्दिकेश्वरे। पिनाकिनः प्रतीहारे ॥ पुं। न। द्यूताङ्गे ॥ आनन्दे ॥ नन्दति। टुनदि०। इन् ॥

नन्दिकः। पुं। नन्दिवृक्षे ॥

नन्दिका। स्त्री। इन्द्रक्रीडास्थाने ॥ अलिञ्जरे ॥

नन्दिकेश्वरः। पुं। शालङ्कायने। ताण्डवतालिके। शिवद्वारपाले ॥ पुराणविशेषे ॥

नन्दिघोषः। पुं। अर्जुनस्यरथे ॥ वन्दिजनस्य घोषे ॥

नन्दितरुः। पुं। धवद्रुमे ॥

नन्दी। पुं। हरप्रतीहारे। गिरिशवेश्मनि ॥ सान्निविधवृक्षोपक्षिपुराणे ॥ यथा। आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः। सोमनन्दी तृती

यस्य विमेयात्तन्दिनस्तुयदूति ॥ गर्द्दभाण्डे ॥ वटद्रुमे ॥

नन्दिनी । स्त्री । उमायाम् ॥ गङ्गायाम् ॥ ननान्दरि ॥ वशिष्ठधेनौ ॥ वशिष्ठास्रगदेव्याम् ॥ व्याडिमातरि ॥ रेणुकाख्यौषधौ ॥ तीर्थविशेषे ॥ नन्दयति । टुनदि० । णिनिः । ङीप् ॥

नन्दिनीतनयः । पुं । अभिधानविशेषस्य कर्त्तरि । व्याडिमुनौ ॥

नन्दिनीसुतः । पुं । व्याडिमुनौ ॥ नन्दिन्याः सुतः ॥

नन्दिपुराणम् । न । उपपुराणप्रभेदे ॥

नन्दिवर्द्धनः । पुं । भर्गे । शिवे ॥ पक्षान्ते ॥ तनये ॥ मित्रे ॥ चि । आनन्दवर्द्धके ॥

नन्दिवृक्षः । पुं । नन्दीद्रुमे ॥ नन्दनम् । टुनदि० । इन् । नन्द्याःवृक्षः ॥

नन्दी । स्त्री । दुर्गायाम् ॥

नन्दीमुखी । स्त्री । पक्षिविशेषे ॥ यथा । स्थूलाकठोराद्भाश यस्या श्चञ्चूपरिस्थिता । गुटिका चञ्चुसदृशी चेया नन्दीमुखीतिसा ॥ तन्त्रायाम् ॥ इतिहेमचन्द्रः ॥

नन्दीवर्त्तः । पुं । सामुद्रमत्स्यविशेषे ॥

नन्दीवृक्षः । पुं । नन्दिवृक्षे । स्थालीवृक्षे । वेलिआपीपर इति प्रसिद्धे ऽश्वत्थभेदे । कान्तलकादन्योयम् ॥ नन्दीवृक्षो लघुः स्वादु स्तिक्त स्तुवर उष्णकः । कटुपाकरसोग्राही विषपित्तकफास्रनुत् ॥ अश्वत्थाकारःक्षीरवान् स्वनामप्रसिद्धोवृक्षः इतिभरतः ॥ कोङ्कणदेशप्रसिद्धे सुगन्धिवृक्षविशेषे । तूणीके । पीतके । कुठरके ॥ तूत इतिभाषाप्रसिद्धे वृक्षविशेषे । तुन्ने । कुबेरके । कान्तलके । नन्दिवृक्षे ॥ गान्धीराख्यवृक्षे ॥ इतिशब्दाम्बुधिः ॥ नन्दनम् । टुनदि० । इन् । कृदिकारादितिङीष् ॥ नन्द्याः वृक्षः ॥

नन्दीशः । पुं । नन्दिनि । शिवद्वारपाले ॥ भरतोक्ततालप्रभेदे ॥

नन्दीश्वरः । पुं । महादेवे । शिवे ॥ सदाशिवद्वारपाले ॥ नन्दीशाख्येताले ॥ यथा । गोलघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरेमताः इति सङ्गीतदामोदरः ॥

नन्दीसरः । न । इन्द्रसरोवरे ॥

नन्द्यावर्त्तः । पुं । पश्चिमद्वाररहितो नन्द्यावर्त्ताह्वयस्तथेत्युक्तलक्षणे राजवेश्मप्रभेदे ॥ लक्षणान्तरञ्च । दक्षिणानुगतालिन्दचयं यत् पश्चिमामुखम् । पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्तितदिति भरतधृतःसाम्बः ॥ तगरद्रुमे ॥ मत्स्यविशेषे ॥ यथा ।

वर्त्मख्ये याप्ययोगे ॥ नन्द्यतीति नन्दी । नन्दी आवर्त्ती ऽच ॥

नपात् । त्रि । अरक्षके ॥ नपाति । न पात् शत्रन्तः ॥

नपुंसकः । पुं । न । क्लीबे ॥ नस्त्री न पुमानित्यस्य पुंसकभावो नभ्राडित्यत्र निपातनात् ॥ नपुंसकोभवेदिति भाष्यात् पुंस्त्वमव्ययम् ॥ अस्य लक्षणं यथा । स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयो रन्तरं यच्च तदभावेन पुंसकमिति ॥ * ॥ नपुंसकविशेषानाह भावप्रकाशः- । यथा । आसेक्यश्च सुगन्धिश्च कुम्भीक श्चेर्ष्यक स्तथा । अमीसशुक्रा बोद्धव्या अशुक्रो भूणसंज्ञकः ॥ तेषां लक्षणानि यथा । पित्रोस्तु स्वल्पवीर्यत्वादासेक्यः पुरुषो भवेत् । सशुक्रं प्राश्य लभते ध्वजोन्नति मसंशयम् ॥ यः पूतियोनौ जायेत स हि सौगन्धिको भवेत् । स्वेगुदे ऽब्रह्मचर्या यः स्त्रीषु पुंवत् प्रवर्त्तते । स कुम्भीकइतिज्ञेयो गुदयोनिस्तु सम्मृतः ॥ दृष्ट्वा व्यवाय मन्येषां व्यवायेयः प्रवर्त्तते । ईर्ष्यकः सतु विज्ञेयो दृष्टियोनिश्च सम्मृतः ॥ यो भार्यायामृतौ मोहा दङ्गनेव प्रवर्त्तते । तच स्त्रीचेष्टिताकारो जायते शण्ढ संज्ञकः ॥ इति भावप्रकाशः ॥

नप्ता । पुं । पौत्रे ॥ दौहित्रे ॥ नपतन्त्यिपितरो ऽनेन । पतल्ल० । नप्तृनेष्टृत्वष्टृतिसाधुः । नञः प्रकृतिभावः पतेरक्षरलोपश्च निपातनात् ॥

नप्त्री । स्त्री । पौत्र्याम् ॥ दौहित्र्याम् ॥ न पतन्त्यिपितरो ऽनया नप्तृवत् साधुः । ऋन्नेभ्योङीप् ॥

नभः । पुं । श्रावणमासे ॥ व्योम्नि ॥ नभते । नभहिंसायाम् । पचाद्यच् ॥

नभःक्रान्ती । पुं । सिंहे ॥ इतिशब्दमाला ॥

नभः प्राणः । पुं । पवने ॥ इतित्रिकाण्डशेषः ॥

नभःसत् । पुं । निर्जरसि । देवे ॥

नभःसरित् । स्त्री । मन्दाकिन्याम् ॥

नभःस्थितः । पुं । नरकविशेषे ॥ त्रि । आकाशस्थिते ॥

नभःस्पृक् । त्रि । अन्तरीक्षव्यापिनि ॥ नभः स्पृशति । स्पृश० । क्विप् ॥

नभश्चक्षुः । पुं । सूर्य्ये ॥ इतिशब्दमाला ॥

नभश्चमसः । पुं । चन्द्रे ॥ चित्रापूपे ॥ इन्द्रजाले ॥ इतिमेदिनी ॥

नभश्चरः । पुं । विहङ्गमे ॥ विद्याधरे ॥ मेघे ॥ वाते ॥ ग्रहे ॥ देवे ॥ राक्षसे ॥ त्रि । व्योमचारिणि ॥

नभाः । पुं । घने । मेघे ॥ घ्राणे ॥ आ

वर्षमासे ॥ विरहिणो नश्यति नभ्या
ति नभते वा । णभ० । असुन् ॥ व-
र्षायाम् ॥ बिसतन्तौ ॥ पतद्ग्रहे ॥
त्रि । पक्षितशीर्षे ॥ नह्यते मेघैः ।
णह बन्धने । नहेर्दिविभश्चेत्यसुन्
भश्चान्तादेशः ॥

नभः । न । व्योम्नि । आकाशे ॥ नह्यते
मेघैः । णह० । नहेर्दिविभश्चेत्यसु
न् भश्चान्तादेशः ॥ नभते हिनस्ति वा । भ
सदीप्तौ । क्विप् ॥ नभनम् नभ्यते ऽ
नेनावक्षा ॥

नभसः । पुं । न । व्योम्नि ॥ नभते नभ्या
ति वा । अत्यविचमितमीत्यादिना
असच् प्रत्ययः ॥

नभसङ्गमः । पुं । खगे ॥ पक्षिणि ॥ न
भसं गच्छति । गम्लृ० । गमेः सुपी
ति खच् ॥

नभस्यः । पुं । भाद्रमासे ॥ नभाः अभ्र-
म् । तत्र साधुः । यत् ॥

नभस्वान् । पुं । वायौ ॥ नभोऽस्यास्त्र
यत्वेन अस्ति । मतुप् । तसौ मत्वर्थ
इति भत्वाद्रुत्वाभावः । वत्वम् ॥

नभसद् । पुं । देवे । सुरे ॥ नभस्याका
शे सीदति गच्छति । षद्लृ० । स-
त्सूद्विष इत्यादिना क्विप् ॥

नभाकम् । न । तमे ॥ नभ्याति । णभ० ।
पिनाकादित्वादाकः ॥

नभोध्वजः । पुं । वारिदे । मेघे ॥ इति
त्रिकाण्डशेषः ॥

नभोगतिः । स्त्री । आकाशगमने । ख
गतौ ॥ यथा । प्रडीनोड्डीनसण्डी-
नडयनानि नभोगतौ ॥ त्रि । खचरे
॥ नभसि गतिर्यस्य सः ॥

नभोदुहः । पुं ।
नभोद्वीपः । पुं । } वारिदे । मेघे ॥ इ
नभोधूमः । पुं । ति शब्दमाला ॥

नभोनदी । स्त्री । स्वर्गङ्गायाम् ॥

नभोमणिः । पुं । रवौ । सूर्ये ॥

नभोमण्डलदीपः । पुं । चन्द्रे ॥

नभोम्बुपः । पुं । चातकखगे ॥

नभोरजः । न । अन्धकारे ॥

नभोरेणुः । स्त्री । कुज्झटिकायाम् ॥

नभोलयः । पुं । धूमे ॥

नभ्यः । पुं । अक्षे ॥ नाभयेहितः । रथा
ङ्गस्य छिद्रं नाभिः । तदनुप्रविष्टःका
ष्ठविशेषोऽक्षः । सच तदनुगुणत्वात्
तस्मै हितः । अञ्जनं तैलाभ्यङ्गः तद
पि स्नेहनत्वान्नाभये हितम् । उगवा
दिभ्यो यत् । नाभ नभञ्च ॥ त्रि । न
भसम्बन्धिनि ॥

नभ्राट् । पुं । मेघे ॥ नभ्राजते इति
वा । भ्राजृ० । क्विप् । नभ्राण्नपादि
ति साधुः ॥

नमत् । त्रि । प्रणते ॥

नमतः । पुं । प्रभ्वे ॥ धूमे ॥ नटे ॥ नमति । णम० । भृमृदृशीत्यादिना ऽतच् ॥

नमनम् । न । वाङ्मनःकायप्रणिधाने नम्रीभवने ॥ त्रि । नमयितरि ॥ कर्त्तरि ल्युट् ॥

नमयिता । त्रि । नमनकर्त्तरि ॥

नमउ । अ । नतौ ॥ नमनम् । णमप्रह्वत्वे शब्दे च । असुन् ॥

नमसः । पुं । अनुकूले ॥ नमति । णम० । अत्यविचमीत्यादिना ऽसच् ॥

नमसितः । त्रि । अर्च्चिते । पूजिते । कृतनमस्कारे ॥ नमःकृतम् । नमोवरिवइतिनमसःक्यच् । क्तः । क्यस्यविभाषेतिवायलोपः ॥

नमस्कारः । पुं । नमस्कृतौ । करयोःशिरस्संयोगेन नतिकरणे । स्वापकर्षबोधकव्यापारविशेषे ॥ सर्व्वत्रापि नमस्कुर्य्यात्सर्व्वावस्थासु सर्व्वदेतिव्यवहारः । नाप्रयतायाप्रयतोऽभिवादयेदितिशङ्खः । देवंविप्रंगुरुंदृष्ट्वाननमेद्यस्तु संभ्रमात् । सकालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ ॥ ब्राह्मणंगुरुंदृष्ट्वान नमेद्योनराधमः । यावज्जीवनपर्य्यन्तमशुचिर्यवनोभवेदिति ब्रह्मवैवर्त्तपुराणम् ॥ देवतायतनंदृष्ट्वादृष्ट्वातु दण्डिनं तथा । नमस्कारं नकुर्य्याद्यः प्रायश्चित्ती भवेन्नरः ॥ सभायां यज्ञशालायां देवतायतनेषु च । प्रत्येकन्तुनमस्कारोहन्तिपुण्यंपुराकृतम् ॥ उपविश्य नमेच्छूद्रो दीर्घायुर्ब्राह्मणोवदेत् । सशूद्रोनरकंयाति ब्राह्मणोयात्यधोगतिम् ॥ * ॥ अश्वारूढमजानन्तं धावन्तं धनगर्वितम् । अपश्यन्तमनभ्यस्तं षड्विप्रान्नाभिवादयेत् ॥ * ॥ पुष्पहस्तोवारिहस्तस्तैलाभ्यक्तोजलाश्रितः । आशीःकर्त्तानमस्कर्त्ताउभयोर्नरकंभवेदिति कर्म्मलोचनः ॥ * ॥ मातुःपितुः कनीयांसंननमेद्वयसाधिकः । नमस्कुर्य्याद्गुरोःपत्नीं भ्रातृजायां विमातरम् ॥ यमः । अभिवादयतःपूर्व्वमाशिषं न प्रयच्छति । यद्दुष्कृतं भवेत्तस्य तस्माद्भागं प्रयच्छते ॥ स्वस्तीति ब्राह्मणे ब्रूया दायुष्मानिति राजनि । वर्द्धतामितिवैश्येषु शूद्रेत्वारोग्यमेवचेतिशब्दकल्पद्रुमेमलमासतत्त्वम् ॥ विषप्रभेदे ॥ इतिशब्दचन्द्रिका ॥ नमःकरणम् । कृञ० । घञ् ॥

नमस्कारी । स्त्री । खदिर्य्याम् । हाथाजोडीतिख्यातौषधौ ॥ नमस्कारगणीला । सुपीतगणानः ॥

नमस्कृतिः । स्त्री । नमस्कारे ॥ नमः

करणम् । नमः क्रियते ऽनयावा । डुकृञ्० । स्त्रियां क्तिन् ॥

नमस्य: । त्रि । नमस्कारार्हे ॥

नमस्यन् । त्रि । कायवाङ्मनोभि र्नमस्कुर्वेति ॥

नमस्या । स्त्री । पूजायाम् ॥ नमस्करणम् । नमोवरिवश्चित्रङ: क्यच् । अ-प्रत्ययादित्यकार: । टाप् ॥

नमस्थित: । त्रि । पूजिते । अर्चिते । नमसिते ॥ नमः कृतम् । नमोवरिव इति नमस:क्यच् । क्त: ॥

नमित: । त्रि । जातनमस्कारे ॥ नामिते ॥

नमुचि: । पुं । शुम्भनिशुम्भाभ्यां कनिष्ठे दैत्यविशेषे ॥ अनङ्गे । कामे ॥ नमुञ्चति । मुच्लृ० । इगुपधात् कि दितीन् । नभ्राण्नपादितिनञ् प्रकृत्या ॥

नमुचिद्विट् । पुं । इन्द्रे । मघोनि ॥ नमुचिं द्वेष्टि । द्विष० । सत्सूद्विषेत्यादिना क्विप् ॥

नमुचिसूदन: । पुं । इन्द्रे । पाकशासने ॥ नमुञ्चति । मुच्लृ० । इन् । नभ्राडिति नञ् प्रकृत्या । सूदयति । षूद क्षरणे । नं० ल्यु: । नमुचेर्दैत्यस्य सूदन: ॥

नमेरु: । पुं । सुरपुन्नागे ॥ रुद्राक्षे ॥

नमोगुरु: । पुं । ब्राह्मणे । भूसुरे ॥ नमस्करणीयोगुरु: ॥

नम्या । स्त्री । काष्ठादिनिर्मितकूपादिसङ्क्रमे ॥

नम्य: । त्रि । नमस्ये ॥

नम्र: । त्रि । नते । नमनशीले ॥ नमति । तच्छील: । णम० । नमिकम्पीति र: ॥

नम्रक: । पुं । वेतसे ॥ त्रि । नते ॥

नय: । पुं । नीतौ । नाये ॥ द्यूतविशेषे ॥ नैगमादिषु ॥ युक्तौ ॥ शास्त्रे ॥ त्रि । न्याय्ये ॥ नेतरि ॥ नयनम् ॥ णीञ्० । बाहुलकात् एरच् ॥ नयते: कर्त्तरि पचाद्यच्वा ॥

नयक: । पुं । नयेकुशले ॥ णा० क्वुन् ॥

नयज्ञ: । त्रि । नीतिज्ञे ॥ नयंजानाति ज्ञा० । क: ॥

नयद्रुट् । त्रि । नीतिविरुद्धकारिणि ॥

नयनम् । न । चक्षुषि । लोचने ॥ प्रापणे ॥ नीयतेऽनेन । णीञ्० । ल्युट् ॥

नयनाभिराम: । पुं । चन्द्रे ॥ नयनयोरभिराम: ॥ त्रि । प्रिये ॥

नयनी । स्त्री । कनीनिकायाम् ॥ नीयते स्वविषयोऽनया । णीञ्० । ल्युट् । ङीप् ॥

नयनोत्सव: । पुं । दीपे ॥ दृगुत्सवे ॥

नयनयोः उत्सवो यस्मिन् ॥

नयनोपान्तः । पुं । अपाङ्गे ॥

नयनौषधम् । न पुष्पकासीसे ॥

नयपीठी । स्त्री । द्यूताङ्गे । अष्टकाङ्गे । छक् इति गौडभाषा ॥

नयवर्त्म । न । षाड्गुण्यप्रयोगे ॥ सन्धिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम् ॥ नयस्य वर्त्म ॥

नयविशारदः । पुं । नीतिशास्त्रज्ञे ॥

नयशाली । पुं । नीतिसम्पन्ने ॥

नयानुगः । त्रि । नीत्यनुसारिणि ॥

नरम् । न । रामकर्पूरतृणे ॥

नरः । पुं । अजे । अच्युते । विष्णौ ॥ मनुजे ॥ अर्जुने ॥ नरति । नयति वा । नृ नये । अच् ॥ परमात्मनि ॥ नरवीतमरः प्रोक्तः परमात्मा सनातन इति व्यासः ॥ शङ्कौ ॥

नरकः । पुं । भूमेर्गर्भवराहाज्जाते दैत्यविशेषे । भौमे ॥ पापिनां कष्टजनकस्थानविशेषे । निरये । नारके ॥ स यस्त्वाविंशद्भेदभिन्नः । यथा । रौरवध्वान्तशीतोष्णसन्तापाञ्जमहाम्बुजाः । कालसूत्राष्टमाद्येते नरकाः तिथिस्मृताः ॥ सूच्यास्यकालबल्गास्य क्षुरधाराम्बरीषकाः । तथाऽङ्गार महादावसन्तापाश्चेति ये मुने ॥ भवन्त्यष्टौ सुवीभत्सा महाशब्दपदानुगाः ॥ अथ नरकराजाष्टकम् । लाला प्रलेपमांसादनिरुच्छ्वासनमोच्छ्वसाः । युग्माद्रिशाल्मलीलोहप्रदीप्तक्षुत्पिपासकाः ॥ कृमीणां निचयश्चेति राजानः परिकीर्त्तिताः ॥ लोहस्तम्भोऽथ विण्मूत्रस्तथा वैतरणी नदी । तामिस्रश्चान्धतामिस्रः कुम्भीपाकः सरौरवः ॥ महापदानुगोवीचीरा जराजेश्वरेश्वरा इति ॥ नरति नयति वा । नृ नये । कृ॰ वुन् ॥ पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥ उदयनाचार्यास्तु नव नरकाण्येव न सन्तीति क्लीवत्वं प्रयुञ्जते तचमूलं मृग्यम् ॥

नरककुण्डम् । न । ब्रह्मवैवर्त्तादिषु प्रसिद्धे षडशीतिभेदभिन्ने यातनास्थानविशेषे ॥

नरकजित् । पुं । श्रीहरौ ॥

नरकदेवता । स्त्री । निरयदेव्याम् । अलक्ष्म्याम् ॥

नरकस्थः । त्रि । निरयस्थिते ॥ नरकस्थोऽपि देहं वै न पुनस्त्यक्तुमिच्छति ॥

नरकस्था । स्त्री । वैतरण्याम् ॥ नरके तिष्ठति । स्था॰ । सुपिस्थ इति कः ॥

नरकान्तकः । पुं । विष्णौ ॥

नरकामयः । पुं । प्रेते ॥ नरक आमयोऽस्य ॥

नरकीलकः । पुं । गुरुघ्ने । गुरुहणि ॥

नरगणः । पुं । नवसु नक्षत्रविशेषु ॥ मघा । हस्तास्वातिमृगाश्विनीहरिगुरुः पौष्णानुराधादितिश्चार्द्रारोहिणिचोत्तराणि भरणी पूर्वाणि भामिपयम् । ज्येष्ठाश्लेषविशाखमूलवरुणावस्थिचित्रामघाः कथ्यन्ते मुनिभिर्यथा क्रमवशाद्देवानराराक्षसाः ॥ तज्जातजने ॥ तस्यफलम् । मानुष्ये मृदुकर्मसक्तमनाः शीलान्वितो धीयुत इति ॥ नरसमूहे ॥

नरङ्गः । पुं । वरण्डके । नाराङ्गा इति गौड भाषा ॥ न । मेहने । शेफसि ॥

नरदेवः । पुं । श्रीरामचन्द्रे ॥ राज्ञि ॥ नराणां देवः ॥

नरनारायणः । पुं । ऋषिरूपभे भगवतो ऽवतार विशेषे ॥

नरनारायणौ । पुं । २ । कृष्णार्जुनयोः ॥ नरश्चनारायणश्चतौ ॥

नरपतिः । पुं । राजनि ॥ नराणाम्पतिः ॥

नरपुङ्गवः । पुं । नरश्रेष्ठे ॥ नरेषु पुङ्गवः ॥

नरप्रियः । पुं । नीलवृक्षे ॥ त्रि । नरस्य प्रियवस्तुनि ॥

नरवाहिः । पुं । मायातौ ॥

नरभूः । स्त्री । भारतवर्षे ॥ नराणांभूः ॥

नरभूमिः । स्त्री । भारतवर्षे ॥ नराणां भूमिः ॥

नरमानिका । स्त्री । } श्मश्रुयुक्तनार्याम् ॥
नरमानिनी । स्त्री । }

नरमाला । स्त्री । मनुष्यमुण्डमालायाम् ॥

नरमालिनी । स्त्री । श्मश्रुयुक्तनार्याम् ॥ इतिहेमचन्द्रः ॥

नरमेधः । पुं । नरवधप्रधाने यज्ञविशेषे ॥ सकलौवर्जनीयः । यथोक्तंवृहन्नारदीये । समुद्रयात्रास्वीकारः कमण्डलुविधारणम् । द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥ देवरेण सुतोत्पत्ति र्मधुपर्केपशोर्वधः । मांसादनं तथाश्राद्धे वानप्रस्थाश्रमस्तथा ॥ दत्तायाश्चैवकन्यायाः पुनर्दानं वरस्य च । दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनं गोमेधश्च तथामखः । इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥ इति ॥

नरवाहनः । पुं । पौलस्त्ये । कुवेरे ॥ नरोवाहनमस्य । वहु० नत्वम् ॥ त्रि । पुरुषयानविशिष्टे ॥

नरविष्वणः । पुं । राक्षसे ॥ इतित्रिकाण्डशेषः ॥

नरव्याघ्रः । पुं । पुरुषोत्तमे ॥

नरसिंहः । पुं । हरौ । विष्णौ ॥ नरश्च

सिंहस्य च अवयवा यस्मिंस्तिष्ठन्ते स नरसिंहः ॥ सत्यं विधातुं निजभृत्य भाषितं व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः । अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥ नरश्रेष्ठे ॥

नरस्कन्धः । पुं । नराणां समूहे ॥ नरकरितुरगाणां स्कन्धश्च ॥

नरहरिः । पुं । नरसिंहावतारे ॥

नराङ्गः । पुं । वरण्डे ॥ न । मेढ्रे ॥

नराचः । पुं । नराजाख्येवृत्ते ॥ यथा । ध्वजेन नायकेन कुण्डलेन यद्विभूषितं पयोधरेण पक्षिणा शरेण वीणयाञ्चितम् । नराचवृत्तमत्रषोडशाक्षरं समीरितं मनीषिमण्डलीहितं फणीन्द्रपिङ्गलोदितम् ॥ यथा । निशुम्भशुम्भचण्डमुण्डरक्तबीजघातिनी तुलापकूपदैत्यभूपघातपञ्चपातिनी । नवीनपीनबद्धजालकालमेघसन्निभा चिरं चरी करोतु मे प्रियं पिनाकिवल्लभेति ॥

नराजः । पुं । षोडशाक्षरच्छन्दोविशेषे ॥ यथा । भुजङ्गराजभाषितं प्रकीर्णशास्त्रसागरे लघोगुरौ निरन्तरे सतीह षोडशाक्षरे । प्रतापतापनिर्जितप्रभाकरप्रकाशहे प्रहृष्टहृष्टहासकं नराजमेव मन्महे ।

नराधमः । पुं । परमार्थज्ञानहीने ऽसञ्जातवैराग्ये । अकृतकृत्ये पुरुषे ॥ यथा । अज्ञानोपहतो बाल्ये यौवने वनिताहतः । शेषे कालत्रचिन्तार्त्तः किं करोति नराधम इति ॥

नराधिपः । पुं । राजनि । नृपे ॥ सहि नराणां मध्ये भगवतो विभूतिः ॥ नराणामधिपः । नरान् अधिपाति दा । पा० । आतश्चोपसर्गे इति कः ॥

नरान्तकः । पुं । राक्षसविशेषे । रावणात्मजे ॥

नरायणः । पुं । माधवे । विष्णौ ॥ नराअयनमस्येति विग्रहः ॥ नराणामयनं यस्मात् तेन नरायणः स्मृत इति ब्रह्मवैवर्त्तपुराणम् ॥ नरश्चापत्यं श । नडा०फक् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥

नरी । स्त्री । नार्याम् ॥ इति जटाधरः ॥

नरेतिका । स्त्री । तीर्थविशेषे ॥

नरेन्द्रः । पुं । महीपाले ॥ विषवैद्ये ॥ वार्त्तिके ॥ एकविंशत्यक्षरावृत्तं ॥ यथा । चामररत्नरज्जुपरिगतविप्रगल्भाञ्चितशोभः पाणिविराजिपुष्पयुगविरचितकङ्कणसङ्गतगन्धः । चारुसुवर्णकुण्डलयुगलकृतरोचिरलङ्कृतवर्णः पिङ्गलपन्नगेशइति निगदितराजितवृत्तनरेन्द्रः ॥ यथा । पङ्क

अक्रोषपानपरमधुकरगीतमनोज्ञ-तडागः प्रथममनादृतादृतपरपरभृतकाननसत्परभागः । वल्लभविप्रयुक्तकुलवरतनुजीवितदानदुरन्तः किङ्कर वाणि वच्मि मम सखचरि सन्निधिमेति वसन्तः ॥

नरोत्तमः । पुं । कृतकृत्यपुरुषे ॥ यथा । यःस्वकात् परतोवेह जातनिर्वेदआत्मवान् । हृदिकृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः ॥ स्वकात्स्वतएव परतःपरोपदेशाद्वाजातवैराग्यः ॥

नर्क्कुटकम् । न । नासिकायाम् ॥ इति हेमचन्द्रः ॥

नर्त्तकः । पुं । केलके ॥ पोटगले ॥ चारणे ॥ द्विपे ॥ नटे । सर्ववेश्मिनि ॥ त्रि । तालाद्यनुसारेणनर्त्तनकृति ॥ अस्यलक्षणंयथा । यादृशं नृत्यपात्रं स्याद्गीतयोग्यञ्च तादृशम् । नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः ॥ अपिच । असम्बद्धप्रलापीच सदाभ्रुकुटितत्परः । हासप्रहासचतुरो वाचालो नृत्यकोविद इतिसङ्गीतदामोदरः ॥ नृत्यति । नृतीगात्रविक्षेपे । शिल्पिनिष्वुन्निति कर्त्तरि ष्वुन् ॥

नर्त्तकी । स्त्री । नासिकायाम् । गन्धविन् इति रामजनी इतिभाषा ॥ करेण्वाम् ॥ नलिकानामसुगन्धिद्रव्ये ॥ नृत्यति । नृती० । ष्वुन् । षित्वात् ङीष् ॥

नर्त्तनम् । न । नृत्ये ॥ नृती० । ल्युट् ॥

नर्त्तितम् । त्रि । ताण्डविते ॥

नर्द्दटकम् । न । छन्दोविशेषे ॥ तल्लक्षणंयथा । यदिभवतो नजौ भजजला गुरु नर्द्दटकम् । इति ॥ यथा । व्रजवनिताऽवसन्तलतिकाविलसन्मधुपं मधुमथनं प्रणामजनवाञ्छितकल्पतरुम् । विभु मभिनौति कोपिसुकृती मुदितेन हृदा रुचिरपदावलीघटितनर्द्दटकेनकविर्विरति ॥

नर्द्दनम् । न । शब्दे ॥ .

नर्म्मकील: । पुं । भर्त्तरि । पत्यौ ॥ इतित्रिकाण्डशेषः ॥

नर्म्मठः । पुं । चिवुके ॥ षिङ्गे ॥ चूचुके ॥ परिहासके ॥ इतिश०र० ॥

नर्म्मदः । पुं । केलिसचिवे ॥ त्रि । हर्षदे ॥ नर्मददाति । ददाञ्० । ञाति वा । ट० । आतोनुपसर्गेकः ॥

नर्म्मदा । स्त्री । रेवायाम् । सोमोद्भवायाम् । मेकलकन्यकायाम् ॥ अस्याःस्मरणेन सर्पविषनाशोभवति । नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि

। नमोऽस्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्पतः इति विष्णुपुराणम् ॥ पृक्कायाम् ॥ टाप् ॥

नर्म्मदाप्रभवः । पुं । तीर्थविशेषे ॥

नर्म्म । न । परिहासवाक्ये ॥ नरणम् । नृ नये । मनिन् ॥

नर्म्मरा । स्त्री । दर्याम् ॥ भस्त्रायाम् ॥ सरलायाम् ॥ निष्कलाम् ॥ पृस्थङ्कि तोमेदिनिकरः ॥

नलः । पुं । नडे । पोटगले ॥ नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् । उष्णो. हृद्बस्तियोन्यर्त्तिदाहपित्तविसर्पजित् ॥ नृपतिविशेषे । सूर्यवंशीयनिषधराजपुत्रे ॥ यथा । अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः । नलस्तु नैषधस्तस्मान्नभस्तस्मादजायत ॥ * ॥ वीरसेन नृपतेः पुत्रे ॥ यथा । नलौ द्वावेव विख्यातौ वंशे कश्यपसम्भवे । वीरसेनसुतस्तद्वन्नैषधश्च नराधिपः इति मात्स्ये १२ अध्यायः ॥ * ॥ चन्द्रवंशीयनिषधराजपुत्रे । दमयन्तीपतौ ॥ यथा । कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनमिति महाभारतम् ॥ पितृदेवे ॥ विश्वकर्म्मणः पुत्रे कपीश्वरे ॥ दैत्यविशेषे ॥ न । पद्मे ॥

नलकम् । न । शाखास्थि । नाडीवत् सरन्ध्रेऽस्थिपर्वणि ॥ इति हेमचन्द्रः ॥

नलकिनी । स्त्री । जङ्घायाम् ॥

नलकीलः । पुं ॥ जानुनि ॥

नलकूवरः । पुं । कुवेरपुत्रे ॥ नलः कूवरो युगन्धरोऽस्य ॥

नलदम् । न । पुष्परसे ॥ उशीरे ॥ जटामांस्याम् ॥ इति मेदिनी ॥

नलदम्बुः । पुं । निम्बवृक्षे ॥ इति भूरिप्रयोगः ॥

नलदा । स्त्री । मांस्याम् ॥ इति हेमचन्द्रः ॥

नलपट्टिका । स्त्री । तलाख्याम् । दरमा इति गौडभाषाप्रसिद्धे कटविशेषे ॥

नलमीनः । पुं । चिलिचिममत्स्ये । नलवनचारिणि मत्स्ये ॥ नलवनस्थो मीनः नलमीनो मीन इति वा ॥

नलसेतुः । पुं । रामायणप्रसिद्धे सामुद्रे सेतौ ॥ नलेन वानरविशेषेण निर्म्मितः सेतुः ॥

नलिका । स्त्री । काण्ठनाले ॥ नाड्याम् ॥ गौडभाषया नली इति प्रसिद्धे सुगन्धिद्रव्यभेदे । विद्रुमलतिकायाम् । कपोतचरणायाम् । इयञ्चोत्तरापथे प्रसिद्धा सुगन्धा मयालाकृतिः पचारी इति पंठारी इति कचित् प्रसिद्धा

॥ नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् । कृच्छ्राश्मवाततृष्णास्रकुष्ठकण्डूज्वरापहा ॥

नलितः । पुं । नालिता इति गौडभाषाप्रसिद्धे शाकविशेषे ॥

नलिनः । पुं । प्राचीनामलके । पानीआमला इति गौडभाषा ॥ सारसपक्षिणि ॥ न । अम्बुजे । पद्मे ॥ तोये ॥ नीलिकायाम् ॥ नलति । णल गन्धे । इनन् ॥

नलिनी । स्त्री । पद्मिन्याम् । विसिन्याम् ॥ व्योमनिम्नगायाम् ॥ कमलाकरे ॥ नारिकेलमद्ये ॥ नलिकायाम् ॥ पद्मयुक्तदेशे ॥ नडाःसन्त्यत्र । पुष्करादिभ्य इति इनिः । डलयोरैक्यम् ॥ यद्वा नलानांसमूहः । खलादिभ्य इति इनिः ॥

नलिनीखण्डम् । न । नलिनीनांसमूहे ॥ कमलादिभ्यःखण्डः ॥

नलिनीरुहम् । न । मृणाले ॥

नलिनेशयः । पुं । विष्णौ ॥ इति त्रि० ॥

नली । स्त्री । मनःशिलायाम् । कुनट्याम् ॥ नलिकायाम् । विद्रुमलतायाम् । शुषिरायाम् ॥ नलति । णल० । अच् । गौ० ङीष् ॥

नलोत्तमः । पुं । देवनले ॥

नल्वः । पुं । किष्कुचतुश्शते । चतुःशतहस्तपरिमितेदेशे ॥ किष्कूणां हस्तानां चतुःशतम् । चतुर्गुणंशतम् । शा० ॥ नल्यते । णलबन्धने । उल्वादित्वात् वः ॥ कात्यस्तुनल्वं हस्तशतमित्याह ॥

नल्ववर्त्मगा । स्त्री । काकाङ्ग्याम् ॥ त्रि । नल्वपरिमितपथगामिनि ॥

नवः । पुं । स्तुतौ ॥ रक्तपुनर्नवायाम् ॥ त्रि । नव्ये । नूतने ॥ नूयते । णुस्तुतौ । ऋदोरप् ॥ अपूर्वे ॥

नवकारिका । स्त्री । नवोढायाम् ॥ इति शब्दमाला ॥ नवीनकार्याम् ॥ नवीने विवरणश्लोके ॥

नवकालिका । स्त्री । नवीने ॥ इति हारावली ॥

नवखम् । न । देहे ॥ नव खानि यस्य यस्मिन्वा ॥

नवग्रहाः । पुं । सूर्यादिनवसु ॥ ते यथा । सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति नवग्रहाः ॥ नवग्रहमखं कृत्वाततः कर्मसमारभेत् । अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥

नवच्छात्रः । पुं । क्रियाकारे । प्रथमम ध्ययने प्रवृत्ते नवीने विद्यार्थिनि ॥

नवतः । पुं । करिकम्बले । कुथे । नम्दा इति भाषा ॥ इति हेमचन्द्रः ॥

नवतरः । त्रि । नव्ये ॥

नवतिः । स्त्री । सङ्ख्याविशेषे । ९० नब्बे इति भाषा ॥ सङ्ख्येये ॥ नवदशतः परिमाणमस्य । पङ्क्तिविंशतित्रिंशच्चत्वारिंश दित्यादिनानिपातनात् प्रकृतेर्नवभावस्तिप्रत्ययश्च ॥

नवतिका । स्त्री । तूलिकायाम् ॥

नवदण्डम् । न । नृपाणां छत्रविशेषे ॥

नवदलम् । न । संवर्त्तिकायाम् । पद्मस्यकिञ्जल्कसमीपस्थदले ॥ नवञ्चतद्दलञ्च ॥ सामान्यतो नूतने पत्रे ॥

नवदीधितिः । पुं । महीसुते । भौमग्रहे ॥ नवादीधितिर्यस्य ॥

नवदुर्गा । स्त्री । नवपत्रिकायाम् ॥ शैलपुत्र्यादिषु ॥ यथा । प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी । तृतीयं चन्द्रघण्टेति कुष्माण्डेति चतुर्थकम् ॥ पञ्चमं स्कन्दमातेति षष्ठं कात्यायनी तिच । सप्तमं कालरात्रिश्च महागौरीतिचाष्टमम् ॥ नवमं सिद्धिदाप्रोक्ता नवदुर्गाः प्रकीर्त्तिताः । उक्तान्येतानिनामानि ब्रह्मणैवमहात्मना ॥ अग्निनादह्यमानस्तु शत्रुमध्येगतो रणे । विषमे दुर्गमेचैव भयार्त्ताःशरं णंगताः ॥ नतेषांजायते किञ्चिदशुभं रणसङ्कटे । नापदं तस्यपश्यामिशोकदुःखभयं नहि ॥ यैस्तु भक्त्यास्मृ तानूनं तेषांसिद्धिःप्रजायते ॥ इति मार्कण्डेयपुराणम् ॥

नवदोला । स्त्री । नवीनप्रेङ्खायाम् ॥

नवद्वारपुरम् । न । शरीरे । मनुष्यदेहे ॥ श्रवदेशोचे द्वेचक्षुषी द्वेनासिके वागेकेतिशिरसिसप्त द्वेपायूपस्थाख्येऽधः इति नवद्वाराणिसन्ति ॥ नवद्वाराणि यस्मिन् तत् नवद्वारम् । तच्चतत् पुरञ्चेतिविग्रहः ॥

नवधा । अ । नवप्रकारे ॥ यथा । आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् । निष्ठा वृत्ति स्तपो दानं नवधा कुललक्षणम् ॥

नवधातवः । पुं । हेमादिनवसु ॥ यथा । हेमताराऽरनागाश्च ताम्ररङ्गे च तीक्ष्णकम् । कांस्यकं कान्तलोहञ्च धातवो नवकीर्त्तिताः ॥

नव । त्रि । सङ्ख्याविशेषे । ९ नौ इति भाषा ॥

नवनवत्वम् । न । नवप्रकारत्वे ॥ प्रकारेद्विर्भावः । कर्मधारयवद्भावात् सुपोलुक् ॥

नवनी । स्त्री । नवनीते । नैनी इति भाषा ॥ इति पुराणम् ॥

नवनीतम् । न । नवोद्धृते । अकृताग्निसंयोगेमन्थजे । नैणी इति माखन इतिच भाषा ॥ नोतं यद् नवनीतं

नीतं नीतं किमेतेन । आतपतापितभूमौ माधव मा धाव मा धाव ॥ नवञ्चतत् नीतञ्च । विशेषणमिति समासः ॥ नवनीतं हितं गव्यं हृष्यं वर्णबलाग्निकृत् । सङ्ग्राहि वातपित्तासृक्क्षयार्शोऽर्दितकासहृत् ॥ तद्धितं बालके वृद्धे विशेषादमृतं शिशोः ॥ * ॥ नवनीतं माहिष्यास्तु वातश्लेष्मकरं गुरु । दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥ * ॥ दुग्धोत्थं नवनीतन्तु चक्षुष्यं रक्तपित्तनुत् । हृष्यं बल्य मतिस्निग्धं मधुरं ग्राहि शीतलम् ॥ * ॥ नवनीतन्तु सद्यस्कं स्वादु ग्राहि हिमं लघु । मेध्यं किञ्चित् कषायाम्ल मीषत्तक्रांशसङ्क्रमात् ॥ * ॥ सक्षारकटुकाम्लत्वाच्छर्द्यर्शः कुष्ठकारकम् । श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ॥ * ॥ शीतं कच्चनवोद्धृतं सुमधुरं वृष्यञ्च वातापहं कासघ्नं क्रिमिनाशनं कफहरं सङ्ग्राहि शूलापहम् । बल्यं पुष्टिकरं तृषार्त्तिशमनं सन्तापविच्छेदनं चक्षुष्यं श्रमहारि तर्पणकरं दध्युद्भवं पित्तजित् ॥ * ॥ एकाहाद्युषित प्रोक्तमुत्तरोत्तरगन्धदम् । अवद्यं सर्वरोगाढ्यं दधिजं तद्धितं नहि ॥ इति राजनिघण्टुः ॥

नवनीतकम् । न । घृते ॥

नवनीतधेनुः । स्त्री । दानार्थकृत नवनीतमयधेनुविशेषे ॥

नवपत्रिका । स्त्री । कदल्यादिषु ॥ कदली दाडिमी धान्यं हरिद्रामानकं कचुः । बिल्वोऽशोकोजयन्तीच विज्ञेया नवपत्रिकेति दुर्गोत्सवतत्त्वम् ॥

नवपदम् । न । मात्रावृत्तान्तरे ॥ यथा । प्रथममुपनयराम कलधितयमहिगणेन सह दण्ड मिति पदानि विषमाणिसन्ति । समपदेचषट्पञ्च सप्तषष्टिकलमेतदानतु । एवं पञ्च पदानि कुरु दोहा मग्रेदेहि । भुजराजपिङ्गलभणितनवपदमेतदवेहि ॥ यथा । त्यज मानिनि मान मपहाय रमय रमण मतिशयितकपटकलहरति किमु विनश्यसि यौवन मिद मतिचपल मचल नदीजलगति न पश्यसि । अनुभव हरिपरिरम्भसुख मिति वक्ता वद कोपि । मुग्धे माधव मधिसपदि कुरु कारुण्य मितोपीति ॥ नवपदानि यस्मिन् तत् ॥

नवपाठकः । पुं । नवीनाध्यापके ॥ नवो नूतनः पाठकः । पूर्वकालैकेति समासः ॥

नवफालिका । स्त्री । नवे । नव्ये ॥ नव

जातरजोऽङ्गनायाम् । नग्नजः स्त्रियाम् ॥

नववधूः । स्त्री । नूतनपरिणीतायाम् । नवोढायाम् । नयी वहू इतिभाषा ॥

नववध्वागमनम् । न । नूतनपरिणीतायाः प्रथमतः क्रियमाणे भर्तृगृहागमने । गौनाइतिभाषा ॥

नवमः । त्रि । नवानाम् पूरणे ॥ तस्य पूरणेडट् ॥ ङीपि नवमी ॥

नवमल्लिका । स्त्री । नवमालिकायाम् । नेयालि इति नेओयार इतिच गौड भाषा प्रसिद्धे पुष्पे ॥

नवमल्ली । स्त्री । नवमालिकायाम् ॥ नवा स्तुत्या मल्ली ॥

नवमालिका । स्त्री । नवमल्लिकायाम् । ग्रीष्मोद्भवायाम् । सप्तलायाम् । नेवारा इति नेवारी इतिच भाषा ॥ नवा स्तुत्या मालिका ॥

नवमी । स्त्री । शुक्लकृष्णपक्षयोस्तिथिविशेषे । इयं चन्द्रस्य नवमकला क्रियारूपा दुर्गाया स्तिथिः ॥ अस्यांजातस्यफलम् । विरोधकर्त्ता सुजने रगम्यः परोपकारार्थमतिः कुशीलः । आचारहीनः कृपणः कठोरः प्रसूतिकाले नवमी यदि स्यादिति ॥

नवयौवना । स्त्री । युवतौ । तरुण्याम् । दिक्कर्याम् । अतिक्रान्तमुग्धभावायाम् ॥ नवंयौवनंतारुण्यंयस्याःसा ॥

नवरत्नम् । न । नवप्रकारमणिषु ॥ यथा । मुक्तामाणिक्यवैदूर्यगोमेदान् वज्रविद्रुमौ । पद्मरागं मरकतं नीलञ्चेति यथा क्रमादिति तन्त्रसारः ॥ नवानांरत्नानां समाहारः ॥ * ॥ नवग्रहदोषशान्त्यै धार्याणि नवरत्नानि यथा । वैदूर्यं धारयेत्सूर्ये नीलञ्च मृगलाञ्छने । आवनेयेपिमाणिक्यं पद्मरागं शशाङ्कजे ॥ गुरौमुक्तां भृगौवज्रं शनौनीलं विदुर्बुधाः । राहौ गोमेदकं धार्यं केतौ मरकतं तथेतिदीपिका ॥

नवरात्रम् । न । आश्विनाद्युक्तमासेषु शुक्लप्रतिपदादिनवमीपर्यन्तनवदिनकर्त्तव्ये दुर्गाव्रतविशेषे ॥ नवरात्रचतुष्टयमुक्तं देवीभागवते । चैत्रेऽश्विनेतथाषाढे माघेकार्यमहोत्सवः । नवरात्रे महाराजपूजाकार्या विशेषत इति ॥ नवानांरात्रीणां समाहारः ॥

नवरात्रिकम् । न । नवरात्रे ॥

नववरिका । स्त्री । नवोढायाम् ॥

नववल्लभम् । न । दाहागुरुणि ॥ त्रि । नवीनप्रिये ॥

नववस्त्रम् । न । नवाम्बरे । अनाहते ॥

नवशायकः । पुं । नवशाक इति गौड

भाषाप्रसिद्धे नवविधे गोपादिजातिविशेषे ॥ यथा । गोपो मालीत थातैली तन्त्री मोदकवारजी । कुलालः कर्मकारश्च नापितो नवशायकाः ॥ इतिपराशरसंहिता ॥

नवश्राद्धम् । न । एकादशाहादिश्राद्धे ॥

नवसारः । पुं । न । नवसादरे ॥ तच्छुद्धिर्यथा । नवसारो भवेच्छुद्ध श्चूर्णतोयेविपाचितः। दोलायंत्रेण यत्नेन भिषग्भिर्योगसिद्धये इतिसारचन्द्रिका ॥

नवसादरम् । न । नौसादर इतिभाषाप्रसिद्धे द्रव्ये ॥ प्रतिश्यायेषु शिरसः पीडासु नवसादरम् ॥

नवसूतिका । स्त्री । अचिरप्रसूतायां धेनौ ॥ नवंसूतं प्रसवोऽस्याः । शेषादितिकप् । प्रत्ययस्थादितीत्वम् ॥

नवा । स्त्री । नवीनायाम् ॥

नवांशः । पुं । नवमांशे । मेषादिद्वादशराशीनां नवमे भागे ॥ यथा । मेषाद्या मकराद्याश्च तुलाद्याः कर्कटादयः । क्रमान्नवांशा राशीनां स्वांशाव गौस्तमाः स्मृताः ॥ यथा । मेषे प्रथमनवांशेकांशोमेषस्य । द्वितीयांशोवृषस्य । तृतीयांशोमिथुनस्य । चतुर्थांशः कर्कटस्य । पञ्चमांशः सिंहस्य । षष्ठांशः कन्यायाः । सप्तमांशस्तुलायाः । अष्टमांशो वृश्चिकस्य । नवमांशोधनुषः ॥ * ॥ एवं वृषे प्रथमांशो मकरस्य । २ कुम्भस्य । ३ मीनस्य । ४ मेषस्य । ५ वृषस्य । ६ मिथुनस्य । ७ कर्कस्य । ८ सिंहस्य । ९ कन्यायाः ॥ * ॥ तथा मिथुने १ तुलायाः । २ वृश्चिकस्य । ३ धनुषः । ४ मकरस्य । ५ कुम्भस्य । ६ मीनस्य । ७ मेषस्य । ८ वृषस्य । ९ मिथुनस्य ॥ * ॥ एवं कर्के १ कर्कस्य । २ सिंहस्य । ३ कन्यायाः । ४ तुलायाः । ५ वृश्चिकस्य । ६ धनुषः । ७ मकरस्य । ८ कुम्भस्य । ९ मीनस्य ॥ एवं सिंहे मेषाद्याः ॥ कन्यायां मकराद्याः ॥ तुलायां तुलाद्याः ॥ वृश्चिके कर्कटाद्याः ॥ एवमेव धनुषिमेषाद्याः ॥ मकरे मकराद्याः ॥ कुम्भेतुलाद्याः ॥ मीने कर्काद्याः क्रमान्नवांशाश्चेयाः ॥ उक्तञ्च । मेषे नवांशा मेषाद्याः वृषेच मकरादिकाः । मिथुनेच तुलाद्याः स्युः कर्कटे कर्कटादिका इति ॥

नवांशकः । पुं । नवांशे ॥

नवाङ्गम् । न । पाचनविशेषे ॥ यथा । विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः । कृतः कषायोहन्त्याशुवातपित्तोद्भवं ज्वरम् ॥

नवाङ्गा । स्त्री । कर्कटशृङ्ग्याम् ॥

नवान्नम् । न । नवीनान्ने ॥ तन्निमि

चम्राद्दे ॥

नवापयस्था । स्त्री । नूतनायां क्षीरवि दार्थ्याम् ॥

नवाभोगः । त्रि । अभिनवप्रयत्ने । म- होत्साहे ॥ नवआभोगोयत्नोयस्य ॥

नवाम्बरम् । न । अनाहते । नवीन वस्त्रे ॥ नवञ्चतदम्बरञ्च ॥

नवार्च्चिः । पुं । मङ्गलग्रहे ॥ इति त्रिका ण्डशेषः ॥

नवार्ली । स्त्री । नवमालिकायाम् ॥

नवाहः । पुं । न । नवतिथौ । नवदिने ॥ प्रतिपत्तिथौ ॥

नवीनः । त्रि । नव्ये । नूतने ॥ नव एव । नवस्यनूप्तनप्खाश्चप्रत्ययाः नुरादेशश्च ॥

नवीयः । त्रि । नवतरे ॥

नवेदाः । पुं । अन्ने ॥ नवेत्ति । विद्० । असुन् ॥

नवोढा । स्त्री । नववध्वाम् । जन्याम् । नववरिकायाम् ॥ मुग्धानायिका भेदे ॥ यथा । वलान्नीतापार्श्वं मु- खमनुमुखं नैवकुरुते धुनानामूर्द्धा नं क्षिपति वदनं चुम्बनविधौ । हृदि न्यस्तं हस्तं क्षिपति गमनारोपितम ना नवोढा वोढारं रमयतिच सम्पा- पयतिचेतिरसमञ्जरी ॥ नवानूतना चासौ ऊढाविवाहिताचेतिविग्रहः ॥

नवोद्धृतम् । न । नवनीते ॥ नवञ्चत त् उद्धृतञ्च । विशेषणमितिस- मासः ॥

नव्यः । त्रि । नवीने । नूतने ॥ नूयते । स्तुतौ । अचोयत् ॥ पुं । रक्तपु नर्नवायाम् ॥

नक् । न । नशने ॥ णश० भावेक्विप् । नश्यति कर्त्तरिवाक्विप् । षडगकाः यथा विधिकर्त्तव्याः ॥

नशाकः । पुं । काकविशेषे ॥

नशिता । त्रि । नाशाश्रये ॥ नशेस्तृन् ॥

नश्यत्प्रसूतिका । स्त्री । मृतवत्सायाम् । मृतपुत्रिकायाम् ॥

नश्वरः । त्रि । अशाश्वते । नाशप्रतियो गिनि ॥ नश्यति तच्छीलः । णश० । इणनशजिसर्त्तिभ्यः क्वरप् ॥ टिड्ढेति ङीपि । नश्वरी ॥

नष्टः । त्रि । तिरोहिते । अदर्शन विशिष्टे ॥ नाशाश्रये ॥ नश्यतिस्म । णश अदर्शने । गत्यर्थेति कर्त्तरि क्तः ॥ भावक्तान्तादशआद्यच्चा ॥

नष्टचन्द्रः । पुं । सैारभाद्रस्योभयपक्षे चतुर्थ्यामुदितेचन्द्रे ॥ यथा । नष्ट चन्द्रो न द्रष्टव्यो भाद्रेमासि सिता सिते । चतुर्थ्यामुदितो ऽशुद्धः प्रति षिद्धोमनीषिभिः ॥ चन्द्रस्ताराप्रच रत्नं कलङ्क मतिदुष्करम् । तस्मै द

इति हेनन्द कामतो यदि पश्यति ॥ अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत् । तदा शुद्धो भवेत् सद्यो निष्कलङ्को महीतले ॥ सिंहः प्रसेनमवधीत् सिंहो जाम्बवताहतः । सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः ॥ इति मन्त्रेणपूतञ्च जलंसाधुःपिबेद्ध्रुवम् ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥

नष्टचेष्टता । स्त्री । प्रलये । शोकादिभिर्निष्पन्दनाशे । हर्षशोकादिभिः सकलचेष्टानाशे मूर्च्छापरपर्य्याये सात्विकभावे ॥ नष्टाचेष्टायस्य । तस्य भावः । तल् ॥

नष्टाग्निः । पुं । प्रमादादिना कारणान्तरशेनवा त्यक्तवैतानिके । वीरहणि ॥ नष्टोऽग्निर्यस्य ॥

नष्टाजीव्यः । त्रि । गतजीविकासाधने ॥

नष्टाशिह्नचम् । न । लोप्त्रे । किञ्चित्मात्मचौरनीतद्रव्ये ॥ इति हारावली ॥

नष्टेन्दुकला । स्त्री । कुहूम ॥ नष्टा इन्दुकलायस्याम् ॥

नसा । स्त्री । नासिकायाम् ॥ इतित्रिकाण्डशेषः ॥

नस्तः । पुं । नासिकायाम् ॥ इतिशब्दमाला ॥ न । नस्यं ॥ इति रत्नमाला ॥ पञ्चविधं नस्तकर्म यथा । प्रतिमर्शोऽवपीडश्च नस्यं प्रधमनं तथा । शिरोविरेचनञ्चैव नस्तकर्मतु पञ्चधेति ॥

नस्ता । स्त्री । नासाकृतच्छिद्रे ॥

नस्तितः । पुं । नस्योतो । रज्जुनाद्युतनासे गवादौ । नाथावैल इति भाषा ॥ नसनम् । शसकौटिल्ये । क्तः । नस्तं कृतमस्य । प्रातिपदिकाद्धात्वर्थे इतिणिच् । ततः कर्मणिक्तः ॥

नस्तोतः । पुं । नस्योते ॥ नस्यतेस्म । शस् । कर्मणिक्तः । नस्तयाउतः ॥

नस्यम् । न । नस्ते । लावण्ये । नासिकादेयचूर्णादौ ॥ यथा । सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारुच । मञ्जिष्ठाचिफला श्वेताशिरीषो रजनीद्वयम् ॥ प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम् । नस्यमालेपनञ्चैवस्नानमुद्वर्त्तनं तथा ॥ अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् । भूतेभ्यश्च भयं हन्तिराजद्वारेचशासनमितिगारुडे १९९ अध्यायः ॥

नस्या । स्त्री । नासिकायाम् ॥ नासारज्ज्वाम् । नकेलइति नाथइतिच भाषा ॥ त्रि । नासिकायांभवे ॥ नासिकायां भवा । नासिकायै हिता वा । शरीरावयवाद्यत् । नस् नासिकाया यत्तसक्षुद्रेष्विति नसादेशः ॥

नस्योतः । त्रि । नस्तिते । नासारज्जुयुक्ते वृषादौ ॥ नस्यया नासारज्ज्वा उतः ॥

नह । अ । प्रत्यारम्भे ॥ नच इच ॥

नहि । अ । निषेधे ॥ नह्यति । णहबन्धने । इन् ॥

नहिकिम् । अ । निषेधे ॥

नहुषः । पुं । नागविशेषे ॥ सोमवंशभवे नृपतिविशेषे ॥ सच पुरूरवसो ज्येष्ठात्मजस्यायुषस्तनय इति पुराणम् ॥ न । तगरे ॥ नह्यति । णह० । पृनहिकलिभ्यउषच् ॥

नहुषाख्यम् । न । तगरपुष्पे ॥

नहुषात्मजः । पुं । ययातिनृपे ॥

ना । अ । निषेधे ॥ नह्यति । णहबन्धने । डा ॥

नाकः । पुं । स्वर्गे ॥ अकं दुःखम् नास्त्यत्र अकमिति नाकः । नभ्राण्नपादिति नलोपाभावः ॥ को ब्रह्मा तदभावो नाचेतिवा ॥ न । ब्रह्मलोके ॥

नाकनाथः । पुं । इन्द्रे ॥

नाकनायकः । पुं । इन्द्रे ॥

नाकनायकपुरोहितः । पुं । वृहस्पतौ ॥

नाकपृष्ठः । पुं । स्वर्गे ॥

नाकी । पुं । सुरे । देवतायाम् ॥ नाकः स्वर्गोऽस्त्यस्य । इनिः ॥

नाकुः । पुं । मुनिविशेषे ॥ पृथ्वीधरे ॥ वल्मीके ॥ नक्रकति । अक० । बाहुलकादुः ॥ यद्वा । नम्यते भूरनेन । णम० । फणिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चेत्युर्नाकिरादेशश्च । इकार उच्चारणार्थः ॥

नाकुलः । पुं । नकुलपुत्रे ॥ त्रि । नकुलसम्बन्धिनि ॥ न । नकुलेश्वरीदेव्याः स्थाने ॥ स्वायम्भुव्यपि नाकुले ॥

नाकुली । स्त्री । कुक्कुटीकन्दे ॥ चविके ॥ रास्नायाम् ॥ नाई इति भाषाप्रसिद्धे कन्दविशेषे ॥ नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् । भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान् ॥ यवतिक्तायाम् ॥ श्वेतकण्टकार्याम् ॥ नकुलानामियम् प्रियत्वात् । तस्येदमित्यण् ॥ न आकुलत्वं यया वा ॥

नाक्षत्रः । पुं । मासविशेषे ॥ सच द्विविधः । सप्तविंशतिनक्षत्रात्मक एकः । यथा । सर्वर्क्षपरिवर्त्तैश्च नाक्षत्रइह चोच्यते इति ॥ सर्वनक्षत्रभुक्त्या तु नाक्षत्रोमास इष्यते इतिच ॥ अस्य प्रयोजनम् । नक्षत्रसत्रायणानि चन्द्रोर्मासेन कुर्याद्गणात्मकेन । सप्तविंशतिनक्षत्रात्मकेन ॥ जन्मनक्षत्रे शनिभौमवारयोर्हि मनोदुःखदानम् । यथोक्तं दीपिकायाम् । जन्म

न्यर्के यद्दिशाभां वारौ भौमशनैश्चरौ। स मासः कल्मषो नाम मनोदुःखप्रदायकः॥ इति॥ *॥ द्वितीयः षष्टिदण्डात्मकनक्षत्रभोगकालरूपदिनत्रिंशदात्मकः। यथोक्तं सूर्य्यसिद्धान्ते। नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते। तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथेति॥ अस्य प्रयोजनमायुर्दशायाम्। यथा। आयुर्दायेऽमृतं प्राहुर्नाक्षत्रं षष्टिनाडिकमिति॥ त्रि। नक्षत्रसम्बन्धिनि॥ तस्येदमित्यण्॥

नाक्षत्रिकः। पुं। नाक्षत्रमासे॥ नक्षत्रगमनेनैव नाक्षत्रिक उदाहृतः॥ त्रि। नक्षत्रसम्बन्धिनि॥

नाक्षत्रिकी। स्त्री। नक्षत्रदशायाम्॥ कलौ नाक्षत्रिकी दशेति ज्योतिषम्॥

नागः। पुं। वासुक्यादिपन्नगे। काद्रवेये। बहुफणसर्पे। मनुष्याकारे फणालाङ्गूलयुक्ते सर्पे॥ मातङ्गे। हस्तिनि॥ क्रूराचारिणि॥ तोयदे। मेघे॥ नागकेसरे॥ पुन्नागे॥ नागदन्तके॥ मुस्तके॥ देहानिलप्रभेदे॥ उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः॥ उत्तरस्थितः श्रेष्ठे॥ नगे भवः। तत्र भव इत्यण्॥ यद्वा। न गच्छतीति अगः। न अगः। सुप् सुपेति स॰। अनञ्त्वाच्च न लोपः॥ न। रङ्गे॥ सीसके॥ करणविशेषे॥ अत्र जातस्य फलम्। नागोद्भवो नागधनाभिलाषी वक्रोक्तिजालोनितराङ्कुशीलः। क्रोधाग्निसन्तापितबन्धुवर्गो भर्गोपमः स्यात् किल रङ्गभूमौ॥ रङ्गे सीसके च पुंलिङ्गोऽपीति वैद्याः॥ अस्योत्पत्तिर्यथा। दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत्। वीर्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम्॥ सीसं रङ्गमुखं त्रेयं विशेषान्मेहनाशनम्॥ नागस्तु नागशततुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति। वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः॥ *॥ तयोः पाकशोधनयोर्दोषो यथा। पाकेन हीनौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान्। पाण्डुप्रमेहानलमान्द्यशोथभगन्दरादीन् कुरुतः प्रभुक्तौ॥ *॥ तयोर्मारणं यथा। अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्। मृत्पात्रे विद्रुतो नागो लोहदर्व्या च चालितः॥ यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला। काञ्जिकेन स्वयं पिष्ट्वा पचेद्दृढपुटेन च॥ स्वाङ्गशीतं पुनः पिष्ट्वा शिलया

काञ्जिकेनच । पुनः पुटेच्छरावाभ्या मेवंषड्भिः पुटैर्मृतिः ॥ * ॥ नागः सिन्दूरवर्णाभो म्रियते सर्वकार्यकृत् । सतिक्तमधुरो नागो मृतो भवति भस्मसात् ॥ आयुः कीर्त्तिं वीर्य्यवृद्धिं करोति सेवनात्सदा । रोगान् ह- न्तिमृतो नागो बहुवङ्गगुणकारकः ॥

नागकन्दः । पुं । हस्तिकन्दे ॥

नागकर्णः । पुं । रक्तैरण्डे ॥

नागकिञ्जल्कः । पुं । नागकेशरपुष्पे ॥

नागकुमारिका । स्त्री । गुडूच्याम् ॥ मञ्जिष्ठायाम् ॥

नागकेशरः । पुं । नागकेसरवृक्षे ॥

नागकेसरः । पुं । काञ्चनाह्वये । चाम्पेये । नागपुष्पे ॥ नागाख्यःकेसरः ॥

नागगन्धा । स्त्री । नाकुलीकन्दे ॥

नागगर्भम् । न । सिन्दूरे ॥

नागच्छत्रा । स्त्री । नागदन्त्याम् ॥

नागजम् । न । सिन्दूरे ॥ रङ्गे ॥ त्रि । नागजाते ॥ नागाज्जातम् । जनी० डः ॥

नागजिह्वा । स्त्री । अनन्तमूलायाम् ॥ मनश्शिलायाम् ॥ नागानांजिह्वेव ॥

नागजिह्विका । स्त्री । नागजिह्वार्थे ॥ स्वार्थेकः ॥

नागजीवनम् । न । वङ्गे ॥ इति हेमचन्द्रः ॥

नागदन्तः । पुं । हस्तिदन्ते ॥ गृहान्निर्गतदारुणि । खूंटीइति टाँतिया इति चभाषा ॥

नागदन्तकः । पुं । भित्तिस्थदारुणि । निर्य्यूहे ॥ नागदन्तएव । स्वा० कः ॥

नागदन्तिका । स्त्री । वृश्चिकाल्याम् । बिछिटी इति गौड भाषा ॥ नागदूत्याम् ॥

नागदन्ती । स्त्री । श्वेतहस्तिन्याम् । हस्तिकर्णपलाशाम् । भूतघ्न्याम् ॥ कुम्भाख्यभेषजे । नागफुलीति प्रसिद्धौषधौ ॥

नागदमनी । स्त्री । क्षुद्रक्षुपविशेषे । अम्लाम् । दुःसहायाम् । मलघ्न्याम् ॥

नागदलोपमम् । न । पद्मपफले । फाल्सा इति भाषा ॥

नागद्रुः । पुं । स्नुह्याम् । समन्तदुग्धायाम् ॥

नागद्वीपः । पुं । भारतवर्षस्थो पद्वीपविशेषे ॥

नागनामा । पुं । सीसके ॥

नागनिर्य्यूहः । पुं । नागदन्तके ॥

नागपत्रा । स्त्री । नागदमन्याम् ॥

नागपत्री । स्त्री । लक्ष्मणायामोषधौ ।

नागपदः । पुं । रतिबन्धविशेषे ॥ यथा । पादौ स्कन्धे तथा हस्ते क्षिपेल्लिङ्गं भगे लघु । कामदेन्तु कामुको नारीं

वन्धो नागपदो मत: ॥ इति रति० ॥

नागपाश: । पुं । स्त्रीणां करणे ॥ वरुणस्यायुधे ॥ ग्रन्थिविशेषे । साङ्ख्या बन्धनात्तु नागपाश इति स्मृत: ॥ ब्रह्मग्रन्थिमयोदृश्यान्नागपाश मथापि वेश्यागम: ॥

नागपाशक: । पुं । रतिबन्धविशेषे । यथा । स्वजङ्घाद्वयमध्यस्थौ हस्ताभ्यां धारयेत् कुचौ । रमे नि:शङ्कित: कामी बन्धोयं नागपाशक: ॥ इति रतिमञ्जरी ॥

नागपुरम् । न । पाञ्चालदेशे ऽनेन नाम्ना प्रसिद्धे नगरे । उरगपुरे ॥ हस्तिनापुरे ॥ वह्निपुराणोक्ते गङ्गावतरणप्रस्तावप्रसिद्धे देशविशेषे ॥

नागपुष्प: । पुं । पुन्नागवृक्षे ॥ नागकेसरे ॥ नागपुष्प: कषायोष्णो रूक्षो लघ्वामपाचन: । ज्वरकण्डूतृषास्वास्च्छर्दिहृल्लासनाशन: । दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापह: ॥ चम्पके ॥

नागपुष्पफला । स्त्री । कुष्माण्ड्याम् ॥

नागपुष्पिका । स्त्री । स्वर्णयूथ्याम् ॥

नागपुष्पी । स्त्री । गजपुष्प्यां लतायाम् ॥ नागिन्याम् ॥ नागदमन्याम् ॥

नागफल: । पुं । पटोले ॥

नागबन्धु: । पुं । अश्वत्थवृक्षे ॥ नागानाम्बान्धवे ॥

नागबल: । पुं । भीमसेने ॥ त्रि । हस्तितुल्यपराक्रमे ॥

नागबला । स्त्री । गाङ्गेरुक्याम् । गोरक्षचाकुलिया इति गौडभाषा ॥ नागानां हस्तिनां बला ॥

नागभृत् । पुं । डुण्डुभसर्पे ॥ इति त्रिकाण्डशेष: ॥

नागमल्ल: । पुं । ऐरावते । शक्रगजे ॥

नागमाता । स्त्री । कद्र्वाम् ॥ मनसादेव्याम् ॥ मनःशिलायाम् ॥

नागमार: । पुं । केशराजे । भृङ्गराजे ॥ त्रि । हस्तिमारके ॥

नागयष्टि: । स्त्री । पुष्करिण्यादि स्थितकाष्ठविशेषे । नागाश्वत्थायाम् । रङ्काठ इति गौड भाषा । जाखन इति भाषा ॥

नागयष्टिका । स्त्री । खातस्थकाष्ठविशेषे । नागाश्वत्थायाम् । जाखन इति भाषा ॥

नागर: । पुं । देवरे ॥ नागरङ्गे ॥ न । मुस्तके ॥ शुण्ठ्याम् ॥ रतबन्धे । त्रि । विदग्धे ॥ नगरोद्भवे ॥ नगरेभव: । तत्रभवइत्यण् ॥ यद्वा । अगं राति । रा० । क: । न अगर: । नकारेण सुसुपेतिसमास: ॥

नागरक: । पुं । चोरे ॥ चित्रलेखका

दिग्विजिपनि ॥ नगरे भवः । नगरात् कुत्सनप्रावीण्ययोरिति वुञ् ॥ रतिबन्धविशेषे । यथा । ऊरुमूले परिक्षिप्य योषिदूरुद्वयं यदि । ग्रीवां धृत्वा कराभ्याञ्च बन्धो नागरको मत इति रतिमञ्जरी ॥

नागरक्तम् । न । सिन्दूरे ॥ नागस्य शोणिते ॥

नागरघनः । पुं । नागरमुस्तायाम् ॥

नागरङ्गः । पुं । जम्बीरविशेषे । ऐरावते । नारङ्गे । नरङ्गी इति भाषाप्रसिद्धे फलवृक्षे ॥ नागान् रञ्जयति । रञ्ज० । हलश्चेति घञ् ॥ नागस्य सिन्दूरस्येव रङ्गोऽस्येति वा ॥

नागरमुस्तकम् । न । भद्रमुस्तके ॥

नागरमुस्ता । स्त्री । मुस्ताप्रभेदे । चक्राङ्गायाम् । मादेय्याम् । चूडालाकाम् । नागरमोथा इतिभाषा ॥

नागराजः । पुं । अनन्ते । शेषे ॥ नागानां राजा । राजाहःसखिभ्यष्टच् ॥ पिङ्गलनागे ॥ ऐरावते ॥

नागराह्वम् । न । शुण्ठ्याम् ॥

नागरी । स्त्री । स्नुहीवृक्षे ॥ विदग्धनार्याम् ॥ नागरभार्यायाम् ॥

नागरीटः । पुं । नागरीगणैःकृतेमङ्गलशब्दे ॥ षिङ्गे ॥

नागरुकः । पुं । नागरङ्गे ॥

नागरेणुः । पुं । सिन्दूरे ॥

नागरेयकः । त्रि । नगर्य्यां भवादौ ॥ कत्र्यादित्वात् ढकञ् ॥

नागलता । स्त्री । मेहने । शेफसि ॥ इति त्रिकाण्डशेषः ॥ ताम्बूल्याम् ॥

नागलोकः । पुं । पाताले ॥ नागानां लोकः ॥

नागवल्लरी । स्त्री । नागवल्ल्याम् ॥

नागवल्लिका । स्त्री । नागवल्ल्याम् ॥

नागवल्ली । स्त्री । ताम्बूल्याम् । पानकी बेल इतिभाषा ॥ नागलोकस्य वल्ली । शा० ॥ इयञ्च श्रीवाटाम्लवाटादिनानाग्रामस्य स्थानभेदादेव भिन्ना । एकाप्येषा देशस्तत्ताविशेषान्नानाकारं याति कायै गुणैश्च । यथा । श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा । रसाढ्या च रसा रुच्या विपाके शिशिरा स्मृता ॥ स्यादम्लवाटी कटुकाम्लतिक्ता तीक्ष्णा तथोष्णा मुखपाककर्त्री । विदाहपित्तास्रविकोपनी च विष्टम्भदा वातनिवर्हणी च ॥ सप्तसीमधुरा तीक्ष्णा कटु रुच्या च पाचनी । गुल्मोदराध्मानहरा रुचिकृद्दीपनी परा ॥ * ॥ अन्यच्च । गुहागरे सप्तशिराप्रसिद्धा तत्पर्णचूर्णाति रसातिरुच्या । सुगन्धितीक्ष्णा मधुरातिहृद्या सन्दीपनी पुंस्त्वकरा च बल-

ल्या ॥ विरेचनीवक्त्रसुगन्धिकारिणीति ॥ * ॥ नाम्नायाम्लसरासुतीक्ष्णामधुराकच्चाहिमादाहनुत्पित्तोद्रेकहरासुदीपनकरीवल्यामुखामोदिनी । स्त्रीसौभाग्यविवर्द्धिनीमदकरीश्रेयासदावल्लभागुल्माध्मानविवन्धजिच्चकथितासामालवेतुस्थिता ॥ ग्रन्थिपुष्कलिकानामकषायोष्णाकटुस्तथा । मलापकर्षकण्ठस्थपित्तह्लादनाशिनी ॥ दैर्घिणीयाकटुस्तीक्ष्णाहृद्यादीर्घदलाचला । कफवातहराकच्चाकटुदीपनपाचनीतिराजनिर्घण्टः ॥

नागवारिकः । पुं । राजकुञ्जरहस्तिपे ॥ गणस्यराजे ॥ गरुडे ॥ चित्रमेखले । मयूरे ॥

नागवीटः । पुं । व्याकरा इतिगौडभाषाप्रसिद्धे । टाङ्करे ॥ इतित्रिकाण्डशेषः ॥

नागवीथी । स्त्री । अश्विन्यादिनक्षत्रत्रयघटितग्रहस्थानत्रयान्तर्गतोत्तरस्थानस्थपथविशेषे ॥ यथा । सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः । स्थानंजारद्गवंमध्यं तथैरावतमुत्तरम् ॥ वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतः । तदेवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेणत्रिधाभिद्यते । तथाहि । त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रै नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथा चोक्तम् । अश्विनी कृत्तिकायाम्या नागवीथीतिशब्दिता । इति विष्णुपुराणम् ॥ कश्यपापत्यविशेषे ॥

नागवृक्षः । पुं । नागकेसरे ॥

नागशुण्डी । स्त्री । डङ्गरीफले ॥

नागसम्भवम् । न । सिन्दूरे ॥ नागंसीसंसम्भवो ऽस्य ॥

नागसुगन्धा । स्त्री । भुजङ्गाक्ष्याम् ॥

नागस्तोकम् । न । वत्सनाभे ॥

नागस्फोता । स्त्री । दन्त्याम् ॥ नागदन्त्याम् ॥

नागहनुः । पुं । नखनामगन्धद्रव्ये ॥

नागहन्त्री । स्त्री । वन्ध्याकर्कोटक्याम् ॥

नागाख्यः । पुं । नागकेसरे ॥ न । हस्तिनापुरे ॥

नागाङ्गना । स्त्री । नागपत्न्याम् ॥ नागयष्टौ ॥ इति मेदिनी ॥ द्विरदस्य मुद्गरे ॥ इतिहेमचन्द्रः ॥

नागाञ्चला । स्त्री । नागयष्ट्याम् ॥

नागाधिपः । पुं । अनन्ते ॥ हस्तिराजे ॥

नागाननः । पुं । श्रीगणेशे ॥ नागआननमस्य । समुदायशब्दा अवयवेपिवर्त्तन्त इति नागमुखपरो नागशब्दः ॥

नागान्तक: । पुं । गरुडे ॥ नागानामन्तक: ॥

नागारातिः । पुं । वन्ध्याकर्कोटक्याम् ॥

नागाह्वा: । स्त्री । कुम्भतुम्ब्याम् ॥

नागाशन: । पुं । गरुडे ॥ नागान् अश्नाति । अश० । ल्यु: ॥ नागा अशनं यस्येति वा ॥

नागाह्वम् । न । हस्तिनापुरे ॥

नागाह्वा । स्त्री । लक्ष्मणाकन्दे ॥

नागिनी । स्त्री । नागपुष्प्याम् ॥ नागदन्त्याम् ॥ नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तजित् । विनिहन्ति विषं शूलं योनिदोषवमिक्रमीन् ॥

नागी । स्त्री । इभयोषायाम् । स्थूलायांगजयोषिति ॥ नागशब्दाज्जानपदेति स्थौल्येऽर्थे ङीष् ॥

नागोदम् । न । उदरत्राणे ॥ इतिहेमचन्द्र: ॥

नागोदरम् । न । उरस्त्राणे ॥ इतिहारावली

नाचिकेत: । पुं । अनले ॥ नचिकेतसाप्राप्ते वैदिकोपाख्यानविशेषे ॥

नाचिकेतु: । पुं । अग्नौ ॥ इतित्रिकाण्डशेष: ॥

नाट: । पुं । नृत्ये ॥ कर्नाट इति प्रसिद्धदेशे ॥

नाटक: । पुं । कामाख्यायां पर्वतविशेषे ॥ यथा । ऐशान्यां नाटकेशैलेश-ङ्करस्य महाश्रमम् । नित्यं वसति तत्रेशस्तदधीनात् पार्वतीति कालिकापुराणम् ॥

नाटकम् । न । महारूपके । गद्यपद्यप्राकृतभाषामये ग्रन्थविशेषे ॥ देवतादर्शनात्तस्य कर्त्तव्यं नाटकं बुधै: । राजर्षिदर्शनात्तं वा तेपि देवै: समा मता: ॥ त्रि । नर्त्तके ॥ नाटयति । नाटेर्ण्वुल् ॥

नाटकशैल: । पुं । अद्रिविशेषे ॥ यथा । अस्ति नाटकशैले तु सरो मानससंनिभम् । यत्र सार्द्धं शैलपुत्र्या जलक्रीडां सदाहर: ॥ कुरुते नरशार्दूल स्वर्णपङ्कजशोभिते । तस्य पश्चात् मध्यपूर्वभागे भस्मसरित्त्रयम् ॥ अवतीर्णा प्रयात्येव दक्षिणं सागरं प्रति । इति कालिकापुराणे ८२ अध्याय: ॥

नाटकसन्धि: । पुं । मुखप्रतिमुखगर्भावमर्शनिर्वहणाख्यपञ्चभेदभिन्ने ॥ यथा । मुखं प्रतिमुखं चैव गर्भो विमर्श एव च । तथा निर्वहणञ्चेति नाटके पञ्चसन्धय इति ॥

नाटकीयम् । न । नाटकवर्णे ॥ नाटके भवम् । वृद्धाच्छ: ॥

नाटाम्र: । पुं । तरम्बुजे । खतापनसे ॥

नाटारः । पुं । नटतनये ॥ नटस्या अपत्यम् । आरगुदीचामित्यारक् ॥

नाटिका । स्त्री । नाटकविशेषे ॥

नाटेयः । पुं । नट्या अपत्ये ॥

नाटेरः । पुं । नटीसुते ॥ इति हेमचन्द्रः ॥

नाट्यम् । न । तौर्य्यत्रिके । नृत्यगीतवाद्यात्मके ॥ लास्ये । नर्त्तने ॥ वाक्यार्थाभिनये ॥ नटस्येदम् । छन्दोगौक्थिकेति ञ्यः ॥ यो यस्य दयितो भावः स तं नाट्ये निरीक्षते । अतः सर्व्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥ अस्योत्पत्तिर्यथा । इदानु श्रूयते ब्रह्मा शक्रेणाभ्यर्थितः पुरा । चकाराकृष्य वेदेभ्यो नाट्यवेदन्तु पञ्चमम् ॥ उपवेदाश्च वेदानां चत्वारः कथिताः स्मृतौ । तत्रोपवेदो गान्धर्व्वः शिवेनोक्तः स्वयम्भुवे ॥ तेनापि भरतायोक्तस्तेन मर्त्त्ये प्रचारितः । शिवाज्ञयेति भरतास्तस्मादस्य प्रयोजका इति सङ्गीतदामोदरः ॥ नटानाङ्कर्म्म । ष्यञ् ॥

नाट्यधर्म्मिका । स्त्री । दर्शनार्थं शास्त्रोक्तनाट्ये ॥ यथा । गीतवाद्यनृत्यत्रयं नाट्यं तौर्य्यत्रिकञ्च तत् । सङ्गीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्म्मिकेति हेमचन्द्रः ॥

नाट्यप्रियः । पुं । शिवे ॥

नाट्यशाला । स्त्री । प्रासादद्वारसमीपगृहे । नाट्यमण्डप इति भाषा ॥ यथा । नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रयेति गरुडपुराणम् ॥

नाट्यालङ्कारः । पुं । सङ्गीतप्रसिद्धे अष्टषष्टिप्रकारे नाट्यभूषणहेतौ ॥ स च प्रकारः सङ्गीतदामोदरादिभ्यो ज्ञातव्यः ॥

नाट्योक्तिः । स्त्री । नाटकविषयकवचसि ॥ नाट्ये उक्तिः ॥ सा यथा । आर्य्येति ब्राह्मणे । महाराजेति च क्षत्रिये । हलेति सख्यौ । हण्डे इति नीचे । हञ्जे इति चेट्याम् । आर्य्यपुत्रेति स्वामिनि ॥ राष्ट्रियेति राजश्याले । हंहो इति समाने । देवेति राजनि । भट्टेति सार्व्वभौमे । आवुत्तेति भगिनीपतौ । अज्जुका इति गणिकायाम् । भाव इति विदुषि । आवुक इति जनके । युवराजो भर्त्तृदारक इति च कुमारे । देवो भट्टारक इति च राजनि । भर्त्तृदारिकेति राजसुतायाम् । देवी इति कृताभिषेकायां नृपस्त्रियाम् । भट्टिनी इति इतरासु राज्ञीषु । अत्र स्याद्यमित्यवध्योक्तौ । अम्बेति मातरि । वाल्हः इति वाल्हायाम् । मारिष इति आर्य्ये । अत्तिकेति ज्येष्ठायाम

गिन्याम्। निर्वेश्नामिति निश्चायाम्॥ इत्यमरः॥

नाडिः। स्त्री। नाड्याम्॥

नाडिकम्। न। कालशाके॥ इति भावप्रकाशः॥

नाडिका। स्त्री। घटिकायाम्। घडी इति भाषा॥

नाडिकेलः। पुं। नारिकेले॥

नाडिचीरम्। न। निर्वेष्टने। नली इति गौडभाषा॥ इति शारावली॥

नाडिन्धमः। पुं। स्वर्णकारे॥ नाडीं वंशनलीं धमति। ध्माशब्दाग्निसंयोगयोः। नाडीमुष्ट्योश्चेति कर्त्तरि खश्। पाघ्रेति धमादेशः। खित्यनव्ययस्येति ह्रस्वः॥

नाडिन्धयः। पुं। नाडीपानकर्त्तरि॥ नाडीं धयति। धेट्०। नाडीमुष्ट्योश्चेति खश्। ह्रस्वः॥

नाडिपत्रम्। न। नाडीचशाके॥

नाडी। स्त्री। शिरायाम्॥ तत्र कायनाडी त्रिविधा। तत्रैका वायुवहा। अन्या मूत्रविडस्थिरसवाहिनी। अपरा आहारवाहिनीति कश्चिद्भरतः॥ *॥ अथ नाडीक्रमः। सार्द्धत्रिकोट्यो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनाम्। नाभिकन्दनिबद्धास्तास्तिर्य्यगूर्द्ध्वमधः स्थिताः॥ द्विसप्ततिः सहस्राणि तासां स्थूलाः प्रकीर्त्तिताः। देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः॥ तासाञ्च सूक्ष्मशुषिराणि शतानि सप्त युक्तानि यैः रसकृद्दन्नरसं वहद्भिः। आप्याय्यते वपुरिदं हि नृणां ममीषां मध्यःस्रवद्भिरिव सिन्धुशतैः समुद्रः॥ आपादतः प्रततगात्र मशेषमेषा मामस्तकादपि च नाभिपुरःस्थितेन। एतन्मृदङ्गइव चर्मचयेन नद्धं कायं नृणामिह शिराशतसप्तकेन॥ *॥ सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटास्तासाम्। एका परीक्षणीया दक्षिणकरचरणविन्यस्ता॥ चतुरधिकेति तदुक्तम्। तिर्य्यक्कूर्म्मा देहिनां नाभिदेशे वामे वक्त्रं तस्य पुच्छञ्च याम्ये। ऊर्द्ध्वभागे हस्तपादौ च वामौ तस्याधस्तात् संस्थितौ दक्षिणौ तौ॥ वक्त्रे नाडीद्वयं तस्य पुच्छे नाडीद्वयं तथा। पञ्च पञ्च करे पादे वामदक्षिणभागयोः॥ तासां मध्ये एकेति। एकस्या एव पादादूर्द्ध्वगमनात् दक्षिणेति प्राधान्यं पुरुषाश्रया। दुक्तम्। वामे भागे स्त्रियायोज्या नाडी पुंसस्तु दक्षिणे। इति प्रोक्ता मया देवि सर्वदेहेषु देहिनाम्॥ *॥ नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटतामपेक्ष्य परीक्षा। साम्य-

न्तुनस्यादेव । कृत्रिमस्यतुप्रकृतिस्थ
ता । चरणेति वामस्यतु दक्षिणग्र
न्थिपश्चात्पार्श्वस्था । दक्षिणस्यतु
वामग्रन्थिपश्चात्पार्श्वस्थैव सदुपदे
शात् । करस्यात्तवच्यते ॥ * ॥ प
रीक्षाप्रकारमाह । सव्येन रोग
धृतिकूर्परभागभाजा पीड्याथ दक्षि
णकराङ्गुलिकाचयेण । अङ्गुष्ठमूलम
धि पश्चिमभागमध्ये नाडीं प्रभञ्ज
नगतिं सततं परीक्षेत् ॥ सव्येन क
रेण । रोगधृतिर्गदधारण मित्याा
पीडने हेतुः । रोगाणां वातादि पि
त्तुनवायूनां धारणं यथा स्यात् तथा
पीड्येति कश्चित् । भागइति समुदि
तकफोणिपरम् भाजेति परीक्षा
कालेपि तत्र हस्तस्थितये । आपी-
ड्येत्यर्थान् नाडीम् एतच्चापीडनं वा
तादि पौर्वापर्य्यावबोधनाय । अथे
त्या पीडनानन्तरम् नतु परीक्षा-
कालेप्यापीडनस्थितिः । दक्षिणेति
प्रायिकम् स्वपरीक्षाया मन्यथात्वा
त् । एषेति योग्यतया तर्जनीमध्य
मानामिकाग्रहणम् । पश्चिमेत्य
ङ्गुष्ठस्याधोभागः । मूलेति तदुक्तम् ।
अङ्गुष्ठस्यतु मूलेया धमनी जीवसा
क्षिणी । तस्या गतिवशाद्विद्यात् सु
खं दुःखञ्च देहिनाम् ॥ प्रभञ्जनग

नाडी

तिर्य्यचेति नाड्यन्तरनिरासः । सतत
मिति सुस्थतादशायामपि । तदुक्त
म् । भाविरोगाभिबोधाय सुस्थनाडी
परीक्षणमिति ॥ * ॥ परीक्षणीय
माह । वातं पित्तं कफं द्वन्द्वं सन्निपा
तं तथैवच । साध्या साध्यविवेकञ्च
सर्व्वं नाडी प्रकाशयेत् ॥ सन्निपात
मिति सामान्यतः । साध्यासाध्यमि
ति विशेषतश्चेत्यर्थः । सर्व्वमित्येत
द्व्यञ्चरोगादिक मित्युपसंहारः ॥
इति नाडीप्रकाशे प्रथमोद्योतः ॥ * ॥
अथ नाडीज्ञानसमय माह । प्रातः
कृतसमाचारः कृताचारपरिग्रहम्
। सुखासीनः सुखासीनं परीक्षार्थ
मुपाचरेत् ॥ प्रातरिति प्रायिकम् म
ध्याह्ने उष्णता इत्युक्तेः ॥ * ॥ नि
षिद्धकालमाह । सद्यः स्नातस्य भुक्त
स्य क्षुत्तृष्णातपसेविनः । व्यायाया
माक्रान्तदेहस्य सम्यङ् नाडीन वुध्य
ते ॥ तैलाभ्यङ्गेच सुप्तेचतथाचभो
जनान्तरे । तथा न ज्ञायते नाडी य
था दुर्गतरा नदी ॥ सुप्ते निद्राकाले
। भोजनान्तरे भोजनमध्ये भोजना
वसानमात्रेच । वातमूर्च्छादिषणि
करोरो नार्य्यविधिः ॥ * ॥ अथ वाता
दिस्वभावक्रममाह । आदौच वहते
वातो मध्येपित्तं तथैवच । अन्तेच

वहते श्लेष्मा नाडिकाचयलक्षणम् ॥ आदाविति। कफोणिपीडितदिती यत्वणे । ननु तर्जनीनिवेशस्थले स्थानभेदस्य कुत्राप्यवक्ष्यमाणत्वात्. ॥ * ॥ सुस्थताज्ञानार्थमाह । भक्तागमनप्राया स्वच्छा स्वास्थ्यमयी शिरा। ।प्रायेति बाहुल्येन। स्वच्छा परितो जाड्यरहिता । स्वास्थ्यमयी सुस्थताव्यञ्जिका च । तथा । प्रातःस्निग्धमयी नाडी मध्याह्ने चोष्णतान्विता। सायाह्ने धावमाना च चिराद्रोगविवर्जिता ॥ चिरादिति । अतीतानागतयोर्द्वयोरप्युक्तिः पथ्याशितानामेव ॥ * ॥ वातादीनां क्रमेण गतिमाह । वाताद् वक्रगता नाडी चपला पित्तवाहिनी । स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥ वक्रेति । वायोस्तिर्यग्गमनात् तिरोवहन्तीति । एवं तत्प्रकोपादिना वार्त्तादिगतिरपि ज्ञातव्या । चपलेति । वह्नेरूर्द्ध्वज्वलनादूर्द्ध्वचञ्चला । स्थिरेति जलस्य नीचगमनादनुल्वणा । मिश्रिते मिश्रितचिह्ना भवति । तेन द्विदोषजे उभयचिह्ना । सर्वजे सर्वचिह्नेति । चपलतास्थिरतयोः समयभेदेनाविरोधः ॥ * ॥ उक्तवक्रादिसामान्यस्य विशेषमाह । सर्पजलौकादि गतिं व

दन्ति विबुधाः प्रभञ्जनेन नाडीम् । पित्तेन च काकलावकभेकादि गतिं विदुः सुधियः ॥ राजहंसमयूराणां पारावतकपोतयोः । कुक्कुटादिगतिं धत्ते धमनी कफसंवृता ॥ आदिना वाते वृश्चिकगति दीलायिता । आदिशब्देन पित्ते कलिङ्गकलविङ्कादिगतिः । कफे गजवराङ्गनादिगतिः ॥ * ॥ द्वन्द्वजस्यापि क्रमेणैव भेदानाह । मुहुः सर्पगतिं नाडीं मुहुर्भेकगतिं तथा । वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥ भुजगादिगतिञ्चैव राजहंसगतिं धराम् । वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥ मण्डूकादिगतिं नाडीं मयूरादिगतिं तथा । पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥ * ॥ त्रिदोषजामप्याह । उरगादिलावकादिहंसादीनाञ्च बिभ्रती गमनम् । वातादीनाञ्च समं धमनीसन्न्य माधत्ते ॥ सममिति न्यूनाधिकता निरासः। क्रमगत्या तु नासाध्यत्वम् । तथा । स्थितिस्थिरि वार्त्ताकगमनं सन्निपाततः । कदाचिन्मन्दगा नाडी कदाचिच्छीघ्रगा भवेत् ॥ त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः । पित्तक्रमतया कृच्छ्रसाध्यत्वमसाध्यत्वञ्च ॥ * ॥ सा

मान्यतः सुखसाध्यत्वमाह। यदा
यं धातुमाप्नोति तदा नाडी तथा
गतिः। तथाहि सुखसाध्यत्वं नाडी
ज्ञानेन बुध्यते॥ अयमर्थः। ज्वरा
द्यादौ नाडी वातोल्वणा प्रथमं वा
तगत्यैव वहति ततो यथायथं पि
त्तादिगत्या नतु पित्तोल्वणात्वे वा
तादिगत्या तदा सुखसाध्यत्वं व्यति
रेकेण व्यतिरेकः। तदुक्तमन्यैः। ना
डी यथाकालगति त्रयाणां प्रकोपशा
न्त्यादिभिरेव भूयः॥ *॥ अथासाध्य
रूपमाह। मन्दं मन्दं शिथिलशिथिलं
व्याकुलं व्याकुलं वा हित्वा हित्वा वह
ति धमनी याति नाशं च सूक्ष्मा। नि
त्यं स्थानात् स्खलति पुनरप्यङ्गुलिं सं
स्पृशेद्वा भावैरेवं बहुविधविधैः सन्नि
पातादसाध्या॥ मन्दं मन्दं मुहुरनु
द्धटमप्रखरमिति यावत्। शिथिले
गति स्खलदिति रूपम्। व्याकुलेति च
स्तः दितस्ततः। वाशब्दः समुच्चये।
स्थित्वास्थित्वे त्याकृत्याचतरूपैव ग
तिः। नाशमदर्शनम्। गच्छतिकदा
चिन्नाडीस्पन्दोपि न सम्भाव्यत इत्य
र्थः। सूक्ष्मेति यदि लभ्यते तदा तथै
वानित्यं प्रायः स्थानमङ्गुष्ठमूलं तस्मा
त् स्खलति कदापि तच्च न स्पन्दत इ
त्यर्थः। तदुक्तम्। हन्ति च स्थानवि

च्युतेति किञ्चित् स्फुरतीति क्वा-
पि। पुनरपीति कियद्विलम्बेन अ
ङ्गुली मङ्गुलीमूलमेवमित्येवंरूपै
र्बहुभिर्भावैर्धर्मैः। उक्तञ्चान्यच।
महातापेपि शीतत्वं शीतत्वे तापि
ताशिरा। नानाविधगतिर्यस्य तस्य मृ
त्युर्न संशयः॥ महेत्याशयाकृष्टपि
त्तादिकृततापनिरासः। शीतत्वइ-
त्यत्रापि महेति सम्बध्यते। तथा।
त्रिदोषे स्पन्दते नाडी मृत्युकालेपि
निश्चला। निश्चला स्पन्दसामान्याभा
ववती। अतीसारादौ हस्तपादादि
स्वेदादिना स्पन्दोपलम्भात्॥ तथा
। पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्मा
णमाबिभ्रतीं स्वस्थानभ्रमणं मुहुर्वि
दधतीं चक्राधिरूढामिव। तीव्रत्वं
दधतीं कलापिगतिकां सूक्ष्मत्वमा
तन्वतीं नो साध्यां धमनीं वदन्ति
सुधियो नाडीगतिज्ञानिनः॥ अय
मर्थः। पूर्वमितिक्रमविपर्यये पित्ता
दिगतिमतीं वारंवारमेवंक्रमेण च
क्रोपरिभ्राम्यमाणामिव। तथातीव्र
त्वमतिशयवेगम् एवञ्च कदाचिन्म
यूरवद्गमनाम्। तयोस्तरोत्तरं कृ
शतरमापादयन्तीति विशिष्टो हेतुः
। तथा चान्यच। याच्युत्वाच स्थिरा
त्यन्तायाचेयं मांसवाहिनी। याच

सूक्ष्माच वक्राच तामसाध्यां वि
दुर्बुधाः ॥ अप्युच्चा सहजतोप्युच्च
तरा पृथगिवोन्नमावा। कदाचिदिति
स्थिरा प्रणिधानेनैव गम्यमानस्पन्दा
च। मांसवाहिनी मांसाहारइव ग
तिमती लगुडप्रायेति। तदुक्तम्।
मांसेन लगुडाकृतिः। मांसेनसमं
वहतीति नयुक्तं तद्रूपपरिज्ञापकप्र
कारस्यानुक्तत्वात्। इयमपिविशिष्ट
बोधनाय। याचसूक्ष्माचवक्राचेति
पृथगिववाक्यान्तरमिति ॥ * ॥ असा
ध्यत्वापवादमाह। भारप्रवाहमूर्च्छा
भयशोकप्रमुखकारणान्नाडी। सम्मू
र्च्छितापिगाढं पुनरपिसाजीवितं ध
त्ते ॥ चिरतरबहुलभारोद्वहनेनवा
विषवेगधारावाहिरुधिरदर्शनादिज
नितमूर्च्छयावा राक्षसादिसन्दर्शना
दिभयेनवा पुत्रादिविरहजनितशो
कातिरेकेणवा सम्मूर्च्छितापि अति
निस्पन्दापि। गाढमिति सुतरां का
श्यादियोगेपीत्यर्थः। पुनरितिसा
ध्यतां यातीत्यर्थः। भारानां रथ्या
दीनां प्रवाहइति न युक्तम् भयशो
कयोः पृथग्विधानात्। प्रमुखेत्यने
न हेत्वन्तराभिधानम्। तदुक्तम्।
पतितः सन्धितो भेदी नष्टशुक्रस्व
योनरः। शाम्यते विस्मय स्तस्य न कि

नाडी

ञ्चिन्मृत्युकारणम्॥ पतित उच्चादि
तः सन्धितोऽस्थ्यादिसन्धानेन संहि
तः। भेदी अतीसारवान्। नष्टशु
क्रो यक्ष्मादिनातिरमणेनवा शुक्रक्ष
यवान्। विस्मयोऽसाध्यत्वानुमानं
शाम्यति नावतरति। कारणं प्रागुक्तं
तत्तदेव। अन्यत्रापि। तथाभूताभि
षङ्गेपित्रिदोषवदुपस्थिता। समाङ्गा
वहते नाडी तथाच न क्रमंगता ॥
अपमृत्युर्नरोगाङ्गा नाडी तत्सन्नि
पातवत्। भूताभिषङ्गे तथा भूतसामा
न्याभिषङ्गेच देवजुष्टादौ नाडीस
न्निपातधर्मशालिनी उपस्थिता। आ
पाततएव भवति नतु तत् फलप्रदा।
भेदमाह। समेति। वातपित्तकफ
स्वभावक्रमवती तथाक्रमं व्यतिक्रमं
नगता। तस्मादेव अपमृत्युः अपग
तो मृत्यु र्यस्याः सा तथा। परमा
र्थतःसन्निपातवदपि सन्निपातजन्या
न स्यादिति। तदुक्तम्। स्वस्थानहो
ने शोकेच हिमाक्रान्तेच निर्गदाः।
भवन्ति निम्नगा नाड्यो न किञ्चित्
तत्र दूषण मिति ॥ स्वस्थानहीन
उच्चादितः पतने। अङ्गुष्ठमूलत स्त्व
रण इति तुल्यार्थः। निर्गदा इत्य
सङ्गतिः निर्गदा अपिनिम्नगा भव
न्ति। दूषण मसाध्यत्वभ्रमः। अन्ये

त्वाहुः। स्तोकं वातकफं जुष्टं पित्तं वहति दारुणम्। पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति॥ अयमर्थः। वातकफाभ्यां नाडी किञ्चिद्वहति दुष्टं क्षीणत्वाधिकत्वाभ्यामपि विशेषा दुल्बणं पित्तं विषमवेगेन वहति तदा तत् प्रतीकारार्थं भेषजं कुर्यात्। असाध्यतान स्यादिति यावत्। अत्र कश्चित्। स्वस्थानच्यवनं यावद्धमन्या नोपजायते। तावच्चिकित्सासत्त्वेपि नासाध्यत्वमिति स्थितिरिति॥ तच्चप्रायिकं बहुधाप्यभिचारदर्शनात्। इन्ति स्वस्थानविच्युतेत्यत्र चकारस्यायोगव्यवच्छेदकत्व मित्यर्थः॥ *॥ प्रसङ्गात् कालनिर्णयमाह। भूलता भुजगाकारा नाडी देहस्य सङ्क्रमात्। विशीर्णा क्षीणतां याति मासान्ते मरणं भवेत्॥ कदाचित् मही लतावत् कृशा तद्गतिवद्गतिमत्त्वेन वक्रगमनाच्च। कदाचित् सर्पवत् परिपुष्टा तद्गतिवदवस्तरवक्रगमनाच्चेति वैशिष्ट्येन मुख्यदशातो भेदः। इत्यञ्च कदाचिदलक्ष्यतामति कृशताञ्च यदागच्छति। देहेति देहक्रम मपेक्ष्य तेन देहोपि यदा स्थूलः शोथादिना कदाचिच्च कृशः स्या

त् तदा द्वितीये मासि म्रियत इति। तथा। क्षणाद् गच्छति वेगेन शान्ततां लभते क्षणात्। सप्ताहात् मरणं तस्य यद्यङ्गे शोथवर्जितः॥ क्षणादिति द्रुतं न तु कदाचिदिति। शान्ततामनुपलभ्यमानत्वम्। शोथेति तन्मात्रसम्बन्धे तु ना चिरं मरणाय चिरमेवेत्यर्थः। तथा। हिमवद् विशदा नाडी ज्वरदाहेन तापिनाम्। त्रिदोषस्पर्शभजतां तदा मृत्युर्दिनत्रयात्॥ यदा निरन्तरं ज्वरदाहतापौ शैत्यञ्च नाड्याः। त्रिदोषेति सन्निपातलक्षणसत्त्व एव भवति। तदा। निरीक्ष्याद्दक्षिणे पादे तदा चैषा विशेषतः। मुखे नाडी वहेन्नित्यं ततस्तु दिनतुर्यकम्॥ गतिन्तु भ्रमरस्येव वहेदेकदिने न तु। कन्देन स्पन्दते नित्यं पुनर्लगति चाङ्गुलौ॥ मध्ये द्वादशयामानां मृत्युर्भवति निश्चितम्॥ दक्षिण इति पुंसः। स्त्रियास्तु वाम एव। तथेति कस्यैव विशेषतो विशेषज्ञानार्थम्। यदि चोभयनाड्यपि मुखे पुरोभागे नित्यं सदा वहति तदा दिनचतुष्टयं प्राप्य भ्रमरस्य परिभ्रमणरूपं गमनमिव मुख एव यदि वहति तदैकदिनेन। कन्दे मूले स्पन्दनस्थाने कदाचिन्

नाडी

न स्पन्दते स्वल्पं स्पन्दत इति सम्भा
व्यते । नित्यं प्रायः पुनश्चाङ्गुष्ठे तन्मू
ले कदापि लगति तदा तस्मादार
भ्य द्वादशप्रहरमध्यएव मृत्युरि-
ति । तथा । स्थित्वा नाडी मुखे य
स्य विद्युद्द्योतीति दृश्यते । दिनैकं
जीवितं तस्य द्वितीये म्रियते ध्रुवम्
॥ स्थित्वेत्या वृत्त्या स्थित्वा स्थित्वा
विद्युत् स्फुरणमिव लक्ष्यते द्वितीय
इत्यष्टप्रहरादूर्द्ध मित्यर्थः । तथा
। स्वस्थानविच्युता नाडी यदा वह
ति वा नवा । ज्वालाच हृदये तीव्रा
तदा ज्वालावधिस्थितिः ॥ न वेति
स्थित्वा स्थित्वे त्यर्थः । इत्यन्य यद
साध्यलक्षण मुक्त मवस्थाना दयवा
दविरहेसति तस्यार्थप्रवेशो यथा
यथ मार्यमतिभिरवगन्तव्य इतिनेह
प्रतन्यते ग्रन्थगौरवभयात् । मन्दं
मन्दमिति अनेनच भूलतागमना
कारेति विरुध्यते तस्य तावत्कालि
कमरणविषयत्वात् । सर्व मिदं सर्व
रोग एव वेदितव्यं ज्वरमात्रेतु भ्रम
एवेति ॥ * ॥ इतिनाडीप्रकाशे द्वि
तीयोद्योतः ॥ * ॥ अथरोगेषु नि
रूपणीयेषु प्रधानतया प्रथमं ज्वर
निरूपण माह । तत्र ज्वरपूर्वरूपे ।
अङ्गग्रहेण नाडीनां भवन्ति मन्थराः

नाडी

सदाः । सर्वः प्रकृततायान्ति ज्वरदाहा
भिभूतये ॥ सान्निपातिकरूपेण भ
वन्ति सर्ववेदनाः ॥ * ॥ ज्वररूपमा
ह । ज्वरकोपेच धमनी सोष्णा वे
गवती भवेत् । उष्णापि त्वाहते ना
स्ति ज्वरो नास्त्युष्मणा विना ॥ उष्णा
वेगधरा नाडी ज्वरकोपे प्रजायते ॥
अन्यत्रच । ज्वरेच वक्राधावन्तीत
थाच मरुतः स्रवे । रमणान्ते निशि
प्रातस्तथा दीपशिखा यथा ॥ * ॥ त
त्रापि विशेषमाह । सौम्यासूच्यास्थि
रामन्दा नाडी सहजवातजा । स्थू
लाच कठिनाशीघ्रा स्पन्दते तीव्रमा
रुते ॥ द्रुताच तरला शीघ्रा दीर्घा
पित्तज्वरे भवेत् । शीघ्र माहननं ना
ड्याः काठिन्याच्च चल तथा ॥ मला
जीर्णे नातितरां स्पन्दनञ्च प्रकीर्त्ति
तम् । नाडीतन्तुसमामन्दा शीतला
श्लेष्मदोपजा ॥ * ॥ द्वन्द्वजमाह ।
चञ्चला तरला स्थूला कठिना वात
पित्तजा । ईषच्च दृश्यते तूष्णामन्दा
स्याच्छ्लेष्मवातजा ॥ निरन्तरं खर
रूक्षं मन्दश्लेष्मातिवातलम् । रूक्ष
वातभवे तस्य नाडी स्यात् पित्तस
न्निभा ॥ सूक्ष्मा शीता स्थिरा नाडी
पित्तश्लेष्मसमुद्भवा ॥ प्रसङ्गादाह ।
मध्येकरेवहेन्नाडी यदि सन्तापिता

ध्रुवम् । तदानूनं मनुष्यस्य रुधिरापूरिता मता: ॥ * ॥ आगन्तुकरूपभेदमाह । भूतज्वरे सेकद्रवातिवेगा धावन्ति नाड्योहि यथाब्धिगामा: । तथा । एकाहिकेन क्वचन प्रदूरेच यान्तिगामा विषमज्वरेण । द्वितीयकेवापितृतीयतुर्ये गच्छन्तितप्ता भ्रमिवत् क्रमेण ॥ * ॥ अन्यत्रापि । उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते । उद्वेगक्रोधकामेषु भयचिन्ता श्रमेषु च ॥ भवेत् क्षीणगति नाडी ज्ञातव्या वैद्यसत्तमै: ॥ प्रसङ्गादाह । व्यायामे भ्रमणे चैवचिन्तायां श्रमशोकत: । नानाप्रभावगमना शिरा गच्छति विज्वरे ॥ * ॥ अजीर्णरूपमाह । अजीर्णेतु भवेन्नाडी कठिना परितोजडा । प्रसन्नाचद्रुताशुद्धात्वरिताचप्रवर्त्तते ॥ * ॥ तद्विशेषमाह । पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जडा । असृक्पूर्णाभवेत् कोष्णागुर्वीसामा गरीयसी ॥ * ॥ प्रसङ्गाद् भक्षणलक्षणमाह । पुष्टिस्तैलगुडाहारे मांसे चलगुडाकृति: । क्षीरे चस्तिमिताबेगा मधुरे भेकवद्गति: ॥ रम्भागुडवटाहारे रूक्षशुष्कादिभोजने । वातपित्तार्त्तिरूपेण नाडीवहति निष्क्रमम् ॥ * ॥ अथरस

ज्ञानम् । मधुरे बर्हिगमनातिक्तेस्थाद्भूलता गति: । अम्ले कोष्णा प्लवगति: कटुके भृङ्गसन्निभा ॥ कषाये कठिनाम्लाबालवणे सरला द्रुता । एवं द्वित्रिचतुर्योगे नाना धर्मवतीधरा ॥ तथा । द्रवेऽतिकठिना नाडी कोमला कठिनाशने । द्रवद्रव्यस्यकाठिन्ये कोमला कठिनापिच ॥ क्षौद्रे पृथग्ग्रन्थिलेवपिष्टे पुष्टेव जायते ॥ * ॥ अग्निमान्द्यधातुक्षयलक्षण माह । मन्दाग्ने: क्षीणधातोश्च नाडी मन्दतरा भवेत् । तदुक्तम् । क्षीणधातोश्च मन्दाग्नौ नाडी क्षीणतमा ध्रुवम् । तथा । मन्देऽग्नौ क्षीणतां याति नाडी हंसाकृतिस्तथेति । अन्यत्तु । आमाश्रमे पुष्टिविवर्द्धनेन भवन्ति नाड्योऽग्रभुजाभिवृत्ता: । आहारमान्द्याद्‌पवासतो वा तथैव नाड्यो भुजगाग्रमाना: ॥ * ॥ प्रसङ्गाद्दीप्ताग्निज्ञानमाह । लघ्वी भवति दीप्ताग्ने स्तथा वेगवती मता ॥ * ॥ प्रसङ्गाद् ग्रहणी मप्याह । पादेच हंसगमना करे मण्डूकसंप्लवा । तस्याग्ने र्मन्दता देहे त्वथवा ग्रहणीगदे ॥ तथा । भेदेन शान्ता ग्रहणीगदेनानिर्वीर्यरूपा त्वतिसारभेदे । विलम्बिकायां प्लवगा कदाचि दामा

तिसारेपृथुता भवेच ॥ * ॥ अथ
विसूचिकाज्ञानम् । निरोधे मूत्र
कृतोर्विड्ग्रहे स्तिमिताश्रिता: । वि
सूचिकाभिभूतेच भवन्ति भेकवत्
क्रमा: ॥ * ॥ प्रसङ्गा दानाह्मूत्रकृ
च्छ्रज्ञान माह । आनाहे मूत्रकृच्छ्रे
च भवेन्नाडी गरिष्ठता ॥ * ॥ शूल
ज्ञान माह । वातेन शूलेन मरुत्
प्लवेन सदैववक्रा हि शिरावहन्ती ।
ज्वालामयी पित्तविचेष्टितेन साध्या
न शूलेनच पुष्टरूपा ॥ * ॥ अथप्र
मेहज्ञानम् ॥ प्रमेहे ग्रन्थिरूपासा
सुतप्ता ह्यामदूषणे ॥ * ॥ विषवि
ष्टम्भगुल्मज्ञानमाह । उत्पित्सु
रूपा विषरिष्टिकायांविष्टम्भगुल्मेन
च वक्ररूपा । अप्यूर्ध्ववातेन अध:-
स्फुरन्ती उत्तानभेदिन्यसमाप्तका
ले ॥ * ॥ गुल्मे विशेष माह कश्चि
त् । गुल्मेन कम्पाऽथ पराक्रमेण
पारावतस्येव गतिङ्करोति ॥ * ॥
अथ भगन्दरज्ञानम् । व्रणार्थं कठि
ने देहे प्रयाति पैत्तिकं क्रमम् । भ
गन्दरानुरूपेण नाडीव्रणनिवेदने ॥
प्रयाति वातिकं रूपं नाडी पावक-
रूपिणी ॥ * ॥ अथ वान्त्यादिज्ञान
म् । वान्तस्य मल्लाभिहतस्य जन्तो
र्वेगावरोधाकुलितस्य भूय: । गतिं

विधत्ते धमनी गजेन्द्रमरालमाने
व कफोल्बणेन ॥ * ॥ स्त्रीरोगादि
क मपि रक्तादिज्ञानक्रमेण ज्ञात-
व्यम् ॥ क्वचित् प्रकरणोल्लेखात् क्व
चिदौचित्यमाश्रत: । क्वचिद् देशा
त् क्वचित् कालात् सङ्कीर्णगदनि
श्चय: ॥ नाडीपरिचयज्ञानं प्रायशो
नैव दृश्यते । तेन धार्ष्ट्यान् मयो
क्तं यत् तत् समाधेय मुत्तमै: ॥ *
॥ इतिशङ्करसेनकविराजकृतौ नाडी
प्रकाशे तृतीयोद्योत: ॥ * ॥ * ॥ * ॥
अथ भावमिश्रोक्ता नाडी परीक्षा
। पुंसो दक्षिणहस्तस्य स्त्रियो वामक
रस्यतु । अङ्गुष्ठमूलगां नाडीं परीक्षे
त भिषग्वर: ॥ अङ्गुलीभि स्तिसृभि
र्नाडी मवहित: स्पृशेत् । तच्चेष्टया
सुखं दु:खं जानीयात् कुशलोऽखि
लम् ॥ सद्य: स्नातस्य सुप्तस्य क्षुत्तृ
ष्णातपशीलिन: । व्यायामश्रान्तदे
हस्य सम्यङ् नाडी न बुध्यते ॥ वा
ते ऽधिके भवेन् नाडी प्रव्यक्ता
तर्जनी तले । पित्ते व्यक्ता मध्यमा
यां तृतीयाङ्गुलिगा कफे ॥ तर्जनी
मध्यमामध्ये वातपित्ते ऽधिके स्फुटा
। अनामिकायां तर्जन्यां व्यक्ता वा
तकफे भवेत् ॥ मध्यमानामिका म
ध्ये स्फुटा पित्तकफे ऽधिके । अङ्गुलि

पितयेपि स्यात् प्रव्यक्ता सन्निपाति
नः ॥ वाताद्वक्रगति नाडी पित्ता
दुत्प्लुत्यगामिनी । कफात् मन्दग
तिर्ज्ञेया सन्निपाताद्दतिद्रुता ॥ वक्र
मुत्प्लुत्य चलति धमनी वातपित्त
तः । वहेद्वक्रञ्च मन्दञ्च वातश्लेष्मा
धिकेत्वतः ॥ उत्प्लुत्य मन्दं चलति
नाडी पित्तकफेऽधिके । कामात्
क्रोधाद्वेगवहा क्षीणा चिन्ताभयप्लु
ता ॥ स्थित्वास्थित्वाचलेद्या सा स्मृ
न्ति स्थानच्युता तथा । अतिक्षीणा
च शीताच प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती
भवेत् । मन्दाग्नेः क्षीणधातोश्च सै
व मन्दतरा मता ॥ चपला क्षुधित
स्य स्यात् तृप्तस्य भवति स्थिरा । सु
खिनोऽपि स्थिरा ज्ञेया तथा बलवती
मता ॥ इति ॥ * ॥ * ॥ * ॥ प्रस
ङ्गाद्योगिना मुपकाराय इडादिना
डीनां निरूपणम् । दक्षिणांशः स्मृतः
सूर्यो वामभागो निशाकरः । नाडी
र्दश विद् स्तासु मुख्यास्तिस्रः प्रकी
र्त्तिताः ॥ इडा वामेतनोर्मध्ये सुषु
म्णा पिङ्गला परे । मध्या तास्वपि
नाडी स्यादग्नीषोमस्वरूपिणी ॥
अथेडा वाममुष्काधः स्याधनुर्वक्रा वा
मनासापर्यन्तंगता । एवं पिङ्गला द
क्षिणाण्डाधः स्या धनुर्वक्रा दक्षिण
नासान्तंगता । पृष्ठवंशान्तर्गता सुषु
म्णे त्यर्थः । इतिसारदातिलकम् ॥
* ॥ नाडीनां संवहोदेवि कन्दयो-
निः खगाण्डवत् । तत्र नाड्यः समु
त्पन्नाः सहस्राणां द्विसप्ततिः ॥ कन्द
स्य पद्मस्य योनि रुत्पत्ति स्थानं शा
लूकमितियावत् ॥ प्रधानाः प्राणवा
हिन्यो भूयस्तत्र दश स्मृताः । इडा
चपिङ्गला चैव सुषुम्णा च तृतीयि
का ॥ गान्धारी हस्तिजिह्वाच पूषा
चैवयशस्विनी । अलम्बुषाकुहूश्चैव
शङ्खिनीच दशस्मृताः ॥ एवं नाडी
मयं चक्रं विज्ञेयं शक्तिचक्रके । इडा
याः पिङ्गलायाश्च मध्ये यासा सुषुम्
णिका ॥ इयञ्च त्रिगुणा ज्ञेया ब्रह्मवि
ष्णुशिवात्मिका । रजोगुणाच वज्रा
ख्या चित्रिणी सत्त्वसंयुता ॥ तमोगुणा
ब्रह्मनाडी कार्यभेदक्रमेणचेति नि
रुत्तरतन्त्रे प्रथमः पटलः ॥ * ॥ इ
डापिङ्गलयोः स्वरूपंयथा । इडाच
शङ्खचन्द्राभा तस्या वामे व्यवस्थि
ता । पिङ्गला सितरक्ताभा दक्षिणं
पार्श्वमाश्रितेति योगार्णवः ॥ इडा
यां संश्रितश्चन्द्रः पिङ्गलायां दिवाक
र इति तन्त्रान्तरम् ॥ गुच्छस्यकाण्डे
। नाले ॥ व्रणान्तरे ॥ गण्डदूर्वायाम्

॥ कुष्ठनचर्य्यायाम् ॥ षट्क्षणकाले। घटिकायाम् । षष्टिपलात्मककाले ॥ तृणान्तरे ॥ वेष्टितत्वक्स्याधारभेदे ॥ नालयति नलत्यनेनवा । नलगन्धे । पचाद्यच् । हलश्चेति घञ् वा । डलयोरेकत्वम् । गौरादित्वात् ङीप् ॥ यद्वा । नाडयति नाड्यते वा । नडभ्रंशे । चुरादिः । अच्‌टः । ङीष् ॥

नाडीकः । पुं । पट्टशाके । पटुआ इति भाषा ॥ नाडीकोरक्तपित्तघ्नो विष्टम्भी वातकोपन इतिभावप्रकाशः ॥

नाडीकलापकः । पुं । सर्पाक्ष्याम् ॥

नाडीकेलः । पुं । नारिकेले ॥ इतिशब्दरत्नावली ॥

नाडीचः । पुं । शाकविशेषे । केचुके । विश्वरोचने ॥ नाडीचशाकं द्विविधं तिक्तं मधुरमेवच । रक्तपित्तहरंतिक्तं कृमिकुष्ठविनाशनम् ॥ मधुरंपिच्छिलंशीतंविष्टम्भिकफवातकृत् ॥ इतिराजवल्लभः ॥

नाडीचक्रम् । न । नाभिमण्डलस्थेचक्रविशेषे ॥ नाभिमण्डलमासाद्यकुक्कुटाण्डमिवस्थितम् । नाडीचक्रमितिप्राहुस्तस्मान्नाड्यः समुद्गताः ॥

नाडीचरणः । पुं । खगे । पक्षिणि ॥

नाडीजङ्घः । पुं । काके ॥ ब्रह्मणोदयितेवकविशेषे ॥ मुनिविशेषे ॥

नाडीतरङ्गः । पुं । काकोले ॥ हिण्डके ॥ रतहिण्डके ॥ इतिमेदिनी ॥

नाडीतिक्तः । पुं । नेपालनिम्बे ॥

नाडीदेहः । पुं । भृङ्गिनाम्नि शिवस्य द्वारपाले ॥

नाडीनक्षत्रम् । न । जन्मनक्षत्रे ॥

नाडीविग्रहः । पुं । भृङ्गिणि । शिवद्वारपालविशेषे ॥

नाडीव्रणः । पुं । सद्रागलद्व्रणे । नाडीस्रवइति नह्नर इतिचभाषा ॥ नाड्यांव्रणः ॥ विडङ्गत्रिफलाकृष्णाचूर्णंलीढंसमाक्षिकम् । हन्तिकुष्ठंकृमीन्मेहनाडीव्रणभगन्दरान् ॥ इतिगरुडपुराणम् ॥

नाडीशाकः । पुं । नाडीके ॥

नाडीस्नेहः । पुं । भृङ्गिणि । शिवद्वास्थे ॥

नाडीहिङ्गु । न । हिङ्गुप्रभेदे । पक्षाशाखे । रामठ्याम् ॥

नाणकः । त्रि । प्रशस्ते ॥ अणकःकुत्सितः ॥ तद्विरुद्धः ॥ न । मुद्राचिह्नितनिष्कादौ ॥ यथा । तुलाशासनमानानां कूटकृन्नाणकस्यच । एभिश्चव्यवहर्त्तायः सदाप्योदण्डमुत्तममिति याज्ञवल्क्यः ॥

नातिमानिता । स्त्री । अतिमानित्वाभावे । पूज्येषु नम्रतायाम् ॥

नाथः। पुं। कुलगुरौ ॥ कुलपरम्परागतस्वामिनि ॥ नासारज्जौ ॥ ऐश्वर्य्ययुक्ते। अधिपे। आर्य्ये। स्वामिनि ॥ त्रि। प्रार्थनीये ॥

नाथमानः। त्रि। उपतप्यमाने॥ याचमाने ॥

नाथवान्। त्रि। पराधीने। परतन्त्रे ॥ नाथोऽस्यास्ति। तदस्यास्तीति मतुप् ॥

नाथहरिः। पुं। पशौ ॥ नाथं हरतीति विग्रहे हरतेर्दृतिनाथयोः पशाविति नाथकर्म्मोपपदाद्धरते रिन् प्रत्ययः ॥

नादः। पुं। ध्वनौ। शब्दे॥ वर्णे ॥ अर्द्धेन्दौ। अर्द्धमात्रायाम् ॥ णद०। घञ् ॥ ब्रह्मस्वरूपे घोषविशेषे॥ यथा। सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादस्तस्माद्विन्दुसमुद्भवः ॥ नादो विन्दुश्च बीजञ्च सएव त्रिविधो मतः। भिद्यमानात् पराद्विन्दोरुभयात्मा रवो भवत्॥ सरवः श्रुतिसम्पन्नः शब्दो ब्रह्माभवत्परमिति ॥ सकलात् मूर्त्तात्। नादो घोषः। विन्दुः प्रणवः सच वाजञ्च सर्व्ववर्णप्रभवत्वात् ॥ * ॥ नाभेरूर्द्ध्वं हृदिस्थानान्मारुतः प्राणसंज्ञकः। नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः ॥ अपि च। आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन्। मुखेऽभिव्यक्तिमायाति यः स नाद इतीरितः ॥ स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः। आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ॥ तृतीयोऽपि च वंशादिभव इत्थं त्रिधा मतः। यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः ॥ तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः। वह्निमारुतसंयोगान्नादः समुपजायते ॥ न नादेन विना गीतं न नादेन विना स्वरः। न नादेन विना रागस्तस्मान्नादात्मकं जगत्॥ न नादेन विना ज्ञानं न नादेन विना शिवः ॥ नादरूपं परं ज्योतिर्नादरूपी परं हरिः ॥ इति सङ्गीतदामोदरः ॥

नादेयम्। न। सैन्धवलवणे॥ सौवीराञ्जने ॥ नदीनदसम्बन्धिजले ॥ शेषिकेष्वर्थेषु नद्यादिभ्यो ढक् ॥ नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्। नादेयमुदकं रूक्षं वातलं लघु दीपनम् ॥ अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥ नद्यः शीघ्रवहा लघ्व्यः सर्व्वा याश्चामलोदकाः। गुर्व्यः शैवलसञ्छन्ना मन्दगाः कलुषाश्च याः ॥ नदीसरस्तडागस्थकूपप्रस्र

वर्णादिजे । उदके देशभेदेन गुणान्दोषांश्चलक्षयेत् ॥ पुं । काशतृणे ॥ वानीरवृक्षे ॥ त्रि । नदीनदसम्बन्धिजलादौ ॥ नदीभवे ॥ अग्राह्ये ॥ अवश्यदेये ॥ यथा । नादेयंनादेयं शरदि वसन्तेच नाऽऽदेयमिति । अस्यार्थः । नदीभवं नादेयं जलं शरदि न अदेयम् । अपितुदेयं दातव्यमिति । वसन्तेच पुनरुक्तदेव नादेयं नग्राह्यमिति ॥

नादेयिका । स्त्री । नादेय्याम् ॥ नादेय्येव । स्वार्थेकः । ह्रस्वः ॥

नादेयी । स्त्री । नागरङ्गे ॥ जयायाम् । पताकाविशेषे । वैजयन्तिकायाम् ॥ अम्बुवेतसे ॥ भूमिजंबाम् ॥ जवायाम् ॥ व्यङ्गुष्ठे ॥ अग्निमन्थे ॥ काकजंबाम् ॥ नद्यांभवा । नद्यादिभ्यो ढक् । टिड्ढेतिङीप् ॥

नाना । अ । विनार्थे ॥ नाना नारीं निष्फला लोकयात्रेतियथा ॥ अनेकार्थे ॥ यथा । नानाविधं देहभृतां समाजम् ॥ उभयार्थे ॥ नेति नाना । विनञ्भ्यांनानाञौनसहेति नञो- नाञ्प्रत्ययः ॥

नानाकन्दः । पुं । पिण्डालौ ॥ बहुविधमूले ॥

नानात्त्वम् । न । अनेकभावे । द्वैतदर्शने ॥ यथा । जीवात्मनोरनन्यत्त्वमभेदेन प्रशस्यते । नानात्त्वं निन्द्यतेयच्चतदेवंहि समञ्जसमिति गौडपादाः ॥ द्वैतंहि सर्वं प्राणिसाधारणं स्वाभाविकं शास्त्रवहिष्कृतैःकुतार्किकैर्विरचितं नानात्त्वंदर्शनं नतुतद्द्वितीयमन्त्रीत्यादिश्रुत्यानिन्द्यते यावेदवाह्याः स्मृतय इत्यादिस्मृत्याच ॥

नानाध्वनिः । पुं । वीणावेणुकांस्यादिशब्देषु ॥ इति हारावली ॥

नानाननः । त्रि । अनेकविधास्ये ॥ नानाप्रकाराणि आननानि यस्य ॥

नानारूपः । त्रि । बहुविधे । विविधे । अनेकप्रकारे ॥ नाना रूपं यस्य ॥

नानार्थः । त्रि । अनेकार्थे ॥ भिन्नप्रयोजने ॥

नानावर्णः । पुं । बहुविधशुक्लादिवर्णे । चित्रे । कर्वुरे ॥ त्रि । तद्वति ॥

नानावादानुरोधः । त्रि । भगवति परमेश्वरे ॥ अस्ति नास्ति सर्वज्ञः अल्पज्ञः बद्धः मुक्तः एकः अनेक इत्यादीन् नानावादान् अनुरुणद्धि माययानुवर्त्ततेय इतिव्याख्यानात् ॥

नानाविधः । त्रि । अनेकप्रकारे ॥ नानाविधा यस्यसः ॥

नानुष्ठेयः । त्रि । अकर्त्तव्ये । अननुष्ठेये ॥

नान्तरीयकम् । त्रि । अवश्यम्भाविनि ॥

यथा। प्रतिबन्धकाभावे नान्तरीयकी कार्य्योत्पत्तिः। अवश्यम्भाविनीत्यर्थः॥

नान्तम्। न। क्लीबे॥ नमति अनेनवा। णम०। भ्रसुञ्जिगमिनमीतिष्ट्रन् इट्टिश्च॥

नान्दी। स्त्री। समृद्धौ॥ नाटकादौमङ्गलश्लोके। मङ्गलपाठे॥ यथोक्तंभरतादिभिः। आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रवर्त्तते। देवद्विजनृपादीनां तस्मान्नान्दीति सास्मृता॥*॥ नाटकेविघ्नविघातायादौनान्दीकार्य्या। यदाहभरतः। यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके। तथाप्यवश्यं कर्त्तव्यानान्दीविघ्नप्रशान्तये॥ देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दन्तिदेवतायस्मात्तस्मान्नान्दीप्रकीर्त्तिता॥ अन्यच्च। देवद्विजनृपादीना माशीर्वन्दनपूर्व्विका। नान्दी कार्य्या वुधैर्यत्नान्नमस्कारेणसंयुता॥ गङ्गानागपतिःसोमः सुधानन्दाजयाशिषः। एभिर्नामपदैः कार्य्या नान्दी धाराभिरङ्किता॥ प्रशस्तपदविन्यासा चन्द्रसङ्कीर्त्तनान्विता। आशीर्वादपरानान्दीयोज्येयंमङ्गलात्मिका॥ काचिद्द्वशपदानान्दी काचिदष्टपदा तथा। सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः॥ इतिमालतीमाधवटीका॥

नान्दीकः। पुं। तोरणस्तम्भे॥

नान्दीकरः। त्रि। नान्दीवादिनि। नान्दीपाठकारिणि॥ नान्दीमाशीर्नमस्क्रियादिरूपं मङ्गलं करोति वदति। दिवाविभेतिटः॥ भेरी प्राया नान्दीतद्वादनशीले इति केचित्॥ अपरदिक्लौवादनार्थां विख्याहुः॥

नान्दीपटः। पुं। वीनाहे। कूपादीनां मुखवन्धने॥ इतिहेमचन्द्रः॥

नान्दीमुखः। पुं। कूपादिमुखवन्धने। नान्दीपटे॥ वृद्धिश्राद्धभुजि पितृगणे॥ यथा। नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृहीति विष्णुपुराणम्। सत्यगणः पित्रादिचिकम् मातामहादित्रिकञ्चेति॥ न। वृद्धिश्राद्धे॥

नान्दीमुखी। स्त्री। सामगेतरवृद्धिश्राद्धभुक्मातृगणे॥ शर्करीछन्दोभेदे॥ स्वरभिद्वियदिनौतौ चनान्दीमुखी गौ। यथा। सरसखगकुलालापनान्दीमुखीयं लहरिभुजलताचारुफेनस्मितश्रीः। मुरहरकलयासत्तिमासाद्यकिन्त प्रमुदितहृदया भानुजान्नृत्यतीव॥

नान्दीवादी। त्रि। नान्दीश्लोकपाठकारिणि। नान्दीकरे॥ नान्दीवदनशी

सः । सुपीतिवर्द्धगिनिः ॥ नाटकादैा मङ्गलार्थं भेर्य्यादिवादके ॥

नापितः । पुं । नाई इतिख्याते वर्णसङ्करजातिविशेषे । अन्तावसायिनि । क्षुरिणि । पट्टिकायां कुवेरिणी जाते । इति प० प० ॥ शूद्रायां क्षत्रिया ज्जातोयमिति विवादार्णवसेतुः ॥

नापितशालिका । स्त्री । नापितशालायाम् । खरकुट्याम् ॥

नाभकः । पुं । वनतिक्ते ॥

नाभागः । पुं । नभगात्मजे ॥ नभगस्यापत्यम् । अण् ॥

नाभिः । पुं । मुख्यनृपे । अग्नीधापत्ये ॥ चक्रमध्ये । रथचक्रस्यपिण्ड्याम् ॥ क्षत्रिये ॥ स्त्री । मृगमदे ॥ पुं । स्त्री । प्राण्यङ्गविशेषे । उदरावर्त्ते । तुन्दकूप्याम् ॥ संडी इति भाषा ॥ त्रि । प्रधाने । मुखे ॥ नह्यन्ते अराअत्र । वह० । नह्योभश्चेति इञ् ॥ नभ्यते अत्रेण नभ्यते ऽनया ऽस्यां वा । णभ० । इञजादिभ्यः ॥ यद्वानाभयति । स्वार्थण्यन्तादृच्छ्रः ॥

नाभिकण्टकः । पुं । गर्भण्डे ॥ आवर्त्ते ॥ इतिशब्दरत्नावली ॥

नाभिका । स्त्री । कटभीवृक्षे ॥

नाभिगुडकः । पुं । गर्भण्डे । गोण्डे । फूलीसंडी इतिटूंडीइतिचभाषा ॥

नाभिगोलकः । पुं । स्फीतनाभौ । नाभिकण्टके । गर्भण्डे ॥ नाभेर्गोलकः ॥

नाभिजः । पुं । ब्रह्मणि । कमलासने ॥

नाभिजन्मा । पुं । ब्रह्मणि । स्रष्टरि । विधातरि ॥ नाभौजन्मास्य ॥

नाभिनाला । स्त्री । अमरायाम् । नाभिसम्बन्धिन्यां नाड्याम् ॥

नाभिभूः । पुं । अब्जयोनौ । ब्रह्मणि ॥

नाभिवर्षः । पुं । भारतवर्षे ॥

नाभी । स्त्री । नाभौ ॥ मृगमदे ॥ कृदिकारादितिङीष् ॥

नाभीलम् । न । नार्याः वङ्क्षणे ॥ नाभिगाम्भीर्ये ॥ कृच्छ्रे ॥ गर्भण्डे । नाभिगोलके ॥

नाभ्यम् । त्रि । नाभिस्थिते ॥ नाभये स्थितम् । शरीरावयवाद्यत् । नाभिनभञ्चेतिनाभेर्नभादेशस्तु न भवति । तस्यगवादियतासन्नियोगशिष्टत्वेन रथनाभावेवप्रवृत्तेः ॥ नाभिसम्बन्धिनि ॥

नाम । अ । कोपे ॥ अभ्युपगमे ॥ विस्मये ॥ स्मरणे ॥ सम्भाव्ये । सम्भावनायाम् ॥ कुत्सायाम् ॥ प्राकाश्ये ॥ विकल्पे ॥ अलीके ॥ इच्छेतदर्थे ॥ नामयति नाम्यते वा । णमप्रह्वत्वे । अन्येभ्योपीतिडः ॥

नामकरणम् । न । संस्कारविशेषे ॥

नाम्नःकरणम् । तच्चनाम शर्म्मवर्म्माद्युपपदान्तत्वेनकर्त्तव्यम् । यथा । ततस्तुनामकुर्वीतपितैवदशमेऽहनि । देवपूर्वं नराख्यंहिशर्म्मवर्म्मादिसंयुतम् ॥ शर्म्मेतिब्राह्मणस्योक्तं वर्म्मेतिक्षत्रसंश्रयम् । गुप्तदासात्मकंनामप्रशस्तंवैश्यशूद्रयोः ॥ नार्थहीनंनचाशस्तंनापशब्दयुतंतथा । नामाङ्गल्यंजुगुप्स्यंवानामकुर्य्यात्समाक्षरम् ॥ नातिदीर्घंनातिह्रस्वं नातिगुर्वक्षरान्वितम् । सुखोच्चार्य्याक्षरंनामकुर्य्यात्प्रवणाक्षरम् ॥ प्रवणाक्षरंलघूत्तराक्षरम् । इतिविष्णुपुराणम् ॥ *॥ अयुग्मकदान्तंतथास्त्रीणामितिगोभिलः । अयुग्मक मयुगक्षरम् । दान्तं दकारान्तम् । यथा । यशोदाधनदेत्यादि ॥ *॥ अत्रमहाभाष्यंयथा । दशम्यां पुत्रस्य । याज्ञिकाःपठन्ति- दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् तद्धिप्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरंवा नाम कृतं कुर्य्यान्न तद्धितमिति । नचान्तरेण व्याकरणं कृतस्तद्धिता वाशक्याविज्ञातुमिति ॥ दशम्या उत्तरइतिपञ्चमीतियोगविभागात् समासः । ततःकालशब्देनबहुव्रीहिः । क्रियाविशेषणंचैतत् । दशदिनान्याशौचं भवतीतिदशम्युत्तरकालमित्युक्तम् । यदपिगृह्यकाराः पठन्ति दशम्यां पुत्रस्येति तैरपि दशम्यामितिसामीपिकमधिकरणं व्याख्येयम् । घोषवन्तो ये वर्णाःशिक्षायांप्रदर्शितास्तदादि । अन्तरन्तस्थमिति । मध्ये यरलवा यस्यतदित्यर्थः । त्रिपुरुषानूकमिति । नामकरणे योधिकारीपितातस्य ये त्रयःपुरुषास्ताननुकायत्यभिधत्तइतित्रिपुरुषानूकम् अन्येपामपिदृश्यतइतिदीर्घइतिकैयटः ॥ तत्र श्रीपूर्वकत्वंयथा । देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् । सिद्धंसिद्धाधिकारांश्चश्रीपूर्वंसमुदीरयेत् ॥ स्वर्गकामित्यादिनासिद्धोऽधिकारोयेषां नराणामित्यनेनजीवतां श्रीशब्दादित्वंनाम्नोन मृतानांतथेतिशिष्टाचारः ॥

नामद्वादशी । स्त्री । व्रतविशेषे ॥

नामधेयम् । न । नामनि ॥ नामैव । भागरूपनामभ्योधेयः इतिस्वार्थेधेयः ॥ नामधेयानाञ्च विधेयार्थपरिच्छेदकतयार्थवत्त्वम् । तथाहि । उद्भिदायजेतपशुकामइत्यत्रोद्भिच्छब्दोयागनामधेयम् । तेनचविधेयार्थपरिच्छेदःक्रियते ॥

नाम। न। आकाशादिदेशान्ते संज्ञाविशेषे। सत्त्वप्रधाने नामधेये। वाचकशब्दे। अभ्यायाम्। आह्वायाम्। पर्य्याये॥ नम्यतेऽभिधीयतेऽर्थोऽनेन। णम०। नामन्सीमन्निति निपातितः॥ यद्वा। म्नायते। अभ्यस्यते। म्ना०। नामन्नित्यादिना निपातनान्म्लोपः॥ न नामग्रहणं कुर्य्यात्कृपणस्य गुरोस्तथा। भार्यायाश्चाभिशस्तस्य जनकस्य विशेषतः॥ आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥ नमत्याख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्त्या स्यादिविभक्त्यर्हे शब्दे॥ यथा। उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्। शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम्॥ सर्व्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ। सर्व्वान् कामानवाप्नोति समाराध्य जगद्गुरुम्॥ तन्मयत्वेन गोविन्दमित्येतद्दाल्भ्यनाम्यथा। तन्मयो वाञ्छितान् कामान् यद्वाप्नोति मानवः॥ इति विष्णुधर्म्मवचनम्॥ चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत्। नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः॥ इति पुराणम्॥ भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रविशारद। कृताऽधर्म्मबहुले नराणां का गतिर्भवेत्। यद्यस्ति तदुपायोऽत्र दयया तं वदस्व मे। इति जन्मेजयप्रश्ने व्यास उवाच। एक एव महाराज तत्रोपायोऽस्ति नापरः। सर्व्वदोषनिरासार्थं ध्यायेद्देवीपदाम्बुजम्॥ न सन्त्यघानि तावन्ति यावती शक्तिरस्ति हि। नाम्नि देव्याः पापदाहे तस्माद्भीतिः कुतोऽनघ॥ अवशेनापि यन्नाम लीलयोच्चारितं यदि। किं किं ददाति तज्ज्ञातुं समर्था न हरादयः॥ प्रायश्चित्तन्तु पापानां श्रीदेवीनामसंस्मृतिः। तस्मात्कलिभयाद्राजन् पुण्यक्षेत्रे वसन्नरः॥ निरन्तरं पराम्बाया नामसंस्मरणं चरेत्। छित्त्वा भित्त्वा च भूतानि हत्वा सर्व्वमिदं जगत्॥ देवीं नमति भक्त्या यो न स पापैर्विलिप्यते। रहस्यं सर्व्वशास्त्राणां मया राजन्नुदीरितम्॥ विमृश्यैतदशेषेण भज देवीपदाम्बुजम्। अजपां नाम गायत्त्रीं जपन्ति निखिला जनाः॥ महिमानं न जानन्ति मायाया वैभवं महत्। गायत्त्रीं ब्राह्मणाः सर्व्वे जपन्ति हृदयान्तरे॥ महिमानं न जानन्ति मायाया वैभवं महत्॥ एतत् सर्व्वं समाख्यातं यत् पृष्टन्तु त्वयाऽनघ। युगधर्म्मव्यवस्थायां किं भूयः श्रोतुमिच्छसि॥ इति श्रीदेवीभागवते महापुराणे ६ स्क

न्ये ११ ध्यायः ॥

नामयज्ञः । पुं । दीक्षितः सोमयाजी-त्यादिनाममात्रसम्पादके ऽध्वरे ॥ नाम्ने यज्ञः ॥

नामशेषः । त्रि । मृते ॥ इतिहेमचन्द्रः ॥

नामापराधः । पुं । पाद्मोत्तरखण्डप्रसिद्धे साधुनिन्दादिरूपदुरदृष्टजनकव्यापारविशेषे ॥

नामापराधी । त्रि । नामापराधकृति ॥

नायः । पुं । नये । नीतौ ॥ नयनम् । णीञ० । श्रिणीभुवोऽनुपसर्गेइतिघञ० ॥ नयति । दुन्योरनुपसर्गेइति णोवा ॥

नायकः । त्रि । नेतरि ॥ श्रेष्ठे । प्रधाने ॥ पुं । हारमध्यमणौ ॥ भर्त्तरि ॥ सेनापतौ ॥ शृङ्गारसाधके ॥ नयति । णीञ० । ण्वुल् ॥

नायकाधिपः । पुं । नरेन्द्रे । राजनि ॥

नायिका । स्त्री । दुर्गाया उग्रचण्डाद्यष्टशक्तिषु ॥ शृङ्गाररसालम्बनविभावरूपायांनार्य्याम् ॥ कस्तूरीविशेषे ॥ यथा । चूर्णाकृतिस्तु खरिका तिलका तिलाभा कौलत्थबीजसदृशी चकुलत्थिकाख्या । स्थूलाततःकियदियंकिलपिण्डकाख्यास्यात् तद्वागृकिञ्चिदधिकापिचनायिकैषा ॥ इतिराजनि

घण्टः ॥

नारः । पुं । तर्णके ॥ नीरे । जले ॥ न । नराणां समूहे ॥ त्रि । परमात्मसम्बन्धिनि ॥ नरसम्बन्धिनि ॥ नरात्समूहेऽण् ॥ नरस्यायम् । तस्येदमित्यण् ॥ मलमूत्रपुरीषास्थिनिर्गतंह्यशुचिस्मृतम् । नारंस्पृष्ट्वातुसस्नेहंसचेलोजलमाविशेदितिस्मृतिः ॥

नारकः । पुं । नरके ॥ नरति न्यणाति वा । नृ० । कृञादित्वात् वुन् । ततः प्रज्ञाद्यण् ॥ त्रि । नरकस्थे ॥ नरकेभवः । तत्रभवइत्यण् ॥

नारकी । त्रि । नरकस्थे ॥ यथा । परेणविहितंकर्मस्वकर्मेतिवदेच्चयः । स उच्यतेब्रह्मघाती महानारकिनारकी ॥ इतिवृहद्धर्मपुराणम् ॥

नारकीटः । पुं । अश्मकीटे । कुक्कुरकीटे । इत्यगौड़इतिभाषा ॥ त्रि । स्वदत्ताशाविहन्तरि ॥ इतिमेदिनी ॥

नारङ्गः । पुं । पिप्पलीरसे । कणारसे ॥ यमजप्राणिनि ॥ विटे ॥ नारङ्गीतिख्याते । नागरङ्गे ॥ नारङ्गं मधुराम्लंस्याद्रोचनंवातनाशनम् । अपरन्त्वम्लमत्युष्णंदुर्ज्जरंवातकृत्सरम् ॥ * ॥ लघुदीधकरस्वन्तरे ॥ यथा । नारङ्गकेसरमपाकृतबीजपूरं योऽश्नाति खण्डमरिचोद्भवचूर्णमिश्रम् । अन्नं गले

विंशतितस्य नरस्य तूर्णं सङ्गृह्यमाण पुरा हुशहेण चन्द्रः ॥ नारङ्गन्तु परं रुच्यं सुगन्धमतिपाचनम् । वातघ्नं फलं किञ्चित् पित्तघ्नं विशदं स्मृतमिति ॥ न । गर्ज्जरे ॥

नारङ्गक्षीरिणी । स्त्री । क्षीरिकाप्रभेदे ॥ स्निग्धा नारङ्गमज्जा वै पचेत् सर्पिषि तापिते । तच्च खण्डं विनिःक्षिप्य पक्वं मत्वावतारयेत् ॥ शीतभूते विनिःक्षिप्य मात्रयाद्विगुणितं पयः । नारङ्गक्षीरिणी चैषा सुगन्धिसुरभीकृता ॥ विष्टम्भिनी हरेद्वातं पित्तञ्च गुरुपाचिका ॥

नारङ्गवर्णकम् । न । गाजरे । गृञ्जने ॥

नारदः । पुं । देवर्षिप्रवरे । देवर्षीणां मध्ये भगवतो विभूतौ ॥ नरस्य धर्म्यम् । नराच्चेति वक्तव्यमित्यञ् । नारं ददाति । आतोऽनुपेति कः ॥ नारं पानीयमित्युक्तं तत् पितृभ्यः सदा भवान् । ददाति तेन ते नाम नारदेति भविष्यतीत्यागमः ॥ नारं नरसमूहं द्यति कलहेनेति वा । नुरिदं नारमज्ञानम् । तत् द्यति ज्ञानोपदेशेनेति वा । दो अवखण्डने । कः ॥ नारां परमात्मसम्बन्धिनीं परमात्मविषयकं ज्ञानं ददाति उपदिशतीति वा ॥ न । पञ्चविंशति सहस्रश्लोकात्मके महापुराणविशेषे ॥

नारदीयम् । न । उपपुराणविशेषे ॥ त्रि । नारदसम्बन्धिनि ॥

नारसिंहम् । न । उपपुराणविशेषे ॥ त्रि । नृसिंहसम्बन्धिनि ॥

नारसिंहवपुः । पुं । विष्णौ ॥ नरस्य सिंहस्य चावयवा यस्मिन् वपुषि सन्त्यन्ते तद्वपुर्यस्य सः । नरश्च सिंहश्च नरसिंहौ तयोरवयवाः अवयवे च प्राण्योषधिवृक्षेभ्य इत्यण् । नारसिंहा नरसिंहयोरवयवा अस्मिन् सन्तीत्यणन्तात् नारसिंहशब्दान्मत्वर्थीयोऽर्श आद्यच् । तथा च नारसिंहः नरसिंहावयववत् वपुर्यस्य स तथा ॥

नारा । स्त्री । जले । नीरे ॥ इति शब्द० ॥

नाराचः । पुं । सर्वलोहमयबाणे । प्रक्ष्वेडने ॥ नरान् आचामति । चमु० । अन्येभ्योऽपि दृश्यते इति डः । ततः प्रज्ञाद्यण् ॥ यद्वा । नराणां समूहो नारम् । नारमाचामति । डः ॥ अम्बुहस्तिनि ॥ दुर्द्दिने ॥ * ॥ ध[illegible]प्रभेदे । इष्ट[illegible]नरचतु[illegible] नाराचमाचक्षते । यथा । दिनकालनयातटीकानने चारुसञ्चारिणी श्रवणनिकटकूटमेखला कृष्णराधात्त्वयि । ननु-श्चिन्तालिखितनाराचमेष इति छन्दोऽनं तदिह मदनविभ्रमोद्भ्रान्तचित्ता

मवत्त्वंद्रुतम् ॥

नाराचिका । स्त्री । नाराच्याम् ॥

नाराची । स्त्री । एषणिकायाम् । स्वर्णकारादीनां लोहतुलाविशेषे । कांटा इति नारजा इतिच भाषा ॥ गौरादित्वात् ङीष् ॥ स्वल्पोनाराचोवाण भेदो नाराचीतिकश्चित् ॥

नारायणः । पुं । अच्युते । भगवति । वासुदेवे ॥ निरुक्तिर्यथा । आपोनारा इतिप्रोक्ता आपोवैनरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ इतिमनुः ॥ यच्चकिञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपिवा । अन्तर्बहिश्च तत्सर्वं व्याप्यनारायणः स्थितः ॥ इतिमन्त्रवर्णः । नारायणाय नम इत्ययमेवसत्यं संसारघोरविषसंहरणाय मन्त्रम् । शृण्वन्तुभव्यमतयोयतयोस्तरागा उच्चैस्तरामुपदिशाम्यहमूर्द्ध्वबाहुरिति न्टसिंहपुराणम् ॥ शाब्दिकनिरुक्तिस्तु नाराज्जातानितत्त्वानि नाराणीतिविदुर्बुधाः । तान्येवचायनं तस्य तेन नारायणः स्मृतः ॥ नराणां समूहोनारम् । तस्यसमूह इत्यण् । तदयनमस्य । पूर्वपदादितिणत्वम् ॥ यद्वा । नराज्जाताः नाराः आपः । ताअयनंयस्य ॥ क्वचिन्मन्वन्तरे नरस्यर्षेरपत्यत्वमुपगत- इति । नरस्यापत्यम् । नडादिभ्यःफक्निनारायणः ॥ श्रीकृष्णे ॥ नारायणस्त्वंनहिसर्वदेहिना मात्मास्यधीशोखिललोकसाक्षी । नारायणोङ्गं नरभूजलायनात् तच्चापिसत्यं नतवैवमायया ॥ श्रीकृष्णस्य सेनाविशेषे ॥ धर्मपुत्रर्षिविशेषे ॥ सन्न्यासिनि । परिव्राजके ॥ दण्डग्रहणमात्रेण नरोनारायणो भवेदिति स्मृतेः ॥

नारायणक्षेत्रम् । न । गङ्गाप्रवाहावधिहस्तचतुष्टयमिते नारायणस्वामिकेस्थाने ॥ यथा । प्रवाहमवधिंकृत्वा यावद्धस्तचतुष्टयम् । अत्रनारायणः स्वामीनान्यः स्वामीकदाचनेति ॥

नारायणतैलम् । न । औषधपक्वतैलविशेषे ॥ तत् त्रिविधम् । स्वल्पंवृहन्महच्चेतिभेदात् ॥ यथा । विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः । प्रसारण्यश्वगन्धाच वृहतीकण्टकारिका ॥ बलाचातिबलाचैवश्वदंष्ट्रा सपुनर्नवा । एषांदशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत् ॥ पादशेषं परिस्राव्यतैलपात्रं प्रदापयेत् । शतपुष्पादेवदारुमांसीशैलेयकं वचा ॥ चन्दनंतगरं कुष्ठं मेलापर्णीचतुष्टयम् । रास्नातुरगगन्धाच सैन्धवं सपुनर्नवम् ॥ एषांद्विपलिकान् भागान्

पेषयित्वाविनिःक्षिपेत् । शतावरी रसश्चैव तैलतुल्यं प्रदापयेत् ॥ आजंवाथदिवागव्यत्तीरंदत्त्वा चतुर्गुणम् । * । पाने वस्तौतथाभ्यङ्गेभोज्ये चैवप्रशस्यते ॥ अश्वोवावातसम्भग्नो गजोवाथदिवानरः । पङ्गुलः पीठसर्पीचतैलेनानेनसिध्यति ॥ अधोगाश्चयेवाताः शिरोमध्यगताश्चये । दन्तशूलेहनुस्तम्भेमन्यास्तम्भेगलग्रहे ॥ यश्चशुष्यति चैकाङ्गंगतिर्यस्यच विक्लवा । चीणेन्द्रियानष्टशुक्राज्वरचीणाश्चयेनराः ॥ वधिराल्लजिह्वाश्चमन्दमेधसएवच । अल्पप्रजाचया नारीयाच गर्भंनविन्दति ॥ वातार्त्तावृषणौयेषामन्त्रवृद्धिश्चदारुणा । एतत् तैलवरंतेषांनाम्नानारायणंस्मृतमितिस्वल्पनारायणतैलम् ॥ * ॥ शतावरीचांशुमतीपृश्निपर्णीशटीवला । एरण्डस्यचमूलानि वृहत्योः पूतिकस्यच ॥ गवेधुकस्य मूलानितथास हचरस्यच । एषांदशपलान् भागान् जलद्रोणे विपाचयेत् ॥ पादशेषं रसे पूते गर्भं चैनं समावपेत् । पुनर्नवावचादारुशताह्वाचन्दनागुरु ॥ शैलेयंतगरं कुष्ठमेलामांसीस्थिरावला । अश्वाह्वासैन्धवंरास्नापलार्द्धानिचपेषयेत् ॥ गव्याजपयसः प्रस्थौदौ

दावत्र प्रदापयेत् । शतावरीरसप्रस्थं तैलप्रस्थंविपाचयेत् ॥ * ॥ अस्य तैलस्य सिद्धस्य शृणुवीर्यमतः परम् । अश्वानांवातभग्नानां कुञ्जराणांतथानृणाम् ॥ तैलमेतत् प्रयोक्तव्यं सर्ववातनिवारणम् । आयुष्मांश्चनरः पीत्वानिश्चयेन दृढोभवेत् ॥ गर्भमश्वतरीविन्द्यात् किम्पुनर्मानुषीतथा । हृच्छूलंपार्श्वशूलञ्च तथैवार्द्धावभेदकम् ॥ अपचींगण्डमालाञ्च वातरक्तं हनुग्रहम् । कामलां पाण्डुरोगञ्चअश्मरीञ्चापिनाशयेत् ॥ तैलमेतद्भगवता विष्णुनापरिकीर्त्तितम् । नारायणमितिख्यातंवातान्तकरणं शुभमितिवृहन्नारायणतैलम् ॥ * ॥ विल्वाश्वगन्धावृहतीश्वदंष्ट्राश्योनाकवाट्यालकपारिभद्रम् । चुद्राकठिल्लातिवलाग्निमन्थं मूलानिचैषां सरलायुतानाम् ॥ मूलंविदध्यादथपाटलीनां प्रत्येकमेषां प्रवदन्तितज्ज्ञाः ॥ सपादप्रस्थं विधिनैदग्धाञ्चतोये रपामष्टभिरेवपक्वा ॥ पादावशेषेणरसेनतेन तैलाढकाभ्यां सममेवदुग्धम् । छागस्यमांसद्रवमेव तुल्यमेकत्रसम्यक्विपचेत् सुबुद्धिः ॥ दद्याद्रसञ्चैवशतावरीणां तैलेन तुल्यं पुनरेवतत्र । रास्नाश्वगन्धादुमदारुकाष्ठ

छं पर्णी चतुष्कागुरुकेशराणि ॥ सिन्धूत्थमांसीरजनीद्वयञ्च शैलेयकं चन्दनपुष्कराणि । एलासयष्टीतगराब्दपत्रम् भृङ्गाह्वयगोक्षुवचापलाशम् ॥ स्थौणेयवृश्चीरकचोरकाख्यमेभिः-समस्तैर्द्विपलप्रमाणैः । कर्पूरकाश्मीरमृगाण्डजानां दद्यात् सुगन्धाय वदन्तिकेचित् ॥ प्रस्वेददौर्गन्ध्यनिवारणार्थं चूर्णीकृतानांद्विपलप्रमाणम् । आलोड्यसम्यग्विधिवद्विपक्वंनारायणंनाम महच्चतैलम् ॥ * ॥ सर्वैःप्रकारैर्विधिवत् प्रयोज्यमस्य पुंसां पवनार्दितानाम् । ये पङ्गवः पीठविसर्पणाश्च एकाङ्गहीनाहितवेपमानाः । बाधिर्ययुक्तक्षयपीडिताश्च मन्याहनुस्तम्भशिरोगदार्त्ताः । मुक्तानरास्ते बलवीर्ययुक्ताः संसेव्यतैलं सहसाभवन्ति ॥ वन्ध्याचनारीलभतेच पुत्रंवीरोपमं सर्वगुणोपपन्नम् । शाखाश्रितेकोष्ठगतेचवाते वृद्धौविधेयं पवनार्दितानाम् ॥ जिह्वानिलेदन्तगतेचशूले औन्मादकौब्जज्वरकर्षितानाम् । प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वंजीवेच्चिरंचापिभवेद्युवेव ॥ देवासुरेयुद्धवरे समीक्ष्य क्षतास्थिभग्नानसुरैःसुरांश्च । नारायणेनापिस्वहंहणार्थं स्वनामतैलं विहितन्तु तेषाम्

॥ इति सुखबोधे महानारायणतैललम् ॥

नारायणप्रियः । पुं । शिवे ॥

नारायणवलिः । पुं । मृतपतितादीनां प्रायश्चित्तात्मके कर्मविशेषे ॥

नारायणस्थानम् । न । तीर्थविशेषे ॥

नारायणाश्रमः । पुं । वदर्य्याश्रमे ॥

नारायणास्त्रम् । न । विष्णोरस्त्रभेदे ॥

नारायणी । स्त्री । लक्ष्म्याम् । श्रियि ॥ उमायाम् । पार्वत्याम् । दुर्गायाम् ॥ नारायणाज्जाता । नारायणस्य विष्णोःशक्तिः ॥ यद्वा । नारस्य जीवराशेरयनी स्थानभूता तत्स्वरूपे-त्यर्थः ॥ जलायना नराधारा समुद्रशयनाऽपिया । नारायणीसमाख्याता नरनारीप्रवर्त्तिका ॥ वसत्यट्टहासवेषुभूतेष्वन्तर्हिताथतः । देव्या व्याप्तमिदंसर्वंजगत्स्थावरजङ्गममिति देवीपुराणम् ॥ गङ्गायाम् ॥ मुद्गलमुनेःपत्न्याम् ॥ शतावर्य्याम् । अभीरौ ॥

नारिकेरः । पुं । नालिकेरे ॥ रलयोरभेदः ॥

नारिकेलः । पुं । नालिकेरे ॥ नलति नल्यते वा । णलगन्धे । वाहुलकादिण् । केनवायुना इलति चलति । इलगतौ । अच् । नालिश्चासौकेलश्च

। रलयोरभेदः ॥

नारिकेलक्षीरी । स्त्री । क्षीरिकाप्रभेदे ॥ यथा । नारिकेलं तनूकृत्य च्छिन्नं पयसि गोः क्षिपेत् । सितागव्याज्यसंयुक्तं तत् पचेन्मृदुनाग्निना ॥ नारिकेलोद्भवा क्षीरी स्निग्धा शीता ऽतिपुष्टिदा । गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहेति भावप्रकाशः ॥

नारिकेलिः । पुं । स्त्री । } शिरःफले । सदापुष्पे । सदाफले ॥
नारिकेली । स्त्री । }

नारी । स्त्री । स्त्रियाम् । योषिति । प्रतीपदर्शिन्याम् ॥ नृनरयोर्वृद्धिश्चेति शार्ङ्गरवादिगणे पाठात् ङीन् जातिलक्षणस्य ङीषो ऽपवादो ङीन् तत्सन्नियोगेन वृद्धिश्च ॥ यद्वा । नुर्नरस्य वा धर्म्या । ऋतो ऽञिति नराच्चेति वार्त्तिकात् । ङीन् ॥ अस्याश्चतस्रो जातयो भवन्ति । तथाहि । पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा । चतस्रो जातयो नार्या रतौ ज्ञेया विशेषत इति रतिमञ्जरी ॥ मध्याख्यच्छन्दोभेदे । मोनरी ॥ यथा । गोपानां नारीभिः । श्लिष्टोव्यात् कृष्णो वः ॥ त्रिलघुनि [।।।] ॥

नारीकवचः । पुं । सूर्यवंशीयमूलकराजे । अश्मकपुत्रे ॥ यो ऽसौ निःक्षत्रे क्ष्मातले ऽस्मिन् क्रियमाणे विवस्त्राभिः स्त्रीभिः परिवार्य रक्षितः । ततस्तं नारीकवचमुदाहरन्तीति विष्णुपुराणे ४ अंशे ४ अध्यायः ॥

नारीकेलः । पुं । नालिकेरे ॥ इति शब्दचन्द्रिका ॥

नारीकेली । स्त्री । नारिकेले ॥ नारिकेलजमद्ये ॥

नारीचम् । न । नालिता इति गौडभाषाप्रसिद्धशाकविशेषे ॥ तप्ते शुभाज्ये बहुजीरकान्विते सुस्वेदितं नारिचसंज्ञशाकम् । ससैन्धवं तक्रविलोड्य पाचितं सम्पापितं प्राकृतभाग्यकेन ॥ रुच्यं वातहरं बल्यं कफकृद्रोगनाशनम् । हृद्यं पित्तहरं किञ्चिच्छाकं नारीचसंज्ञकम् ॥

नारीतरङ्गः । पुं । } षिड्गे । कामुके ॥
नारीतरङ्गकः । पुं । }

नारीदुग्धम् । न । स्त्रियाः क्षीरे ॥ नार्या लघु पयः शीतं दीपनं वातपित्तजित् । चक्षुःशूलाभिघातघ्नं नस्याश्चोतनयोर्वरम् ॥

नारीदूषणम् । न । स्त्रीणां दोषोत्पादके ॥ यथा । पानं दुर्जनसंसर्गः पत्या च विरहो ऽटनम् । स्वप्नोन्यगेहवासश्च नारीणां दूषणानि षट् ॥

नारीष्टा । स्त्री । मल्लिकायाम् ॥

नार्य्यङ्गः । पुं । नागरङ्गे ॥ न । नार्य्या अङ्गे ॥

नालम् । न । काण्डे । नालायाम् । उत्पलादिदण्डे ॥ मृणाले ॥ नलति । णलबन्धे । ज्वलितीतिणः ॥

नालः । पुं । नले । जलनिर्गमे ॥ यतः । प्रणालः ॥ काण्डे ॥ पद्मादिवृन्दे ॥ नलत्यनेन नालयति वा । णलगन्धे । हलश्चेतिघञ्ज्वा ॥

नालवंशः । पुं । नले ॥

नाला । स्त्री । नाले । अब्जादिदण्डे ॥ नलति । णल० । ज्वलितिकसन्तेभ्योणः ॥

नालिः । स्त्री । नाड्याम् । शिरायाम् ॥ पद्मादिदण्डे । शाकविशेषे ॥

नालिकः । पुं । महिषे ॥ न । पद्मे ॥

नालिका । स्त्री । नालिताभेदे । श्वेतकलंब्याम् ॥ पद्मादिनाले ॥ चर्मकषायाम् । हस्तिनः कर्णवेधन्याम् ॥ नाले ॥ काले ॥ चुल्लिरन्ध्रे ॥ विवरे ॥ वेणुभाजने ॥ नाड्याम् ॥

नालिकेरः । पुं । नारिकेले । नारियर इतिभाषा प्रसिद्धे ॥ नालिकेरफलं शीतं दुर्ज्जरं वस्तिशोधनम् । विष्टम्भि वृंहणं वल्यं वातपित्तास्रदाहनुत् ॥ विशेषतः कोमलनालिकेरं निहन्ति पित्तज्वरपित्तदोषान् । तद्देवजीर्णं गुरुपित्तकारिविदाहि विष्टम्भिमतं भिषग्भिः ॥ तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु । पिपासापित्तजित् स्वादुवस्तिशुद्धिकरं परम् ॥ * ॥ नालिकेरस्य तालस्य खर्जूरस्य शिरांसि तु । कषायस्निग्धमधुरवृंहणानि गुरूणि च ॥ * ॥ प्रथमवयसि दत्तं तोयमल्पं पिबन्तः शिरसि निहितभारा नालिकेरा नराणाम् । सलिलममृतकल्पं दद्यु राजीवनान्तं नहि कृतमुपकारं साधवो विस्मरन्ति ॥ अस्यपाको यथा । कुडवं नालिकेरस्य सूक्ष्मं दृषदि पेषितम् । शुद्धखण्डस्य कुडवं गव्यक्षीरे चतुर्गुणे ॥ आलोड्य नालिकेरस्य जले मृद्वग्निना पचेत् । धान्यकं पिप्पलीं शुण्ठीं चातुर्जातं सुचूर्णितम् ॥ शाणप्रमाणं प्रत्येकं शीतीभूते क्षिपेद्बुधः । नालिकेरखण्डोयं पुंस्त्वनिद्राबलप्रदः ॥ अम्लपित्तक्षयंकासं शूलंच परिणामजम् । नाशयेद्रक्तपित्तञ्च शुष्कं दावानलो यथा ॥ अत्रघृतपलेन कुष्माण्डवन्नालिकेरस्य भर्जनंविधेयमिति ॥ बालस्य नालिकेरस्य जलं प्रायोविरेचनमिति वल्लभः ॥ नलति नल्यते वा । णल० । बाहुलकात् एरण् । केन वायुना ईर्य्यते । ईर० । घञ् । नालिश्चासौ

केरश्च ॥

नालिकेरक: । पुं । नालिकेरे ॥

नालिकेरक्षीरिका । स्त्री । नारिकेल क्षीर्य्याम् ॥

नालिता । स्त्री । पट्टशाके । नारीचे ॥

नाली । स्त्री । शाककदम्बे । नाड़ल इ तिभाषा ॥ स्वतःप्रसिद्धशाकविशेषे ॥ नालेन रहिता नाली सुस्विन्ना मुष्टिपीडिता । घृते तप्ते परिक्षिप्ता चिञ्चिणीपत्रसंयुता ॥ नाली सरा लघुः शीता पित्तनुत् कफवातला । श्लेष्मलोककरी ज्ञेया लिप्ता शोथघ्निका मता ॥ हस्तिकर्णवेधन्याम् ॥ घट्याम् ॥ पद्मे ॥ पद्मदण्डे ॥ प्रणाल्याम् ॥ वाद्यविशेषे ॥ नलति अनया वा । णल० । हलश्चेतिघञ् ॥ नालयति वा । पचाद्यच् । गौरादित्वान्ङीष् ॥

नालीक: । पुं । अब्जे ॥ शरे ॥ शल्ये ॥ मुखमात्रायःसंयुक्तेशरे ॥ न । अब्जषण्डे ॥

नालीकिनी । स्त्री । पद्मसमूहे । पद्मिन्याम् ॥ नालीकानि सन्त्यस्याम् । पुष्करादित्वादिनिः ॥

नालीघटी । स्त्री । दण्डबोधिवाद्यभेदे ॥

नालीव्रण: । पुं । नाडीव्रणे ॥

नावनम् । न । नस्ये । नासाग्राह्यौषधे ॥

नावयज्ञिक: । पुं । कालविशेषे ॥ नव यज्ञोऽस्मिन् वर्त्तते । तदस्मिन्वर्त्ततइत्युपसङ्ख्यानाट्ठञ् ॥

नाविक: । पुं । कर्णधारे । नौपृष्ठदण्डधारके ॥ नावा तरति । नौद्व्यचष्ठन्निति ठन् ॥ नौरस्त्यस्यत्र । व्रीह्यादित्वाट्ठन् ॥

नावी । त्रि । नौमति ॥ नौरस्त्यस्य । व्रीह्यादित्वादिनिः ॥

नाव्यम् । त्रि । नौतार्य्यदेशे ॥ न । नौतरणयोग्यजले ॥ नावा तार्य्यम् । नौवयोधर्म्मेत्यादिनायत् । वान्तोयीत्यवादेशः ॥

नाश: । पुं । पलायने ॥ निधने ॥ अनुपलम्भे । अदर्शने ॥ परिध्वस्तौ ॥ नशनम् । णश० । घञ् ॥ कुलनाशकारणंयथा । अनृतात् पारदार्य्याच्च तथाऽभक्ष्यस्य भक्षणात् । अश्रौत धर्म्माचरणात् क्षिप्रं नश्यति वैकुलम् ॥ अश्रोत्रियेवेददानात् दृषलेषु तथैवच । विहिताचारहीनेषु क्षिप्रंनश्यति वैकुलम् ॥ इतिकूर्म्मपुराणम् ॥ यावद्वेदधर्म्माः स्युर्यावत् स्याच्छङ्कराचनम् । यावत्स्याच्छुचिकृत्यञ्च तावन्नाशोभवेन्नहि ॥

नाशन: । त्रि । नाशकर्त्तरि ॥ नाशय

ति । वाम० । ल्युः ॥

नासी । त्रि । नासविशिष्टे ॥

नासत्यौ । पुं । अश्विनीकुमारयोः ॥ नसत्यं ययो स्ता वसत्यौ । न असत्यौ । नभ्राण्नपादिति नञः प्रकृति भावः ॥ *॥ संज्ञा च सूर्यस्य स्त्री उत्तरकुरौ धृताश्वरूपा तपश्चचारासीत्- सूर्योपि तत्र तद्रूपेणैव स्वयं रूपीसमीपमगात् । सा च तथान्यपुरुषधिया निरस्तः सन् तन्नासापुटे रेतोऽभ्यषिञ्चत् । ततौ जातौ विख्यातौ आख्यायते । नासात्यक्तवन्तौ नासत्यौ । अन्येभ्योपीति डः । ङ्यापोरिति ह्रस्वत्वमिति वा ॥

नासा । स्त्री । नासिकायाम् ॥ नासते । णास्र शब्दे । गुरोश्चेत्यः ॥ नासतेऽनयावा । अच् । हलश्चेति घञ्वा ॥ अस्याः शुभाशुभलक्षणं यथा । शुकनासः सुखी स्याच्च शुष्कनासेति जीवनम् । छिन्नाग्ररूपनासः स्यादगम्यागमनेरतः ॥ दीर्घनासे च सौभाग्यं चौरश्चाकुञ्चितेन्द्रियः । स्त्रीमृत्युश्चिपिटनास ऋजुर्भाग्यवतां भवेत् ॥ अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे । क्रूरे दक्षिणवक्राग्रा इतिनीचचतंस कृतन्नइतिगरुडपुराणम् ॥ द्वारोर्द्धस्थितदारुणि । स्तम्भद्वारस्थकाष्ठे । उपरिभित्तिधारककाष्ठे ॥ वासकवृक्षे ॥

नासाछिद्री । स्त्री । पूर्णिकापक्षिणि ॥

नासादारु । न । द्वारोर्द्धस्थितकाष्ठे । 'जानुकाठ इति कपालि इति च गौडभाषा ॥

नासायोनिः । पुं । सौगन्धिकाख्यक्लीबे ॥

नासालुः । पुं । कट्फलवृक्षे ॥

नासासंवेदनः । पुं । काण्डीरलतायाम् ॥

नासास्रावः । पुं । पीनसे ॥

नासिकन्धमः । त्रि । नासिकां शब्दायमानांयः करोति तत्र ॥ नासिकयाशब्दकर्त्तरि ॥ नासिकां धमति । नासिकास्तनयोर्ध्माधेटोरिति खश् । मुम् । खित्यनव्ययस्येति ह्रस्वः ॥

नासिकन्धयः । त्रि । नासिकया पानकर्त्तरि ॥ नासिकां धयति । धेट् पाने । नासिकास्तनयोरिति खश् । मुम् । ह्रस्वः ॥

नासिका । स्त्री । नासायाम् । गन्धवहायाम् । घ्राणेन्द्रिये । नाक इति भाषा ॥ नासते । णास्र० । ण्वुल् ॥

नासिकामलम् । न । नासास्थितमले । शिङ्घाणे । सिणक इति रेंट इति- च भाषा ॥

नासिकाशब्दः । पुं । घोतकारे । घराड़ इति भाषा ॥ यथा । शयानं रावणं दृष्ट्वा तत्र मत्त इति वानरः । नासा

यूथैस्तु घोतकारै र्विशङ्किर्वायुसेवकै रितिनारसिंहपुराणे ४५ अध्यायः ॥

नासिक्यम् । न । नासिकायाम् ॥ त्रि । नासायांभवे ॥ शरीरावयवाद्यत् ॥

नासिक्यौ । पुं । अश्विनीकुमारयोः ॥

नासिक्यकम् । न । नासिकायःम् ॥

नासीरम् । न । नायकाग्यके । नायकस्याग्रेसारिकायां सेनायाम् ॥ सेनामुखे ॥ पुं । अग्रेसरे ॥

नास्ति । अ । अस्तित्वाभाववति । अविद्यमानतायाम् । नहिं इति भाषा ॥ यथा । अतिथिर्बालकश्चैव राजा भार्यातथैवच । अस्तिनास्तिनजानन्ति- देहिदेहि पुनः पुनः ॥ इतिचाणक्यम् ॥

नास्तिकः । पुं । ईश्वरनास्तित्ववादिनि पाषण्डे । वेदाप्रामाण्यवादिनि । नास्तिपरलोक इतिमतिविशिष्टे । लौकायतिके । वार्हस्पत्ये ॥ सचषड्विधः । माध्यमिकः योगाचारः सौत्रान्तिकः वैभाषिकः चार्वाकः दिगम्बरश्चेति भेदात् ॥ नास्ति परलोकः इतिमतिरस्य । अस्तिनास्तिदिष्टं मतिरिति नास्तीतिनिपातात् वचनसामर्थ्यान्नास्तीतिनिपाताख्यातसमुदायाद्वा ठक् ॥ यद्वा । नास्ति यज्ञफलम् नास्तिच परलोकः इत्येवंकायति ।

केशब्दे । डः ॥

नास्तिकता । स्त्री । मिथ्यादृष्ट्याम् । परलोकमृषाबुद्धौ । कर्मफलापवादकज्ञाने ॥ नास्तिकस्य भावः । तल् ॥

नास्तिकवृत्तिः । त्रि । नास्तिपरलोक इति प्रवर्त्तके ॥

नास्तिक्यम् । न । शास्त्रीय फलवत्कर्मसु फलाभावबुद्धौ ॥ नास्तिकस्य कर्म भावोवा । पुरोहितादित्वात् यक् ॥

नास्तिदः । पुं । आम्रवृक्षे ॥ इतिशब्दचन्द्रिका ॥

नास्यम् । त्रि । वलीवर्द्दादिनासासम्बन्धिन्यां रज्जौ । नाँथइति भाषा ॥ नासायां भवम् । शरीरावयवाद्यत् ॥

नाहः । पुं । बन्धने ॥ कूटे ॥

नाहलः । पुं । म्लेच्छजात्यन्तरे ॥ इति हेमचन्द्रः ॥

नाहुषिः । पुं । ययातिभूपतौ ॥ नहुषस्य अपत्यम् । अतइञ् ॥

नि । अ । निवेशे ॥ भृशार्थे ॥ निश्चयार्थे ॥ संशये ॥ क्षेपे ॥ कौशले ॥ उपरमे ॥ सामीप्ये ॥ आश्रये ॥ दाने ॥ ॥ मोक्षे ॥ अन्तर्भावे ॥ बन्धने ॥ राशौ ॥ अधोभावे ॥ विन्यासे ॥ निश्चये ॥ निषेधेपीति दुर्गादासः ॥

निःक्षत्रः । त्रि । क्षत्रियशून्यदेशादै ॥

निःशङ्कः । त्रि । निर्भीके ॥

निःशब्दः । त्रि । शब्दरहिते । चुप् इति भाषा ॥

निःशलाकः । त्रि । निर्जने । रहसि ॥ निर्गता शलाका यस्मात् ॥ शलाकाया निर्गतोवा ॥

निःशल्या । स्त्री । दन्तीवृक्षे ॥

निःशूकः । पुं । मुण्डशालौ ॥

निःशेषः । त्रि । निखिले । समस्ते ॥ निःक्रान्तं शेषात् । निरादयइतिसमासः ॥

निःशोकः । त्रि । शोकवर्जिते ॥

निःशोध्यः । त्रि । निर्मले । स्वच्छे । शोधिते ॥ अनवस्करे ॥ निष्क्रान्तं शोध्यमस्मात् ॥ शोध्यान्निष्क्रान्तमितिवा ॥

निःश्रयणी । स्त्री ।
निःश्रयिणी । स्त्री । } अधिरोहिण्याम् ॥ इतिशब्दरत्नावली ॥

निःश्रेणिः । स्त्री । वंशकाष्ठादिनिर्मिते सोपाने । अधिरोहिण्याम् । नसेनी इतिसीढी इतिचभाषा ॥ निश्चिता श्रेणिः पङ्क्तिरत्र ॥ खर्ज्जूरीपादपे ॥

निःश्रेणिका । स्त्री । निश्रेणी इतिकोकणप्रसिद्धे तृणवि० । निरसायाम् । वनवल्लर्याम् ॥ निःश्रेण्याम् । अधिरोहिण्याम् ॥ यथा । मानुष्यं दुर्लभं प्राप्य सेविता न महेश्वरी । निःश्रेणिकाग्रात् पतित अधस्त्येन विद्म हे ॥ अपिच । आसाद्यजन्म मनुजेषु चिराद्दुरापं तत्रापिपाटवमवाप्यनिजेन्द्रियाणाम् । नाभ्यर्चयन्तिजगतां जनयित्रि ये त्वां निःश्रेणिकाग्रमधिरुह्य पुनः पतन्तीति देवीभागवतम् ॥

निःश्रेणी । स्त्री । अधिरोहिण्याम् ॥

निःश्रेयसम् । न । कल्याणे ॥ मोक्षे ॥ विद्यायाम् ॥ अनुभावे ॥ भक्तौ ॥ पुं । शङ्करे । शिवे ॥ निश्चितं नितरां वाश्रेयः निःश्रेयसम् । अचतुरविचतुरेत्यादिनानिपातितम् ॥

निःश्रेयसकरः । पुं । ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनि कर्मयोगे । सन्न्यासे ॥ निःश्रेयसंकरोति । डुकृञ्० । कृञोहेतुताच्छील्यानुलोम्येष्विति हेत्वर्थेटः ॥

निःश्रेयसकरी । स्त्री । विद्यायाम् ॥ टित्त्वान्ङीप्

निःश्वासः । पुं । मुखादन्तर्निर्गमनशालिनि वायौ ॥ निर्गतः श्वासः ॥ निःश्वसनं वा । श्वस० । घञ् ॥

निःषन्धिः । त्रि । दृढे ॥ सुषा० षत्वम् ॥

निःषमम् । अ । गर्ह्ये । निन्द्यमाने ॥ निर्गतं समम च । तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावत्वम् । सुविनिर्दुर्भ्यइतिषत्वम् ॥

निःसङ्गः । पुं । देशादिसङ्गरहिते पर

मात्मनि ॥ निःसङ्गस्य ससङ्गेन कूटस्थस्य विकारिणा । आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते ॥ स्वतोवुद्धं स्वतःशुद्धं स्वतोमुक्तं निरात्मिका । अविचारितसंसिद्धिरविद्या लिङ्गते कथम् ॥ त्रि । सविकल्पकानन्दाभासक्ते । निरपेक्षे ॥ फलानभिनिवेशवति ॥ मेलनरहिते ॥ यथा । मत्स्यस्य सङ्गादभवञ्च योमे सुतादिरागो मुषितोऽस्मि तेन । निःसङ्गता मुक्तिपदं यतीनांसङ्गादशेषाः प्रभवन्ति दोषाइति ॥ निःसङ्गएव मुक्तःस्याद्दोषाः सर्वेपि सङ्गजाः । सङ्गात्पतत्यहो ज्ञानी चावश्यं किमुतात्यविदिति कुलार्णवः ॥

निःसत्त्वः । त्रि । धैर्य्यशून्ये ॥

निःसन्धिः । त्रि । सन्धिरहिते । दृढे ॥

निःसम्पातः । पुं । अर्द्धरात्रे । निशीथे ॥

निःसरणम् । न । मृत्यौ ॥ उपाये ॥ मोक्षे ॥ निर्गमे ॥ गेहादिमुखे । निर्गमन प्रवेशमार्गे ॥ निस्सरन्त्यनेन । सृगतौ । करणे ल्युट् ॥

निःसहतरः । त्रि । असहतरे ॥ सहेर्निपूर्वात् पचाद्यजन्तात् तरप् ॥

निःसहत्वम् । न । अक्षमत्वे ॥ सहते । षह० । पचाद्यच् । उपसर्गेणसमासेत्वप्रत्ययः ॥

निःसारः । पुं । श्योनाकप्रभेदे ॥ शाखोटवृक्षे ॥ त्रि । साररहिते ॥ यथा । मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् । यः करोति स सम्मूढो जलवुद्वुदसन्निभे ॥ जगत् सर्वन्तु निःसारमनित्यं दुःखभाजनम् । उत्पद्यते क्षणादेतत् क्षणादेतद्विपद्यते ॥

निःसारकः । पुं । अतीसारभेदे ॥ दध्ना ससारेण समाक्षिकेण भुञ्जीत निःसारकपीडितस्तु । सुतप्तकुप्यक्वथितेन चापि क्षीरेण शीतेन मधुप्लुतेन ॥ भुञ्जीतपथ्यमितिशेषः ॥

निःसारणम् । न । गृहादीनां निर्गमादिपथे । निःसरणे ॥ निष्कासने ॥

निःसारा । स्त्री । कदलीवृक्षे ॥

निःसारितः । त्रि । निष्कासिते । वहिष्कृते ॥

निःसीमः । त्रि । अपर्यन्ते ॥

निःसृतः । त्रि । निर्गते ॥

निःस्नेहः । त्रि । स्नेहवर्जिते ॥ निर्गतः स्नेहोयस्मात् ॥

निःस्नेहा । स्त्री । अतस्याम् ॥ निश्चये नस्नेहोऽस्याम् ॥

निःस्रावः । पुं । आचामे । मासरे । मांड इति प्रसिद्धे भक्तरसे ॥

निःस्वः । त्रि । दरिद्रे ॥ अस्यलक्षणं यथा । शूर्पाकारौ विरूक्षौ च वक्रौ पा

दै। गिरालकै। संमुखौ पाण्डुरन खौ निःस्वस्य विरखाङ्गुखी ॥ इतिमा घे सामुद्रकम् ॥ निर्गतं स्वमस्य। स्वामिष्कान्तेषा ॥

निकट:। त्रि। समीपे। आसन्ने ॥ निवहम्। निवह्वार्थाखै:तम्प्रोदश्चेति चात् कटच् ॥ निकटति वा। कटे०। पचाद्यच् ॥

निकर:। पुं। निवहे। सङ्घे ॥ सारे ॥ न्यायदातव्यवित्ते ॥ निधौ ॥ निकीर्यते। कृविक्षेपे ॥ ऋदोरप् ॥

निकर्षणम्। न। सन्निवेशे। पुरादौ गृहादिरचनापरिच्छिन्नदेशे ॥ पुरादेर्बहिर्विहरणभूमौ ॥ कर्षणान्निर्गतम्। निरादय इति समासः ॥

निकष:। पुं। शाणपाषाणे। कषे ॥ निकषति। कष०। अच् ॥ निकषस्य नेनशा। गोचरसञ्चरेष्वः। चकारात् घोषा ॥

निकषणम्। न। उल्लेखने ॥

निकषा। अ। मध्ये ॥ समीपे। निकटे ॥

निकषा। स्त्री। विश्रवसोभार्यायाम्। राक्षसमातरि ॥ निकषणम्। कष हिंसायाम्। आ.समिण्निकषिभ्याम् ॥

निकषात्मज:। पुं। राक्षसे ॥ निकषाया आत्मजः ॥

निकषोपल:। पुं। शाणे। निकषे ॥

निकामम्। न। यथेप्सिते। इष्टानतिक्रमे ॥ निकमनम्। कमु०। घञ् ॥

निकाय:। पुं। लक्ष्ये ॥ सधर्मिप्राणिसंहतौ ॥ संहतानां समुच्चये ॥ निलये। सद्मनि ॥ परमात्मनि ॥ निचीयते। चिञ्०। सङ्घेचानौत्तराधर्ये इतिघञ् आदेश्चकः ॥ चि। कायरञ्जिते ॥

निकाय्य:। पुं। निलये। गृहे ॥ निचीयतेऽस्मिन् धान्यादिकमितिविग्रहे चिनोतेरधिकरणे ण्यत् आयादेशो धाय्यादेः कुत्वञ्च पाय्यसान्नाय्यनिकाय्यधाय्या इत्यादिनानिपात्यते ॥

निकार:। पुं। परिभवे ॥ उत्कारे। धान्यस्योत्क्षेपणे ॥ अपकारे। विप्रकारे ॥ निकृष्टीकरणम्। कृञो घञ् ॥ निकरणम्। कृविक्षेपे। कृ धान्य इति घञ् ॥

निकारणम्। न। वधे। मारणे ॥

॥ कृञ्। स्वार्थण्यन्ताद्भावे ल्युट् ॥

निकारी। त्रि। अपकारिणि ॥

निकाश:। पुं। प्रकाशे ॥ निकाशनम्। निकाशते वा। काशृ०। घञ् अच्वा ॥ समीपे ॥

निकास:। पुं। नीकाशे ॥

निकुञ्चः पुं । कुडवपादे । प्रसृत इति ख्याते ॥ निकुञ्चति । कुञ्च० । अच् ॥

निकुञ्चकः । पुं । निकुञ्चे ॥ स्वार्थे कः ॥ जलवेतसे । वानीरवृक्षे ॥

निकुञ्चितम् । न । सङ्गीतप्रसिद्धे च कुट्टारान्तर्गत शिरोविशेषे ॥

निकुञ्जः । पुं । न । कुञ्जे । लतादिपिहितस्थले ॥ कौजायते । कावजनि वा । जनी० । सप्तम्यांजनेर्डः । पृ० । निरचोपसर्गान्तरनिवृत्त्यर्थः ॥

निकुञ्जिकाम्ला । स्त्री । कुञ्जवल्लर्याम् ॥ इयकुञ्जैःश्रीवल्लीसदृशी ॥

निकुम्भः । पुं । कुम्भकर्णस्यतनये ॥ दन्तिकौषधौ ॥

निकुम्भाख्यबीजम् । न । जयपाले ॥

निकुम्भितम् । न । नृत्यविषयकाऽष्टोत्तरशतकरणान्तर्गतकरणविशेषे ॥

निकुम्भिला । स्त्री । लङ्कायाः पश्चिमभागवर्त्तिन्यां शक्तिविशेषे ॥

निकुम्भी । स्त्री । दन्तीवृक्षे ॥

निकुरम्बम् । न । कदम्बके । समूहे ॥ निकुरति । निकुर्यतेवा । कुरच्छेदने । कुरशब्देवा । बाहुलकात्अम्बच् ॥

निकृतः । त्रि । विप्रलब्धे ॥ नीचे ॥ विप्रकृते ॥ अनृजौ ॥ वञ्चिते ॥ दुःखीकृते ॥ न्यकारि । क्तः ॥

निकृतिः । स्त्री । भर्त्सने ॥ क्षेपे ॥ शठे ॥ शाठ्ये ॥ अभिभवे ॥ दैन्ये ॥ निकृष्टाकृतिः क्रिया परप्रतारणरूपा । यद्वा । पराभीष्टस्यनिकर्त्तनम् । कृती० । इक्कृष्यादिभ्यइतीक् ॥

निकृष्टः । त्रि । अधमे ॥ निकृष्यतेस्म । कृष० । क्तः ॥ आख्याचारादिभिर्निन्दिते ॥

निकेतः । पुं । निकेतने । आश्रये । वेश्मनि ॥ निकेतनम् । कितनिवासे । घञ् ॥

निकेतनम् । न । गृहे । गेहे ॥ निकेत्यतेऽस्मिन् । कित० । अधिकरणेल्युट् ॥

निकोचकः । पुं । अङ्कोठवृक्षे । टेरा इतिभाषा ॥ निकुच्यते । कुचशब्देतारे । कृषादित्वात्वुन् ॥

निक्वणः । पुं । वीणाया अन्यस्यच किङ्कराद्रेःशब्दे । प्रक्वाणे । क्वणे । क्वणने ॥ क्वणशब्दे । नाविति अनुपसर्गइतिचानुवर्त्तमाने क्वणोवीणायाञ्चेत्यप् ॥

निक्वाणः । पुं । निक्वणे । क्वाणे ॥ क्वण० । क्वणोवीणायाञ्चेति पक्षेघञ् ॥

निचमनम् । न । चमने ॥ शिखचुम्बने । ल्युट् ॥

निक्षिप्तः । त्रि । परिक्षिप्ते । न्यस्ते ॥
स्थापितधनादौ ॥ निक्षिप्यतेस्म ।
क्षिपप्रेरणे । क्तः ॥

निक्षेपः । पुं । उपनिधौ । न्यासे । स्व
धनस्यान्यस्मिन्नर्पणरूपे व्यवहारवि
शेषे । धरोहर इतिभाषा ॥ यथा ।
स्वद्रव्यं यत्र विस्रम्भान्निक्षिपत्य-
विशङ्कितः । निक्षेपो नाम तत् प्रो
क्तं व्यवहारपदं बुधैः ॥ असङ्ख्यात
मविज्ञातं समुद्रं यन्निधीयते । तज्जा
नीयादुपनिधिं निक्षेपं गणितं वि-
दुः ॥ निक्षेपं वृद्धिशेषञ्च क्रयं विक्र
य मेवच । याच्यमानो नचे द्दद्याद्व
र्द्धते पञ्चकं शतमिति नारदः ॥ नि-
क्षिप्यते । क्षिप० । घञ् ॥ शिल्पि
हस्ते संस्कर्त्तुमार्पिते भाण्डे ॥

निक्षेपितः । त्रि । प्रयोज्येनान्येन
निवेशिते ॥ क्षिपेर्णयन्तात् कर्मणिक्तः ॥

निक्षेप्ता । त्रि । निक्षेपस्यकर्त्तरि ॥ नि
क्षिपति । क्षिप० । तृच् ॥

निखर्व्वः । पुं । न । दशखर्व्वसङ्ख्याया
म् । १०००००००००००० ॥ निखर्व्वति
। खर्व्वगतौ । पचाद्यच् ॥ त्रि । वाम
ने । बौना इतिभाषा ॥

निखातः । त्रि । खनित्वारोपिते ॥

निखिलः । त्रि । अखिले । निःशेषे । स
मस्ते ॥ निर्गतं खिलं यस्मात् ॥

निगडः । पुं । न । बन्धने । शृङ्खलाया
म् । बेडी इतिभाषा ॥ निर्गतो गडः
सेचनमस्मात् कठिनत्वात् ॥ निग
लति वा । गलअदने । अच् । डल
योरेकत्वम् ॥ हस्तिनो लोहमये पा
दबन्धोपकरणे । अन्दुके ॥

निगडितः । त्रि । बद्धे ॥ निगडःसञ्जा
तोऽस्य । तारकादित्वादितच् ॥

निगणः । पुं । होमधूमे ॥ इतित्रिका
ण्डशेषः ॥

निगदः । पुं । भाषणे । कथने । निगा
दे ॥ निगदनम् । गद० । नौगदेत्यप्
प् वा ॥ निगदस्तु जनैर्वैयाकरणागमा
त्उच्चैर्जपे ॥

निगदितः । त्रि । उक्ते ॥

निगमः । पुं । वाणिज्ये । वणिजि ॥ नि
गमे पुर्य्याम् भवः । तत्रभवइत्यण् ।
संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥ पुर्य्याम्
॥ कटे ॥ वेदे ॥ वणिक्पथे ॥ निश्च
ये ॥ अध्वनि ॥ प्रतिज्ञायाम् ॥ प-
र्य्यायकथनेन वेदार्थबोधके ग्रन्थविशे-
षे ॥ निगम्यतेऽनेनवा । गम्लृ० ।
गोचरसञ्चरेतिसाधुः ॥

निगमनम् । न । प्रतिकूलप्रमाणाभा
वसूचकप्रतिज्ञोपसंहारवचने । त
स्मात्तथेतिवचने ॥ यथा । असकृ
दनुचिन्तितानामव्याहततरनिक्षेप

देशानाम् । ग्रामाद्यपरमसीम्नां निगमनमिदमेव निखिलनिगमानाम् ॥ १०३ ॥ इदमेव आत्मैकत्वमेव ॥ हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् । इति गोतमः ॥ ३८ ॥ हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य अपदेशः कथनं प्रतिज्ञायाः प्रतिज्ञार्थस्य साध्यविशिष्टपक्षस्य वचनं निगमनम् । तथाच व्याप्तिविशिष्टपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः - व्याप्तपक्षधर्म हेतुज्ञाप्यसाध्यविशिष्टबोधकस्तादृशसाध्यबोधको वान्यावयवो निगमनमिति । अस्यान्वयिव्यतिरेकिभेदान्नभेद इत्याशयः । व्यतिरेकिणितु तस्मात्तथेत्येवाकार इत्यपरे ॥

निगमाचार्य्यवाक्यम् । न । वेदगुरुवचने । उपनिषद्व्याख्यानरूपदेशे ॥ निगमस्य आचार्यः तस्य वाक्यम् ॥ निगमाचार्य्ययोर्वा वाक्यम् ॥

निगमान्तः । पुं । उपनिषदि ॥

निगरः । पुं । भोजने ॥

निगरणः । पुं । गले ॥ होमधूमे इति शब्दरत्नावली ॥ न । भोजने । निगलना इति भाषा ॥

निगादः । पुं । निगदे । कथने ॥ निगदनम् । गद० । नौ गदेत्यब्भावे घञ् ॥

निगारः । पुं । भक्षणे । गरणे ॥ निगरणम् । गनिगरणे । उन्न्योर्ग्र इति घञ् ॥

निगालः । पुं । अश्वगलदेशे ॥ निगलत्यनेन । गल अदने । हलश्चेति घञ् । संज्ञापूर्वकत्वान्नवृद्धिः ॥ निगिरत्यनेन वा । गृ० । उन्न्योर्ग्र इति घञ् । अचि विभाषेति लत्वम् ॥ घण्टावन्धसमीपस्थो निगालः कीर्त्तितो बुधैः । तस्मिन्नेव मणिर्नाम रोमजः शुभकृन्मतः । इत्यश्वशास्त्रम् ॥

निगालवान् । पुं । अश्वे ॥ अस्त्यर्थे मतुप् ॥

निगीर्णः । त्रि । गिलिते । निगला इति भाषा ॥ निगीर्यते स्म । गृ० । क्तः ॥

निगूढः । पुं । वनवृक्षे ॥ त्रि । संवृते । गुप्ते ॥ यथा । आस्ते विधुः परमनिगूढ एव मौलौ यस्येति त्रिजगतीजनचित्तवृत्तिः । अन्तर्निगूढनयनानलपुञ्जदाहं जानाति कः स्मयमूर्त्ते वत शीतरश्मेः ॥ आलिङ्गिते ॥ नितरां गुह्यते स्म । गुह० । क्तः । यस्य विभाषेति नेडभावः ॥

निगूढतत्त्वः । त्रि । संवृतयाथार्थ्ये ॥ निगूढं तत्त्वं यस्य सः ॥

निगृहीता । त्रि । ताडिते ॥ पीडिते ॥

निगृहीतचेताः । त्रि । वशीकृतचित्ते ॥

निग्रहः । पुं । भर्त्सने ॥ मर्यादायाम् । सीमायाम् ॥ बन्धने ॥ अनुग्रहाभावे ॥ निराकरणे ॥ चिकित्सायाम् ॥ पराहङ्कृतिखण्डनरूपे निरोधे ॥ निषिद्ध प्रवृत्तितिरस्कारे ॥ मनसोनिरोधे ॥ सचहठनिग्रहरूपः क्रमनिग्रहरूपश्चेति द्विविधः ॥ मारणे ॥ प्रवृत्तिनिवृत्त्योर्निरोधे ॥ निवृत्तिकलयावस्थितौ ॥ नियमेनग्रहणम् । ग्रह० । ग्रहवृद्दिश्चप् ॥ निगृह्णातिना । कर्त्तरि पचाद्यच्वा ॥

निग्रहस्थानम् । न । गौतमोक्तषोडशपदार्थेष्वन्तिमे पदार्थे ॥ यथा । विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ ५९ ॥ निग्रहस्य खलीकारस्य स्थानंज्ञापकं निग्रहस्थानम् । तच्च विप्रतिपत्तिरप्रतिपत्तिश्च । विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः अप्रतिपत्तिः प्रकृताज्ञानम् । यद्यपि तदन्यतरत् परनिष्ठं नोद्भावयितुं शक्यम् प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुपपत्तिश्च तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरो ज्ञापकधर्मवत्त्वंतदर्थः । उद्देश्यानुगुणसम्यग्ज्ञानाभावप्रसिद्धत्वं प्रतिज्ञाहान्याद्यात्मकत्वंवा लक्षणमित्यपि वदन्ति ॥ प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तर मर्थान्तरं निरर्थक मविज्ञातार्थं मप्राप्तकालं न्यून मधिकं पुनरुक्त मननुभाषण मज्ञान मप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि । अथचस्वर्थे । तेनैतानि तु निग्रहस्थानानि न पुनरपस्मारादिना ऽननुभाषणादिकम् । नवाझटितिसंवरणेनतिरोहितावबाणी स्यर्थोवध्यत इतिप्राञ्चः । नव्यास्तु चकारोनुक्तसमुच्चये तेनहष्टान्तेसाधनवैकल्यादीनां परिग्रहः ॥

निग्राहः । पुं । शापे ॥ निग्रहणम् । आक्रोशेवन्योर्ग्रहइति घञ् । निग्राहस्ते हषलभूयात् वधस्त्यर्थः ॥ निग्रहे ॥

निघः । पुं । समविस्तारदैर्घ्ये । तुल्यारोहपरिणाहेवृक्षादौ ॥ नियतं निर्विशेषेणवा हन्यते ज्ञायते । निघो निमितमितिसाधुः ॥

निघण्टिका । स्त्री । गुलञ्चकन्दे ॥

निघण्टुः । पुं । नामसङ्ग्रहे ॥ इतिहेमचन्द्रः ॥

निघर्षः । पुं । घर्षणे ॥

निघसः । पुं । भोजने ॥ न्यदनम् । अद० । नौणश्चेत्यप् । घसपोश्चेति

घरूारेष: ॥

निघात: । पुं । अनुदात्ते ॥

निघाति: । स्त्री । लोहघातिन्याम् ।-लौहमयदण्डे ॥ निश्चयेन हन्ति । ह न० । वसिवपियजिराजिव्रजिसदिह नीभ्यादिना इञ् । कुत्वम् ॥

निघुष्टम् । न । घोषणे ॥ निघुष्यते स्म । घुषिरव्यक्तेशब्दे । क्त: ॥

निघृष्ट: । वि । घर्षिते । घसा इति भाषा ॥ यथा । सुरासुरशिरोरत्ननिघृष्टचरणोब्जिके ॥

निघृष्व: । पुं । खुरे ॥ निघृष्यते ऽनेन । घृषु सङ्घर्षे । सर्वनिघृष्वरिष्वेति साधु: ॥

निघ्न: । त्रि । आयत्त: अधीने ॥ निहन्यते निगृह्यते । हन्तेर्घञर्थेक: ॥ गुणिते ॥

निचय: । पुं । समुच्चये । वस्तुसमूहे ॥ यथा । सर्वेक्षयान्तानिचया: पतनान्ता: समुच्छ्रया: । संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितमिति ॥ निचीयते । चिञ्० । कर्मण्येरच् ॥

निचयक: । वि । निचये कुशले ॥ आकर्षादिभ्य: कन् ॥

निचयी । त्रि । उपचयवति ॥

निचाय: । पुं । राशीकृते धान्यादौ । ढेर इतिभाषा ॥ निचीयते राशीक्रियते । चीञ्० । परिमाणे परिमाणाख्यायां सर्वेभ्य इति घञ् ॥ यथा । एकस्तण्डुलनिचाय: । अन्वयात्प्रत्येकत्वेनसमुदायिनां परिच्छित्तिर्गम्यते ॥

निचि: । पुं । गो:कर्णशिरोदेशे ॥ इतिरभस: ॥

निचिकी । स्त्री । उत्तमायां धेनौ । नैचिकाम् ॥

निचित: । त्रि । सङ्कीर्णे ॥ आचित ॥ पूरिते । व्याप्ते ॥ निर्मिते ॥

निचुल: । पुं । हिज्जले ॥ निचोले ॥ निचोलति । चुलसमुच्छ्राये । चुरादीनांणिज्वा । इगुपधेतिक: ॥ वेतसवृक्षे ॥

निचुलकम् । न । निचोलके ॥ पुं । कुञ्चिकामत्स्ये ॥

निचूल: । पुं । हिज्जलद्रुमे ॥ निचोले ॥

निचोल: । पुं । प्रच्छदपटे । पिछौडा इतिभाषा ॥ येनतल्पशय्यादिप्रच्छाद्यते तस्मिन्नितिस्वामी ॥ दोलिकाद्यावरणपटइत्यन्ये ॥ स्त्रीपिधानपटे बुरका इतिप्रसिद्धे इत्यपरे ॥ निचोल्यते । चुल०चु० । घञ् ॥ यद्वा । चोड्यते । चुडकृतौ । चु० । घञ् । डलयोरेकता ॥

निचोलक: । पुं । भटादेश्चोलाकृतिसन्नाहे । कूर्पासे । वारवाणे ॥ न । कुञ्चिकामत्स्ये ॥

निचोली । स्त्री । प्रच्छदांशुके ॥

निच्छविः । स्त्री । तीरभुक्तिदेशे । तिरहुत इति भाषा ॥ इ० चि० ॥

निच्छिविः । पुं । वर्णसङ्करप्रभेदे । व्रात्यात् क्षत्रियात् सवर्णायामुत्पन्ने जातिविशेषे । झल्ले ॥ यथा । झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च । नटश्च करणश्चैव खसो द्रविड एव च ॥ इति मनुः ॥

निजः । त्रि । आत्मीये । स्वीये ॥ नित्ये ॥ निजायते । जनी० । उपसर्गे च संज्ञायामिति डः ॥

निजविभवः । पुं । स्वविभूतौ ॥

निजात्मा । पुं । परात्मनि ॥

निडीनम् । न । खगगतिप्रभेदे । पक्षिणः शनैर्याने ॥ निडीनं नीचैः पतनमिति महाभारतम् ॥ भक्ष्य माश्रयं वा पश्यतः पतने ॥

निण्डिका । स्त्री । सतीलायाम् । तिपुट्याम् । कलायभेदे । तेउडा इति गौडभाषा ॥

नितम्बः । पुं । स्त्रियः पश्चात् कटितटे ॥ स्कन्धे ॥ रोधसि ॥ कटेरधोभागे ॥ कटके ॥ कटिमात्रे ॥ नितम्बति नितम्यते वा । तम्ब गतौ । पचाद्यच् ॥ यद्वा । निभृतं तम्यते कामुकैः । तमु काङ्क्षायाम् ॥ ताम्यते सुरतसम्मर्दाद्वा । तमु ग्लानौ । उत्साद्यश्चेति साधुः ॥

नितम्बिनी । स्त्री । स्त्रीविशेषे ॥ अतिशयितो नितम्बो यस्याः । अत इनिठनाविति निः । ङीप् ॥ स्त्रीमात्रेपि ॥

नितराम् । अ । सुतरामर्थे ॥ अतिशयेनेत्यर्थे ॥ किमेत्तिङव्ययेत्यादिना अमुप्रत्ययः ॥

नितलम् । न । पातालविशेषे ॥

नितान्तम् । न । एकान्ते । अत्यन्ते । अतिशये ॥ त्रि । तद्वति ॥ नितान्यति स्म । तमु काङ्क्षायाम् । अकर्मकत्वात् कर्त्तरि क्तः । अनुनासिकस्येति दीर्घः ॥

नितान्तनिर्मलस्वान्तः । त्रि । अत्यन्तशुद्धान्तःकरणे ॥ नितान्तं निर्मलं स्वान्तं यस्य सः ॥

नित्यम् । न । सतते । अनारते । अजस्रे ॥ नियमेन भवम् । त्यब्नेर्ध्रुवे ॥ नियतम्भव इति वा ॥ प्रत्यवायजनकीभूताभावप्रतियोगिनि । यथा । एकादश्यामुपोषणं नित्यम् ॥ ध्वंसप्रागभावाप्रतियोगिनि । यथा । गगनं नित्यम् ॥ अहरहर्जायमाने । यथा । नित्यं क्रीडन्ति कुमाराः ॥ अहरहःक्रियमाणत्वेन विधिबोधिते । यथा ॥ स्नानतर्पणादिकं नित्यम् ॥

अनवच्छिन्नपरम्पराके । यथा । वर्णा नित्याः ॥ पुं । समुद्रे ॥ त्रि । शाश्वते । अजन्ये वस्तुनि । कालत्रयव्यापिनि । ध्रुवे । अविनाशिनि । अवाध्यसत्त्वे । आत्मस्वरूपे । ध्वंसाप्रतियोगिनि । उत्पत्तिविनाशरहिते । सर्वदाविद्यमाने । सर्वव्यापके ॥ नित्यवेदबोधितत्वेनाऽनादिपरम्परागते । पूर्वापरकोटिरहिते । सदकारणवति ॥ सहजे ॥ विनाशयोग्यतारूपदोषाभाववत्त्वं नित्यत्वम् ॥

नित्यकर्म्म । न । अकरणे प्रत्यवायसाधनेषु सन्ध्यावन्दनादिषु ॥ प्रत्यवायशब्देनागामिदुःखमुच्यते । येषामकरणे विद्यमाने तत्साध्यते ज्ञाप्यते तानि नित्यानीत्यर्थः । अकरणे प्रत्यवायलक्षणानि नित्यानीति यावत् ॥ निर्निमित्तमुपात्तदुरितक्षयार्थानि नित्यानीति नित्यकर्मलक्षणम् । तत्त्वकरणे प्रत्यवायोत्पादकानि नित्यानीति ॥ सन्ध्यावन्दनादीत्यादिपदात् पञ्चमहायज्ञादिग्रहः ॥ प्रत्यवायजनकाभावप्रतियोगिकार्यं नित्यकर्मेति स्मृतिः ॥ तद्यथा । नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा । गृहस्थस्य त्रिधा कर्म तन्निबोधमय पुत्रक ॥ पञ्चयज्ञाश्रितं नित्यं यदेतत्कथितन्तव । नैमित्तिकं तथा चान्यत् पुत्रजन्मक्रियादिकम् ॥ नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पण्डितैरिति मार्कण्डेयपुराणम् ॥

नित्यकर्म्मफलम् । न । मनःशुद्धौ ॥

नित्यक्षौरम् । न । वैधेतरक्षौरे । रागप्राप्तकेशच्छेदने ॥ यथा । चूडोदिते तिथौ वृद्धे बुधेन्द्वोर्दिवसे नरः । नित्यक्षौरं प्रकुर्वीत जन्ममासे न तु क्वचित् ॥

नित्यगतिः । पुं । वायौ ॥ नित्यं गतिरस्य ॥

नित्यतृप्तः । त्रि । परमानन्दस्वरूपलाभेन सर्वत्र निराकाङ्क्षे ॥ नित्येन निजानन्देन तृप्तः ॥

नित्यत्वम् । न । कालाद्यनवच्छिन्नत्वे । नास्यास्तीति लोकागमयोर्व्यवहारायोग्यत्वे ॥

नित्यदा । अ । शश्वदर्थे । सातत्ये ॥

नित्यदानम् । न । प्रतिदिनं दीयमानेदाने ॥ यथा । अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे । अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकमिति गरुडपुराणम् ॥

नित्यनैमित्तिकफलम् । न । मनःशुद्धौ ॥ पितृलोकप्राप्तिर्हि नित्यादीनामवान्तरफलम् । तद्यथा आमेष

स्वार्थेनिर्मिते छायागन्धावनुत्पद्येते इति छायागन्धवत्पितृलोकादिफलस्यावान्तरत्वमानुषङ्गिकम् । तदुद्देशेननित्यादेरविधानात् । किञ्चिद्दोषासंयोगस्य च विधानाच्छुद्धेरेव महाफलत्वम् ॥

नित्यप्रलयः । पुं । चतुर्विधप्रलयान्तर्गतप्रलयविशेषे ॥ यथा । नित्यः सदैवजातानां यो विनाशो दिवानिशम् ति । सदैव दीपज्वालावत् सातत्येन जातानां दिवानिशं यो विनाशः स नित्यप्रलय इत्यर्थः ॥

नित्यम् । अ । सातत्ये ॥

नित्यमुक्तः । त्रि । कालत्रयेपिबन्धशून्ये परमात्मनि ॥

नित्ययज्ञः । पुं । फलसंयोगंविना जीवनादिनिमित्तसंयोगेन चोदिते । सर्वाङ्गोपसंहारासम्भवे प्रतिनिध्याद्युपादानेन मुख्यकल्पेनानुष्ठेये ॥ नित्यश्चासौ यज्ञश्च ॥

नित्ययौवना । स्त्री । द्रौपद्याम् ॥ त्रि । स्थिरयौवने ॥

नित्यवैकुण्ठः । पुं । विष्णोः स्थानविशेषे ॥ यथा । ऊर्द्ध्वं नभसि संविष्टो नित्यवैकुण्ठएव च । आत्माकाशसमोनित्योविस्तृतश्चन्द्रविम्बवत् ॥ ईश्वरेच्छासमुद्भूतो निर्लक्ष्यश्चनिराश्रयः । आकाशवत् सुविस्तारश्चाममूल्यरत्ननिर्मितः ॥ तत्रनारायणः श्रीमान् वनमालीचतुर्भुजः । लक्ष्मीसरस्वती गङ्गातुलसीपतिरीश्वरः ॥ सुनन्दनन्दकुमुदपार्षदादिभिरन्वितः । सर्वेशः सर्वसिद्धेशो भक्तानुग्रहकारक इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायः ॥

नित्यसत्त्वस्थः । त्रि । सदासत्त्वगुणाऽऽश्रिते । रजस्तमसी अभिभूय सत्त्वमात्रालम्बने ॥ नित्यमचलं यत् सत्त्वं धैर्यापरपर्यायं तस्मिंस्तिष्ठति । ष्ठागतिनिवृत्तौ । कः ॥

नित्यसमासः । पुं । अविग्रहोनित्यसमास इत्युक्ते समासविशेषे ॥ समस्यमानयावत्पदरहितविग्रहश्चनित्यसमासः ॥

नित्या । स्त्री । उमायाम् । पार्वत्याम् । शिवायाम् ॥ प्रकृतौ ॥ शक्तिविशेषे ॥ मनसादेव्याम् ॥ नियमेन भवा । त्यब्नेर्ध्रुवे । टाप् ॥

नित्यानध्यायः । पुं । सर्वथावर्जनीयवेदपाठकालादौ । मन्वादिप्रोक्ते स्वाध्यायाभावनिमित्ते ॥ यथा द्वावेव वर्जयेन्नित्य मनध्यायौ प्रयत्नतः । स्वाध्यायभूमिञ्चाशुद्धा मात्मानञ्चाशुचिंद्विजइति ॥ विशेषस्तुस्मार्त्ति

स्य मनध्याया नधीयानो विवर्जयेदित्यादि मनुवचनेषु द्रष्टव्यः ॥

नित्यानित्यवस्तुविवेकः । पुं । ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमितिविवेचने ॥ ब्रह्मसत्यंजगन्मिथ्येत्येवंरूपोविनिश्चयः । सोऽयं नित्यानित्यवस्तुविवेकःसमुदाहृतः ॥ नित्यञ्च अनित्यञ्च नित्याऽनित्ये ते च ते वस्तुनी च नित्यानित्य वस्तुनी । नित्यानित्यवस्तुनोर्विवेकः पृथगात्मता ॥

नित्यानित्यस्वरूपिणी । स्त्री । मायाशवलब्रह्मरूपिण्याम् भुवनेश्वर्याम् ॥ नित्यंब्रह्म अनित्यंमाया तदुभयरूपिणी । तथाच भगवत्याउभयात्मकत्वात् कदाचिद्ब्रह्मरूपेणैव वर्णनं कदाचिच्छक्तिरूपेणैववर्णनमिति इच्छाशक्तिरूपत्वेन श्रुत्यागमपुराणादौ वर्णनेऽपिदोषाभावो-बोध्यः ॥

नित्याभियुक्तः । त्रि । अनवरत मादरेण ध्याने व्यापृते । देहयात्रामात्रार्थमप्य प्रयतमाने ॥ नित्यम् अभियुक्तः ॥ सततंतत्परे ॥

नित्योदकः । त्रि । कृतावश्योदककर्म्मणि ॥

निदम् । न । विषे ॥ इ०म०च० ॥

निदद्रुः । पुं । मनुष्ये ॥ त्रि । दद्रुरुग्रहिते ॥

निदर्शनम् । न । उदाहरणे । दृष्टान्ते ॥ ज्ञापके ॥ दृशिर्० । ल्युट् ॥ यथा । आत्माह्याकाशवज्जीवै र्घटाकाशैरिवोदितः । घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनमिति ॥ यदात्मन्दबुद्धिप्रतिपिपादयिषया श्रुत्यात्मनोजातिरुच्यते जीवादीनां तदाजातावुपगम्यमानायामेतन्निदर्शनं दृष्टान्तो यथोदित आकाशवदित्यादीति भाष्यम् ॥

निदर्शना । स्त्री । काव्यालङ्कारविशेषे ॥ तल्लक्षणं यथा । अर्थान्तरप्रवृत्तेन किञ्चित्तत् सदृशंफलम् । सदसत्त्वान्निदर्श्येत यदिसा स्यान्निदर्शना ॥ उदाहरणम् । उदयन्नेव सविता पद्मेष्वर्पयतिश्रियम् । विभावयितुमृद्धीनां फलं सुहृदनुग्रहमितिदण्डी ॥ प्राप्तौ ॥ यथा । शुभाशुभनिदर्शनेतिपुराणम् ॥

निदाघः । पुं । ग्रीष्मकाले । ज्येष्ठाषाढयोः । उष्णोपगमे ॥ उष्णे ॥ स्वेदाम्बुनि । घर्म्मे ॥ नितरां दह्यतेऽनेनवा । दह० । हलश्चेतिघञ् । न्यङ्कु० कुत्वम् ॥ पुलस्त्यतनये ऋभोः शिष्ये वेदान्तविष्णुपुराणयोः प्रसिद्ध

माहात्म्ये परमहंसावधूते ॥

निदाघकरः । पुं । सूर्य्ये । भानौ ॥ निदाघा उष्णाः करा अस्य ॥

निदाघकालः । पुं । ग्रीष्मर्त्तौ । ज्येष्ठाषाढमासयोः ॥ यथा । प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः सदावगाहक्षमवारिसञ्चयः । दिनान्तरम्यो ऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये ॥

निदानम् । न । कारणे । हेतौ ॥ आदिकारणे ॥ शुद्धौ ॥ तपसः फलयाचने ॥ वत्सदाम्नि ॥ अवसाने ॥ नितरां दीयते ऽसाधारणतया ज्ञायते ऽनेन । डुदाञ्० । करणेति ल्युट् ॥ रोगविनिर्णये । रोगहेतौ ॥ निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा । सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥ निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ॥ इति माधवः ॥

निदिग्धः । त्रि । उपचिते । लेपादिना वर्द्धिते । पुष्टिम्प्रापिते ॥ निदिह्यते स्म । दिह उपचये । क्तः ॥

निदिग्धा । स्त्री । एलायाम् ॥

निदिग्धिका । स्त्री । कण्टकारिकायाम् । कटहलीइति रिंगणी इति च भाषा ॥ निदिह्यतेस्म । दिह० । क्तः । टाप् ॥ स्वार्थे कन् ॥ एलायाम् ॥

निदिद्रासन् । त्रि । निद्रातुमिच्छति ॥ निद्रातेः सन्नन्ताल्लटः शत्रादेशः ॥

निदिध्यासनम् । न । श्रुतस्य मतस्य तथैव ध्याने ॥ निरन्तरं विचारो यः श्रुतार्थस्य गुरोर्मुखात् । तन्निदिध्यासनं प्रोक्तं तच्चैकाग्र्येण लभ्यते ॥ अनात्मन्यकचिच्चित्ते रुचिश्चात्मनि चेद्भवेत् । पुण्यपुञ्जेन शुद्धं तच्चित्तमैकाग्र्यमर्हति ॥ विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुनि सजातीयप्रत्ययप्रवाहे ॥ विजातीयप्रत्ययानन्तरितेन सजातीयप्रत्ययप्रवाहेण श्रवणमननफलभूतेनात्मचिन्तने ॥ निदिध्यासनं विचारविशेषात्मकम् । स च विचारविशेषो ध्यानात्मातद्ध्यानरूपं निदिध्यासनम् ॥ ताभ्यां निर्व्विचिकित्सेर्थे चेतसः स्थापितस्य यत् । एकतानत्वमेतद्धि निदिध्यासनमुच्यते ॥ ताभ्यां श्रवणमननाभ्याम् ॥ अपरायत्तबोधे ॥ अपरायत्तबोधो हि निदिध्यासनमुच्यते इति वार्त्तिकोक्तेः ॥

निदेशः । पुं । शासने । आज्ञायाम् ॥ कथने । परिभाषणे ॥ उपकण्ठे । उपान्ते ॥ भाजने ॥ निपूर्व्वाद्दिशेर्घञ् ॥

निदेशिनी । स्त्री । दिशि ॥ इति राजनिर्घण्टः ॥

निदेष्टा । त्रि । निदेशकर्त्तरि ॥ निदिशति । दिश० । तृन् ॥

निद्रा । स्त्री । शयने । स्वापे । स्वप्ने । संवेशे ॥ निद्रा च कालाग्निरुद्रपत्नी । यथा । कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी । सर्वे लोकाः समाच्छन्ना यया योगेन रात्रिषु इति । रात्रिषु योगेन सम्बन्धेन ॥ तत्त्वाप्रतिबोधे ॥ अभावप्रत्ययालम्बनायां वृत्तौ ॥ एतासां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बना वृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रम् ॥ सत्त्वरजउभयविरोधिन्यां तमोगुणालम्बनायां वृत्तौ ॥ * ॥ निद्राभिमानिनी काली तामसी शक्तिरिष्यते ॥ * ॥ यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ॥ कर्मात्मानः उभयविधानीन्द्रियाणि ॥ निद्राणम् । द्रा कुत्सायां गतौ । आतश्चेत्यङ् ॥ निन्दनम् निन्द्यते ऽनयेति वा । निन्देर्नलोपश्चेति रगिति वा ॥ * ॥ सुखं स्वपित्यनृणवान् व्याधिमुक्तश्च यो नरः । सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न शङ्कितः ॥ कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च । परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥ इति गारुडे नीतिसारः ॥

निद्राणः । त्रि । शयिते । निद्राङ्गते । सूता इति भाषा ॥ निद्राति स्म । द्रा० । अकर्मकत्वात् कर्त्तरि क्तः । संयोगादेरिति नः ॥

निद्रालुः । त्रि । शयालौ ॥ निद्राशीलः । द्रा० । स्पृहिगृहीत्यालुच् ॥ स्त्री । वनबर्व्वरिकायाम् ॥ वार्त्ताक्याम् ॥ नलीनामगन्धवस्तुनि ॥

निद्रावृक्षः । पुं । अन्धकारे ॥ इति शब्दमाला ॥

निद्रासञ्जननम् । न । श्लेष्मणि ॥

निधनः । पुं । न । कुले ॥ नाशे । मरणे ॥ अथाह शिखामणिमिश्रः । क्व गन्तासि भ्रातः कृतवसतयो यत्र धनिनः । किमर्थं प्राणानां स्थितिमनुविधातुं कथमपि । धनैर्याञ्चालभ्यैर्ननु परिभवोऽभ्यर्थनफलं निकारोऽग्रे पश्चाद्धनमहह भोस्तद्धि निधनमिति ॥ स्वर्चात्मसमर्चे ॥ अष्टमभवने ॥ निधानम् निधीयते ऽत्र । कृपृवृजीति क्युः ॥ साम्नो भक्त्यन्तरे ॥ पाञ्चभक्तिकस्य साम्नः पञ्चमभक्तौ ॥ त्रि । धनहीने ॥

निधानम् । न । शङ्खपद्मादिनिधौ ॥

आधारे । आश्रये ॥ निधीयते निक्षि
प्यते तत्कालभोगायोग्यतया काला
न्तरोपभोग्यं वस्त्वस्मिन्निति निधान
म् । निडुधाञ्० । ल्युट् ॥ कार्याव-
साने प्रवेशस्थाने ॥ यथा । एतन्नाना
वताराणां निधानं वीजमव्ययम् ॥

निधापनम् । न । स्थापने ॥

निधिः । पुं । शङ्खपद्मादिसामान्यनि
धौ । शेवधौ ॥ महापद्मादिनवविशे
षनिधिषु ॥ यथा । महापद्मश्च पद्म
श्च शङ्खो मकरकच्छपौ । मुकुन्दकु
न्दनीलाश्च खर्वश्च निधयो नवेति शब्दा
र्णवः ॥ मार्कण्डेयपुराणोक्ताष्टनिधि
षु ॥ यथा । क्रौष्टुकिरुवाच ॥ भगवन्क
थितं सर्वं विस्तरेण त्वया मम ॥ स्वारो
चिषोद्भवं जन्म तथा स्वारोचिषस्य
तु ॥ या तु सा पद्मिनी नाम विद्या भोगे
गोपपादिका ॥ तत्संश्रिता ये निधय
स्तान्मे विस्तरतो वद ॥ अष्टौ ये निधय
स्तेषां स्वरूपं द्रव्यसंस्थितिम् ॥ भवता
भिहितं सम्यक् श्रोतुमिच्छाम्यहं गुरो
॥ मार्कण्डेय उवाच ॥ पद्मिनी नाम या
विद्या लक्ष्मीस्तस्याश्च देवता ॥ तदा
धाराश्च निधयस्तान्मे निगदतः शृणु ॥ त
त्र पद्ममहापद्मौ तथा मकरकच्छपौ ॥
मुकुन्दकुन्दौ नीलश्च शङ्खश्चैवाष्ट
मो निधिः ॥ सत्यां ऋद्धौ भवन्त्येते सिद्धिः

सद्भवन्त्यमी ॥ एते ह्यष्टौ समाख्या-
ता निधयस्तव क्रौष्टुके ॥ एभिरालो
कितं चित्तं मानुषस्य महामुने ॥ या
दृक्स्वरूपं भवति तन्मे निगदतः शृणु
॥ पद्मो नाम निधिः पूर्वः स यस्य भवति
द्विज ॥ स तस्य तत्सुतानां च तत्पुत्रा
णां च नान्यगः ॥ दाक्षिण्यसारः पुरुष
स्तेन वाधिष्ठितो भवेत् ॥ सत्त्वाधा-
रो महाभोगो यतोऽसौ सात्त्विको नि-
धिः ॥ सुवर्णरूप्यताम्रादिधातूनां
च परिग्रहम् ॥ करोत्यतितरां सो
पि तेषां च क्रयविक्रयम् ॥ करोति च
तथा यज्ञान् दक्षिणाश्च प्रयच्छति ॥
सम्पादयति कामांश्च सर्वानेव यथा-
क्रमम् । सभादेवनिकेतांश्च स कार
यति तन्मनाः ॥ १ ॥ * ॥ सत्त्वाधारो
निधिश्चान्यो महापद्म इति स्मृतः ॥
सत्त्वप्रधानो भवति तेन चाधिष्ठितो-
नरः ॥ करोति पद्मरागादिरत्नानां च
परिग्रहम् ॥ समौक्तिकप्रवालानां ते
षां च क्रयविक्रयं ॥ ददाति योगशीले
भ्यस्तेषामावसथांस्तथा ॥ स कारय
ति तच्छीलः स्वयमेव च जायते ॥ त
त्प्रसूतास्तथा शीलाः पुत्रपौत्रक्रमे
ण च ॥ पूर्वर्द्धिमानः सप्तासौ पुरुषां
स्तन मुंचति ॥ महापद्मस्तु विप्राणाय
चार्थमुपजायते ॥ २ ॥ * ॥ तामसो

मकरोनामनिधिस्तेनावलोकितः ॥
पुरुषोऽधमः प्रायः सुशीलोऽपिहिजा
यते ॥ बाणखड्गर्ष्टिधनुषां चर्म्मणांच
परिग्रहम् ॥ दंशनानांच कुरुतेया
तिमैत्रींचराजभिः ॥ ददातिशौर्य्यवृ
त्तीनांभूभुजांयेचतत्प्रियाः ॥ क्रय
विक्रयशस्त्राणां नान्यत्रप्रीतिमेतिच
॥ एकस्यैव भवत्येषनरस्यनसुतानुगः
॥ द्रव्यार्थंदस्युतोनाशं संग्रामेवापिस
व्रजेत् ॥ ३ ॥ * ॥ कच्छपाख्योनिधि
र्यैन्योनरस्ते नाभिवीक्षितः ॥ तमः
प्रधानोभवतियतोसौतामसोनिधिः
॥ व्यवहारान्शिष्टैस्सपण्यजातं करो
तिच ॥ क्रियाः स्वानिखिलाश्चैवन-
विश्वसितिकस्यचित् ॥ समस्तानियथां
गानिनिगृह्यास्तेहिकच्छपः ॥ तथा
वष्टभ्यवित्तानितिष्ठत्याकुलमानसः ॥
नददातिनवाभुंक्तेतद्विनाशभयाकु-
लः ॥ निधानमुर्व्यांकुरुतेनिधिः सो
सोप्येकपूरुषः ॥ ४ ॥ * ॥ रजोगुणम
यश्चान्योमुकुन्दोनामयोनिधिः ॥ न
रोवलोकितस्तेन तद्गुणोभवतिद्विज
॥ वीणावेणुमृदंगादिगीतवाद्यपरि
ग्रहम् ॥ करोतिगायतांवित्तं नृत्यतां
चप्रयच्छति ॥ वंदिमागधसूतानांवि
टानांचास्यपाठिनाम् ॥ ददात्यर्थानि
भंभोगानभुंक्ते तैस्तु समंद्विज ॥ कु

लटासुरतिश्चास्य भवत्यन्यैश्चतद्वि-
धैः ॥ प्रयातिसंगमेकंचसनिधिर्भज
तेनरम् ॥ ५ ॥ * ॥ रजःसत्त्वमयश्चा
न्यः कुन्दोनाममहानिधिः ॥ उपैति
स्तंभमधिकंनरस्तेनावलोकितः ॥ स
मस्तधातुरत्नानां पण्यधान्यादिकस्य
च ॥ परिग्रहंकरोत्येषतथैवक्रयवि
क्रयम् ॥ आधारः स्वजनानांचाप्याग
ताभ्यागतस्यच ॥ सहतेनापमानोक्तिं
स्वल्पामपिमहामुने ॥ स्तूयमान
स्तमहतीं प्रीतिंवध्नातियच्छति ॥ यं
यमिच्छतिवैकामं मृदुत्वमुपयातिच
॥ वह्व्योभार्याभवन्त्यस्यसूतिमत्यो
तिशोभनाः ॥ तदन्वयेसप्तनरान्नि
धिः कुन्दोनुवर्त्तते ॥ प्रवर्द्धमानोनुन
रमष्टभागेनसत्तम ॥ दीर्घायुश्चैव
सर्वेषांपुरुषाणां प्रयच्छति ॥ वन्धूना
मेवभरणं येचदूरादुपागताः । तषां
करोतिवैकुन्दः परलोकेनचादृतः ॥
भवत्यस्यनरस्येवः सहवासिषुजायते
॥ पूर्वमित्रैस्सशैथिल्यं प्रीतिमन्यैः क
रोतिच ॥ ६ ॥ * ॥ तथैवसत्त्वतमसी
योविभर्त्तिमहानिधिः ॥ निधिः सनी
लस्तत्संगीनरस्तच्छीलभाग्भवेत् ॥
वस्त्रकर्पासधान्यादिफलपुष्पपरिग्रह
म् ॥ मुक्ताविद्रुमशंखानां शुक्त्यादी
नांतथामुने ॥ काष्ठादीनांकरोत्येष

यच्चान्यज्जलसंभवम् ॥ क्रयविक्रयम थ्येषांनान्यत्रंरम तेमनः ॥ तडागान् पुष्करिण्यश्चतथारामान्करोतिच ॥ बंधंचसरितां वृक्षांस्तथारोपयतेनरः ॥ अनुलेपनपुष्पादिभोगभोक्ताभिजायते ॥ त्रिपूरुषश्चापिनिधिर्नीलोनामेषजायते ॥ ७ ॥ * ॥ रजस्तमोमयश्चान्यः शंखसंज्ञोद्विजोनिधिः ॥ तेनापिनीयते विप्रसङ्गिनित्वंनिधीश्वरः । एकस्यैवभवत्येपनरं नान्य मुपैतिच ॥ यस्यशंखोनिधिस्तस्यस्वरूपंक्रोष्टुके शृणु ॥ एकएवात्मनामिष्टमन्नंभुंक्तेतथांवरम् ॥ कदन्नभुक्परिजनोनचशोभनवस्त्रधृक् ॥ नददातिसुहृद्भार्यासुतपुत्रस्नुषादिषु ॥ स्वपोषणपरः शंखीनरोभवतिसर्वदा ॥ ८ ॥ * ॥ इत्येतेनिधयः ख्यातानराणामर्थदेवताः ॥ मिश्रावलोकिताःमिश्रस्वभावफलदायिनः ॥ यथाख्यातस्वभावस्तुभवत्येकविलोकनात् ॥ सर्वेषामाधिपत्येच-श्रीरेषाद्विजपद्मिनी ॥ ४५ * ॥ इति श्रीमार्कण्डेयपुराणेनिधिलक्षणं नामपष्टितमोध्यायः ॥ ६० ॥ नितरांधीयते । धाञः किः ॥ नितरां दधाति पोषयत्यनेनपुनर्गृह्णाय-निधातृभिः निधीयतेवा । धिधारणे । सम्पदादित्वात् क्विप् । आगमशासनस्यानित्यत्वात् नतुक् ॥ आधारे ॥ यथा । गुणनिधिः ॥ नलिकानामगन्धद्रव्ये ॥ समुद्रे ॥ चिरमज्ञातस्वामिकभूयातधनविशेषे ॥ महाकालादिनिधिशास्त्रे ॥

निधित्सन् । त्रि । निधातुमिच्छति ॥ दधातेः सन्नन्ताल्लटः शत्रादेशः ॥

निधिनाथः । पुं ।
निधीशः । पुं । कुवेरे । धनदे ॥
निधीश्वरः पुं ।

निधुवनम् । न । कम्पे ॥ सुरते ॥ केलौ । लीलायाम् ॥ नितरां धुवनं हस्तपादादिचालनमत्र ॥

निध्यानम् । न । निर्वर्णने । दर्शने ॥ चाने ॥

निध्वानः । पुं । शब्दमात्रे ॥

निनङ्क्षुः । त्रि । नाशयितुमिच्छति ॥

निनदः । पुं । ध्वनौ । शब्दे ॥ निनदनम् । णद० । नौगदनदपठस्वनइति पचेऽप् ॥ रथस्येद्घोषे ॥

निनयनम् । न । निष्पादने ॥ निनीयते । णीञ० । ल्युट् ॥

निनादः । पुं । शब्दे ॥ निनदनम् । णद० नौगदनदेत्यादिनापचेघञ् ॥

निनादितः । त्रि । शब्दिते ॥

निनीषुः । त्रि । नेतुमिच्छौ ॥ यथा । उत्तमैस्सहवैरनित्यं सम्बन्धांनाचरे

बुधः । निनीषुःकुलमुत्कर्षमधमान धर्मांस्त्यजेदितिमनुः ॥

निन्दकः । त्रि । निन्दाकारके । निन्दाशीले ॥ निन्दति तच्छीलः । णिदि० । निन्दहिंसेतिवुञ् ॥ नभाराः पर्वताभारा नभाराः सप्तसागराः । निन्दकाहि महाभारा भाराविश्वासघातकाः ॥

निन्दतलः । त्रि । निन्दितहस्ते ॥

निन्दनम् । न । कुत्सने । निन्दायाम् ॥ णिदिकुत्सायाम् । ल्युट् ॥

निन्दा । स्त्री । अपवादे ॥ कुत्सायाम् । गर्हणे ॥ अविद्यमानदोषाभिधानं निंदेतिपरीवादाद्विशेषः । धीराःस्वनिन्दामेवसहन्ते न गुरुदेवादिनिन्दाम् ॥ आत्मानं यदि निन्दन्ति स्वात्मानं स्वयमेवहि । शरीरं यदि निन्दन्ति सहायास्तेजनाममः ॥ निन्दावमानावत्यन्तं भूषणं यस्ययोगिनः । धीविक्षेपःकथंतस्यवाचाटैः क्रियतामिह ॥ मन्निन्दयायदिजनःपरितोषमेतिनन्वप्रयत्नसुलभोयमनुग्रहोमे । श्रेयोर्थिनोहिपुरुषाःपरतुष्टिहेतोर्दुःखार्जितान्यपिधनानिपरित्यजन्तीतिशिल्हणमिश्राः ॥ निन्दनम् । णिदि० । गुरोस्तत्त्वरूतिभावेस्त्रियामः ॥ दोषकथने ॥ अनिष्टबोधनद्वाराविध्यर्थप्रवर्त्तकवचने ॥ नहिनिन्दानिन्द्यंनिन्दितुंप्रवर्त्तते ऽपितुविधेयं स्तोतुमितिन्यायः ॥

निन्दास्तुतिः । स्त्री । व्याजस्तुतौ ॥

निन्दितः । त्रि । गर्हिते । धिक्कृते । निन्दायुक्ते ॥ सर्वंव्यर्थं निन्दितस्योपदेशः ॥

निन्दुः । स्त्री । मृतवत्सायाम् ॥ निन्द्यते ऽप्रजात्वेनासौ । णिदेरौणादिकउः ॥

निन्द्यः । त्रि । गर्ह्ये ॥

निपः । पुं । कदम्बवृक्षे ॥ पुं । न । कलशे ॥ नियतं पिबन्त्यनेन । पा० । घञर्थेकः ॥

निपठः । पुं । पाठे ॥ निपठनम् । पठ० । नोगदनदेत्यप्वा ॥

निपत्या । स्त्री । पिच्छिलायाम्भूमौ । फिसलन् इतिभाषा ॥ निपतन्त्यस्याम् । पतॢ० । संज्ञायांसमजेतिक्यप् ॥ युद्धभूमौ ॥

निपाकः । पुं । पाके ॥

निपाठः । पुं । पठने । पाठे ॥ निपठनम् । पठ० । नोगदनदेत्यप्भावे घञ् ॥

निपातः । पुं । पतने ॥ मृतौ ॥ मिकृष्टःपातः ॥ चादिषु ॥ प्रादिषु ॥ निपातानांद्योतकत्वमेव नतुवाचकत्वमित्यभ्युपगमः ॥ निपतनम् ।

पतन्ल्ट॰ । घञ् ॥ उपसर्गातिरिक्तनिपातानांद्योतकत्त्वं वाचकत्त्वोभयस्वीकारो ऽव्ययंविभक्तीतिसूत्रे भाष्ये स्पष्टस्तेनतेषांवाचकत्त्वमपि ॥ उपसर्गाणांतुद्योतकत्त्वमेवेति गतिर्गताविच्यवभाष्ये स्पष्टम् ॥

निपातनम् । न । अधोनयने । अवनाये ॥ पतेः स्वार्थण्यन्ताल्ल्युट् ॥ लक्षणानुत्पन्नपदसाधने ॥ यल्लक्षणेना ऽनुत्पन्नंतत् सर्वंनिपातनात् सिद्धम् । निपातनादिष्टसिद्धिरित्युक्तेश्च ॥

निपातितः । त्रि । निक्षिप्ते ॥

निपानम् । न । आहावे । उपकूपजलाशये । कूपोद्धृतजलस्थले । कूपादिसमीपे पशूनां जलपानार्थमुदकाधारे । खेल इतिभाषा ॥ नियतं पिबन्त्यस्मिन् । करणेतिपातेर्ल्युट् ॥ गोदोहनपात्रे । दोहन्याम् ॥

निपीडितः । त्रि । कृतपीडने । निचोडा इति निपीला इतिच भाषा ॥ नितरांपीडितः ॥

निपुणः । त्रि । प्रवीणे । विज्ञे । निष्णाते । कार्यक्षमे । तर्कादिकुशले । शिक्षिते ॥ यथा । निपुणोपि न कर्त्तव्यो वाग्वादश्चक्रमध्यत इत्यागमः ॥ निपुणति । पुण्यकर्मणिशुभे । इगुपधेतिकः ॥ कार्येषुसूक्ष्मदृष्टौ ॥

निफला । स्त्री । ज्योतिष्मत्याम् ॥

निफेनम् । न । अफेने ॥ इतिराजनिघण्टः ॥

निबद्धः । त्रि । वशीकृते ॥ निबध्यतेस्म । बधबन्धने । क्तः ॥ अनुबद्धे ॥ रचिते ॥

निबन्धः । पुं । आनाहरोगे । मूत्रादिरोधे ॥ ग्रन्थस्यवृत्तौ । सङ्ग्रहविशेषे ॥ प्रतिवर्षम् प्रतिमासादिवादातव्यत्त्वेन प्रतिश्रुतवस्तुरूपे ॥ निश्चयत्त्वे ॥ बन्धे ॥ यथा दैवीसम्पद् विमोक्षाय निबन्धायासुरी मतेति ॥ निबन्धनम् । बन्धबन्धने । घञ् ॥ न । गीते ॥ इति शब्द॰ ॥

निबन्धनम् । न । बन्धने ॥ हेतौ ॥ वीणातन्त्रीनिबन्धनेोर्द्ध्वभागे । उपनाहे ॥ निबध्यते ऽनेनास्मिन्वा । बन्ध॰ । करणाधिकरणयोश्चेति ल्युट् ॥

निबन्धितः । त्रि । बद्धे ॥ निबन्धः सञ्जातोस्य । तारकादित्त्वादितच् ॥

निबोधितः । त्रि । उपदिष्टे ॥

निभः । पुं । व्याजे ॥ त्रि । उत्तरपदस्थः सदृशे ॥ यथा । पितृनिभः पुत्रो मातृनिभाकन्येष्टनिभमपत्त्यमिति ॥ नियतं भाति । भा॰ । आतश्चोपसर्गइतिकः ॥ प्रकाशे ॥

निभालनम् । न । दर्शने ॥

निभूतम् । त्रि । भूतकाले । अतीते ॥ इति राजनिर्घण्टः ॥

निभृतः । त्रि । विनीते ॥ धृते ॥ नितरामभारि । भृञ्० । क्तः ॥ निश्चले ॥ एकाग्रे ॥ नितराम् पोषिते ॥ नितराङ्गुप्ते ॥ निर्ज्जने ॥ यथा । निभृतनिकुञ्जगृहङ्गतया निशि रहसि निलीयवसन्तमिति जयदेवः ॥ खाताद्यवच्छिन्ने ॥ अस्तायोपस्थिते ॥ यथा । नभसानिभृतेन्दुना तुल्यामितिरघुः ॥

निमग्नः । त्रि । जलादौनितराम् प्रविष्टे ॥

निमज्जथुः । पुं । शयने ॥ यथा । तल्पे कान्तान्तरैः सार्द्धमन्यद्दधिङ्निमज्जथुमिति भट्टिः ॥

निमज्जनम् । न । अवगाहने । स्नाने ॥

निमन्त्रणम् । न । नियोजनविशेषे ॥ यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम् । यथा । इहभुञ्जीतभवान् ॥ यस्याकरणे प्रत्यवायोन स्यात् तदामन्त्रणम् । यथा । इहशयीत भवान् । इतिमुग्धबोधटीका ॥

निमन्त्रितः । त्रि । भोजनार्थं नियोजिते ॥

निमयः । पुं । परिवर्त्तने । परिदाने । विनिमये ॥ निमीयते । मीञ् हिंसायाम् । एरच् ॥

निमातव्यः । त्रि । परिवर्त्तनीये ॥ मेङोरूपम् ॥

निमानम् । न । मूल्ये ॥ निमीयते क्रीयतेऽनेन । माङ्० । ल्युट् ॥

निमिः । पुं । इक्ष्वाकुराजः पुत्रे ॥

निमितः । त्रि । समन्तान्मिते ॥

नमित्तम् । न । उत्पत्तिमात्रकारणे । हेतौ ॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधि राकाशकल्पः । रवि र्लोकचेष्टानिमित्तं यथा यः सनित्योपलब्धिस्वरूपोहमात्मा ॥ लक्ष्मणि ॥ शरव्ये ॥ शकुने ॥ निमित्तानिचपश्यानि विपरीतानिकेशव ॥ निमित्तान्येव शंसन्ति शुभाशुभफलोदयम् । तस्मा देतानि शास्त्रज्ञोराजा समुपलक्षयेत् ॥ फले ॥ निमेद्यति । ञिमिदा० । क्तः । संज्ञापूर्वकत्वान्ननत्वम् । अनात्मने पदनिमित्तइति निर्द्देशाद्वा ॥

निमित्तकम् । न । चुम्बने ॥ निमित्ते ॥

निमित्तकारणम् । न । समवाय्यसमवाय्युभयभिन्ने कारणे ॥ यथा । तुरीवेमादिकम् पटस्य । यथा वा द्व्यणुकस्येश्वरः । घटम् प्रतिच कुलालदण्डचक्रसलिलसूत्रादिकमिति ॥

निमित्तकृत् । पुं । काके ॥ इतिराजनि० ॥

निमित्तवित् । पुं । दैवज्ञे ॥ इति हेमचन्द्रः ॥ शकुनज्ञे ॥

निमिषः । पुं । कालप्रभेदे ॥ अक्षिनिमीलने । अक्षिपक्ष्मणोःस्वाभाविकस्योन्मेषस्यसहकारिणि ॥ निमिषति । मिष० । पचाद्यच् । कुटादित्वान्न गुणः ॥ इगुपधत्त्वात्कोवा ॥

निमिषितम् । न । अक्षिव्यापारे ॥

निमीलम् । न । दीर्घनिद्रायाम् ॥

निमीलनम् । न । मरणे ॥ सङ्कोचने ॥ निमेषे ॥ मीलनिमेषणे । ल्युट् ॥

निमीलिका । स्त्री । व्याजे ॥ निमीलने ॥

निमीलितः । त्रि । मोहिते ॥ कृतनिमीलने ॥

निमेयः । पुं । परिवर्त्ते । नैमेये ॥ निमीयते । माङ्माने । अचोयत् । ईद्यति ॥

निमेषः । पुं । अक्षिनिमीलने । नेत्रपक्ष्मणोःस्वाभाविकस्योन्मेषस्यसहकारिणि । पलकमीचना इतिभाषा ॥ यथा । निमेषोन्मेषाभ्याम् प्रलयमुदयंयातिजगतीति ॥ दृष्टिनिमीलनात्मके । कालप्रभेदे । पक्ष्मस्पन्दनकाले ॥ पुंसोयावत्कालमकृत्रिमनेत्रविकाशानन्तरं पक्ष्माकुञ्चनं जायते सनिमेषः । इत्यमरटीकायाम्भरतः ॥ अक्षिपक्ष्मपरिक्षेपोनिमेषः परिकीर्त्तितः । द्वौनिमेषौत्रुटिर्नामद्वेत्रुटीतुलवः स्मृतः । इत्यग्निपुराणम् ॥ लघ्वक्षरोच्चारणमात्रेकाले ॥ लवद्वये ॥ निमिषति । मिषस्पर्षणे । इगुपधेतिकः ॥

निमेषकः । पुं । निमेषे ॥

निमेषकृत् । स्त्री । तडिति ॥ निमेषं करोति । डुकृञ्० । क्विप् ॥

निमेषरुक् । पुं । खद्योते ॥ इतित्रिकाण्डशेषः ॥

निम्नम् । त्रि । गभीरे । नीचा इतिगहरा इतिचभाषा ॥ निमनति । म्ना अभ्यासे । आतश्चेतिकः ॥ वृक्षादिषुवल्ल्यादिवेष्टनाज्जाते वाढा इतिप्रसिद्धे चिह्ने ॥

निम्नगा । स्त्री । नदीमात्रे ॥ त्रि । नीचगामिनि ॥ निम्नङ्गच्छति । गम्लृ० । अन्येभ्योपीतिडः ॥

निम्नोन्नतम् । त्रि । उन्नतानते । वन्धुरे ॥

निम्बः । पुं । अरिष्टे । सर्वतोभद्रे । पिचुमर्द्दे । नीम् इतिभाषा ॥ निम्बः शीतो लघु ग्राही कटुपाकोऽग्निवातहृत् । अहृद्यःश्रमतृट्कासज्वरारुचिकृमिप्रणुत् ॥ व्रणपित्तकफच्छर्द्दिकुष्ठहृल्लासमेहनुत् ॥ * ॥ निम्बप

पक्वमुक्तं नेत्र्यं कृमिपित्तविषप्रणुत् । वातलं कटुपाकञ्च सर्वारोचककुष्ठनुत् ॥ * ॥ नैम्बंफलंरसेतिक्तं पाकेतुकटुभेदनम् । स्निग्धंलघूष्णंकुष्ठघ्नंगुल्मार्शःकृमिमेहनुत् ॥ * ॥ निम्बशाकस्तु । निम्बस्यकोमलदलानि सुयत्नभृष्टान्याज्ये चिपेत्तदनुसैन्धवतक्रयुक्तान् । शालीयतण्डुलकणान् सशर्करामठेनचाघारितादद्दतिरोचनमेवलेश्याः ॥ * ॥ निम्बति स्वास्थ्यम् । णिविसेचने । पचाद्यच् । वबयोरैक्यम् ॥ करञ्जनिम्बजफलंकृमिकुष्ठप्रमेहजित् ॥ * ॥ निम्बतैलन्तु कुष्ठघ्नंतिक्तंकृमिहरम् परमितिराजवल्लभः ॥ क्वायेत्वगग्राह्या ॥

निम्बकः । पुं । अरिष्टद्रुमे ॥ स्वार्थेकः ॥

निम्बतरुः । पुं । मन्दारवृक्षे । वकायन इतिभाषाप्रसिद्धे पारिभद्रे ॥ नियमयति । यमउपरमे । पृ० । निंबतिवा । णिविसेचने । पचाद्यच् । वबयोरैक्यम् । कर्मणिघञ्वा । निम्बसंज्ञकस्तरुः । शाकपार्थिवादिः ॥

निम्बवीजः । पुं । राजादनीवृक्षे ॥

निम्बुकम् । न । } निम्बूके । कागदी

निम्बूः । स्त्री । } नींबू इतिभाषा ॥

निम्बूकम् । न । अम्लजम्बीरे । शोधने । निंबाम् । दीप्ते ॥ निम्बूकमम्लंवातघ्नंदीपनंपाचनंलघु ॥ * ॥ निम्बुकं कृमिसमूहनाशनं तीक्ष्णमम्लमुदरग्रहापहम् । वातपित्तकफशूलिने हितं कष्टनष्टरुचिरोचनम् परम् ॥ त्रिदोषवह्निक्षयवातरोगनिपीडितानांविषविह्वलानाम् । मलग्रहेवद्वगुदेप्रदेयं विसूचिकायांमनयोवदन्ति ॥ * ॥ भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् । लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥ निम्बूफलभवं पानमत्यम्लं वातनाशनम् । वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥ इतिराजनि० ॥

निम्लोचन् । त्रि । अस्तङ्गच्छति ॥

निम्लोचनम् । न । अस्तङ्गमने ॥

नियतः । त्रि । निश्चिते ॥ निश्चये ॥ आचारनिष्ठे ॥ वशीकृतेन्द्रिये ॥ न । नित्यकर्मणि ॥ नियच्छति । यम० । अकर्मकत्वात्कर्त्तरिक्तः । मलोपः ॥ नियततेवा । यती० । पचाद्यच् ॥

नियतात्मा । त्रि । समाहितचित्ते ॥ सुशिक्षितमनसि ॥ नियतः आत्मा यस्य ॥

नियतिः । स्त्री । नियमे ॥ दैवे । दिष्टे । भागधेये । प्राक्तनशुभाशुभकर्मणि ॥ नियम्यतेऽनया । यमउपरमे । क्तिन् ॥

नियती । स्त्री । दुर्गायाम् ॥
नियतेन्द्रियः । त्रि । इन्द्रियदमनशीले । संयतेन्द्रिये ॥
नियन्ता । पुं । सारथौ ॥ त्रि । शासितरि ॥ पशुप्रेरके ॥ नियच्छतिर्विशिष्टेविषये स्थापयति । अन्तर्भावितण्यर्थोवा । यम० । तृच् ॥
नियन्त्रितः । त्रि । अनर्गले । अबाधे ॥ इतिहेमचन्द्रः ॥ नितरांयन्त्रितः ॥ नियमिते ॥
नियमः । पुं । यन्त्रणे ॥ प्रतिज्ञायाम् । अङ्गीकारे ॥ निश्चये ॥ यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधोगम्यते पञ्च पञ्चनखाभक्ष्याइत्युक्ते गम्यते एतदतोऽन्येऽभक्ष्याइति । अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । तद्यथा । अभक्ष्योग्राम्यकुक्कुटः अभक्ष्योग्राम्यसूकरइत्युक्ते गम्यते एतद् आरण्योभक्ष्यइतिमहाभाष्यम् ॥ भक्ष्यनियमइति भक्ष्यानुमतिरूपउपदेशइत्यर्थइति विवरणम् ॥ * ॥ प्रतिज्ञानिश्चये ॥ इतिमेदिनी ॥ व्रते ॥ आगन्तुसाधने ॥ यथा । नियमस्तुसयत्कर्माऽनित्यमागन्तुसाधनम् । यत् कर्म च नित्यम् न तु यावज्जीवंकर्त्तव्यम् आगन्तुभिःकादाचित्कैः कामनया-समयविशेषादिभिःसाधनैः साध्यमु पवासस्नानजपादि तन्नियमइत्यर्थः ॥ * ॥ नित्यकर्मणि । तत्तदाश्रमविहिताचरणे ॥ * ॥ शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानेषु पञ्चसु ॥ जपोपवासप्रदक्षिणा नमस्कारादिरूपाः पुराणेयेऽधिकाउक्तास्तेएव्वेवपञ्चस्वन्तर्भाव्याः ॥ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः । नियमोगुरुशुश्रूषाशौचाक्रोधाप्रमादता ॥ * ॥ अक्रोधादिषु ॥ अक्रोधोगुरुशुश्रूषाशौ माहारलाघवम् । अप्रमादश्चसततंपञ्चैतेनियमाःस्मृताः ॥ * ॥ तपआदिदशसु । यथा । तपःसन्तोषआस्तिक्यंदानंदेवस्यपूजनम् । सिद्धान्तश्रवणञ्चैवह्रीर्मतिश्चजपोहुतम् ॥ दशैतेनियमाःप्रोक्तामयापर्वतनायकेतिदेवीगीता ॥ नियच्छति अनेनवा नियमनंवा । यमउपरमे- । पचाद्यच् । यमःसमुपनिविषुचेत्यप् वा ॥ सजातीयप्रवाहश्चविजातीयतिरस्कृतिः । नियमोहिपरानन्दो नियमात्क्रियतेवुधैः ॥ वेदशब्दानियमपूर्वमधीताःफलवन्तोभवन्तीति महाभाष्यम् ॥
नियमनम् । पुं । नियमे ॥ निग्रहे । बन्धे ॥ वर्त्तेर्नियमनमितियथा ॥
नियमविधिः । पुं । नानासाधनसाध्य-

क्रियाया मेकसाधनप्राप्ता वप्राप्तस्या परसाधनस्य प्रापके विधैा ॥ नियम: पाचिकेसतीत्युक्ते: । पचे ऽप्राप्तस्य प्रापकोविधिर्नियमविधिर्भवति । यथा व्रीहीनवहन्तीत्यादि: । कथमस्यपचे ऽप्राप्तप्रापकत्वमितिचेत् इत्थम् । अनेना ऽवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्धत्वात् किन्तुनियम: । सचाप्राप्तांशपूरणम् । वैतुष्यंहिनानोपायसाध्यत्वात् यदावघातंपरित्यज्योपायान्तरंगृहीतुमारभ्यतेतदा ऽवघातस्या प्राप्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमेवानेनविधिनाक्रियते । अतश्चनियमविधावप्राप्तांशपूरणात्मकोनियमएववाक्यार्थ: । पचे ऽप्राप्तावघातविधानमितियावत् ॥

नियमित: । चि । कृतनियमे ॥ बद्धे ॥ नियम: सञ्जातोस्य । ता०इतच् ॥

नियाम: । पुं । नियमे ॥ नियमनम् । यम० । यम: समुपनिविषुचेतिघञ् ॥

नियामक: । पुं । नजिरा इतिप्रसिद्धे गुणवृचोपरिस्थिते पोतवाहे ॥ कर्णधारे ॥ नियच्छतिपोतम् । यमनियमने । ण्वुल् ॥ त्रि । नियन्तरि ॥

नियामिका । स्त्री । नियमनकर्त्त्रीम् ॥

नियुक्त: । चि । अधिकृते ॥ नियोजिते ॥ आज्ञप्ते । प्रेरिते ॥ यथानियुक्तो ऽस्मितथा करोमि ॥ नियुज्यतेस्म । युजिर० । क्त: ॥ अवधारिते इतिराधाकान्त: ॥

नियुतम् । न । लचे । १००००० ॥ इति लीलावती ॥ शतं सहस्रमयुतं नियुतं प्रयुतं मतम् । स्त्रीकोटिरर्वुदमितिक्रमाद्दशगुणोत्तरमिति रत्नकोश: ॥ धेनूनां नियुत प्रादाद्विप्रेभ्य: समलङ्कृते । इत्यचनियुते इलचे इति श्रीधरस्वामी ॥ * ॥ दशलचे १०००००० । प्रयुते ॥ यथा । एकं दश शतञ्चैव सहस्र मयुतं तथा । लचञ्च नियुतञ्चैवकोटि रर्वुद एवच ॥ वृन्द: खर्वो निखर्वश्च शङ्खपद्मोच सागर: । अन्त्यं मध्यं परार्द्धञ्च दश वृद्ध्या यथोत्तरम् ॥ इतिपुराणम् ॥

नियुद्धम् । न । बाहुयुद्धे ॥ निगृह्य नितरांवा युद्धम् ॥

नियोग: । पुं । अवधारणे ॥ आज्ञायाम् ॥ कार्य्ये ॥ नियुज्यते ऽस्मिन् । युजिर० । घञ् ॥

नियोगी । त्रि । नियुक्ते । कर्मसचिवे । नियोगविशिष्ट ॥ नियोगो ऽस्यास्ति । इनि: ॥

नियोग्य: । त्रि । नियोगार्हे । प्रभैा ॥

नियोजनम् । न । स्थापने ॥ युजिर्० । ल्युट् ॥ नियोगे । प्रेरणे ॥ त्वयैतत् क्रियतामिति क्रियासु नियोजनम् प्रेरणमित्यर्थात् ॥

नियोजितः । त्रि । नियुक्ते ॥

नियोज्यः । त्रि । प्रेष्ये । भृत्ये ॥ नियुज्यते । युजिर्० । नियोक्तुं शक्य इत्यर्थे प्रयोज्यनियोज्यौ शक्यार्थे इति ण्यति कवर्गाभावो निपातनात् ॥

नियोद्धा । पुं । कुक्कुटे ॥ इति राजनिर्घण्टः ॥ बाहुयुद्धकारिणि ॥

निर् । अ । निर्णये ॥ निषेधे ॥ वहिर्भावे ॥ क्रान्ताद्यर्थे ॥ नृणाति । नृनये । क्विप् । ऋत इत् ॥ निःशेषे ॥

निरंशः । पुं । राशेः प्रथमभागे ॥ त्रि । अंशरहिते ॥ निर्गतोंऽशात् ॥

निरंशकः । त्रि । निरंशे ॥ स्वार्थे तद्धितः ॥ यथा । पतितस्तत्सुतः क्लीवः पङ्गुरुन्मत्तको जडः । अन्धोऽचिकित्सरोगार्त्ता भर्त्तव्यास्ते निरंशकाः ॥ तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते ॥

निरंशसूर्य्यः । पुं । राशेः प्रथमभागस्थे भानौ ॥ राशेः प्रथमभागस्थो निरंशः सूर्य उच्यते ॥

निरक्षदेशः । पुं । अक्षदेशे । पलभाशून्यस्थाने ॥ सत्तु पूर्व्वे भद्राश्ववर्षे यमकोटिः । दक्षिणे भारतवर्षे लङ्का । पश्चिमे केतुमालवर्षे रोमकः । उत्तरे कुरुवर्षे सिद्धपुरी । एताः भूवृत्तपादविवराः अन्योन्यम् प्रतिष्ठिताः । तासामुपरितो विषुवस्थो दिवाकरो याति । तासु विषुवच्छाया ध्रुवस्योन्नतिश्च न दृश्यते । अत्र दिवामानं रात्रिमानञ्च त्रिंशन्नाडिकाः । इति सूर्य्यसिद्धान्तमतमिति राजाराधाकान्तः ॥

निरग्निः । पुं । अग्निसाध्यश्रौतकर्म्मत्यागिनि ॥ निरग्निब्राह्मणाः कलौ ॥

निरङ्कुशः । त्रि । अनिवार्य्ये । अबाधे । बाधाशून्ये ॥ इति जटाधरः ॥

निरञ्जनः । त्रि । अञ्जनशून्ये । धौतकज्जले । निर्म्मले ॥ अविद्यया अप्रत्यक्षे मनश्चक्षुराद्यविषये परमात्मनि ॥ उपाधिनिवर्त्तके ॥ अञ्जनवदञ्जनमज्ञानं मलिनस्वभावत्वात् तन्निर्गतं यस्मात् सः ॥

निरञ्जना । स्त्री । पूर्णिमायाम् ॥ अञ्जनहीनायाम् ॥

निरतः । त्रि । नियुक्ते ॥ यथा षट्कर्म्मनिरत इति ॥

निरतिशयः । त्रि । अतिशयाभावे ॥ निर्गतः अतिशयो ऽस्मात् ॥

निरत्ययः । त्रि । निर्बाधे ॥ अमायिके ॥ निर्गतोऽत्ययो यस्य । निष्क्रान्तोऽ

त्ययाद्वा । निरादय इतिसमासः ॥

निरनुयोज्यानुयोगः । पुं । निग्रहस्थानाभियोगोनिरनुयोज्यानुयोग इति गोतमलक्षिते निग्रहस्थाने ॥ अनवसरे यथार्थ निग्रहस्थानोद्भावनातिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः । एतेनानवसरे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावनेच नातिव्याप्तिः । सोयं चतुर्धा । छलं जातिराभासोऽनवसरग्रहणञ्च । आभासो व्यभिचारादावसिद्ध्याद्युद्भावनम् । अनवसरग्रहणञ्च अकाले एवोद्भावनम् । यथा न्यूनसिद्धेन् प्रतिज्ञाहानिः विशेषयसिचेत् हेत्वन्तरम् । एवमवसरमतीत्यकथनमपि । यथा । उच्यमानग्राह्यस्यापशब्दादेः परिसमाप्तौ । एवमनुक्तग्राह्यानामननुभाषणावसरेऽनुद्भाव्यबोधाविष्करणानुभाषणप्रवृत्ते वादिनि तदुद्भावनमित्यादिकमूह्यम् ॥ इति ५ ध्याये ६५ सूत्रम् ॥

निरन्तरः । त्रि । घने । निबिडे । सान्द्रे ॥ निरवधौ ॥ नीरंध्रे ॥ निर्गतमन्तरात् । निर्गतमन्तरमस्मिन्वा ॥

निरन्तराभ्यासः । पुं । स्वाध्याये ॥ सततावर्त्तने ॥ निरन्तरश्चासावभ्यासश्च ॥

निरपत्रपः । त्रि । धृष्टे । निर्लज्जे ॥ निर्गतोऽपत्रपाया लज्जायाः ॥

निरपेक्षः । त्रि । अपेक्षारहिते । अनपेक्षे ॥ विगतस्पृहे ॥ यथा । निरपेक्षोगृहादियाहिति ॥ निर्गताअपेक्षा यस्य ॥ निःसङ्गे ॥

निरयः । पुं । नरके ॥ निर्गतोऽयात् ॥

निरयपतिः । पुं । यमपुरुषे ॥

निरर्गलः । त्रि । अबाधे । अर्गलारहिते । अनर्गले ॥ निष्क्रान्तमर्गलायाः । निरादयइतिसमासः ॥

निरर्थः । त्रि । मोघे ॥

निरर्थकः । त्रि । निष्फले । मोघे ॥ न । निग्रहस्थानविशेषे । निरर्थकंलक्षयतिगोतमः । वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ५१ ॥ वर्णानां क्रमेण निर्देशो जवगतेत्यादिप्रयोगस्तत्तुल्यो निर्देशो निरर्थकं निग्रहस्थानम् । अवाचकपदप्रयोगइतिफलितार्थः । वाचकत्वं शक्त्या निरूढलक्षणया शास्त्रपरिभाषया वा बोध्यम् । समयबन्धव्यतिरेकेणेति विशेषणीयम् । तेन यत्रापभ्रंशेन विचारःकर्त्तव्यइतिसमयबन्धस्तत्रापभ्रंशे नदोषः । झटितिसंवरणेतु नदोषइत्युक्तप्रायम् । अस्यसम्भवःप्रमादादित्यवधेयम् ॥

५१ ॥ निर्गतोऽर्थोऽस्मात् ॥

निरवग्रहः । त्रि । स्वच्छन्दे ॥ निष्क्रान्तोऽवग्रहात् नियमनात् । निरादय इति समासः ॥ वृष्टिप्रतिबन्धाभावे ॥

निरवद्यः । त्रि । उत्कृष्टे ॥ वातपित्तादिजन्याध्यात्मिकादितापत्रयरहिते आत्मनि ॥ रागादिशून्ये ॥

निरवयवः । पुं । परमाणौ ॥ त्रि । अवयवहीने ॥

निरवशेषः । त्रि । सर्व्वस्मिन् ॥

निरवसितः । त्रि । वहिष्कृते । येन भुक्ते पात्रं संस्कारेणापि न शुद्ध्यति तत्र । चाण्डालादौ ॥

निरवहालिका । स्त्री । प्राचीरे ॥ इति शब्दमाला ॥

निरशनम् । न । भोजनाभावे । अनशने ॥ त्रि । तद्वति ॥

निरसनम् । न । प्रतिक्षेपे । प्रत्याख्याने ॥ असुक्षेपणे । ल्युट् ॥ वधे । निसूदने ॥ निष्ठीवने ॥

निरसा । स्त्री । निःश्रेणिकातृणे ॥

निरस्तः । त्रि । निष्ठ्यूते ॥ प्रेषितशरे ॥ द्रुतोदिते । त्वरितोदिते ॥ सन्त्यक्ते ॥ प्रतिहते ॥ प्रत्याख्याते ॥ भर्त्सिते ॥ निरस्यतेस्म । असु० । क्तः ॥

निरस्तदयः । त्रि । निष्कृपे ॥

निरहङ्कारः । त्रि । शरीरेन्द्रियाद्यवयवमहमस्मीत्यभिमानशून्ये ॥ विद्यावत्त्वादिनिमित्तात्मसम्भावनाविरहिते ॥

निराकः । पुं । पचने ॥ स्वेदे ॥ असत्कर्म्मफले ॥ इति हेमचन्द्रः ॥

निराकरणम् । न । निराकृतौ । निवारणे ॥ निराक्रियतेऽनेन । डुकृञ० । ल्युट् ॥

निराकरिष्णुः । त्रि । क्षिप्णौ । निराकरणशीले ॥ निराकरोति तच्छीलः । अलङ्कृञितीष्णुच् ॥

निराकर्त्ता । त्रि । निराकरिष्णौ ॥

निराकारः । त्रि । आकारहीने । देहाद्याकारवर्जिते परमात्मनि ॥ मृदादिवत्कार्य्यातिरिक्तदृश्यस्वरूपाभावात् निर्गतः आकारोऽस्मात् । निरादय इति समासः ॥

निराकुलः । त्रि । आकुलताशून्ये ॥

निराकृतः । त्रि । प्रत्याख्याते । निरस्ते ॥ यथा । कैः पुष्पैरमृतान् दत्त्वा भृङ्गाभुवि निमन्त्रिताः । केनवाक्षम्य केनाद्य चन्द्रं दत्त्वा निराकृताः इति ॥ निराकारि । कृञः क्तः ॥ निस्सारिते ॥

निराकृतिः । पुं । पञ्चमहायज्ञानुष्ठानरहिते ॥ यस्तु पञ्चमहायज्ञविहीनः स निराकृतिरिति जटाधरः ॥ तथाच

छन्दोगपरिशिष्टे । निराकर्त्तामरादीमांसविशेषो निराकृतिरिति ॥ स्त्री । निरसने । निराकरणे ॥ निराकरणम् । डुकृञ० । स्त्रियांक्तिन् ॥ त्रि । अनाकारे ॥ अस्वाध्याये ॥ आकृतेरध्ययनचेष्टाया निर्गतः । आकृते र्जातेर्वा निर्गतः । अनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ वारणे । निषेधे ॥

निरागमः । पुं । आगममूलविकले तर्के ॥ तर्कमात्रोपजीविषु बौद्धकाणादसाङ्ख्यादिषु ॥

निराचारः । त्रि । अनाचारे । आचारशून्ये ॥ निर्नविद्यते आचारो यस्य सः ॥

निरातङ्कः । पुं । शिवे ॥ निर्गते आतङ्केतापशङ्के यस्मात् ॥ त्रि । आतङ्कहीने ॥

निरातपा । स्त्री । रजन्याम् ॥ त्रि । आतपशून्ये ॥

निरादेशः । त्रि । वार्त्तासञ्चाररहिते ॥

निराधारः । त्रि । आश्रयशून्ये ॥

निराबाधः । त्रि । पक्षाभावविशेषे ॥ यथा । अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् । असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेदिति ॥ निराबाधम् अस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवहरतीति मिताक्षरा ॥

निराभासः । पुं । वृत्तिव्याप्यत्वेऽपि फलव्याप्यत्वशून्ये परमात्मनि ॥ नितरामाभिमुख्येन भासते । भास० । पचाद्यच् ॥ त्रि । निष्प्रतिबिम्बे ॥

निरामयः । पुं । वडिक्के । वनच्छगले ॥ शूकरे ॥ त्रि । नीरुजि । वार्त्ते । रोगरहिते ॥ निष्क्रान्त आमयात् । निरादय इति समासः ॥ निर्गत आमयो व्याधिर्यस्माद्वा ॥

निरामालुः । पुं । कपित्थे ॥

निरामिषः । त्रि । विषयाभिलाषरहिते ॥ आमिषशून्ये ॥

निरामिषाशी । त्रि । अमांसाशिनि ॥

निरालम्बः । त्रि । आश्रयशून्ये । निराश्रये । निर्विषये ॥

निरालम्बनत्त्वम् । न । देहानुसन्धानराहित्यतायाम् ॥

निरालम्बा । स्त्री । आकाशमांस्याम् ॥

निराशः । त्रि । आशाशून्ये ॥

निराशी । त्रि । वैराग्यदार्ढ्येन विगततृष्णे । निष्कामे ॥ निर्गताः आशिषः कामना यस्मात् ॥

निराश्रयः । त्रि । देहेन्द्रियाद्यभिमानशून्ये ॥ आश्रयो देहेन्द्रियादिः अद्वैतदर्शनेन निर्गतो यस्मात् ॥ आ-

अर्थविहीने ॥ निर्गतः आश्रयो यस्मात् यस्य वा ॥

निरासनम् । न । निरसने ॥ निराङ्पूर्वासधातोर्ल्युट् ॥ आसनाभावे ॥ त्रि । तद्वति ॥

निराहारः । त्रि । आहाररहिते ॥

निरिङ्गिणी । स्त्री । तिरस्करिण्याम् । पट्याम् । यवनिकायाम् ॥

निरिन्द्रियः । त्रि । प्रजननासमर्थे । जीर्णे । इन्द्रियशून्ये ॥

निरीक्षणम् । न । दर्शने ॥

निरीक्षितः । त्रि । अवलोकिते ॥

निरीशम् । न । फाले । फले । यत्रकाष्ठे फालो निबध्यते तत्र । फालाधारे ॥ इत्यमरः ॥ ईशाया निर्गतः । निरादय इति समासः ॥ त्रि । ईशशून्ये ॥ नास्तिके ॥

निरीषम् । न । फले । फालाधारे । निरीशे ॥ इति भरतो मरटीकाकृत् ॥ निष्क्रान्तमीषायाः ऽस्मात् । निरादय इति समासः ॥

निरीहः । त्रि । निराकाङ्क्षे । प्राप्तसमस्तैश्वर्ये ॥ निरीहस्तृणं न्वपः ॥ ईहारहिते ॥ पुं । विष्णौ ॥

निरुक्तम् । न । वेदाङ्गविशेषे ॥ यथा । ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यत इति स्मृतिः ॥ पदभञ्जने ॥

देवविद्यायाम् ॥ त्रि । निर्वचने ॥ स्पष्टे ॥ कथिते ॥ निश्चयेनोक्तोऽर्थो नेन । वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योग स्तदुच्यते पञ्चविधं निरुक्तम् ॥

निरुक्तिः । स्त्री । निर्वचने ॥ निश्चितोक्तिः ॥

निरुद्धम् । न । ध्येयाकारवृत्तेर्निरोधे ॥ निरुद्धं चित्तं पञ्चमी चित्तस्य असम्प्रज्ञातसमाधिभूमिः । तदुक्तम् । तस्यापि निरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधिरिति ॥ त्रि । संरुद्धे । रोधविशिष्टे ॥ निश्चयेनरुद्धम् ॥

निरुद्धप्रकाशः । पुं । मेढ्रजातक्षुद्ररोगविशेषे ॥ इति भावप्रकाशः ॥

निरुद्योगः । त्रि । उद्योगाभावविशिष्टे । निरुद्यमे ॥

निरुपद्रवः । त्रि । उत्पातरहिते ॥

निरुपप्लवः । त्रि । निर्बाधे ॥ निर्गत उपप्लवो यस्मात् ॥

निरुपमः । त्रि । अनुपमे । उपमाशून्ये ॥ निर्गता उपमा सादृश्यं यस्य सः ॥

निरुपाख्यः । त्रि । असति ॥ वाचो मनसश्चागोचरे विषयतयोल्लेखायोग्ये ॥ निर्गतः उपाख्यायाः प्रत्यक्षत उपलब्धेः ॥ अस्फुटस्वरूपे ॥

निरुपेक्षः । त्रि । अनपेक्षे । उपेक्षारहिते ॥ निर्गता उपेक्षा औदासीन्यं यस्मात् ॥

निरुप्तः । त्रि । यत्नादौ भागशः पृथक्कृते ॥

निरूढः । पुं । निरूढलक्षणाके शब्दे ॥ यथा । पूर्वस्वामिसम्बन्धाधीनं तत् स्वाम्युपरमे यत्रद्रव्ये स्वत्वं तत्र निरूढो दायशब्द इति दायभागः ॥

निरूढलक्षणा । स्त्री । शक्तितुल्यलक्षणायाम् ॥ यथा । निरूढलक्षणाः काश्चित् काश्चिन्नैवत्वशक्तित इति काव्यप्रकाशटीकायां महेश्वरः ॥

निरूढा । स्त्री । लक्षणाविशेषे ॥

निरूढिः । स्त्री । प्रसिद्धौ ॥

निरूपणम् । न । आलोके ॥ विचारे ॥ निदर्शने ॥ इति मेदिनी ॥ ध्यानानुकूले शब्दे ॥

निरूपितः । त्रि । नियुक्ते ॥ कृतनिरूपणे ॥ उपकल्पिते ॥

निरूहः । पुं । वस्तिभेदे ॥ यथा । वस्तिर्द्विधाऽनुवासाख्यो निरूहश्चेति संज्ञितः । यः स्नेहैर्दीयते स स्यादनुवासननामकः । कषायक्षीरतैलैर्यो निरूहः स निगद्यते इति ॥ निग्रहे ॥ तर्के ॥ त्रि । ऊहशून्ये ॥ निश्चिते ॥

निरेनाः । त्रि । निष्पापे ॥

निरेभः । त्रि । निःशब्दे ॥

निरोधः । पुं । नाशे ॥ रोधे ॥ निरोधनम् । रुधिर्० । घञ् ॥ प्रलये ॥ निग्रहे ॥

निरोधनम् । न । निरोधे । प्रत्युपवेशने ॥ कारागारप्रवेशने ॥ रुधिर् आवरणे । ल्युट् ॥

निरोद्धव्यः । त्रि । रक्षणीये ॥

निर्ऋतिः । पुं । दिक्पालविशेषे । नैर्ऋतकोणाधिपतौ ॥ स्त्री । अलक्ष्म्याम् ॥ नियताऋतिर्घृणायत्र । निर्गता ऋतेः शुभादिति वा ॥ त्रि । निरुपद्रवे ॥

निर्ऋथः । पुं । सामवेदे ॥ निरन्तरम् ऋच्छति । ऋगतिप्रापणयोः । अर्त्तेर्निरीतिथक् ॥ निर्ऋथो हिंसेति वेदभाष्यम् ॥

निर्गः । पुं । देशे ॥ इति हेमचन्द्रः ॥

निर्गतः । त्रि । निःसृते । वहिष्प्राप्ते ॥ निर्मुक्ते ॥ नितराङ्गतः ॥

निर्गन्धः । त्रि । गन्धशून्ये ॥

निर्गन्धनम् । न । मारणे ॥ गन्धअर्द्दने । भावे ल्युट् ॥

निर्गन्धपुष्पी । स्त्री । शाल्मलिद्रुमे ॥

निर्गमः । पुं । निःसरणे ॥ निर्गमनम् । गम्लृ० । ग्रहवृद्धिरप् ॥

निर्गमनम् । न । प्रतीहारे । द्वारि ॥

निर्गमनद्वारम् । न । नैर्वाहिके ॥

निर्गुणः । पुं । परमात्मनि । परमानन्दे ॥ त्रि । परमार्थतः सत्त्वरजस्तमोगुणरहिते ॥ रूपादिगुणहीने ॥ निर्धर्मके ॥ निर्गताः गुणाः सत्त्वादयो रूपादयो वा यस्मात् ॥ विद्यादिशून्ये ॥

निर्गुणा । स्त्री । गुणचयोपचयापचयरहितसाम्यावस्थमायोपाधिकब्रह्मरूपिण्यां शक्तौ ॥

निर्गुण्डी । स्त्री । नीलशेफाल्याम् ॥ सिन्दुवारे । संभालू इति भाषा । निसिन्दा इति गौडभाषा ॥ श्वेतनीलपुष्पभेदान्निर्गुण्डी द्विविधा मता ॥ अब्जकन्दे । करहाटे ॥ निर्गुडति । गुड रक्षायाम् । इगुपधेति कः । पृषोदरादिः ॥ गुडाद्वेष्टनान्निर्गतेति स्वामी । गौरादिः ॥

निर्गूढः । पुं । वृक्षकोटरे ॥ त्रि । संवृते ॥

निर्ग्रन्थः । पुं । नग्ने । क्षपणके ॥ निःस्वे । निर्धने ॥ बालिशे । मूर्खे ॥ द्यूतकारे ॥ ग्रन्थेभ्यो निर्गतः ॥ मुनौ ॥ त्रि । निर्वेदङ्गते ॥ निःसहाये । निवृत्तहृदयग्रन्थाविति श्रीधरस्वामी ॥

निर्ग्रन्थकः । पुं । क्षपणे ॥ निष्फले ॥ त्रि । अपरिच्छदे ॥

निर्ग्रन्थनम् । न । मारणे ॥ ग्रथि कौटिल्ये । भावे ल्युट् ॥

निर्ग्रन्थिकः । पुं । क्षपणे ॥ त्रि । निपुणे ॥ हीने ॥

निर्ग्राह्यः । त्रि । निश्चेतुं शक्ये ॥

निर्घटम् । न । बहुमनुजसङ्कीर्णहट्टे ॥ इति हारावली ॥ करशून्यहट्टे ॥ घटशून्ये ॥

निर्घण्टः । पुं । निघण्टौ । निर्घण्टने । गणसङ्ग्रहे । ग्रन्थानां सूचीति ख्याते ॥

निर्घातः । पुं । वाय्वभिहतवायुप्रपतनजन्यशब्दविशेषे ॥ यथाह वराहः । पवनः पवनाभिहतो गगनादवनौ यदा समापतति । भवति तदा निर्घातः स च पापो दीप्तविहगरुतः ॥ १ ॥ अथ वेलादर्शनफलम् । अर्कोदयेऽधिकरणिकनृपधनियोधाङ्गनावणिग्वेश्याः । आप्रहरांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च ॥ २ ॥ आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति । वैश्यजलदांस्तृतीये चौरान्प्रहरे चतुर्थे तु ॥ ३ ॥ अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि । रात्रेर्द्वितीययामे पिशाचसङ्घान्निपीडयति ॥ ४ ॥ तुरगकरिणस्तृतीये विनिहन्या यायिनश्च

तुर्थेच । भैरवजर्जरशब्दो याति य
त स्तां दिशं हन्ति ॥ ५ ॥ अभ्यन्तरी
क्षगत उत्पातध्वनिरेवायम् ॥ निरव्
भ्रवज्रपाते ॥ यदान्तरीक्षे बलवान्
मारुतो मरुताहत: । पतत्यध: स नि
र्घातो जायते वायुसम्भव इति ज्योति-
षम् ॥

निर्घृण: । त्रि । निर्दये ॥

निर्घोष: । पुं । शब्दमात्रे ॥ निर्घोषण
म् । घुष घुष्टौ । निष्पूर्वात् घञ् ॥

निर्ज्जन: । त्रि । विविक्त । जनैरना
कीर्णे ॥

निर्ज्जर: । पुं । देवे । सुरे ॥ जरायानि
ष्क्रान्त: । निरादय: क्रान्ताद्यर्थे पञ्च
म्येति समास: ॥ अनेकान्तवादिनां
सप्तपदार्थेषु पदार्थविशेषे ॥ तपश्चि
त्तायनकेशोल्लुञ्चनादितप:सञ्चय
निर्जीर्णवीर्यं कर्म निर्जरशब्देन तैरु-
च्यते ॥ त्रि । जरात्यक्ते ॥ न । सु
धायाम् ॥

निर्ज्जरसर्षप: । पुं । देवसर्षपवृक्षे ॥

निर्ज्जरा । स्त्री । गुडूच्याम् ॥ तालप
र्ण्याम् ॥

निर्ज्जल: । त्रि । जलहीनदेशादौ ॥
यथा । सम्पाताद्यमच्छजाशुगतिना
सम्मूर्च्छिता निर्जले तुर्यद्वादशवह्नि
तीयमतिमन्ने काद्याभस्वनी । सा
षष्ठी न्तृपपञ्चमस्यनवमभू: सप्तमी
वर्जिता प्राप्तो ऽथाष्टमवेदनां प्रथमहे
तस्य स्तृतीयो भवेति वल्लालसेन: ॥

निर्ज्जला । स्त्री । ज्यैष्ठशुक्लैकादश्या
म् ॥ यथाह व्यासो भीमसेनं प्रति ।
वृषस्थे मिथुनस्थे ऽर्के शुक्ला ह्येकादशी
स्थिया । ज्यैष्ठे मासि प्रयत्नेन सोपास्या
जलवर्जिता ॥ स्नाने चाचमने चैव व
र्जयित्वोदकं बुध: । उपयुञ्जीत नैवा
न्यद्व्रतभङ्गो ऽन्यथा भवेत् ॥ उद
यादुदयं यावद् वर्जयित्वा जलं बुध: ।
अप्रयत्नादवाप्नोति द्वादशद्वादशीफ
लमिति ॥

निर्ज्जित: । त्रि । वशीकृते ॥ विजिते ।
प्राप्तपराजये । पराभूते ॥ नितरां
जित: ॥

निर्ज्जितेन्द्रियग्राम: । त्रि । यतौ ॥ इ
न्द्रियाणाङ् ग्राम: । निर्जित इन्द्रिय
ग्रामो येन ॥

निर्ज्जीव: । त्रि । जीवात्मरहिते ॥ प्रा
णिशून्ये ॥

निर्झर: । पुं । झरे । पर्वतान्निस्सृतज
लप्रवाहे । झर्णा इति भाषा ॥ निर्झ
रणम् । झॄ वयोहानौ । ऋदोरप्
॥ सहस्रांशुतुरङ्गे ॥ तुषाग्नौ ॥

निर्झरिणी । स्त्री । नद्याम् ।

निर्झरी । पुं । शैले । पर्वते ॥ निर्झ

राः सन्त्यस्याम् । मत्वर्थीय इनिः ॥

निर्झरी । स्त्री । नद्याम् ॥ निर्झरे ॥

निर्णतोदरी । स्त्री । लम्बोदर्याम् ॥ तनुमध्यायाम् ॥ नितरां नतं नम्रमुदरं यस्याः ॥

निर्णयः । पुं । विचारे । तर्के । चर्चायाम् ॥ अवधारणे । निश्चये ॥ विरोधपरिहारे ॥ परस्परविरुद्धार्थानां स्मृत्यादिवाक्यानां विरोधपरिहारेणार्थावधारणं निर्णयः । उक्तञ्च । तत्त्वे विप्रतिपन्नानां वाक्यानामितरेतरम् । विरोधपरिहारो ऽयं निर्णयस्तत्त्वदर्शनमिति ॥ निर्णय एव तत्त्वदर्शनमित्यर्थः ॥ निर्णयनम् । णी ञ० । भावे एरच् । उपसर्गादसमासेऽपीति णत्वम् ॥ अधिकरणविशेषे ॥ न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानं निर्णयः । यथा । वह्निमान् पर्वत इत्यादिबोधः ॥ इति भाषा प० ॥ तद्धर्मावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिज्ञानमिति जगदीशः ॥ अस्य लक्षणमाह गोतमः ॥ यथा । विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ४० ॥ विमृश्य सन्दिह्य पक्षप्रतिपक्षाभ्यां साधनोपालम्भाभ्याम् उपालम्भः परपक्षदूषणम् अर्थस्यावधारणम् तदभावाप्रकारकं तत्प्रकारकं ज्ञानम् । यद्यप्येतावदेव निर्णयसामान्यलक्षणं तथापि विमृश्येत्यादिकं जल्पवितण्डास्थलीयनिर्णयमधिकृत्य । तदुक्तम्भाष्ये । शास्त्रेवादे च विमर्शवर्जमिति । एवं प्रत्यक्षतः शब्दाच्च निर्णये न विमर्शपक्षप्रतिपक्षापेक्षेति ॥ ४० ॥ चतुष्पादव्यवहारान्तर्गते शेषपादे । फैसला इति डिगरी इति चेतरभाषा ॥

निर्णयनम् । न । निर्णये ॥

निर्णयपादः । पुं । चतुष्पाद्व्यवहारान्तर्गतव्यवहारविशेषे ॥ तस्य स्वरूपं यथा । मिलितानां सभासदां पराजितोऽयमित्यवधारणमिति व्यवहारतत्त्वम् ॥

निर्णायनम् । न । गजापाङ्गदेशे । निर्याणे ॥

निर्णिक्तः । त्रि । शोधिते । अपनीतमले ॥ निर्णिज्यते स्म । णिजिर् शौचपोषणयोः । क्तः ॥ अजदेवगृहस्येव प्रस्थानं गोद्विजालयम् । निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कदाचनेति स्मृतिः ॥

निर्णीतः । त्रि । कृतनिर्णये । निश्चयीकृते ॥ यथा । निर्णीते व्यवहारे तु प्र

मायामफलंभवेत् । लिखितंसाक्षि-
णोवापि पूर्वमावेदितं नचेत्॥ यथा
पक्केषुधान्येषु निष्फलाःप्रावृषोगुणाः
। निर्णीतव्यवहाराणां प्रमाणमफलं
तथेतिव्यवहारतत्त्वम्॥

निर्णेजकः। पुं। रजके॥ निर्णेनेक्ति।
णिजर्०। ण्वुल्। उपसर्गादसमासे
ऽपीतिणत्वम्॥

निर्णेजनम्। न। क्षालने॥ निर्णिजे
ल्युट्॥

निर्णेता। त्रि। प्रतिभुवि॥

निर्द्दटः। त्रि। दयाहीने। निर्द्दये॥
निष्प्रयोजने॥ परापवादरक्ते। अ
न्यदोषरते॥ मत्तेतीक्ष्णेपीतिशब्द॰॥

निर्द्दयः। त्रि। दयाहीने॥ निर्गता द
या यस्मात्॥

निर्द्दरम्। न। निर्भये॥ सारे॥ त्रि।
कठिने॥ अभये॥ इतिमेदिनिकरः॥
निर्गतः दरोयस्मात्॥

निर्द्दहनः। पुं। भल्लातके॥ अग्नि
शून्ये॥

निर्द्दहनी। स्त्री। मूर्वालतायाम्॥

निर्द्दाता। त्रि। लवनकर्त्तरि॥ यथा
इरति निर्दाता कश्चं धान्यञ्च रक्षती
तिमनुः॥

निर्द्दिग्धः। त्रि। बलिनि। मांसले॥
इति हेमचन्द्रः॥

निर्द्दिश्यमानः। त्रि। उच्चार्यमाणे॥

निर्द्दिष्टः। त्रि। प्रदिष्टे। प्रदर्शिते॥ क
थिते॥ निश्चिते॥

निर्द्देशः। पुं। निदेशे। शासने। आ
ज्ञायाम्॥ निर्द्देशनम्। दिश॰। घ
ञ्॥ निर्दिश्यते ऽभिधीयते ऽनेने
तिव्युत्पत्त्या प्रतिपादकशब्दे। ना-
म्नि॥ भृतौ॥ नाभिनन्देत मरणं ना
भिनन्देत जीवितम्। कालमेव प्रती
क्षेत निर्द्देशं भृतकोयथा॥ अवधा
रे॥ कथने॥ उपान्ते॥ देशान् नि
ष्कान्ते॥ निरत्र बहिर्भावे॥

निर्द्देश्यः। त्रि। निर्द्देष्टुंशक्ये॥

निर्द्देष्टा। त्रि। निर्द्देशकर्त्तरि॥

निर्द्दोषः। त्रि। दोषरहिते॥ यथा।
निर्दोषं दर्शयित्वातु सदोषंयः प्रय
च्छति। समूल्याद् द्विगुणं दाप्यो वि
नयंतावदेवचेतिमिताक्षरा॥

निर्द्धनः। पुं। जरद्गवे॥ त्रि। धनहीने॥

निर्द्धर्म्मः। त्रि। धर्मरहिते॥

निर्द्धारः। पुं। निश्चये॥

निर्द्धारणम्। न। जातिगुणक्रियासंज्ञा
भिः समुदायादेकदेशस्य पृथक् क
रणे॥ तत्रयतश्चनिर्द्धारणमितिषष्ठी
सप्तमीच विभक्तिर्भवति। यथा। म
नुष्याणां मनुष्येषुवा क्षत्रियःशूरत
मः। गवांगोषुवा कृष्णासम्पन्नक्षीरा।

। अध्वगानामध्वगेषु वा धावन्तः शीघ्रतमा इति ॥ निश्चये ॥

निर्द्धारणीयः । त्रि । निर्द्धार्ये । निर्द्धारितव्ये ॥

निर्द्धारितः । त्रि । कृतनिश्चये ॥

निर्द्धार्यः । त्रि । निर्द्धारणीये ॥ निःशङ्कं कर्मकर्त्तरि ॥ निर्द्धार्यः कार्यकर्त्ता यः संयतन् सत्त्वसम्पदा । व्यसने ऽभ्युदयेवापि ह्यविकारं सदामनः । तत्सुसत्त्वमिति प्रोक्तम् ॥ तत् सम्पदा संयतन् उद्यमं कुर्वन्निश्चयार्थः । संयुत इतिवा पाठः ॥ निश्चयेनध्रियते । धृञ् । ऋहलोर्ण्यत् ॥

निर्द्धूतः । त्रि । खण्डिते । परित्यक्ते ॥ नितराङ्कम्पिते ॥ समन्मूलिते ॥

निर्द्धौतः । त्रि । प्रक्षालिते ॥ धावेः कर्मणि क्तः । च्छोरितिवकारस्योठादेशः । एत्येधत्यूठ्स्विति वृद्धिः ॥

निर्ध्यानम् । न । निध्याने ॥ दर्शने ॥ ध्यैचिन्तायाम् । ल्युट् ॥

निर्द्वन्द्वः । त्रि । शीतोष्णादिद्वन्द्वसहिष्णौ ॥ रागद्वेषादिद्वन्द्वरहिते ॥ निर्गतोद्वन्द्वात् द्वन्द्वेभ्योवा ॥

निर्बन्धः । पुं । आग्रहे । अभिनिवेशे ॥ वपुर्वाग्धीषु निर्बन्धः कर्मिणो ननु साक्षिणि । ज्ञानिनः साक्ष्यलेपत्वेनिर्बन्धो नेतरत्र हि ॥ निश्चयेनबन्धः ॥

निर्बाधः । त्रि । निरुपद्रवे ॥ विविक्ते ॥

निर्भटः । त्रि । दृढे ॥

निर्भयः । पुं । अजानेये ॥ हयोत्तमे ॥ त्रि । भीतिरहिते ॥ निर्गतं भयं यस्मात् यस्यवा ॥

निर्भरम् । न । अतिमात्रे ॥ निःशेषेण भरोभारो ऽत्र । उपसर्गान्तरनिवृत्त्यर्थं निर्भरमित्युक्तम् ॥ त्रि । तद्वति ॥

निर्भर्त्सनम् । न । खलीकारे ॥ अलक्तके ॥ इतिमेदिनी ॥

निर्भर्त्सितः । त्रि । धिक्कृते । निन्दिते । कृतनिर्भर्त्सने ॥

निर्भाग्यः । त्रि । भाग्यहीने । मन्दे । मूढे ॥

निर्भाज्यः । त्रि । पृथक्कार्ये ॥

निर्भिन्नः । त्रि । नितरांदारिते ॥

निर्भिन्नचिर्भिटः । पुं । निर्भिन्नकर्कटीसस्ये । फट इतिभाषा ॥

निर्भीकः । त्रि । निर्भये ॥

निर्मक्षिकम् । अ । मक्षिकाणामभावे ॥

निर्माटः । पुं । हट्टे ॥

निर्मथनम् । न । नितरांविलोडने ॥ अतिनिर्मथना दग्निश्चन्दनादपि जायते । विषायते ऽमृतमपि यथापथ्यं मुमूर्षतः ॥

निर्मदः । पुं । मदहीनगजे । उदान्ते

॥ मदान्निर्गत: । निर्गतोमदो ऽ
स्माद्वा ॥
निर्म्मध्या । स्त्री । नलिकायाम् ॥
निर्म्मन्थ्यदारु । न । अरणौ । वह्नि
मन्थे ॥
निर्म्मम: । त्रि । भिक्षौ ॥ देहेष्विममेति
प्रत्ययरहिते ॥ शरीरयात्रामात्रार्थे
षु प्रारब्धकर्म्मोचितकौपीनाच्छाद
नादौममेदमित्यभिमानहीने ॥
देहपुत्रभार्य्यादिषु स्वीयेषु ममता
शून्ये ॥
निर्म्मर्य्याद: । त्रि । अविनीते ॥ निर्गता
मर्य्यादाया: ॥
निर्म्मलम् । न । निर्म्माल्ये ॥ अभ्रके ॥
त्रि । मलहीने । शुद्धे ॥ रजस्तमो
मलामिश्रिते ॥ रागादिमलरहिते
॥ अविद्यातत्कार्य्यलक्षणमलरहिते ।
॥ मलान्निर्गतम् । निर्गतं मलम
स्माद्वा ॥
निर्म्मलोपल: । पुं । स्फटिके ॥
निर्म्माणम् । न । निर्म्मितौ ॥ सारे ॥
समञ्जसे ॥ कामभेदे ॥ इतिहेम
चन्द्र: ॥
निर्म्माता । त्रि । निर्म्माणकर्त्तरि ॥ नि
र्म्माति । माङ्माने । तृच् ॥
निर्म्मान: । त्रि । मानरहिते ॥ निर्गतो
मानात् ॥

निर्म्मानमोह: । त्रि । मानमोहाभ्यां
निष्क्रान्ते । अहङ्काराविवेकाभ्यां र
हिते ॥
निर्म्माल्यम् । न । देवार्पितोज्झिते ।
देवोच्छिष्टद्रव्ये ॥ यथा । अर्व्वाग्विस
र्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते । विस
र्ज्जिते जगन्नाथे निर्म्माल्यं भवतिच
णादिति ॥ त्रि । माल्यशून्ये ॥
निर्म्माल्या । स्त्री । पृक्कायाम् ॥
निर्म्मित: । त्रि । कृतनिर्म्माणे । निष्पा
दिते । रचिते ॥
निर्म्मितक: । त्रि । मन्त्रौषध्यादिभिर्नि
ष्पादिते ॥
निर्म्मिति: । स्त्री । निर्म्माणे । रचनाया
म् ॥ असाधारणचमत्कारकारिणीर
चनाहिनिर्म्मितिरितिव्याख्याता: ॥
निर्म्मुक्त: । पुं । मुक्तकञ्चुके भोगिनि ॥
त्रि । त्यक्तसङ्गे । निष्परिग्रहे ॥
निर्म्मुक्ति: । स्त्री । निवृत्तौ ॥
निर्म्मुट: । पुं । वनस्पतौ । अपुष्पवृक्षे
॥ खर्परे ॥ सूर्य्ये ॥ न । करशून्यह
ट्टे । पण्याजिरे ॥
निर्म्मोक: । पुं । मोचने ॥ व्योम्नि ॥ स
न्नाहे ॥ सर्पकञ्चुके । अहिकोषे ॥
निश्चयेनमुच्यते । मुच्लृ० । कर्म्म
णिघञ् ॥
निर्म्मोक्ष: । पुं । त्यागे ॥ मोक्षाभावे ॥

निर्य्येत्। चि। निर्गच्छति॥

निर्य्यन्त्रणः। त्रि। विशृङ्खले। अबाधे। निरर्गले। स्वच्छन्दे॥

निर्य्याणम्। न। वारणापाङ्गदेशे॥ मोचे॥ अध्वनिर्गमे॥ पशूनांपादवन्धनदामनि॥ निर्याच्यनेन। याप्रापणे। ल्युट्॥

निर्य्यातनम्। न। वैरशुद्धौ॥ दाने। त्यागे॥ न्याससमर्पणे॥ यतनिकारादै। स्वार्थणयन्तः। भावकर्मकरणादै।ल्युट्॥ मारणे॥ इतिहेमचन्द्रः॥

निर्य्यामः। पुं। पोतवाहे॥ इ०हे०॥

निर्य्यासः। पुं। कषाये। क्वाथे। क्वथितद्रव्यरसे॥ वृचद्रवे। वृचान्निर्गत्यकठिनतांयातेरसविशेषे। वेष्टके। गूंद इतिभाषा॥

निर्य्युक्तिकः। चि। युक्तिरहिते॥ यथा। नहिक्रियारहितं वाक्यमस्तीतिप्राचां प्रवादोनिर्युक्तिकत्वादश्रद्धेयइति शब्दशक्तिप्रकाशिका॥ निर्युक्तिकं ब्रुवाणास्तुनास्माभिर्विनिवार्यन्त इतिन्यायः॥

निर्य्यूषः। पुं। निर्यासे॥ इतिश०मा०॥

निर्य्यूहः। पुं। आपीडे। शेखरे॥ द्वारे॥ निर्यासे॥ नागदन्तके॥ निर्यूहति। यूहलौकिकोधातुः। इगुपधेतिकः॥ निरूहतिवा। पृषोदरादित्वात् धातोर्यङागमः॥ मत्तवारणे॥

निर्य्योगः। पुं। गोःपादवन्धनरज्जौ॥ निर्युज्यतेगौरनेन। युजिर्०। घञ्॥

निर्लक्षणः। चि। लक्षणहीने। पाण्डुरपृष्ठे॥ इतिहेमचन्द्रः॥

निर्लिप्तः। पुं। श्रीकृष्णे॥ चि। लेपरहिते॥

निर्लेखनम्। न। कर्षणे॥

निर्लेपः। चि। लेपवर्जिते॥ शुद्धे॥ आसङ्गरहिते॥ पापशून्ये॥

निर्लोडितः। चि। आलोकिते॥

निर्ल्वयनी। स्त्री। सर्पत्वचि। कञ्चुके॥ यस्यांत्वचिसर्पोनितरां लीयते सा निर्ल्वयनी सर्पत्वगितिव्याख्यातारः॥

निर्व्वचनम्। न। निरुक्तौ। शब्देनाभिधाने॥ निश्चितं वचनम्॥

निर्व्वपणम्। न। दाने। अन्नादीनां संविभागे॥ टुवप्०। भावेल्युट्॥

निर्व्वरः। त्रि। निर्हरार्थेषु। इतिहेमानेकार्थः॥

निर्व्वर्णनम्। न। दर्शने॥ वर्णशब्दात् सत्यापेतिणिच्। ल्युट्॥

निर्व्वर्त्तयन्। त्रि। कुर्वति॥

निर्व्वर्त्तितः। त्रि। निष्पादिते॥

निर्व्वहणम्। न। नाट्योक्त्या प्रस्तुतकथासमाप्तौ। प्रकृताभिनयस्य निर्वाहे। निष्ठायाम्॥ निर्वाहोनिर्वहणम्।

वहेर्ल्युट् ॥ नाटकसन्ध्यन्तरे ॥ यथा । मुखं प्रतिमुखञ्चैव गर्भो विमर्ष एवच । तथा निर्वहणञ्चेति नाटके पञ्चसन्धयइतिभरतः ॥

निर्व्वहणा । स्त्री । निष्ठायाम् । प्रकृताभिनयनिर्व्वाहे । निर्वहणे ॥ टाप् ॥

निर्व्वाहिता । त्रि । निर्व्वाहरि ॥

निर्व्वाणम् । न । अस्तङ्गमने । विनाशे ॥ निर्वृतौ ॥ गजमज्जने ॥ सङ्गमे ॥ मोक्षे । अपवर्गे ॥ यथा । यतितव्यं समत्वेन निर्व्वाणमपिचेच्छतेति ॥ समत्वबुद्धे निर्व्वाणं फलमुक्तंश्रुतौस्मृतौ ॥ सर्वदुःखोपशमलक्षणं परमानन्दरूपं निर्व्वाणमितिभाष्यकाराः । सर्वदुःखोपशमात्मकत्वान्निरतिशयानन्दरूपत्वाच्च परमपुरुषार्थकैवल्यरूपंब्रह्मनिर्व्वाणमित्युच्यतइति व्याख्याकारः ॥ अपुण्यपुण्योपरमेयंपुनर्भवनिर्भयाः । शान्ताःसन्न्यासिनोयान्तितस्मैमोक्षात्मने नमइतिविष्णोर्निर्व्वाणरूपत्वेभारतवचनम् ॥ निश्चले ॥ शून्ये ॥ विश्रान्ते ॥ अपवर्गसाधनग्रन्थविशेषे ॥ विद्योपदेशने ॥ आद्गिगजविकले (ऽ) ॥ त्रि । मुक्ते ॥ शान्ते मुनिवह्न्यादौ । चरमावस्थमुनौ ॥ चरमावस्थवह्नौ ॥ वन्धाद्विर्गमनं निर्व्वाणम् । गत्यर्थक वाधातोर्भावेल्युट् ॥ निर्व्वातिस्म । वा गतिगन्धनयोः । गत्यर्थेतिक्तः । निर्व्वाणोऽवातइतिसाधु ॥ आदिना निर्व्वाणोहस्तीनिमग्नइत्यर्थः । आदिना निर्व्वाणंमुक्ति निर्वृतिश्चेत्यपिवदन्ति ॥ यथा । प्रियदर्शनमेवास्तुकिमन्यैर्दर्शनान्तरैः । निर्व्वाणमाप्यते येन सरागेणापिचेतसेति ॥

निर्व्वाणमस्तकः । पुं । मुक्तौ ॥ इतित्रिकाण्डशेषः ॥

निर्व्वातः । त्रि । वायुरहिते ॥ निर्व्वातिस्म । वा० । गत्यर्थेतिक्तः ॥ निस्तरांवातोगतो वा ॥

निर्व्वादः । पुं । लोकवादे ॥ परिनिष्ठितवादे ॥ अपवादे ॥ निर्वदनम् । वदव्यक्तायांवाचि वदअभिवादनस्तुत्योर्वा । निष्पूर्वाद्वदेर्भावेघञ् ॥

निर्व्वापः । पुं । निवापे ॥

निर्व्वापणम् । न । वधे ॥ दाने ॥ टुवप० । स्वार्थण्यन्तः । ओवैशोषणे वा । ल्युट् ॥

निर्व्वाप्यः । त्रि । कर्त्तव्ये ॥

निर्व्वार्य्यः । त्रि । निःशङ्कङ्कर्मकृति । सत्त्वसम्पद्रासम्पतन्कार्यकर्त्तरि ॥ भयविक्रमव्यसनाभ्युदयादौ निर्विकारं मनःसत्त्वम् तत्सम्पद्रासम्पतन् उद्यमंकुर्वन् यो निश्शङ्कोभूत्वाकर्मकु

हते स निर्व्वाय्य उच्यते ॥ निश्चयेन क्रियते ; वृत्त० । कश्चलोपार्य्यत् ॥

निर्व्वासनम् । न । मारणे । हिंसने ॥ नगरादेर्व्वहिष्कृतौ ॥ वासच्छेदे । चुरादिः । भावे ल्युट् ॥

निर्व्वासितः । चि । निष्कासिते ॥

निर्व्वास्यः । चि । निर्व्वासनीये ॥

निर्व्वाहः । पुं । कार्य्यसाधने ॥ निर्व्वहणम् । वह० । घञ् ॥ निष्पत्तौ । समाप्तौ ॥ यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात् तावदर्थवित् । आधिक्ये न्यूनतायाञ्च च्यवते परमार्थत इत्युपदेशः ॥

निर्व्वाहकः । पुं । कार्य्यसाधके । सम्पादके ॥ नहि स्वपरनिर्व्वाहकस्य परापेक्षा भवति ॥

निर्व्वाहकैक्यम् । न । सङ्गत्यन्तरे ॥ साक्षात्परम्परया वा एककार्य्यानुकूलत्वे ॥

निर्व्वाहणम् । न । निर्व्वहणे ॥

निर्व्वाहिका । स्त्री । प्रशाखिकायाम् ॥

निर्व्विकल्पः । पुं । सर्व्वविकल्पशून्ये परमात्मनि ॥ चि । कल्पनाहीने ॥ निरस्तभेदे ॥ निर्गतो विकल्पो विविधा कल्पना यस्मात् ॥ भोगैकवासनां त्यक्त्वा त्यज त्वं भेदवासनाम् । भावाभावौ ततस्त्यक्त्वा निर्व्विकल्पः स्थितो भव ॥

निर्व्विकल्पकः । पुं । असम्प्रज्ञातसमाधौ । ज्ञातृज्ञानादिविकल्पभेदलयापेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्ते रतितरामेकीभावेनावस्थाने ॥ तत्र दृष्टान्तः । जलाकाराकारितलवणानवभासेन जलमात्रावभासवत् अद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवभासत इति । ततश्चास्य निर्व्विकल्पकसमाधेः सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेण तयोर्भेदोपपत्तेरिति । सुषुप्तौ वुद्धिर्हि नास्ति वुद्धेः कारणात्मनावस्थानस्य तल्लक्षणत्वात् । इह तु वुद्धिवृत्तेरद्वितीयवस्त्वाकाराकारिताया अवस्थानाङ्गीकारात् सुषुप्तेर्भेदोपपत्तेरितिभावः । नापिमुक्तावतिव्याप्तिः । तत्रापि अविद्यातत्कार्य्यसंस्काराणामत्यन्तमुच्छेदात् । इह पुनर्व्युत्थानादिव्यवहारदर्शनेन तेषामनुवृत्तेरिष्टत्वात् । नापिजीवन्मुक्तौ प्रसङ्गः । तस्य व्युत्थानदशायामपिवाधितानुवृत्तिमात्रप्रपञ्चावभासेऽपि स्वस्वरूप एवावस्थानात् । साधकस्य वाधितानुवृत्तिमात्रप्रपञ्चावभासाभावादिति ॥

त्रि । निरस्तभेदे ॥ स्वार्थे कः ॥ * ॥ न । प्रकारता विशेष्यतानापन्नसम्बन्धानवगाह्यतीन्द्रियज्ञाने ॥ यथा । तत्प्रमानाप्रमानापि ज्ञानं यन्निर्विकल्पकम् । प्रकारतादिशून्यं हि सम्बन्धानवगाहि यदिति ॥ ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते । इति च भाषापरिच्छेदः ॥

निर्व्विकल्पकसमाधिः । पुं । निर्व्विकल्पके ॥ लयविक्षेपकषायरसास्वादलक्षणविघ्नचतुष्टयेन विरहितं चित्तं निवातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्व्विकल्पकसमाधिरुच्यते ॥

निर्व्विकारः । पुं । जन्मादिषड्भावविकारहीने आत्मनि ॥ त्रि । विकारशून्ये ॥ प्रकृतेरन्यथाभावो विकारः । निर्गतो विकारोऽस्मात् । निरादय इति समासः ॥

निर्व्विकारता । स्त्री । विषयानुसन्धानराहित्ये ॥ प्रकृतेरन्यथाभावाभावत्त्वे ॥

निर्व्विसः । त्रि । प्राप्तवैराग्ये । विरक्ते ॥ यथा । निर्व्विसोऽहमनेनवासेन । यथावा निर्व्विसोऽहं दक्षिणेन मार्गेण गतागतक्लेशेनेतीशभाष्यम् ॥ निरुपपदाद्विदेः कर्मणि क्तः । निर्व्विसोपसर्गख्यानात् परस्य गत्वम् पूर्वस्य इत्वम् ॥ विषण्णे । दुःखिते ॥

निर्व्विद् । त्रि । खिन्ने ॥ निर्व्विद्यते खिद्यते । विदेर्ज्ञानार्थान्निष्पूर्वात् सत्सूद्विषेत्यादिना क्विप् ॥

निर्व्विन्ध्या । स्त्री । कल्पाख्यकुलाद्रिनद्याम् ॥ विन्ध्याद्रिनिर्गतनदीविशेषे ॥

निर्व्विशेषः । त्रि । समे । स्वगतभेदरहिते परमात्मनि । नानाविधभेदरहिते ॥ यथा । निर्व्विशेषं परम्ब्रह्म साक्षात्कर्त्तुमनीश्वराः । ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैरिति ॥ निर्गता विशेषा यस्मात् ॥

निर्व्विषयः । त्रि । निरालम्बे ॥

निर्व्विषा । स्त्री । तृणविशेषे । अविषायाम् । विषहायाम् । निर्व्विषी इति गौड भाषा ॥ यथा । निर्व्विषा कटुका शीता कफवातास्रदोषनुत् । अनेकविषहन्त्री च व्रणनिर्म्मूलकारिणी त्यस्या गुणाः ॥

निर्व्विषी । स्त्री । श्यामकन्दायाम् । उपविषायाम् ॥ इयं चतुर्व्विधा भवति । रक्ता श्वेता भृशं कृष्णा पीतवर्णेति चैव च । यथापूर्व्वं विज्ञेया वल्याः श्रेष्ठा गुणोत्तमाः ॥ सर्व्वदोषहरी लेपाद् भुक्ता श्वयथुनाशिनी । श्लेष्मजान् विंशतीरोगान् सद्योहन्यान्निषेवणा-

दिति भावप्रकाशः ॥

निर्व्विष्टः । त्रि । भुक्त ॥ कृतनिर्वेशे ॥ प्राप्ते ॥ स्थिते ॥ विवाहिते ॥ कृताग्निहोत्रे ॥

निर्व्वीजा । स्त्री । काकवीजद्राक्षायाम् । कसमिस् इतिभाषा इतिराजनिर्घण्टः ॥

निर्व्वीरः । त्रि । वीरशून्ये ॥

निर्व्वीरा । स्त्री । अवीरायाम् । पतिपुत्रविहीनायाम् ॥

निर्व्वीर्य्यः । त्रि । निष्प्रभावे ॥

निर्व्वृतः । त्रि । उपरतस्वभावे ॥

निर्व्वृतिः । स्त्री । सुस्थितौ ॥ अस्तगमने । मृत्यौ ॥ सुखे ॥ मोक्षे ॥ सिद्धौ ॥

निर्व्वृत्तः । त्रि । निष्पन्ने ॥ निर्वर्त्ततेस्म । वृतुवर्त्तने । क्तः ॥ आप्ते ॥

निर्व्वृत्तिः । स्त्री । निष्पादे ॥ समाप्तौ ॥ यथा ऽध्ययननिर्वृत्तिरिति ॥ त्रि । वृत्तिरहिते ॥

निर्व्वेदः । पुं । स्वावमानने ॥ एतावता कालेनाप्ययं न सिद्धः किमतः परं कष्टमित्यनुतापे । खेदे ॥ वैराग्ये ॥ यथा । यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति ॥ शान्तरसस्य स्थायिभावे । निर्वेदः स्थायिभावोस्ति शान्तोपि नवमो रसः ॥ परवैराग्ये ॥ यथा । ततः कदाचिन्निर्वेदान्निराकाराश्रितेन च । लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मयेति मोक्षधर्म्मः ॥

निर्व्वेशः । पुं । भोगे ॥ वेतने ॥ मूर्च्छने ॥ निर्वेशनम् निर्विश्यते ऽनेन वा । विश० । अकर्त्तरिचेति करणेचेति वा घञ् ॥

निर्व्वेशनम् । न । उपभुक्तौ ॥

निर्व्वेष्टनम् । न । नाडिचीरे । सूत्रवेष्टननल्याम् ॥ त्रि । वेष्टनरहिते ॥

निर्व्वैरः । त्रि । सर्वभूतेष्वपकारिष्वपि द्वेषरहिते ॥ निष्क्रान्तो वैरात् ॥

निर्व्वोढा । त्रि । निर्वहितरि ॥

निर्व्यग्रः । त्रि । स्वस्थे ॥

निर्व्यथनम् । न । छिद्रे । रन्ध्रे ॥ व्यथ० । भावे ल्युट् । निश्चयेन व्यथनं भयं चलनं वा यत्र ॥

निर्व्यपेक्षः । त्रि । निस्पृहे ॥

निर्व्यूढः । त्रि । त्यक्ते ॥ समाप्ते ॥

निर्व्यूहः । पुं । शेखरे ॥ द्वारि ॥ निर्यासे ॥ नागदन्तके ॥ निर्व्यूहति । इगुपधेति कः ॥

निर्व्यूह्यमानः । त्रि । इतस्ततश्चाल्यमाने ॥

निर्हरणम् । न । दाहार्थं शवादिनय

ने ॥ निष्काशने ॥ निःशेषेण हरणे ॥

निर्हारः । पुं । शल्याद्युत्पाटने । अभ्यवकर्षणे ॥ मलमूत्रादित्यागे ॥ निर्हरणम् । हृञ्० । घञ् ॥ यथेष्टविनियोगे ॥ न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात् । स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया ॥

निर्हारगृहम् । न । } विण्मूत्रादित्यागार्थगेहे । पैखरा इतिभाषा ॥
निर्हारस्थानम् । न । }

निर्हारी । पुं । दूरगामिगन्धे । समाकर्षिणि ॥ त्रि । तद्वति ॥

निर्हृतः । त्रि । दग्धे ॥

निर्ह्रादः । पुं । स्वाने । शब्दे ॥

निलयः । पुं । गृहे । वेश्मनि ॥ निलीयतेऽत्र । लीश्लेषणे । पुंसीतिघः ॥

निलयनम् । न । आधारे ॥ स्थाने ॥ निलीयतेस्मिन् । ली० । ल्युट् ॥

निलायी । त्रि । निवासिनि ॥

निलिम्पः । पुं । देवे । सुरे ॥ निलिम्पति । लिपउपदेहे । नौलिम्पेरितिशः । मुचादित्वान्नुम् ॥

निलिम्पा । स्त्री । स्त्रीगवि ॥

निलिम्पिका । स्त्री । निलिम्पायाम् । सौरभेय्याम् ॥ स्वार्थेकन् ॥

निलीनः । त्रि । निःशेषेणलीने । संवृते ॥

निवचनेकृत्य । अ । वाचंनियम्येत्यर्थ

निवचनेकृत्वा । अ । र्थः ॥ वचनाभावेनिवचने । अर्थाभावेऽव्ययीभावः । तृतीयासप्तम्योर्बहुलम् । इत्यप्रदेनिवचनेचेतिगतिसंज्ञा । कुगतीतिसमासः ॥

निवपनम् । न । पितृद्देश्यकदाने ॥

निवरा । स्त्री । कन्यायाम् । कुमार्याम् ॥ वृङ्० वृञ्० । आर्यां ग्रहइदृढ्रिश्चादिनाकर्मण्यप् ॥

निवर्त्तनम् । न । व्यावर्त्तने । निवृत्तौ ॥ यतोयतो निवर्त्तते ततस्ततो विमुच्यते । निवर्त्तनाद्धि सर्वतो नवेत्ति दुःखमण्वपि ॥ विंशतिवंशपरिमाणे ॥

निवर्त्तितः । त्रि । आकृष्टे ॥

निवर्हणम् । न । मारणे ॥ वर्हहिंसायाम् । भावेल्युट् ॥

निवर्हणीयः । त्रि । वध्ये ॥

निवर्हितः । त्रि । अपहृते ॥

निवसतिः । स्त्री । गृहे ॥

निवसथः । पुं । ग्रामे ॥ इतिहेमचन्द्रः ॥

निवसनम् । न । वस्त्रे ॥ गृहे ॥ निवसेल्युट् ॥

निवहः । पुं । समूहे ॥ नितरामूह्यते । ऊह० । पुंसीतिघः ॥ सप्तवाय्वन्तर्गतवायुविशेषे ॥ नितरां वहति । वह० । पचाद्यच् ॥

निवातः । पुं । दृढसन्नाहे । शस्त्राभेद्यवर्मणि ॥ आश्रये ॥ त्रि । वातशून्ये ॥ निरुद्धो निवृत्तो वा वातोऽस्मात् ॥

निवातकवचः । पुं । अच्छिद्रकञ्चुके ॥ हिरण्यकशिपोः पौत्रे दैत्ये । संह्रादपुत्रे ॥

निवापः । पुं । पितृदाने । सपिण्डनादूर्द्ध्वं पित्रुद्देशेन दाने ॥ न्युप्यते निवपनं वा । टुवप० । कर्मणि भावे वा घञ् ॥ दानमात्रे ॥

निवारः । पुं । निवारणे ॥

निवारणम् । न । निश्चयेन वारणे ॥

निवारितः । त्रि । निराकृते । कृतनिवारणे ॥

निवासः । पुं । गृहे ॥ निवसन्त्यस्मिन् । वस० । घञ् ॥ निवासदेशे ॥ निवासो नाम यत्र सम्प्रत्युष्यत इति भाष्यम् ॥

निवासी । त्रि । निवसनशीले ॥ निवसति तच्छीलः । वस० । णिनिः ॥

निविडः । त्रि । सान्द्रे । घने । नीरन्ध्रे । दृढे ॥ निविडाः केशाः ॥ अवटीटे ॥ नासिकायाः नतम् । नेर्विडज्विरीसचौ । तद्योगान्नासिका निविडा ॥

निविरीसः । त्रि । अवनाटे । निविडे ॥ नासिकाया नतम् । नेर्विडज्विरीसचौ । तद्योगान्नासिका निविरीसा पुरुषो निविरीसः ॥ सान्द्रे ॥

निविष्टः । त्रि । स्थिते ॥ निविश० । क्तः ॥ प्रविष्टे ॥ यथा । उडुगणपरिवारो नायकोऽप्योषधीनामम्रतमयशरीरः कान्तियुक्तोऽपि चन्द्रः । भवति विकलमूर्त्तिर्मण्डलं प्राप्य भानोः परसदननिविष्टः को लघुत्वं न यातीति ॥

निवीतम् । न । कण्ठलम्बिते यज्ञसूत्रे ॥ त्रि । प्रावृते । परिहित वस्त्रे ॥ निवीयते स्म । व्येञ् संवरणे । क्तः । सम्प्रसारणादिः ॥ यद्वा । निवीयते स्म । अज० । अजेर्वी । वीगत्यादिषु वा । क्तः ॥ न्यजति स्म निवेति स्म वा । गत्यर्थेति क्तः ॥ निम्नाधोभागे वीतं गमनमस्य वा ॥

निवीती । पुं । कण्ठलम्बियज्ञसूत्रवति द्विजे ॥ शिरो विधाय दक्षिणपाण्यादावप्यनुद्धृते कण्ठादेव सज्जने ऋजु प्रालम्बे यज्ञसूत्रे वस्त्रे वा निवीती द्विजो भवति ॥ निवीतमस्यास्ति । अतइनिठनाविति इनिः ॥ कृतोपवीती देवेभ्यो निवीती च भवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रान्नृषींस्तथा ॥

निवृतम् । त्रि । निवीते ॥ परिक्षिप्ते । परिखादिना वेष्टिते ॥ निव्रियते-

ख । वृञ्° । क्तः ॥

निवृत्तः । त्रि । आवृत्ते ॥ गते ॥ परि समाप्ते ॥ निवृत्तिविशिष्टे । विरते ॥

निवृत्तचक्षुः । त्रि । आवृतनेत्रे ॥ निवृत्तानि विमुखीकृतानि विषयेभ्यश्चक्षूंषि बाह्यानि करणानि येन ॥

निवृत्तात्मा । पुं । निषेधे ॥ निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते ॥

निवृत्तिः । स्त्री । उपरतौ । उपरमे । विरतौ ॥ यद्विषयं यदाश्रयं मत्वानं तद्विषयतदाश्रयप्रमाणज्ञानात् तन्निवृत्ति र्भवति ॥ प्रवृत्तिप्रागभावे ॥ निवर्त्तते निवर्त्तनं वा । वृतु° । क्तिन् ॥

निवेदकः । त्रि । विज्ञापनस्य कर्त्तरि ॥

निवेदनम् । न । आवेदने । सम्मानपूर्वकविज्ञापने ॥ नि विद्° । ल्युट् ॥ समर्पणे ॥

निवेदितः । त्रि । कृतनिवेदने ॥

निवेशः । पुं । विन्यासे ॥ सैन्यविन्यासे ॥ शिविरे । आगन्तुकसैन्यवासे ॥ उद्वाहे ॥ स्थाने ॥ निवेशनम् । निविश° । घञ् ॥ निविशन्तेऽस्मिन् । इत्यस्चेतिघञ् ॥ कटके ॥ इतिशब्दाम्बुधौ प्राणकृष्णः ॥

निवेशनम् । न । गेहे ॥ स्थितौ ॥ प्रवेशे ॥ निविश° । ल्युट् ॥

निवेशनीयः । त्रि । निवेष्टुं योग्ये । निवेशनार्हे ॥

निवेशितः । त्रि । विहिते ॥ विशतेर्ण्यन्तात् कर्म्मणि क्तः ॥

निवेश्यः । त्रि । निवेशनीये ॥

निट् । स्त्री । निशायाम् । रात्रौ ॥ नितरां श्यति तनूकरोति व्यापारान् । शोतनूकरणे । आतश्चोपसर्गइतिकः । पृषोदरादिः ॥

निशठः । पुं । बलदेवात्मजे ॥

निशमनम् । न । दृष्टौ ॥ श्रुतौ ॥

निशा । स्त्री । रक्षोजनन्याम् । रात्रौ ॥ नितरां श्यति तनूकरोतिव्यापारान् । शो° । आतश्चोपसर्गइतिकः ॥ टाप् ॥ दारुहरिद्रायाम् ॥ हरिद्रायाम् ॥ लग्नविशेषे ॥ यथा । अजगोपतियुग्मञ्च कर्किधन्विमृगा स्तथा । निशासंज्ञाःस्मृताश्चैते शेषाश्चान्ये दिनात्मकाइति ॥

निशाकरः । पुं । चन्द्रे ॥ निशां करोति । डुकृञ्° । दिवाविभानिशेति टः ॥ कुक्कुटे ॥

निशाख्या । स्त्री । हरिद्रायाम् ।

निशागणः । पुं । गणराज । रात्रिसमूहे ॥

निशाचरः । पुं । राक्षसे ॥ फेरौ । शृगाले ॥ पेचके । घूके ॥ सर्पे ॥ भूते ॥

॥ चक्रवाके ॥ चोरकभेषजे ॥ निशायां चरति । चर० । चरेष्टः ॥ त्रि । रात्रिचरमात्रे ॥

निशाचरी । स्त्री । पांशुलायाम् । कुलटायाम् ॥ राक्षस्याम् ॥ अभिवृति निशाचरी मम गृहान्तराले स्थिता निहन्ति निगमागमस्मृतिपुराणशास्त्रोदिताम् । क्रियां तदनुगा सखी हृदय एव चिन्ताविशत् तयोर्दमनकारणं त्वमसि केवलं भूपते ॥ केशिनीनामगन्धद्रव्ये ॥ टित्वात् ङीप् ॥

निशाचर्म्म । न । तमसि । अन्धकारे ॥

निशाजलम् । न । हिमे । तुहिने ॥

निशाटः । पुं । पेचके ॥ निशाया मटति । अट० । अच् ॥ निशाचरे ॥

निशाटकः । पुं । गुग्गुलौ ॥ इति राजनिर्घण्टः ॥

निशाटनः । पुं । उलूके । पेचके ॥ निशाचरे ॥

निशातः । त्रि । तेजिते । निशिते । शाणिते ॥ निशायते स्म । शो० । क्तः । शाछोरिति पक्षे इत्त्वाभावः ॥

निशाद् । त्रि । निशाभुजि ॥

निशादिः । स्त्री । सन्ध्यायाम् ॥ इति राजनिर्घण्टः ॥

निशानम् । न । तीक्ष्णीकरणे ॥

निशान्तम् । न । सौध्ये । गृहे । भवने ॥ उषसि । प्रभाते ॥ यथा । निशान्ते निशान्ताङ्गनागानयुक्ते स्फुरत्तारकाभानुमद्भानुपूते । प्रसन्नाम्बरान्तेरटद्ब्रह्मगीते जगद्रक्षितुं मुञ्च निद्रां हृगन्ते ॥ इत्यच्युतकलदयारामभट्टाचार्य्यः ॥ त्रि । शान्ते ॥

निशान्धः । त्रि । रात्र्यन्धे ॥

निशान्धा । स्त्री । जतुकालतायाम् ॥

निशापतिः । पुं । चन्द्रे ॥ निशायाः पतिः ॥ कर्पूरे ॥

निशापुष्पम् । न । उत्पले ॥

निशाबलः । पुं । मेषवृषमिथुनकर्कटधनुर्मकरराशिषु ॥

निशाभङ्गा । स्त्री । दुग्धपुष्प्याम् । दुग्धपेया इति गौडभाषा ॥

निशामणिः । पुं । चन्द्रे ॥ निशाया मणिरिव ॥

निशामनम् । न । दर्शने । चाक्षुषज्ञाने ॥ आलोचने ॥ श्रवणे ॥ ज्ञापनमात्रे ॥

निशामृगः । पुं । शृगाले ॥

निशारणम् । न । मारणे ॥ शॄ हिंसायाम् । स्वार्थणिजन्तः । भावे ल्युट् ॥ पुं । रात्रियुद्धे ॥

निशारत्नः । पुं । चन्द्रे ॥ इति हेमचन्द्रः ॥

निशारुकः । पुं । सप्तरूपकान्तर्गतरूपकभेदे ॥ तल्लक्षणं यथा । लघुद्वन्द्वं

गुरुद्वन्द्वं तल्यासतालक: स्मृत:। चतुर्विंशति वर्णैस्तु रसेष्वास्ये निशारुक: ॥ तालविशेषे ॥ यथा। प्रविश्यनर्त्तकोरङ्गं विकीर्य्य कुसुमादिकम्। निशारुकेण तालेन कोमलं नृत्यमाचरेत् ॥ इति सङ्गीतदामोदर: ॥

निशावन:। पुं। शणे ॥ इतिराजनिर्घण्ट: ॥

निशावेदी। पुं। कुक्कुटे इतिहेमचन्द्र: ॥

निशाहस:। पुं। कुमुदे। कैरवे ॥ इति त्रिकाण्डशेष: ॥ निशायां हस: हसनं विकाशो ऽस्य ॥

निशाह्वा। स्त्री। हरिद्रायाम् ॥ निशा आह्वायस्या:। निशापदेन सर्व्वेरात्रिपर्य्याया हरिद्रानामानि भवन्ति ॥

निशित:। त्रि। शाणिते। तीक्ष्णीकृते ॥ निशायते स्म। शो०। क्त:। शाछोरिति वेत्त्वम् ॥ न। लोहे ॥

निशिपाल:। पुं। वृत्तविशेषे ॥ यथा। तालशररञ्जुधररत्नवरसुन्दरम् भावयुततालगणमन्त्यकृतचामरम्। शुद्धमतिनागपतिचित्तकृतसङ्गमम् वृत्तनिशिपालमसिताचिहृदयङ्गमम् ॥ यथा। चन्द्रमुखि नीरमुषि वाति मलयानिले याति मम चित्तमिव गाढमदनानले। तापकरकामशरशल्यभरशोलितं मा भिव्वहिप भय जहि रोष मतिसम्भ्रममिति ॥

निशिपुष्पा। स्त्री।
निशिपुष्पिका। स्त्री। } शेफालिकायाम्। पारजात इति हारसिङ्गार इतिच भाषा ॥

निशिपुष्पी। स्त्री। निशिपुष्पिकायाम् ॥ निशि रात्रौ विकसितानि पुष्पाण्यस्या:। मध्यमपदलोप:। सप्तम्या अलुक्। पाककर्णेति ङीष् ॥

निशीथ:। पुं। अर्द्धरात्रे ॥ निशेरते ऽस्मिन्। शीङ्०। निशीथगोपीथावगथा: इतिथक् ॥ रात्रिमात्रे ॥

निशीथिनी। स्त्री। त्रियामायाम्। रात्रौ ॥ निशीथो ऽस्यस्याम्। इनि:। ङीप् ॥

निशीथिनीनाथ:। पुं। चन्द्रमसि ॥

निशीथ्या। स्त्री। रात्रौ इति भूरि० ॥

निशुम्भ:। पुं। शुम्भावरजे दानवविशेषे ॥ वधे ॥

निशुम्भनम्। न। मारणे ॥ इतिहलायुध: ॥

निशुम्भमथनी। स्त्री।
निशुम्भमर्द्दिनी। स्त्री।
निशुम्भशुम्भमथनी। स्त्री। } दुर्गायाम् ॥

निशुम्भी। पुं। बुद्धविशेषे। वज्रकपालिनि। वज्रटीके ॥

निशैत:। पुं। वकपक्षिणि ॥ इति त्रि-

काण्डशेषः ॥

निशोथा । स्त्री । त्रिवृतायाम् । रेचन्याम् ॥

निश्चयः । पुं । संशयान्यज्ञाने । निर्णये । सिद्धान्ते । अध्यवसाये । इदमित्थमेवेति संशयविपर्ययरहिते विषयपरिच्छेदे ॥ निश्चयनम् ॥ त्रिच्० । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ चिन्मात्रममलमक्षयमद्वयमानन्दमनुभवारूढम् । ब्रह्मैवास्ति तदन्यन्न किञ्चिदपि निश्चयो विदुषामिति पूज्यपादाः ॥ प्रमाणनिबन्धने । शास्त्राचार्यवचनतात्पर्यविषयेऽर्थे ॥

निश्चलः । त्रि । अचले । स्थिरे ॥ असम्भावनाविपरीतभावनारहिते ॥ जाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिते ॥ अवहितकरणकलापे ॥

निश्चला । स्त्री । भूमौ । अचलायाम् ॥ शालपर्ण्याम् ॥

निश्चलाङ्गः । पुं । बके ॥ त्रि । पर्वतादौ ॥ स्पन्दरहिते ॥

निश्चायकः । त्रि । निर्णायके । निश्चयकर्त्तरि ॥

निश्चारकः । पुं । पुरीषस्य क्षये ॥ स्वैरे ॥ समीरणे ॥ इतिमेदिनी ॥

निश्चितः । त्रि । विशेषतया ज्ञाते । प्रमाणतो निर्णीते ॥ यथा । जगतश्चयन्मूलं तत्परिज्ञानात् परं श्रेय इति सर्वोपनिषदां निश्चितोऽर्थ इति भाष्यम् ॥ निश्चितवति ॥ ब्रह्मविदि ॥ निस्चिञ्० । कर्त्तरि क्तः ॥

निश्चिन्तः । त्रि । चिन्ताशून्ये । चिन्तामुक्ते ॥ निर्गताचिन्तायस्मात् ॥ द्वावेव चिन्तया मुक्तौ परमानन्दआप्लुतौ । यो विमुग्धो जडो बालो यो गुणेभ्यः परङ्गतः ॥

निश्चीयमानः । त्रि । निश्चयविषये ॥

निश्चीरानदी । स्त्री । तीर्थविशेषे ॥

निश्चुक्कणम् । न । दन्तशाणे । मिसि इतिभाषा ॥ इतित्रिकाण्डशेषः ॥

निश्चेष्टः । त्रि । ईहारहिते । निरुद्योगे ॥ निर्गता चेष्टा यस्मात् ॥

निश्चेष्टता । स्त्री । कायिकव्यापाराकरणे ॥

निश्चेष्टाकरणः । पुं । कामबाणविशेषे ॥ मनःशिलाघटितौषधविशेषे ॥

निश्रेणी । स्त्री । अधिरोहिण्याम् । काष्ठादिकृतारोहणमार्गे । निसैनी इति भाषा ॥ नियता श्रेणिः पङ्क्तिरत्र ॥

निश्वासः । पुं । श्वसने । बहिर्मुखश्वासे ॥ निश्वसनम् । श्वसप्राणने । घञ् ॥

निश्वाससंहिता । स्त्री । वराहपुराणप्रसिद्धे शिवप्रणीतशास्त्रविशेषे ॥

निषङ्गः । पुं । तूणीरे ॥ नितरां सज्यन्ते शरा अत्र । षञ्ज० । हलश्चेति घञ् ॥ सङ्गमे ॥

निषङ्गथिः । पुं । समालिङ्गे ॥ निषजति । षञ्जसङ्गे । नौ षञ्जेर्गथिन् । चजोरिति कुत्वम् ॥

निषङ्गी । त्रि । धनुर्द्धरे ॥ तूणीरे ॥ निषङ्गोऽस्यास्मिन् वास्ति । इनिः ॥

निषण्णः । त्रि । आसीने ॥ यथास्थानस्थिते ॥ यथा । ज्वरे प्रमोहो भवति स्वल्पै रपि विचेष्टितैः । निषण्णं भोजयेत् तस्मान्मूत्रोच्चारौ च कारयेदिति ॥ निषीदतिस्म । षद्लृ० । गत्यर्थेति क्तः । रदाभ्यामिति नः ॥

निषण्णकम् । न । सुनिषण्णे ॥ त्रि । आसीने ॥

निषदनम् । न । स्थाने ॥ निश्चयेन सीदन्त्यत्र । षद्लृ० । अधिकरणे ल्युट् ॥

निषद्या । स्त्री । आपणे । हट्टे ॥ निषीदन्त्यस्यां जनाः । षद्लृ० । संज्ञायां समजेति क्यप् । सदिरप्रतेरिति षः ॥ क्षुद्रखट्वायाम् ॥

निषद्वरः । पुं । जम्बाले । कर्द्दमे ॥ निसीदन्त्यत्र । षद्लृ० । नौ सदेरिति ष्वरच् । सदिरप्रतेरिति षत्वम् ॥ यद्वा । निषदनम् । सं० । क्विप् । नि

षद् आसनस्य वरः आवरकः । वृञ् आवरणे आधृषीयः । पचाद्यच् ॥ स्मरे ॥

निषद्वरी । स्त्री । निशायाम् ॥ षित्वान्ङीष् ॥

निषधः । त्रि । कठिने ॥ पुं । देशविशेषे बहुवचनान्तः ॥ तद्देशराजे ॥ निषादस्वरे ॥ पर्वतविशेषे । इलावृतस्य दक्षिणे द्विसहस्रयोजनविस्तीर्णे पूर्वतो दीर्घे हरिवर्षस्य मर्यादाशैले ॥ निषीदति । षद्लृ० । अच् । पृषोदरादिः ॥

निषादः पुं । तन्त्रीसमुत्थिते कण्ठोत्थिते च स्वरविशेषे ॥ निषादं रौति कुञ्जरः ॥ पारशवे । ब्राह्मणाच्छूद्रकन्यायामूढायामुत्पन्ने धीवरविशेषे ॥ चण्डाले ॥ निषीदति मनो यस्मिन् पाप मस्मिन् वा । षद्लृ० । हलश्चेति घञ् । सदिरप्रतेरिति षत्वम् ॥ वेणोरुमन्थनादुत्पन्ने ॥ दग्धस्थूणाप्रतीकाशो विकटाक्षो तिह्रस्वकः । किङ्करोमीति तान् सर्वान् विप्रानाह स चातुरः ॥ निषीदेति तमूचुस्ते निषादस्तेन सोऽभवत् । ततस्तत्सम्भवाज्जाता विन्ध्यशैलनिवासनः ॥ निषादा मुनिशार्दूल पापकर्मोपलक्षणाः । तेन द्वारेण निष्क्रान्तं

तत् पापं तस्य भूपतेः ॥ निषादास्ते ततो जाता वेनकल्मषनाशनाः ॥ इति विष्णुपुराणम् ॥

निषादकर्षूः । पुं । देशविशेषे ॥

निषादाधिपः । पुं । रामायणप्रसिद्धे गुहाख्ये ॥ निषादानामधिपे ॥

निषादी । पुं । हस्तिपके । हस्त्यारोहे ॥ निषीदत्यवश्यम् । षद्लृ० । आवश्यके णिनिः ॥ यद्वा । निषादयत्युपवेशयति हस्तिनम् । ग्रह्यादित्वात् आवश्यके वा णिनिः ॥ उपविष्टे ॥

निषिद्धः । त्रि । प्रमावगतेष्टसाधनता निषेधकनञ्पदयोगिवाक्यगम्ये । लिङाद्यनुषक्तनञ्योगिवाक्यगम्ये ॥ बाधिते ॥ निषेधविषये ॥ निषिध्यते निषिद्ध्यतेस्मवा । सिधु० । कर्त्तरिकर्मणिवा क्तः ॥

निषिद्धकर्म्म । न । नरकाद्यनिष्टसाधने ब्राह्मणहननादौ ॥ नरकादीत्यादिपदादैहिकदुःखग्रहः । ब्राह्मणहननादीत्यादिपदात् सुरापानादिग्रहः ॥

निषेकः । पुं । गर्भाधाने ॥ न । रेतसि ॥ निषिच्यते । षिच० । घञ् ॥

निषेदिवान् । त्रि । निषण्णे ॥ भाषायां सदवसश्रुवः इति क्वसुप्रत्ययः ॥

निषेदुषी । स्त्री । निषण्णायाम् ॥ ङीप् ॥

निषेधः । पुं । प्रतिषेधे । निवर्त्तने ॥ यन्निन्द्यते तन्निषिध्यते इति विधिस्पृष्टे निषेधानवकाशश्चेति न्यायः ॥ निषेधनम् । निपूर्वात् सेधतेर्घञ् । सुषामादित्वात् षत्वम् ॥

निषेवणम् । न । सेवने ॥

निषेवितः । त्रि । नितरामनुष्ठिते ॥

निषेव्यः । त्रि । सेवनीये ॥ सेव्यमाने ॥ सेविते ॥ निसेवितुमर्हः । षेवृ० । अर्हेण्यत् । सतां निषेव्येश्मिमवान् भोगिनामलयाचलः ॥

निष्कः । पुं । न । साष्टहेमशते । साष्टसुवर्णशते । शास्त्रीयषोडशमाषकपरिमितं स्वर्णं सुवर्णः तेषामष्टाधिकशते ॥ दीनारे । व्यावहारिकरूपके ॥ कर्षे । स्वर्णकर्षे ॥ वक्षोऽलङ्कारे ॥ हेममाषे ॥ हेमपले ॥ निश्चयेन कायति । कै० । आतश्चेति कः । इदुदुपधस्येति षः ॥ यद्वा । निषीदति । षद्लृ । नौसदेर्डिच्चेतिकन् । सदिरप्रतेरिति षः ॥ चतुर्भिः सुवर्णैः परिमिते मानविशेषे ॥ चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥ षोडशद्रम्मे । सोलहकाहनइति गौडभाषा ॥ माषकचतुष्टये ॥ इति वैद्यकपरिभाषा ॥

निष्कण्टकः । त्रि । उपसर्गरहिते ॥

निष्कण्ठः । पुं । वरुणद्रुमे ॥ इतिशब्दचन्द्रिका ॥

निष्कम्पः । त्रि । निस्तरङ्गे ॥ निर्वेपथौ ॥

निष्कर्षः । पुं । निश्चये ॥ निष्कर्षणम् । कृष० । घञ् ॥ इयत्तापरिच्छेदे ॥

निष्कलम् । न । ब्रह्मणि । निरवयवे ॥ निर्गताः कला यस्मात् ॥ त्रि । कलाशून्ये ॥ नष्टवीर्ये ॥ निरुपाधौ ॥ निर्गतः कलाभिः ॥ आधारेपुल्लिङ्ग इति शब्दचन्द्रिका ॥

निष्कला । स्त्री । विगतार्त्तवायाम् । रजोहीनायाम् ॥ वृद्धायाम् ॥ कलाया निष्क्रान्ता । निरादय इति समासः ॥ निर्गतंकलं शुक्रमस्या वा ॥

निष्कली । स्त्री । विगतार्त्तवनार्याम् ॥ गौरादित्वात् ङीष् ॥

निष्कामः । त्रि । मानसकामनाशून्ये । निस्त्रैगुण्ये विवेकिनि ॥ विभ्रमापादिताः कामाः प्रत्यक्तत्त्वाविवेकिनः । यस्मादिनिर्गताः सोयं निष्काम इति भण्यते ॥ निर्गतः कामेभ्यः ॥

निष्कारणः । त्रि । फलापेक्षारहिते ॥ कारणशब्दः फलपरः । यथा ब्राह्मणेन निष्कारणः षडङ्गोवेदो ऽध्येयोज्ञेयश्चेत्यागमः ॥ निष्कारण-इतिहष्टं कारणमनपेक्ष्येत्यर्थः ॥

निष्कालकः । पुं । मुण्डितलोम्नि घृताभ्यक्ते प्रायश्चित्तार्थे ॥

निष्काशः । पुं । प्रासादाद्युपस्थाने । छज्जा इ० बारण्डा इ० बारजा इ० पगिया इति च भाषा ॥ इति महाभरतम् ॥

निष्कासितः । त्रि । निर्गमिते । अवकृष्टे । निःसारिते ॥ आहिते ॥ धिक्कृते ॥ निष्कास्यते स्म । कसगतौ । णिच् । क्तः ॥

निष्कुटः । पुं । गृहारामोपवने । गृहारामे ॥ कुटात् गृहात् निष्क्रान्तः । निरादय इति स० ॥ केदारे ॥ कपाटे ॥ पतन्याटे । अन्तः पुरे । वेडा रावला रणवास इत्यादिभाषा ॥

निष्कुटिः । स्त्री । वृहदेलायाम् । वहुलायाम् ॥ निश्चिताकुटिः कौटिल्यमस्याः । निष्क्रान्ता कुटेर्वा ॥

निष्कुटी । स्त्री । पृथ्वीकायाम् । वृहदेलायाम् ॥ कृदिकारादितिङीष् ॥

निष्कुषितः । त्रि । निष्कासिते ॥

निष्कुषितः । त्रि । खण्डिते ॥ कुष्णातेः कर्मणि क्ते इण्निष्ठायामितीडागमः ॥

निष्कुहः । पुं । कोटरे । वृक्षादिरन्ध्रे ॥ निश्चयेन कुह्यते । कुह विस्मापने । पचाद्यच् ॥

निष्कृतः । त्रि । नाशिते ॥ प्रायश्चित्ते ॥

निष्कृतिः । स्त्री । निर्मुक्तौ । निस्तारे ॥

निष्करणम्। कृञ्°। क्तिन्॥ मुक्तौ। उत्पन्नपापस्य नाशे॥ ब्रह्मघ्ने चैवमिचघ्ने सुरापे गुरुतल्पगे। सर्वच विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः॥
निष्कृपः। त्रि। निर्दये॥
निष्कृष्टः। त्रि। सारे। निचोड इति भाषा॥
निष्कृष्टार्थः। त्रि। सारार्थे॥
निष्कोषणम्। न। अन्तरवयवानां बहिर्निःसारणे॥
निष्क्रमः। पुं। बुद्धिसम्पत्तौ। धीशक्तौ॥ निर्गमे॥ दुष्कुले॥ निष्क्रमणसंस्कारे॥ निष्क्रमणम्। क्रमु°। घञ्। नोदात्तेति वृद्धिर्न॥
निष्क्रमणम्। न। दशसंस्कारान्तर्गतसंस्कारविशेषे। चतुर्थे मासि कर्त्तव्यशिशोर्निष्क्रमणं गृहादित्याद्युक्तविधिविहिते सूर्यदर्शने॥ गृहाद्बहिर्निर्गमने॥
निष्क्रयः। पुं। विक्रये॥ भृतौ। वेतने॥ निष्क्रयणम्। डुक्रीञ्°। एरच्॥ वृद्धियोगे॥ सामर्थ्ये॥ निर्गतौ॥ प्रत्युपकारे॥ विनिमये॥ निष्क्रियते प्रत्याह्रियते ऽनेन परगृहीतम्। डुक्रीञ्°। एरच्॥
निष्क्रान्तः। त्रि। निर्गते॥
निष्क्रियः। त्रि। क्रियारहिते॥ न। ब्रह्मणि॥
निष्क्राथः। पुं। रसके। मांसादिक्वाथे। जोल इति रसा इति च भाषा॥
निष्ठ्यः। त्रि। वर्णाश्रमादिभ्यो निर्गते चाण्डालादौ॥ निर्गतः। निसो गते इत्यप्रत्ययः। ह्रस्वात्तादाविति षत्वम्॥
निष्ठा। स्त्री। निर्वहणे। नाट्यसन्धिसमापने। नाट्योक्त्या प्रस्तुतकथासमाप्तौ॥ निष्पत्तौ॥ नाशे॥ अन्ते॥ याञ्चायाम्॥ उत्कर्षे॥ व्यवस्थायाम्॥ क्लेशे॥ व्रते॥ गुरुशुश्रूषादौ तत्परतायाम्॥ नियतं स्थानम्। आतश्चोपसर्गे इत्यङ्॥ उपसर्गादिति षत्वम्। टाप्॥ निश्चयेन स्थितौ॥ धर्मादौ श्रद्धायाम्॥ यथा। निष्ठया हि प्रतिष्ठास्यादनिष्ठस्य कुतः सुखम्। शक्नोति नैष्ठिकः स्वीयं धर्मं पातुं न चेतर इति॥
निष्ठानम्। न। तेमने। व्यञ्जने। भक्तान्नोपसेचने दध्यादौ॥ निष्ठीयते ऽत्र। ष्ठा°। ल्युट्॥
निष्ठितः। त्रि। निष्णाते॥ नितरां स्थिते॥ निष्ठाविशिष्टे॥ निष्ठासञ्जाता ऽस्य। ता° इतच्॥ निश्चयेन स्थिते॥
निष्ठीवः। पुं। निष्ठीवने॥
निष्ठीवनम्। न। मुखेन श्लेष्मनिरसने

। निष्ठेवने ॥ ष्ठिवुनिरसने । ल्युट् । ष्ठिवुसिव्योर्ल्युटि दीर्घो वेति स्वामी । । पृषोदरादित्वादिति मुकुटः ॥

निष्ठुरः । त्रि । कर्कशवाग्युक्ते । परुषे ॥ कठोरे ॥ नितिष्ठति । ष्ठा० । मद्गु० उरच् । उपसर्गात्सुनोतीति षत्वम् ॥ न । वचनविशेषे ॥ यथा । गुह्याङ्गमेध्यसंचारानां वचनं निष्ठुरं विदुः । यदन्यद्वा वचोऽनीचं स्त्रीपुंसो मिथुनाश्रयमिति ॥

निष्ठेवः । पुं । निष्ठीवे । निष्ठीवने ॥ ष्ठिवु० । घञ् ॥

निष्ठेवनम् । न । निष्ठीवने ॥ ष्ठिवु० । ल्युट् ॥

निष्ठ्यूतः । त्रि । आविद्धे । नुन्ने । क्षिप्ते ॥ निष्ठीव्यते स्म । ष्ठिवु० । क्तः । यस्येतिनेट् । च्छ्वोःशूडित्यूठ् ॥

निष्ठ्यूतिः । स्त्री । निष्ठीवने ॥ ष्ठिवु० । क्तिन् । च्छ्वोरित्यूठ् ॥

निष्णातः । त्रि । कुशले । निपुणे । विज्ञे ॥ न्यस्नासीत् । ष्णा शौचे । गत्यर्थेति क्तः । निनदीभ्यामिति षत्वम् ॥ पारङ्गते ॥

निष्पक्वः । त्रि । क्वथिते ॥ निश्चयेन पक्वः ॥

निष्पचनम् । न । निष्पाके ॥

निष्पत्तिः । स्त्री । सिद्धौ ॥ निष्पदनम् । पद० । स्त्रियाङ्क्तिन् ॥ समाप्तौ ॥

निष्पताकृतिः । स्त्री । सपत्राकृतौ । अत्यन्तपीडायाम् ॥

निष्पत्रिका । स्त्री । करीरवृक्षे ॥ इति राजनिर्घण्टः ॥

निष्पद्यानम् । न । नाव्यां । नरयानाम् ॥ अथ निष्पद्यानोद्देशो यथा । नौकाद्यं निष्पदं यानं तस्य लक्षणमुच्यते । अश्वादिकन्तु यद्यानं स्थले सर्वं प्रतिष्ठितम् ॥ जले नौकैव यानं स्यात्तस्मात्तां यत्नतो वदेत् ॥ * ॥ अथ समयो यथा । सुवारवेलातिथिचन्द्रयोगे चरेविलग्ने मकरादिषट्के । कृत्येन्त्यसप्तस्वतिरेकतोऽन्ये वदन्ति नौकाघटनादिकर्म ॥ * ॥ अश्विखरांशुसुधानिधिपूर्वामित्रधनाच्युतभे शुभलग्ने । तारकयोगतिथीन्दुविशुद्धौ नौगमनं शुभदं शुभवारे ॥ * ॥ वृक्षायुर्वेदगदिता वृक्षजातिश्चतुर्विधा । समासेनैव गदितं तेषां काष्ठं चतुर्विधम् ॥ तद्यथा । लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् । दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत् ॥ कोमलं गुरु यत्काष्ठं वैश्यजाति तदुच्यते । दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥ लक्षणद्वययोगेन द्वि-

जातिः काष्ठसङ्ग्रहः ॥ क्षत्रियका ष्ठैर्घटिता भोजमते सुखसम्पदं नौका । अन्यैर्लघुभिः सुदृढै विंदधति जलदुष्पदे नौकाम् ॥ विभिन्नजातिद्वय काष्ठजाता नश्रेयसेनापि सुखायनौका । नैषाचिरंतिष्ठति पच्यतेच विभिद्यते वारिणि मज्जतेच ॥ न सिन्धुगाद्यार्हति लोहबन्धं तल्लोहकान्तै र्ह्रियते हि लोहम् । विपद्यते तेन जलेषु नौका गुणेन बन्धं निजगाद भोजः ॥ * ॥ अथ लक्षणानि । सामान्यञ्च विशेषश्च नौकाया लक्षणद्वयम् । तत्रसामान्यम् । राजहस्तमितायामा तत्पादपरिणाहिनी । तावदेवोन्नता नौका क्षुद्रेति गदिता बुधैः ॥ अतःसार्द्धमितायामा तदर्द्धपरिणाहिनी । त्रिभागेनोच्छ्रिता नौका मध्यमेति प्रचक्षते ॥ क्षुद्राथमध्यमा भीमा चपलापटलाभया । दीर्घापत्रपुटाचैव गर्भरा मन्थरातथा ॥ नौका दशक मित्युक्तं राजहस्तैरनुक्रमम् । एकैकवृद्धैः सार्द्धैश्च विजानीयाद्द्वयं द्वयम् ॥ उक्तमिश्च प्रवीणाच हस्तादर्द्धाशसम्मिता । अथ भीमा भयाचैव गर्भराचायुभप्रदा ॥ मन्थरापरतो यास्तु तासामेवाम्बुधौ गतिः । तासां गुणास्तु स-

क्षेपाद्दृढताच प्रकीर्त्तिता ॥ * ॥ अथविशेषः ॥ दीर्घाचैवोन्नताचेति विशेषे द्विविधा भिदा । तत्रदीर्घाय था । राजहस्तद्वयायामा अष्टांशपरिणाहिनी । नौकेयं दीर्घिकानाम दशाङ्गे नोन्नतापिच ॥ दीर्घिका तरणि र्लोला गत्वरागामिनीतरिः । जङ्घालाप्लाविनीचैव धारिणी वेगिनी तथा ॥ राजहस्तैकैकवृद्धा नौका नामानि वैदश । उक्तिः परिणाहस्य दशाष्टांशमितौ क्रमात् ॥ अत्र लोला गामिनीच प्लाविनी दुःखदा भवेत् । लोलायामान मारभ्य यावद् भवति गत्वरा ॥ लोलायाःफलमाधत्ते एवं सर्वासुनिर्णयः । वेगिन्याः परतो यातु सा भिन्नायोक्तरायथा ॥ भोजोपि । नौकादीर्घं यथेच्छं स्यात् तत्रैतानिविवर्ज्जयेत् । हस्तसंख्या परित्याज्या वसुवेदग्रहोत्तरे ॥ षड्भुसरमितानौका कुलं हन्ति वलं धनम् । नवते द्गुत्तरे यापि या चत्वारिंशतेःपरा ॥ एतेन चत्वारिंशतिषष्टिनवतिसंख्या तत्परतोपि । यावदपरदशकं तावदेव तत्फलमिति । इतिदीर्घा ॥ अथोन्नता । राजहस्तद्वयमिता तावत्प्रसरणोन्नता । इयमूर्द्धाभिधानौका चेमा

निष्पद

य पृथिवीभुजाम् ॥ ऊर्द्धामूर्द्धाश्वमुखी गर्भिणी मन्थरा तथा । राजहस्तैकवृद्धा नाम पञ्चधयं भवत् ॥ अथानूर्द्धा गर्भिणीच निन्दितं नामयुग्मकम् । मन्थरायाः परा यास्तु ताः शुभाय यथोद्भवम् ॥ भोजोऽपि । बाणाग्न्युत्तरतो मानं नौकानाम शुभं वहेत् । पञ्चाग्रदूर्द्धादुल्लासं धनानाम्नं चयोऽहतः ॥ इत्युक्तता ॥ * ॥ धात्वादीनामतो वक्ष्ये निर्णयं तरिसंश्रयम् । कनकं रजतं ताम्रं चितयं वा यथाक्रमम् ॥ ब्रह्मादिभिः परिन्यस्य नौकाचित्रण कर्मणि । चतुःशृङ्गा त्रिशृङ्गा आदिशृङ्गाचैक शृङ्गिणी ॥ सितरक्तपीतनीलवर्णान् स्यात् यथाक्रमम् । केशरी महिषोनागो द्विरदो व्याघ्र एवच । पक्षीभेको मनुष्यश्च एतेषां वदनाष्टकम् ॥ नावां मुखे परिन्यस्य आदित्यादिदशाभुवाम् । कलशो दर्पणश्चन्द्रस्तैदशानां महीभुजाम् ॥ हंसः केकी शुकः सिंहो गजो ऽहिर्व्याघ्रषट्पदौ । आदित्यादिदशाजात नौकोपरि परिन्यसेत् ॥ * ॥ नौकासु मणिविन्यासो विज्ञेयो नवदण्डवत् । मुक्तास्रवकै र्युक्ता नौका स्यात् सर्वतोभद्रा ॥ तत् संख्या चेदशरसवेदद्वय-

निष्पद

सम्मिता क्रमशः । कनकादीनां माला जयमालेति गद्यते सद्भिः ॥ ब्रह्मं च चे द्वितये एकैके वैश्यशूद्रयोनी ॥ * ॥ निर्गृहं सगृहं वाथ तत् सर्वं द्विविधं भवेत् । निर्गृहं पूर्व मुद्दिष्टं सगृहाणि यथा शृणु ॥ सगृहा त्रिविधा प्रोक्ता सर्वमध्याग्रमन्दिरा । सर्वतोमन्दिरं यत्र साज्ञेया सर्वमन्दिरा ॥ राज्ञां कोशाश्वनारीणां यान मत्र प्रशस्यते । मध्यतो मन्दिरं यत्र साज्ञेया मध्यमन्दिरा ॥ राज्ञां विलासयात्रादिवर्षासुच प्रशस्यते । अग्रतो मन्दिरं यत्र साज्ञेया त्वग्रमन्दिरा ॥ चिर प्रवासयात्रायां रणे काले घनात्यये । मन्दिरमानं नौका प्रसरत एवार्द्ध भागतो न्यूनम् ॥ भोजस्तु । दीर्घहस्तवसुषट्द्विवाकरानेकदिङ्नवमिता यथाक्रमम् । राजपञ्चभुजसम्मितोन्नतिर्मन्दिरे तरिगते महीभुजाम् ॥ भास्करादिकदशाभुवां पुन र्धातुनिर्णयनमत्र पूर्ववत् । पताका कलसादीनां निर्णयो नवदण्डवत् ॥ काष्ठजं धातुजं चेति मन्दिरं द्विविधं भवेत् । काष्ठजं सुखसम्पत्त्यै त्रिलासेधातुजं मतम् ॥ अत्र शय्यासनादीनां मन्थरोल्लोचयोरपि । अन्ये चाप्येवं मुनिभिर्निर्णयः पूर्ववन्मतः ॥

॥ दिङ्मात्रमिदमुद्दिष्टं नौकायाश्च मञ्जनम् । प्रधानेष्वेव नियमो नाप्रधाने न निर्णयः ॥ लघुता दृढता चैव गामिताच्छिद्रता तथा । समतेति गुणोद्देशो नौकानां सम्प्रकाशितः ॥ एवं विचिन्त्य यो राजा नौकायानं करोति च । सचिरं सुखमाप्नोति विजयं समरे श्रियम् ॥ योऽज्ञानादन्यथायानं नौकानां कुरुते नृपः । तस्यैतानि विनश्यन्ति यशो वीर्यं बलं धनम् ॥ इति निष्पदयानोद्देशे नौकायानम् ॥ * ॥ जघन्यजलयानानि यथा । नौकान्यतो जलेयानं जघन्यमिति गद्यते । तद्देशाचरणैस्तत्तु पाश्चात्यानां प्रकीर्त्तिताः ॥ द्रोणीरूपन्तु यद्यानं द्रोणीयानं तदुच्यते । घटीभिर्घटितं यानं घटीनौकेति गद्यते ॥ तुम्ब्याद्यैस्तु फलैर्यानं फलयानं प्रचक्ष्यते । चर्मभिस्तत्पूर्णैर्यच्चर्मयानं तदुच्यते ॥ यानं यल्लघुभिर्वृक्षैर्वृक्षयानं तदुच्यते । जन्तुभिः सलिले यानं जन्तुयानं प्रचक्ष्यते ॥ बाहुभ्यां सन्तरेद्वारि जघन्येषु न निर्णयः ॥ * ॥ इति युक्तिकल्पतरौ निष्पदयानोद्देशः ॥

निष्पन्नः । त्रि । निर्वृत्ते । सिद्धे । सम्पन्ने ॥ निष्पद्यते स्म । पद० । गत्यर्थेति क्तः ॥

निष्पन्नत्वम् । न । विद्यमानकार्य्यसम्बन्धत्वे ॥

निष्परिग्रहः । त्रि । परमहंसे ॥ निर्गतः कन्थाकौपीनाध्यात्मपुस्तकादिव्यतिरिक्तः परिग्रहो यस्मात् सः ॥ त्रि । त्यक्तसङ्गे ॥

निष्पाकः । पुं । निष्पचने ॥

निष्पातः । पुं । प्रहारे ॥

निष्पादः । पुं । निष्पादने ॥

निष्पादनम् । न । सम्पादने । निष्पत्तौ ॥ निस् पूर्वात् पदेर्ण्यन्तात् ल्युट् ॥

निष्पादना । स्त्री । निष्पत्तिप्रेरणे ॥

निष्पादितः । त्रि । कृतनिष्पादने ॥

निष्पाद्यः । त्रि । साध्ये । निष्पादनीये ॥

निष्पापः । त्रि । पापरहिते ॥ निर्गतः पापेभ्यः ॥ निरादय इति समासः ॥

निष्पावः । पुं । शूर्पपवने ॥ धान्यादिनिस्तुषीकृतौ । पवने ॥ निष्पूयते शोध्यते तुषाद्यपनयनेन । पूञ् । परिमाणाख्यायां सर्वेभ्य इति घञ् ॥ यथा । द्वौ शूर्पनिष्पावौ । शूर्पेणेति करणतृतीयान्तस्य कर्त्तृकरणे कृता बहुलमिति समासः । अत्र शूर्पसङ्ख्यया तण्डुलादेरपि परिच्छित्तिर्गम्यते । शूर्पे द्वित्वस्याविवक्षितत्वादित्यर्थः ॥ यवाः । शूर्पे द्वित्वस्याविवक्षितत्वात् तुशब्दः । यद्यप्यत्र निरभ्योः पूल्वोरिति

घञ् लभ्यते तथापि सर्वग्रहणवला दनेनापि भवितु मर्हति ॥ राजमाषे । श्वेतशिम्बिधान्ये । राजशिम्बी बीज भटवांसु बोडा चैांरा इतिच यस्य भाषा ॥ निष्पावो मधुरोरूक्षो विपाकेऽम्लो गुरुः सरः । कषायः स्तन्यपित्तास्रमूत्रवातविबन्धकृत् । विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥ कडङ्गके ॥ पवने ॥ शिम्बिकायाम् ॥ त्रि । निर्विकल्पे ॥ निष्पवनम् । पूञ्० । घञ् ॥

निष्पावकः । पुं श्वेतशिंब्याम् ॥

निष्पावी । स्त्री । शिम्बीविशेषे । चैांरा चैाला बोडा इति भाषा प्रसिद्धे ॥ साद्विधा । हरिद्वर्णा शुभ्राच ॥

निष्पृहः । त्रि । इच्छारहिते ॥ निःसङ्गे । वैषयिकसुखेऽनुरागरहिते ॥ निर्गता स्पृहा यस्य सः ॥

निष्पृहा । स्त्री । अग्निशिखायाम् ॥

निष्पेषः । पुं । सङ्घर्षे ॥

निष्प्रतिभः । त्रि । जडे । अज्ञे ॥ निर्गतः प्रतिभायाः ॥

निष्प्रत्यूहः । त्रि । निर्विघ्ने ॥

निष्प्रभः । त्रि । विगते । अशोके । दीप्तिवर्जिते ॥ निष्क्रान्ता प्रभाऽस्मात् ॥ अप्रकाशस्वरूपे ॥

निष्प्रवाणम् । न । नवीनवस्त्रे । तन्त्रविमुक्तवाससि ॥

निष्प्रवाणिः । त्रि । अनाहते । तन्त्रके । नवाम्बरे ॥ प्रोयन्तेऽनया अस्यांवा । वेञ्० । करणेति ल्युट् । ङीप् । निर्गता प्रवाणी तन्तुवायशलाका अस्मादा । निष्प्रवाणिश्चेतिकबभावेनिपात्यते ॥ निष्प्रवाणिःपटः नवीनइत्यर्थः ॥

निष्फलः । त्रि । फलशून्ये ॥

निष्फला । स्त्री । निष्कलायां नार्याम् । विगतार्त्तवायाम् ॥

निष्फली । स्त्री । निष्फलायाम् ॥

निः । अ । निषेधे ॥ निश्चये ॥ साकल्ये ॥ अतीते ॥

निसम्पातः । पुं । अर्द्धरात्रे । निशीथे ॥ इतिशब्० ॥

निसर्गः । पुं । रूपे । स्वभावे ॥ सर्ग ॥ निसर्जनम् । सृज० । घञ् ॥

निसिन्धुः । पुं । सिन्धुवारे ॥

निसुम्भः । पुं । असुरान्तरे ॥

निसूदनम् । न । वधे । मारणे ॥ षूद क्षरणे । भावे ल्युट् ॥

निसृता । स्त्री । त्रिवृतायाम् ॥

निसृष्टः । त्रि । न्यस्ते ॥ निसृज्यतेस्म । सृज० । क्तः ॥ मध्यस्थे इति चिकाण्डशेषः ॥

निसृष्टार्थः । पुं । दूतविशेषे ॥ यथा ।

निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः । कार्य्यप्रेष्य स्त्रिधा दूतो दूत्यश्चापि तथाविधा ॥ तल्लक्षणं यथा । उभयो र्भाव मुन्नीय स्वयं वदति चोत्तरम् । सुश्लिष्टं कुरुते कर्म्म निसृष्टार्थस्तु सस्मृतः ॥ इतिसाहित्यदर्पणे ३ परिच्छेदः ॥ पुरुषविशेषे ॥ यथा । धीरःस्थिरमतिः शूरःस्वामिकार्य्यविधायकः । स्वपौरुषप्रकाशीच निसृष्टार्थः स उच्यतइतिसङ्गीतदामोदरः ॥ धनायव्ययपालनादौनियुक्त ॥ यथा । यःस्वामिनानियुक्तोपिधनायव्ययपालने । कुषीदकृषिवाणिज्येनिसृष्टार्थस्तुसस्मृतइतिवृहस्पतिः ॥ निसृष्टाअर्थायस्मिन् सः ॥

निस्तत्त्वः । त्रि । असति ॥ निर्गतं तत्त्वं वास्तवं रूपं यस्मात् ॥

निस्तनी । स्त्री । वटिकायाम् । वडी इतिभाषा ॥ स्तनहीनायाम् ॥

निस्तन्द्रिः । त्रि । अनलसे ॥ निर्गतात न्द्रिरालस्यं यस्मात् ॥

निस्तरणम् । न । उपाये ॥ निस्तारे ॥ तरणे ॥ निर्गमे इतिविश्वः ॥

निस्तर्हणम् । न । मारणे ॥ तृहूहिंसायाम् । निर्पूर्वः । स्तृहूवा । भावे-ल्युट् ॥

निस्तलः । त्रि । वर्त्तुले ॥ चले ॥ निर्गतं तलं निर्गतं पातश्च यस्य ॥

निस्तली । स्त्री । वटिकायाम् ॥ इति शब्दचन्द्रिका ॥

निस्तारः । पुं । उद्धारे । निस्तरणे ॥ यथा । जीर्णा तरिः सरिदतीवगभीरनीरा बाला वयं सकलमित्यमनर्थहेतुः । निस्तारबीज मिदमेव कृशोदरीणां यन्माधव त्वमसि सम्प्रतिकर्णधारः ॥ इत्युद्भटः ॥

निस्तारबीजम् । न । संसारार्णवतरणहेतौ ब्रह्मोपासने ॥ यथा । कलौ-पापयुगे घोरे तपोहीनेतिदुस्तरे । निस्तारबीजमेतावद् ब्रह्ममन्त्रस्यसाधनम् ॥ साधनानिबहूक्तानिनानातन्त्रागमादिषु । कलौदुर्ब्बलजीवानामसाध्यानिमहेश्वरीतिमत्वाभिवोक्ततन्त्रम् ॥ अपिच । स्मरणंकीर्त्तनं-विष्णोरर्च्चनंपादसेवनम् । वन्दनंस्तवनंनित्यंभक्त्या नैवेद्यभक्षणम् ॥ चरणोदकपानञ्चतन्मन्त्रजपनं तथा । इदंनिस्तारबीजञ्च सर्व्वेषामीप्सितं-भवेदितिब्रह्मवैवर्त्तप्रकृतिखण्डे ३३ अध्यायः ॥

निस्तितीर्षत् । त्रि । निस्तरितुमिच्छति ॥

निस्तुषक्षीरः । पुं । गोधूमे ॥ इतिराजनिर्घण्टः ॥

निस्तुषरत्नम्। न। स्फटिके॥

निस्तुषितः। त्रि। त्यक्ते॥ त्वग्विहीने॥ लघूकृते॥ इतिमेदिनी॥

निस्तेजाः। त्रि। तेजोरहिते॥

निस्तोदः। पुं। पीडाविशेषे॥

निस्त्रिंशः। पुं। खड्गे॥ निर्गतस्त्रिंशद्भ्यो ऽङ्गुलिभ्यः। निरादयइति सं०। सङ्ख्यायास्तत्पुरुषस्यडज्वाच्यः॥ त्रि। निर्दये। निर्घृणे॥

निस्त्रिंशपत्रिका। स्त्री। स्नुहीवृक्षे॥

निस्त्रैगुण्यः। त्रि। निष्कामे॥ निष्क्रान्त स्त्रैगुण्यात्॥ पुं। त्रिगुणातीते परमेशे॥ त्रैगुण्यः संसारस्तद्रहितत्वात्॥

निस्त्रैणपुष्पिकः। पुं। राजधत्तूरके॥

निस्नेहः। त्रि। प्रेमशून्ये॥

निस्नेहफला। स्त्री। श्वेतकण्टकार्याम्॥

निस्पन्दः। पुं। स्पन्दने॥ इतित्रिकाण्डशेषः॥ त्रि। स्पन्दरहिते। ईषत्कम्पहीने॥

निस्पन्दतरः। त्रि। एकान्तस्पन्दरहिते॥

निस्पृहः। त्रि। अतिविरक्ते॥ निर्गता दोषदर्शनेन सर्वेभ्योदृष्टादृष्टविषयेभ्यः स्पृहातृष्णा यस्यसः॥ व्यासादिषु॥ व्यासादीनां निस्पृहाणां पारार्थ्यमिहदृश्यते॥

निस्पृहा। स्त्री। अग्निशिखावृक्षे॥

निस्यन्दः। पुं। स्यन्दने। क्षरणे॥ निस्यन्दते ऽनेन। स्यन्दू०। स्यदोजवे इतिघञन्तोनिपातितः॥

निस्यन्दनम्। न। स्यन्दे। स्यन्दू०। ल्युट्॥

निस्रावः। पुं। मासरे। भक्तसमुद्भवे मण्डे। माँड इति भाषा॥ निस्राव्यते। स्रु०। णयन्तः। एरच् घञ्वा॥

निस्वः। त्रि। निरुत्साहे॥

निस्वनः। पुं। शब्दे॥ निस्वननम्। स्वनशब्दे। नौगदनदपठस्वन इत्यप्॥

निस्वानः। पुं। निनादे। शब्दे॥ निस्वननम्। स्वन०। नौगदनदपठस्वन इति पाक्षिकोघञ्॥

निस्सारितः। त्रि। निष्कासिते॥ निराकृते॥

निस्सीमः। त्रि। अपर्यन्ते॥

निहतः। त्रि। नाशिते॥

निहननम्। न। वधे। मारणे॥ हन्तेर्भावेल्युट्॥

निहन्ता। त्रि। हननकर्त्तरि॥

निहवः। पुं। आह्वाने॥ ह्वेञ्० निपूर्वः। ह्वः सम्प्रसारणञ्चन्यभ्युपविष्विच्यप् सम्प्रसारणञ्च॥

निहाका। स्त्री। गोधिकायाम्॥ नियतं जहातिभुवम्। नौहश्चेतिहाकः कन्। बाहुलकात् न ह्रस्वः॥

निहारः। पुं। नीहारे। हिमे॥ नि-

ह्रियते । हृञ्० । घञ् ॥

निर्हिंसनम् । न । मारणे ॥ हिंसिहिंसायाम् । भावे ल्युट् ॥

निहित: । त्रि । आहिते । स्थापिते ॥ निक्षिप्ते ॥ स्थिते ॥ निधीयते स्म । डुधाञ्० । क्त: । दधातेर्हि: ॥ आत्मभूते ॥ निश्चयेनहित: ॥

निहीन: । त्रि । नीचे । पामरे ॥ निश्चयेन हीन: । कुगतीति समास:॥

निह्नव: । पुं । निकृतौ । शाठ्ये ॥ अविश्वासे ॥ अपलापे । गोपने । धारयन्नेव न धारयामीत्याद्युक्तौ ॥ निह्नवनम् । ह्नुङ् अपनयने । ऋदोरप् ॥

निह्नुत: । त्रि । अपह्नुते ॥

निह्नुति: । स्त्री । निह्नवे ॥

निह्राद: । पुं । निर्घोषे । शब्दे ॥ ह्राद अव्यक्तेशब्दे । घञ् । निह्राद एकरेफ: ॥

नी: । त्रि । प्रापणकर्त्तरि ॥ नयति । णीञ्प्रापणे । क्विप् ॥

नीक: । पुं । वृक्षविशेषे ॥ नयति । णीञ्० । अजियुधूनीभ्योदीर्घश्चेति कन् ॥

नीकार: । पुं । अवहेलायाम् । न्यक्कारे ॥ इति शब्दरत्नावली ॥

नीकाश: । पुं । निश्चये ॥ त्रि । परपदस्थस्यानुल्ये ॥ नितरांकाशते । काशृ० । पचाद्यच् । इक: काशइत्युपसर्गदीर्घ: ॥

नीच: । त्रि । पामरे । पृथग्जने । अपसदे ॥ नीचसङ्गदोषोयथा । नमामेतिसुखं किञ्चिन्नीचसङ्गान्महानपि । प्रेतसङ्गान्महादेवोनग्नोभस्मविभूषित: ॥ प्रविश्यनिलयं नीच: स्त्रीधनादिक मिच्छति स्वयंनेतुं नशक्नोति तदा नाशयतिध्रुवम् ॥ स्थिते गुणेपिनीचस्तु यत्नाद्दोषं प्रपश्यति । किञ्चित्तुसङ्गमासाद्यतद्दुर्लक्षणातसनातनम् ॥ सतांश्रुत्वागुणं नीच:श्रोतुमायातिवन्धुवत् । तत:समयमासाद्य प्रकाशयतितद्दुसन् ॥ मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् । मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद्दुरात्मनाम् ॥ इतिपाद्मे क्रियायोगसारे ५ ऽध्याय:॥ धर्मप्रमादोनीचानां स्वभावेनैवदृश्यते । अतोधर्मविचारस्तैर्न कुत्रापिनिरूपित: ॥ न नीचो यवमात्सर: ॥ नीचंसमद्दुमपिसेवतिनीच एव॥ पुं । चोरकनामगन्धद्रव्ये ॥ खर्वे । वामने ॥ नीचैर्नीचैस्त्वमस्थाच । अ र्श्आद्यचि अव्ययानां भमात्र इतिटिलोप: ॥ निकृष्टामीर्लक्ष्मीं चिनोति वा । चिञ्० । अन्येभ्योपिदृश्यतइतिड: ॥ निम्ने ॥ पापे ॥

नीचकः । त्रि । खर्व्वे ॥ स्वा० तद्धितः ॥

नीचकी । पुं । उच्चे । उपरिभागे ॥

नीचकैः । अ । नीचैरित्यर्थे ॥ अव्ययसर्व्वनाम्नामकच् प्राक्टेः ॥

नीचगम् । न । जले ॥ नीचं निम्नं गच्छति । गम्लृ० । डः ॥ त्रि । पामरे ॥

नीचगा । स्त्री । निम्नगायाम् । नद्याम् ॥ टाप् ॥

नीचभोज्यः । पुं । पलाण्डौ ॥ नीचैर्भोज्यः ॥ त्रि । पामरभक्ष्ये ॥

नीचवज्रम् । न । वैक्रान्तमणौ ॥

नीचवृत्तिः । स्त्री । कर्षणवहनादिनिकृष्टकर्मणि ॥

नीचीनः । त्रि । अधोमुखे ॥

नीचैः । अ । स्वैरे ॥ अल्पे ॥ नीचे ॥ निचीयते । चिञ्० । नेर्दीर्घश्चेति डैसिः ॥

नीचैर्गतिः । स्त्री । मन्दगमने ॥ असद्व्यवहारे ॥

नीडः । पुं । खगगृहे । कुलाये ॥ नितरामीड्यते । ईड० । घञ् ॥ यद्वा । निश्चिताद्दलन्त्यत्र । इलस्वप्ने । हलश्चेति घञ् । संज्ञापूर्व्वकत्वान्नगुणः । डलयोरेकत्वम् ॥ स्थाने ॥ रथावयवविशेषे ॥

नीडकः । पुं । पक्षिणि ॥

नीडजः । पुं । विहगे ॥ नीडे जातः । जनी० । डः ॥

नीडजेन्द्रः । पुं । गरुडे ॥

नीडोद्भवः । पुं । खगे । गरुत्मति ॥ नीडे उद्भवोयस्य ॥

नीतः । त्रि । प्राप्ते । गृहीते ॥ यथा । नीतं यदि नवनीतं नीतं नीतं किमेतेन । आतपतापितभूमौ माधव माधाव माधाव ॥ णीञ्० । क्तः ॥

नीतिः । स्त्री । नये । नाये ॥ जेतुमिच्छतां नीतिर्न्यायो जयोपायस्य प्रवर्त्तको भगवद्विभूतिः ॥ उचितव्यवहारे । सामदानाद्युपाये ॥ प्रापणे ॥

नीतिघोषः । पुं । वृहस्पतिरथे ॥ इति त्रिकाण्डशेषः ॥

नीतिज्ञः । त्रि । नीतिविदि ॥ आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिञ्च पार्थिव । तद्विद्यैस्तत्क्रियोपेतैश्चिन्तयेद्विनयान्वितः ॥ आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयाऽनयौ ॥ विद्यास्तत्स्त्र एवैता योगक्षेमाय देहिनाम् । विद्याविनीतो नृपतिर्नकृच्छ्रेष्ववसीदति ॥

नीतिमान् । प्रशस्तनीतिमति ॥

नीतिशास्त्रम् । न । औशनसवृहस्पतिचाणक्यकामन्दकपञ्चतन्त्रनीतिमयूखहितोपदेशचाणक्यभारतीयराजधर्मादौ ॥

नीतिसारः । पुं । इन्द्रम्प्रतिवृहस्पत्यु क्तेनीतिशास्त्रविशेषे ॥ सचगरुडपु राणेऽष्टास्वध्यायेष्वस्ति ॥

नीथः । पुं । नेतरि । प्रापयितरि ॥ स्तोत्रे इति वेदभाष्यम् ॥ नयति । णीञ्० । हनिकुषिनीरमिकाशिभ्यःक्थन् ॥ न । जले ॥

नीध्रम् । न । नीव्रे । वल्मीके । पटलप्रा न्ते । चालान्ते । ओलातीइतिभाषा ॥ नितरांध्रियते । धृङ्अवस्थाने । नि श्चयेन धरति जलमितिवा । धृञ्धार णे । मू०कः । अन्येषां० दीर्घः ॥ वने ॥ नेमौ ॥ चन्द्रे ॥ रेवतीनक्षत्रे ॥

नीपः । पुं । कदम्बे । हलिप्रिये ॥ बन्धू के ॥ नीलाशोकद्रुमे ॥ धाराकदम्बे ॥ नीपोमहाकदम्बःस्याद्धाराकम्बइ- त्यपीतिसाम्बः ॥ नयति नीयते वा । णीञ्० । पानीविषिभ्यःपः । बाहु लकात् गुणाभावः ॥ धनिनीतिप्रा णकृष्णः ॥

नीयमानः । त्रि । प्राप्यमाणे ॥

नीरम् । न । क्षीरे । अम्बुनि । जले ॥ शरदा नीरजोत्पत्त्या नीराणिप्र कृतिं ययुः । भ्रष्टानामिवचेतांसि पु नर्योगनिषेवया ॥ रसे ॥ नीयते । णीञ्० । स्फायितञ्चीतिरक् ॥ नि- र्गतं राद्दन्वेर्वा । निरादय इतिसमा सः । अग्नेराप इतिश्रुतेः ॥ निर्गतो रोऽग्निरस्मात् । प्रादिभ्योधातुज- स्येतिबहुव्रीहिः । अग्नेर्मित्रेष्वाणः क्षयमितिस्मृतेः ॥ निश्चयेनराति- सुखम् । रा० । आतश्चेतिकेढ्लो पइतिदीर्घः ॥ निष्ठीवास्तक्शकृन्मू त्रविषाण्यप्सु न सञ्क्षिपेत् ॥

नीरजम् । न । कुष्ठौषधौ ॥ पद्मे ॥ मु क्तायाम् ॥ त्रि । जलजाते ॥ नीरे जातम् । जनी० । डः ॥ पुं । उशी रिणि ॥ उद्रे ॥

नीरजाः० । त्रि । निर्धूलिदेशपुष्पादौ ॥ स्त्री । अरजस्कायाम् ॥

नीरजस्कः । त्रि । निर्धिक्ते ॥

नीरतरङ्गः । त्रि । क्लिते सुरतरागे । रमणाभाववति ॥ यथा । आशाताः सखि वर्षा वर्षादपि यासु वासरो- दीर्घः । दिशिदिशि नीरतरङ्गो नी रतरङ्गो ममापिहृदयेशः इति ॥

नीरदः । पुं । मेघे ॥ मुस्तके ॥ त्रि । दन्तशून्ये ॥ यथा । आस्वाद्य निरव शेषं विरहिवधूनां मृदूनि मांसानि । करकामिषेण मन्ये निष्ठीवति नी रदोऽस्थीनीति ॥

नीरदिनी । स्त्री । मेघवत्याम् ॥

नीरधिः । पुं । अब्धौ । समुद्रे ॥ नीरा णिधीयन्तेऽस्मिन् । डुधाञ् । कर्म

ण्यधिकरणेचेतिक्तिः ॥

नीरनिधिः । पुं । अकूपारे । समुद्रे ॥ नीराणिनितरां धीयन्तेऽत्र । डुधाञ्० । किः ॥

नीरन्ध्रः । त्रि । सान्द्रे । घने ॥ छिद्ररहिते ॥ यथा । श्रीमन्नाथतवार्जितोर्जितयशःसंशुद्धमुक्तावलीमाद्यैर्विविधविधित्सुरमलंहारं त्वदीयैर्गुणैः । नीरन्ध्रामवलोक्यतामपि ततो नान्तं गुणानामहो उत्पित्सुर्गगनाक्षरे समकिरत्तारास्ततस्तारकाः ॥ इतिकालिदासः ॥

नीरसः । पुं । दाडिमे ॥ त्रि । रसहीने ॥ यथा । शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत् । सएव चेद् शृङ्गारी नीरसं सर्वमेव तत् ॥

नीराखुः । पुं । उद्रे । जलविडाले ॥

नीराजनम् । न । आरात्रिके । दीपादिना सत्कृतौ ॥ पञ्चनीराजनं कुर्यात् प्रथमं दीपमालया । द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥ चूताश्वत्थादिपत्रैश्च चतुर्थम्परिकीर्त्तितम् । पञ्चमंप्रणिपातेनसाष्टाङ्गेनयथाविधि ॥ आश्विनशुक्लदशम्यामश्वादेःपूजने ॥ यथा शरत्कालेमहाष्टम्यांदुर्गायाःपरिपूजनम् । नीराजनंदशम्यान्तुकुर्य्याद्बलवृद्धये ॥ निःशेषेणराजनमत्र । नीरस्यशान्त्युदकस्यअजनं क्षेपोयत्रवा । नीरेणजलेन अजनंस्पर्शनं वा ॥

नीराजना । स्त्री । आरात्रिके । दीपादिनासत्कृतौ ॥ निःशेषेण नितरां वा राजनम् । राजृदीप्तौ ण्यन्तः । ण्यासश्रन्थेतिभावेयुच् ॥

नीरिन्दुः । पुं । शाखोटके । आश्वेओड़ा इतिगौडेषुख्याते वृक्षे ॥

नीरुक् । पुं । स्त्री । रोगाभावे । स्वास्थ्ये । अनामये ॥ त्रि । रोगरहिते । उल्लाघे । पटौ ॥ निरोषते । रुष० । क्विप् । नहिवृतिवृषीतिदीर्घः ॥

नीरुजम् । न । कुष्ठौषधौ ॥ त्रि । रोगाऽभाववति ॥ रुजायानिर्गतम् ॥

नीरूपः । त्रि । रूपाभावविशिष्टे ॥ नीरूपस्यापिकालस्येन्द्रियवेद्यत्वाभ्युपगमेनेतिवेदान्तपरिभाषा ॥

नीलः । पुं । निधिप्रभेदे ॥ अद्रिविशेषे । इलावृतस्योत्तरस्मिन् द्विसहस्रयोजनविस्तीर्णे प्रागायते रम्यकवर्षस्य मर्यादापर्वते ॥ भारतवर्षस्थे शैलविशेषे ॥ वानरविशेषे । वर्णविशेषे ॥ नीलौषधौ ॥ लाञ्छने ॥ मञ्जुघोषे ॥ वटवृक्षे ॥ कृष्णवर्णे ॥ वृषोत्सर्गवृषे ॥ चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः । ला

चारससवर्णश्च तं नीलमितिनिर्दिशेत् ॥ अपिच । लोहितो यस्तुवर्णेन पुच्छाग्रेणतुपाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलोवृष उच्यते ॥

नीलति । नीलवर्णे । इगुपधेतिकः ॥ न । नालीरक्ते ॥ नील्यारक्तम् । नील्याञ्जन् ॥ इन्द्रनीलमणौ । नीलम् इति भाषा प्रसिद्धे सौरिरत्ने ॥ काचलवणे ॥ तालीशपत्रे ॥ विषे ॥ सौवीराञ्जने ॥ तुत्थे ॥ नृत्याङ्गाष्टोत्तरशतकरणान्तर्गतकरणविशेषे ॥ वर्णवृत्तप्रभेदे ॥ तालपयोधरनायकतोमरवज्रधरम् पाणियुतञ्च विभावय भामिनि वृत्तवरम् । नीलमिदम् फणिनायकपिङ्गलसंलपितम् पण्डितमण्डलिकासुखदं सखिकर्णगतम् ॥ यथा । सुन्दरि सुन्दरि पीनतिशालिनि किङ्कुरुषे मानिनि मानिनिकाममिदं हृदयं परुषे । हारिणि हारिणि ते हृदये निर्हितोदयितो भामिनि भाविनि वासिमनोस्य चिराय यतः इति ॥ नीलं लक्ष्म छिद्ररूप उत्पातः । तथाच वराहः । अपर्वणि यदा राहुग्रहणं चन्द्रसूर्ययोः । चन्द्रार्कमण्डलं छिद्रं दृष्ट्वा जनपदक्षयः इति ॥ यदानीलं लक्ष्म चन्द्रस्वकलङ्कोऽदृश्यते एतदेवौत्पाति-

कं नैल्यमधिकृत्योक्तम् । यदादित्ये नैल्यंतदानश्येदिति ॥ त्रि । नीलवर्णयुक्ते ॥

नीलकम् । न । कालालूण इतिभाषा प्रसिद्धेकाचलवणे ॥ वर्त्तलोहे ॥ पुं । असनवृक्षे ॥

नीलकण्ठः । पुं । शिवे । हरे ॥ क्षीराब्धेर्मथ्यमानाच्च विषं हालाहलोद्भवम् । हरेण धारितं कण्ठे नीलकण्ठस्ततोहरः ॥ दात्यूहे ॥ ग्रामचटके ॥ मयूरे ॥ खञ्जने ॥ नीलः कण्ठोयस्य सः ॥ पीतसारे ॥ न । मूलके ॥ इतिराजनिर्घण्टः ॥

नीलकण्ठशिखा । स्त्री । मयूरशिखायाम् ॥ नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥

नीलकण्ठाक्षम् । न । रुद्राक्षे ॥ त्रि । खञ्जनाक्षे ॥

नीलकन्दः । पुं । महिषकन्दप्रभेदे । विषकन्दे । महिषीकन्दे ॥ इतिराजनिर्घण्टः ॥

नीलकमलम् । न । नीलवर्णपद्मे । उत्पले । हिमाब्जे ॥

नीलकुन्तला । स्त्री । गौर्याःसखीविशेषे ॥ त्रि । नीलकुन्तलविशिष्टे ॥

नीलकुरण्टकः । पुं । नीलझिण्ट्याम् ॥

नीलक्रान्ता । स्त्री । विष्णुक्रान्तायाम् ॥

नीलक्रौञ्चः। पुं। नीलवके। दीर्घग्रीवे॥

नीलग्रीवः। पुं। शिवे॥ नीला ग्रीवा यस्य सः॥

नीलङ्गुः। पुं। प्रसूने॥ शृगाले॥ भृङ्गे॥ क्रिमिविशेषे॥ नितरां लङ्गति। लगि०। नीलति वा। नीलवर्णे। खलगङ्क्विति निपातनात् साधुः॥ स्त्री। भम्भराल्याम्॥

नीलचर्म। न। परूषके॥ नीलवर्णाजिने॥

नीलजम्। न। वर्त्तलोहे॥ त्रि। नीलाज्जाते॥

नीलझिण्टी। स्त्री। नीलकुरण्टके॥

नीलतरुः। पुं। नारिकेले॥

नीलतालः। पुं। तमाले॥ हिन्ताले॥

नीलदूर्वा। स्त्री। श्यामायाम्। भार्गव्याम्। रुहायाम्॥ नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत्। कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान्॥ नीला चासौ दूर्वा च॥

नीलध्वजः। पुं। तमालवृक्षे॥ माहिष्मत्याः पुर्या राजविशेषे॥ त्रि। नीलध्वजाविशिष्टे॥

नीलनिर्गुण्डी। स्त्री। नीलसिन्धुवारे॥

नीलनिर्य्यासकः। पुं। नीलासनवृक्षे॥

नीलपङ्कम्। न। अन्धकारे॥

नीलपत्रम्। न। इन्दीवरे॥ नीलानि पत्राण्यस्य॥ पुं। गुण्डतृणे॥ अश्मन्तकवृक्षे॥ नीलासनवृक्षे॥ दाडिमे॥

नीलपद्मम्। न। इन्दीवरे॥ नीलञ्च तत् पद्मञ्च॥

नीलपिच्छः। पुं। श्येनखगे॥

नीलपुनर्नवा। स्त्री। कृष्णवर्णपुनर्नवाशाके। नीलायाम्। नीलगदहपडोना इति भाषा॥

नीलपुष्पः। पुं। नीलभृङ्गराजे॥ नीलाम्लाने॥ शीतसहे। निर्गुण्डीद्रुमे॥ न। ग्रन्थिपर्णे॥ नीलवर्णपुष्पे॥

नीलपुष्पा। स्त्री। विष्णुक्रान्तायाम्॥

नीलपुष्पिका। स्त्री। नील्याम्॥ अतस्याम्॥

नीलपुष्पी। स्त्री। नील्याम्॥ निर्गुण्ड्याम्। सिन्दुके॥ अतस्याम्॥ नीलबुह्नायाम्॥

नीलफला। स्त्री। जम्ब्वाम्॥

नीलभृङ्गराजः। पुं। नीलवर्णभृङ्गराजे। महाभृङ्गे। श्यामले। नीलाभंगरा इति भाषा॥

नीलमणिः। पुं। इन्द्रनीलमणौ। मसारे। नीले॥ क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन्नीलतां व्रजेत्। इन्द्रनीलमिति ख्यातं महार्घ्यं रत्ननिर्णये

॥ नीलीरसनिभाः केचित् शम्भुकण्ठनिभाः परे इत्यादिनागलक्षणे रत्नशास्त्रे एषामेकादशविधाच्छायोक्ता ॥

नीलमाधवः । पुं । विष्णौ ॥

नीलमाषः । पुं । राजमाषे ॥

नीलमीलिकः । पुं । खद्योते ॥

नीलमृत्तिका । स्त्री । पुष्पकासीसे ॥ कृष्णवर्णायांमृदि ॥

नीललोहम् । न । वर्त्तलोहे ॥

नीललोहितः । पुं । शिवे । धूर्जटौ ॥ नीलश्चासौ लोहितश्च । कण्ठेजटासु च । नीलः कण्ठो लोहिताश्चकेशा अस्येति स्वामी ॥ नीलरक्तमिश्रितवर्णे ॥ व्रतविशेषे ॥

नीललोहिता । स्त्री । भूमिजम्ब्वाम् ॥

नीलवर्षाभूः । स्त्री । नीलपुनर्नवायाम् ॥ पुं । कृष्णभेके ॥

नीलवल्ली । स्त्री । वन्दायाम् ॥

नीलवसनः । पुं । शनौ ॥ हलायुधे । नीलाम्बरे ॥ त्रि । नीलवस्त्रयुक्ते ॥

नीलवस्त्रः । पुं । बलदेवे ॥ न । नीलवर्णवसने ॥ यथा । स्त्रीक्रीडाशयनीयादौ नीलवस्त्रं नदुष्यति । नीलीवस्त्रं नस्पृशेच्चनीलिमालरकंव्रजेदिति गारुडेप्रायश्चित्ताध्यायः ॥ तद्धारणप्रायश्चित्तादुक्तंप्रायश्चित्तविवेके । तत्र भविष्यपुराणे । शृणुष्वेतिमहाबाहोनीलीरक्तस्यधारणात् । वाससो गणशार्दूलगदतो ममकृत्स्नशः ॥ पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् । पतितस्तुभवेद्विप्रस्त्रिभिःकृच्छ्रैर्विशुध्यति ॥ नीलीरक्तेनवस्त्रेण यत्कर्मकुरुतेद्विजः । स्नानंदानंतपोहोमःस्वाध्यायःपितृतर्पणम् ॥ वृथा तस्यमहायज्ञोनीलीवस्त्रस्य धारणात् । नीलीरक्तं यदावस्त्रं कश्चिद्विप्रस्तुधारयेत् ॥ अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यतीति । इदमस्नाने । स्नानेतुद्वैगुण्यम् । अथापवादमाहापस्तम्बः । नीलीत्यनुवृत्तौ । स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यतीति ॥

नीलवासाः । पुं । शनैश्चरे ॥ बलभद्रे ॥ नीलेवाससीयस्यसः ॥

नीलशुङ्गा । स्त्री । अजान्त्र्याम् । अतिलोमशायाम् । नीलशणबोना इति गौडभाषा ॥

नीलवृक्षः । पुं । वृक्षविशेषे । वातारौ । शोफनाशने ॥

नीलवृन्तकम् । न । तूले ॥ इतिराजनिर्घण्टः ॥

नीलवृषः । पुं । कृष्णवर्णवृषे ॥ वृषविशेषे ॥ पश्यास्यच्छवर्णवृषे ॥

नीलवृषा । स्त्री । वार्त्ताक्याम् ॥

नीलव्रतम् । न । व्रतविशेषे ॥ नीललोहितव्रते ॥

नीलशिखण्डः । पुं । नीलजटाभारे । रुद्रे ॥ नीलःशिखण्डोऽस्य ॥

नीलशिग्रुः । पुं । शोभाञ्जने ॥

नीलसरस्वती । स्त्री । तारायाम् । चीनाधिवासिन्यां बुद्धशक्तिविशेषे ॥

नीलसारः । पुं । तिन्दुकवृक्षे ॥

नीलसिन्धुकः । पुं । } निर्गुण्ड्याम् ।
नीलसिन्धुवारः । पुं । } शीतसहायाम् ॥

नीला । स्त्री । मक्षिकाप्रभेदे । वर्वणायाम् ॥ नीलति । नीलवर्णे । अच् ॥ देवीविशेषे ॥ नीलपुनर्नवायाम् ॥ नील्याम् ॥ मल्लाररागस्यनार्यामिति वृहद्धर्मपुराणम् ॥

नीलाङ्गः । पुं । सारसखगे ॥ चासे ॥

नीलाङ्गुः । पुं । कृमौ ॥ निलरांलङ्गति । लगि गतौ । खरुशङ्कुपीयुनीलङ्गुलिगु इति निपूर्वाल्लगेः कुः प्रत्ययो नेर्दीर्घे नीलङ्गुः । नीलाङ्गु इति पाठान्तरे तु धातोरपि दीर्घो निपात्यते ॥ स्त्री । झम्झराख्याम् ॥ शुषिरे ॥ प्रसूने ॥

नीलाञ्जनम् । न । सौवीराञ्जने ॥ तुत्थे ॥

नीलाञ्जना । स्त्री । विद्युति ॥ इतिजटाधरः ॥

नीलाञ्जनी । स्त्री । कालाञ्जनीक्षुपे ॥

नीलाञ्जसा । स्त्री । अप्सरोभेदे ॥ नदीभेदे ॥ विद्युति ॥

नीलाण्डकः । पुं । ऋष्ये । गवये ॥

नीलापराजिता । स्त्री । नीलवर्णापराजितालतायाम् । महानील्याम् ॥

नीलाब्जम् । न । नीलोत्पले ॥

नीलाम्बरः । पुं । बलदेवे । अच्युताग्रजे ॥ कौशपे । राक्षसे ॥ शनैश्चरे ॥ नीलमम्बरं यस्य ॥ न । तालीशपत्रे । शुकोदरे ॥ नीलवस्त्रे ॥ त्रि । नीलवस्त्रविशिष्टे ॥

नीलाम्बा । स्त्री । देवीविशेषे ॥ नीलाद्रिपर्वतोपरिस्थेतत्स्थाने ॥

नीलाम्बुजन्म । न । नीलोत्पले ॥ नीलञ्चतदम्बुजन्मच ॥

नीलाम्लानः । पुं । पुष्पवृक्षविशेषे । दासाम् । आर्त्तगलायाम् ॥

नीलाम्ली । स्त्री । क्षुपविशेषे । श्यामाम्लायाम् ॥

नीलालुः । पुं । कन्दविशेषे । श्यामालुके ॥

नीलाश्मा । पुं । नीलमणौ ॥

नीलासनः । पुं । नीलपक्षे । नीलद्रुमे ॥ रतिबन्धविशेषे ॥ यथा । लिङ्गोपरिस्थिता नारी शय्यां कृत्वा पदद्वय

म। हृदये दत्तहस्ताच वन्धो नीला सनोमत: ॥ इतिस्म० ॥

नीलिका । स्त्री । नीलिन्याम् ॥ चुद्र रोगभेदे ॥ नेत्ररोगविशेषे ॥ शेफालिकायाम् ॥ जलस्यज्वरे ॥ यथा । भूमेरूपरो वृक्षस्यकोटरो जलस्य नीलिकेत्यादिज्वरप्रकरणे विजयरचित: ॥ नीलवर्णा नीलादोषधौ प्राणिनिचेतिङीष् । स्वार्थेकन् ॥

नीलिनी । स्त्री । नीलीवृक्षे ॥ कृष्ण पिवृत्ति ॥ अजमीढस्यपत्न्याम् ॥ नीलोवर्णोस्त्यस्या: । इनि: । ङीप् ॥

नीली । स्त्री । नीलिकारोगे ॥ नीलिन्याम् । कालायाम् । रञ्जन्याम् । नीलकावृक्ष इतिभाषा ॥ नीलाज्जानपदेत्यनाच्छादनेर्थेङीष् । नीलादोषधौ प्राणिनिचनित्यंङीष् । संज्ञायान्तु वा ॥ नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा । उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान् ॥ आमवातमुदावर्त्तंमदश्चविषमुद्धतम् ॥

नीलीराग: । पुं । स्थिरसौहृदे पुरुषे ॥

नीलीवृक्षाकृति: । पुं । शरपुङ्खे ॥

नीलोत्पलम् । न । इन्दीवरे । नीलशाँपलाइति गौडभाषा ॥

नीलोत्पली । पुं । मञ्जुघोषे ॥ इति त्रिकाण्डशेष: ॥

नीलोपल: । पुं । इन्द्रनीलमणौ ॥

नीवर: । पुं । वास्तव्ये ॥ वणिजके ॥ परिव्राजि । भिक्षुके ॥ नयति नीयते वा । णीञ्० । छित्वरच्छत्वरधीवर पीवरेत्यादिनासाधु: ॥

नीवाक: । पुं । प्रयामे । मूल्योत्कर्षार्थंधान्यादिसञ्चये ॥ महार्घहेतोर्धान्यादिषुजनानामादरातिशये ॥ तुलाधरणाधिक्ये ॥ तुलाकृतंन्यूनाधिक्यंक्रयादरोवेतिस्वामी ॥ नियतं वचनम् । वच० । घञ् । उपसर्गस्येतिदीर्घ: ॥ मूल्याधिक्यहेतोर्निश्चयेनपरिच्छेदनेइतिभरत: ॥ वचनाभावे ॥

नीवार: । पुं । श्यामाकादितृणधान्ये । मुनिधान्ये । अरण्यधान्ये ॥ निव्रीयते । वृञ्वरणे । नौवृधान्ये इतिघञ् । दीर्घ: ॥ नीवार:शीतलोग्राही पित्तघ्न:कफवातकृत् ॥

नीवि: । स्त्री । परिपणे । वणिङ्मूलधने ॥ उच्चये । स्त्रीणांकटीवसनबन्धने ॥ स्त्रीणामित्युपलक्षणम् पुंस्कटीवस्त्रबन्धेपि ॥ निव्ययति निवीयते वा । व्येञ्० । नौव्येयलोप:पूर्वस्यचदीर्घइतीणुडित् ॥ नितरामिन्वति । इविप्रीणने आगमशास्त्रस्या

निश्चयत्वान्ननुम् । इगुपधात्किदिति ॥

नीवी । स्त्री । नीविशब्दार्थे ॥ राजपुत्रादेर्बन्धके । परिपणे ॥ कृदिकाराादितिङीष् ॥

नीवृत् । पुं । स्त्री । जनपदे । देशे । अङ्गादिजननिवासस्थाने ॥ नियतो वर्त्तते । अधिकरणस्य कर्तृत्वविवक्षात । वृत्° । क्विप् । नहिवृतीति दीर्घः ॥ नीवृज्जनपदो देशविषयौ तूपवर्तनम् इति शब्दाम्बुधिः ॥

नीशारः । पुं । हिमानिलनिवारणप्रावरणे । सौड इति भाषा ॥ गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ॥ नितरां शीर्यते हिमानिलावघाते नया । शृहिंसायाम् । शृवायुवर्णनिवृतेष्विति घञ् ॥ उपसर्गस्य घञीतिदीर्घः ॥

नीहारः । पुं । अवश्याये । तुषारे । हिमे । धुवारा इति भाषा ॥ निह्रियते । हृञ्° । घञ् । उपसर्गस्य घञीतिदीर्घः ॥ कफवायुवर्द्धकोऽयम् ॥

नु । अ । वितर्के ॥ अपमाने ॥ विकल्पे ॥ अनुनये ॥ अतीते ॥ प्रश्ने ॥ हेतौ ॥ अपदेशे ॥ अनुशये ॥ नुदति नौमिवा । णुद° । णु° वा । मितद्र्वादित्वात् डुः ॥

नुतः । त्रि । स्तुते ॥

नुतिः । स्त्री । स्तुतौ । स्तोत्रे ॥ नूयतेऽनेन । णु° । स्त्रियां क्तिन् ॥ पूजायामिति शब्दरत्नावली ॥

नुत्तः । त्रि । प्रेरिते ॥ नुद्यते स्म । णुद° । क्तः । नुदविदेति पाक्षिकोनत्वाभावः ॥

नुन्नः । त्रि । नुत्ते । अस्ते । प्रेरिते ॥ नुद्यते स्म । णुद° । क्तः । नुदविदेति वानत्वम् ॥ निरस्ते ॥

नुन्नानुन्नः । त्रि । अतिपीडितपीडके ॥ अतिशयेन नुन्नोनुन्ननुन्नः तं नुदतीतिविग्रहः ॥

नुन्नसारः । त्रि । परिच्छिन्नधैर्ये ॥

नूतः । त्रि । स्तुते ॥

नूतनः । त्रि । प्रत्यग्रे । अभिनवे । नवीने ॥ नवएव । नवस्यनप्तनप्खाश्चप्रत्ययाः नूरादेशश्च ॥

नूत्नः । त्रि । नवे । नव्ये । नूतने ॥ नवएव । नवस्यनप्प्रत्ययेनूरादेशः ॥

नूदः । पुं । ब्रह्मदारुवृक्षे । अश्वत्थाकारे पार्श्वपिप्पल इतिख्याते ॥ तूत इति प्रसिद्धेपि ॥ नुदति पापम् । नुद° । इगुपधेतिकः । पृ° ॥ यद्वा । नुवदति । वद° । मू° कः । कर्मणः कर्तृत्वम् ॥ यद्वा । नूयते । णु° । वा° दः । कुटादिः ॥

नृमूः	नृत्यम्

नूनः । त्रि । समग्रे ॥ नवनः । ग्र० ॥

नूनम् । अ । निश्चिते ॥ तर्के ॥ स्मरणे ॥ वाक्यपूरणे ॥ नुवा स्तुत्या नमति । विच् ॥ यद्वा । नुजनयति । जनप रिहाणे । अम् ॥

नूपुरः । पुं । न । पादाङ्गदे । मञ्जीरे । नेउर इति बिछुवा इतिच भाषा ॥ ॥ नुवनम् नूयतेवा । णू० । सं० क्वि प् । नुविपुरति । पुर अग्रगमने । इ गुपधेतिकः ॥

ना । पुं । मनुष्ये । पुरुषे ॥ नयति न यतेवा । णीञ्० । नयतेर्डिच्चेत्यृन् । नरौ । नरः ॥

नृकरोटिका । स्त्री । नरकपाले ॥ नुः करोटिका ॥

नृकेशरी । स्त्री । नरसिंहावतारे ॥

नृगः । पुं । पुराणप्रसिद्धे नृपविशेषे ॥

नृगधूमः । पुं । तीर्थविशेषे ॥

नृचक्षाः । पुं । राक्षसे ॥ नॄन्चष्ट । चक्षिङ्० । सर्वधातुभ्यइत्यसुन् । असनयोश्चेति न ख्याञादेशः ॥ यद्वा । चष्टे बहुलंशिच्चेत्यसिः । सार्वधातुकसंज्ञत्वात् ख्याञ्न ॥ नृणां द्रष्टरि ॥

नृता । स्त्री । पुंस्त्वे ॥ नुर्भावः । तल् ॥

नृतिः । स्त्री । नर्त्तने ॥ इतिशब्द० ॥

नृतुरङ्गः । पुं । हयग्रीवावतारे ॥

नृमूः । पुं । नर्त्तके ॥ नृत्यति । नृती०

। नृतिगात्रविक्षेपे ॥

नृत्तम् । न । नर्त्तने । ताण्डवे । लास्ये ॥ नृतीगात्रविक्षेपे । भावेक्तः ॥ भावाश्रयन्तु नृत्तंस्यान्नृत्यंतालखयाश्रयम् । आद्यंपदार्थाभिनयो मार्गो देशीतथा परः ॥ मधुरोद्धतभेदेन तद्द्वयं द्विविधंपुनः । लास्यताण्डवरूपेण नाटकाद्युपकारकम् ॥ गात्रविक्षेपमात्रे ॥

नृत्यम् । न । तालमानरसाश्रयसविलासाङ्गविक्षेपे । ताण्डवे । नटने । नाच इतिभाषा ॥ देवक्या प्रतीतोय स्तालमानरसाश्रयः । सविलासोङ्गविक्षेपो नृत्यमित्युच्यते बुधैः ॥ * ॥ ताण्डवञ्च तथालास्यं द्विविधं नृत्यमुच्यते । पेवलिर्वहु रूपञ्च ताण्डवं द्विविधंमतम् ॥ अङ्गविक्षेपबाहुल्यं तथाभिनयशून्यता । यत्रसा पेवलिस्तस्याः संगादेशीति लोकतः ॥ छेदनं भेदनं यत्रबहुरूपामुखावली । ताण्डवं बहुरूपं तद्यद्वयागसमुद्धतम् ॥ * ॥ इतिसङ्गी० ॥ नृत्येनाखमरूपेण सिद्धिर्नास्त्यस्य रूपतः । चार्वधिष्ठानवम् नृत्यं नृत्यमन्यद्विडम्बनेति ॥ गेयादुत्तिष्ठतेवा द्यं वाद्यादुत्तिष्ठतेलयः । लयताल समारब्धं ततो नृत्यं प्रवर्त्तते ॥ नृती०

। नृदुपधाच्चाकृपिचृतेरिति क्यप् ॥
नृदुर्गम् । न । चतुर्दिगवस्थायिच तुरङ्गरथयुक्तबहुपदातिरचिते रा ज्ञोवसतिस्थले ॥
नृदेव: । पुं । राजनि ॥
नृधर्मा । पुं । धनदे । कुबेरे ॥ नृरिव धर्म आचार: स्त्रस्नुलत्वादिर्वा ऽस्य। धर्मादनिच् केवलात् ॥
नृप: । पुं । भूपे । राजनि ॥ नृन् पाति । पा रचणे । आतोनुपेतिक: ॥ चतुर्योजनपर्यन्त मधिकारो नृपस्य च ॥ अस्यप्रशंसा यथा । अपुत्रस्य नृप: पुत्रो निर्धनस्य धनं नृप: । अमातुर्जननी राजा अतातस्यपितानृप: ॥ अनाथस्यनृपोनाथो ह्यभर्त्तु: पार्थिव: पति: । अभृत्यस्यनृपोभृत्यो नृपएवनृणांसखा ॥ सर्वदेवमयो राजा तस्मात् त्वामर्थये नृपेति कालिकापुराणम् ॥ षोडशसङ्ख्यायाम् ॥
नृपकन्द: । पुं । राजपलाण्डौ ॥
नृपति: । पुं । धनदे । कुबेरे ॥ भूपतौ । राजनि ॥ नृन्पाति । पा० । पाते र्डति: ॥ नृणांपतिर्वा ॥
नृपतिप्रिय: । त्रि । राजवल्लभे ॥ नृपस्य प्रिय: ॥
नृपतिवल्लभ: । पुं । नृपवल्लभ इतिख्या

ते औषधविशेषे ॥ यथा । आती फलं लवङ्गञ्च त्वगेलाटङ्करामठम् । जीरकञ्च यमानीच विश्वसैन्धवपञ्चकम् ॥ लौह मभ्रं रसं गन्धं ताम्रप्रत्येकश: पलम् । मरिचं त्रिपलं दत्वा छागीदुग्धेन पेषयेत् ॥ धात्रीरसेन वा पिष्ट्वा वटिकां कुरुयत्नत: । श्रीमन्नृहननाथेन विचिन्त्यपरिनिर्मित: ॥ सूर्यवत्तेजसाचाऽयं रसो नृपतिवल्लभ: । अष्टादशवटीं खादेत् पवित्र: सूर्यदर्शक: ॥ * ॥ हन्ति मन्दानलं सर्वं मामदोषं विसूचिकाम् । प्लीहगुल्मोदराष्ठीलायकृत् पाण्डुहलीमकम् ॥ शूलं कष्ठ शूलञ्च चत्त:शूलञ्च कामलाम् । शिरश्शूलं कटीशूल मानाहमोष्ठ शूलकम् ॥ कास श्वासामवातञ्च स्त्री पदंशोथमर्बुदम् । गलगण्डं गण्डमाला मस्त्रपित्तञ्च गर्दभीम् ॥ क्रिमि कुष्ठानि दद्रूणि वातरक्तं भगन्दरम् । उपदंश मतीसारं ग्रहणग्रर्श: प्रमेहकम् ॥ अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघात मसृग्दरम् । ज्वरं जीर्णज्वरं कण्डुं तन्द्रालस्यं वमिं भ्रमिम् ॥ दाहविद्रधिहिक्काश्च जडगद्गदमूकता: । बाधिर्यं स्वरभेदञ्च वृद्धिविसर्पकान् ॥ऊरुस्तम्भं रक्तपित्तं गुदभ्रं

साद्रचिं तृषाम्। कर्णनासानुगोर्था
स्वदन्तरोगश्च पीनसम् ॥ स्थौल्यञ्च-
शीतपित्तञ्च स्थावराणि विषाणि च
। वातपित्तकफोत्थांश्च द्वन्द्वजान् सा
न्निपातिकान् ॥ सर्वरोगचयान्हन्ति
चण्डांशु रिवपापहा । बलवर्णकरो
ह्येष आयुष्यो वीर्यवर्द्धनः ॥ परंवा
जीकरः श्रेष्ठः पटुतामन्त्रसिद्धिदः ।
अरोगी दीर्घजीवी स्या द्रोगी रोगं
विमुञ्चति ॥ रसस्यास्यप्रसादेन सुबु
द्धिर्जायतेजनः। इतिरत्नावली ॥

नृपद्रुमः। पुं। आरग्वधे ॥ राजादनी
वृक्षे ॥

नृपप्रियः। पुं। बेडुवांस इतिगौडभा
षाप्रसिद्धे वेत्रवंशे॥ राजपलाण्डौ॥
राजशुके॥ रामशरे॥ शालिधान्ये॥
आम्रे॥ त्रि। राजवल्लभे ॥ नृपस्य
प्रियः॥

नृपप्रियफला। स्त्री। वार्त्ताक्याम् ॥
इतिराजनिर्घण्टः॥

नृपप्रिया। स्त्री। केतक्याम् ॥ राजख
र्जूर्याम्॥ राजभार्यायाम्॥

नृपबदरः। पुं। राजबदरवृक्षे ॥ न। त
त्फले॥

नृपमन्दिरम्। न। सौधे। राजसदने॥

नृपमाङ्गल्यकम्। न। आहुल्यवृक्षे ॥

नृपमानम्। न। भभुजांभुक्तिकाला

वेदकवाद्यविशेषे॥ इतिशब्दाम्बुधिः॥

नृपलक्ष्म। न। राजच्छत्रे ॥ राजचि
ह्ने॥ नृपस्यलक्ष्म॥

नृपलिङ्गधरः। पुं। राजवेशधारिणि॥
यथा। निजग्राहौजसा वीरःकलिं
दिग्विजयेक्वचित्। नृपलिङ्गधरं शू
द्रं घ्नन्तंगोमिथुनंपदेतिश्रीभागवत
म्॥ प्रवृद्धेकलिकालेतुतद्विधाएवभू
भुजः। प्रजाधनादानपराश्चस्वतोदुः
खभागिनः॥

नृपवल्लभः। पुं। राजाम्रे ॥ त्रि। राज
प्रिये॥

नृपवल्लभा। स्त्री। राजमहिष्याम्॥के
विकापुष्पे॥

नृपशुः। पुं। कार्याकार्यविवेकशून्ये॥
ना पशुरिव। उपमितसमासः॥

नृपसभम्। न। राज्ञांसभायाम्॥नृपा
णांसभा। सभाराजामनुष्यपूर्वेति-
क्लीवत्वम्॥

नृपात्मजा। स्त्री। राजपत्न्याम् ॥ नृ
पस्य आत्मजा॥ कटुतुम्ब्याम्॥

नृपाध्वरः। पुं। राजसूययज्ञे॥

नृपान्नम्। न। राजान्ननामधान्ये॥रा
जान्ने॥

नृपाभीरम्। न। भक्ततूर्ये। राजभो
जनकालीनवाद्यविशेषे॥

नृपामयः। पुं। राजयक्ष्मणि। क्षयरो

गे ॥ राजरोगे ॥

नृपावर्त्तम् । न । राजावर्त्तरत्ने ॥

नृपासनम् । न । भद्रासने । सिंहासने । मण्याद्विकृतराजासने ॥ नृपस्य आसनम् ॥

नृपाह्वयः । पुं । राजपलाण्डौ ॥ नृपनामनि ॥

नृपेशः । पुं । सार्वभौमे ॥ नृपाणामीशः ॥

नृपोचितः । पुं । राजमाषे ॥ त्रि । राजार्हे ॥

नृम्णा । स्त्री । प्लक्षद्वीपस्य प्रधाननद्याम् ॥

नृयज्ञः । पुं । अतिथिपूजने । ब्राह्मणश्रेष्ठस्यार्चायाम् ॥

नृवराहः । पुं । वराहरूपधरभगवदवतारे ॥ अयंवलेर्द्वारीति पुराणम् ॥ नृवराहस्य वसति र्मर्त्त्यलोके प्रतिष्ठितेति पद्मपुराणम् ॥

नृशंसः । त्रि । घातुके । क्रूरे ॥ नॄन् शंसति । शंसुहिंसायाम् । कर्मण्यण् ॥ परुषे । रूक्षे ॥

नृषद् । पुं । मनुष्येषु विद्यमाने ॥ वुद्धौ ॥ नृषुसीदति । षद्लृ० । सं० क्विप् ॥

नृसिंहः । पुं । विष्णौ । हरेरवतारविशेषे ॥ यथा । यत्पादपद्ममकरन्दर

सा ऽनभिज्ञाविश्रामसाविधिपदाद नृहरिः । पुं । नृसिंहे ॥

पिसम्हरन्तः । नप्रामुवन्निपशुकर्मरताधनेहास्तस्मै नृसिंहवपुषे हरये नमस्ते इतिविष्णुभागवतम् ॥ अपिच । पुण्यारण्येनृसिंहैकनामसिंहोविराजते । यन्नादतःपलायन्तेमहाकिल्विषकुञ्जराइति ॥ अस्यवसतिर्जनलोके । यथा । नृवराहस्यवसतिर्मर्हर्लोकेप्रतिष्ठिता । नृसिंहस्यतथाप्रोक्ताजनलोके महात्मनइतिपाद्मेस्त्रष्टिखण्डे २८ अध्यायः ॥ मनुजोत्तमे ॥ ना सिंह इव । उपमितंव्याघ्रादिभिरितिसमासः ॥ नाचासौसिंहश्चेति वा ॥ रतिवन्धविशेषे । यथा । पादौसम्पीड्ययोनौचहठाल्लिङ्गप्रवेशनम् । हस्तयोर्वेष्टयेन्नाचंवन्धोनृसिंहसंज्ञकइति ॥

नृसिंहचतुर्द्दशी । स्त्री । वैशाखशुक्लचतुर्द्दश्याम् ॥ यथा । वैशाखस्यचतुर्द्दश्यांशुक्लायां श्रीनृकेशरी । जातस्तदस्यां तत्पूजोत्सवं कुर्वीतसव्रतमिति ॥

नृसिंहपुराणम् । न । नारसिंहे ॥

नृसेनम् । न । नरसेनायाम् ॥ नृणां सेना । विभाषासेनेतिपाक्षिकंक्लीवत्वम् ॥

नृसेना । स्त्री । नृसेने ॥ नृणांसेना ॥

नृहरिदासः। पुं। प्रह्लादे ॥

नेजकः। निर्णेजके। रजके ॥ नेनेक्ति। णिजिर्०। ण्वुल् ॥

नेत्। अ। शङ्कायाम् ॥ प्रतिषेधे ॥ विचारे ॥ समुच्चये ॥

नेता। त्रि। प्रभौ। नायके ॥ प्रवर्त्तके ॥ नयति। णीञ्०। तृच् ॥ निम्बवृक्षे ॥ प्रापयितरि ॥ निर्वाहके ॥ यथा। जगद्यन्त्रनिर्वाहको नेतेति विष्णुसहस्रनामभाष्यम् ॥

नेत्रम्। न। मन्थगुणे ॥ वस्त्रभेदे ॥ द्रुमस्यमूले ॥ रथे ॥ जटायाम् ॥ नाड्यामिति विश्वः ॥ वस्तिशलाकायाम् ॥ चक्षुषि ॥ अथ नेत्रपरीक्षा। नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम्। कोटरान्तःप्रविष्टञ्च तथास्तब्धविलोकनम् ॥ हरिद्राखण्डवर्णञ्च रक्तं वा हरितं तथा। दीपद्वेषि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥ चक्षुर्बलासबाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम्। तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥ नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम्। त्रिदोषलिङ्गसम्बन्धेन तन्मारयति रोगिणम्। त्रिदोषदूषितं नेत्रमन्तर्मग्नं भृशं भवेत्। त्रिलिङ्गं तल्लिखत्वा विप्रान्ते नोन्मीलयत्यपीत ॥ नयति नीयतेऽनेन वा। णीञ्०। सर्वधातुभ्यः ष्ट्रन्। दाम्नीत्यादिना वा ष्ट्रन् ॥ त्रि। नेतरि। नयनसाधने। प्रापयितरि ॥ प्रवर्त्तकेपि ॥

नेत्रच्छदः। पुं। अक्षिपुटे। नेत्रपिधायके चर्मपुटे। आंखकाढक्कन इति भाषा ॥

नेत्रपर्य्यन्तः। पुं। अपाङ्गे ॥ त्रि। नयनावधिके ॥

नेत्रपिण्डः। पुं। विडाले ॥ इति हारावली ॥ चक्षुर्गोलके ॥

नेत्रपुष्करा। स्त्री। रुद्रजटायाम् ॥

नेत्रबन्धः। पुं। बालानां क्रीडाविशेषे। आंखमिचौनी इति भाषा ॥

नेत्रमलम्। न। दूषिकायाम् ॥ नेत्रयोर्मलम् ॥

नेत्रमीना। स्त्री। यवतिक्तालतायाम् ॥

नेत्रयोनिः। पुं। इन्द्रे। वासवे ॥

नेत्ररञ्जनम्। न। कज्जले ॥ नमस्त्वा-चेयोजयेत्तु साधको नेत्ररञ्जनमिति-कालिकापुराणम् ॥

नेत्ररोगः। पुं। चक्षूरोगे ॥ तन्निदानमाह माधवः। उष्णाभितप्तस्य जलप्रवेशात् दूरेक्षणात् स्वप्नविपर्ययाच्च। स्वेदाद्रजोधूमनिषेवणाच्च छर्दिर्विघाताद्वमना

तियोगात् । प्रसक्तसंरोदनशोकता-पाच्छिरोभिघातादतिमद्यपानात् ॥ तथाऋतूनाञ्च विपर्य्ययेण क्लेशाभिघातादतिमैथुनाच्च । वातात् पित्तात् कफाद् रक्तादभिष्यन्दश्चतुर्विधः । प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः इति च ॥ वास्पग्रहात् सूर्य्यनिरोक्षणाच्च नेत्रविकारान् जनयन्ति दोषाः ॥

नेत्ररोगहा । स्त्री । वृश्चिकालीवृक्षे ॥ त्रि । चक्षूरोगनाशके ॥

नेत्रामयः । पुं । नेत्ररोगे ॥

नेत्राम्बु । न । अश्रुणि ॥ नेत्रयोरम्बु ॥

नेत्रारिः । पुं । सेहुण्डवृक्षे ॥

नेत्री । स्त्री । नद्याम् ॥ नाड्याम् ॥ श्रियि । लक्ष्म्याम् ॥ नेतृशब्दात्षित्त्वान् ङीष् ॥ प्रापणकर्त्र्याम् ॥

नेत्रोपमफलः । पुं । वातादे । वदाम इति भाषा ॥

नेत्रौषधम् । न । पुष्पकासीसे ॥ चक्षूरो गौषधमात्रे ॥

नेत्रौषधी । स्त्री । अजशृङ्ग्याम् ॥

नेदिष्टः । त्रि । अत्यासन्ने ॥ अयमेषामतिशयेनान्तिकः । इष्ठन् । अन्तिकबाढयोर्नेदसाधौ ॥ निपुणे । अङ्कोठ वृक्षे ॥

नेदीयमान् । त्रि । अत्यन्तसमीपे । अयमनयोरतिशयेनान्तिकः । ईयसुन् । अन्तिकस्य नेदादेशः ॥

नेपः । पुं । पुरोहिते ॥ नयति नीयते वा । णीञ्० । पानीविपिभ्यः पः ॥

नेपथ्यम् । न । रङ्गभूम्याम् । रङ्गभूमौ ॥ पुं । अलङ्कारे । प्रसाधने । वेशे ॥ वेशस्थाने ॥ नयति । णीञ्० । विच् । गुणः । नयो नेत्रस्य नेतुर्वा पथ्यः ॥

नेपालः । पुं । स्वनामप्रसिद्धे हिमालयैकदेशविशेषे ॥ यथा । जटेश्वरं समारभ्य योगेश्यन्तं महेश्वरि । नेपालदेशो देवेशीत्युक्तं श्रीशक्तिसङ्गमे ॥

नेपालकम्बलः । पुं । कुतपाख्ये ॥

नेपालनिम्बः । पुं । नैपाले । तृणनिम्बे । ज्वरान्तके । नाडीतिक्ते ॥

नेपालमूलकम् । न । हस्तिदन्तसदृशमूलकविशेषे ॥ नैपालमूलकं चान्यत्तद्भवेद्गजदन्तवत् ॥

नेपालिका । स्त्री । मनःशिलायाम् ॥

नेमः । पुं । काले ॥ अवधौ ॥ अर्द्धे । खण्डे ॥ प्रकारे ॥ कैतवे ॥ गर्त्ते ॥ नीयते । णीञ्० । अर्त्तिस्तुम्विति मन् ॥ नाद्यादौ ॥ अन्यस्मिन् । इतिशब्द० ॥

नेमिः । पुं । जिनविशेषे ॥ तिनिशद्

क्षे । तिनाश इतिभाषा ॥ स्त्री । त्रिकायाम् । कूपसमीपे रज्जुधारणार्थे चिदारुयन्त्रे ॥ चक्रान्ते । प्रधौ । रथचक्रस्य भूमिस्पर्शिभागे ॥ कूपान्तिके समानस्थस्थभागे ॥ इति शब्दरत्नावली ॥ नयति रथम् नयन्त्यनेनवा । णीञ्० । नियोमि: ॥

नेमिचक्र: । पुं । परीक्षिद्वंशजे असीमकृष्णस्यपुत्रे ॥

नेमिशम् । न । नैमिषारण्याख्ये क्षेत्रे ॥ ब्रह्मणाविसृष्टस्यचक्रस्य नेमि: शीर्यतेकुण्ठीभवति यत्र तत् ॥

नेमी । स्त्री । कूपस्यत्रिकायाम् ॥ चक्रान्तभागे । प्रधौ ॥

नेष्ट: । त्रि । निषिद्धे ॥

नेष्टु: । पुं । लोष्टे ॥ इतिशब्दाम्बुधि: ॥

नेष्टा । पुं । ऋत्विग्विशेषे ॥ नयति । णीञ्० । नयते: षुक्चेतितृन् ॥ नप्तृनेष्ट्रितिसाधु: ॥

नै:स्वम् । न । नि:स्वतायाम् । दुर्गतौ ॥

नैकटिक: । पुं । भिक्षौ ॥ भिक्षुणा ग्रामात् क्रोशे वस्तव्यमितिशास्त्रम् । प्रयोजनान्निकटे वसति । ठक् ॥ त्रि । निकटवर्त्तिनि ॥

नैकट्यम् । न । निकटत्वे ॥

नैकभेद: । त्रि । वहुविधे । उच्चावचे ॥ अनेकप्रकारे ॥ एकोभेदोऽस्य । न एकभेद: । सुप्सुपेति समास: ॥ न एकोभेदोऽस्येतिवा । उत्तरपदशब्दस्य समासचरमावयवेकृतत्वान्मध्यपदे न लोपाभाव: ॥

नैकषेय: । पुं । राक्षसे ॥ निकषाया अपत्यमित्यर्थे ढक् ॥

नैकृतिक: । त्रि । स्वस्मिन्नुपकारित्वभ्रममुत्पाद्यपरवृत्तिच्छेदनेन स्वाऽर्थपरे ॥ निकृत्यापरापकारेणजीवति । निकृत्यानिष्ठुरतया चरतिवा । ठक् ॥

नैगम: । पुं । न । उपनिषदि ॥ वणिजि । वाणिजे ॥ नागरे । पौरे ॥ नये ॥ ऋत्याम् ॥ निगमे भव: । तत्रभव: इत्यण् ॥ निगमएववा । प्र० अण् ॥ त्रि । निगम सम्बन्धिनि ॥

नैचिकम् । न । गो: शिरोदेशे ॥ इति हेमचन्द्र: ॥

नैचिकी । स्त्री । उत्तमायांगवि ॥ नीचैश्चरति । चरतीति ठक् । अव्ययानामितिटिलोप: । यद्वा । निचि: कर्णशिरोदेशे इतिरभस: । तत: स्वार्थेकन् । प्रशस्तं निचिकमस्या: । ज्योत्स्नादिभ्य इत्यण् ॥

नैज: । त्रि । निजसम्बन्धिनि । स्वीये ॥

नैत्यम् । न । नित्यत्वे ॥ इ०राधाकान्त: ॥

नैत्यकम् । न । नित्यानुष्ठेये । जप

यज्ञे । ब्रह्मयज्ञादिरूपे ॥ यथा । वेदोपकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हीति ॥ नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत् स्मृतम् । ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतमिति मनुः ॥

नैत्यशब्दिकः । पुं । नित्यशब्दत्ववादिनि ॥ नित्यः शब्द इति आह । तदाहेति माशब्दादिभ्य ठक् ॥

नैदानिकः । त्रि । निदानविदि ॥ निदानाध्येतरि ॥

नैद्रः । त्रि । निद्रासम्बन्धिनि ॥

नैपालः । पुं । नेपालनिम्बे ॥ त्रि । नेपालदेशसम्बन्धिनि ॥

नैपालिकम् । न । ताम्रे ॥ इति राजनि० ॥

नैपाली । स्त्री । नवमाल्याम् ॥ कुनट्याम् । मनःशिलायाम् ॥ सुवहायाम् । शेफालिकायाम् ॥ नेपाले भवा । तत्र भवस्त्वण् ॥ नील्यामिति शब्दरत्नावली ॥

नैपुणम् । न । नैपुण्ये ॥ निपुणस्य भावः ॥

नैपुण्यम् । न । निपुणत्वे ॥ निपुणस्य कर्म भावो वा । ब्रा० ष्यञ् ॥

नैमित्तिकम् । न । पुत्रजन्माद्यनुबन्धिषु जातेष्ट्यादिकर्मसु । निमित्तमासाद्यावश्यकर्त्तव्यतया विहितेषु ॥ त्रि । हेतुमति । निमित्तादागते ॥ ठक् ॥

नैमित्तिकक्रिया । स्त्री । निमित्तनिश्चयवदधिकारिकर्त्तव्ये कर्मणि ॥

नैमित्तिकदानम् । न । निमित्तनिश्चयवदधिकारिकर्त्तव्ये दाने ॥ यथा । यत्तु पापोपशान्त्यै वै दीयते विदुषां करे । नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितमिति गरुडपुराणम् ॥

नैमित्तिकधर्मः । पुं । निमित्ताश्रितधर्मे ॥ निमित्तमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते । नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥

नैमित्तिकलयः । पुं । प्रलयविशेषे ॥ चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ॥

नैमित्तिकस्नानम् । न । निमित्तनिश्चयवदधिकारिकर्त्तव्ये स्नाने ॥ यथा । चाण्डालशवपूयादिस्पृष्टाऽस्नातां रजस्वलाम् । स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तदिति ॥

नैमिशम् । न । नैमिशारण्ये ॥ नैमिशमेव । स्वार्थेऽण् ॥ तीर्थविशेषे ॥

नैमिशारण्यम् । न । प्रसिद्धेऽरण्यविशेषे ॥ नैमिशञ्च तदरण्यञ्च ॥

नैमिषम् । न । नैमिषारण्ये ॥ तीर्थ

विशेषे ॥

नैमिषकुञ्जम् । न । तीर्थविशेषे ॥

नैमिषारण्यम् । न । स्वनामप्रसिद्धेऽरण्यविशेषे ॥ अत्रारण्ये निमिषेण दानवबलं विष्णुना निहतम् । तथाहि । तेन चक्रेण तत्सैन्यं मासुरं दौर्जयं क्षणात् । निमिषान्तरमात्रेण भस्मसाद्बहुधाकृतम् ॥ एवंकृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलम् ॥ अरण्येऽस्मिंस्ततस्तेन नैमिषारण्यसंज्ञितम् । भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः ॥ इति वराहपुराणे गौरमुखं प्रति भगवद्वाक्यम् ॥ सुकथादिष्वधिष्ठिते सिद्धसिद्धस्थानम् ॥ सुकथा तत्र देवता । देवदेवाधिपः शम्भुर्नैमिषे च महेश्वरेत्यागमोक्तेः ॥ नैमिषे तु महास्थाने देवी सा लिङ्गधारिणीति देवीगीता ॥

नैमेयः । पुं । परीवर्त्ते । परिदाने । विनिमये ॥ निमानम् । मेङ्प्रणिदाने । अचोयत् । ईद्यति । गुणः । प्रज्ञाद्यण् ॥

नैयग्रोधम् । न । न्यग्रोधफले ॥ न्यग्रोधस्य विकारः । प्लक्षादिभ्योऽण् । तस्य विधानसामर्थ्यात् फलेन लुक् । न्यग्रोधस्य च केवलस्येत्यैजागमः ॥ न्यग्रोध

जातेष्वमसादौ ॥

नैयङ्कवम् । त्रि । न्यङ्कुमृगजातवस्त्रचर्मादौ ॥

नैयमिकम् । न । नित्यनैमित्तिकविधिप्राप्तसन्ध्याध्ययनजातेष्ट्यादौ ॥

नैयायिकः । त्रि । सांवादिके । स्याद्वादे । तर्कशास्त्राध्येतरि । तद्वेत्तरि च ॥ न्यायमधीते वेत्ति वा । क्रतूक्थादितिठक् ॥

नैयासिकः । त्रि । न्यासाभिज्ञे ॥ न्यासमधीते वेद वा । उक्थादित्वाट्ठक् ॥

नैरन्तर्य्यम् । न । निरन्तरत्वे ॥

नैराश्यम् । न । आशायाअभावे ॥

नैरुक्तः । त्रि । निरुक्तसम्बन्धिनि ॥

नैरुक्तिकः । त्रि । निरुक्ताध्येतृवेदित्रोः ॥ निरुक्तमधीते वेद वा । उ० ठक् ॥

नैर्ऋतः । पुं । राक्षसे ॥ पश्चिमदक्षिणकोणाधिपतौ ॥ सैंहिकेये ॥ निर्ऋतेरपत्यम् । तस्यापत्यमित्यण् ॥

नैर्ऋती । स्त्री । असुरशक्तौ ॥ अवाचीप्रतीच्योर्मध्यायां दिशि । नैर्ऋतकोणे ॥

नैर्गुण्यम् । न । निर्गुणत्वे ॥

नैर्झरम् । न । भौमस्यैवपानीयस्यप्रभेदे । निर्झरसम्बन्धिजले ॥ शैलसानुस्रवद्वारिप्रवाहो निर्झरो झरः । सतु प्रस्रवणश्चापि तत्रत्यं नैर्झरं ज

लम् ॥ नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु । मधुरं कटुपाकञ्च वातलं स्यादपित्तलम् ॥

नैर्मल्यम् । न । निर्मलत्वे ॥ विषयवैराग्ये ॥ यथा । विषयेष्वतिसंरागो मानसो मल उच्यते । तेष्वेव हि विरागस्तु नैर्मल्यं समुदाहृतमिति ॥

नैर्वाहिकम् । न । वाप्याः निर्गमनद्वारे ॥

नैविड्यम् । न । वंशफलकारगुणविशेषे ॥ यथा । नैविड्यं प्रौढता चापि समुन्नतत्वं च शीघ्रता । माधुर्यमिति पञ्चामी फलकृतेषु गुणाः स्मृताः ॥ निविडत्वे । सघनतायाम् ॥

नैवेद्यम् । न । निवेदनीयद्रव्ये ॥ अर्वाग्विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात् ॥

नैशम् । त्रि । नैशिके ॥ निशायां भवम् । निशाप्रदोषाभ्याञ्चेति शैषिकेऽर्थे पुंवाचि कोण ॥

नैशिकम् । त्रि । नैशे ॥ निशायां भवम् । निशाप्रदोषाभ्याञ्चेति पक्षे ठञ् ॥

नैषधः । पुं । नलभूपतौ ॥ निषधदेशाधीश्वरे ॥ निषधानामयम् । तस्येद मित्यण् ॥ त्रि । निषधसम्बन्धिनि ॥

नैषादकिः । पुं । निषादतनये ॥

नैष्कर्म्यम् । न । ब्रह्मविषयविचारनिष्पन्नज्ञाने ॥ सर्वकर्मशून्यत्वे । कर्मत्यागरूपसन्न्यासे ॥ निष्कर्मणो भावः । ष्यञ् ॥ वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यसिद्धिं लभते रोचनार्था फलश्रुति महाभागवते एकादशस्कन्धः ॥

नैष्किकः । पुं । रूप्याध्यक्षे । टङ्कादिशालायां नियुक्ते ॥ निष्के हेम्नि नियुक्तः । तत्र नियुक्त इति ठक् ॥ त्रि । निष्केण क्रीते ॥ निष्कस्य विकारे ॥ क्रीतवत् परिमाणादित्यति देशात् असमासे निष्कादिभ्य इति ठक् ॥

नैष्ठिकः । पुं । ब्रह्मचर्येण यावज्जीवं गुरुकुलेवासिनि । निष्ठा संसारसमाप्तिस्तत्प्रयोजने ब्रह्मचारिविशेषे ॥ यथा । नैष्ठिको ब्रह्मचारी च वसेदाचार्यसन्निधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥ अनेन विधिना देहं साधयेद्विजितेन्द्रियः । ब्रह्मलोकमवाप्नोति न चेहाऽऽजायते पुनः ॥ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येन शुद्ध्येत् स आत्महा ॥ आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम् । उद्बद्धं कृमिदष्टञ्च स्पृष्ट्वा चान्द्रायणं चरेत् ॥

निष्ठा विद्यतेऽस्य । मत्वर्थीयठक् ॥ निष्ठायां भवः भवार्थे ठञ्वा ॥ त्रि । निश्चले ॥

नैष्ठिकी । स्त्री । निश्चलायाम् ॥ टिड्ढेति ङीप् ॥

नैसर्गिकः । त्रि । स्वाभाविके ॥

नैस्त्रिंशिकः । त्रि । असियोधे । असिहेतौ ॥ निस्त्रिंशः प्रहरणमस्य । प्रहरणमिति ठक् ॥

नो । अ । अभावे ॥ नह्यति । नह० । डो प्रत्ययः ॥

नोचेत् । अ । निषेधे ॥

नोदना । स्त्री । चोदनायाम् ॥

नोदितः । त्रि । प्रवर्त्तिते ॥ प्रेरिते ॥

नोधाः । पुं । ऋषिविशेषे ॥ नूयते । णु० । नुवोधुट्चेत्यसिः । नवं दधाति वा ॥

नोपस्थाता । त्रि । दूरस्थे ॥ हीनार्थिविशेषे । अनुपस्थिते । पास नहीं इति भाषा ॥ यथा । अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः । आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥ न उपसमीपे तिष्ठति । ष्ठा० । तृच् ॥

नौः । स्त्री । नौकायाम् ॥ नौकाविशेषे । कलकी नाव इति यस्यादेशभाषा इष्टिम्बोट इतीङ्ग्रेजभाषा च ॥ यथा । ततः प्रवासितो विद्वान् विदुरेण नरस्तदा । पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥ सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् । शिवे भागीरथीतीरे नरैर्विस्रम्भिभिः कृताम् ॥ इति महाभारते आदिपर्वणि जतुगृहे १४६ अध्यायः ॥ नुद्यते । णुद० । ग्लानुदिभ्यां डौः ॥ यद्वा । नयति । णीञ्० । अन्येभ्यो० डः । नम् अवति । क्विप् । ज्वरत्वरेत्यूठ् । वृद्धिः ॥

नौका । स्त्री । नावि । तरण्याम् । निष्पद्याने । तर्याम् ॥ नौशब्दात्स्वार्थे कः ॥

नौकादण्डः । पुं । क्षेपण्याम् । नौकापार्श्वद्वयवद्धचालनकाष्ठे । दाँड इति भाषा ॥ नौकायाः दण्डः ॥

नौतार्य्यः । त्रि । नाव्ये ॥ नावातार्य्यः ॥

न्यक्रा । स्त्री । विट्कीटे ॥ न्यक्रा विट्कीटके स्त्रियामिति शब्दाम्बुधिः ॥

न्यकारुका । स्त्री । विट्कीटे । शकृत्कृमौ ॥ इति हारावली ॥

न्यक्करणम् । न । तिरस्कारे ॥

न्यक्कारः । पुं । अनादरे । अवहेलने ॥

न्यक्कृतिः । स्त्री । रीढायाम् । न्यक्कारे ॥

न्यच्चः । पुं । यामदग्न्ये । परशुरामे ॥

महिषे ॥ न । कार्त्स्न्ये ॥ तृणे ॥ त्रि । निकृष्टे ॥ नियतानि निकृष्टानि न्य अक्षाणियस्य यस्मिन् वा ॥

न्यग्रोधः । पुं । व्यामे । व्यामपरिमाणे ॥ वटवृक्षे ॥ शमीद्रुमे ॥ न्यक्रुणद्धि । रुधिर० । कर्मण्यण् ॥ हरौ ॥ न्यगर्वाक् रोहति सर्वेषामुपरिवर्त्तमानः इत्यर्थः ॥ सर्वाणिभूतानिन्यक्कृत्य निजमायया ऽऽवृणोतिरुणद्धीतिवा ॥ विषपर्ण्याम् ॥ मोहनाख्योषधौ ॥

न्यग्रोधपरिमण्डलः । पुं । व्यामपरिमितोच्छ्रायपरीणाहेपुरुषे ॥ एतादृशाः पुरुषास्त्रेतायुगे चक्रवर्त्तिन आसन् । यथा । महाधनुर्द्धराश्चैव त्रेतायां चक्रवर्त्तिनः । सर्वलक्षण सम्पन्ना न्यग्रोधपरिमण्डलाः ॥ न्यग्रोधौतु स्मृतौ बाहू व्यामोन्यग्रोधउच्यते । व्यामेनउच्छ्रयोयस्य अधऊर्द्ध्वञ्चदेहिनः ॥ समोच्छ्रयपरीणाहोन्यग्रोधपरिमण्डलः ॥ इतिमात्स्ये ११८ अध्यायः ॥

न्यग्रोधपरिमण्डला । स्त्री । अङ्गनाविशेषे ॥ यथा । स्तनौसुकठिनौयस्या नितम्बेचविशालता । मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डलेति शब्दमाला ॥

न्यग्रोधा । स्त्री । न्यग्रोध्याम् ॥

न्यग्रोधी । स्त्री । उपचित्रायाम् । मूषिकपर्ण्याम् ॥ न्यक्रुणद्धि वंहुमूलत्वात् । रुधिर० । पचाद्यच् । गौरादित्वात् ङीष् ॥

न्यञ्चंरुणद्धि इतिवा । कर्मण्यण् ॥

न्यङ्कुः । पुं । मुनिविशेषे ॥ बहुविषाणमृगविशेषे । बारहसिंगा इति भाषा ॥ न्यङ्कुःस्यादुर्लघुर्बल्यो वृष्योदोषत्रयापहः ॥ नितरामञ्चति । नावञ्चेरिच्युः । न्यङ्क्वादित्वात् कुत्वम् ॥

न्यङ्कुभूरुहः । पुं । शोणकवृक्षे । श्योनाके ॥

न्यङ्गम् । न । अवद्येइतिवाक्पारुष्येमिताक्षरा ॥

न्यच्छम् । न । क्षुद्ररोगविशेषे ॥ इति भावप्रकाशः ॥

न्यङ् । त्रि । निम्ने ॥ नीचे ॥ कार्त्स्न्ये ॥ न्यञ्चति । अञ्चु० । ऋत्विगिति क्विन् ॥

न्यञ्चितम् । त्रि । अधः क्षिप्ते ॥

न्यन्तः । पुं । चरमप्रदेशे । पश्चिमभागे ॥ नितरामन्तः ॥

न्ययः । पुं । नाशे ॥ निपूर्वादिणएरच् । न्ययंगतः पापः । नाशमित्यर्थः ॥

न्यस्तः । त्रि । निसृष्टे । त्यक्ते । निक्षिप्ते । स्थापिते ॥ यथा । शरणं मम न

र्हिजननी न पिता न सुता न सोदरा नान्यै। परमं शरणमिदमेव चरणं मम मन्बुद्धिदेशिकन्यस्यमिति ॥ न्यस्यते स्म । असु० । क्तः ॥

न्यस्तदण्डः । पुं । सन्न्यासिनि ॥

न्यस्तशस्त्रः । पुं । दिव्यपितृषु ॥ त्रि । अस्त्रशस्त्रवर्जिते ॥ न्यस्तानि शस्त्राणि यैर्येनवा ॥

न्याक्यम् । न । मूंडी मुडकी फरुही इत्यादिभाषाप्रसिद्धे भृष्टान्ने ॥ इति शब्दचन्द्रिका ॥

न्यादः । पुं । आहारे ॥ न्यदनम् । अद० । नोणचेत्यदेर्णः ॥

न्यायः । पुं । अभ्रेषे । कल्पे । देशरूपे उचिते ॥ नियमेन ईयते । इण० । परिन्योर्नीणोर्घूताभ्रेषयोरिति घञ् एषोत्रन्यायः उचितमित्यर्थः ॥ गैातमप्रणीते षोडषशपदार्थनिरूपणपरे शास्त्रविशेषे । तर्कविद्यायाम् । आन्वीक्षिक्याम् ॥ एतद्दर्शनमते नित्येच्छाकृतिमतिसश्रितः परमात्मा ईश्वरः । सतु ब्रह्मपदार्थोजीवातिरिक्तः । एतच्छास्त्रप्रयोजनं चार्वाकादि मतनिराकरण पूर्वकं जगत्कारणतयेश्वर संस्थापनं शंशयादि निरूपणेन वेदार्थनिर्णयश्च । एतद्दर्शनकारोगैातमः । ततस्तच प्रमाणादिषोडशपदार्थनिरूपणम् । तेषां तत्त्वज्ञानान्निश्श्रेयसम् । तस्यभाष्यकारोवात्स्यायनः । तद्वार्त्तिककारः कात्यायनः । तट्टीकाकारोवाचस्पति मिश्रः तच्छात्रउदयनाचार्यः । कुसुमाञ्जलिप्रभृति ग्रन्थकर्त्ता । तच्छिष्यप्रष्याश्हरिदासेरामभद्रगङ्गेशोपाध्यायचिन्तामणिकारादयोबहवः ॥ * ॥ प्रतिज्ञाहेतुदाहरणोपनयनिगमनात्मकपञ्चावयववाक्ये ॥ यथा । पर्वतोवह्निमान् धूमात् योयोधूमवान् ससवह्निमान् यथामहानसम् वह्निव्याप्यधूमवांश्चायम् तस्माद्वह्निमान् ॥ नीयते प्राप्यते विवक्षितोऽर्थोयेनस न्यायः । अध्यायन्यायेति घञन्तोनिपातितः ॥ नीतौ ॥ उपाये ॥ भोगे ॥ युक्तौ ॥ युक्तिमूलकदृष्टान्तविशेषे ॥

न्यायपथः । पुं । मीमांसादिशास्त्रे ॥

न्यायवृत्तः । त्रि । शास्त्रविहिताचारे । यथाशास्त्रव्यवहारिणि ॥

न्यायसारिणी । स्त्री । लुप्ताम् । युक्तिपूर्वककर्मकारिण्याम् ॥ इतित्रिकाण्डशेषः ॥ न्यायस्थले ॥

न्यायी । त्रि । न्यायवति ॥

न्याय्यः । त्रि । न्यायलब्धे । युक्ते औपयिके ॥ न्यायादनपेतम् । धर्म्मपथ्य

र्थं न्यायादनपेतइतियत् ॥ उचिते । शास्त्रीयधर्मे ॥ न्याये भवः न्यायादागतो वा । दिगादित्वाद्यत् ॥

न्यासः । पुं । त्यागे ॥ उपनिधौ । स्थाप्यद्रव्ये । प्रकाश्यस्थापितेद्रव्ये ॥ न्यस्यते । अस्तु० । कर्मणि घञ् ॥ अर्पणे ॥ सन्न्यासे ॥ यथा । व । विन्यासे विदिषान्यासं विद्वन्न्यासश्चभेचये हेतु विदेहमुक्तेश्च जीवन्मुक्तेक्रमात् ॥ काशिकाख्यपाणिनीय ... व्याख्यानग्रन्थविशेषे ॥ अङ्गेषु ... चिन्तने ॥

... सात्पूर्णाम् । न । निक्षेपप्रतिदा ... ॥

न्युङ्खः । पुं । सामः षट्प्रणवेषु । सामविशेषस्यषडोङ्कारांराम् ॥ सुन्दरध्वनौ ॥ अतिप्रिये ॥

न्युप्तः । त्रि । दत्ते ॥

न्युब्जः । पुं । दर्भमयस्रुचि । कुशस्रुचि ॥ न । कर्मरङ्गफले । कमरख इति भाषा ॥ आह्लादिपाचप्रभेदे ॥ त्रि । कुब्जे । कुबड़ा इति भाषा ॥ रोगेणवक्रपुरुषे ॥ अधोमुखे ॥ न्युब्जन्त्यस्मिन् । उब्जआर्जवे । अधिकरणेघञ् कवर्गाभावो भुजन्युब्जौपाणयुप तापयोरितिनिपात्यते ॥ न्युब्जनम् । भावे वा घञ् ॥ न्युब्जः पृष्ठवक्रत्वकारी यस्यास्ति । अर्श आद्यच् ॥

न्युब्जखड्गः । पुं । कटीतले । कुब्जखड्गे ॥

न्यूङ्खः । ओमोमित्यादिषोडशोङ्कारेषु ॥

न्यून । त्रि । गर्ह्ये ॥ ऊने ॥ न्यूनयति । ऊनपरिहाणे । पचाद्यच् । घञ्वा ॥

न्यूनपञ्चाशद्भावः । पुं । ऊनपञ्चाशद्भावे । पागले ॥

नस्त्रिमा ... । पुं । शिवे ॥ त्रि । नराऽस्त्रिमालःवति ॥

न्वै । अ । वितर्के ॥ * ॥ * ॥ * ॥

इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलाराम मिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना तथाश्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्हरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेनविरचिते शब्दार्थचिन्तामणौ तवर्गः समाप्तिङ्गतः मुद्राङ्कितकारया कायस्थ कुलश्रेष्ठ मुंशी श्रीरामप्रसादर्जने ॥ * ॥